उत्तररामचरितम् ।



प्रथमोऽङ्कः ।



(चित्रदर्शनम्)

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥ १ ॥

टीकाकृन्मङ्गलाचरणम् ।

विश्वं प्रत्यक्शरीरं गुणकृतिविहितं यस्य चानन्तशक्ते
सत्यं वै यस्य रूपं ह्यनुभवसुभगं योगिनां योगदृश्यम् ।
व्याप्तं सर्वत्र सृष्टिस्थितिलयगुणको निर्गुणो योऽगुणत्वाद्
यावान् यश्चिच्च योऽहङ्कृतिमयवपुषा संस्थितः सोऽहमात्ते ॥
कर्मप्रसूतिः प्रभवः फलानां, न तस्य कर्त्ता ह्यपरोऽस्ति मत्तः ।
अतो मयाऽस्मिन्नहमेव वन्द्यः, प्रभुत्वमास्तामपि मे मत्कृत्याम् ॥
छात्राणां सुखबोधार्थं श्रीजीवानन्दशर्मणा ।
क्रियते विस्तृता व्याख्या नाम्ना च सुखबोधिनी ॥

अथ तत्रभवान् निरवद्यविद्याविद्योतमानविद्वन्निकर-निकषायमाणमहाकविपरिकरकुमुदाकर राकानिशाकरः भवभूतिः, पावनीभिरमलरुचिररामचरितोद्भासितचिरन्तनकविभादित-कपर्द्दोग्मिनि स्तताभिः, सहृदयहृदयनन्दन-सन्तानप्रसूनामोदाधिवासिताभिः अश्रान्तसारसार स्वान्तविद्रावकापूर्वकरुणरसामरसरित्प्रवाह शतधारामाध्वीकमाधुरीभिः, साहित्यविद्याजुषां प्रेक्षावतां सौभाग्यलक्ष्मीभुवां सामाजिकानाञ्च तापतप्तमानसमनन्तर्पणाय अन्नमभिनवनाटकदामैकं ग्रन्थितुमीप्सुः, अपि च क्वचित् वैदर्भरीतिराजिविराजितसया नवजलधरनिनादानुकारिमृदुमधुरगभीरध्वनिमार्यैः माधुर्य-

गणाभिव्यञ्जक सुललित करुणरसानुप्राणित मञ्जुलपदविन्यासोपशोभितै कुत्रचिच्च ओज प्रकाशकविविधाडम्बरविनिर्यद्गौडरीत्यनुगुणसमासबहुलै पदोपन्यासैरुपेत तथा अप्रस्तुत बलाहक स्फूर्जथुसनाथैरमन्दद्युति द्योतितेन वाग्विभवमहिम्ना सभ्याना नाकसदोऽपि सुषमारुचिर सुचिरशान्तिपीयूषोपचित करुणरसमयमेकमनुपम मानससमर्पण प्रसवण सिसृक्षु, तत्र च अविगीत शिष्टाचारपरम्पराप्राप्ताम् अग ण्यालङ्कारिकवरेण्य मधारणपुरस्कृत कविशासनानुमता ग्रन्थारम्भपरिसमाप्तिप्रतिबन्धक प्रत्यूहव्यूहविध्वंसपटोयसीम् आदिकविकुलवन्दनामूलिकामभीष्टदेवस्तुतिमयीँ पूर्वरङ्ग प्रधानाङ्गभूता नान्दीं वाक्सम्पत्तिसिद्धये रङ्गविघ्नोपशान्त्यर्थञ्च आदावबतारयति, इद-मिति।—पूर्वेभ्य प्राचीनेभ्य कविभ्य वाल्मीक्यादिभ्य कविगुरुभ्य इत्यर्थ। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति, तत्त्वमसि श्वेतकेतो" इति, "स वा अय पुरुषो जायमान शरीरमभिसम्पद्यमान" इत्यादिश्रुतेश्च सर्वेषामेव जीवाना खलु परमात्मस्वरूपतयाऽवस्थानस्य उत्कीर्त्तनात, तपसा पारेऽवस्थितानां तपश्चर्याविधौत किल्बिषकषायाणामादिकवीना तत्सधर्मणा मवरेषामपि सुतरा चिदात्मभूतत्वमवधेयम्। [अतो हि तेषामपि स्वाभीष्टप्रदत्व मन्त्रे वेति ध्वन्यते]। अपि च "ब्रह्माण वाल्मीकि विदु" इति "कृष्णद्वैपायन विद्धि व्यास नारायण प्रभुम्" इति च स्मृत्यादौ दर्शनात् तेषामप्यात्मभूतत्वेन ऐशिक वाग्विभूतिसम्पन्नत्वादिति भाव। [इह तु "कविभ्य" इत्यत्र "गुरुभ्य" इति पाठान्तर दृश्यते, तदयम्—पूर्वेभ्य चिरन्तनेभ्य नलिनपुलिनप्रभव प्रभृतिभ्य, तेषा हि कविषु आदिभूततया तथैव प्रसिद्धे। गुरुभ्य कविसम्प्रदायप्रवर्त्तकेभ्य च तत्रभवद्भ्य अस्मद् गुरुभ्य इति विशेष्यीभूततया व्याख्येय, यद्वा—वाल्मीक्यादिभ्य आर्षचक्षुष्मद्भ्य कविकुलवन्दनीयेभ्य]। नमोवाक—नम उक्ता, [वैदिकोऽय प्रयोग णमुलन्त, तस्य कार्त्स्न्यश्छान्दस। यद्वा—नम नम शब्दस्य वाक उच्चारण यस्मिन्, तद् यथा तथा, प्रशास्महे इति क्रियाया विशेषणमेतत्, वचमित्यूह्यम्। वचे भावे घञ् कुत्वञ्च]। इद—वक्ष्यमाण, प्रशास्महे—प्रार्थयामहे। ["प्रशास्महे" इति तु "शास आशीर्वादे" इत्यादादिकस्य रूपम्, "आङ शासु इच्छायाम् इत्याशास्ते आङ् पूर्वत्व प्रायिकम्, तेन नमोवाक प्रशास्मह इति सिद्धम्" इति दीक्षिता। न तु शासनार्थस्य द्विकर्मकस्य परस्मैपदिन शास्ते, तस्य चेत तदा "शिष्महे" इति रूप स्यात]।

'यस्य हि समीपे प्रणति क्रियते, तदधिगतस्यैव वस्तुन तदन्तिके प्रार्थना कर्त्तुमुचिता' इत्येतदभिप्रेत्य तदीया विभूतिमभीप्सु आह, विन्देमेति।—आत्मन

सततपरार्थानुध्यानेन तत्त्वज्ञानमधिजग्मुष शब्दब्रह्मनिष्णातस्य भगवत वाल्मीके अमृता पीयूषरसधारामिव मानसामोदकरीं, देवतां निखिलतत्त्वार्थप्रकाशकरीं दिव्या कला बिभ्रति, विन्देम लभेमहि। तत्प्रसादात निर्णिक्तीकृता तदीया भारती मे स्फुरतु इति भाव। ["मुनिवर्यं नमस्कृत्य' "नारायणं नमस्कृत्य" इत्यादौ "उपपदविभक्ते कारकविभक्तिर्बलीयसी" इति न्यायेन, नम शब्दद्योतितप्रणत्यर्थककरीते व्याप्यत्वात् नारायणस्य कर्मत्वम्, इह तु 'कविभ्य' इत्यनेन गुणीभूतस्यापि नम-शब्दस्य योगात "नम स्वस्तिस्वाहा—" (२।३।१६ पा०) इत्यादिना चतुर्थी। गुणीभूतानामपि नम प्रभृतिशब्दाना योगे चतुर्थी शब्दविदां सम्मतैव, तथा च भट्टि', —"रावणाय नमस्कार्यो" इति। नातोऽत्र काऽप्यनुपपत्तिरिति ध्येयम्]।

अथवा आत्मन परमात्मन कलामशभूतामन्वताम् अमृतधाराभूता नित्यामित्यर्थ (मीमांसकमते शब्दस्य नित्यत्वाभ्युपगमात् तदधिष्ठातृदेवताया सुतरामेव नित्यत्वमर्थबललभ्यमिति, तथा च सत्यत्वाद्रसवत्त्वात् निरतिशयसुखहेतुत्वाच्च वेदवदनन्तकालव्यापिनीं) वाच वाग्रूपां देवता,—"काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च। शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मन॥" इति विष्णुपुराणवाक्यात् शब्दमय्या वाण्या, कामधेन्वादितन्त्रोक्तवाक्यात, "वा-सान्ते वा-लमध्ये डफ-कठ-सहिते कण्ठदेशे स्वराणां हचतत्त्वार्थयुक्तं सकलदलगत वर्णरूपं नमामि" इति मातृकासरस्वतीध्यानाच्च वर्णमय्या अपि वाण्या देवतात्वमवगम्यते। विन्देम लभेमहीति। [विन्दते तौदादिकात विधिलिङ्]। पूर्वेभ्य कविभ्यो नमस्कारपूर्वक वयमिद प्रार्थयामहे—यत्तेषा प्रसादात् तदीया रसभावमयी निखिलार्थोद्भासिका लोकमनोहारिणी वाक् अस्य ग्रन्थस्य प्रणयने अस्माक सहायभूता भवतु इति भाव। अस्य नाटकस्य वाल्मीक्यादिकविवाक्यमूलकत्वात् तेषु इत्थं प्रार्थनेति हृदयम्। वाग्देवी प्रसन्नीभूय तथाविधां काव्यदामगुम्फनप्रतिभां मह्य ददातु इति वाऽत्र तात्पर्यम्।

अथवा "भगवद्वन्दन त्वाद्य गुरुवन्दनपूर्वकम्" इति विधानात् मधुरगिरा सर्वेषामेव कवीना गुरुत्वात् प्राचेतसादीनामादौ वन्दनस्य औचित्यात् आदित एव तान् वन्दते, इदमिति।—पूर्वेभ्य कविभ्यो नम, तेषा काव्येषु पथिप्रदर्शकत्वात, वा—इदमपि च वय कम्—आत्मान विष्णु वा, कवेर्लोकसिद्धिप्रयोजनत्वाद् वाचश्च तत्संश्रयत्वादिति भाव, इद प्रशास्महे। किमिति तदेवाह, विन्देमेति।—यदात्मन विष्णोर्वा कलान् अशभूताम् अमृतां तदतमुरसां शाश्वतीं देवता देवप्रभावतीं वाच विन्देम इति, अन्यथा अस्य काव्यस्य वन्दनासम्भवादिति भाव।

"शोकं कारुण्यमन्वगे" इत्यालङ्कारिकाचार्य्यसमयानुसारेण एतदपि अर्थान्तरं व्यनक्ति तथाहि—या जननात् अनुपमस्निग्धतातममलस्नेहभरेण भृशं विवर्द्धिता देवयजनसम्भवा विदेहराजतनया अलीकलोकापवादभयाकुलव्यथितचेतसा स्वप्राणपतिमन्यनिरञ्जीवनसहचरेण स्वभर्त्रा रामचन्द्रेण अनिमित्तनिराकृता सती सुचिरं जनस्थानगहने मर्म्मभेदिकां कियतीं विप्रयोगजवेदनामनुभवन्ती, अनुपदन्तु परमकारुणिकेन वाग्देवता सवर्णीनामन्मीलनप्रभुव आदिकवेरनुकम्पया विविधज्ञानपदतपोधनपाश्रमपवित्रता राजमसिरिसैल्य निकारमसहमाना उवाच सपदि—"नयतु माम् भगवान् मन्त्रय तितपसम्या, न शक्ताऽस्मि ईदृशं जीवलोकपरिवर्त्तनमनुभवितुम्" इत्यभिमं व्यादरनी, धरातले विलय गतवतीति। तदा तु सा वैदेही पृथ्वीगङ्गाभ्यामवलम्बिता सती यामेव काव्यप्राणोपमकरुणरससमुद्दीपिकां वाचमभिदधे, काव्यार्थसूचकमतदेव गर्भितवचनमित्यभिप्रेत्य व्याख्यायते, तथाहि—पूर्वेभ्यः कविभ्यः आदिकवये वाल्मीकये नमः मदीयाऽसीमा भक्तिः प्रणतिरस्तु, वाकमन्तिमश्चेम व्याहारप्रणामः प्रार्थ्यं, अमृताम् अमृताधारभूताम् आत्मनः मम कलां बिभर्त्ति मातरमिति यावत्, वाच वाग्व्यापारवर्त्तीं मूर्त्तिमतीमित्यर्थः, देवता धरित्रीं विन्देम लभे, इदानीमनन्यगतिकामयथानिकृति सीदुमशक्तुवर्त्तीं दुहितरं मामस्यैव अर्वातिति प्रार्थना। सत्यं हि एतत्, पतिगृहनिराकृताया अपांगुलाया दुहितुः जननी एव शरणं भवतीति दिक्।

अथवा इत्थमपि काव्यार्थोऽत्र सूच्यते। तथाहि—श्लोकपूर्वार्द्धे शब्दशक्तिमूलकध्वनिमहिम्ना विश्रुतकीर्त्तीनां सवल्मीकवन्दितानां प्राक्तनानामेवात्र सवउना सूचिता, अत एव कविषु आदिभूततया वाल्मीकेरिव अन्येषामपि प्राक्तनानां महामहिमशालिनां वरणीयत्वमर्थवशात् सम्पन्नम्। सत्यप्येवम्, अत्र सूचितेषु वस्तुषु वर्णनीयस्य वरेण्यस्य भगवतः रामभद्रस्यैव प्राधान्यप्रतीतेः अन्येषां लक्ष्मणादीनाञ्च तथाविधमुख्यत्वानवगमात् बहुनेतृत्वास्कन्दितत्वात् न शङ्कनीयं नाटकस्य बहुनायकप्रयुक्तदोषसम्पृक्तत्वम्। अत एतस्मिन् काव्ये लक्ष्मणशत्रुघ्नयोर्योपवर्णनस्योपसर्जनीभूततया भगवता रामभद्रेण सीताविवासनार्थं लक्ष्मणः, लवणवधाय च शत्रुघ्नः प्रेषितः। एवञ्चाक्षेपवशात् प्रथमार्द्धोपनिबद्धं वस्तु ध्वनितम्। परार्द्धे च देवोपमभाग्यभाक् काचन विदुषी स्त्री उपवर्ण्यते इति गम्यते, सा च "आत्मनः कलाम्" इत्यभिधानात् च देवयजनांशभूता, देवस्य च कस्यचित् धर्मपत्नीति प्रतीयते। "अमृताम्" इति पदेन च सम्भाविताशुभाया विवशाया तस्या भागीरथीधरित्रीभ्यां जीवनविसर्ज्जनव्यवसायात् विनिवर्त्तनं क्रियाश्च समाश्वासनं समारब्धमिति समूह्यते,

नान्दान्ते (क) ।

सूत्रधार (ख)। अलमतिविस्तरेण(ग)। अद्य खलु भगवतः(घ)

अत द्वितीयाङ्कात् प्रभृति सप्तमाङ्क यावत् नाटकेऽस्मिन्नुपवर्णितस्य विदेहराजतनया-सम्वलितवस्तुन विहृति उपदर्शितेति सुधीभि समीक्ष्यावधेयम् ।

अत तु प्राधान्येन कविना करुणविप्रलम्भाख्यशृङ्गाररस उपवर्णित । करुण-वीरभयानकादयश्च रसा प्रधानरस-परिपोषणव्यपेक्षया यथायथमुपवर्णिता । अत रतेरेव स्थायिभावतया विशदीकृत्य नायिका-नायकयो सम्भोगमावेदयितु पुरतः चित्रप्रदर्शनव्यपदेशेन पूर्वराग आलिखित कविना। पुनश्च सप्तमाङ्के वनस्थली-मध्युषिताया विवासिताया विमनायमानाया सीताया समागमोपाय अनुसृत, कल्पनया च दर्शनस्पर्शनादिना रति क्रियच्च प्रकटीकृता इति। वृत्त पथ्यावक्त्रम्,— "युजोर्जेन सरिद्भर्त्तु पथ्यावक्त्र प्रकीर्त्तितम्" इति लक्षणात् ॥ १ ॥

(क) नान्द्यन्ते इति।—नन्दन्ति प्रसीदन्ति देवता यस्मात् सा नान्दी। [भ्वादि-गणीय-नदिधातोर्घञ्, पृषोदरादित्वाद् वृद्धि, ततो ङीप्] तथाहि,—"देवद्विजनृपा-दीनामाशीर्वादपरायणा। नन्दन्ति देवता यस्मात् तस्मान्नान्दीति कीर्त्तिता ॥" इत्या-लङ्कारिकवाक्यम्, सा च सूत्रधारेण कर्त्तव्या। अथवा—नन्दयति स्तवेन देवान् आशीर्वचसा च सभ्यान् नत्या चात्मान या शैलूषेरिता वाक्, सा नान्दीत्युच्यते, [नन्दयते कर्त्तरि पचादित्वादच् पश्चाच्च "प्रज्ञादिभ्यश्च" (५।४।३८ पा०) इति सूत्रेण स्वार्थे अणि स्त्रिया ङीप्, इति वा व्युत्पत्ति]। तथाहि—नाट्यप्रदीपे, "नन्दन्ति काव्यानि कवीन्द्रवर्गा कुशीलवा पारिषदाश्च सन्त । यस्मादल सज्जनसिन्धुहंसी तस्मादिय सा कथितेह नान्दी ॥" इति। सा चात्र सुप्तिङन्तरूपद्वादशपदात्मिका मया, तदा चात्र तिङन्तात्मक द्विविध, सुबन्तात्मकश्च दशविध, मिलित्वा च द्वादश पदानि इति बोध्यम्। अत्र नमोवाकमिति तु असमस्तरूपमेव ज्ञेयम्, समस्तपदानादरे नान्दीलक्षणायोगात्। एवमेवाह भरत स्वकृतनाट्यशास्त्रे पञ्चमाध्याये,—"सूत्रधार पठेत् तत्र मध्यम स्वरमाश्रित । नान्दी पदैर्द्वादश-भिरष्टाभिर्वाप्यलङ्कृताम् ॥" इति। पदमत्र त्रिविध बोध्य,—पादरूप, सुप्तिङन्तरूप, वाक्यरूपञ्च। तथा च नाट्यप्रदीपकार,—"श्लोकपाद पद केचित्, सुप्तिङन्त-मथाऽपरे। परेऽवान्तरवाक्यैकस्वरूप पदमूचिरे ॥" इति। वेणीसंहारे—श्लोकवये पादरूपा द्वादशपदा, शाकुन्तले—वाक्यरूपा अष्टपदा, इत्यादिना विस्तर। पदन्तत्र लौकिक वाचकत्वाद्यभिप्रायक ग्राह्यम् इति। नान्द्यन्ते इति।—तथाविधाया

कालप्रियनाथस्य (ङ) यात्रायाम् (च) आर्य्यमिश्रान् (छ)

नान्दी। अन्ते पाठ्यमाने इत्यर्थ । तथा चोक्तं,—"पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते। प्रविश्य तद्वदपर काव्यमास्थापयेत् नट ॥" इति।

अस्मिन् सतमततः मयर्ा प्रयासङ्गारिकाचार्य्याणां प्राचीनतया भरतादीनां मतमनुसृत्य "इ० पूर्वस्य" इत्यादि श्लोकयु नान्दीत्वमत्याहृतमिति प्रागभिदर्शितम्। तत्र भवाना न मन्यन्ते, "पदैर्युक्ता द्वादशभि" इत्यादिना विरोधात, अत एव केचन पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गमेतदिति वदन्ति। सत्यमेवम्, प्रथितकविग्रथितेषु बहुषु नाटकेषु, प्रथमत एव "नान्द्यन्ते सूत्रधार" एतावानेव पाठक्रम दृश्यते, कुत्रचिच्च कविकृतमङ्गलाचरणरूपस्य श्लोकस्यान्ते, अतस्तयोरविवादाय इत्थमेव "नान्द्यन्ते सूत्रधार" इत्येष सन्दर्भ व्याख्येय इति दर्पणकारेणोक्त—तथा हि "यत्र पश्चात् 'नान्द्यन्ते सूत्रधार' इति लिखनं, तस्यायमभिप्राय,—नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्, इत प्रभृति मया नाटकमुपादीयते इति कवेरभिप्राय सूचित इति।" इति। इदन्त्वत्र तत्त्व—यत् नव्यानां मते वाचिका एव नान्दी सूत्रधारेण प्राक् पठिता, एष खलु कविकृतमङ्गलाचरणरूप श्लोक इति।

(ख) सूत्रधार इति।—सूत्रं वर्णनीयवस्तूनि धारयति प्रवर्त्तयतीति सूत्रधार, नाटकस्यापको नटविशेष। तथा हि—"वर्णनीयतया सूत्रं प्रथमं येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधार स उच्यते॥" इति। [आहेति क्रियापदेनाध्याहार्य्येणान्वय]।

(ग) अलमिति।—अतिविस्तरेण अलं, वाग्बाहुल्य निष्प्रयोजनमिति भाव। "अलं भूषणपर्य्याप्ति शक्तिवारणवाचकम्" इत्यमर। द्वादशपदात्मकनान्दीप्रयोगेणैवाभीप्सित देवस्तुतिमयनान्दीप्रयोगनिर्वाहात, अत्र तावत वाक्प्रसरभूयिष्ठं निष्फलम् एवेति। विघ्नबाहुल्यशङ्कयैव तदनुष्ठानादिति तात्पर्य्यम्।

(घ) अथ प्ररोचना प्रस्तौत् सामाजिकजनानां समवधानाय प्रार्थयते, अद्येति।—भगवत,—ऐश्वर्य्यादिगुणवत।

(ङ) कालेति।—उज्जयिनीस्थितस्य कालप्रियनाथस्य—महाकालेत्यपराख्यस्य शिवमूर्त्तिविशेषस्य इत्यर्थ।—"यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेश योगिनी" इति, "महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम्" इत्यादौ च दर्शनात्। कथासरित्सागरेऽपि—"यस्यां वसति विश्वेशो महाकाल वपु स्वयम्। शिथिलीकृतकैलास-निवासव्यसनो हर॥" इति। अस्या देवमूर्त्ते

विज्ञापयामि, एवमत्रभवन्तो विदाङ्कुर्वन्तु (ज)—अस्ति खलु तत्र-

प्रतिष्ठास्थानमपि महाकालशब्देनोच्यते,—"प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्, पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्" इत्याद्यारभ्य, "पुण्यं यायास्त्रिभुवन गुरोर्धाम चण्डीश्वरस्य" इति, "अप्यन्यस्मिन् जलधर! महाकालमासाद्य काले" इति च। तट्टीकायां, महाकालं नाम पूर्वोक्तचण्डीश्वरस्थानमिति दर्शनाच्च ग्रन्थोक्त-कालप्रियनाथस्यैव नामान्तरं महाकाल इति तत्प्रतिष्ठास्थानञ्च महाकालशब्देनोक्त-मित्यनुमन्यामहे। अपरञ्चानेन महाकविना स्वाधिष्ठानविज्ञापनार्थं महावीर-चरिते दक्षिणापथान्तर्वर्त्ति-पद्मपुरनगरस्य निर्देशात् पद्मपुरस्य चावन्तीसान्निध्यात्, तदुक्ता कालिदासोक्ता च शिवमूर्त्तिरेकैवेत्यनुमीयते। "उज्जयिनी स्याद्विशालाऽवन्ती पुष्पकरण्डिनी" इति हेमचन्द्रः। विशालावन्त्युज्जयिन्यश्च एकार्थप्रतिपादिकाः। कालप्रियनाथो नाम विदर्भेषु भवभूतिनिवासे पद्मपुरनगरे समासीनः देवमूर्त्तिभेदः, तस्य यात्रायाम् उत्सवे इत्यपि केचित् व्याचक्षते।

(च) यात्रायाम्—यान्ति अत्र जनौघा इति, या धातोः ष्ट्रन्। कालप्रियनाथोत्सवे जनसमागमे मिलितसभायाम् इत्यर्थः। अपि वा कालप्रियनाथस्य भगवतः वार्षिकोत्सवव्यापारं सम्यक् साधयितुं पौरजानपदैरनुष्ठीयमाने महोत्सवे, समागता-निति शेषः। "यात्रोत्सवे गतौ वृत्तौ" इति हेमचन्द्रः।

(छ) आर्य्यमिश्रान्—पूज्यतमान्। "कर्त्तव्यमाचरन् कार्य्यमकर्त्तव्यमना-चरन्। तिष्ठति प्रकृताचारे स वै आर्य्य इति स्मृतः॥" इति। अपि च,—"कुल शील दया दान धर्म्म सत्य कृतज्ञता। अद्रोह इति येष्वेतत् तानार्य्यान् सम्प्र चक्षते॥" इति। तेषु मिश्राः श्रेष्ठाः तान्। आर्य्याश्च मिश्राश्च ये तथाभूतानिति वा विग्रहः, अतीव सत्कारार्हानित्यर्थः।—"स्यादुत्तरपदे मिश्रस्त्रिषु श्रेष्ठार्थवाचकः" इति दर्शनात्। कालप्रियनाथोत्सवे समागतान् पूज्यतमान् रसास्वादनिपुणान् पण्डितान् विज्ञापयामि कथयामि इति भावः।

(ज) किमिति तदेवाह,—अत्रभवन्तः,—पूज्यतमाः, उदाराशयाः सभासद इत्यर्थः, एवम्—इत्थं, विदाङ्कुर्वन्तु—विदन्तु, ["विदाङ्कुर्वन्त्वित्यन्यतरस्याम्" (३।१।४१ पा०) इति सूत्रेण निपात्यते] अवधारयन्तु इत्यर्थः। "त्रिषु तत्रभवान् पूज्यस्तदेवात्रभवान्" इति वैजयन्ती।

भवान् काश्यप (झ) श्रीकण्ठपदलाञ्छन (ञ) पदवाक्यप्रमाणतत्त्वज्ञो (ट) जातूकर्णीपुत्र भवभूतिर्नाम (ठ)।—

य ब्राह्मणमिय देवी वाग् वश्येवानुवर्त्तते।
उत्तरं रामचरितं तत्प्रणीत प्रयोक्ष्यते ॥ २ ॥

(झ) काश्यप,—कश्यपस्य गोत्रापत्य पुमानिति अनन्तरापत्यरूपेणैव कश्यपाभिधान भविष्यति, कश्यपगोत्रोऽयम् इत्यर्थ। ब्रह्मणो मानसपुत्रो मरीचिस्तत्पुत्र कश्यप तन्नामा काश्यप कश्चित् मुनिविशेष, स आदिपुरुषो यस्य सोऽपि काश्यप। तथाहि मनु,—"जमदग्निर्भरद्वाजो विश्वामित्रोऽत्रिगौतमा। वशिष्ठकाश्यपाऽगस्त्या मुनयो गोत्रकारिण ॥" इति। "एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते" इति च।

(ञ) श्रीकण्ठपदलाञ्छन,—श्री सरस्वती कण्ठे यस्य तथाविधानुपूर्व्यवच्छिन्न पदमुपाधिर्लाञ्छन परिचायक, चिह्नमित्यर्थ, यस्य स तथोक्त, श्रीकण्ठोपाधिक इत्यर्थ। "ऋचो यजूंषि सामानि सा हि श्रीरमृता सताम्"इति श्रुतिप्रतिपादिता वाक् इह श्रीशब्देनाभिहिता ज्ञेया, अथवा "श्रीवेशरचनाशोभा भारतीसरलद्रुमे' इति नानार्थकोष। लोकातिशायि कवित्वसम्पद्भूषितत्वादस्य कवे तदानीन्तनै विद्वद्भि श्रीकण्ठ इति विशेषण परिकल्पितमिति।

(ट) पदवाक्यप्रमाणतत्त्वज्ञ इति,—पदं सुप्तिङादिविभक्त्यन्तम, वाक्य तथाविधपदसमुदायात्मकम्, प्रमाण—प्रमीयत अनेनेति करणव्युत्पत्त्या तत्साधुत्वविनिर्णायक शास्त्रमुच्यते, पदवाक्यानां प्रमाण समीचीनत्वादिबोधक यत् शास्त्र शब्दशास्त्रमित्यर्थ, तस्य तत्त्वज्ञ याथार्थ्यवित्,—शब्दविद्यापार गत तत्प्रयोगनिपुणश्च इति समुदितार्थ।

(ठ) जातूकर्णीपुत्र,—जातूकर्णगोत्रसम्भूता तज्जननी आसीत, तस्या तनय, एतेनास्य मातामहगोत्रमप्यभ्यधायि। भवभूतिनाम इति।—भवस्य हरस्य भूति ऐश्वर्य्यमिव भूति ज्ञानसम्पत् यस्य तथाविध। भवभूतिरित्यन्वर्थनामा इति भाव। अथवास्य कवे "साम्बा पुनातु भवभूतिपवित्रमूर्त्ति" "तपस्वी काङ्गतोऽवस्थामिति स्मेराननाविव। गिरिजाया स्तनौ वन्दे भवभूतिसिताननौ॥" इत्यादिक वा महोदार श्लोकमाकर्ण्य सन्तुष्टेन राज्ञा भवभूतिरिति नाम्नैव सतत समाहूत आसीत्, इत्यैतिह्य प्रचरति, एतदभिप्रेत्यैतत् वा प्रकृतमिति बोध्यम्।

असौ कवि कथमन्वर्थनामा अभूत्? तदेव विवृणोति, यमिति।—ब्राह्मण यजनादिषट्कर्म्मनिरतमित्यर्थ य भवभूतिम् इयं सुप्रतिष्ठिता वाग्देवी वश्या

वशीभूता अभिप्रायानुसारिणी रमणीव अनुवर्त्तते अनुगच्छति, इङ्गितमात्रेणैवाभिमत साधयति इत्यर्थ, वाचि तस्यैतादृशी प्रभुता आसीत यत अभिलाषमात्रेणैव सा दुर्ज्ञमतिनिगूढमनिर्वचनीयमपि रसभाव यथागत प्रबन्धादिषु प्रवर्त्तयति इति भाव। तेन कविना स्वाभिप्रायानुरूप वस्तुजातमायास विनैव वर्णयितु शक्यते, इति फलितार्थ। [एतेन अतुलनीयोऽय कविरिति व्यज्यते]। तेन श्रीकण्ठभवभूतिना प्रणीतम् उत्तर पश्चिम पराड्डमिति यावत, सीताविवासनाश्रय रामचरितम्, ग्रिसीपनयनताडकावधवनप्रस्थानरावणनिधनसीताहरणादिक पूर्वचरितं महावीरचरितनिबद्ध विहाय रामस्य उत्तरचरितानामभिवर्णनात् उत्तररामचरितमित्यस्य नाटकस्य आख्या जाता। [तद्विग्रहस्तु—रामस्य चरितम् इति षष्ठीसमास, उत्तर रावणवधादुपरिष्टात् विहृत रामचरित यत्र तथोक्तम्, रावणहननात् परं भगवत राघवस्य पश्चिमकथाश्रय यद्दृक्त तद्दृत्तमित्यर्थ। यद्वा—उत्तरम् अन्तिम यत् रामस्य भावरसोज्ज्वल प्रत्यक्षचित्रबहुल चरितम् उत्तररामचरितमित्यर्थ, तदधिकृत्य कृतमेतत् इति व्युत्पत्त्या "अधिकृत्य कृते ग्रन्थे" (४।३।८७ पा०) इति सूत्रेण अणि, पश्चाच्च "लुबाख्यायिकाभ्यो बहुलम्" इति वार्त्तिकेन अण लुपि "उत्तररामचरितम्" इति सिद्धम्। यद्यपि कविना स्वयमेव "उत्तर रामचरितम्" इति कृत्वा नाटकस्य नाम अभिहित, तथाप्यस्माभि रामचरितस्य "अधिकृत्य कृते ग्रन्थे" इत्यनुशासनात् नाटक-नामपरत्वे उत्तरमिति पदान्वयायोगात् एकपदीकृत्य "उत्तररामचरितम्" इति रूपकनामाभिप्रायेणैव व्याख्यातम्। एव हि प्रयुञ्जते शिष्टा। "नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम्" इत्यालङ्कारिकवचनात, वर्णनीयगर्भितविषयमधिकृत्यैव कविना इत्थ नाटकाभिधान कृतमिति ध्येयम्]। नाटकलक्षणञ्च,—"नाटक ख्यातवृत्त स्यात् पञ्चसन्धिसमन्वितम्। * * * पञ्चादिका दशपरास्तत्राङ्का परिकीर्त्तिता॥" इत्यादि साहित्यदर्पणोक्तविधानादुपयुज्यते। प्रयोक्ष्यते अभिनेष्यते, नटभूमिकामधिष्ठाय अवस्थाऽनुकरणादिना सम्पादयिष्यते अस्माभिरिति शेष। अभिनयश्च चर्वैर्वचनैर्वेशभूषादिभि रसप्रकाशकमुखरागादिभिश्च क्रियते। उक्तञ्च,—"भवेदभिनयोऽवस्थाऽनुकार, स चतुर्विध। आङ्गिको वाचिकश्चैवमाहार्य्य सात्त्विकस्तदा॥" इति। इत्यत्राव प्ररोचना नाम भारतीवृत्ते अङ्गमेक प्रदर्शितम्।—"या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्ज्जिता संस्कृतवाक्ययुक्ता। स्वनामधेयै भरतै प्रयुक्ता सा भारती नाम भवेत्तु वृत्ति॥" इति नाट्यशास्त्रोक्ते, "य ब्राह्मणम्" इति पुरुषेण नटेन संस्कृतवाक्येन प्रयुक्त, तेन इय भारती नाम वृत्ति। "तस्या प्ररोचना वीथी तथा प्रहसनामुखे। अङ्गानि—" इति दर्पणोक्ते कविनैपुण्यप्रकटनेन

एषोऽहं कार्य्यवशादायोध्यिकस्तदानीन्तनश्च संवृत्तः (ड)। [समन्तादवलोक्य।] भो भोः। यदि तावदत्रभवतः पौलस्त्य-कुलधूमकेतोः (ढ) महाराजरामस्य अयम् अभिषेकसमयो

अभिनयदर्शनादौ सभ्यानां प्रवृत्त्युन्मुखीकरणात् प्ररोचना। तल्लक्षणं यथा,— "निवेदनं प्रयोजनस्य निर्देशो देशकालयोः। कविकाव्यनटादीनां प्रशंसा तु प्ररोचना"॥ इति। [अत्र वाग्देव्या वश्यात्वेन सम्भावनात् इवशब्देन च तत्प्रकाशनात् वाच्योत्प्रेक्षालङ्कारः। यत्र विशेषणादिमहिम्ना वैचित्र्यविशेषाधायकत्वं तत्रैवोपमाध्वनेर्विषयः, अत्र तु विशेषणायोगात् उत्प्रेक्षालङ्कारेणैव तद्वैचित्र्यप्रतीतेश्च 'वश्या भार्या इव' इत्युपमाध्वनेनावसरः]।

[अत्र श्लोके "यं ब्राह्मणम्" इत्यत्र "यं ब्रह्माणम्" इति, "प्रयोक्ष्यते" इत्यत्र "प्रयुज्यते" इति च पाठान्तरं दृश्यते, तदयन्तु—ब्रह्माणं—ब्राह्मणं,—"ब्रह्मा विप्रः प्रजापतिः" इत्यभिधानात्, प्रयुज्यते—अभिनीयते इति। एतत्पाठे अर्थगतवैचित्र्याभावेऽपि अलङ्कारगतं वैचित्र्यमस्ति। यथा हि—अब्जयोने दुहिता सती सरस्वती वश्या सेविकेव नियतं नितरां तमुपतिष्ठते, तथैव स्वतः प्रतिभासमानशब्दब्रह्मणः आदिकवेः वाल्मीकेरिवास्य मनसि वशीभूता वाक् सततमुदगात् इति। एतेन च कवेः महामहिमशालित्वं कृतेश्च प्रख्यातेतिवृत्तत्वेन नाटकत्वं सूच्यते इति]। पथ्यावक्त्रं वृत्तं, लक्षणन्तूक्तं पुरस्तादिति॥ २॥

(ड) एष सूत्रधारोऽहं कार्य्यवशात् प्रयोगानुष्ठानानुरोधात् इतो अन्यतः आगतोऽपि अयोध्यायां भव ["धन्वयोपधाद्वुञ्" (४।२।१२१ पा०) इति सूत्रेण वुञ्], आयोध्यिकः अयोध्यावासी इत्यर्थः, तदानीन्तनश्च, इदानीन्तनोऽपि रामसामयिकश्च संवृत्तः सञ्जातः, तथा चाभिनेयवस्तुनः समधिकं सौष्ठवं सम्पादयितुं तात्त्विकतया च यथायथमुपवर्णयितुं तत्तद्देशाचारविज्ञानस्यास्ति प्रयोजनमिति विचार्य्य सूत्रधारेण अयोध्याजनपदवासिभूमिकेदानीमस्माभिरधिक्रियते इत्युक्तम्, एवञ्च रामभद्रस्य नियतमवितथमेव चरितमत्रोपवर्ण्यते इति सूचितम्। समन्तात्—परितः, अवलोक्य—निरीक्ष्य, तत्प्रयोजनन्तु नटानां सम्यक् सावहितत्वविज्ञानार्थमिति।

(ढ) पुलस्त्यस्य ब्रह्मणो मानसपुत्रस्य दशानां प्रजापतीनामन्यतमस्य कस्यचित् निर्विशेषस्य अपत्यं पुमानिति पौलस्त्यो विश्रवा, तस्य तनुजः पौलस्त्यः रावणस्तस्य कुलं वंशः, राक्षसकुलम् इति यावत्, तस्य, धूमः केतुः चिह्नं यस्य सः धूमकेतुः अग्निः तत्स्वरूपः, समूलनाशकत्वात्। [एतेन राक्षसकुलस्य तृणोपमत्वं व्यज्यते]। केचित्

रात्रिन्दिवम् (ण) असहृतानन्दनान्दीकः (त) तत् किमिति विश्रान्तचारणानि चत्वरस्थानानि ? (थ)।

तु—धूमकेतु गगनोदितोत्पातविशेष इव प्रलयकारण तस्य तथोक्तस्य, दशानन कुलान्तकस्य इत्यर्थ इत्याहु, तन्न सम्यक् मन्यन्ते केचन, तथा हि तेषां मते—गगनोदित धूमकेतुना हि न स्वेन विनाश्यन्ते लोका, किन्तु सकल लोकसंहार-सूचकेन भूयते इति प्रसिद्धि। अत एव कालिदास,—"उपप्लवाय लोकानां धूमकेतुरिवोत्थित" इति, माघे च "शत्रूणामनिशं विनाशपिशुन * * * * केतुयकारास्पदम्" इति। सत्यमेव, विवदमाना विविधवादे बहूनामेव कवीनां नाशकत्वार्थाभिप्रायेणैव धूमकेतुशब्दप्रयोगदर्शनात् "पौलस्त्यधूमकेतो" इत्यस्य दशमुखकुलान्तकस्य इत्यर्थ एव समीचीन इति मन्यामहे, एतदभिप्रेत्यैव कविभिरस्य शब्दस्योपादान बहुश कृतम्। तत्र तु दिङ्मात्रमुदाह्रियते, तथा हि जयदेव,—"म्लेच्छनिवहनिधने कलयसि करवाल, धूमकेतुमिव किमपि करालम्" इति सुधीभिरवधातव्यम्।

(ण) रात्रिमिति।—रात्रौ च दिवा चेति रात्रिन्दिवम्। "अचतुर—" (५।४।७७ पा०) इत्यादिना द्वन्द्वान्तग्रहणात् रात्रे "मान्तत्व निपात्यते" इति काशिका।

(त) असहृतेति।—असहृता अविश्रान्ता, अविरतमनुष्ठीयमाना इत्यर्थ, आनन्दयन्ति इति आनन्दा आनन्दजनिका नान्दी मङ्गलजनिका तौर्यत्रिकरूपा प्रीतिवहा क्रिया यस्मिन् अभिषेकसमये स तथोक्त, [समयविशेषणमेतत्] अविश्रान्तानन्दसन्दोहरमणीय इत्यर्थ।

(थ) तदिति।—तत् तदा किमिति कथं विश्रान्ता निरुद्यमा अभिनयादि-व्यापारविरता ? तूष्णीम्भूता इत्यर्थ। चारयन्ति प्रथयन्ति कीर्त्तिमिति चारणा नटा येषु तानि तथोक्तानि चत्वरस्थानानि अङ्गनभूमय। [चर धातो औणा-दिक ण्वच्] यद्वा,—विश्रान्ता स्वस्वव्यापारतो विरता चारणा अधिकारिण पदवा येषु तथोक्ता। निर्व्यापारतया चत्वरेषु उपविश्य चारा विश्राम्यन्तीति भाव। [महाराजरामभद्राभिषेकसमय प्रकृतिजनानन्दविधायी कथकार हि ममुत्सुकं कुइ पौरजानपदं न नीयते ? इति प्रस्तावनाऽवतारणाफलक मटस्याभिधानमूहनीयम]। अद्य हि रामभद्राभिषेकसम्पत्तये अविश्रान्त नान्दी पाठात चारणप्रवेशाभाव इदानीं दृश्यते, तेन पुनश्चारणा चत्वरेषु विश्राम्यन्ति इति।

नट। [प्रविश्य] भाव! प्रेषिता हि इतः स्वगृहात् महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्ग-राक्षसाः, सभाजनोपस्थायिनो नानादिगन्तागता ब्रह्मर्षयो राजर्षयश्च, (ट) यदाराधनाय एतावतो दिवसान् उत्सव आसीत् (ध)।

अधुना यत नान्दीपाठस्य विरामाभाव अभिषेकस्य विघ्नयाहुल्यशङ्कया अभीष्टा मनहीयते तत् तस्मात् किम्? चत्वरस्थानेषु चारणा विश्राम्यन्ति इति सूत्रधार प्रश्नाशय।

(ट) भावेत्यादि।—भावेति सूत्रधारसम्बोधनम्। भावयति ख्यापयति प्रयोगमिति भाव सूत्रधार। "सूत्रधार वदेद्भावम्" इति साहित्यदर्पणे, 'भावो विद्वान्' इत्यमरकोषे च। प्रेषिता,—स्वस्थान प्रति समुचितसत्कार विधाय गमनायानुमता। इत अस्या अयोध्याया इत्यर्थ। प्लवन्त सन्तो गच्छन्तीति प्लवङ्गा वानरा उपलक्षणात् भल्लूका अपि, सुग्रीवहनुमज्जाम्बवदादय, ते च राक्षसा विभीषणादयश्चेति तथोक्ता। [रक्ष्यते हवि अस्मादिति, रक्षते असुन्, रक्षांस्येव राक्षसा स्वार्थे अण्]। सभाजनाय अभिषिच्यमानस्य रामस्य सवर्द्धनाय उपहारादिभि उपतिष्ठन्ते ये तथोक्ता, राम प्रीणयितुमभीप्सव इत्यर्थ। "समाजोपस्थायिन" इति पाठे तु—योगिनामूर्द्ध्वरेतसामन्येषाञ्च सधर्म्मणां समूहमुपस्थातु शीलं येषा तथाभूता इत्यर्थ, "पशूनां समजोऽन्येषा समाजोऽथ सधर्म्मिणाम्" इत्यमर। नानादिगन्तागता इति।—नाना बह्व्य या दिश तासामन्त सीमा तस्मात् अपि आगता उपस्थिता, सर्वस्या दिश विदिशश्च आयाता। ["नानादिगन्तपावना" इति पाठे तु—नानादिगन्ताना बह्वीनां दिशां पावना, स्वाधिष्ठानेनाभिक्रमणेन च तांस्तान् दिगन्तान् पूतीकुर्वन्त अयोध्यामागता इत्यर्थ]। "स्वभावे च स्वरूपे च अन्त शेषे पुमानपि। नाशे प्रान्ते च सीमायां निश्चयेऽवयवे पुमान्॥" इति कोष। ब्रह्माणश्च ते ऋषयश्चेति ब्रह्मर्षय, राजानश्च ते ऋषयश्चेति राजर्षय, [उभयत्रापि कर्मधारय]। ब्राह्मणा ऋषय वशिष्ठादय, क्षत्रिया ऋषय जनकादय, इति विविधा ऋषयो निमन्त्रिता आसन्।

(ध) यदाराधनायेति—यान् यानेव महाभागान् आराधयितु तोषयितुमेतावत इयत दिवसान् अहानि व्याप्येत्यर्थ ['कालाध्वनोरत्यन्तसंयोगे' (२।३।५ पा०) इति द्वितीया] उत्सव आसीदिति, इदानीमेव ते स्वगृह प्रति प्रस्थिता, अत एव हि निरुत्सवतया शून्यचारणसञ्चरणानि चत्वरस्थानानि दृश्यन्ते इति भाव।

सम्प्रति हि ।—

वशिष्ठाऽधिष्ठिता देव्यो गता राघवमातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥ ३ ॥

सूत्र । वैदेशिकोऽस्मीति पृच्छामि कः पुनरसौ जामाता ?(न)

नट । कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥ ४ ॥

उत्सवाभावे कारणान्तरमपि दर्शयति वशिष्ठेति।—वशिष्ठेन तन्नाम्ना रघुकुलगुरुणा अधिष्ठिताः अधिनायकत्वभूमिकामधिष्ठाय नीयमानाः [illegible] वशिष्ठस्यानुपदं क्रममाणा इत्यर्थः, देव्यो राघवमातरः कौशल्यादयः, अरुन्धतीं वशिष्ठपत्नीं पुरस्कृत्य अग्रे कृत्वा, यज्ञे द्वादशवार्षिकक्रतौ, तन्निमित्तमित्यर्थः, ["निमित्तात् कर्मयोगे" इति वार्त्तिकेन, यन्निमित्तिका क्रिया तस्मादेव सप्तमी अनुशिष्टा, तथा च "वस्त्रेषु रजकानवधीत् कृष्णः" इत्यादयः प्रयोगाः सङ्गच्छन्ते। निमित्तकर्मणोरवयवावयवित्वादिलक्षणसमवायसम्बन्धावच्छिन्नाधेयत्वाद्यवगाहिप्रतीतौ सत्यामेव निमित्तवत्पदोत्तरं सप्तमीति केचित्, तथा च तेषां मते यज्ञोद्देश्यकमाश्रमगमनकं यदतीतानेहा तदनुकूलकृतिमत्यः देव्यः इत्याकारकोऽन्वयबोधः। अत एव "चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्" इत्यादि सिद्धम्। यतो हि समवायनाधत्वादिप्रतीतौ निमित्तबोधकात् सप्तमी विहिता, अत एव, "मुक्ताफलाय करिणं हरिणं पलाय" इत्यादयः अपप्रयोगा एव इति वदन्ति]। जामातुः ऋष्यशृङ्गस्य आश्रमं तपोवनं गताः प्रतस्थिरे। लौकिकाचारं सम्यक् संरक्षितुं महर्षिः केवलं स्वयं नाचा स्वपत्नीमरुन्धतीमुरीकृत्य ययावित्यभिप्रायः। ऋष्यशृङ्गस्तु कथं हि जामाता आसीत् तदुपरिष्टात् व्यक्तीभविष्यति ॥ ३ ॥

(न) वैदेशिक इति।—वैदेशिकः विदेशवास्तव्यः अन्यदेशीयः, अभिनेतुमेव इदानीं क्षितयाऽऽर्याधिकभूमिकामधिगतः, अस्मि भवामि, अहमिति शेषः, इति—[illegible] पृच्छामि इत्युत्तरेणान्वयः, तथा च न पूर्वापरवाक्यविरोधः, अत एव "पृच्छामि कः पुनः" इत्यादिप्रश्नावसर आयाति। [अस्मीति—अहमर्थकमव्ययम् इत्यपि केचित्। पुनः—वाक्यालङ्कारे]।

कः पुनः ऋष्यशृङ्गः यज्जामाता आसीत्?—तदेव व्यनक्ति, कन्यामिति।—राजा दशरथः शान्तां नाम कन्यां दुहितरं व्यजीजनत् उत्पादयामास

[दैवादिकर्मनिधानो निजजनात् स्तुति रूपम्]। अपत्यकृतिकां अपत्याय अपत्यस्येव पिण्डदानादिसमर्थे अपत्यापत्यपिण्डादिक मस्तुमिति भाव, कृति करणं ग्रहणमिति यावत् यस्या ताम् ["शेषाद्विभाषा" (५।४।१५४ पा०) इति शेषेण कप्] दत्त्रिमां सुतामित्यर्थः, यां शान्तां नाम कन्यां राज्ञे लोमपादाय अङ्गाधिपाय ददौ अदितति, लोमपादस्यानपत्यत्वादिति भाव। अपुत्रो हि अङ्गराज लोमपाद अन्तिमे वयसि स्थित सखायमसतं दशरथं तद्दुहितरं शान्ताम् अपत्याय ययाचे किल, ततश्च अभिमतां तां स्वयं ऋष्यशृङ्गाय दातुमैषीत्, मुनिस्तस्मै तामुपयेमे। तथा च रामायणे, ऋष्यशृङ्गं प्रति लोमपादवाक्यम्।—

"अथ राजा दशरथ सखा मे दयित सुहृत्।
अपत्याय ममानेन दत्तेयं वरवर्णिनी॥
याचमानस्य मे ब्रह्मन्। शान्ता प्रियतमा मम।
सोऽयं त भर्त्ता धीर। यथैवाह तथा नृप"॥ इत्यादि।

अत एव हि लोमपादस्य जामातरि ऋष्यशृङ्गे राज्ञ दशरथस्य जामातृत्वसम्बन्ध न विरुध्यते। सुष्ठु सङ्गच्छते पुन "रामस्य मातर जामातुराश्रमं गता" इति कवेरितं वच। अपि च,—

"अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुत।
स राजानं दशरथं प्रार्थयिष्यति भूमिप॥
अनपत्योऽस्मि धर्मज्ञ। कन्येयं मम दीयताम्।
शान्ता शान्तेन मनसा पुत्रार्थं वरवर्णिनी॥
ततो राजा दशरथो मनसाऽभिविचिन्त्य च।
दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय स॥
प्रतिगृह्य च तां कन्यां स राजा विगतज्वर।
स्वपुरं यास्यति प्रीत कृतार्थेनान्तरात्मना॥
तां कन्यामृष्यशृङ्गाय प्रदास्यति स पार्थिव।
ऋष्यशृङ्गोऽपि च प्रीतो लब्ध्वा भार्य्यां भविष्यति"॥ इत्यादि।

उद्धृतवचने "दीयतां" 'दास्यते" 'प्रतिगृह्य' इत्यादिशब्दै दानविधि स्पष्ट एव। तथा चापुत्र इत्युपसंहारदर्शनात् औरसपुत्रवत् दत्तपुत्रोऽपि पुत्रप्रतिनिधि भवतीति गम्यते। यथाऽऽह मनु,—

"सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम्।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिम"॥ इति।

विभाण्डकसुतस्ताम् ऋष्यशृङ्ग उपयेमे. (प) तेन च साम्प्रत

पुत्रमित्यत्र पुंस्त्वमविवक्षित, स्त्रिया अपि कृत्रिमत्वादिक सम्भवति, यथा 'एवञ्च औरसदुहित्रभावे दौहित्रकृतलोकप्राप्तार्थं क्षेत्रजादिदुहितॄणामपि प्रतिनिधित्वेनोपादान सिद्धमेव" इति दत्तकमीमांसा ।

केचित्तु,—अपत्यकृतिकेतिपद पुत्रिकाकरणाभिप्रायक वदन्ति—"अस्या गर्भे य पुत्रो जनिष्यते, स मम पुत्रो भविष्यति" इति समयपूर्वं या कन्या दीयते, सा हि कन्याप्रदातु "पुत्रिका" इत्युच्यते । तथा च वशिष्ठ,—

"अभ्रातृका प्रदास्यामि तुभ्य कन्यामलङ्कृताम् ।
अस्या यो जायते पुत्र स मे पुत्रो भवेदिति" ॥

अपि च मनु,—

"अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्य भवेदस्या तन्मम स्यात् स्वधाकरम् ।
अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिका ।
विवृद्ध्यर्थ स्ववंशस्य स्वय दक्ष प्रजापति" ॥ इति ।

एवञ्च सति, वृद्धस्य लोमपादस्य आत्मन दुहितुरभावे सख्यु दशरथस्य दुहितरमादाय पुत्रिकाकरणमित्यवगम्यते इति वदन्ति, तत्तु न समीचीनमिति विभावयाम,—स्वात्मजाया एव पुत्रिकाकरणस्य शास्त्रकृद्भिरनुशिष्टत्वादिति ॥ ४ ॥

(प) विभाण्डकेति ।—पश्चात् विभाण्डकस्य तदाख्यस्य मुने सुत पुत्र ऋष्यशृङ्गस्ता कन्या शान्ताम् उपयेमे उदवोढ । ["उपाद् यम स्वकरणे" (१।३।५६। पा०) इति सूत्रेण स्वकरणरूपोद्वाहार्थबोधनादात्मनेपदम्]। "कथ हि ब्राह्मण सन् ऋष्यशृङ्ग क्षत्रियतनया शान्ता परिणिनाय ?" इति नैव शङ्का कार्य्या, असवर्णविवाहस्तु कलीतरयुगेषु अविगीत शास्त्रकृतामनुमतश्च आसीत् । तथा च मनु,—

"शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विश स्मृते ।
ते च स्वा चैव राज्ञ स्यु ताश्च स्वा चाग्रजन्मन ॥" इति ।

कलौ त्वसवर्णाया अविवाह्यत्वमधिकृत्यादित्यपुराण, व्यवस्थापूर्व्वक पुरा बुधैं समाचरितानि अधर्म्मान्यपि निवर्त्तितानि इत्याह । यथा,—

"दीर्घकाल ब्रह्मचर्य्यं धारणञ्च कमण्डलो ।
देवरेण सुतोत्पत्ति दत्तकन्या प्रदीयते ॥

द्वादशवार्षिकं सत्रमारब्धम्, (फ) तदनुरोधात् कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजनस्तत्र गत इति (ब)।

सूत्र। तत् किमनेन ? एहि राजद्वारमेव स्वजातिसमयेन उपतिष्ठाव (भ)।

नट। तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्र-पद्धतिं भाव (म)।

कन्यानामसवर्णानां विवाहश्च द्विजातिभिः।
आततायि द्विजाग्र्याणां धर्म्ययुद्धेऽनिर्दिष्टमनम्" ॥ इत्यादि।

(फ) तेनेति।—तेन च ऋष्यशृङ्गेण, द्वादशवर्ष भावि इति द्वादशवार्षिकं, आरब्धमुपक्रान्तम् इत्यर्थ, ["तमधीष्टो भृतो भूतो भावी"(५।१।८० पा०) इति सूत्रेण ठञि "वर्षस्याभविष्यति"(७।३।१६ पा०) इति सूत्रेण उत्तरपदवृद्धि]। सत्र—यज्ञ, आरब्धम्—उपक्रान्तम्।

(ब) तदिति।—तस्य आरब्धयज्ञस्य जामातु ऋष्यशृङ्गस्य अनुरोधात् अभिलाषात्, प्रार्थनया इति यावत्, कठोर पूर्णो गर्भो यस्या तथोक्तामपि [अपिकारस्तु तस्या-स्त्यागायोग्यतां सूचयति]। वधूं स्नुषां जानकीं विमुच्य त्यक्त्वा गुरुजनः श्वश्रूजन कौशल्यादिस्तत्र तदीययज्ञस्थाने गत, गुरुमतं ऋष्यशृङ्गस्य यज्ञवाटमियायेत्यर्थ।

(भ) तदिति।—तत् तदा, अनेन तत्तद्विषयकालोचनया वृथाकालहरणे नेत्यर्थ, किम् ? तदालोचनं निष्प्रयोजनमिति भाव। "तत् किमन्येन" इति पाठे—यद्येव तदन्येन अन्यकार्येण राजसमीपगमनादन्येन कार्येणेत्यर्थ, किं किंप्रयोजनम् ? एहि आगच्छ, स्वजातिसमयेन स्वजात्या चारणजात्या समयेन राजस्तुतिरूपेण समुदिताचारेण तथाविधमाचारमाश्रित्येत्यर्थ। "समया शपथाचारकालसिद्धान्त संविदः" इत्यमर। राजद्वारमेव उपतिष्ठाव गच्छाव। [अत्र उपतिष्ठते देवपूजाद्यर्थत्वाभावात् नात्मनेपदम्]।

(म) तेनेति—तेन हि आवयो इदानीं राजसमीपोपस्थानोचितत्वेन हेतुना, परिशुद्धां सर्वथा दोषरहितां सर्वावयवेषु अनिन्दितामित्यर्थ, उपस्थानस्य ... या या स्तोत्रपद्धति स्तुतिप्रणाली तां नृपोचितस्तोत्रप्रकारमित्यर्थ। ... पयतु भाव,—निश्चिनोतु, विमृश्यावधारयतु भवानित्यर्थ। राज्ञामुपस्थानसमये ...श्री स्तोत्रपद्धतिरनुसृतसमुचिता अगर्हणीया च भवति तथाविधमेव स्तोत्रप्रकार-...रानीमनुसर इत्याशय।

सूत्र। मारिष। (य)।—

सर्वथा व्यवहर्त्तव्ये कुतो ह्यवचनीयता।
यथा स्त्रीणा तथा वाचां साधुत्वे दुर्जनो जनः॥ ५॥

(य) मारिष।—आर्य्य। आर्य्यार्थप्रतिपादको नाटकादिषु एव प्रयोज्य एष शब्द। तथाहि भरत,—"किञ्चिदूनस्तु मारिष" इति, "आर्य्यस्तु मारिष" इत्यमरश्च। [रिषतं निषेधायकमाशब्देन एकपदीभाव, तथा च मा—न, रिषति दुष्टाभिनयेन सभ्याना शान्ति हिनस्ति इति व्युत्पत्त्या मारिषशब्द नटानाम् अभिनयसौष्ठव-परीक्षकाणा सम्भ्रुद्धार्थाभिधायक। तथा च साहित्यदर्पणे—"सूत्रधार वदेत् भाव इति वै पारिपार्श्विक। सूत्रधारो नारिषेति—" इत्यादि। "मारिष शीकभिद्यार्य्ये नार्य्योक्तौ पुंसि योषिति" इति मेदिनी]।

नीचाशया परोत्कर्षमसहमाना स्वाभिप्रायानुसारत अनिन्द्यमपि वस्तु गर्हयन्ति, अत तत्समाधानमसमाकलय्य स्वकृत्ये यतितव्यमन्यथा कर्त्तव्यार्थहानि स्यादित्यभि-प्रायेणाह, सर्वथेति।—व्यवहर्त्तव्ये व्यवहार्य्य सर्वेषा समालोचनीय इत्यथ, वस्तुनि सर्वथा सर्वप्रकारेण अवचनीयता अनिन्द्यता कुत ? दुर्जनसङ्कुले इह जगति सा कथमपि न सम्भवतीति भाव। जनापवादभय विहाय राजस्तुतिरूपमधुना व्यवहर्त्तव्यमभीष्ट वस्तु अस्माभि योग्यताऽनुसारत सम्पादयितुमीहनीयम् इत्याशय। हि—निश्चये। लोकनिन्दाया अपरिहार्य्यत्वमर्थान्तरन्यासेन द्रढयति, तथेति।—जन लोक स्त्रीणा सतीना योषिता साधुत्वे पांशुलत्वादिदोषराहित्ये सत्यपि साध्वी-नामपि विशुद्धे चरिते इत्याशय, यथा दुर्जन खल भवतीति शेष, अयथाऽपवाद-मुद्भावयतीत्यथ, तथा वाचा कविवचसा साधुत्वे निराकाङ्क्षत्वादिदोषापरामृष्टत्वेऽपि माधुर्य्योज्ज्वल्यादिविषये स्वभावत एव दुर्जन असूयति,—सर्वथा दोषासम्पृक्ताया वनितायामिव सत्कविभणितौ दुर्ज्जन खल प्रकृत्या खलु दोषदर्शी भवतीति भाव। दोषदर्शित्वमेव दौर्जन्यम्" इति सचेप। ("पिशुनो दुर्ज्जन खल" इत्यमर)। तथा च मौक्तिकामामाभाणक,—"काव्ये भव्यतमेऽपि विज्ञनिवहैरास्वाद्यमाने मुहु दोषा-न्वेषणमेव मत्सरजुषा नैसर्गिकी दुर्ग्रह। कामारेऽपि विकाशिपङ्कजचये खेलन्मराले पत्र कीचकङ्कुपुटेन कुत्सितवपु शम्बूकमन्विष्यति॥" इति।

[अत व्यवहर्त्तव्ये वस्तुनि वचनीयत्वाभावरूप कार्य्ये, निर्द्दोषासु वाक्षु दुर्जनाना स्वाभाविकामृगयाकारित्वरूपस्य कारणस्य समर्थकम्, अत पूर्वार्द्धवाक्य प्रति परार्द्ध-वाक्यस्य समर्थकत्वात् कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासालङ्कार,

नट। अतिदुर्जन इति वक्तव्यम् (र),—

देव्यामपि हि वैदेह्यां सापवादो यतो जनः।
रक्षोगृहे स्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः॥ ॥ ६ ॥

सुतरां तत्तापकताऽत्राभिप्रायेण सङ्गीयते। अवचनीयत्वेऽत्र नञः पर्युदासरूपत्वेन अप्रसज्य इत्यत्र समासे गुणीभावात् विधेयतानवगमः। परन्तु अत्र प्रसज्य प्रतिषेधरूपत्वेन विधेयत्वमप्रतीतमिति अविमृष्टविधेयांशकत्वरूपो दोषो ज्ञेयः। "स तथा अवक्तव्यम्" इति पाठे तु,—सर्वथा अपवादभीतिं परित्यज्य व्यवहर्तव्य राजस्तुतिरूपमभीप्सितं कर्म समाचरणीयमित्यर्थः। यतः पद्धतेरतिशुद्धत्वेऽपि निन्दा परिहारसम्भावना नाप्नोतीति भावः।

अतीत प्रथमाङ्के नानाचरणोत्पादकहेतुतया वर्णितस्य सीताविवाहरूप प्रथमानेकमङ्गलकथाप्रसङ्गस्य आलेख्यसन्दर्शनस्य प्रारम्भेण समायुक्तत्वात् पञ्च-सन्ध्यन्तर्गतबीजस्य समाधानरूपमङ्गं वेदितव्यम्, यतोऽत्रैव सतीनामपि धुरि कीर्तनीयाया कुलललनाऽनुकरणीयचरिताया विदेहराजतनयाया दुराशयैरन्यथा ऽपवाद वितनिष्यते इति बीजायागमनं सूचितम्, तथाहि—"बीजस्यागमनं यत्तु तत्समाधानमुच्यते" इति लक्षणात्। एवञ्च वचनीयत्वस्य अवर्जनीयत्वात् व्यवहार-विलयप्रसङ्गाच्च कुलक्रमागतं राजस्तुतिरूपं कर्म अस्माभिरवश्यमेवानुष्ठेयमिति सूत्रधाराशय]॥ ५॥

(र) अतिदुर्जन इति।—अग्निशुद्धिरूप बाधकप्रमाणमविश्वस्याविगणय्य च विपन्न प्रभाव सर्वथा वितथस्यासतोऽपि दोषस्य उत्कीर्त्तनात् ते अतिदुर्जना एव इति निश्चय। अत "अतिदुर्जन" इति वक्तव्य, न तु केवल दुर्जन इति भाव।

गर्भितबीजोत्क्षेपस्यपदेशेन, अतिदुर्जन इति वक्तव्यतायां हेतुमाह, देव्यामिति।—यतो यस्मात् जनो लोक, [जातावेकवचनम्] देव्या दीप्तिमत्या [देवीपदो-पादानात् पूतचारित्रा ध्वन्यते] साध्वीनामादर्शभूतायामित्यर्थ, विदेहस्य जीवन्मुक्तस्य राजर्षे जनकस्य [देहाभिमानशून्यस्य इत्यर्थोऽपि ध्वन्यते] अपत्यभूतायाम् [एतेन सत् कुलसम्भूतत्व शुद्धातिशयश्च ध्वनितम्] वैदेह्यामपि सर्वथा निर्दोषायामपि [अपिशब्द अपवादायोग्यत्व व्यनक्ति] जानक्यां सापवाद अयथाऽपवाददानेऽपि न शङ्काकुल इत्यर्थ। तत अतिदुर्जन इति वक्तव्यमिति भाव। अथ निन्दामूलं दृढं चेत् तदपायार्थप्रतीकारश्च न सम्यगित्याशङ्क्याह, रक्ष इति।—रक्षसो राक्षसस्य रावणस्य गृहे भवने [रक्ष शब्दोपादानात् दुःशीलत्व दर्शितं] स्थितिवास एव अस्य अपवादस्य

मूल कारणम् [स्थितिशब्देन च चिरकालोषितत्व सूचित, मूलशब्दाश्च अग्निपरीक्षया निर्ब्बीकृतायामपि तस्यां मूलसत्त्वात् अपवादपादपस्य पुन प्ररोहसम्भावना अस्तीति ध्वनितम्]। अत्राय भाव,—असहाया वैदेही असहृत्तलङ्काधिपभवन मधिष्ठाय कियन्त काल निनाय, तावन्मात्रमेव मूलमवलम्ब्य दुर्जना "तच्चरितभ्रंशो जात" इति शङ्कमाना पूतचरितायां तस्याम् अयथा परिवादमारोपयन्ति इति। ननु अग्निदाहशुद्धा दग्धीभूतापवादपादपस्य कथ हि पुन प्ररोह उदपादि ?—इत्याशङ्क्याह, अग्नीति।—अग्निशुद्धौ रावणवधानन्तर वह्निपरीक्षया सम्यक् विशोधितायां सत्यामपि तस्यां जानक्याम्, अनिश्चय,—सीता तात्त्विकतया विशुद्धचरिता न वेति सर्वे एव अयोध्यावासिन सन्दिहन्ति। अग्निशुद्धावित्यनेन बाधप्रमाणमुक्तम्, तथा च बाधज्ञानसत्त्वे कथं हि संशय ? इति तु न शङ्कनीय, तस्याप्रामाण्यशङ्काग्रस्तत्वात्, अप्रामाण्यग्रहाभावविशिष्टस्यैव बाधज्ञानस्य प्रतिबन्धकत्वनियमात्, अथवा—वह्निपरीक्षायाम् अनिश्चय अप्रत्यय, तत्र संशय अस्त्येव जनानाम्। तथा च अग्निपरीक्षाया लङ्कायामेव समाहितत्वात अयोध्यात लङ्काया सुदूरावस्थितत्वाच्च "वह्निपरीक्षा भूता न वा" इति सर्वे एवायोध्यावासत्व्या दुर्जना शङ्कन्ते इति भाव। [तुशब्दस्तु वैलक्षण्य द्योतयति, तथा च रक्षोगृहावस्थिते अग्निपरीक्षायाश्च उभयोरेव समदर्शिकत्वे समकालिकत्वेऽपि एकस्य विश्वसिति अपरस्य न विश्वसिति इति महत् वैषम्यमागच्छति, तेन अयोध्यावासिनामतिदौर्ज्जन्य ध्वनितम्।

एतद्धि, वैदेहीविवासनादिसम्वलितेतिहासलक्षणप्रस्तुताभिधेयरूपकार्य्यार्थस्य समुत्पत्तिरूपतया "सर्वथा ऋषय देवताश्च श्रेयो विधास्यन्ति" इत्यादि वक्ष्यमाणवचसा च वाल्मीके भागीरथ्याश्च विक्लवाया प्राणवियोगव्यवसिताया सीताया समाश्वासनरूपकार्य्यार्थोत्पत्तिरूपतया च मुखसन्धेरुपक्षेपरूपमङ्गं वेदितव्यम्, तथा हि "काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृत" इति लक्षणात्। एतेन लोकापवादस्यापरिहार्य्यतया भिया सतीनामिव वाचा वर्जनमनौचित्यमिति गम्यते। इति कर्पूरात।

अत्र प्रकृतदोषकारणासत्त्वेऽपि अपवादरूपकार्य्योत्पादवर्णनात विभावना, पराद्धे च अग्निशुद्धिरूपहेतुसद्भावेऽपि पूतत्वविषयकनिश्चयरूपकार्य्याभावदर्शनात् विशेषोक्ति, इत्यनयो विभावना विशेषोक्त्यो नैरपेक्ष्येणैवावस्थानात् संसृष्टि। अग्निशुद्धौ इत्यत्र अपिशब्दस्यावश्यवाच्यत्वात् तदनभिधानात वाच्यस्यानभिधानरूपो दोष, अपि च अनिश्चय इत्यत्र प्रसज्यप्रतिषेधस्य नञ समासे गुणीभावात् पूर्ववत् अविमृष्टविधेयांशभावरूप दोष उभय]॥ ६॥

गङ्गा। यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत, ततोऽतिकष्टं स्यात् (ल)।

भट। सर्वथा ऋषयो देवताश्च श्रेयो विधास्यन्ति (व)। [परिक्रम्य (श)] भो भोः! क्व इदानीं महाराजः ? [आकर्ण्य](ष) एवं जनाः कथयन्ति।—

स्नेहात् सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।

(ल) यदीति।—यदि पुनः यदिशब्दोऽयमत्र सम्भाव्यमानं विस्मयसम्वलितसम्भावनारूपार्थमावेदयति, पूर्णकमेतदप्यन्यत् सीताविवासनबीजमवधेयम्। एतेन प्रथमाङ्कार्थः सूचितः। किंवदन्ती—सीतालोकापवाद इत्यर्थः, महाराजं रामभद्रं प्रति, स्पृशेत् कर्णाकर्णिकतया गच्छेत्, महाराजं तां गमयेदित्यर्थः। ("महाराजं प्रति स्यात्" इत्यपि पाठो दृश्यते, महाराजमधिकृत्य भवेत्, तद्भार्यापवादमवलम्ब्य उदियादित्यर्थः। "किंवदन्ती जनश्रुतिः" इत्यमरः)। ततस्तदा अतिकष्टमतिशयमनोऽभिमकारणं भवेत्। रामं प्रति इयं किंवदन्ती नु निरतिशयं व्यथयिष्यतीति भावः। ['राजाहःसखिभ्यष्टच्' (५।४।९१ पा०) इति सूत्रेण टच्प्रत्ययेन महाराज इति पदं सिद्धम्। "परिस्पन्देत्" इति पाठे तु—महाराजश्रवणान्तिकं शनैर्गच्छेदित्यर्थः। पाठोऽयं साधीयस्तया प्रतिभाति]।

(व) ऋषयो वशिष्ठादयः, देवता ब्रह्मादयश्च, सर्वथा सर्वप्रकारेण श्रेयो मङ्गलं विधास्यन्ति कारयिष्यन्ति, [सान्त्वनावाक्यमेतत्]। एवंविधपुण्यव्रतस्य महात्मनो रामस्य पतिव्रतायाः सीतायाश्च न कदाचिदपि देवा ऋषयश्चाशुभं सहिष्यन्ते, प्रत्युत शुभमेव विधास्यन्ति, अतो नाशुभमाशङ्कनीयमिति भावः। [एतेन महर्षिणा वाल्मीकिना भगवत्या पृथिव्या च अस्याः समाश्वासनरूपावशिष्टाङ्कार्थः सूचितः]।

(श) परिक्रम्य—राजभवनगमनार्थमिव कियन्ति पदान्तराणि गत्वेत्यर्थः।

(ष) आकर्ण्येति।—जनानामुत्तरमाकर्णयितुं दत्तावधान इव इत्यर्थः। इदमाकाशभाषितमुच्यते। उक्तञ्च—"अप्रविष्टैः सहालापो भवेदाकाशभाषितम्" इति।

किं कथयन्तीत्याह, स्नेहादिति।—जनको विदेहाधिपः स्नेहात् प्रीत्या सभाजयितुं सम्भाषणादिना वनात् प्रतिनिवृत्तं राज्ये चाभिषिक्तं रामं सवर्द्धयितुं, सत्कर्तुमिति यावत्, सीताञ्च प्रीणयितुमित्यर्थः। [चौरादिकस्य सभाजधातोः तुमुन्]

देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद् विशति वासगृहं नरेन्द्रः ॥ ७ ॥

इति निष्क्रान्तौ (स) ।

इति प्रस्तावना (ह) ।

एत्य मिथिलातः अयोध्यायाः राजभवनमागत्येत्यर्थः, अमूनि एतानि, दिनानि दिवसान् उत्सवेन आनन्दव्यापारेण, नीत्वा यापयित्वा, अद्य विदेहान् विदेहानां जनपदं स्वराज्यमित्यर्थः, गतः प्रस्थितः । ततस्तस्मात् पितृगमनादित्यर्थः, विमनसः खिन्नायमानायाः देव्याः सीतायाः परिसान्त्वनाय विनोदनाय, नरेन्द्रो रामः, धर्मासनात् विचारासनात्, स्वीयसिंहासनात् इति यावत्, धर्मासनं परित्यज्येत्यर्थः, [ल्यबलोपे पञ्चमी] वासगृहं शुद्धान्तं विशति प्रविशति । राजकार्य्यमपि परित्यज्य देव्याः परिसान्त्वनार्थं स्वयमेव याति इति [अनेन सीतां प्रति रामस्य स्नेहातिशयो द्योतितः] । वसन्ततिलकं वृत्तम् ।—"ज्ञेयं वसन्ततिलकं तभजा जगौ गः" इति तल्लक्षणात्, चतुर्दशाक्षरपादेषु छन्दःसु २९३३ तमसंख्यकः प्रस्तारो बोध्यः ॥ ७ ॥

(स) इतीति ।—इति इत्थं, मिथः सम्भाषणच्छलेन प्रस्तुतविषयमवतार्य्य नटसूत्रधारौ निष्क्रान्तौ, रङ्गान्निर्गतौ ।

(ह) प्रस्तावना—आमुखं, प्रस्तुताक्षेपिणी मिथः सम्भाषणा इत्यर्थः । तथा हि,—"नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥" इति साहित्यदर्पणम् । इयञ्च प्रस्तावनाऽत्र प्रयोगातिशयरूपा ज्ञेया, तथा हि, एकस्मिन् प्रयोगे, रामभद्राभिषेचनमधिकृत्य नटानां प्रासङ्गिकाभिनयव्यापारसौष्ठवावगाहिनि अन्योऽन्यालापे प्रवृत्ते, अन्यविधस्य प्रयोगस्य, राजर्षेः जनकस्य विदेहगमनात् विमनायमानां जानकीं समाश्वासयितुं रामभद्रस्य वासगृहप्रवेशरूपस्य प्रयोगान्तरस्य प्रवृत्ते तेनैव च पात्रप्रवेशदर्शनात्,—"यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते । तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥" इति साहित्यदर्पणोक्तलक्षणस्य सङ्गते इति केचित् वदन्ति, तन्न समीचीनतया प्रतिभाति । यतः,—दर्शितप्रयोगयोरन्योऽन्यतादात्म्यतत्तद्धाविधभेदप्रतीतिविरहात् एकविधौ एव प्रयोगौ इति प्राक् प्रदर्शितवदनारब्धाति महाराजरामभद्रस्योपचारकरणरूपैकनियोगमधिकृत्य प्रस्तुतस्य पात्रस्य प्रवेशप्रदर्शनात्, तथा चात्र प्रस्तुतवृत्तान्तप्रतिपादकवाग्विक्षेपमवतार्य्य

[ततः प्रविशति (क) आसनोपविष्टो रामः सीता च]।

रामः। देवि ! समाश्वसिहि, न हि ते गुरवश्चिरं शक्नुवन्ति अस्मान् वियोक्तुम् (ख)।—

निष्क्रान्तेन सूत्रधारेण विमर्शितविषयमाश्रित्य पात्रं रामभद्रः सीतासन्निधौ प्रवेश्यमानः कठोरगर्भां दोहदवतीं विमलां सतीं सीतां प्रीणयितुं, रामगृहमनुप्रविश्य लोकपरिवादभीतेन रामेणाऽवलक्षिता चिराय तथाविधाया विश्वस्ताया सीताया वनाय निष्क्रमणरूपमुपस्थितमर्थान्तरमन्यत् समाक्षिप्तम्, अत एवेयमवलगितरूपा एव प्रस्तावना शेषा। तथा हि,—

"यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते।
प्रस्तुतेऽन्यत्र वाऽन्यत् स्यात् तच्चावलगितं द्विधा॥ इति।

तत्राद्यं यथोत्तरचरिते। समुत्पन्नवनविहारगर्भदोहदाया सीताया दोहदकार्य्यं अनुप्रविश्य जनापवादादरण्ये त्यागः" इति धनिकेन दशरूपके व्याख्यातम्।

अत्र त्वर्वाञ्चः,—

"कालं प्रवृत्तमाश्रित्य सूत्रधृक् यत्र वर्णयेत्।
तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवर्त्तकम्"॥ इति।

अन्येषामपि ग्रहणात् कालपदन्त्वेव उपलक्षणमेव, सूत्रधारैरितप्रस्तुतविषयमधिकृत्य पात्रप्रवेशस्यैवात्र मुख्यत्वात्, अथवा—कालपदमत्र न केवलं शरदादिविशेष-कालवाचकम्, अपि तु प्रवृत्तसंवादविषयकं यत्किञ्चिद्वस्तुवर्णनाऽभिप्रायकमिति। ननु—"आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तिः" इत्यादौ यद्यपि प्रवृत्तकालसमानगुणवर्णनया पात्रप्रवेशस्य सूचितत्वात् धनिकादिभिरपि एवमेवोक्तत्वाच्च कालविशेषमाश्रित्य कुत्रचित् किञ्च तत्तद्विषयकश्लेषमुखेन वर्णनं दृश्यते, तथापि तत्र केवलं नास्य ग्रन्थस्य तात्पर्य्यम्, शरदाद्युपवर्णनन्तु सम्पातायात-मिति वैचित्र्यविशेषाधानायैव श्लेषमुखेणाभिधानमिति वा, अन्यथाऽपि तस्याः सम्भवात्, नो चेत् उक्तायाः क्वचिदन्तर्भावाभावात् प्रस्तावनायाः पञ्चविधत्वं व्याहन्येतेति सुधीभिः निपुणं विचारणीयमिति वदन्ति।

(क) अथाऽङ्कः प्रस्तूयते,—ततः इत्यादिना। तथा हि—"प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः। अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः॥" इति दर्पणकारः। प्रविशति—अभिनयस्थले आविर्भवति इत्यर्थः।

(ख) समाश्वसिहि,—समाश्वस्ता भव, शोकं विजहीहीत्यर्थः। [समाङ्पूर्वकात्

किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति ।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ८ ॥

श्रमधातो लटि मध्यमपुरुषैकवचनम् । "रुदादिभ्यः—" (७।२।७६ पा०) इति सूत्रेण इट्]। ते हि प्रसिद्धा प्रसिद्धार्थकत्वात् तच्छब्दस्य न यच्छब्दापेक्षा । गुरवः,—तव पिता [गौरवे बहुवचनम्], अस्मान्—त्वां माञ्च ["त्यदादीनां सहोक्तौ यत्परं तत् शिष्यते" इति नियमात् अस्मच्छब्दस्य शेषः, द्वित्वे बहुत्वम्]। चिरं वियोक्तुं विहाय स्थातुमित्यर्थः, न शक्नुवन्ति अस्मत्स्नेहाकुलाः त्वरितमेवागमिष्यन्ति इति भावः ।

यदि तथा न शक्नुवन्ति, तदा किमिति अस्मान् परित्यज्य एतावत्कालान् तिष्ठन्तीत्याह, किन्त्विति ।—किन्तु यत्र तिष्ठति तत्र हेत्वन्तरं विरोधीति किन्तु-शब्दार्थः । किं तत् हेत्वन्तरमित्याह—अनुष्ठानानाम् अग्निहोत्रजपहोमादिपारत्रिक-कर्मणां नित्यत्वम् अहरहः क्रियमाणत्वम्, अकरणे प्रत्यवायजनकत्वं, सति सम्भवे अपरिहार्य्यत्वं वा, अथवा,—अनुष्ठानस्य वैवाहिकेऽग्नौ कर्त्तव्यतया उपदिष्टस्य सायं-प्रातर्होमरूपस्य कर्म्मणः नित्यत्वं नियतकर्त्तव्यत्वम् अनुष्ठानीयत्वमित्यर्थः, [कर्त्तृपदम्], स्वातन्त्र्यम् ऐहिककार्य्येषु स्वच्छन्दचारित्वम् अपकर्षति रुणद्धि, स्वैरावस्थानं न सहते इत्यर्थः, श्रेयस्पदकाङ्क्षिणां मुनीनां व्रतादिरूपपारत्रिकपुण्यकर्माणि तान् सांसारिक-विषयोपभोगादिकर्म्मभ्यो निवारयन्तीति भावः । हि तथा हि, एतदेव विशिष्य व्यनक्ती-त्यर्थः आहितः यथाविधि स्थापितोऽग्निर्यैस्ते तथोक्तानाम् अग्न्याहितानां साग्निकाना-मित्यर्थः गृहस्थता गृहमेधिधर्मः, प्रत्यवायैः विघ्नभूतैः, नित्यकर्मबाहुल्यैरित्यर्थः, विहिताकरणजन्यैः पापैः वा, सङ्कटा—सं—सङ्कीर्णं कटं स्थानं यत्र तथोक्ता, विघ्न-बहुला सङ्कुला वा इत्यर्थः । "हेत्ववधारणप्रश्नविशेषेषु तथाहि हि" इति कोषः । "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः । अवश्यकरणीयतत्तत्कर्म्मानुरोधेन अग्न्याहिता-नामन्यत्रावस्थितिः असम्भवा एव,—"यावज्जीवमग्निहोत्रं जुहोति" इति श्रुतिप्रति-पादितानाम् अनुष्ठानानां नित्यत्वात् । राजर्षिः जनकस्तु साग्निकः गृहमेधी आसीत् । साग्निका हि वैवाहिकेऽग्नौ सायंप्रातर्होमादिलक्षणं कर्म नित्यमेवानुतिष्ठन्ति, मृतानाञ्च तथा तेनैव अग्निना आत्मनः दाहः विहितः, तथाननुष्ठाने प्रत्यवायश्रुतेः । तदनुरोधा-देवासौ झटिति स्वगृहं प्रति निवृत्तः, न हि मात्सर्य्याभाववत्तया तान् जहौ ।—

"निर्दिष्यापि स्वदारेषु परिक्रम्याग्नित्रयं तथा ।
प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं वसेत् ॥"

इति शातातपवचनात्, विदितः राजर्षिः जनकः कियन्ति अहानि व्याप्य

सीता। जाणामि अज्जउत्त। जाणामि, किन्तु सन्दाव आरिणो बन्धुजणविप्पओआ होन्ति (ग)। *

राम। एवमेतत्, एते हि हृदयमर्मच्छिदः संसारभावाः, येभ्यो बीभत्समानाः सन्त्यज्य सर्वान् कामान् अरण्ये मनीषिणो विश्राम्यन्ति (घ)।

* जानामि आर्यपुत्र। जानामि, किन्तु सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति।

प्रवास गतः, स पुन चिर तस्थौ। अग्निहोत्रादिनित्यकर्मणां प्रतिनिधिविधानं हि सत्यकामाभिप्रायकमिति सुधीभिरवधेयम्।

[अथ पराहगततवाक्यार्थस्य पूर्वार्द्धं प्रति हेतुत्वेनोपन्यासात् पदार्थहेतुक काव्य लिङ्गम्, अपि च विशेषाङ्गतसामान्येन प्रथमार्द्धगत विशेषोऽस्य सोपपत्तिकः क्रियते, इति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, तयोरन्योऽन्यमनपेक्षत्वेनाव स्थानाभावात् अङ्गाङ्गिभावेन सङ्करः। न हि जनकप्रयाणरूपस्य कार्यस्यानु ष्ठाननिश्चयत्वरूपैककारणे सत्यपि अङ्गान्तरेण खलेकपोतिकान्यायेन सङ्कटेत्यादिना कारणान्तरस्य प्रतिपादनात् समुच्चयोऽलङ्कारः शङ्कनीयः, तथा च प्रदर्शितकारणयो तथाविधविच्छित्तिविशेषाभावात् अन्योऽन्यगतसूक्ष्मभेदाप्रतीतेश्च नायमस्यालङ्कारस्य विषय इति सुधीभिर्विभाव्यम्] ॥ ८ ॥

(ग) आर्यपुत्रेति।—आर्यस्य गुरोः श्वशुरस्य पुत्र सुत इति पत्नीकृत पति सम्बोधनम्। जानामि जानामीति शोकावेगात् द्विरुक्तम्। तथा चोक्तम्,— "विवादे विस्मये हर्षे खेदे दैन्येऽवधारणे। प्रसादने सम्भ्रमे वा द्विस्त्रिरुक्तिर्न दुष्यति॥" इति। बन्धुजनानां पित्रादीनां विप्रयोगा विरहाः सन्तापकारिणः भवन्ति खेद जनयन्तीत्यर्थः। अत्र अनीचानां योषितां भाषा शौरसेनी विज्ञेया।

(घ) एवमेतत्—एतदेवमेवम्प्रकारं, त्वया यदुक्तं तत् सत्यमेव इत्यर्थः। एते— अनुभूयमानास्त्वत्सदृशाश्चान्ये इत्यर्थः, हि—निश्चये, हृदयमर्मच्छिदः,—हृदयस्य मर्माणि जीवनस्थानानि सन्धिस्थानानि वा छिन्दन्तीति ते तथोक्ताः हृदयग्रन्थिविश्लेषकाः, वैराग्यजनका इत्यर्थः, संसारभावाः,—संसरति यस्मिन् इति व्युत्पत्त्या संसारः, प्राक्तनकर्मणां भोगाय यत्र हि पौनःपुन्येन प्रवर्त्तनं भवति इत्यर्थः, तत्र ये भावाः विषयरूपा विविधा अनर्थागमा इति भावः, शरीरपरिग्रहजन्यसुखदुःखसन्तति

कञ्चुकी । (ङ) [प्रविश्य] रामभद्र !—"[इति अर्द्धोक्ते साशङ्कम्] (च) महाराज !

रामः । [सस्मितम्] (छ) आर्य्य ! ननु 'रामभद्र' इत्येव मां प्रति उपचारः शोभते तातपरिजनस्य, तत् यथाऽभ्यस्त-मभिधीयताम् । (ज)

कञ्चु । देव ! ऋष्यशृङ्गाश्रमात् अष्टावक्रः (झ) सम्प्राप्तः ।

रिति यावत । तथा च बन्धुजनविप्रयोग तदन्तर्भूत एव । तेभ्यो विषयेभ्य इत्यर्थं, बीभत्समानाः [इच्छायां सन्विकारे स्वार्थे सन्, "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" इति पाणिनीयवार्त्तिकराद्धान्तादादाने पञ्चमी] जुगुप्समानाः विरक्ताः सन्त इत्यर्थ, [मनसः + ईषा मनीषा, सा विद्यते येषां ते] मनीषिणः मनसः वशीकर्त्तारः आत्मदर्शिन इत्यर्थः, सर्वान्—सकलान्, काम्यन्ते ये ते कामाः विषयास्तान्, सन्त्यज्य सम्यग् विहाय विषयवासनां परिहाय इत्यर्थ , अरण्ये—वने, विश्राम्यन्ति—शान्तिं लभन्ते, ईश्वरध्यानेन आत्मानं विनोदयन्तीति भावः । [संसारक्लेशाप-नोदनसूचनार्थं विश्राम्यन्तीति श्रमधातोः प्रयोगो युक्त एव । श्रमादित्वात् दीर्घः । अत्र काव्यलिङ्गम् अलङ्कारः] ।

(ङ) कञ्चुकी—राज्ञः गृहान्तरचरः स्थविरः द्विजः, तथाहि भरतः,—"अन्तः-पुरचरो वृद्धो विप्रो गुणगणान्वितः । सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते । जरावैक्लव्ययुक्तेन विशेद् गात्रेण कञ्चुकी ॥" इति ।

(च) अर्द्धोक्ते साशङ्कमिति ।—अर्द्धोक्ते—प्रयोक्तव्यवाक्यस्य कियदंशे उच्चारिते सति । साशङ्कम् इति ।—अहो मया प्रभोर्महाराजस्य नामग्राहं सम्बोधनं कृतम् । अतः अपराधी भवामि इति आशङ्काकारणम् ।

(छ) सस्मितमिति ।—ईषद्विहस्येत्यर्थ ।—"ईषद्विकासिनयनं स्मितं स्यात् स्पन्दिताधरम्" इति लक्षणात् ।

(ज) उपचारः,—सेवाव्यवहारः अयथार्थवाक्येन सन्तोषजननम् इति वा । यथाऽभ्यस्तम्—अभ्यस्तमनतिक्रम्य, अभ्यासानुरूपम् इत्यर्थः । एतेन रामभद्रस्य विनयित्वं मर्य्यादारक्षणं किञ्च वित्तं कविना । [अत्रापि काव्यलिङ्गम्] ।

(झ) अष्टावक्रः,—अष्टसु अवयवेषु वक्रः, अष्टौ वक्राणि यस्य इति वा विग्रहः । "अष्टनः संज्ञायाम्" । (६ । ३ । १२५ पा०) इति दीर्घः] । पुरा किल कहोड़-

सीता। अज्ज! तदो किं विलम्बीअदि? *

राम। त्वरितं प्रवेशय। [कञ्चुकी निष्क्रान्तः।]

अष्टावक्र। [प्रविश्य] स्वस्ति वाम्। (ञ)

राम। भगवन्! अभिवादये, इत आस्यताम्। (ट)

सीता। भअवं! णमो दे, अवि कुसलं सजामादुअस्स गुरुअणस्स, अज्जाए सन्ताए अ? † (ठ)

* आर्य! ततः किं विलम्ब्यते?

† भगवन्! नमस्ते, अपि कुशलं सजामातृकस्य गुरुजनस्य, आर्यायाः शान्तायाश्च?

(कहोड) नाम्ना सर्वां रात्रिमध्ययनं कश्चिदपि स्वगुरोः उद्दालकस्य कन्यां सुजाताम् उपयेमे। तस्याः परिपूर्णे गर्भे शिष्यगणपरिवृतं पितरमेकदा "सर्वां रात्रिमध्ययनं करोषि नेदं पितः! सम्यगिवोपवर्तते" इति उपालब्धवान्। अथ कहोड "उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप। यस्मात् कुक्षौ वर्तमानो ब्रवीषि तस्माद् वक्रो भवितास्यष्टकृत्वः। स वै तथा वक्र एवाभ्यजायत अष्टावक्रः प्रथितो वै महर्षिः॥" इति वनपर्वणि १३२ तमे अध्याये तदुत्पत्तिकथा।

(ञ) स्वस्ति वाम् इति।—भवद्भ्यां कुशलं भूयात्। "नमःस्वस्ति—" (२।३।१६ पा०) इत्यादिना चतुर्थी, ततो "युष्मदस्मदोः—" (८।१।२० पा०) इति वामादेशः।

(ट) अभिवादये इति।—भगवन्तमभिमुखीकृत्याभिवन्दे इत्यर्थः। नामग्रहणपूर्वकं नतिरेव अभिवादनमुच्यते, तत्फलमुक्तं मनुना २य अध्याये १२०। १२१ सङ्ख्यकश्लोकयोः, यथा—"ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि सम्प्रवर्द्धन्ते आयुर्विद्या यशो बलम्"॥ इति।

(ठ) अपि—प्रश्ने। "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि" इत्यमरः। जामाता ऋष्यशृङ्गेण सह वर्त्तमानस्य सजामातृकस्य ["नद्यृतश्च" (५।४।१५३ पा०) इति समासान्तः कप्प्रत्ययः]। आर्य्यायाः,—मान्यायाः, पत्युः ज्येष्ठत्वात्, [ऋच्छतेर्ण्यत् निपातनात्]। अत्र ब्राह्मणस्य ऋष्यशृङ्गस्य, तत्परिणीतायाः क्षत्रियात्मजाया अपि शान्तायाः, तथा सपत्नीकस्य वशिष्ठस्य च ब्रह्मतेजःप्राधान्यात् "कुशलम्" इति प्रश्नः सङ्गच्छते। तथा च मनुः—"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्" इति।

राम । निर्विघ्नः सोमपीथी आवुत्तो (ड) मे भगवान् ऋष्यशृङ्गः, आर्य्या च शान्ता ?

सीता । अह्मेवि सुमरेदि ? ' (ढ)

जनक । [उपविश्य] अथ किं. (ण) देवि ! कुलगुरुर्भगवान् वशिष्ठस्त्वामिदमाह —

ढ अस्मानपि स्मरति ?

(ड) निर्विघ्न,—विघ्नरहित । सोमेति ।—सोम,—स्वर्णवर्णपूतिकलताकारौषधिविशेष, स च हिमवत्सन्निहितप्रदेशे जायते, पष्टिहर्षैकार्य्योन्मादादिकरत्व तस्य रसस्य गुणा । पुरा खलु मुनयो यज्ञादौ विशेषतस्तु सोमयागे प्रकरया आसवीकृत तद्रस पीत्वा आत्मान वहु मन्यन्ते स्म । सोम सोमरस तस्य पीत पान, तदस्यास्तीति [इनिप्रत्यय । यद्वा पीतमनेनेति पीती, सोमे पीतीति तथोक्त । पृषोदरादित्वात् तस्य स्थाने थ अथवा, पीथ पान तदस्यास्तीति पीथी "पातृतुदिवचिरिचिसिचिभ्यस्थक्" (उ०२।७ पा०) इति पिवते औणादिक थक् । 'सोमपीती इत्यपि भवति, तथैव क्वचित् पाठ दृश्यते ,] स कृतसोमलतारसपान , यथाविध्यनुष्ठितसोमयाग इत्यथ । सोमयागप्रकारस्तु ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे प्रोक्त , तथा हि षष्टितमाध्याये नारद प्रति नारायणवाक्यम् ।—

"ब्रह्महत्याप्रशमन सोमयागफल मुने ।।
वर्षं सोमलतापान यजमान करोति हि ॥
वत्सरैक फल भुङ्क्ते वत्सरैक जल मुदा ।
वैवार्षिकमिद याग सर्वपापप्रणाशनम् ॥
यस्य त्रैवार्षिक धान्य निहित भृतिसिद्धये ।
अधिक वापि विद्येत स सोम पातुमर्हति ॥
महारम्भो देवो वा याग कर्त्तुमल मुने ।।
न सर्वसाध्यो यज्ञोऽय बहुस्रो बहुदक्षिण ॥" इति ।

(ढ) आवुत्तो—भगिनीपति । "भगिनीपतिरावुत्त ' इत्यमर । दशरथतनयाया लोमपादपालिताया शान्ताया परिणेतृत्वादृष्यशृङ्गस्य रामभगिनीपतित्वम् ।

(ढ) अस्मान इत्यत्र वैकल्पिकी षष्ठी अपि भवति ।

(ण) अथ किमिति ।—स्वीकारार्थकमेकमव्ययम्, अथवा अव्ययद्वयम् । अथ—

"विश्वम्भरा भगवती भवतीमसूत,
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां,
येषां कुलेषु सविता च गुरुर्वयञ्च॥ ६॥

अनन्तरं भवदागमनानन्तरम् इत्यर्थः, किं—किमु वक्तव्यमिति शेषः। भवता गन्तव्यं तत् तदैव इति भावः। गम्यते एवेत्यर्थः। अथ महाराजं रामं मुक्त्वा सीतां प्रति वशिष्ठसन्देशः परमप्रीत्यतिशयप्रकटनार्थम्। तदुक्तं हनुमता—"यामयो यत्र शोचन्ति गृहाण्यप्रतिपूजिता। तानि कृत्याहतानीव विनश्यन्ति समन्ततः॥" इति।

उद्बोधकसमवधानवशादेव हि भवति स्मरणम्। अतः सीताविषयकस्मृतौ निरतीद्बोधकप्रकारं प्रकटीकृत्य वशिष्ठवचनव्यपदेशेनाभिधत्ते, विश्वम्भरेति।—हे नन्दिनि! पत्यौसहशानन्दप्रदत्वात् पुत्रि! भगवती विश्वं बिभर्तीति विश्वम्भरा ["संज्ञायां भृत—" (३।२।४६ पा०) इति सूत्रेण खचि, "अरुर्द्विषत्" (६।३।६७ पा०) इति सूत्रेण मुम्] पृथिवी, भवतीमसूत—त्वां प्रसूतवती, [एतेनास्या विनयसहिष्णुत्वादिगुणग्रामयोगित्वं भाविपतिवियोगदुःखसहत्वञ्च ध्वनितम्।] प्रजापतिसमः प्रजानां रक्षणावेक्षणादौ स्वाध्यायाध्ययनादौ वा विधातृसदृशः, (तथा हि श्रुतिः—"जनको ह वै" इत्यादि, आगमश्च—"कर्मणैव हि संसिद्धिमास्थिता जनकादयः।" इत्यादि)। राजा जनकस्ते पिता। [एतेन प्रजासु परिजनेषु च दाक्षिण्यादिकं, पत्या विना एकाकिन्या अपि अरण्यमध्ये भाविनी पुत्रयोः पालनक्षमत्वञ्च ध्वनितम्।] येषां पार्थिवानां कुलेषु—[अत्र बहुवचनं पूजायाम्, कुलस्य इत्यर्थः,] सविता—सूर्यः जगतां द्रष्टा दर्शयिता पाता पावनश्च इत्यर्थः, [एतेन तदन्वयानां प्रतापित्वम् औज्ज्वल्यवत्त्वञ्च ध्वनितम्] तथा वयञ्च प्रजापतिपुत्रत्वात् पवित्रत्वात् प्रभूततेजस्कत्वाच्च त्रिलोकपूज्या इत्यर्थः, [वयमिति अविशेषणत्वात् बहुवचनमेकत्वे "अस्मदो द्वयोश्च" (१।२।५९ पा०) इत्यनुशासनात्। सविशेषणस्य प्रतिषेध इत्यस्य विधेयविशेषणविषये विषयत्वात् दोषाशङ्का नास्ति "ततोऽनुत्व प्रेयान् वयमपि हताशाः प्रियतमा", "अथ तत्त्वान्वेषान्मधुकर! हताः" इत्यादि प्रयोगदर्शनात्। यद्वा जृम्भकास्त्रादिप्रदानादिभिः विश्वामित्र-वाल्मीक्यादीनामपि ग्रहणात्, "वशिष्ठाङ्गिरसौ ऋषी प्राचेतसस्तथा" इत्यादि स्मरणाच्च बहुवचनम्। गुरुरित्यनुपक्रान्तस्य वचनविपरिणामात् गुरवः उपदेष्टारः। [एतेन लौकिकाचारादिपरिज्ञानं ध्वन्यते]।

तत् किमन्यदाशास्महे, केवलं वीरप्रसवा भूयाः"। (त)

[सूर्य्यवंशीयानामादिभूतत्वात् सवितुः गुरुत्वमार्त्विज्यकरणात् वशिष्ठस्यापि तथात्वम्। "गुरुस्तु गीष्पतौ श्रेष्ठे" "गुरौ पितरि दुर्भरे" इत्युभयत्रापि विश्वः। अज्ञान-निवर्त्तक वेत्यर्थः —"गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निवर्त्तकः" इत्युक्तेः।] व तेषां पार्थिवानां सूर्य्यवंशीयानां राज्ञाम् इत्यर्थः, [एतेन सर्वसुखाकरत्वं ध्वन्यते] वधूः स्नुषा असि। [एतेन प्रतिदिनं नवनवसुखप्रदपरार्थदर्शनाकाङ्क्षा सम्मान नार्हत्वञ्च ध्वन्यते।] विश्वम्भराजनकसविवादिसम्पर्कजाता वशिष्ठमिश्राणां रति प्रीतिरूपाऽत्र सांसर्गिकीनामधेया इति ज्ञेया, सा च क्वचित् क्वचित् सांसर्गिकी, नैसर्गिकी, औपमानकी, आध्यात्मिकी अपि भवति इति बोध्यम्। तथा हि—भोजराजः,—"रतिर्निसर्गसंसर्गौपम्याध्यात्माभियोगजा। सम्प्रयोगाभिमानोत्था विषयोत्था च कथ्यते॥" इति। अत्र विश्वम्भरादिसंसर्गात् सीतायां वशिष्ठमिश्रा स्निह्यन्ति" इति फलितोऽर्थः। [अत्र यच्छब्दमादावभिधाय पश्चात् तच्छब्दस्य प्रयोग एव युक्त इति विधेयाविमर्षदोषः अन्य, स च परार्द्धगतचरणयोः वैपरीत्यं विधाय समाधेयः। एतस्मिन् प्रस्तुतस्य सवितुः गुरोश्च एकगुरुत्वरूपधर्मसम्बन्धात् तुल्य-योगिता, सा च सीतायाः अभ्यमानत्वरूपकार्यस्य विश्वम्भरादुहितृत्वरूपेणैकेनैवोद्बोध-केन अतौ सत्यामपि तदुद्बोधकान्तररूपप्रजापतिदुहितृत्वपार्थिववधूत्वादिकारणान्तर स्योक्तत्वात् जायमानेन समुच्चयालङ्कारेण, "प्रजापतिसम" इत्यत्र समुपजाततया समासगतया चाप्युपमया, "जनकः पिता" इत्यत्र च आपाततः एकार्थकविभिन्नशब्द-वत् प्रतीतेः पौनरुक्त्यावभासनात् पर्य्यवसाने पुनः जनकशब्दस्य मुनिरूपार्थबोधनाच्च पुनरुक्तवदाभासेन शब्दालङ्कारेण च सङ्कीर्णा]। वृत्तं वसन्ततिलकम्।—"ज्ञेयं वसन्ततिलकं तभजा जगौ गः" इति लक्षणात्, प्रस्तारस्यास्य २९३३ तमं॥९॥

(त) तदिति।—तत्—तस्मात् अन्यत्, पुत्रादन्यदित्यर्थः। किमाशास्महे [आङ् शास इच्छायाम् इति धातोः लट्] एतद्विना किमस्माकं आशीःकरणीयमस्ति। योऽयं यद् यत् प्रार्थनीयमस्ति पुत्रव्यतिरिक्तं तत् तव अस्त्येव। अतस्ते पुत्रादन्यदाशी र्वचोऽपि किमपि न प्राप्नोति भावः। केवलं वीरः प्रसवो यस्याः सा तथोक्ता भूयाः (इत्याशिषि लिङ्)। [अत्र प्राक् प्रदर्शितस्य बीजाङ्गोपक्षेपस्य सीताविवासनान्तर प्रसूत भागीरथीमग्नजाननायस्य, दण्डकारण्यस्थलीमध्युषितायाः सीतायाः समक्षौ कुशलवयोः समुत्पत्तिरूपस्य महर्षिणा च तेषां यथाविधि अध्यापनादिरूपस्य

राम। अनुगृहीताः स्मः। (थ)—

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥ १०॥

अष्टा। इदञ्च भगवत्या अरुन्धत्या देवीभिः शान्तया च

समुपस्थागमस्य सामर्थ्येन विशदीकरणात् एतत् परिकराख्यं मुखसन्ध्यङ्गं वेदितव्यम्। तथाहि—"समुत्पन्नार्थबाहुल्यं ज्ञेयं परिकरः पुनः" इति। अत्र पुत्रलाभरूपेष्टाशंसनात् "आशीः" नामालङ्कारः। तदुक्तं दण्डिना—"आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा" इति। अन्यत्राप्युक्तं—"आशीरिति च केषाञ्चिदलङ्कारतया मता। सौहृदस्याविरोधोक्तौ प्रयोगोऽस्याश्च तादृशः॥" इति]।

(थ) अन्विति—अनुगृहीताः,—कृतार्थाः, स्मः,—भवामः इत्यर्थः। [अत्र मोक्षबीजाश्रयस्य प्रधाननायकाभिमतत्वेन सम्यगाश्रितत्वात् समाधानरूपमुखसन्ध्यङ्गं वेदितव्यम्। तथाहि,—"बीजस्यागमनं यत्तु तत् समाधानमुच्यते" इति।

कथमिति तदेवोपपादयति, लौकिकानामिति।—लौकिकानां हि लोके विदितानामेव संसारिणामित्यर्थः, साधूनां वाक् वाक्यम्, अर्थं प्रतिपाद्यविषयमनुवर्त्तते अनुसरति, [लौकिका असाधवः बहवः सन्ति तद्व्यावृत्त्यै साधूनामित्युक्तम्। लौकिका हि साधवः अर्थमनुसन्दधतः वस्तुगतिं विमृश्य तदाकृतौ वाचं प्रयुञ्जते] यतो हि अर्थाऽनुसन्धानं विनैवोदिता वाचः प्रेक्षावद्भिरुन्मत्तवाक्यवदुपेक्ष्यन्ते। आद्यानां—पुराणानाम् ऋषीणां—कल्पविदां पुनः वाचं वाक्यं अर्थः अभिधेयं अनुधावति अनुसरति, अर्थानुसन्धानं विनापि यदृच्छया त यदभिदधति तपःसिद्धिबलात् तेषां तदेव नूनं फलति 'न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्" इति न्यायादिति भावः। अस्मच्च तैराशिषि समीरितायां, तत् नैष्फल्यं कदापि नैष्यतीति हृदयम्। [अत्र एतत् ऋषिश्रेणीविधानरूपबीजगुणवर्णनात् विलोभनाख्यं बीजाङ्गमवधेयम्। तथा हि—"गुणाख्यानं विलोभनम्" इति लक्षणात्। लौकिकसाधुभ्यः पुराण[स]धूनामुत्कर्षप्रतीतेः व्यतिरेकोऽलङ्कारः, अपि च अप्रस्तुतेभ्यः साधारण-ऋषिभ्यः विशेषस्य वशिष्ठस्य प्रतीतेः अप्रस्तुतप्रशंसा, तथा लौकिकसाधुभ्यः पुराणमुनीनां मुत्कर्षातिशयवर्णनेन महच्चरितवर्णनादुदात्तालङ्कारश्च, तदेभिः परस्परं सङ्कीर्यते]। पथ्यावक्त्रं वृत्तम्॥ १०॥

भूयोभूय. (द) सन्दिष्ट,—"यः कश्चिद्गर्भदोहदो (ध) भवति अस्याः सोऽवश्यमचिरात् सम्पादयितव्य" इति ।

राम । क्रियते यद् यदेषा कथयति । (न)

अष्टा । ननान्दुः पत्या च देव्या सन्दिष्टमृष्यशृङ्गेण,—"वत्से ! कठोरगर्भा इति न आनीतासि, वत्सोऽपि रामभद्र-

(द) भूयोभूय,—पुनः पुनः, आभीक्ष्ण्येनेत्यर्थः, [वीप्सायां द्विर्भावः] एतद् वाक्यन्तु दोहदसम्पादनस्य अत्यावश्यकतामभिधत्ते । सन्दिष्टम्—आदिष्टम्, अभिहितम् इत्यर्थः ।

(ध) गर्भेति ।—दोहदम् इति दोहः । [दुहो भावे घञ् ।] गर्भस्य शिशोः दोहाय समाकर्षाय रसादिकं ददातीति गर्भदोहदः, गर्भिण्यभिलषितपुष्टिसाधनपानभोजनविहारादि पथ्यम् इत्यर्थः । अथ वा गर्भे गर्भावस्थायां दोहदः गर्भिणीमनोरथ इत्यर्थः तथाविधाऽभिलाषम्तु गर्भस्यैव भवति इति गर्भदोहदः कथ्यते, स वस्तुविशेषोपभोगाभिलाष इति, तदा हि अन्नपानादिवस्तुषु गर्भिणी वीतस्पृहा भवति, भवति च कतिचिद् विशेषवस्तुषु स्पृहावती । अथ दोहदाप्रदानमधि कृत्याह तत्रभवान् वाग्भट,—"पादशोफो विदाहोऽन्ते श्रद्धा च विविधात्मिका" इति । "देयमप्यहितं तस्मै हिताय हितमन्यकम् । श्रद्धाविघाते गर्भस्य विकृतिश्च्युतिरेव वा ॥" अन्यच्च,—"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्" इति रघुसञ्जीविन्यां मल्लिनाथः । यद्यपि दोहदशब्दस्य अमरसिंहेन हलायुधेन च नपुंसकत्वमभिहितं, तथापि "दोहदो दौर्हृदं श्रद्धा लालसा' इति हेमचन्द्रेण पुंस्त्वम् अभिहितम्, अतः दोहदशब्दस्य उभयलिङ्गकत्वमुन्नेयम् ।

(न) क्रियते ।—एषा—मत्पार्श्ववर्त्तिनी, तदुक्तं—"इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" ॥ इति । यद्यत—यत्किमपि वा कथयति—अभिलष्यति । क्रियते—मया अनुष्ठीयते । [illegible] अवश्यपूरणीयत्वात् गुरुजनाज्ञामनपेक्ष्यैव झटिति सम्पाद्यते [illegible] । "[illegible] क्रियते [illegible] कथयति" इति पाठे—यदि एषा वैदेही कथयति [illegible] वर्त्तमानसामीप्ये भविष्यति लट्] तदैवेति शेषः, क्रियते कर्त्तुं शक्यते इत्यर्थः, [illegible] विवासनमचिरादेव भविष्यति अतः दोहदकथनमसम्भाव्यमेव, इति [illegible], यत्तु दण्डकारण्ये वनानां पुनः सन्दर्शनदोहदः भविष्यति, तत्तु

स्त्वद्विनोदनार्थमेव स्थापितः। तत् पुत्रपूर्णोत्सङ्गाम् आयुष्मतीं द्रक्ष्यामि" इति। (प)

राम। [सहर्षमञ्जलिबन्धम्] तथाऽस्तु। भगवता वशिष्ठेन किमादिष्टोऽस्मि? (फ)

अष्टा। श्रूयताम्।—

"जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवञ्च राज्यम्।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्माद् यशो यत् परमं धनं वः" ॥ ११ ॥ इति।

अस्माभिः सम्पादयिष्यते, इति। [सीताविवासनफलोत्पादहेतुभूतदोहदसाधनमिषेण वनाय विवासननिदानभूतस्य प्रकृतार्थस्य समारम्भः, करणं नाम मुखसन्धेः अङ्गम्। तथा हि,—"करणं पुनः। प्रकृतार्थसमारम्भः" इति]।

(प) ननान्दुरिति।—देव्याः सीतायाः ननान्दुः भर्तृभगिन्याः (ननन्देत्यप्यनि सत्यर्थाय) पत्या—ऋष्यशृङ्गेण, सन्दिष्टम्—आज्ञप्तम्। वत्से।—कल्याणि। कठोर गर्भा—परिणतगर्भा, इति—हेतोः, न आनीतासि त्वं यज्ञभूमिमस्माभिः न प्रापितासि इत्यर्थः। अतः वत्सः रामभद्रोऽपि, त्वद्विनोदार्थं—तव मनसः सन्तर्पणाय, नास्माभिः आनीतः। अतः पुत्राभ्यां पूर्णं तनयभूषितः उत्सङ्गः क्रोडः यस्याः तथाविधामायुष्मतीं—कल्याणिनीं भवतीं द्रक्ष्यामि, तनयालङ्कृताङ्कां भवतीं दृष्ट्वा आत्मानं सबहुमानं करिष्ये इति भावः। [अत्र बीजोद्भेदानुकूलहेतुभूतकठोरगर्भत्वादिरूपवस्तुना विशय्य सम्प्रधारणात् यथायथं सयौक्तिकञ्च विमृश्यावधारणात् युक्तिनाम सन्ध्यङ्गं ज्ञेयम्। तथा हि—'सम्प्रधारणमर्थानां युक्तिः" इति लक्षणात्]।

(फ) यत् भगवता ऋष्यशृङ्गेणोक्तं तत् तथैव भवतु इत्यर्थः। नाटकस्य पञ्च सन्धिभिरुपचेतुमुचितत्वादादौ प्रयोजनसिद्धिहेतुभूतानां बीजादिपञ्चकानामवतारणार्थमवान्तरं वशिष्ठादेशरूपं विषयमवतार्य बीजसन्धिमुत्थापयितुं प्रस्तौति, "भगवता वशिष्ठेन किमादिष्टोऽस्मि" इत्यादिना।

तदेव विशिष्योपपादयति, जामात्रिति।—वयं जामातुः,—ऋष्यशृङ्गस्य, यज्ञेन—(करणेन) निरुद्धाः,—ऋत्विक्त्वेन व्रतिनः सन्तः आवद्धाः, आ परिसमाप्तेः प्रतिगन्तुम् अक्षमा इत्यर्थः। [जामातृपदोपादानात् तद्वचनस्यावश्यमादरणीयत्वं ध्वनितम्। यज्ञपदेन

राम। यथाह भगवान् मैत्रावरुणिः। (ख)—

च तस्यागानौचित्य गम्यते। निरुद्धपदस्य च चिरकालावस्थितिवाचकत्वेन तत निष्क्रमणायोग्यत्वमपि] त्व बाल एव—अद्युत्तरैव अमि [एतेन च तस्य कार्याकार्यविचाराक्षमत्व वाच्यते। एवकारेण च सन्देहाभाव द्योतित।] राज्यञ्च नव—नवाधिगत [राज्यस्य नवीभूतत्वेन 'यदैव राज्ये क्रियतेऽभिषेक तदैव याति व्यसनेषु बुद्धि" इति नियमात प्रतिपद व्यसनबाहुल्यापातसम्भावना अस्तीति ध्वन्यते]। प्रजाना—लोकानाम् अनुरञ्जने—राज्यदार्ढ्यसम्पादके लौकिके स्वधर्मे इत्यर्थ, युक्त,—एकाग्रचित्त, स्या,—भवे, तस्मात्—प्रजानुरञ्जनात् यत् उत्पन्न यश तत् व,—इक्ष्वाकुवंशप्रसूताना युष्माक परम—सर्वोत्कृष्ट धनम्। तदन्वयभुवा महामहिमशालिना महीभृतामिव कौलीन्यभीताना भवतामपि तदनुसृतसरणीषु क्रमाधान सर्वथैवोचितमिति भाव। यशसो परमधनत्वेनारोपात, तद्रक्षणप्रयासस्यात्यावश्यकत्व सूचितमन्यथा तदपायस्य सम्भवात। एष हि प्रदर्शितबीजस्योत्थापनहेतु वेदितव्य, पश्चाञ्च भगवता रामभद्रेण स्वयमेवैतत् "जानकीमपि मुञ्चतो नास्ति मे व्यथा" इत्यादिना जानकीविवासन लोकानामनुरञ्जनाय करिष्यते इत्यभिधास्यते। पश्चात् बहुधा विहृतस्य सीताविवासनरूपफलस्यात्र प्रथमहेतुभूतं बीज लोकानुरञ्जनरूपमभिहितम्। तथाहि दर्पणम्,—

"अल्पमात्र समुद्दिष्ट बहुधा यत् विसर्पति।
फलस्य प्रथमो हेतुर्बीजमित्यभिधीयते॥" इति।

[अत्र प्रजानामननुरञ्जने वशिष्ठनिग्राणा आमातयज्ञनिरोधरूपे एकस्मिन् कारणे सत्यपि राज्यशासनापायभूताना बहूना बालत्वनवत्वादिरूपसाधकाना निर्देशात समुच्चयालङ्कार, तथा पूर्वाद्धवाक्यस्य परवाक्यम्प्रति हेतुत्वप्रतीते काव्यलिङ्गालङ्कारश्च, इत्येतया सङ्कर]। इन्द्रवज्रा वृत्तम्।—"स्यादिन्द्रवज्रा यदि तौ जगौ ग" इति लक्षणात्। अयञ्च सप्तपञ्चाशदधिकद्विशततम प्रस्तार॥ ११॥

(ख) मित्रश्च वरुणश्च तौ मित्रावरुणौ ["देवता द्वन्द्वे च" (६।३।२६ पा०) इत्यानङ्] तयोरपत्य पुमानिति ['बाह्वादिभ्यश्च" (४।१।९६ पा०) इति इञ्प्रत्यय]। [उर्वशीं दृष्ट्वा विक्षुब्धयो मित्रावरुणयो स्कन्न तेज कुम्भे बहिरन्तश्च पतितमासीत, तत्र तु बहि वशिष्ठ अन्तश्चागस्त्य जज्ञे, इत्यत्र वशिष्ठस्य मैत्रावरुणिसञ्ज्ञाया अन्यदन्द कुम्भयोनिसञ्ज्ञायाश्च हेतु विष्णुपुराणादौ द्रष्टव्य। एवमेव सायणाचार्या अप्याहु ऋग्वेदभाष्ये,—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा॥ १२॥

सीता। अदो ज्जेव राहवकुलधुरन्धरो अज्जउत्तो। ८ (भ)

अत एव राघवकुलधुरन्धर आर्यपुत्रः।

"तयोरादित्ययोः सत्रे दृष्ट्वाऽप्सरसमुर्वशीम्।
रेतश्चस्कन्द तत् कुम्भे न्यपतद् वासतीवरे॥
तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः।
बहुधा पतितं रेतः कलशे च जले स्थले।
स्थले वसिष्ठस्तु मुनिः सम्भूत ऋषिसत्तमः॥" इति। मं० ७, सू० ३३, ऋ ११।

तौ हि एकस्मिन् कल्पे मित्रस्य कल्पान्तरे च वरुणस्यापत्यमास्ताम्। इत्यपि पुराणान्तरम्।

यद्वैतत् रघुमणिः प्रतिजानीते स्नेहमिति।—लोकानां—जनानां प्रजानामिति यावत्, आराधनाय—प्रीणनाय, तान् आराधयितुम् इत्यर्थः, ["तुमर्थाच्च भाववचनात्" (२।३।१५ पा०) इति चतुर्थी।] अनुरञ्जनार्थमिति भावः, स्नेहं—ममत्वं, प्रजासु अपराधदण्डादिकं भार्य्यादिविषयकं वा, दयां—परदुःखहरणेच्छाम्, अनैष्ठुर्य्यं गर्भिणीविषयां वा,—"दुर्व्वारगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते" इत्यादिना शम्बूकवधावसरे रामभद्रेण स्वयमेवैतत् व्यक्तीकरिष्यते। सौख्यं—सुखसमूहं, सुखसाधकविषयसमूहं पुत्रमुखदर्शनलालनजातं वा इत्यर्थः। यदि वा—अथवा, जानकीं—सीतां, प्राणाधिकामपि इत्यर्थः, मुञ्चतः,—त्यजतः, मे—मम, व्यथा नास्ति। किमधिकं, प्राणाधिकाया अपि प्रियतरा मे प्रजा इति भावः। [अत्रैव प्रदर्शितं बीजं सर्वथा व्यक्तीभूतत्वमगात्, प्रकृतिरञ्जनाय जानकीनिर्वासनस्य तत्त्वार्थस्य कथनात् मार्गनामकं गर्भसन्धेरङ्गभूतमवैतत् अवगन्तव्यम्। तथा हि दर्पणम्।—"तत्त्वार्थकथनं मार्गः" इति। एतेन प्रजारञ्जनरूपव्यवसायात् अचलनकथनेन धैर्य्यं नाम नायकस्य सात्त्विको गुणः कथितः। तथा च दर्पणे—"व्यवसायादचलनं धैर्य्यं विघ्ने महत्यपि" इति। अत्र गम्यस्य जानकीपरित्यागस्य भङ्ग्यन्तरेण कथनात् पर्य्यायोक्तम् अलङ्कारः। मुञ्चत इत्येकक्रियया स्नेहादीनां सर्वेषामन्वयात् प्राचीनमतेन दीपकालङ्कारभेदेन सङ्करः]॥ १२॥

राम । क कोऽत्र भोः । विश्राम्यतां भगवान् अष्टावक्रः ।

अष्टा । [उत्थाय परिक्रम्य च] अये । कुमारलक्ष्मण प्राप्तः । (म)

[इति निष्क्रान्तः ।]

लक्ष्मण । [प्रविश्य] जयति जयति आर्य्य । आर्य्य । तेन चित्र-करेण अस्मदुपदिष्टमार्य्यस्य चरितमस्यां वीथिकायाम् (य) अभिलिखितं, तत् पश्यतु आर्य्य ।

(भ) भत इति ।—भत एव भवन्त राघवकुलधुरन्धर तद्वत दुर्वहभारोद्वहनसमर्थतया रघुवंशीयनरपतिगणाग्रगण्य वदन्तीति भाव । शरणागतसरक्षण भतदया प्रकृतिरञ्जनादिधर्मशतयोगात् सत्य हि भवान् विश्रुतचरिताना रघूणामन्ववायविशोभा इत्याशय ।

(न) "नासूचित विशेत पात्रम्' इति भरतोक्ते लक्ष्मणप्रवेशमभिधत्ते, अये इति

(य) चित्र करोतीति चित्रकार चित्रशिल्पी, पक्षान्तरे—चित्र विचित्ररचनाशक्तिसम्पन्न कर हस्तो यस्य स कविरित्यर्थोऽपि व्यज्यते । वीथिकायामिति ।—वीथिरिव इति वीथिका [स्वार्थे कन्] तस्या—चित्रफलके चित्रश्रेण्यामित्यर्थ —"पङ्क्तिवर्त्मगृहाङ्गेषु वीथि वीथी च" इति रत्नकोष । पक्षान्तरे—अस्य नाटकस्याभिन्नाङ्गे । [अत नाटकीयप्रयोजनसिद्धिहेतुभूताना वीजादिपञ्चकानामन्यतम कार्य्यमभिनवतारयितुमपूर्वमेक चित्रप्रदर्शनपाटव कवि विन्यासाञ्चक्रे । इत्थ हि तत्र भवान कालिदासोऽपि स्वकृतौ अवर्वर्णत । तद्यथा—

"तयोर्यथाप्रार्थितमिन्द्रियार्थान् आसेदुषो सद्मसु चित्रवत्सु ।
प्राप्तानि दु खान्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखान्यभूवन् ॥" इति ।

तथाहि सीतानिवासनमवालापेक्षित तन्निबन्धनचित्रदर्शनप्रयाससमारम्भ, निसर्गतोऽलालहृदया जानकी नैसर्गिक जनस्थानवनस्थलीरामणीयक सखावगाह्य गोदावरीनलिनद्व स्मृतिपदे उदीयमान सपदि उपभोक्तु दोहदवती भविष्यति, भगवत्या अरुन्धत्या शान्तया च पुरा तद्दोहदनवश्यमेव पूरणीयमित्यान्नप्तम्, अत तत्पूरणमिषेण तादृशानन्द सकल नविष्यति इति एतदालिखितम् । सीताविवासनसिद्धये हि अस्य चित्रदर्शनप्रयासन्य समापनम । यदुक्तम् —

"यदिदितन्नु यदाऽऽरम्भो यन्निबन्धन ।
समापनन्तु यत् सिद्धि तत् कार्य्यमिति सम्मतम्' ॥ इति ।

राम । जानामि वत्स । दुर्मनायमाना देवी विनोदयितुम् । तत् कियन्तमवधि यावत् ? (र)

लक्ष्मण । यावदार्याया हुताशने विशुद्धि । (ल)

राम । शान्तम् । (व)—

तदेतदुपवर्णितं महाकविना कालिदासेन,—

"प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ।

स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम् ॥" इति ।

अत एव सीतात्यागस्य प्रयत्नरूपावस्था विज्ञेया, यथाहि रत्नावल्यादिवत्सराजादि व्यापारे वत्सराजसमागमोपायत्वेन प्रयत्नोक्त, तथाऽत्रापि कविना करुणरससमर्थित सीतानिर्वासनरूपव्यापारमिदं आलम्बनरूपाऽतित्वरान्वित व्यापार समारब्ध इति समीक्ष्यचिन्तय कुशाग्रबुद्धिभि,—"प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वित") इति लक्षणात् । नाट्यशास्त्रे भरतोऽपि,—

"अपश्यत फलप्राप्ति यो व्यापार फल प्रति ।

पर चौत्सुक्यगमन प्रयत्न परिकीर्त्तित ॥" इति] ।

(र) जानामीति ।—भूयोभूय सम्भ्रमात देव्यादौर्मनस्य कथ हि अपनेतु विनोदयितुञ्च वा शक्यते तत् त्वमेव सम्यक् जानासि इति भाव । अथ देवीविनोदननिपुण हि काव्यसन्धिमवतारयितु लक्षणेन आलिख्यावली आनीतेति ज्ञेया । [अदुर्मना दुर्मना भवन्ती इति अभूततद्भावार्थे दुर्मन शब्दात् "भृशादिभ्य" (३।१।१२पा०) इति सूत्रेण क्यङि अन्तलोप आत्मनेपदञ्च । यावद्योगादवधिमिति द्वितीया, कियद्दूरमित्यर्थ] ।

(ल) यावदिति ।—विशुद्धिरिति कर्तृपदमभवदित्यध्याहार्यया क्रिययाऽन्वितम् । "उपपदविभक्ते कारकविभक्तिर्बलीयसी" इति न्यायात् न तद्योगे द्वितीया । यावच्छब्दोऽत्रावधारणार्थक ।

(व) शान्तमिति ।—अहृश्यमन्याव्यमित्यादिवुद्धा असहिष्णुताप्रकाशकत्ववचनमिदं शान्तपदमव्ययम् । अलोकोपन्यासत्वात् आधिहेतुभूतत्वाच्चैतदनिष्टकर पापजनकञ्च व्याहृत दूरीभूतमस्तु नैतदिदानीं श्रोतव्य कथयितव्यञ्चेत्यर्थ । इष्ट हि साकाङ्क्ष, इष्टजनानामनिष्टमाशङ्कमान तदनुपलब्धिञ्चेहमानै ऋषिभिरेवमेव हि आर्षवचसा अनिशमभिधीयते किल । "शान्तोऽभियुक्तरुपयो पुसि त्रिषु शमान्विते । अव्यय वारणे शान्तम्" ॥ इति मेदिनी ।

उत्पत्तिपरिपूताया. किमस्या पावनान्तरै: ?।
तीर्थोदकञ्च वह्निश्च नान्यत शुद्धिमर्हत ॥ १३ ॥

देवि । देवयजनसम्भवे । (श) प्रसीद, एष ते जीवितावधि: प्रवाद । (ष)—

कथ भ्रान्तमित्युक्तम्? तदेव सोपपत्तिकमाह, उत्पत्तीति।—उत्पत्ते जन्मत प्रभृति इत्यर्थ, किवा उत्पत्त्या जन्मना, परिपूताया,—शुद्धाया। [एतेन क्वचिदपूतत्व निरस्तम्। शुक्रशोणितादियोगरूपबीजाधानकर्मणि जीवस्य यत् जन्म उच्यते तद पवित्र, पश्चात क्लेदादिसवलित गर्भाशयाद्भूमाववतरण जन्म, तदप्यपवित्रम्। अत संस्कारकर्मभिरेव योनिजाना शुद्धिर्विहिता, तथा हि याज्ञवल्क्य,—"एवमेन शम याति बीजगर्भसमुद्भवम्" इति। एतत जरायुजानामेव सम्भवति, किन्तु अयोनिसम्भवत्वात् सीताया साऽप्यशुद्धिर्नास्तीति भाव। एतेनास्या अतीव पूतत्व ध्वनितम्]। एवम्भूताया अस्या शुद्ध्यर्थं, पावयन्तीति पावनानि [नन्द्यादित्वात् ल्यु प्रत्यय] अन्यानि पावनानि पावनान्तराणि ["मयूरव्यंसकादयश्च" (२।१।७२ पा०) इति नित्यसमास।] तै पावनान्तरै,—अपरैर्वेदाग्नादिपवित्रतासाधने किम्? सर्वमेतन्निष्प्रयोजनम् इत्यर्थ। अविद्यमानदोषाया कथ शुद्धिरिति भाव। [अन्तरशब्देन दोषरहितत्वादेव पावनवस्त्वपेक्षा नास्तीति गम्यते। यत तु सीताया अग्निपरीक्षाऽनुमति, सा मूढाना लोकाना प्रत्ययार्थ, न तु तच्छुद्ध्यर्थमिति]। तीर्थाना गङ्गादीनामुदक च वह्निश्च अन्यत पावनान्तरादित्यर्थ, शुद्धि न अर्हत। अनल ऋदिजद जगच्च स्वेनैव पूतत्वात पदार्थान्तराणि शोधयत, अन्यत् किमपि वस्तु ततोऽवरत्वात् न वा तानि न वा तौ विशोधयितु शक्नोति, तत जगत्पावनाना प्रकृतिपरिशुद्धाना शुद्धयेऽन्यत् पावनविधान पिष्टपेषणवत् व्यर्थमिति भाव। [अत्र पावनगङ्गाविभूतयैकरूपतया पर्यवसानात् पौनरुक्त्यनिरासाय भिन्नवाचकतया निर्देशाच्च प्रतिवस्तूपमालङ्कार। स च एकयैवार्हत इति क्रियया तीर्थोदकवह्न्योरन्वयात् प्राधान्येन तुल्ययोगिताऽलङ्कारेण सङ्कीर्यते]। पथ्यावक्त्र वृत्तम् ॥ १३ ॥

(श) देवयजनसम्भवे। इति।—देवा इज्यन्तेऽस्मिन्निति देवयजन यज्ञभूमि, अनुभवा सा, सैव सम्भवस्तस्मादिति व्युत्पत्त्या सम्भव उत्पत्तिस्थान यस्या सा तथोक्ता, यज्ञभूमि। तथा च रामायणे अयोध्याकाण्डीय अष्टादशाधिकशततमे सर्गे अनसूया इति सीतावचनम्।—

कष्टं जनः कुलधनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशिवं न हि तत् क्षमं ते।

मिथिलाऽधिपतिर्वीरो जनको नाम धर्मवित्।
स्वकर्मण्यभिरतो न्यायतः शास्ति मेदिनीम्॥
तस्य लाङ्गलहस्तस्य कृषतः क्षेत्रमण्डलम्।
अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता॥

अशरीरेण च वागुक्ता प्रतिमाऽमानुषी किल।
एवमेतन्नरपते! धर्मेण तनया तव॥
ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः।
अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः॥' इति।

(घ) प्रसीदेति।—मद्दोषयुते शोकोद्विग्नो मा भव इत्यर्थः, यतः अपरिहार्यत्वादपवादस्य लोकप्रत्ययार्थं परीक्षा कृता, अतः विषादं विजहीहि इति भावः। जीवितावधिरिति।—जीवितं जीवनमवधिः परिच्छेदः अस्य, आमरणं दुष्परिहर इति यावत्, यद्वा जीवितं लोकजीवनं जीवसृष्टिरित्यर्थः, अवधिः यस्य सः, यावत् जगत् स्थास्यति तावत् इयं कथा प्रचरिष्यति इति भावः। प्रवादः—रक्षोगृहस्थितिमूलकः चारित्र्यभङ्गसंशयनिबन्धनः अलीकलोकापवादः इति यावत्।

कथं हि एवमपवादरता दुर्जनास्त्वया न दण्डिताः? प्रत्युत अनमोदिताः, इत्याशङ्क्य सम्प्रति सनिर्वेदं स्वानुष्ठितायामग्निपरीक्षायां हेतुमुक्त्वा आत्मदोषमपसारयति, कष्टमिति।—कुलमेव धनं श्लाघ्यतया अनर्घतया च अवश्यरक्षणीयं येषां तैः, तथोक्तैः जनैः (कर्तृभिः) जनः,—लोकः, अनुरञ्जनीयः,—आराधयितुमेव योग्यः, सर्वथा लोकानुरञ्जनमभिजनवतां परमं व्रतं, न तु तद्दण्ड इति, इत्येवं कष्टम्—दुःखकरं तत् स्मर्यमाणं सत् निरतिशयमेव व्यथयति मानसमिति, परच्छन्दानुवर्त्तनं हि अतीव क्लेशप्रदमित्याशयः। ("कष्टम्" इत्यत्र क्वचित् "कष्ट" क्वचिच्च "क्लिष्ट" इति पाठान्तरमस्ति, तदर्थः—कष्टः क्लेशदायकः जनः, अतिदुर्जनः इति यावत्। क्लिष्टः कस्मात् कारणात् दुःखितः इति भेदः)। कुलधनैस्तु इतरे दुर्जनाः सुजना वा सर्व एव निर्विशेषेण अनुरञ्जनीया इति भावः। तत्—तस्मात् लोकानुरञ्जनव्रतानुपालनाद्धेतोः, नः,—अस्माकं, ("मे" इति पाठान्तरम्), अशिवम्—अप्रिय

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ १४ ॥

वचः ते—तुभ्यं यदुक्तं "वह्निविशुद्धिमन्तरेण नाहं त्वां ग्रहीष्यामि" इत्येवरूपम् । तथा हि रामायणम् —

"प्राप्तचारित्रसन्देहा मम प्रतिमुखे स्थिता ।
दीपो नेत्रातुरस्येव प्रतिकूलाऽसि मे दृढम् ॥
तद् गच्छ त्वनुज्ञाता यथेष्टं जनकात्मजे ।
एता दश दिशो भद्रे ! कार्य्यमस्ति न मे त्वया ॥" इति ।

तत् न हि क्षमं—त्वयि तत् कथमपि न योग्यम् । त्वं साध्वी भवसि अणीयानपि चारित्रभ्रंशविषयकः संशयः त्वयि मे नासीत्, तथापि अलीकलोकापवादपरिजिहीर्षया मया तथाविधं रूक्षमभिहितम्, तत् तु सर्वथा त्वय्ययोग्यमतस्तदिदानीमनुस्मृत्य कोपं मा कुर्विति भावः । अथवा, तत् तस्मात् वस्तुगतिमनुसृत्येत्यर्थः, यदशुभममङ्गलं "यावदार्य्याया हुताशने विशुद्धिः" इत्युक्तलक्ष्मणवचनमिति यावत्, ते तव विषये न अस्माकं त्वदेकजीवितानां तव निर्दोषतां जानतामित्यर्थः, उक्तमिदानीमुदीरितं तत् त्वयि न क्षमं नोचितमवश्यमेवासमीचीनमिति । अत्रेदमाकूतम् ।—मित्रत्वामित्रत्वाविशेषेण लोकसंरक्षणं हि राज्ञामुचितं पर्य्याप्तञ्च कर्म, तथा च सर्वस्वभूतायाः तव उपरि कियन्निकारमनुष्ठितवतां तव निर्दोषताञ्च जानतामस्माकं पुनः त्वया अवाक्प्रसरं प्रागनुभूतानां तावतां दुःखानामनुस्मरणं सर्वथैवाकार्य्यम्, सह्यमेव, तथापि प्रभावमहिम्ना क्षन्तव्यमिति । उक्तमेवार्थं दृष्टान्तेन द्रढयति, नैसर्गिकीति ।—तथा हि सुरभिणः — सुगन्धिनः [अत्र "तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य" (७।१।७४ पा०) इति सूत्रेण पुंवद्भावात् 'सुरभेः' इत्यपि रूपं भवति ।] कुसुमस्य मूर्ध्नि देवादीनां शिरसि स्थितिर्नैसर्गिकी स्वाभाविकी इति सिद्धा—चिरप्रसिद्धा चेतनाचेतनसाधारण्यात् इति यावत् चेतनैरवतंसरूपेण अचेतनैश्च स्तबकरूपेण (शाखाग्रे) धारणादिति भावः । चरणैरवताडनानि—अवमर्दनानि न । अत्राभाणकः —"सुधांशोर्जातेयं कथमपि कलङ्कस्य कणिका, विधातुर्दोषोऽयं न च गुणनिधेस्तस्य किमपि । स किं नात्रेः पुत्रो न खलु हरचूडार्चितमणिः, न वा ध्वान्तं हन्याज्जगदुपरि किंवा न वसति ॥" इति वदिति भावः । अत्रेदमवधेयम्,—सुरभित्वविशेषणोपादानात् इतराणि अत्र व्यवच्छिद्यन्ते, तथा हि, कुसुमानि तावत् द्विविधानि, कान्तिप्रधानानि

सीता। भोदु, अज्जउत्त। भोदु, एहि पेक्खह्म दाव दे चरिदं।* [इति उत्थाय परिक्रामतः]।

लक्ष्मण। इदं तावदालेख्यम्।

सीता। [निर्वर्ण्य] के एदे उवरि णिरन्तरट्ठिदा उवत्थुवन्ति विअ अज्जउत्त ? † (स)

लक्ष्मण। देवि। एतानि सरहस्यानि जृम्भकास्त्राणि (ह),

* भवतु, आर्य्यपुत्र। भवतु, एहि पश्यामस्तावत् ते चरितम्।

† क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्य्यपुत्रम् ?

कानिचित् यथा शाल्मलिकुसुमानि, सुरभीणि च दमनकादीनि, उभयवन्ति मालती प्रभृतीनि। यत हि तानि कान्यपि सौकुमार्य्यसौन्दर्य्यसौरभ्यादिगुणवन्ति, अत न हि अमूनि पादविघातार्हाणि, उभयगुणवतान्तु वस्तुतो न तथेति। [अत्र सुरभिप्रसूनानां शिरसि स्थितिरिव तवापि प्रथितयशसः स्वभावपूतत्वप्रशंसा समुचिता एव, चरणाव मर्दनमिव न हि त्वयि कृतककलङ्कारोपः समीचीन इति बिम्बप्रतिबिम्बभावेन साधर्म्यावगमात् दृष्टान्तालङ्कारः।—"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" इति लक्षणात्। केचित् तु पूर्वार्द्धं प्रति परार्द्धस्य समर्थनरूपत्वात् सामान्येन विशेषसमर्थन रूपमर्थान्तरन्यासं मन्यन्ते]। वसन्ततिलकं वृत्तम् ॥ १४ ॥

(स) निर्वर्ण्य—सप्रणिधानमवलोक्येत्यर्थः, ("निर्वर्णनन्तु निध्यानं दर्शनालोकने क्षणम्" इत्यमरः)। उपरि—ऊर्द्धदेशे, व्योमपथमधिकृत्येति यावत्। निरन्तरस्थिताः,—नास्ति अन्तरमवकाशो यस्मिन् कर्मणि तद्यथा तथा, अविरलभावेनान्योऽन्यविलग्नाः, घनसन्निविष्टा इत्यर्थः, उपचारार्थमिति यावत्। के नाम एते उपस्तुवन्ति इव—उपासते इव ? दिव्यास्त्रत्वात् एषाम् उपर्य्यवस्थानं युक्तमेव, नातः उपचारसमयविरोधः। तथा हि रामायणम्।—

"उपतस्थुर्महार्हाणि सर्वाण्यस्त्राणि राघवम्।
ऊचुश्च मुदिता राम सर्वे प्राञ्जलयस्तदा॥
इमे च परमोदार। किङ्करास्तव राघव।।
यद् यदिच्छसि भद्रन्ते तत्सर्वं करवाम वै॥" इति।

(ह) सरहस्यानि—रहसि निर्जने भवा रहस्या गोप्या' ("रहस्या स्त्री नदीभेदे गोपनीयेऽभिधेयकम्" इति मेदिनी।) आयुधप्रयोगसंहारकमन्त्रभेदा, इत्यर्थः, तैः सह

यानि भगवतः कृशाश्वात् (क) कौशिकम् (ख) ऋषिमुपसङ्क्रान्तानि (ग); तेन च ताडकावधे प्रसादीकृतानि (घ) आर्य्यस्य।

राम। वन्दस्व देवि। दिव्यास्त्राणि।—

वर्त्तमानानि, जृम्भकास्त्राणि,—जृम्भयन्ति, सचेतनानां सम्मोहकत्वात् स्तब्धीभूतान् चित्रार्पितानिव निश्चलान् कुर्वन्ति इति जृम्भकाणि, तन्नामधेयानि साधिदैवतानि ज्योतिर्मयाणि दिव्यास्त्राणि। अस्यन्ते क्षिप्यन्ते इति अस्त्राणि।

(क) कृशाश्वात्—कृशाश्वः विश्वामित्रस्य कश्चित् पूर्वपुरुषः प्रपितामहः, तस्मात्।

(ख) कौशिकं—विश्वामित्रम्। कुशिकः विश्वामित्रस्य पितामहः, गाधिर्नाम राजा तस्य पिता। कुशिकस्य गोत्रापत्यं पुमान् कौशिकः, ["ऋष्यन्धक" (४।१।११४ पा०) इत्यादिना अण्।]

(ग) उपसङ्क्रान्तानि—उपगतानि। ["उपसङ्क्रान्तानि" इति कर्त्तरि प्रयोगात् स्वयमेव तानि दिव्यास्त्राणि आगत्य कौशिकमुपगतानीति प्रतीयते। परन्तु उपरिष्टात् कविः "कृशाश्वः परःसहस्रपरिवत्सरान्तेवासिने कौशिकाय" इत्यादिसन्दर्भेण, भगवान् कृशाश्वः स्वाधिगतानि तपस्तेजसा आप्यायितानि तनयभूतत्वमापुर्वन्ति सर्वास्त्राणि सहस्रपरिवत्सरान् व्याप्य शुश्रूषमाणाय अन्तेवासिने नम्रे कौशिकाय स्वप्रसादभूततया अदित इति अभ्यधात्। तथा हि रामायणम्—

"सर्व्वास्त्राणि कृशाश्वस्य पुत्राः परमधार्म्मिकाः।
कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति॥
तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसुतासुताः।
नैकरूपा महावीर्य्या दीप्तिमन्तो जयावहाः॥
*　　*　　*　　*
तानि चास्त्राणि वेत्त्येष यथावत् कुशिकात्मजः।
अपूर्व्वाणाञ्च जनने शक्तो भूयश्च धर्म्मवित्॥' इति।

(घ) प्रसादेति—प्रसीदति सन्तुष्यति मनो येषु कार्य्येषु तानि प्रसादानि सानुग्रहदानानि। अप्रसादानि प्रसादानि कृतानि प्रसादीकृतानि, अनुकम्पया प्रदत्तानीत्यर्थः। आर्य्यस्य—आर्य्याय रामभद्रायेत्यर्थः (शेषे षष्ठी)।

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्राः शरदस्तपांसि ।
एतान्यपश्यन् गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ १५ ॥

एतेषां दिव्यत्व तेजोमयत्व साधिदेवतत्वञ्च विशिष्य प्रतिपादयितु भङ्ग्यन्तरेणाभ्युपगमप्रकार विवृण्वन् प्रस्तौति, ब्रह्मेति।—ब्रह्मादय,—हिरण्यगर्भादय कृशाश्वान्ता तमसो निस्तार, पुराणा,—प्राचीना आदिभवा इति यावत,गुरव,—शासितार, ("मुनय" इति वा पाठ)। ब्रह्मणो—वेदस्य ब्राह्मणस्य वा उपचारात् जगत अपि वा ("वेदस्तत्त्व तपो ब्रह्म" "ब्रह्मा विप्र प्रजापति" इत्युभयत्राप्यमर)। हिताय—रक्षणाय, सहस्रात् परा इति पर सहस्रा बहुसहस्रा इत्यर्थ, ["पर शताद्यास्ते येषा परा सख्या शताधिकात्" इत्यमर। "पञ्चमी भयेन (२।१।३७ पा०) अत्र सर्वे पञ्चमी" इति योगविभागात् समास, राजदन्तादित्वात् सहस्रशब्दस्य परनिपात। पारस्करादित्वात् सुडागम। मयूरव्यंसकादित्वात वा समास]। शरदो वर्षाणि, ("स्यादृतौ वत्सरे शरत्"इत्यमर। व्याप्त्यर्थे द्वितीया)। तपासि तप्त्वा कायशोषकराणि बहुविधानि दुष्कराणि व्रतानि सेवयित्वा। एतानि—अस्त्ररूपाणि, अस्त्ररूपेण परिणतानीत्यर्थ, तपोमयानि—तपस उद्भूतानीत्यर्थ, स्वानि—स्वकीयानि, तेजांस्येव अपश्यन्—ऐक्षिषत। ब्रह्मादिकृशाश्वान्तानां तपोधनाना चिरोपार्जिततपोमयानि व्यपेतरजांसि तेजासि एव जृम्भकास्त्राणि इति भाव। पुराण ऋषीणाम् तपस्तेज सम्भूतत्वात् अस्माकन्तु सन्तानपारम्पर्यक्रमेण गौरवाधायकत्वात् च सबहुमानमभिवन्दितुमुचितानि इति रामस्याशय। जृम्भकास्त्रप्रदानमुक्त रामायणे—

"कामरूपं कामरुचि मोहमावरण तथा।
जृम्भक सर्पनाथस्य पन्थानवरुणौ तथा॥
कृशाश्वतनयान् राम। भास्वरान् कामरूपिण।
प्रतीच्छ मम भद्रन्ते पात्रभूतोऽसि राघव।॥
* * * *
राम प्राञ्जलयो भूत्वाऽब्रुवन् मधुरभाषिण।
इमे स्म नरशार्दूल। शाधि किं करवाम ते॥" इति।

[अत्र हि महात्मना महापुरुषाणाञ्च गुणप्रख्यापनात् उदात्तालङ्कार.। तथा

सीता। णमो णमो एदाण। (ङ)

राम। सर्वथा इदानीं त्वत्प्रसूतिमुपस्थास्यन्ति। (च)

ङ नमो नम एतेषाम्।

प्राचीनतमाना ब्रह्मादीना तावत्फलरूपास्त्राणाम् अद्भुतपदार्थाना प्रत्यक्षायमाणत्व-प्रकटनात् भाविकालङ्कार। "स्वान्येव' इत्यत्र रूपकञ्च, इति सङ्कीर्य्यते]। वृत्तमुप-जाति,—"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता" इति लक्षणात्। उपजातयो हि चतुर्दशधा भवन्ति—'भेदा भवन्तीह चतुर्दशास्या" इति वाणीभूष-णोक्ते। उपजातीना प्रकारे क्रतेऽय 'वाणी" नाम द्वितीयो भेद। यथा प्राकृत-पिङ्गले—"कीर्त्तिर्वाणी माला शाला हंसी माया जाया बाला। आर्द्रा भद्रा प्रेमा रामा ऋद्धिबुद्धिस्तासां नामानि॥" इति॥ १५॥

(ङ) एतेषामिति सम्बन्धसामान्यविवक्षया षष्ठी। क्वचित् "एदेह्मि" इत्येव पाठ, तस्य 'एतभ्य" इति संस्कृतम्।

(च) त्वत्प्रसूति—तव सन्ततिमपत्यवंशपरम्परामित्यर्थ। उपस्थास्यन्ति—उपगमि-ष्यन्ति, त्वत्पुत्राधिकृतानि भविष्यन्तीत्यर्थ। [एतेन पुत्रौ जनिष्येते इति सूच्यते, स्त्रीप्रजाले जृम्भकास्त्राणामुपस्थानसङ्गत स्यादित्यवधेयम्]। भगवत कौशिकानु-ग्रहादेतानि मामारभ्य मद्वंश्यान् सर्वानेव उपसङ्क्रमिष्यन्तीति भाव।

चित्रदर्शनप्रसङ्गेन प्रथमत एव रघुकुलराजश्रिय सुदृढ प्रतिष्ठापकानां जनयत रामभद्रस्याभ्युदयैकनिदानभूतानामन्वयक्रमेण तदङ्गभुव उपसङ्क्रम्य कलधौतविधौता नूपवंशकीर्त्तिञ्च परित प्रथयता जृम्भकास्त्राणाञ्चोपवर्णनमिषेणापूर्व-मेव कविलकौशल प्रकटनकारि कविना अस्तेतिवृत्तवर्णनावसरे, एतेषा तपस्तेजो-मयत्वेन प्राधान्यमवगत्य पुरतश्चैतेषामुपन्यास उचित इति विभाव्य च भगवता राघ-वा अपि समस्तान्येतानि उद्दिश्य अवन्दिषत। अत सर्वेऽपि प्राथमिककृत्यान्ते ... आदौ तदनन्तरापतिता इव प्रमति एव चित्रदर्शनमनुष्ठितमिति सुधीभि-रनुसन्धेयम्।

[अत्र हि प्रकरी नाम सन्धिरनुनीयते, इति केचित तथा हि प्रसङ्गसङ्गतिक्रमेण ... इतानीकदैवस्थीना वस्तूनामुपवर्णनमेव प्रकरी नाम सन्धि, तदुपवर्णितन्तु ... नाटकप्रतिपाद्यस्यैव वस्तुन सुमहदुपकारक भवति। ... दर्पणे—

सीता। अणुग्गहीदह्मि।*

लक्ष्मण। एष मिथिलावृत्तान्तः।

सीता। अह्महे। दलन्तणवणीलुप्पलसामलसिणिद्धमसिणसोहमाणमसलदेहसोहग्गेण विह्मअत्थिमिदतादद्दीसमाणसोम्मसुन्दरसिरी अणादरखण्डिदसङ्करसरासणो सिहण्डमुद्धमुहमण्डलो अज्जउत्तो आलिहिदो।† (क)

* अनुगृहीतास्मि।

† अहो। दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलदेहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीः अनादरखण्डितशङ्करशरासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आलिखितः।

"प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।
प्रकरी नायकस्य स्यात् न स्वकीयं फलान्तरम्" ॥ इति।

यथा हि शाकुन्तले चूताङ्कुरमवचिन्वतीनां चेटीनामवतारणा, तथैवेयं प्रकरीत्याख्यायते इति। यद्यपीयं प्रकरी, भावप्रकाशिकामतेऽत्र कथञ्चिदुपपद्यते, तथापि नव्यमते न तथा, यथा कुलपत्यङ्के रावणजटायुसंवादमवतार्य्य जटायोर्मोक्षादिप्रासङ्गिकवृत्तावतारः, प्रासङ्गिकेतिवृत्ततया अवान्तरचरितोपवर्णनमिति ध्येयम्]।

(क) इदानीमभिव्यक्तां रतिं विभावादिना सुस्फुटं प्रकाशयितुं सीतारूपालम्बनविभावानुगतं विप्रलम्भावान्तरभेदं पूर्वरागम् ओजोगुणमयी गौडरीतिविनिबद्धां स्वाधिकृतामुत्कलिकाप्रायां रचनापद्धतिं विन्यस्य प्रस्तौति, अहो इत्यादिना, तथा हि—

"श्रवणात् दर्शनाद्वापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥" इति।

अहो इति।—अहो—विस्मयानन्दसंयोगे, दलतीति दलत् विकसत् यत् नवनीलोत्पलम् उन्मिष्यमानेन्दीवरमित्यर्थः, तदिव श्यामलं मेचकं, स्निग्धं मेदुरं कोमलञ्च, मसृणं कार्कश्यादिरहितं विस्तृमरञ्च शोभमानम् अङ्गसौष्ठवात् सुन्दरं मांसलं सुघटितदृढमांसवदित्यर्थः, यद्देहं तस्य यत् सौभाग्यं सौन्दर्य्यं तेनोपलक्षितः। विस्मयेत्यादि।—विस्मयेन आश्चर्य्येण शोभातिशयितत्वादित्यर्थः, स्तिमितं निश्चलं आह्लादनिर्भरार्द्रहृदयं इति यावत्, तथाविधेन तातेन पित्रा जनकेन दृश्यमाना अवलोक्यमाना सौम्या निसर्गशोभाभूमिः प्रशान्तेति यावत्, सुन्दरी मनोहारिणी

लक्ष्मण । आर्य्य ! पश्य ।—

सम्बन्धिनो वशिष्ठादीनेष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

राम । द्रष्टव्यमेतत् ।—

जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः ? ।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

दिव्यन्यग, श्रीः शोभा यस्य तथोक्त, "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते" इति विश्व । अनादरेत्यादि ।—तथा अनादरेण अवलीलया आयास विनैवेत्यर्थ, खण्डित भग्न शङ्करस्य शरासन हरधनुर्येन तथोक्त । शिखण्डेत्यादि ।—अपि च शिखण्डेन काकपक्षेण ("बालानान्तु शिखा प्रोक्ता काकपक्ष शिखण्डक" इति हलायुध ।) मुग्ध सुन्दर, शोभमानमित्यर्थ, ("मुग्ध सुन्दरमूढयो" इति मेदिनी ।) मुखमण्डल यस्य तथोक्त, आर्य्यपुत्र,—राम इत्यर्थ, आलिखित,—चित्रित । [अत्र रामस्य महत्त्ववर्णनात् उदात्तालङ्कार । अत्र शृङ्गाररसानुगुणै वाग्वेषादिभि मधुरताया नायकगताया सुसमञ्जसमालिखितत्वात्, ललिताख्य सात्त्विको नायकगुण वर्णित] ।

अथ सीताया निरतिशयां प्रीति तरसा समेधयितु स्निग्धगुरुजनेषु जनकानाम् ऋत्विजाञ्च प्रगाढप्रणयित्व स्फुटतया विवृणोति, सम्बन्धिन इति ।—एष तव तात जनक, जनकानां जनकापत्यभूतानां, पुरोहित ऋत्विक् [पुर अग्रे धीयते स्थाप्यते इति दधाते कर्म्मणि क्त] मन्त्राद्युपदेशार्थं सर्वोपरि स्थापित पुण्यादिकर्माणि उपदेशको गुरु इति यावत । गौतम, अहल्याया जात गौतमस्य महर्षे तनुज, शतानन्द तन्नामधेय, एष हि सर्वजनविदित जनकपुरोधा । सम्बन्धिन,—अभिनवविवाहजन्यसम्बन्धवत ऋषित्वादात्मीयान्, वशिष्ठादीन् अर्चति सबहुमान प्रत्युद्गच्छति । [अत्र प्राकरणिकयो शतानन्दजनकयो कर्तृत्वेन एकस्यामर्चनक्रियायामन्वयात् तुल्ययोगिताऽलङ्कार ।] ॥ १६ ॥

अपौरवाख्यदैवकनिदानस्य कुशिकनन्दनस्योपरि समुचिता सुहृदाञ्च भक्ति प्रदर्श्य जनकरघुवंशसम्बन्धसमाविलसौकर्ष्यहितकरत्वमोर्त्कीर्तयति जनकानामिति ।—रघो गोत्रापत्यानीति रघवस्तेषाम् । जनकानां जनकवंशीयानाम् । [उभयत्र तद्राजत्वात् बहुत्वे लुक्] । सम्बन्ध विवाहनिबन्धनमिलन, कस्य जनस्य न प्रिय प्रीतिकर ? यत्र यस्मिन् वैवाहिके सम्बन्धे, कुशिकनन्दन गाधे कुशिकस्य पौत्र विश्वामित्र

सीता। एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहदिक्खिदा (ज) तुझे। अज्जो। जाणामि, तस्मिन्नेव प्पदेसे तस्मिन्नेव काले वत्तामि। * (झ)

* एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। आर्य्यो। जानामि, तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्त्ते।

अथ दाता दानकर्त्ता गृहीता च। उभयोरेव कुलयोः पूज्यत्वात् विश्वामित्रे दातृत्व गृहीतृत्वोपचारः। ["कुशिकनन्दन" इति पदोपादानात् प्राक् विश्वामित्रस्य क्षत्रत्वात् तद्राजर्षेरेवासौ महाभाग इदानीं कठोरतपस्तेजोलब्धस्य ब्रह्मर्षित्वस्याभिमान परिहृत्य परमसुहृद्रूपतया अस्माकमनिशं सौख्यमावहति इति व्यज्यते, अतश्चोभयोरेव कुलयोः भूयोभूयः दानग्रहणप्रयोजकव्यापाराणामनुष्ठानात् महोपकारकत्वेन दातृत्वगृहीतृत्व-प्रशंसा तदीया सुसङ्गता अविरुद्धा चैवेति भाव्यम्। उभयकुलपूज्यत्वात् तदाज्ञया कन्यादानग्रहणयोः सम्पन्नत्वाच्चेति भावः। अत एवात्रोदात्तालङ्कार,—प्रस्तुतेऽस्मिन् वैवाहिकसम्बन्धे महत्त्वमावेदयितुं तत्सम्बन्धितपोधनविश्वामित्रमहत्त्वस्योत्कीर्त्तनात्। तथा हि—"यद्वाऽपि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" इति दर्पणः।]॥ १७॥

(ज) तत्कालेत्यादि।—स एव कालः तत्कालः, विवाहप्राक्काल इत्यर्थः [तत्-कालस्य अतीवाह्लादकरत्वेन तेषु प्रसिद्धत्वात् तस्य तच्छब्देनोपादानमिति बोध्यम्]। तस्मिन् कृतं गवां केशानां दानं छेदनं तदेव मङ्गलं शुभकर्म येषां ते तथोक्ताः। ("गोर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि। पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु॥" इति विश्वः)। ["दो छेदे" इति दैवादिकस्य दोधातोरूपं'] अथवा गावः लोमानि, केशाः इत्यर्थः, दीयन्ते खण्ड्यन्ते यत्र कर्मणि इति अधिकरणव्युत्पत्त्या केशान्ताख्यं चौलकर्म उच्यते तदेव मङ्गलं माङ्गलिकं कर्म तत्र कृतं यथाशास्त्रमृत्विग्भिरनुष्ठितं येषां तथोक्ताः यथाविधि तत्कर्मनिष्पादनात् शुभा सुषमामादधत इत्यर्थः। तथा हि मनुः,—"केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते। राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः॥" इति। अत रघौ कालिदासः,—"अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयत् गुरुः" इति। एतद्धि कर्म विवाहात् प्राक् क्रियते। केचित्तु—गवां पयस्विनीनां धेनूनां दानं पात्रेषु त्यागः तद्रूपं वा माङ्गलिकं कर्म, दम्पत्योः

राम। एवम्। (ञ)—

समयः स वर्त्तत इवैष यत्र मां
समनन्दयत् सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥ १८॥

दीर्घायुष्कामनयैवैतत् क्रियते इति व्याचक्षते। विवाहदीक्षिता,—उद्वाह-मङ्गला [दीक्षधातोः भौवादिकस्य कर्त्तरि क्त]।

(झ) अहो इति।—जानामि अनुभवामि मन्ये इत्यर्थः, अहं तस्मिन्नेव प्रदेशे—जनकालये विवाहाधिष्ठितस्थाने, तस्मिन्नेव काले—हरधनुर्भङ्गादिकाले इत्यर्थः, वर्त्ते—अस्मि। अहो! चित्रकारिणा अपूर्वमालिखितं, यतः स एव कालः देशश्च इदानीम् अतीतः दूरस्थः अपि प्रत्यक्षीभूततया आभाति न। [अतीतोक्त्याऽनुप्राणितः भाविका-लङ्कारः]।

(ञ) एवम्—अस्त्येवेति शेषः यद्वदसि तत्तथैवेत्यर्थः।

इदानीं उपकृपणादिरूपैरुद्दीपनविभावैरुद्बुद्धं नायकगतं पूर्वरागमभिधातुं परत-[illegible] तद्गतमनुभवमभिव्यनक्ति समय इति।—हे सुमुखि! स एष समयः,—वैवाहिकः कालः वर्त्तत इव—अतीतोऽपि इदानीन्तन इवानुभूयत इत्यर्थः। यत्र—यस्मिन् समये सम्प्रदानसमये इत्यर्थः, गौतमार्पितः,—गौतमेन गौतमतनयेन पुरोधसा शतानन्देन मम करे स्थापित इत्यर्थः, (एष हि चिरन्तनः सदाचारः प्रवर्त्तते, तथा हि भवदेवः—"ततो जामाताऽऽचान्तः सङ्गौषधिलिप्तेन दक्षिणहस्तेन तादृशमेव कन्याया दक्षिणहस्तं स्वहस्तोपरि निदध्यात्" इति)। आगृहीतः परिहितः, कमनीयः मनोज्ञः कङ्कणः वलयः वैवाहिकसूत्रं वा येन तथाविधः, [illegible] इत्यर्थः "कङ्कणं करभूषायां सूत्रके च शेखरे" इति हैमः। [एतेन करस्पर्शोत्थित-[illegible] सीतायाः वदनकमलचारुताऽतिशायित्वं [illegible] ध्वनितम्]। अथवा—आगृहीता [illegible] कमनीया [illegible] तदाकारा [illegible] यस्मिन् तथाविधः अयं तव करः मूर्त्तिमान् महोत्सव इव मां समनन्दयत् नितरामप्रीणयदित्यर्थः। [अत

लक्ष्मण। इयमार्य्या, इयमपि आर्य्या माण्डवी, इयमपि वधूः श्रुतकीर्त्तिः। (ट)

सीता। वच्छ। इअं पि अवरा का? * (ठ)

लक्ष्मण। [सलज्जस्मितं स्वगतम्] अये। ऊर्मिला पृच्छति

---

* वत्स। इयमपि अपरा का?

पूर्वोक्त अतीतस्यापि कालस्य इदानीन्तनत्वेन उत्कटैककोटिकतया प्रतीयमानत्वात् भावाभिमानिनी क्रियोत्प्रेक्षा, परार्द्धेऽपि तथैव सर्वात्मसत्वरूपगुणावगाहितया गुणोत्प्रेक्षा, ताभ्याञ्चाकृतस्य भूतस्य वस्तुन प्रत्यक्षायमाणत्वेन अभिधानात् विच्छित्तिविशेषाद्यभिधायकतया भाविकालङ्कार ध्वनित, प्राक्प्रत्यक्षीभूताना हि वस्तूनामुपवर्णने इदानीं प्रत्यक्षायमाणत्वोक्तिरिति]। मञ्जुभाषिणी वृत्तम्।—"सजसा जगौ भवति मञ्जुभाषिणी" इति लक्षणात्। वृत्तमिदं हि त्रयोदशाक्षरपादच्छन्दसः २७९६ तमप्रस्तारान्तर्भूतम् ॥ १८ ॥

(ट) चित्रे हस्तं निर्दिश्य अभिधत्ते इयमिति।—इयमार्य्या—भवती, (सीतां प्रति इयमुक्ति)। माण्डवी, राजर्षे जनकस्य कनीयस भ्रातु कुशध्वजस्य ज्येष्ठा कन्या भरतपत्नी। अनयोस्तु ज्येष्ठभ्रातु भार्य्यात्वेन मातृसमानत्वात् आर्य्यापदेनाभिधानम्, तथा हि वृहस्पति,—

"मातु स्वसा मातुलानी पितृव्यस्त्री पितृष्वसा।
श्वश्रू पूर्वजपत्नी च मातृतुल्या प्रकीर्त्तिता॥" इति।

श्रुतकीर्त्ति,—शत्रुघ्नपत्नी कुशध्वजस्य कनिष्ठा कन्या, कनिष्ठभ्रातु पुत्ररूपत्वात् तद्भार्य्याया स्नुषात्वेनाभिधानम्, तथा हि मनु,—

"पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयस।
पुत्रवच्चानुवर्त्तेरन् ज्येष्ठे भ्रातरि धर्मत॥" इति।

(ठ) महात्मना लक्ष्मणे ज्यायसां सोदराणां सविधे सदाचारं सम्यक् प्रचलतमेव विधातुं स्वविनीतत्वञ्च दर्शयितुं लज्जया स्वपत्नीमूर्म्मिलामप्रदर्श्य माण्डवीं प्रभृति भिव दर्शयितुमारेभे तद्दृष्ट्वा अपारप्रणयपीयूषधाराप्रवाहिणी मुग्धा वैदेही अप्रतिम वात्सल्य विकाशयितु पृच्छति,—वत्स इत्यादि।

आर्य्या॥ भवतु अन्यत सञ्चारयामि। (ड) [प्रकाशम्] आर्य्ये। दृश्यतां द्रष्टव्यमेतत्। अयञ्च भगवान् भार्गवः। (ढ)

सीता। [ससम्भ्रमम्]। कम्पिदह्मि। * (ण)

राम। ऋषे। नमस्ते।

लक्ष्मण। आर्य्ये। पश्य अयमार्य्येण—" [इत्यर्द्धोक्ते] (त)

राम। [साचेपन्]। (थ) वत्स। बहुतरं द्रष्टव्यमस्ति। अन्यतो दर्शय। (द)

* कम्पिताऽस्मि।

(ड) सलज्जेति।—लज्जया सह वर्त्तमान सलज्ज, तथाविध स्मितमीषद्धसन यस्मिन् कर्मणि तत्। स्वस्त्रीविषयकप्रश्नोदयात लज्जा मृदुहसितञ्च युगपदेवोदियाग्ये त्यर्थ। स्वगतम्—आत्मगतमभिदधे इत्यर्थ।—"अश्राव्य खलु यद्वस्तु तदिह स्वगत मतम" इति लक्षणात। भवतु—सत्यमेव तथापीत्यर्थ, अन्यत—भयानकरसभाव वहन्ने आलेख्यस्यान्यस्मिन्नंशे इति यावत, सञ्चारयामि—आर्य्याया दृष्टि विनि वेशयामोत्यर्थ कर्मिलावृत्तान्त विस्मारयितुमिति भाव।

(ढ) प्रकाशम् इति।—"सर्वश्राव्य प्रकाशं स्यात्" इति लक्षणात् स्फुटमभिधत्ते इत्यर्थ। द्रष्टव्यमेतत—द्रष्टुमुचित भार्गवविजयालेख्य, रामस्य विजयवार्त्तासहट त्वादेतस्येत्यर्थ परन्तु सर्वत कोर्त्ते प्रथनेन सतीना महाह्लादकरत्वाद्वा इत्यर्थ। भगवान्—त्रिलोकीपूज्य इत्यर्थ भार्गव—परशुराम। उद्वाहक्रिया समाप्य मिथिलाया प्रत्यागच्छता रामादीना निधनाय चतात्मक परशुराम हरधनर्भङ्गात तत्राध्यनसहिष्णु पथि उदीयमान अभत्, रामस्तु त पराजिग्ये, इति रामायणी कथा।

(ण) ससम्भ्रममिति।—भीत्यादिजनितत्वरया सहितम्। कम्पिता—वेपथु मती। भार्गवस्य भीमवपुष समालोकनात भयानकरसावेशात् कम्पन वेदितव्यम्।

(त) अर्द्धोक्त इति।—वैष्णव शरासन समारोप्य समाक्रष्टतेजा निगृहीत इति वाक्यशेष, अयञ्च भगवान् भार्गव इति पूर्वेणान्वय।

(थ) साचेपमिति।—सप्रतिषेधम। लक्ष्मणस्योक्ति वच प्रतिषिध्येत्यर्थ आक्षेपेण आक्षेपेण—कठिन सह। ["क्षिपु निरसने" इति धातो भावे घञि रूपम्]।

(द) बहुतरमिति।—भगवत भृगुवंश्य परशुरामस्य पराभवोत्कीर्त्तनस्य सता-

सीता। [सस्नेहबहुमानं निर्वर्ण्य]। सुट्ठु, सोहसि अज्जउत्त! एदिणा विणअमाहप्पेण। ग

लक्ष्मण। एते वयमयोध्यां प्राप्ताः।

राम। [सास्रम्]। (ध) स्मरामि हन्त स्मरामि।—

जीवत्सु तातपादेषु नवे दारपरिग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥१९॥

ग सुष्ठु शोभसे आर्य्यपुत्र। एतेन विनयमाहात्म्येन।

सम्मतत्वात्, प्रत्युत, महता निन्दाश्रवणस्य प्रत्यवायजनकत्वात् स्ववीर्य्यप्रशंसा च आत्मना श्रोतुमयोग्यत्वात् तत्कथनव्यवसायात् लक्ष्मणः प्रतिषेधितः, [एतेन अनात्मश्लाघाकरत्वात् नायकस्य धीरोदात्तत्वं सूचितमिति बोध्यम्। तथा हि,—"अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः। स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥" इति]। अन्यत् दर्शय—अन्यत्र लिखितं वस्तु निभालयेत्यर्थः।

सस्नेहबहुमानमिति।—रामस्य धीरोदात्तोचितव्यवहृतिं दृष्ट्वा तस्मिन् सीताया निर्भरस्नेहाविर्भावः, अथापि तस्मिन् महति वीर्य्ये, अत एव द्विजस्योपरि तदाहितत्वेन निन्दात्वेन तद्दर्शनौत्सुक्यपरिवर्जनदर्शनात् बहुमानश्च, ताभ्यां सह वर्त्तमानं यथा तथेत्यर्थः। सुट्ठु—प्रशंसार्थकमव्ययम्। विणअमाहप्पेण—विनयस्य प्रागुपदर्शितस्य माहात्म्येन महिमभरेणेत्यर्थः, [एतेन महतः भार्गवस्य निकृतिरूपं महाजनलाघवं, स्वविजयरूपं गौरवञ्च द्रष्टुमशक्यत्वेन, राघवस्य माहात्म्यम्, अतिविनयित्वञ्च सूच्यते]।

(ध) सास्रमिति।—विदेहात् (वर्त्तमानाभिधा "त्रिहुत्") अयोध्यामुपगतस्य राघवस्य, कियद्दिवसानन्तरमेव तद्राज्याभिषेचनमनतिप्रतः पितुः स्वर्गतिमनुस्मृत्य निर्भरशोकमविषह्य, अयोध्यावृत्तान्तश्रवणसमकालं हि निर्भरम् अश्रुपातः अजायत इत्यवधेयम्। हन्त—खेदे। स्मरामि,—स्मरामीति द्विरुक्तिः गुरुवियोगजनितोद्वेगसन्तापद्योतिका,—

"विवादे विस्मये हर्षे शोके दैन्येऽवधारणे।
प्रसादने सम्भ्रमे च द्विस्त्रिरुक्तिर्न दुष्यति॥" इत्याप्तवचनात्।

तत्कालसम्भूतमुत्कलिकाजातमिदानीं स्मृतिपथमारूढमित्यर्थः। तद्वृत्तान्तस्य शोकसङ्कुलत्वात् तद्वेगं सोढुमशक्नुवतः रामस्य सवेदोक्तिरियम्।

शोककारणानां समाहृतानां विशदीकर्त्तुं स्मरणप्रकारमभिदधाति, जीवत्स्विति।—तातपादेषु जनके "एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे" इत्यादि

इयमपि तदा जानकी—

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैः

दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम् ।

स्मरणात् गौरवात् बहुवचनम् । (पादशब्दप्रयोगस्तु तेषामतिपूज्यत्वद्योतनाय — "उत्तमानां स्वरूपं तु पादशब्देन भण्यते" इति दर्शनात् । स्वर्गतस्य पितुः नामोच्चारणस्य सपदि शोकावेगकरत्वात् गुरुनामग्रहणप्रतिषेधाच्च दशरथ इति नामग्रहणं नाकारि इत्यवधेयम्) । जीवत्सु विद्यमानेषु सत्सु, नवे दारपरिग्रहे परिणये सति, मातृभिः कौशल्यादिभिः चिन्त्यमानानां कथं हि एतेषां समयः सुखेन गमिष्यति, इत्थं सततं प्रेमभरमनुध्याय सस्नेहं परिवर्द्धमानानां, न अस्माकं, [दशरथस्य सार्द्धसप्तशती पत्न्य आसन्, तासु तिस्रो मुख्याः । तत्रापि महिष्याः कौशल्यायाः गर्भसम्भूतस्य रामस्य सुखवर्द्धनाय ताः सर्वा एव निरताः बभूवुः । एकस्याः एव मातुः सुखलालनत्वं दुर्लभमेव, किमुत साद्धसप्तशत्याः, अत उक्तं "मातृभिः" इति । किञ्च तासां सुखाकरवस्तुना नवनवोद्भावनमपि आसीत्, अत उक्तं "चिन्त्यमानानाम्" इति । सामान्यरक्षकस्य जीवनं सततं हि रक्षितजनानां सुखावहं भवति, निरतिशयसुखानुध्यानरतस्य पितुस्तु सुतरामेव तथेति हृदयम्] ते पूर्वानुभूताः [अत्र अनुभूतार्थविषयत्वात् तच्छब्दस्य न यच्छब्दापेक्षा, तथाहि—"प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" इत्याद्युक्तेः] हि दिवसाः अपरिच्छिन्नानन्दैकरसाः वाचामगोचराः इत्यर्थः, गताः अतीताः चिरायेति शेषः, कथमपि ते पुनः नैवेदानीं लप्स्यन्ते इत्यर्थः । [अत्र दिवसानां सुखप्रदत्वं, तातपादजीवनरूपे एकस्मिन् कारणे सत्यपि, नवदारपरिग्रहादिरूपाणां हेत्वन्तराणां खलेकपोतवत् साहित्यैनैकत्रावतरणात् समुच्चयालङ्कारः, अपि चात्र, दिवसपदस्य लक्षणया मुख्यार्थस्य परित्यागेन स्वविशेषरूपार्थान्तरसङ्क्रमणात् अर्थान्तरसङ्क्रमितत्वं ध्वनिः] ॥ १९ ॥

न केवलं मातापितरौ अभवत्यां ममाय निरतौ, त्वमपि तेषां सुखहेतुरासीः, इति नायिकाया मुग्धात्वमुपवर्णयितुं तत्तद्दिवसानां महाह्लादकरत्वं भङ्ग्यन्तरेण प्रतिपादयति, प्रतन्विति ।—तदा प्रतनुभिः स्वभावसुकुमारत्वोजन्यतया सूक्ष्मैः अथच विरलैः अनतिनिविडैरित्यर्थः, तथा प्रान्ते कपोलोपान्ते उन्मीलन्तः स्फुरन्तः ये मनोहराः रुचिराः कुन्तलाः केशाः तैः, अपि च दशनमुकुलैः,—दशनाः दन्ताः मुकुलानीव कुड्मलानीव इव तैः उपलक्षितं, तथा मुग्धालोकं—मुग्धः मनोहरः आलोकः

ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बाना मे कुतूहलमङ्गकैः ॥ २० ॥

लक्ष्मण। एषा मन्थरा।

राम। [अनुत्तरमनती दर्शयन्]। (न) देवि वैदेहि।—

दर्शनं यस्य तथोक्तं सुदृश्यमित्यर्थः, मुखं दधती धारयन्ती, शिशुः शैशवयौवनान्त वर्त्तमाना शिशुप्राया इत्यर्थः ("इयमपि जानकी" इति कर्तृपदेन पूर्वेणान्वयः), ललितललितैः,—ललितेभ्यः ललितैः [इति पञ्चमीसमासः], अथवा अतिशयेन ललितैरतिमन्दरैरित्यर्थः। ["प्रकारे गुणवचनस्य" (८।१।१२ पा०) इति द्विभावः। "ललितं त्रिषु सुन्दरम्" इत्यमरः] अथवा—ललितात् तन्नाम्ना प्रसिद्धात् सम्भ्रम करकिसलयावर्त्तनरूपात् सैरचरणकमलन्यासादिरूपाच्च स्वाभाविकनायिकाऽलङ्कर णात् हेतोः, तत्सत्त्वेति भावः, ललितैः मञ्जुलैः हृदयग्राहिभिरित्यर्थः, (तथा हि— "सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत्" इति लक्षणात्) ज्योत्स्नाप्रायैः,— आनन्दकरत्वात् कौमुदीसदृशैर्लावण्यमयैरित्यर्थः, अतीव धवलैरिति यावत्, [अत्र प्रायशब्दः प्रचुरवाची, "जलप्रायो देशः" इतिवत् मयूरव्यंसकादित्वात् समासः], अकृत्रिमविभ्रमैः,—नास्ति कृत्रिमो विभ्रमः विलासः भङ्गीविशेषः येषु, तथाविधैः, अनुद्भिन्नयौवनतया अशिक्षितकृत्रिमविलासैरित्यर्थः, मधुरैः,—नेत्रानन्दकरैः कोमलैः, अङ्गकैः [अल्पार्थे कन्] तनुतरैरित्यर्थः, मे मम, अम्बाना मातॄणां, कुतूहलं दर्शनौत्सुक्य कियदिति नाम आनन्दमित्यर्थः, अकृत अजनयत् [करोतेः लुङि रूपम्। कृञ आत्मनेपदेन रामाम्बाकुतूहलकरणफलं सीताया अवगम्यते कर्त्रभिप्रायिकत्वादित्यव- धातव्यम्]। सीतायाः शुद्धान्तमध्युषितत्वेन अन्येषां तद्दर्शनासम्भवात्, मातॄणां पुनः तस्यां स्नेहातिशय्यस्य द्योतयितुम् अम्बानामितिपदमुपात्तमिति सङ्क्षेपः। [अत्र मुग्धानायिकायाः यथावत् असाधारणचेष्टादीनामुपवर्णनात् स्वभावोक्त्यलङ्कारः, अपि च कुतूहलरूपकार्य्यस्य बहूनां कारणानां खले कपोतवदेकत्र समावेशात् समुच्चयालङ्कारः, "दशनमुकुलं" "ज्योत्स्नाप्रायैः" इत्युभयत्र लुप्तोपमा, इत्येषा- मङ्गाङ्गिभावतयाऽवस्थानात् सङ्करः]। वृत्तं हरिणी।—"नसमरसला गः षड् वेदैर्हयैर्हरिणी मता" इति तल्लक्षणात्। तच्च समदशाक्षरपादच्छन्दसः ४६११२ तम प्रस्तारान्तर्गतम् ॥ २० ॥

(न) अनुत्तरमिति।—तातविनाशादिविपदामिनिदानत्वात् कैकयीसंवादसवलि

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः ॥ २१ ॥

लक्ष्मण। [विहस्य स्वगतम्]। अये मध्यमाम्बावृत्तान्तोऽन्तरित आर्य्येण ॥ (प)

सीता। अह्मो एसो जडासञ्जमणवुत्तन्तो। * (फ)

लक्ष्मण। पुत्रसङ्क्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिः कृतम्।
धृतं बाल्ये तदार्य्येण पुण्यमारण्यकव्रतम् ॥ २२ ॥

* अहो एष जटासंयमनवृत्तान्तः।

तया तदीयदास्या मन्थरया सवार्थे कामपीडामकृत्वैव अन्यत् दृष्टिमदितेति बोध्यम्।

इङ्गुदीति।—स अयं पुरोवर्त्ती चित्रित इत्यर्थः, शृङ्गवेरपुरे—गुहस्य नगरे, (अधुना "चुनार" इति ख्याते) इङ्गुदीपादपः तापसतरुश्च, यत्र वृक्षमूले, पुरा वनवासावसरे, स्निग्धेन मित्रेण ("वयस्यः स्निग्धः सवयाः" इत्यमरः) निषादपतिना गुहेन, सहेत्यर्थः, समागमः सम्मिलनम् आसीत् ॥ २१ ॥

(प) विहस्य इति।—सस्मितमित्यर्थः। मध्यमेत्यादि—मध्यमाया द्वितीयाया अम्बाया जनन्याः कैकेय्या इत्यर्थः, वृत्तान्तः,—उदन्तः रामविवासनादिरूपव्यापारनिचय इत्यर्थः, अन्तरितः,—निह्नुतः गोपायित इत्यर्थः, [तद्वृत्तान्तस्य दुःखोद्दीपकत्वात् अशुभकरत्वात् वा परिहृतः, अन्तरयते नामधातोः कर्मणि क्तस्य रूपम्। "वृत्तान्त" इत्यत्र "वृत्तम्" इति पाठस्तु समीचीनः। तदर्थस्तु,—वृत्तं चरितं वनप्रस्थापनरूपम्। वृत्तान्तमिति पाठे—वृत्तान्तम् आचरितम्, स्वरूपार्थे अन्तशब्दस्य क्लीबलिङ्गत्वात् वृत्तान्तमित्यस्य क्लीबत्वम्]।

(फ) अहो—विस्मये वसुधाऽऽधिपत्ये ध्रियमाणस्य राघवस्य को नामाऽयम् वस्त्रादिपरिधानं दैवस्यातिविरुद्धमरत्वात्, एतदेवात्र विस्मयकारणमवधेयम्। जटासंयमनवृत्तान्तः —जटाबन्धनव्यापारः। पुरा हि वनगमनाऽवसरे एतस्मिन् शृङ्गवेरपुरे गुहेन रामलक्ष्मणयोः जटा नियमिता इति, रामायणी वार्त्ता।

तदेवेदानीं सविषादं स्वीकर्त्तुमुदारमात्मवृत्तं प्रस्तौति पुत्रेत्यादि।—पुत्रसङ्क्रान्तलक्ष्मीकैः,—पुत्रनिहितराज्यश्रीकैः पुत्रन्यस्तराज्यशासनभारैः इति यावत्

सीता। एसा पसण्णपुण्णसलिला भअवदी भाईरही।*(ब)

राम। देवि रघुकुलदेवते। (भ) नमस्ते।—

* एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

अथवा पुत्रेषु सङ्क्रान्ता प्रजायर्राविगमात् निराश्रया सती नवीनाश्रयभूतेषु तेषु स्वत सङ्क्रान्ता लघीयेषा तथाभूतं "[उरःप्रभृतिभ्य कप्" (५।४।१५१ पा०) इति कपि, "न कपि" (७।४।१४ पा०) इति ह्रस्वप्रतिषेधश्च]। वृद्धेक्ष्वाकुभि,— गलितवयोभि इक्ष्वाकुवंशीयै, यत् पुण्य पावनम्, आरण्यकव्रतम्—[अरण्ये भवा इत्यर्थे वुञ्] आरण्यका वनवासिन तेषां व्रत नियम, वैखानसानुपालितमित्यथ, ["आरण्यकं व्रतम्" इति पाठ तु,—आरण्यकशब्दात् पुन अण् इदमर्थे, अर्थस्तु उभयत्र समान] व्रतम्—अनुष्ठित, तत्—तत्सदृश व्रत, पित्राज्ञापालनानुरोधात् धर्म्यम् अरण्यवासादिरूपम्, आर्य्येण—सता ज्येष्ठेन, पूज्येन रामेणेत्यथ। (एतेन श्रद्धालुतयैव तत् स्वीकृत, न तु लोकापवादभयादिति बोध्यम्)। बाल्ये—नवे वयसि, श्रितम्— अवलम्बितम्। यदेव पुरा पुत्रवद्भि उपभुक्तराज्यैश्च इक्ष्वाकुभि वलीपलितोपहते वयसि इद धर्म्य व्रतमाचरितम् आर्य्येण तु तदेव प्रथमे वयसि परिगृहीतमिति महदेतदाश्चर्यकरमित्यथ । [अत्र वृद्धेक्ष्वाकूणामारण्यकव्रतधारणमार्य्यस्याऽसम्भवत् अपि तत्सदृशव्रतधारणमवगमयत् वृद्धेक्ष्वाकूणा बालस्यार्य्यस्य च बिम्बप्रतिबिम्बभाव बोधयति, अन्यकृतान्यधर्मवहनासम्भवात, अत एवात्र असम्भवद्वस्तुसम्बन्धरूपा निदर्शना, अपि च वृद्धत्वरूपकारणस्याऽसद्भावेऽपि अहेतुकारण्यकव्रतरूपकार्य्यस्य उदयात् विभावनाऽलङ्कार, ताभ्याञ्च, बालस्य राघवस्य वृद्धेक्ष्वाकुभ्य आधिक्यप्रतीते व्यतिरेकालङ्कार व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिरिति ध्येयम्]। द्वितुय्यपादयो चतुर्थवर्णात् पर जगणस्य वर्त्तमानत्वात् पथ्यावक्त्र वृत्तम्,—"युजो चतुर्थतो जेन पथ्यावक्त्र प्रकीर्त्तितम्" इति लक्षणात्॥ २२॥

(ब) प्रसन्नेत्यादि।—प्रसन्न कलधौतधवल निर्म्मलं पुण्य पावनञ्च सलिल यस्या तथाभूता, भागीरथी—भगीरथेन आनीता, स्वान् पूर्वपुरुषान् समुद्धर्त्तुमित्यर्थ ।

(भ) रघुकुलदेवते इति।—रघो कुल सन्तति तस्य देवता अधिदेवता इत्यर्थ, [महर्षिकपिलशापविदग्धान् सगरसुतान् समुद्धर्त्तु भगीरथ स्वधुनीं पृथिवीमानिनाय, स्वीयपुरुषान् तदमिलपयसा पावयामास च, अतो हि रघा सुता तामधिदेवतामिवाऽमन्यन्त]।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसाऽमर्षात् प्लुष्टान् पुरा प्रपितामहान्।

कथ हि सा भागीरथी तदन्वयस्य पावनी, रघुकुलदेवतेव च नियतमस्मानि रघभि तदेव विहरतीति, तुरगेत्यादि।—हे भगवति। भागीरथि। पुरा पूर्व्व ["पुरा' इत्यत्र "पितु" इति पाठान्तर दृश्यते, तत्तु प्रपितामहानित्यनेनान्वित कृत्वा पितु दिलीपस्य प्रपितामहानिति केचन व्याचक्षते। तत्तु रामायणविरोधात् उपेक्षित-मस्माभि। यत सगरस्य सौमतेया षष्टिसहस्रसुता, असमञ्जस्य (विष्णुपुराणे तु "असमञ्जस्' शब्द पठ्यते) वैमात्रेया भ्रातर, भगीरथस्यैव प्रपितामहस्य वैमात्रेय-भ्रातर भवन्ति, न तु तत्पितु दिलीपस्येति बोध्यम्]। सगराध्वरे—सगर-स्यास्मत्पूर्व्वपुरुषस्य राज्ञ यज्ञे हयमेधे इत्यर्थ, तुरगविचयेत्यादि—तुरगस्य अश्व-मेधीयस्य वाजिन इन्द्रेणापहृत्य पाताल नीतस्येत्यथ, विचये अन्वेषणे व्यग्रान्—उत्सुकान्, उर्वीभिद,—यज्ञदीक्षितस्य सगरस्याज्ञया उर्वीं पृथिवीं भिन्दन्ति इति ते तथाविधा, ["सत्सुद्विषद्रुहदुह" (३।२।६१ पा०) इति क्विप्] सर्व्वे अश्वान्वेषणे व्यग्रतया भूत्वा, पातालगमनार्थं भुव दीर्य्यन्त इत्यथ। तथा हि आदिकाण्डे रामायणे एकोनचत्वारिंशोऽध्याये—

"यावत तुरगसन्दर्शस्तावत् खनत मेदिनीम्।
तमेव हयहर्त्तार मार्गमाणा ममाज्ञया॥
दीक्षित पौत्रसहित सोपाध्यायगणस्त्वहम्।
इह स्थास्यामि भद्र वो यावत्तुरगदर्शनम्॥"

पश्चात, अमर्षात्—कोपात, कपिलस्य महामुनेर्महसा तेजसा, प्लुष्टान्—दग्धान्, भस्मसात् कृतानित्यथ, ['प्लुष दाहे" कर्म्मणि क्त]। तथा हि, तत्रैव—

ततस्तेनाऽप्रमेयेण कपिलेन महात्मना।
भस्मराशीकृता सर्व्वे काकुत्स्थ। सगरात्मजा॥" इति।

प्रपितामहान्—सगरस्य नृपते पत्न्या सुमत्या तनयान्, षष्टिसहस्राणीत्यर्थ। तथा हि तत्रैव अष्टत्रिंशाध्याये—

"अथ काले गते तस्य ज्येष्ठा पुत्र व्यजायत।
असमञ्ज इति ख्यात केशिनी सगरात्मजम॥
सुमतिस्तु नरव्याघ्र। गर्भतुम्ब व्यजायत।
षष्टि पुत्रसहस्राणि तुम्बभेदात् विनि सृता॥" इति।

अगणिततनूपात तप्ता तपांसि भगीरथो
भगवति! तव स्पृष्टानद्भिश्चिरादुददीधरत्॥ २३॥

असमञ्जस्य पितामहत्वेन तदभावेयाणां षष्टिसहस्रसंख्यकानां सुमतिसुतानामपि तथात्वमवधेयम्। भगीरथस्तद्वंशीय आसीत्।—

"सगरादसमञ्जस्तु असमञ्जादथांऽशुमान्।
दिलीपोऽशुमतः पुत्त्रो दिलीपस्य भगीरथः॥"

अपि च—"दिलीपस्तु महातेजा श्रुत्वा पैतामहं वधम्।
दुःखोपहतया बुद्ध्या निश्चयं नाऽध्यगच्छत॥
कथं गङ्गाऽवतरणं कथं तेषां जलक्रिया।
तारयेयं कथं चैतानिति चिन्तापरोऽभवत्॥
तस्य चिन्तयतो नित्यं धर्म्मेण विदितात्मनः।
पुत्त्रो भगीरथो नाम यज्ञे परमधार्म्मिकः॥"

इत्यादि रामायणम्। अगणितेत्यादि—अगणितः उपेक्षितः अविचारितः वा तन्वाः शरीरस्य पातः पतनं शरीरध्वंसः इति यावत् यस्मिन् तपःकर्म्मणि, ("स्त्रियां मूर्त्तिस्तनुः तनू" इत्यमरः)। तद् यथा तथा चिरात्—चिराय, सहस्रपरिवत्सरान् व्याप्येत्यर्थः, तपांसि तप्ता—तपस्यन् इत्यर्थः, तथा हि,—

'भगीरथस्तु राजर्षिः धार्म्मिको रघुनन्दन।
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः॥
तपो दीर्घं समातिष्ठत् गोकर्णे रघुनन्दन!।
ऊर्द्ध्वबाहुः पञ्चतपा मासाहारो जितेन्द्रियः॥
तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः।
अतीतानि महाबाहो! तस्य राज्ञः महात्मनः॥" इति।

तपसा स्वर्गादवतारितायाः इति भावः, तव अद्भिः,—सलिलैः, स्पृष्टान्—अभिषिक्तान्, तान् उददीधरत्—उद्धारयामास। तथा हि तत्रैव—

"गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महाऽऽत्मनाम्।
स्वर्गं गच्छेयुरत्यन्तं सर्व्वे च प्रपितामहाः॥"

अपि च,—"अथ तद्भस्मनां राशिं गङ्गासलिलमुत्तमम्।
प्लावयत् पूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम!॥" इति।

सा त्वम् अम्ब ! स्नुषायामरुन्धतीव सीतायाः शिवानुध्यानपरा भव। (म)

[अस्तेः णिचि लुङि रूपम्। अत्र प्रस्तुतभागीरथीवर्णनस्याङ्गीभूततया महता सगरादीनां चरितोपवर्णनस्य प्रस्तुतभागीरथीमहत्त्वव्यञ्जकस्य सस्थितेः उदात्तालङ्कारः]। वृत्तं हरिणी।

पुरा किल वैवस्वतस्य मनोरन्वये सगरो नाम नृपतिरासीत्। तस्य द्वे पत्न्यौ, (ज्येष्ठा केशिनी, अपरा च सुमतिर्नाम) आस्ताम्। स हि महात्मना अप्रजस्त्वात् हिमवन्तं नगाधिपमासाद्य भृगुप्रस्रवणे वर्षशतं तपोऽतप्यत। महर्षेर्भृगोः प्रसादाच्च ज्येष्ठा वंशकरं सुतम् असमञ्जम् अपरा च षष्टिं पुत्रसहस्राणि जनयामास। ततश्च असमञ्जात् अंशुमान्, अंशुमतः दिलीपः, दिलीपाच्च भगीरथः जज्ञे। इति वंशानुक्रमः। अथ पौराणामहिते रतः असमञ्जः पुरात् पित्रा निर्वासितः अभूत्। तत्पुत्रः अंशुमान् सगरस्य मते स्थितः हयमेधमारेभे, सगरस्याज्ञया सुमतितनयाः षष्टिसहस्रसङ्ख्याताः हयरक्षामकार्षुः। पथि वासवस्तु तदश्वमपहृत्य पाताले तपस्यतः कपिलस्य सकाशे संस्थाप्याऽपहृतः। ते तु अन्विष्यन्तः महीं पश्चात् पातालं गताः, अथ ते महर्षिमश्वाऽपहारकं मत्वा क्रुद्धाः तं निर्भर्त्सयितुमारेभिरे, ततः षष्टिसहस्रं सगरसुताः कपिलमहसा भस्मीभूता अभवन्। तेषामुद्धरणाय अंशुमान् ततः दिलीपः कठोरं तपः अतन्वत, न तु तानुद्धर्तुमीष्टे स्म, अथ भगीरथः दिलीपतनयः स्वप्रपितामहान् पावनीभिः गङ्गायाः अद्भिः जलक्रियां कृत्वा तानुदधीधरदिति पौराणिकी वार्ता ॥ २३ ॥

(म) अम्ब इति।—हे अम्ब! जननि! अस्मत्कुलाधिदेवता त्वं, स्नुषायां—वध्वां सीतायाम्, अरुन्धती—वशिष्ठपत्नी इव। शिवेत्यादि—शिवस्य शुभस्य अनुध्यानम् अनुचिन्तनं तदेव परं प्रधानं यस्याः तथाविधा, शुभाऽनुध्यायिनी भवेत्यर्थः। [कुलगुरोः पत्न्याः समादराऽऽतिशय्यसूचनाय जननीवित्युक्त्वा अरुन्धतीवेत्युक्तम्। एतच्च दशरूपकसारादिमतं बीजानुगुणप्रोत्साहनादपि सन्ध्यङ्गं वेदितव्यम्, तदुक्तं—"बीजानुगुणप्रोत्साहना भेदः" इति, एतदेवाह दर्पणकारः। केचित्तु "भेदः प्रोत्साहना" इति वदन्ति। परन्तु सम्मते बीजाद्यस्य प्ररोहरूपत्वात् उद्भेदनामकं सन्ध्यङ्गमवधातव्यम्। तथा हि दर्पणे "बीजाद्यस्य प्ररोहः स्यादुद्भेदः" इति लक्षणात्]।

लक्ष्मण । एष भरद्वाजाऽऽवेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम । (य)

राम । [सस्पृहमवलोकयति] । (र)

सीता । सुमरेदि वा एदं पदेसं अज्जउत्तो ? *

राम । अयि ! कथं विस्मर्य्यते ?—

अलसलुलितमुग्धान्यध्वसञ्जातखेदात्
अशिथिलपरिरम्भैर्दत्तसंवाहनानि ।

---

* स्मरति वैतं प्रदेशमार्य्यपुत्रः ?

(य) भरद्वाजेत्यादि।—भरद्वाजेन मुनिना आवेदितः विज्ञापितः, [पुरा किल ज्येष्ठभ्रातुः उतथ्यस्य गर्भिणीं पत्नीम् उपगतस्य बृहस्पतेः वीर्य्यात्, गर्भस्थबालकेन पद्भ्यां निःसारितात्, यः सुतो जज्ञे, स हि एकस्य क्षेत्रे अन्येन वीर्य्यस्याधानात् द्वाभ्यां जाततया "द्वाज" इति, ततः "राजन्। भर द्वाजमिमम्" इति दैववाक्यात् "भरद्वाज" इति समाख्यां लेभे। सोऽपि गर्भस्थबालको बृहस्पतेः शापात् जन्मान्धोऽभवत् "दीर्घतमा" इत्याख्यां लेभे च इति विष्णुपुराणम्]। श्याम इति।—प्रसिद्धः, चित्रकूटयायिनि—चित्रकूट-पर्व्वताभिमुखगामिनि वर्त्मनि। कालिन्दीत्यादि।—कालिन्द्याः,—यमुनायाः तटे, वनस्पतिः,—अपुष्पफलसमन्वितः, वटः,—तरुविशेषः। एवमेव रघौ कालिदासः,—

"त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥" इति।

एतस्याधुना प्रयागे "अक्षयवट" इति आख्या प्रचरति।

(र) सस्पृहमिति—सस्पृहं सौत्सुक्यमीक्षते इत्यर्थः। रमणीयपूर्वानुभूतवस्तूनामाकाङ्क्षा हि स्पृहेति कथ्यते। तथा हि दर्पणकारः,—

"आकाङ्क्षा रमणीयत्वात् वस्तुनो या स्पृहा तु सा ।" इति।

पूर्वाऽनुभूतसुखानां स्मरणतः स्पृहायाः समुदयात्, तेषां तेषान्तु विस्मरणाऽनर्हत्वप्रतिपादनमुखेन स्पृहाकारणानि स्फुटमभिधत्ते, अलसेति।—यत्र यस्मिन् प्रदेशे त्वम्, अध्वना पथि गमनेन सञ्जातात् समुद्भूतात् खेदात् क्लान्तेः, अलसानि अपटूनि जडानीत्यर्थः लुलितानि शिथिलीभूतानि ईषद्वेपमानानि

परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ २४ ॥

लक्ष्मणः। एष विन्ध्याटवीमुखे विराधसंवादः। (ल)

वा तथापि मुग्धानि निसर्गत एव मनोहराणि न तु विम्लानानीत्यर्थः, तथा अशिथिलैर्गाढैः परिरम्भैरालिङ्गनैः [बहुवचनमालिङ्गनाऽऽवृत्त्यभिप्रायकं वेदितव्यं] दत्त संवाहन मर्दन यैस्तथ्य तानि तथोक्तानि, अध्वगमनखेदखिन्नानां प्रतिप्रतीकेषु संवाहितेषु क्रियन्ते क्लान्तिविगमः भवति इति प्रसिद्धिः, तथा परिमृदिता विद लिता या मृणाल्यः [अपचयविवक्षया स्त्रीत्वम्। तथा हि अमरः,—"स्त्री स्यात् काचित् मृणाल्यादिर्विवक्षापचये यदि" इति] ता इव दुर्बलानि कोमलानि च अङ्गान्येव अङ्गकानि, ["अनुकम्पायाम्" (५।३।७६ पा०) इति कन्प्रत्ययः]। मम उरसि—वक्षसि कृत्वा—निधायेत्यर्थः, निद्रामवाप्ता—निद्रिता आसीरस्यपीरित्यर्थः, स इदानीं कथं हि विस्मर्यते इत्यर्थः। [केचित्तु—अत्र "कथं विस्मर्यते" इति चरणस्य हेतुरूपत्वेन श्लोकस्यास्य निर्देशात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। अपरे तु—अस्मिन् चित्रदर्शनव्यापारे पूर्वानुभूततत्तद्विषयाणां स्मृतेः, स्मरणालङ्कारं वदन्ति इति। अत्र क्रमः,—प्रथममध्वखेदः, तेन च ललितत्ववैगुण्यं, ततः आलिङ्गनबाहुल्यं, ततश्च संवाहनता तेन च वक्षःस्थलशयनत्वं, ततश्च निद्रावाप्तिरिति परं परं प्रति पूर्वपूर्वस्य हेतुतया अवस्थितेः कारणमालाऽलङ्कारः। तथा हि—"परं परं प्रति यदा पूर्वपूर्वस्य हेतुता। तदा कारणमाला स्यात्" इति। "मृणालीदुर्बलानि" इत्यत्र च लुप्तोपमा, इत्येतयोः सङ्करः]। वृत्तं मालिनी।—"न न म य य युतेयं मालिनी भोगिलोकैः" इति लक्षणात्। पञ्चदशाक्षरपादच्छन्दःसु ४६७२तम संख्यकः प्रस्तारः ॥ २४ ॥

(ल) विन्ध्याटवीमुखे।—विन्ध्यस्य शैलस्य अटवी अरण्यानी तस्य मुखे प्रारम्भ स्थाने। विन्ध्यारण्यप्रवेशावसरे इत्यर्थः। विराधसंवादः—विराधो नाम कश्चिद्रा क्षसः तस्य संवादो वृत्तान्तः। ["संवादः" इत्यत्र "संरोधः" इति पाठे—विराध कर्तृकाऽस्मन्निरोधनम् इत्यर्थः। तथा हि रामायणम्—

तावारोप्य ततः स्कन्धं राघवौ रजनीचरः।
विराधो निनदन् घोरं जगामाऽभिमुखो वनम् ॥" इति]।

सीता। अलं दाव एदिणा ; पेक्खामि दाव अज्जउत्तहत्थ-धरिदतालवेण्टादवत्तं अत्तणो दक्खिणारण्णप्पवेसारम्भं। (व) *

राम। एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रमतरूणि तपोवनानि।
येष्वातिथेयपरमाः शमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥ २५ ॥

---

* अलं तावदेतेन, पश्यामि तावदार्य्यपुत्रहस्तधृततालवृन्ताऽऽतपत्रमात्मनो दक्षिणारण्यप्रवेशाऽऽरम्भम्।

(व) एतेनेति।—एतेन विराधवृत्तान्तदर्शनेन, अलं किम ?। एतस्याऽनर्थकरस्य परिदर्शनं विफलमित्यर्थः, शोकाऽऽवेगविवर्द्धकत्वादित्याशयः। आर्य्यपुत्रेत्यादि।—आर्य्यपुत्रेण स्वहस्तेन धृतं गृहीतं तालवृन्तरूपम् आतपत्रं छत्रं यस्मिन् तथाविधमात्मनः स्वस्य सीताया इत्यर्थः। दक्षिणारण्येत्यादि।—दक्षिणनामकमरण्यं तत्र प्रवेशः तस्य आरम्भः व्यवसायः तं प्रेक्षे इत्यर्थः। दक्षिणारण्यप्रवेशसमये आर्य्यपुत्त्रः मम आतपतापजक्लेशं निवारयितुं स्वहस्तधृततालवृन्तेन मम शिरः प्रच्छायशीतलमकरोदिति भावः। जनस्थानस्य दक्षिणाभिः एषा अरण्यानी दृश्यते, अत एवैषा दक्षिणारण्यमित्याख्यां भजते इति।

दक्षिणाऽरण्यमस्पष्टं विवृणोति, एतानीति।—गिरिनिर्झरिणीनां—गिरिनदीनां, तटेषु तीरेषु, एतानि तानि—पूर्वदृष्टानि इत्यर्थः, वैखानसेत्यादि—वैखानसानां वानप्रस्थतापसविशेषाणाम् आश्रमतरवो येषु तानि तथोक्तानि, तपोवनानि सन्तीति शेषः। येषु तपोवनेषु अतिथये हितम् आतिथेयं ["पथ्यतिथिवसतिस्वपतेर्ढञ्" (४।४।१०४ पा०) इति ढञ्प्रत्ययः], अतिथिसेवा एव परमं प्रधानं कर्म्म येषां ते तथोक्ताः, यद्वा—आतिथेयेषु परमाः निष्णाताः आतिथ्यनिष्ठाः इत्यर्थः अत एव, नीवारमुष्टिपचनाः,—नीवारमुष्टिं मुष्टिमितवनधान्यं पचन्ति ये तथोक्ताः, नीवारपाकमात्रेण स्वपोषणं कुर्व्वन्तः, मितराहारा इत्यर्थः। शमिनः—शमदमाद्युपेताः वीतरागा इत्यर्थः, गृहिणः,—सदाराः वनस्थाः तपस्विनः "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" इति स्मृतेः। गृहाणि भजन्ते—अधिवसन्ति। [अत्राऽपि प्रोक्तसम्भोगशृङ्गारो रसः, व्रीडाद्यपादिभिर्व्यभि

लक्ष्मण। अयमविरलाऽनोकहनिवहनिरन्तरस्निग्धनीलपरिसराऽरण्यपरिणद्धगोदावरीमुखरकन्दरः सन्ततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणो नाम। (श)

चारिभावैः परं परिपोषमागतः, तथा हि दशरूपके,—"अनुकूलौ निषेवेते यत्राऽन्योऽन्यं विलासिनौ। दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः॥" इति। [अत्राऽपि उदात्ताऽलङ्कारः, प्रस्तुतचित्रकूटवनस्थलीमहत्त्वव्यञ्जकतया शमिनामुपवर्णनस्य समुत्थानात्]। वसन्ततिलकं वृत्तम्॥ २५॥

(श) अथ कविः करुणविप्रलम्भशृङ्गाररसं समधिकं परिपोषयितुं तदनुगुणं माधुर्यगुणमेवाश्रित्य वैदर्भ्या रीत्या समाश्लिष्टां, साडम्बरबन्धौद्धत्यशालिनीं घटनापरम्परामादाय ओजोगुणमभिव्यञ्जयितुं समासबहुलैः पदैः गौडीं रीतिमधिकृत्य प्रस्तुतं प्रस्तौति अयमिति।—अयमालेख्ये पुरतो दृश्यमान इत्यर्थः, अविरलैर्निबिडैः घनसन्निविष्टैरित्यर्थः अनसः शकटस्य अकं गतिं घ्नन्तीति, न ओकः स्थानं जहतीति वा अनोकहा वृक्षाः। ("वृक्षो महीरुहः शाखी विटपी पादपस्तरुः। अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः" इत्यमरः)। तेषां निवहाः निचयास्तैर्निरन्तरं निरवकाशम्, ("अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" इत्यमरः) निबिडमित्यर्थः तथा स्निग्धं मसृणं, ("स्निग्धन्तु मसृणे सान्द्रे" इत्यमरः)। नीलं श्यामं परिसरः पर्यन्तभूविभागः यस्य ("पर्यन्तभूः परिसरः" इत्यमरः) तथोक्तेन अरण्येन परिणद्धा परिवेष्टिता, (अरण्यं परितो नद्धा विस्तृता वा इति केचित्, तन्न एतद् विचार्यम्) या गोदावरी तया मुखरः, गोदावरीकल्लोलकोलाहलैः शब्दायमाना इत्यर्थः, कन्दरी ("दरी तु कन्दरो वा स्त्री" इत्यमरः) दरी, उपचारात् तदन्तर्भागो यस्य तथोक्तः, सन्ततम्—अविरतम् ("सततेऽनारताऽश्रान्तसन्तताऽविरताऽनिशम्। नित्याऽनवरताऽजस्रम्" इत्यमरः) अभिष्यन्दमानैः स्रवद्भिः स्वदं वर्षद्भिरित्यर्थः [कर्माणिकर्तृकत्वात् चलम्] मेघैर्नवजलधरैर्मेदुरितः मेदुरः कृतः स्निग्धीकृत इत्यर्थः नीलिमा श्यामलत्वं यस्य स तथोक्तः, [एतावता स्वतो हि नीलत्वेन स्वतः आभासमानत्वात्]। जनस्थानमध्यग,—जनस्थानस्य तन्नाम्नः दण्डकारण्यस्य मध्यभागेऽवस्थितः गिरिः प्रस्रवणो नाम। [नामियास्ये

राम। स्मरसि सुतनु! तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहितसपर्य्यासुस्थयोस्तान्यहानि ?
स्मरसि सरसनीरां तत्र गोदावरीं वा ?
स्मरसि च तदुपान्तेष्वावयोर्वर्त्तनानि ? ॥ २६ ॥

श्वापदकुलसङ्कुलदण्डकामहाऽरण्योपान्तवर्त्ति तदुपरमीमारूपतया आस्थित वैखानसानामन्येषाञ्च मुनीनामाश्रमपदं महाऽरण्यं, शुक्राचार्य्यसुताधर्षकस्य दुर्बुद्धेः दण्डस्य शासनात् पलायमानानां जनानां निवासस्थानं जनस्थानमिति, नासिकाख्यया तु तत् इदानीं प्रसिद्धिमागतम्। तथा हि पौराणिकाः,—"द्वापरे तु जनस्थानं कलौ नासिकमुच्यते" इति। उक्तञ्च, दण्डकामुद्दिश्य अनेनैव महाकविना,—"जनस्थानपर्य्यन्तानि दीर्घाऽरण्यानि दक्षिणां दिशमभिवर्त्तन्ते" इति। "न केवलं दण्डकैव जनस्थानमपि" इत्यादिकम्। अन्यच्चनया नियतप्रतिबद्धमेघत्वात्, निरन्तरं वर्षतां नवानां मेघानाञ्च नियतस्रवणाद्गिरिरयं प्रस्रवणसंज्ञामापत्। [अत्र स्वभावोक्तिरलङ्कारः]।

तत्र तत्र हि पुरा यानि कियन्ति अलौकिकामोदकराणि सुखानि अनुभूतानि, तानि तानि इदानीं स्मारयति, स्मरसीति।—शोभना तनुर्यस्याः सा सुतनूः तत्सम्बुद्धौ [स्त्रीप्रत्यये ऊङि, पश्चात् "अम्बार्थनद्योर्ह्रस्वः" (७।३।१०७ पा०) इति नदीसंज्ञकत्वेन ह्रस्व,तन्वादौ स्त्रियामूङ् वैकल्पिकत्वेन तदभावपक्षे सुतनो! इत्यपि भवतीति बोध्यम्]। हे सुतनु! तस्मिन् पर्वते प्रस्रवणे इत्यर्थः, लक्ष्मणेन प्रतिविहितया कृतया सपर्य्यया सेवया सुस्थयोः ["सुस्थयोः" इत्यत्र "स्वस्थयोः" इति पाठान्तरेऽपि अयमेवार्थः] अनुपमानन्दमुपभुज्य कालं नयतोः इत्यर्थः, आवयोस्तानि—चिराय गतानि, नैवेदानीं पुनरावर्त्तमीयानीत्यर्थः, अहानि—दिवसान् स्मरसि किम् ? तत्र—गिरिसन्निधौ, सुरसं मधुरं शीतलञ्च नीरं यस्याः तां तथोक्तां स्वादुसलिलां, ("रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्य्ये देहधात्वम्बुपारदे॥" इति मेदिनी)। ["सरसनीराम्" इत्यत्र "सरसतीराम्" इति पाठान्तरं दृश्यते, तदर्थस्तु—सरसं शीतलतया रसशालीव प्रतीयमानम् अत एव सुखसेव्यं तीरं यस्याः तां, प्रच्छायशीतलतरुनिषेवितविहङ्गमकुलोपशोभितकूलामिति भावः।] गोदावरीं स्मरसि वा ? [गां स्वर्गं ददाति स्नानात् इति दाधातोः वनिप् ङीप् रश्चान्तादेशः]। तदुपान्तेषु—तस्यान्तप्रदेशेषु, तत्तटेष्वित्यर्थः। आवयोः वर्त्तनानि—वासक्रीडाभ्रमणानि स्वच्छन्दसञ्चरणानि इत्यर्थः, स्मरसि च

अपि च—किमपि किमपि मन्दं मन्दमासत्तियोगात्
अविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्॥ २७॥

चिन्तयसि च किम्? चशब्दस्तु विकल्पार्थकः। [अत्र देशरूपविभावेन उपनिबध्य-मानं काव्यं शृङ्गाररसास्वादनाय प्रभवति इत्युक्तं दशरूपके, तथा हि,—
"रम्यदेशकलाकालवेषभोगादिसेवनैः।
प्रमोदात्मा रतिः सैव यूनोरन्योऽन्यरक्तयोः।
प्रहृष्यमाणा शृङ्गारो मधुराङ्गविचेष्टितैः॥" इति।
यत,—अत्र मनसि सीतारूपालम्बनविभावेन रोमाञ्चभ्रूक्षेपकटाक्षादिभिरनुभावैरावेग-हर्षादिभिः व्यभिचारिभिः भावैश्च विभाविता रतिः, सम्भोगशृङ्गारास्वादतामापन्ना। [अत्र एकस्य "त्वम्" इति कर्त्तुः तिसृभिः "स्मरसि" इति क्रियाभिः अन्वयात् दीपकम् अलङ्कारः,—"अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" इति दर्पणोक्तलक्षणात्, तथा "स्मरसि" इति पदस्य पौनःपुन्येनाऽभिधानादनवीकृतत्वदोषः, तृतीयपादे "स्मरसि" इत्यत्र "सुभग" "लपसि" इति वा, चतुर्थपादे च "स्मरसि च" इत्यत्र "कलयसि" इति "श्रमहर" इति वा, पठनेन कथञ्चित् परिहरणीयः। नैतत् कथितपदत्वं, यत्र हि पर्य्यायान्तरेणोपादानेऽपि न विच्छित्त्यन्तरं तत्रास्य सद्भावात्। अत्र च "लपसि" "कलयसि" इत्यादि तत्पर्य्यायकपदान्तरप्रयोगेऽपि विच्छित्त्यन्त-राविर्भावादर्शनात् अनवीकृतत्वमेव ज्ञेयम्। अत एवास्माभिः तत्पर्य्यायकशब्दाप्रयोगेण, "सुभग" "श्रमहर" इत्यादिकमन्यान्तरमुक्तम्]। मालिनी वृत्तम्॥ २६॥

अथाऽऽदौ सम्भोगमुपवर्णयितुं तत्स्थायिभावस्य उद्दीपकैरन्योऽन्यगात्रस्पर्श-परिरम्भणचुम्बनादिभिरनुभावैः हासहर्षौत्सुक्यश्रमविस्मृतिप्रभृतिभिः व्यभिचारिभावैः वनविहरणादिभिश्चोद्दीपनविभावैरभिव्यक्ताया सहृदयसंवेद्याया रतेः शृङ्गाररूपता-मासादयति, किमपीति।—आसत्तिः आसन्नभावः अतिसान्निध्यमित्यर्थः, परस्परशरीर-सम्पृक्तत्वमिति यावत्, तस्याः योगः सयोगकृतः सम्बन्धः तस्मात्, इतरेतरगात्रसंसर्ग-रूपितात् अविच्छिन्नसुदृढालिङ्गनात् हेतोः अविरलितौ अन्योऽन्यविलग्नौ कपोलौ गण्डौ यस्मिन् जल्पनकर्मणीत्यर्थः, तद् यथा तथा, अक्रमेण आनुपूर्वीं विना, कौतुकाऽतिशयात् यथागतपौर्वापर्य्यमनाहृत्येत्यर्थः, मन्दं मन्दं—मृदु मृदु, किमपि किमपि—अनिर्वचनीयं निधुवनसङ्गततया सुखकरम् असम्बद्धं वाक्यजातमिति

लक्ष्मण। एषा पञ्चवट्यां शूर्पणखा। (य)

सीता। हा अज्जउत्त! एत्तिअं ज्जेव दंसणं।* (र)

राम। अयि विप्रयोगत्रस्ते! चित्रमेतत्। (ह)

* हा आर्यपुत्र! एतावदेव दर्शनम्।

यावत्, जल्पतो,—कथयतो, तथा अशिथिलोऽतिदृढ य परिरम्भ आलिङ्गन तस्मिन् व्यापृत गिरस एक एक परस्परव्यतीहारजनित, अथवा एकैकस्य ["एक बहुव्रीहिवत्" इति (८।१।९ पा०) सूत्रेण द्विर्वचनम्]। दो बाहु ययो तयोरुभयो पुन पुनर्गाढालिङ्गनव्यग्रहस्तयोरित्यथ, ["पद्दन्"—(६।१।६३ पा०) इति सूत्रेण दो शब्दस्य दोषन्नादेश], आवयो सम्बन्धे इति भाव, रात्रि, अविदिता यामा प्रहरा, ('द्वौ यामप्रहरौ समौ" इत्यमर) यस्या सा तथोक्ता, एवम् एवमेव स्वानुभूतानन्दविषयसम्भाषणादिभि, व्यरंसीत—विरता, प्रभाता आसीदित्यथ, अक्रमेण अल्पमत्तु न अवसान प्रापदिति यावत। अनुपमभोगनिरतानामत्मनो प्राणिनां सुखकालो हि अविज्ञात एव गच्छतीति भाव। ["व्याङ्परिभ्यो रम" (१।३।८३ पा०) इति परस्मैपदम्। अत्र स्वभावोक्तिरलङ्कार]। मालिनी वृत्तम् ॥२७॥

(य) शूर्पनखेति।—शूर्प धान्यादिप्रस्फोटनार्थं वंशनिर्मितद्रव्यविशेष ("कुला" इति भाषा) तद्वत् नखानि यस्या सा। ["नखमुखात संज्ञायाम्" (४।१।५८ पा०) इति स्वाङ्गत्वेऽपि ङीष् निषेध, "पूर्वपदात् संज्ञायामग" (८।४।३ पा०) इति णत्वम्।

(र) एतावदिति।—इयत्कालपर्यन्तमित्यथ। इत पर मे त्वद्दर्शनमसम्भाव्यम् अभूदिति भाव। यत रावणेनाऽपहृताया त्वद्विरहशोकसागरनिमग्नायाश्च मे एषा एव निखिलापदागमहेतु, अत अशुभकारिण्या नैतस्या दर्शनमिदानीमुचितमित्याशय। इत्यमभिदधती सीता आसन्नवनगमनप्रतीयमानभाविविरह सोढुमशक्नुवाना विगतचेतनेवाऽभवत्। चूर्णकमेतत् आसन्नवनगमनज्ञापिका भविष्यद्वाणीव प्रतीयते। [अत्र रावणापहरणरूपातीताद्भुतपदार्थस्य प्रत्यक्षायमाणत्वेन प्रतीते भाविकालङ्कार]।

(ह) विप्रयोगेत्यादि।—विप्रयोगो मया साक विच्छेद, तस्मात् त्रस्ता भीता, तत्सम्बुद्धौ, हे मदीयवियोगभीरु! न पुनरियं तत्त्वतो राक्षसी, अपि तु, चित्र—चित्रार्पिता तदीया मूर्त्ति, अतो न त्रासकारणम्। विरहशङ्केदानीं त्वया परिहरणीयेति भाव। [नायं निश्चयाख्यालङ्कारविषय, परप्रत्यायनात्]।

सीता। जहा तहा होदु, दुज्जणो असुहं उप्पादेइ। * (क)

राम। हन्त। वर्त्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति। (ख)

लक्ष्मण। अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा चालितमपि।
जनस्थाने शून्ये विकलकरणैरार्य्यचरितैः
अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्॥२८॥

---

* यथा तथा भवतु, दुर्जनोऽसुखमुत्पादयति।

(क) यथेति।—यथा तथा भवतु, एतत् चिव प्रकृतमप्रकृत वा अस्तु इत्यर्थः, दुर्जनस्याऽसुखकरत्वेन आधिहेतुभूततया च सर्वथा तत्स्मरणमपि परिहर्त्तव्यमिति भाव। [अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यास अलङ्कार]।

(ख) हन्तेत्यादि।—जनस्थानस्य वृत्तान्त अतीतोऽपि प्रत्यक्षीभूततया इदानीमाभाति विस्मयावहे बुद्बुदायमानेश्च व्यापारनिचये उपशोभितत्वात्। [एतत् प्रथम पताकास्थानम्। यतो हि अनेषा सीताविवासनफलिकाऽर्थसम्पत्ति, यद्यपि उपरिष्टात् दुर्जनस्य दुर्मुखस्य वचसा लोकापवादरूपाऽशुभोत्पादहेतुभूतत्वेनोपन्यस्ता तथापि रामवचसा अधुना जनस्थानवृत्तान्तस्य सीताया जनस्थाननिर्वासनरूपस्य वर्त्तमानवत्त्वेन आदरकालभाविवतथा उल्लेखात् उपचाराऽतिशयसूचकतया तुल्यपताकत्वादिति ध्येयम्]।

जनस्थानस्य अदृष्टचरापत्यचिह्नत्वात् अभूतपूर्व्वव्यापाराश्रयत्वाच्च भूतानामपि विदग्धानामिव तीर्थानामपि विस्मयकरत्वं प्रत्यक्षायमाणत्वमनुमोदयितुमाह, अथेदमिति।—अथेति वाक्यालङ्कारे। इदं—सहाऽरण्यं जनस्थानं चिरगतं यद् दृश्यते [illegible] पापं विद्यते एषाम् [इति अर्श आदित्वादच्] तैः पापैः,—पापात्मभिः [illegible]—राक्षसैः कनकमयो यो हरिणस्तद्वत् छद्म कापट्यं तस्य विधिना अनु-[illegible] [illegible] तथा—एव हि, वृत्तम्—जातं, [illegible] यथा—[illegible]—विधीत रावणनिधनपूर्वकसीताऽऽनयन [illegible] [illegible] व्यथयति—पीडयति, अस्मानिति शेषः। [illegible] [illegible] सर्वथा परिशोधितमपि पापैः रक्षोभिः

सीता। [सास्रम्।] अइ देव रहुउलाणन्द। एव्व वि मम कारणादो किलिन्तो आसि। * (ग)

लक्ष्मण। [रामं निर्वर्ण्य साकूतम्।] आर्य्य! किमेतत्? (घ)—

* अयि देव रघुकुलानन्द! एवमपि मम कारणात् क्लान्त आसीः।

कनकमृगमायया अनुष्ठित तत् वृत्तमिदानीं मानसपथे समुदीयमान नियतमेव व्यथयति, [किं पुनरप्रतिकृतं व्यथयतीति वक्तव्यमित्यपिना गम्यते]। तदेव सुविशदं कर्त्तु जडानामपि तव मर्म्मवेदनां ज्ञापयति, जनस्थाने इति।—ग्रन्थे—मनुजसञ्चार विरले इत्यर्थ, जनस्थाने, विगता कला सामर्थ्य येषा तानि तथोक्तानि, ("कला तु भागभेदे स्यात् कुसीदेऽवयवे गुणे। विद्यासामर्थ्यसंख्यासु नौकायां कपटे तथा" इति कोष) करणानि इन्द्रियाणि येषु ("करण साधकतम क्षेत्रगात्रेन्द्रियेष्वपि" इति विश्व) तै तथोक्तै वैक्लव्योपहतेन्द्रियग्रामसम्बन्धैरित्यर्थ, ["करणै" इत्यत्र "करुणै" इति पाठे तु,—विकलै वैकल्यपूर्णै अत एव करुणै शोकसमुद्दीपकै रित्येवार्थ], आर्य्यस्य—पूज्यस्य भवत चरितै,—रोदनादिचेष्टितै, ग्रावा—पर्वत, ("अद्रिगोत्रगिरिग्रावाऽचलशैलशिलोच्चया" इत्यमर) रोदिति—क्रन्दति, वज्रस्य—अतिकठिनस्यापि, हृदयमपि दलति—विदीर्य्यति। [वर्त्तमानवदनुभूयमानत्वाद्वर्त्तमानप्रयोग]। सीताविप्रयोगविधुरस्य रामस्य सकरुण रोदनमालोक्य अचेतना वनस्थली अपि समदुःखा इवातितरां चुक्रोश, किमुत सचेतना? इति भाव। [अपि सम्भावनायाम्]। ("गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि" इत्यमर)। [अत्र ग्राववज्रादिषु रोदनदलनादीनां सम्बन्धाऽसत्त्वेऽपि तत्सम्बन्धस्य सिद्धत्वेन कविप्रौढोक्त्याऽध्यवसानात् असम्बन्धे सम्बन्धरूपाऽतिशयोक्तिद्वयस्य सजातीयसाङ्कर्य्यम्। एतेन रामस्य शोकावेगमसहमानस्य मर्म्मस्पृक् विरह क्रकचधारापात इव अनारत हृदय दलयति स्म, इत्यपि वस्तु व्यज्यते, इत्यलङ्कारेण वस्तुध्वनि]। शिखरिणी वृत्तम्।—"रसै रुद्रैश्छिन्ना यमनसभला ग शिखरिणी" इति लक्षणात्। सप्तदशाक्षरपाद च्छन्दसां ५८९२० तम प्रस्तारान्तर्गतमिद वृत्तम्॥ २८॥

(ग) रघ्विति।—हे रघुकुलानन्द! रघो वंशस्य सुखवर्द्धक! मदर्थमसीमं क्लेशमाप, मदर्थे वा कियन्ति दुःखानि असहिष्ठा इति भाव।

(घ) निर्वर्ण्येति।—निर्वर्ण्य—निरूप्य, रामस्य भावादीन् दृष्ट्वेत्यर्थ। साकूत—

अयन्ते बाष्पौघस्त्रुटित इव मुक्तामणिसरो-
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति विरसाघ्रातहृदयः॥ २९॥

राम। वत्स!—

तत्काल प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः।

साभिप्रायम्। मृतवियोगस्मरणविवशकरण राम परिसान्त्वयितुमभिप्रेत्य इत्यर्थ., [अत्र भाविसीतावनगमनजायमानदुःखसन्तानसाक्षात् विवशयोः सीतारामयोरज्ञात-कारणयारपि आकस्मिकी उत्कण्ठा समजनि इति कवेराशय व्यज्यते]।

कथ हि एतत् ज्ञायते, तदेव वक्तीकृत्यात्मन अभिप्रायाऽभिज्ञतां व्यनक्ति अय-मिति।—अय ते—तव, जर्जरा पतित्वा बहुश खण्डिता कणा बिन्दवो यस्य तथोक्त, बाष्पौघ,—अश्रुप्रवाह, त्रुटित,—छिन्नसूत्र, मुक्तग्रन्थनतन्तु इति यावत्, मुक्तामणिमय,—मुक्ताफलरूपरत्नरचित इति यावत, सरो माल्यमिव, ("सरो दध्यग्रग्रन्थौ भावमालासमीरणे" इति मेदिनी)। धाराभिर्विसर्पन्—अविच्छिन्न-प्रवाहैः धरणीतलमभिषिञ्चन, धरणीं लुठति—भूमौ पततीत्यर्थ। निरुद्धोऽपि—यत्नत अन्त सयमितोऽपि, आवेग,—शोकावेग, विरस निर्दय यथा तथा आघ्रात ताडित हृदय येन स तथोक्त, अरुन्तुद इत्यथ, अत एव शोकसविग्नमानसतया स्फुरत् कम्पमानम् अधरस्य नासायाश्च पुट यस्य तस्य भाव तया हेतुना, शोकादीषत्कम्पमाना ऽधरपल्लवतया अत्युष्णनिश्वासेन व्यथितविशुष्कघ्राणकपोलतया चेति यावत्, परेषाम्—अन्येषामुन्नेय,—अनुमेयो भवति। ["कृत्याना कर्त्तरि वा" (२।३।७१ पा०) इति सूत्रेण कर्त्तरि षष्ठी]। अस्माभिस्तु अभिप्रायाभिज्ञतया तत्त्वत एव तदीय मनोगतमनुभूयते, अधरनासाद्यस्य कम्पनाधिक्यदर्शनात् पुरा परैरनुमित य एव हृदये महान् शोकावेग आसीदिति भाव। [अत्र परिस्फुरतामधरादीना लिङ्गत्वेन हेतुना, साध्यभूतस्य प्रयत्नसङ्गोपितत्वेनाप्रत्यक्षायमाणस्य शोकावेगप्रसरस्य, शैत्यातिसिद्धविच्छित्तिविशेषेणानुमीयमानत्वेनानुमानालङ्कार,—"अनुमानन्तु विच्छित्त्या ज्ञान साध्यस्य साधनात" इति लक्षणात, स च पृथगुपगतयोपमया संसृज्यते इति ध्येयम्]। वृत्त शिखरिणी॥ २९॥

दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां करोति ॥ ३० ॥

सीता। हद्धी हद्धी। अज्ज अह वि अदिभूमि गदेण रणरण-एण अज्जउत्तसुण्ण विअ अत्ताण पेक्खामि। * (ड)

---

* हा धिक् हा धिक्। अद्य अहमपि अतिभूमि गतेन रणरणकेन आर्य्यपुत्र शून्यमिव आत्मान पश्यामि।

वनाऽवस्थानवेलायां पूर्व निर्बाध विसोढमपि इदानीं कथ हि तत् शोकजात मवाक्प्रसर न सह्यते, प्रत्यतपुरस्तादपि समधिक कातर्य्यमिदानीमनुभवति, इत्या-शङ्कायामुत्तरयति, तदिति।—प्रियजनस्य सीतायाः विप्रयोगात् सम्भोगविरहात् जन्म यस्य स तथोक्त, तीव्रोऽपि—दुर्विषहोऽपि विरहजो दुःखाग्नि, प्रतिकृतिवाञ्छया—प्रतीकारकरणेच्छया, रावणादिवधविषयिकया इति यावत, विसोढ कथमपि सोढ इत्यर्थ, पुनर्विपच्यमान,—चित्रदर्शनसहायक प्राप्य अधुना पुनरुद्दीप्यमान स दुःखाग्निरित्यर्थ, आघातादिना पुनर्विपच्यमान पुन स्वयमेव विपाक प्राप्यमाण [कर्मणि कर्तृत्वविवक्षया "कर्मवत्कर्मणा" (३।१।८७ पा०) इत्यातिदेशिकयगा-त्मनेपदम्।] हृन्मर्मव्रण इव—हृद अन्तःकरणस्य मर्मणि मर्मप्रदेशे, तदभ्यन्तरे इत्यर्थ, सरूढ व्रण इव, मनसि वेदनां करोति—व्यथां जनयति। [अत्र दुःखाग्निसहनस्य हेतुत्वेन प्रतिकृतिवाञ्छाया निर्देशात् काव्यलिङ्गम्, दुःखाग्नि-रित्यत्र रूपकम्, विपचनस्य अहेतुकत्वात् विभावना, हृन्मर्मव्रण इव इत्यत्र उपमा, एषाम् अङ्गाङ्गिभावेन साङ्कर्यम्, स च दुःखाग्नेः तीव्रतरत्वात् पूर्वादप्यसहत्व गमयित्वा व्यतिरेकध्वनिमुत्थापयति]। वृत्त प्रहर्षिणी।—"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" इति लक्षणात्। सा च त्रयोदशाक्षरपादच्छन्दसां ३५११तम प्रस्ता-रान्तर्गता ॥ ३० ॥

(ड) अतिभूमिमिति।—अतिशयिता या भूमिस्तामतिभूमि परा काष्ठां, गतेन—वैपुल्य प्राप्तेनेत्यर्थ। रणरणकेन—उद्वेगेन, उत्कण्ठाया आधिक्यात् आर्य्य-पुत्रविनाकृतमिवात्मान प्रेक्षे इत्यर्थ, तज्जातीयोद्वेगस्य इदानीमनुभूयमानत्वादियम् आशङ्का इति विभाव्यम्। [रणति शब्दायते यत्र "वणिरणोरुपसंख्यानम्" इति वार्त्तिकेन रणेरप् रण शब्दस्तत्प्रकार, प्रकारे द्वित्वम्, तत सज्ञायां कन्।

लक्ष्मण। [स्वगतम्।] भवतु अन्यतः क्षिपामि। (च)

[चित्रमवलोक्य प्रकाशम्।] तदेतन्मन्वन्तरपुराणस्य गृध्रराजस्य तत्रभवतः तातजटायुषः चरितविक्रमोदाहरणम्। (छ)

सीता। हा ताद! णिव्वूढो दे अपच्चसिणेहो॥ * (ज)

---

* हा तात! निर्व्यूढस्ते अपत्यस्नेहः॥

एतद्धि परिन्यासः नाम बीजाङ्गम्। अत्र हि आर्य्यपुत्त्रविरहेणानुमीयमानस्य सीता-विवासनस्य निश्चयापत्तिरूपतयेदानीमुत्थितिः, सर्वथैव सीताविवासनस्य इदानी-माकाङ्क्षितया तन्निष्पत्तेरभिहितत्वात् इति ध्येयम्। तथा हि—"तन्निष्पत्तिः परि-न्यासः" इति दर्पणः]।

(च) क्षिपामि इति।—सञ्चारयामि, अन्यविषये अस्य मानसम् अभिनिवेश-यामि इत्यर्थः। एतस्य स्थानस्य शोकोद्दीपकत्वात् परित्यागो विधेय इत्याशयः।

(छ) मन्वन्तरेत्यादि।—अन्यः मनुः मन्वन्तरः [मयूरव्यंसकादित्वात् समासः], तस्मिन् पुराणः अतिप्राचीनः तथाविधस्य, वैवस्वतमन्वन्तरप्रवृत्तिकालमारभ्य आस्थितस्य इत्यर्थः। भगवतः वैवस्वतस्य मनोः शासनकालात् प्रभृति कल्पान्तं यावत् अखिल-मेतच्चराचरं प्रयत्नोकर्त्तुमीशस्येति भावः। [पुराणेषु चतुर्द्दश मनवः अभिहिताः, तेषां प्रत्येकाधिकारकालः एव मन्वन्तरमिति कथ्यते। स्वायम्भुवात् प्रभृति षण्णां मनूनां शासनकालः अतीतः, इदानीं वैवस्वतस्य सप्तममनोरधिकारः प्रवृत्तः। तत्र तावत् वैवस्वतमनोः शासनकालादारभ्य संस्थितेः जटायुषः मन्वन्तरपुराणत्वमवधेयम्। मनोः शासनकालस्तु ३०८४४८००० एतावत्सङ्ख्यमितानि मानवीयवर्षाणि भवन्ति। ("मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः" इत्यमरः)। तथाभूतस्य गृध्रराजस्य—खगपतेः जटायुषः तत्रभवतः,—पूज्यस्य, तत्—प्रसिद्धम्, एतत्—पुरस्तात् दृश्यमानम्, चरितविक्रमोदाहरणम्,—चरित्रस्य स्वार्थं परित्यज्यैव प्राणव्ययेनाऽपि कृपाया मानवा रक्षणव्यापाररूपस्य विक्रमस्य च रावणेन सार्द्धं तुमुलयुद्धे जायमानस्य पराक्रमस्य उदाहरणम् दृष्टान्तः, आलेख्यगतमिति यावत्।

(ज) निर्व्यूढ इति।—निर्व्यूढः—सुदृढः, कथमपि केनापि अन्यथा कर्त्तुम-शक्य इत्यर्थः अप्रतिहत इति यावत्। अपत्यस्नेहः,—वात्सल्यम्। अपत्यस्नेहस्य पराकाष्ठा प्रदर्शिता त्वयेति भावः।

राम। हा तात काश्यप शकुन्तराज! क्व पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः? (झ)

लक्ष्मण। अयमसौ जनस्थानपश्चिमतः चित्रकुञ्जवान् नाम दनु-कबन्धाऽधिष्ठितो दण्डकाऽरण्यभूभागः, तदिदमृष्यमूकपर्वते मतङ्गस्य आश्रमपदम्। इयञ्च श्रमणा नाम सिद्ध-शबरी, तदेतत् पम्पाऽभिधानं सरः। (ञ)

(झ) हा तातेति।—हा कष्टम्। हे तात। पितः। पितृवत् वात्सल्य निदर्शकतया मान्य इत्यर्थः। काश्यप।—कश्यपगोत्रोत्पन्न। (कश्यपसुतगरुडस्य कनिष्ठतनयत्वात्)। शकुन्तराज।—शकुन्तानां पक्षिणां राजा तत्सम्बुद्धौ तथोक्त। ["राजाऽहःसखिभ्यष्टच्" (५।४।९१ पा०) इति टच्]। क्व पुनः,—कुत्र अन्यत्र, त्वादृशस्य—त्वत्सदृशस्य, साधोः,—पवित्रस्य, तीर्थस्य—विद्यादिविविधगुणयुक्तपात्रस्य। ("तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च। अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु" इति मेदिनी) सम्भवः? [एवञ्च अत्र अनन्वयोऽलङ्कारोऽभिव्यज्यते इति बोध्यम्]।

(ञ) जनस्थानपश्चिमत इति।—जनस्थानस्य महाऽरण्यस्य पश्चिमतः पश्चाद्भवे दिग्विभागे इत्यर्थः अवस्थित इति शेषः। दनुकबन्धाधिष्ठितः,—दनुनामकेन कबन्धेन शिरोग्रीवारहितेन वक्षःस्थलस्थितााननेन राक्षसेन अधिष्ठितः अधिकृतः। [अयं हि पुरा श्रिया अप्सरसः सुतः विश्वावसुनामा गन्धर्व आसीत्, महर्षेः स्थूलशिरसः शापात् राक्षसरूपतामधिगतः दनुसंज्ञां लेभे, ततश्च रणाऽजिरे शक्रस्य धर्षणात् तत्प्रमुक्तेन वज्रेण तस्य सक्थि शिरश्च शरीरे सम्प्रवेशितम्। अथ वासवप्रसादात् योजनायतौ बाहू कुक्षिगतञ्च तीक्ष्णदंष्ट्रं मुखञ्च लब्धवान्, राघवावुपरुरोध च। अथ सीताहरणशोकार्त्तयोः तयोः दण्डकाऽरण्ये क्रममाणयोः निशिताभ्यां खड्गाभ्यां निकृत्तबाहुः दिव्यं वपुः लेभे इति पौराणिकी वार्त्ता। भारते वनपर्वगते द्रौपदीहरणपर्वणि अष्टसप्तत्यधिकद्विशततमाऽध्याये, तथा रामायणे आरण्यकाण्डे एकसप्ततितमाऽध्याये द्रष्टव्या]। अयम् असौ चित्रार्पिततया वस्तुतः अविद्यमानः, चित्रकुञ्जवान्—चित्रः विचित्रः नानाफलपुष्पसम्भारसम्भृततत्तत्पुष्कलतयाऽतीव मनोरमो विस्मयावहश्चेति यावत्, असौ कुञ्जः सोऽस्मिन्नस्तीति तथोक्तः नाम दण्डकारण्यस्य भूभागः। तत् इदञ्च ऋष्यमूकसन्नामा पर्वतस्तत्र, मतङ्गस्य स्वनाम्ना प्रसिद्धस्य तपोधनस्य आश्रमपदमाश्रमस्थानम्। इयञ्च श्रमणा नाम सिद्धा प्रसिद्धा, योगाऽभ्यसनादिनेत्यर्थः,

सीता। एत्थ किल अज्जउत्तेण विच्छड्डिदामरिसधीरणं पमुत्तकण्ठं रुदिअं आसि। * (ट)

* अत्र किल आर्यपुत्रेण विच्छर्दितामर्षधीरं प्रमुक्तकण्ठं रुदितम् आसीत्।

शबरी—मतङ्गस्य मुनेः शिष्याणां काचित् परिचारिणी। कमलोत्पलैरुपशोभितसलिलायाः हंसकुररविनादितायाः पम्पायाः पुष्करिण्याः पश्चिमे तटे महर्षेः मतङ्गस्य आश्रमे तच्छिष्याणां सेविका शबरी तपोऽतप्यत। तथा हि रामायणे आरण्यकाण्डे,—

"तत्र पुष्करिणीं वीरौ। पम्पां नाम गमिष्यथः।

मतङ्गशिष्यास्तत्रासन् ऋषयः सुसमाहिताः।

तेषां गतानामद्यापि दृश्यते परिचारिणी।
श्रमणी शबरी नाम काकुत्स्थ। चिरजीविनी॥
त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम्।
दृष्ट्वा देवोपमं राम। स्वर्गलोकं गमिष्यति॥
ततस्तद्राम। पम्पायास्तीरमाश्रित्य पश्चिमम्।
आश्रमस्थानमतुलं गुह्यं काकुत्स्थ। पश्यसि॥" इति।

तदेतत्—यत्र शबर्या साकं समागमो जातः तद्बोध्यम्, अतएव शबर्याश्रमस्थानम्, पम्पा अभिधेयं नाम यस्य तत् सरः जलाशयः।

(ट) अत्रेत्यादि।—अत्र—पम्पायाम्। विच्छर्दितेत्यादि।—विच्छर्दितः निरस्तः योऽमर्षः असहिष्णुता विरहोद्दीपकानां मिलितानां निर्झराणां शब्दानाम् आघ्राय च नानाप्रसूनानां पद्मेन्दीवर सौरभं यो हि धैर्यविनाश इति यावत्, तस्य अधीनं सीतावियोगजन्यानिष्टचिन्तितमित्यर्थः। प्रमुक्तकण्ठम्—उच्चैः रुदितमासीत्, भवान् रोदनमात्रमकरोदित्यर्थः। ["विच्छर्दितामर्षधीरत्वम्" इति पाठे तु,—पम्पादर्शनोद्दीपितेन प्रबलेन शोकावेगेनाभिभूततया परित्यक्तं रामेणापि धीरत्वं मर्यादाधैर्यञ्च यस्मिन् कर्मणि तद्यथा तथा इत्यर्थः। अत एव विप्रलम्भरसविकाशमात्रं नायकस्य विस्मयनीयमत्युत्तमम्। एतेन पम्पायाः शोकोद्दीपकत्वं सूचितम्]।

राम । देवि । रमणीयमेतत् पम्पासरः ।—

एतस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भःपरिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो भुवो विभागाः ॥ ३१ ॥

अथ शृङ्गारस्य राजहंसलीलास्फाटिकतैकट्टीपनविभावैकदेशोऽपि पम्पासरसः स्वभावरमणीयकं मन्मथोद्दीपकत्वञ्च समधिकमावेदयितुम् आलम्बनविभावानुगतं रोदनाद्यनुभावं विशेषेण व्यनक्ति, एतस्मिन्निति।—हे देवि। एतस्मिन्—पम्पासरसि, बाष्पाम्भसां बाष्पवारीणाम् अश्रूणामित्यर्थः, परिपतनमुद्गमश्च तयोरन्तराले अवकाशे, बाष्पबिन्दुपतनानन्तरं पुनरश्रूत्पत्तौ क्षणमध्ये बाष्पोपरोधाऽभावात् दर्शनं सम्भवति, अत अन्तराले इत्युक्तम्, [एतेन अविच्छिन्नरोदनं ध्वनितम्]। मदेन हर्षेण, उद्दामयौवनजनितेन इति शेषः, कलन्तीति मदकलास्तेषां मधुरास्फुटध्वनिकारिणां, मल्लिकाख्यानां मल्लिकानामकानां हंसविशेषाणां ["मल्लिकाक्ष" इति पाठे तु—चञ्चुचरणेषु मलिनानां धवलहंसविशेषाणाम्, तथा हि—"आतास्ते राजहंसाः सुधाश्च राष्ट्राः सितेतरैः। मलिनैर्मल्लिकाक्षाश्च कथ्यन्ते चरणाननैः॥" इति हलायुधः] पक्षैर्व्याधूता विकम्पिता अत एव स्फुरन्तश्चञ्चला उरवो विशाला दण्डा मृणाला येषां तानि तथोक्तानि पुण्डरीकाणि श्वेतोत्पलानि येषु तथोक्ताः, कुवलयिनः,—कुमुद्वन्तः नीलोत्पलबहुला वा ("पुण्डरीकं सिताम्भोजम्" इति, "स्यादुत्पलं कुवलयम्" इति च अमरः) भुवो विभागाः भूखण्डानि इत्यर्थः संदृष्टाः। मानसोन्मादकरमनुपमं पम्पासरःसौन्दर्यं निरीक्ष्य त्वद्विरहविधुरस्य मे अनारतमेवाश्रु न्यपतत् इति भावः।

अन्यदपि व्याख्यायते,—मलिनचञ्चुचरणानां हंसानां स्वपक्षाऽनिलकम्पितानां कुवलयानां धवलिमा उपचितमपि निसर्गधवलं पम्पापद्मं, अश्रूणामुदीयमानानां बाष्पधाराप्रवाहाणां रभसा उपहता कदर्थीकृता मुग्धा च मे दृष्टिः, सितारविन्दराजहंसनिचयं बाष्पाम्भःसेकासारपरिणतया धूमाऽऽधिया इन्दीवरश्यामलमदर्शत्। [अत्र व्याख्याने विविधप्रसूनाकरस्य पम्पासरसः कुत्रचित् पुण्डरीकवत्त्वात् कुत्रचिच्च कुवलयवत्त्वात् प्रस्तुतस्य पुण्डरीकवतः भूविभागस्य अपि कुवलयिनः ताद्रूप्यादारोपात् पुण्डरीकवदितराभिन्नत्वेनाऽपरिचयात् उभयोस्तुल्य

लक्ष्मण । अयमार्य्यो हनूमान् । (ठ)

गुणतया प्रतीते भेदाऽग्रहनिबन्धन सामान्याऽलङ्कार , न तु भ्रान्तिमान्, अतस्मिन् तद्बुद्धेरनुदयात् ,—"सामान्य प्रकृतस्यान्यतादात्म्य सदृशै गुणै" इति लक्षणात्]।

यद्वा,—ननु एतत्पद्माकरस्य रमणीयत्वात कलकूजितहंसगणोपशोभितपुण्डरीकादि सुरभितया च उद्दीपकत्वेन विप्रयोगविवशमानसस्य द्रष्टुमशक्यत्वात् कथमौचित्य भवति ? इत्यभिप्रायके सीतापक्षे उत्तरयति, एतस्मिन्निति ।—मत्—मदर्थं मम विरहव्यथाऽऽतुरस्य त्वद्विरहसमुत्था व्यथामपनेतुमित्यर्थ , अकला ,—न विद्यते कल कूजितं येषा तथाविधा नैसर्गिक मधुरनिनादमपि परित्यज्येति भाव, ते मल्लिकाक्षा हंसविशेषा तेषां पक्षाणा गरुता व्याधूतै कम्पनै ताडनैरित्यर्थ, छिन्नप्रसूनत्वादिति शेष । सुरभि केवल विगतकुसुमाश्रयत्वात चलानि उत्कटण्टकानि पृथलमृणालानि स्वाधारभूतानि इति यावत येषा तथाभूतानि, स्वाधारच्युते विगतशोभानि पुण्डरीकाणि येषु तथोक्ता प्रदेशा कुवलयिन दिवाविकाशाद्यभावात् विलूनपुण्डरीकवत म्लानैरिन्दीवरैर्युक्ता वाष्पाम्भपरिपतनोद्गमाऽन्तराले सदृष्टा । हंसा खलु विधुरस्य मम विरहोद्दीपक मदकूजित विहाय उद्वेगकराणि कमलानि अपि चिच्छिदुरित्याशय । तथ हि एतत, विरहखिन्न राम दृष्ट्वा अचेतनाना गिरीणामपि रोदनदर्शनात अधच सचेतनाना तेषामवश्य करुणोदयसम्भवादित्यवधेयम् । [हंसचक्रवाकाणा मुपरि शापदानदर्शनात, अस्माकमपि उपरि राम शाप दास्यतीति भीत्या हंसा अपि एव मुमुचु इत्यपि ध्वनते]। "कण्ठेषु स्खलित गतेऽपि शिशिरे पुंस्कोकिलाना रुतम्" इत्यादिदर्शनात तिरश्चामपि विरहिजनेषु अनुकम्पा प्रसिद्धा वा। [दलत्पुण्डरीकादौ संयुक्तव्यञ्जनयो स्वरूपत क्रमतश्च साम्यात् छेकानुप्रास]। इह प्रदर्शिता ॥ २१ ॥

(ठ) अयमित्यादि ।—देवोपमसौभाग्यभाक्तया देवांशसम्भूततया महोपकर्तृतया च, हनूमान आर्य इत्युक्ति । हनू कपोलयोरुपरिस्थ मुखभाग , स प्रशस्त अस्य इति मतुप्, हनुमानित्यपि भवति, हनुशब्दस्य क्रमान्तस्याप्यतदर्थकत्वात । पुरा मरुत्सुत वज्रेणास्य हनुरभाङ्क्षीत, तत एवाऽस्य इत्थमभिधान सञ्जातम् । यदाहि—

मलयाचलतटवज्रेण हनुरस्य यथा हता ।

सीता। एसो सो चिरणिव्विगजीअलोअपच्चुद्धरणगुरुओवआरी महाणुभाओ मारुदी। * (ड)

राम। दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्द्धन'।
यस्य वीर्य्येण कृतिनो वयञ्च भुवनानि च ॥ ३२ ॥

* एष स चिरनिर्विण्णजीवलोकप्रत्युद्धरणगुरूपकारी महाऽनुभावो मारुति।

(ड) चिरेत्यादि।—चिरनिर्विण्णस्य सुदीर्घकालं यावत अन्येषु क्रौर्य्यादिदुर्व्यवहारदर्शनात् चिरदुःखितस्य,—["तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानना" इति साहित्यदर्पणे।] जीवलोकस्य सर्वेषां जीवानामित्यर्थ, प्रत्युद्धरणात शोकाऽपनयनात गुरूपकारी महोपकारी, महानुभाव,—महाशय, मारुतस्यापत्यं पुमानिति मारुति पवनपुत्रो हनूमान्। सीता रावणेन हृता इति श्रवणसमकालमेव सर्वे एव जीवलोका, का कथा महाजनानां महोदारचरितानां, सपदि शोकसंविग्ना आसन्, त्रिभुवनकण्टकं रावणं निहत्य उद्धृतायान्तु सीतायां जीवलोकस्य तथाविधः अरुन्तुदः शोकः व्यपगत, तत्र खलु सीतासमुद्धरणसमये अस्यैव महत हनुमत महोपकारकत्वं सर्वत्र सुविदितमेव। त्रैलोक्यपीडकरावणहनने सहायकतया न केवलं ममैवोपकारी अपि तु निखिलभुवनानामिति भाव। [दश मासान् व्याप्य सीताया रावणगृहावस्थितत्वात् चिरपदमुपात्तम्]।

दिष्ट्येति।—दिष्ट्येति हर्षसूचकम् तृतीयान्तप्रतिरूपकमव्ययम, अहो इत्यर्थ। स,—प्रसिद्ध, अयं—पुरत दृश्यमान, महाबाहु,—आजानुलम्बितभुज रुद्रावतारत्वात् महापुरुषत्वाद् वा, अथवा लक्षणया भुजबलसम्पन्न, अञ्जनानन्दवर्द्धन,—पवनेनाहितवीजाया केशरिपत्न्या अञ्जनाया प्रीतिविवर्द्धन तनय इत्यर्थ, हनूमानिति पूर्व्वेणान्वय। यस्य वीर्य्येण—पराक्रमेण वयं—लक्ष्मणाद्या वानरान्ता सर्व्वे भुवनानि—त्रिजगन्ति च कृतिन,—कृतार्था उपकृता इत्यर्थ, सिद्धकामा इति यावत। [प्रशस्त—कृतं प्रशस्यमेषामित्यर्थे प्रशसायामिनि रूपम]। कथं हि तत निष्पादितं, तदेवेदानीमभिधीयते।—तथा हि, रावणहननानुकूल्यकरणात् रामस्य, अशोकवनमध्यस्थिताया रोरुद्यमानाया प्रियवार्त्ताप्रेषणादिना कथञ्चित खेदापनयनात सीताया, सञ्जीवन्यौषध्यानयनादिना स्वानवधानकृतसीताविरहपरिहाराच्च लक्ष्मणस्य, वह्निप्रवेशनिराकरणात् भरतशत्रुघ्नयो, शरणागतपरिपालनात विभीषणस्य, सुखोत्पादनादिना सुग्रीवस्य, मधुवनभङ्गापराधनिरोधात् वानराणा, स्वावस्थित्या

सीता। वच्छ! एसो कुसुमिदकअम्बतरुतण्डविदबरहिणो किंणामधेओ गिरी,—जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसरसिरी मुहुत्तं मुच्छन्तो तुए परुदिएण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो? * (ढ)

---

* वत्स! एष कुसुमितकदम्बतरुताण्डवितबर्हिणः किंनामधेयो गिरिः,—यत्र अनुभावसौभाग्यमात्रपरिशेषधूसरश्रीः मुहूर्त्तं मूर्च्छन् त्वया प्ररुदितेन अवलम्बितस्तरुतले आर्यपुत्र आलिखितः?

च जीवलोकस्य महोपकारसाधनात् सर्वे एव महता हनुमता कृतार्थीकृता इति यथायथमुन्नेयम्। [अत्र "भुवनानि च" इत्यत्र चकारश्रुतेः विभक्तिविपरिणामेन कृतानि इति अध्याहारेणान्वयः। अतो नास्ति न्यूनपदत्वदोषशङ्काऽवसरः। अत्र उपकृतिक्रियायाः महतश्चरितख्यापनात् उदात्तालङ्कारः]। पथ्यावक्त्रं वृत्तम् ॥ ३२ ॥

(ढ) वत्स! एषः, कुसुमान्येषां जातानीति [तारकादित्वादितच्] कुसुमिताः पुष्पिताः ये कदम्बतरवस्तेषु ताण्डविताः नृत्यन्तः, यद्वा कुसुमिताः ये कदम्बतरवः ते ताण्डविताः कृतताण्डवाः यैः तथाविधाः, [ताण्डववन्तः कृताः इत्यर्थे ताण्डववच्छब्दात् "तत्करोति तदाचष्टे" इति ग० सूत्रेण णौ इष्ठवद्भावात् मतुब्लोपे निष्ठायां रूपम्]। बर्हिणाः मयूराः यत्र सः तथोक्तः, ("मयूरो बर्हिणो बर्ही" इत्यमरः)। वर्षासु स्निग्धगम्भीरमेघध्वनिश्रवणसमकालं हि कदम्बकुसुमसुरभितानामुन्मदायमानानां बर्हिणानां नर्त्तनस्य कविसमयप्रसिद्धेः। "पुंनृत्यं ताण्डवं प्रोक्तं स्त्रीनृत्यं लास्यमुच्यते" इति। किंनामधेयः—किमाख्यो गिरिः? [नामैवेति नामधेयं स्वार्थे धेयः]। यत्र —यस्मिन् तरुतले—वृक्षस्य अधोभागे, [अनुगतो भावः इति गतिसमासः, न तु अनुपूर्वात् भूधातोः घञ् "श्रिणीभुवोऽनुपसर्गे" (३।३।२४ पा०) इति सोपसर्गस्य धातोः घञ् निषेधात्] अनुभावः प्रभावस्तेजः इति यावत्, तस्य सौभाग्यं सम्पत् तदेव तन्मात्रं, तस्य परिशेषादवशिष्टत्वात् धूसरा ईषत्पाण्डुवर्णा श्रीः नवजलधरश्यामला वपुःकान्तिर्यस्य सः तथोक्तः कृशाङ्गोऽपि स्वाभाविकसौभाग्यलक्ष्मीसमालिङ्गितकायः इति यावत्, [विप्रलम्भशृङ्गाररसस्य दशविधदशानामुत्कीर्त्तनात् तदन्तर्भूतस्य सततसीताप्राप्त्युपायादिचिन्ताजनितव्याधेर्दशात् सीताविरहविवशविग्रहस्य राघवस्य परिम्लानायाः वपुःश्रियः वर्णान्तरे निमग्नतया तदाकृतेः पाण्डुत्वकालीनं। तथा हि दर्पणकारः,—"व्याधौ तु दीर्घनिःश्वासपाण्डुताकृशतादयः।" इति।] आर्यपुत्रः मुहूर्त्तं मूर्च्छन्—

लक्ष्मण। सोऽयं शैलः ककुभसुरभिर्माल्यवान् नाम, यस्मिन्
नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः।
राम। वत्सैतस्माद् विरम विरमातः परं न क्षमोऽस्मि
प्रत्यावृत्तः पुनरिव स मे जानकीविप्रयोगः ॥३३॥

मूर्च्छया अचेतनीभवन्, प्रघटितन—रोदनं कृत्वा [आदिकर्मणि क्तः] शोकायमानेन इत्यर्थः, त्वया आलम्बितः,—धृतः [कुसुमितलतानां लास्यलीलासुनिपुणानां भुजङ्गभुजां मानसोन्मादकरीं विरहसमुद्दीपिकां केकामाकर्ण्य रणरणकाकुलस्य रामस्य जडतायाश्चापि उदयात् अङ्गानां मनसश्चापि हीनचेष्टता आयाता, एतदवलोक्य भ्रातरि अकपटप्रेमवता लक्ष्मणेन तदा रामभद्रः धृत आसीत् इत्यवधेयम्। तदा च दर्पणः,— "जडता हीनचेष्टत्वमङ्गानां मनसस्तथा" इति]। इत्येवंप्रकारेण आलिखितश्चित्रितः।

कथङ्कारं हि गिरिमिममालोक्य स्वभावधीरस्यापि रामस्य तथाविधं मोह प्राजनि, इत्याशङ्कायां तस्य पथिकविरहोत्कलिकाजनिका सौभाग्यलक्ष्मीमावेदयति, सोऽयमिति।—ककुभैरर्जुनपुष्पैः [ककुभानां प्रसूनानि इत्यर्थे अण् 'फले लुक्' (४।३।१६३ पा०) इति अणो लुक्। "नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः" इत्यमरः]। सुरभिः सुगन्धः। ("सुरभिर्घ्राणतर्पणः। इष्टगन्धः सुगन्धिः स्यात्" इत्यमरः।) स अयं माल्यवान् नाम शैलः। यस्मिन्—शैले नीलः,—नीलवर्णः स्निग्धः,—शीतलः विद्युल्लतिकाभिः समाश्लिष्टत्वात् मसृणश्च [एकपदपाठे विशेषणकर्मधारयः] नूतनः,—नवाविर्भूतः तोयवाहः—मेघः शिखरं—शृङ्गं श्रयति—अवलम्बते। अभिलिहोऽयं गिरिरित्यर्थः। [मन्दाक्रान्तावृत्तनिबद्धस्य अस्य श्लोकस्य अपरार्द्धं रामोक्त्या पूरितम्]॥

वत्सेति।—वत्स। लक्ष्मण। एतस्मात्—माल्यवत्पर्वतवृत्तान्तसंवलितचित्रवर्णनात्, विरम विरम—द्रुतं निवर्त्तस्व, [आदरातिशय्ये वीप्सायां द्विरुक्तिः। "जुगुप्साविराम"— इति वार्त्तिकेनाऽपादानत्वम्। "व्याङ्परिभ्यो रमः" (१।३।८३ पा०) इति सूत्रेण परस्मैपदञ्च।] अतः परं द्रष्टुमिति शेषः, न क्षमोऽस्मि—न शक्तोऽस्मि, यतः सः,—पूर्व्वमनुभूतः मे—मम जानकीविप्रयोगः,— सीताविरहः पुनः प्रत्यावृत्त इव—पुनर्लब्धप्रसर इव परावृत्य आगत इवेत्यर्थः। वैदेहीविरहजः स हि शोककीलकः सर्वोऽभ्यसततरः अधुना पुनः प्ररूढः नितरां मर्मभेदिकां वेदनां जनयतीति मन्ये इति हृदयम्। इममेव माल्यवन्तमाश्रित्य तत्रभवता कालिदासेनाऽपि एवमेवोपवर्णितम्। तथा हि—

लक्ष्मण। अत परम् आर्य्यस्य तत्रभवता कपिराक्षसानाञ्च असङ्ख्यातानि उत्तरोत्तराणि कर्माश्चर्य्याणि, परिश्रान्ता चेयमार्य्या, तद् विज्ञापयामि—विश्राम्यतामिति। (ण)

सीता। अज्जउत्त। एदेण चित्तदंसणेण पच्चुप्पण्णदोहलाए अत्थि मे विण्णप्पं। * (त)

---

* आर्य्यपुत्र। एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यम्।

"एतस्मिन्मदकलमयूरं पुरस्तात् प्रादुर्भवत्यम्बरलेखि शृङ्गम्।
नव पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रुसमं विसृष्टम्॥
गन्धश्च धाराहतपल्वलानां कादम्बमर्द्धोद्गतकेशरञ्च।
स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे" ॥ इति।

[एतद्धि सीताविरहरूपं भाव्यर्थमभिसन्धाय कौतूहलबहुलानां माल्यवदुपवर्णनविषयिकाणां वाचामभिधानात् "परिभावना" नाम मुखसन्धेरङ्गं वेदितव्यम्। "कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना।" इति दर्पणोक्तेः। अत्र पूर्ववाक्यं प्रति परार्द्धस्य हेतुतयोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गं, पुनरसम्भवापातस्यातीतविरहस्य पुनरागमनसम्भावनाकारकतया उत्थापनादुत्प्रेक्षा, इति तयोः सङ्करः]। मन्दाक्रान्ता वृत्तम्।—"मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्" इति लक्षणात्, सप्तदशाक्षरपादच्छन्दसां प्रस्तारेषु १८९२८ततमप्रकारे चास्य अन्तर्भावः ॥ ३२ ॥

(ण) अत इति।—अत परम्—अस्मात् अनन्तरम् आर्य्यस्य—रामस्य तत्रभवता—महात्मना कपिराक्षसानाञ्च असङ्ख्यातानि—अगणितानि उत्तरोत्तराणि—परेभ्यः पराणि उत्कृष्टेभ्य उत्कृष्टानीत्यर्थः [उत्तराणि च उत्तराणि चेति उत्तरोत्तराणि, पौर्व्वापर्य्येणानुष्ठितानि, क्रमशः विहितानि इति वा, वीप्सायां द्विर्भावः] कर्माश्चर्य्याणि—कर्म्माणि वीराचितानि एव आश्चर्य्याणि विस्मयकराणि सप्ततालभेदसमुद्रबन्धनादीनि अद्भुतव्यापाराणीत्यर्थः। इयमार्य्या—सीता च परिश्रान्ता, गर्भभारालसत्वात् चित्रदर्शनाभिनिवेशात् [illegible] तद् विज्ञापयामि—निवेदयामि, विश्राम्यताम्—[illegible] इति शेषः। [तत्र प्रथमे पक्षे [illegible] [illegible] द्वितीये च [illegible] आत्मघाती भावे वाच्ये। उभयत्र [illegible]]।

(त) [illegible] दोहद [illegible] गर्भिण्यभिलाषो वा यस्याः

राम। ननु आज्ञापय।

सीता। जाणे पुणो वि प्पसण्णगम्भीरासु वणराइसु विहरिस्स, पवित्तणिम्मलसिसिरावगाहाञ्च भअवदी भाईरही अवगाहिस्स। * (घ)

राम। वत्स लक्ष्मण।

लक्ष्मण। एषोऽस्मि।

राम। अचिर सम्पादनीयोऽस्या दोहद,—इति सम्प्रत्येव गुरुभिः सन्दिष्टम्। तत् अस्खलितसुखसम्पात रथमुपस्थापय। (ट)

---

* जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि, पवित्रनिर्म्मलशिशिरावगाहाञ्च भगवतीं भागीरथीमवगाहिष्ये।

तथाभूताया मे—मम विज्ञाप्य वेदनीयमस्ति। [मे इत्यत्र "कृत्याना कर्त्तरि वा" (२।३।७१ पा०) इति सूत्रेण षष्ठी वैकल्पिकी, पक्षे मयेति। इदानीम् अदूरवर्त्तिन वीजीभूतस्य आत्मविवासनस्य प्रतिरूपकतया स्थितस्य भूतपूर्वस्य प्रियसमागमसह कृतस्यैव तस्य स्मर्य्यमाणतया महाह्लादकरत्वात् इद हि प्राप्तिनाम वीजसन्धेरङ्ग वेदितव्यम्। तथा हि—"प्राप्तिस्तु सुखागम" इति दर्पण]।

(घ) जाने—अवगच्छामि, इच्छामि इति भाव। [जनस्थानविहरण गङ्गावगाहादीनामवश्यम्भावितया ज्ञापनार्थमभिलषामीत्यनुक्त्वा जाने इति पदमुपात्तम्। "अनुपसर्गाज्ज्ञ" (१।३।७६ पा०) इति सूत्रेणात्मनेपदम्]। प्रसन्ना हिंस्रविरहितत्वात् पुष्पफलैरुपशोभितत्वाद्वा अनुद्वेजयन्त्य, गम्भीरा तरुगुल्मादीनां दृढसन्निवेशात् लोकोत्तर भावमावेदयन्त्य, [विशेषणकर्मधारय] तथाभूतासु वनराजिषु विपिनवीथीषु विहरिष्यामि—पर्य्यटिष्यामि। पवित्र पावन, निर्मल पापानां समूलमुन्मूलनात् सुभग सुखकरञ्च, शिशिर शीतल तृप्तिकरञ्च सन्तापहरञ्च वा अवगाह मज्जन यस्यां तां भागीरथीं गङ्गामवगाहिष्ये। एतेन शोकविधुराया निकारजात विसोढुमशक्नुवत्या वैदेह्या भागीरथ्यामात्मविसर्जन गम्यते। [एतद्धि प्रीक्षप्राप्तिरूपवीजसम्भ्यङ्गस्य विहृतिरूपत्वमवगन्तव्यम्।]

(ट) अचिरम्—अविलम्बितमेव अस्या,—सीताया दोहद,—अभिलाष सम्पादनीय,—पूरणीय, इति—इत्य गुरुभि,—वशिष्ठारुन्धतीशान्ताप्रभृतिभि

सीता। अज्जउत्त! तुम्हेहिं वि तहिं गन्तव्वं। *

राम। अयि कठिनहृदये! एतदपि वक्तव्यमेव! (ध)

सीता। तेण हि पिअं मे। †

लक्ष्मण। यथा आज्ञापयति आर्य्यः।

[इति निष्क्रान्तः।]

राम। प्रिये! इतो वातायनोपकण्ठे मुहूर्त्तं संविष्टौ भवावः। (न)

---

* आर्य्यपुत्र! युष्माभिरपि तत्र गन्तव्यम्।

† तेन हि प्रियं मे।

सन्दिष्टं—कथितम्। तत्—अतः, अस्खलितं गात्रसञ्चलनभ्रंशादिरहितं इत्यर्थः, अत एव सुखयतीति सुखं सुखजनकं सम्पातं सुखेन अक्लेशेन वा सम्पातो गमनं येन तथोक्तम्। सीतायाः पूर्णगर्भतया तथाविधेनैव रथेन गमनस्य औचित्यादिति तात्पर्य्यम्। [एतद्धि सीताविवासनरूपबीजार्थस्य प्ररोहीभूततया उद्भेदरूपं बीजसन्ध्यङ्गं वेदितव्यम्। "बीजार्थस्य प्ररोहः स्यादुद्भेदः" इति लक्षणात्]।

(ध) कठिनं निर्दयं हृदयं यस्याः तथाभूते। निर्ममस्मानसे। इत्यर्थः, यतः त्वमहं क्षणमपि विना स्थातुमपि शक्नोषीति भावः, एतदपि त्वया सार्द्धं जनस्थाने पुनर्विहरणमपि किन्तु वक्तव्यं प्रार्थयितव्यं वा। तत्र तव पर्य्यटनस्य अतीवानन्दकरत्वेन त्वद्विप्रयोगजनितदुःखासहिष्णुना त्वदभिन्नहृदयेन विश्वकल्पेन मयाऽप्रार्थितेनापि तत्र खलु गन्तव्यमेव, शङ्कायामित्थं त्वद्गतया भेदबुद्ध्योद्भावितया सुव्यक्तं खलु उपलोपमत्वं त्वन्मनस इति हृदयम्। परन्तु 'एतदपि वक्तव्यमेव'—एतद्धि च वक्तव्यम्, यतः अहन्तु न गमिष्यामि, भवत्या धर्म्मदारया खलु तत्र गन्तव्यम्। [अहमिदानीं त्वां दुर्वहगर्भखिन्नां क्रव्याद्भ्यां बलिमिव अरण्याभ्याम् उपहरिष्यामि, इति काक्वा अर्थान्तराभिधायकस्य प्रधानार्थान्तरक्षेपिणः वाग्विन्यासस्य, चतुर्थपताकास्थानीयत्वापकत्वं ज्ञेयम्। भाव्यर्थस्य गर्भितत्वात्, तथा हि—

"द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम् ॥" इति लक्षणात्]।

(न) वातस्य मारुतस्य अयनमागमनं येन यस्मात् वा तथाभूतं, पवनसञ्चारहेतुर्भित्तिद्वारं यत् गवाक्षान्तर्गमनिरूपं तस्य उपकण्ठे सन्निधौ, ["वातायनापवर्त्तके" इत्यादि पाठः इदानीं, तदर्थस्तु,—वातायनापवारके, अपवारकमत यत् वातायनं तत्र

सीता। एव्व भोदु, ओहीरिज्जामि क्खु परिस्समजणिदाए णिद्दाए। * (प)

राम। तेन हि निरन्तरमवलम्बस्व(फ)मामत्र शयनाय।—

जीवयन्निव ससाध्वसश्रम-स्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्दवमयूखचुम्बित स्यन्दिचन्द्रमणिहारविभ्रम ॥ ३४ ॥

---

* एव भवतु, अपह्रिये खलु परिश्रमजनितया निद्रया।

इत्यर्थ, यदस्य अपरं न लक्ष्यते, अतिनिभृत मृदुलगन्धवहनिषेवितं देशं इति भाव]। संविष्टौ—कृतसंवेशौ शयानौ इत्यर्थ ("समीपे निकटासन्न सन्निकृष्टसनीडवत्। सदेशाऽभ्याससविध समर्यादसवेशवत्। उपकण्ठाऽन्तिकाऽभ्यर्णाऽभ्यग्रा अप्यभितोऽव्ययम्" इति, "स्यान्निद्रा शयन स्वाप स्वप्न संवेश इत्यपि" इति चामर)।

(प) परिश्रमजनितया,—चित्रदर्शनात् जायमानेन क्लमेनानीतयेत्यर्थ, निद्रया—संवेशेन, हृदयावसादेनेति यावत्। अपह्रिये—अभिभूये। [अपपूर्वकात् हरतें कर्मणि लटि रूपम्]।

(फ) तेन हि निद्रासञ्जातवैक्लव्यात् हेतो अत्र अस्मिन् वातायनोपकण्ठे शयितु मा मच्छरीरमित्यर्थ, निरन्तर नितान्त अन्तरम् अवकाशो यस्मिन् तद्यथा तथा कालक्षेपमन्तरेणैव गाढमिति यावत्, अवलम्बस्व—समाश्रय। दुर्वहगर्भभारविवश स्वदेह कियन्त विनोदयितु मन्दमारुतरम्ये एतस्मिन् गवाक्षान्तराले मदङ्कोपधाना क्षण विश्रामसुखमुपभुङ्क्ष इति भाव।

इदानीमात्मतोषकर समालिङ्गनप्रकार सुस्फुटमभिधत्ते, जीवयन्निति।—साध्वसम् अत्यर्थम् अस्यति विक्षिपति मन इति साध्वस भयम् ("—दरत्रासौ भीतिर्भी साध्वस भयम्" इत्यमर) श्रम खेद, (अत्र आलेख्यगतशूर्पणखाऽऽदिदर्शनोद्भूत साध्वसं श्रमश्च चित्रदर्शनजन्य विज्ञेय।) तत एव हि समुद्भूता स्वेदबिन्दवो घर्मबिन्दव तैं सह वर्त्तमान, तथोक्त, इन्दोरिमे ऐन्दवैरिन्दुसम्बन्धिभिर्मयूखै किरणै चुम्बित स्पृष्ट, अत एव स्यन्दन स्रवतीति स्यन्दी तुषारशीकरवानित्यर्थ, यश्चन्द्रमणिहार चन्द्रकान्तमणिस्रक् तस्य विभ्रम विलास इव विभ्रमो यस्मिन् स तथोक्त अथवा तस्य विभ्रमो भ्रान्ति यस्मिन् तादृशो यो बाहु स्वेदार्द्रत्वात् तुषारस्राविचन्द्रकान्तमणिहारसदृश शुभ्रोज्ज्वल, यद्वा स्वेदबिन्दुमिश्रो यस्मिन् बाहौ तुषारनिष्यन्दिचन्द्रमणिहारभ्रान्तिर्भवतीति भाव स तथोक्तो बाहु, जीवयतीति जीवयन्निव मामिति शेष, त्वद्विरहदुःखदावानलव्यपेतप्राणं हि मा पुनरुज्जीवयन्निवेत्यर्थ, मम उज्जीवन

[तथा कारयन् सानन्दम् ।] प्रिये ! किमेतत् (ब) ?—

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।

लग्न ते भय वाहुरिति भाव , अधिकण्ठ कण्ठे [विभक्त्यर्थेऽव्ययीभाव ।] अर्प्यतां— न्यस्यतामित्यर्थ , इत्थं तु भवनोन्मुखविपर्ययोगसन्तप्तहृदय मा शीतल कुरु इति भाव । मृणालस्निग्धकोमल सञ्जीवनसञ्जीवन स्वबाहु मम कण्ठे वधान, अन्यथा त्वद्विरहे क्षणमपि न जीवेयमित्याशय । [अत्र भयश्रमस्वेदादय सात्त्विकभावा , तथा हि भोजराज ,—

"विप्रलम्भेऽभियोगाद्यै सम्भोगे साध्वसादिभि ।
मिथ परीक्षया प्रेम्णो निर्दिष्टाभ्रा परीक्ष्य ॥
वासश्चित्तचमत्कार आकस्मिकभयादिभि ।
निद्राव्यापारवैगुण्यमिन्द्रियाणां श्रमादिभि ॥" इति ।

तथा हि वैदेह्या सुकोमलाङ्गलावण्यादीनि उद्दीपनविभावा , निद्रास्वप्नजडत्वादय व्यभिचारिण , तै परिपुष्ट अत आलम्बनविभावभूताया सीताया समुत्पन्न राघवस्य रतिरूपस्थायिभाव सम्भोगशृङ्गाररसरूपता लभते इति । अपि च चन्द्रकिरण-स्पृष्टचन्द्रकान्तमणिहारधर्मस्य सीताभुजलताया धारणासम्भवात तदीयविभ्रम-सदृशविभ्रमसङ्गमयत वाहौ मणिहारादेश्च बिम्बप्रतिबिम्बबोधात असम्भवद्वस्तु-सम्बन्धरूपो निदर्शनालङ्कार , जीवयन्निवेत्युत्प्रेक्षा , तदनयो सङ्कर]। रथोद्धता वृत्तम् —"रान्नराविह रथोद्धता लगौ" इति लक्षणात् , एकादशाक्षरपाद-च्छन्दसां ६९९ तमप्रस्तारान्तर्भूतमिदम् ॥ ३४ ॥

(ब) शालीनतया मुग्धया तया समाश्लेषे स्वबाहौ असमर्पिते स्वयमेव सम्भ्रमलज्जाजडदृश सीता तथा कारयन्, तदीयकर स्वांसे उपस्थाप्येत्यर्थ । प्रिये ! किमेतत ? कण्ठे तव बाहूपस्थापनानन्तर कथ हि ईदृशी मदीयावस्था जाता, नाह तामधुना निर्णेतुं शक्नोमीति भाव ।

अनुभूयमानमवस्थान्तर कीदृशमजनि तदेव सविशेष विवृणोति, विनिश्चेतुमिति । —एतदिति अनेन सम्बन्धः । एतत—मयोपभुज्यमान त्वदङ्गसंस्पर्शजनितम् अनि-र्वचनीय वस्तु इत्यादि । वा अन्यदा कथमेव नैवाऽधमाग्रह ? इद सुख चेत, तर्हि, दुःखं कथं हि तदिच्छका न भवति ? अत आह, दुःखमिति वा ।—किमिद दुःखाभावरूपो उत्कर्षः ? तदाले कान्तसोन्मादकत्वाद्वा अपरिहार्यो स्यात, अत

तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥ ३५ ॥

एवाह प्रमोहश्चेति, प्रमोहश्चैतन्यसम्मीलनं वा, न चेदेव तदा किमिति इतस्स्वप्नायते ? अत आह निद्रेति।—निद्रा स्वापो वा, स्वप्नसदृशं किमेतदलौकिकमनुभवामि। ननु जाग्रदवस्थायां चैतस्यात्यन्तमसम्भावितत्वात् आह,विषेति।—विषविसर्प,—विषप्रसार, विषप्रवेशजन्य विसर्पाख्य रोगविशेषो वा [रोगवाचकविसर्पशब्दस्य ह्रस्वदीर्घेकारता भवत्येव]। एवञ्चेत् तर्हि कथं हि तदुद्भूता व्यथा निरन्तरमात्मानं न क्लिश्नाति ? अत आह मद इति।—मद,—मद्योपयोगज आनन्दविशेषो वा, अन्यथा कुत एतन्मनसश्चाञ्चल्यम् ?—("सम्मोहानन्दसम्भेदो मदो मद्योपयोगज" इति साहित्यदर्पणे मदलक्षणात्)। कथं पुनरेव भावविपर्य्यय अजायत, इति विनिश्चेतु निर्णेतुं न शक्य। [अध्याहृतेन "एष मदीयो भाव" इत्यनेन "शक्य" इति पदस्य अन्वयो बोध्य, पुनर्निर्देशोऽपि तत एव साधु]। त्वदीयसुकुमाराङ्गसंश्लेषेण समुच्छलत्सर्वातिशायि-सुखसन्दोहपूरनिमग्नस्य मे लोकोत्तरानन्दमनुभवतामिन्द्रियाणां विवशता आयाता, तेन हि विवेकोऽपि हर्षातिरेकात् व्यलुपत्, नातोऽहं कीदृशीं दशां गतवानिति सम्यगवधारयितुं प्रकाशयितुञ्चालमस्मि इत्याशय। अशक्तौ हेतुमाह—तवेति। तव स्पर्शे स्पर्शे प्रतिस्पर्शं त्वदीययावदङ्गस्पर्शेषु इत्यर्थ, परिमूढ —परित मूढ विषय-ग्रहणासमर्थत्वात् मोहमुपागत इत्यर्थ, स्वस्वविषयव्यावृत्त इति यावत, इन्द्रियगणो इन्द्रियाणां चक्षुरादीनां गण समूह यस्मिन् स तथोक्तो विकार आन्तरावस्थाविशेष, मम चैतन्यं विवेकं भ्रमयति च—तिरोदधाति च, सम्मीलयति च—प्रकाशयति च, मम बुद्धि कदाचित् भ्रान्ता कर्हिचिच्च प्रकाशिता आत्मविकारं निश्चेतुं नेशे इति भाव। स्पर्शे स्पर्शे मम चैतन्यं क्षणात् प्रमोधमेत्य सुखसन्दोहसमाच्छादितं सदेव तमसा परिभूयते, तत् कथमहं विनिश्चिनोमि किमवस्थोऽहमिति भाव। यद्वा—अत्र परार्द्धवाक्यस्य प्रथममन्वयं विधाय तदनु द्वितीयाद्व्याख्या विधेया, ततश्च इति—एवं प्रकार अयं प्रियास्पर्शजनितोऽपूर्वो विकार सुखं वा दुःखमिति वा निश्चेतुं न शक्य, सुखत्वेन वा दुःखत्वेन वा निर्णेतुं मया न शक्यते इत्यर्थ। [शक्य इत्यस्य विकार इत्यनेनान्वयात् साधु पुनर्निर्देश। अत्रापि सम्भोगशृङ्गारो रस। अत्र पूर्वार्द्धे सुखदुःखाद्यनुभवस्य अतिप्रियस्वप्रियतमाऽङ्गस्पर्शेन सुखावमुह्यमानस्य रामस्य तात्त्विकतया प्रतिभासनात् प्रतिभोत्थितत्वाभावात् वितर्कमात्र, न तु सन्देहालङ्कार। परार्द्धे तु बोधतिरोधानजनकबोधविकाशजनकक्रिययो विरोध

सीता । (विहस्य ।) थिरप्पसादा तुम्हे, इदो दाणि किमवर ? * (भ)

राम । म्लानस्य जीवकुसुमस्य विकाशनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।

---

* स्थिरप्रसादा यूयम्, इत इदानीं किमपरम् ?

वज्रापाततो भासनात् प्रियास्पर्शजनितविकारत्वेन च समाधानात् विरोधालङ्कार, तथा विकारस्य स्पर्शहेतुकत्वात् काव्यलिङ्गञ्च, इत्येतयो साङ्कर्यम्]। शिखरिणी वृत्तम्। लक्षणादिकमुक्त प्राक् ॥ ३५ ॥

(भ) स्थिरेति।—यूय, स्थिर अविचलित प्रसाद अस्मान् प्रति स्नेह प्रीतिरिति यावत् येषा ते तथोक्ता अस्मासु अविसंवादिप्रणयसम्भोसव इत्यथ अस्मात परम् इदानीं किम् अपरम् अन्यत् यत्न स्थिरतरसौहार्दं विना इत्यर्थ आशास्यतामिति स्त्रीणामित्याशय । [अत्रापि सम्भोगशृङ्गार रस]।

अथ तदानीं निर्भरप्रणयविश्रम्भमानसाया मधुरभाषिताया वैदेह्यासेतावाननुराग, कथं हि प्रकृति गत तत्प्रतिपादनमिषेण तद्वचसामम्मृतायमानत्वादिधर्मंशतयोगित्वमुपपादयति म्लानस्येति।—हे करोरुहाचि । विकसितशतपत्रायतनेत्रे । ["बहुव्रीहौ सक्थ्यक्ष्णो स्वाङ्गात षच्" (५।४।११३ पा०) इति षच्, "षिद्गौरादिभ्यश्च" (४।१।४१ पा०) इति ङीष्।] ते—तव एतानि सुवचनानि—सुभाषितानि [अत्र सातावचनेष्वपि एतादृशसौभाग्य नानुभूतपूर्व्वामत्यपि सशब्देन व्यज्यते] म्लानस्य—सासारिकसन्तापादिरूपतपनमरीचिचर्यावितमनाहततसंगात म्लानिमापन्नस्य जीवकुसुमस्य—[illegible] जीव जीवनमेव कुसुम तस्य सद्य पातिन इति यावत्, विकाशनानि—प्रस्फुटनानि [illegible] हर्षसयवत जीवनप्रसूनस्य [illegible] तथा [illegible] इत्याशय सन्तर्पणानि—तृप्तिसाधनानि भोग्यान्तरा[illegible] इत्यर्थ, सकलानामिन्द्रियाणा मोहनानि मोहकराणि स्वस्वव्यापारनिरोधीनि इत्यर्थ तथा कर्णयो [illegible] सुखप्रदानि सुधाधारा[illegible] यथा हि [illegible] एव [illegible] तृप्ति जन[illegible] तदेव [illegible] त्वद्वचसा [illegible] इति भाव । [illegible] रसायनानि—रसस्य [illegible] स्थानानि यद्वा,—रसस्य [illegible] इत्यर्थ , यद्वा,

एतानि ते सुवचनानि सरोरुहाक्षि।
कर्णामृतानि मनसश्च रसायनानि॥ ३६॥

सीता। पिअंवद! एहि सविसम्ह। (म) *

(इति शयनाय समन्ततो निरूपयति। (य))

* प्रियवद! एहि सविशाव।

—रसस्य वीर्य्यस्य अयनानि आधानानि आधिशरीरावसादादिनाशकानि पुष्टिकारकाणि औषधानि इव "यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्" इति वैद्यकोक्तेः। उत्साहशक्तिप्रदानीत्यर्थः, ("रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्य्ये देहधात्वम्बुपारदे॥" इति विश्वकोषात्)। [यथा हि रसायनरसनेन सर्वेषामेव रसानामास्वादजा तृप्तिरुपलभ्यते तथैव त्वद्वचनश्रवणसमकालं शब्दान्तरश्रवणजन्यसुखानामधिगमः भवतीति बोध्यम्। अपि च यथा रसायनानां रसरूपत्वात् भोग्यत्वम् औषधस्वरूपत्वाच्च रोगविनिवर्त्तकत्वं तथैव पुनरेतेषां वचनानां मनोहारित्वं हितत्वञ्च व्यज्यते, इत्यवधातव्यम्। अत्र श्रौतो लुप्तमालारोपाद्रूपकालङ्कारः, कुसुमविकाशनत्वस्य तथेन्द्रियादिसन्तर्पणत्वादीनां जानकीवचनेषु प्रमाज्ञानविषयत्वेनाविद्यमानतया आहार्य्यज्ञानेन चाभेदप्रतीतेर्मालारूपकालङ्कारश्च, "सरोरुहाक्षि" इत्यत्रोपजायमानेनोपमाऽलङ्कारेण सङ्कीर्यते। केचित्तु—एकस्य जानकीवचनस्य विकाशनसन्तर्पणादिविषयभेदेनानेकधोल्लिखितत्वादुल्लेखालङ्कारमिच्छन्ति। "एतानि ते सुवचनानि" इति विशेष्यपदोपादानेनैव वाक्यार्थस्य परिसमाप्तत्वात्, पुनश्च "कर्णामृतानि" इत्यादिना उपात्तत्वात् समाप्तपुनरात्तत्वं दोषः, स तु तृतीयचतुर्थपादयो र्वैपरीत्यपाठेन समाधेयः]। इति। वसन्ततिलकं वृत्तम्॥ ३६॥

(म) अतीव मधुरभाषित्वात् रामस्य प्रियवदेति सम्बोधनम्। [प्रियपूर्व्वकात् वदतेः खश्]। सावशाव—स्वपिम, निद्राविवशशरीरेदानामहं सञ्जातेति भावः। सत्यामपि निद्राकातरतायां सौजन्यात् प्रभातिशय्यात् च उभयत्वेन कथनमिति ज्ञेयम्।

(य) शयनाय—शयितुं, ["तुमर्थाच्च भाववचनात्" (२।३।१५ पा०) इति चतुर्थी]। निरूपयति—शयनसामग्रीसमवधानं शयनयोग्यं स्थानमुपधानादिकञ्च अस्ति वा न वा इति अन्विष्यति।

राम । अयि किमन्वेष्टव्यम् ॥—

आ विवाहसमयाद् गृहे वने शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥ ३७ ॥

सीता । [निद्रां नाटयन्ती ।] अत्थि एदं अज्जउत्त ! अत्थि एदं । *(र) । [इति स्वपिति ।]

---

* अस्त्येतत् आर्य्यपुत्र ! अस्त्येतत् ।

इदानीं शयनसुयोग्यमुपकरणमुपधानं दर्शयति, आ विवाहेति ।—विवाहसमयात् आ—विवाहकालमारभ्य, विवाहकालात् परमित्यर्थः, ["आङ् मर्य्यादावचने" (१।४।८९ पा०) इति सूत्रेण कर्मप्रवचनीयतया "पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति सूत्रेण पञ्चमी ।] देशावच्छेदेन गृहे तदनु वने च, पुनः कालावच्छेदेनापि शैशवे तत्पश्चात् यौवने च, स्वापहेतुः,—निद्रालम्बनं शयनोपकरणमित्यर्थः, (गृहे शैशवे यौवने च स्वापहेतुः, वने पुनर्यौवने स्वापहेतुः, न तु यथासंख्यमन्वयः,) अत्र केवलं तवैव अधिकारः नान्यस्या इत्याह, अन्यया—त्वद्भिन्नया स्त्रिया, अनुपाश्रितः, —अनालम्बितः, स्वापहेतुतया स्वान्तरमङ्गीकृतः इत्यर्थः, यद्यपि "जुष्टः परमनारीभ्यो भजे परमसुन्दरे" इत्युक्तमस्ति, तत्र तु "न रामः परदारान् वै चक्षुर्भ्यामपि पश्यति" इत्याद्युक्तेः चेटीसंवाहनाभिप्रायकमिति ज्ञेयम् । ["मद्बाहुः" इत्यनुक्त्वा "रामबाहुः" इति कथनन्तु प्रसिद्धिद्योतनाय, "उपधाय भुजं तस्य"—इत्यादि वचनात् एकपत्नीव्रतधरत्वमस्याविष्करोति इति बोध्यम्]। एषः रामबाहुस्ते—तव उपधानं—शिरोधानम् ("उपधानं तूपबर्हः" इत्यमरः) अधुनाऽपि तदस्तु, किम् अन्यान्वेषणेनेति भावः । [अत्र रामबाहौ तादात्म्येनोपधानत्वारोपात् शयनोपयोगित्वप्रतीतेश्च परिणामालङ्कारः, तस्य च "अन्यया अनुपाश्रितः" इति पदेन व्यतिरेकसंमिश्रणम्]। रथोद्धता वृत्तम् ।—"रात् परैर्नरलगैः रथोद्धता" इति लक्षणात् । ६९९तमप्रस्तारान्तर्गतमिदम् ॥ ३७ ॥

(र) अस्तीति ।—आर्य्यपुत्र ! एतत् तव बाहुरूपम् उपधानम् अस्ति । [अत्र 'कृष्णादिशब्दानां पर्य्यायेण उद्देश्यविधेयलिङ्गभाक्त्वम्' इति नयेन क्लीबत्वमिति ध्येयम्]। इत्युक्त्वा उपधानीकृत्य स्वपिति इत्यर्थः । अत्र प्रसादनार्थम् "अस्त्येतत्" इति पुनरभिहितं नात्र कथितपदत्वदोषः, "कथितस्य पदं पुनः ... अनुकम्पायां प्रसादने" इत्युक्तेः ।

राम। कथं प्रियवचना वक्षसि प्रसुप्तैव? [निर्वर्ण्य सस्नेहम्।](ल)—

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो? यदि परमसह्यस्तु विरहः॥ ३८॥

(ल) कथमिति।—प्रियं वचनं यस्याः सा प्रियवचना ["वा प्रियस्य" इति वार्त्तिकारम्भात्तेन पक्षे वचनप्रियेति रूपम्] मधुरभाषिणी, वक्षसि—उरसि, कथं—किं, प्रसुप्तैव—निद्रिताऽभूत्? परस्परं समाश्लिष्य करमुपधाय च शयितयोस्तयोः वक्षस्सम्पर्कात् रामवक्षसि सीतायाः शयनं तु "दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरञ्च यत्। शयनाधरपानादि नगराद्यवरोधनम्॥ स्नानानुलेपने चैभिः वर्जितं—" इति दर्पणोक्ताङ्कदोषनिरूपणे व्रीडाजनकशयननिषेधात् अत्र तदभावाच्च न विरुध्यते इति बोद्धव्यम्। सस्नेहं—सादरं सकरुणञ्चेत्यर्थः, निर्वर्ण्य—सीतामुखं निरीक्ष्य, आहेति शेषः।

न केवलमियं प्रियवचना, अपि तु मम निखिलार्थहेतुभूता सौभाग्यलक्ष्मीरपि चेति विशिष्य विवृणोति, इयमिति।—(अत्र "मम" इति अध्याहार्य्येण पदेन सर्वत्र अन्वयः कार्य्यः)। इयं—सीता, गेहे—गृहे, ("गृहं गेहोदवसितम्" इत्यमरः) तस्मिन्, लक्ष्मीः,—श्रीः, गृहसौभाग्यविधायिनी अधिदेवतेत्यर्थः। तथा नयनयोः,—नेत्रयोः अमृतवर्त्तिः,—अमृतानुस्यन्दिनी अञ्जनशलाका, त्वदर्शनदशायां चराचरमिदं शून्यं प्रत्यक्षीकुर्वतः नेत्ररोगेण रुग्णस्येव मे त्वमालोकेनैव अमृतवत् नयनानन्ददायिनीत्यर्थः। किमेतावत्पर्य्यन्तानुधावनेन? एतदीयं यत्किञ्चिदपि मे सुखातिरेकजनने पर्य्याप्तमित्याह, असावस्या इति।—असौ—अनुभूयमानः, अस्याः,—प्रियायाः, स्पर्शः, वपुषि—गात्रे, बहुलः,—प्रचुरः, चन्दनरसः—मलयजरससेकवत् विरहतापतप्तस्य मे निरतिशयं शरीरस्य मनसश्च स्निग्धतायाः निर्वृतेश्च कारकः। अयं—कण्ठे अर्पित इति शेषः, अस्याः बाहुः,—करः, शिशिरः शीतलश्च मसृणः उज्ज्वलश्च मौक्तिकसरः,—मुक्तामाला इव सुखस्पर्शः, कोमलत्वात् सुखशीतलत्वाच्च मौक्तिकस्रगिव शरीरसन्तर्पणः मानसामोदकरश्च [मौक्तिकविशेषणकर्म्मधारयात् सीताशरीरस्य सर्वोज्ज्वल्यं निरतिशयविरहानलप्रशमनञ्च व्यज्यते, तेनासौ श्यामा मुग्धा च ज्ञेया]। अस्याः,—

प्रतीहारी। [प्रविश्य।] देअ। उवत्थिदो। * (व)

* देव! उपस्थितः।

सीतायाः सम्बन्धि किं वस्तु न प्रेयः,—अतिप्रीतिकरम्? यदि—किन्तु परः—केवलम् असह्यः,—सोढुमशक्यः विरहः,—वियोगः न स्यात् तर्हि, सम्पन्निकृन्तनात् परमदुःसहात् त्वद्विप्रयोगादितरत् सर्वमेव त्वत्सङ्गत लोकातिशायिहर्षजनकं भवेत् नास्ति तत्र संशयलेशः इति तात्पर्यम्। [अस्मिन् श्लोके आभिमानिकी रतिः, इति कण्ठाभरणम्। अत्र सीतायाः लक्ष्मीत्वामृतवर्त्तित्वयोः अभेदारोपात् निरङ्गं रूपकम्, तथा तत्स्पर्शे चन्दनरसत्वारोपात् अपरं रूपकम्, एवं तद्भुजे मौक्तिकसरत्वारोपात् निरङ्गञ्च रूपकम्, अपि च एकस्या एव सीतायाः गृहलक्ष्मीत्वादिविषयभेदात् अनेकधोल्लेखात् उल्लेखः, चतुर्थपादे च विरहस्य असहनीयत्वेऽपि यथावलात् आहनने सहनत्वारोपेण सीतायाः सर्वविधप्रियत्वासम्बन्धेऽपि सम्भावनया तत्सम्बन्धोक्तेः अतिशयोक्तिश्च। एषामलङ्काराणां सजातीयविजातीयरूपः सङ्करः]। शिखरिणी वृत्तम्॥ ३८॥

(व) प्रतिहारीति।—प्रतिहारी युद्धान्तरक्षिका काचित् वेत्रवती नारी, तथा हि,—"सन्धिविग्रहसम्बद्धं नानाकार्यसमुत्थितम्। निवेदयति या कार्यं प्रतीहारी तु सा स्मृता॥" इति तल्लक्षणम्। प्रविश्य—राघवभवनमिति शेषः, आहेत्यध्याहार्य्यम्। किमिति तदेवोच्यते,—देव—राजन्, उपस्थितः,—आगत एव, कोऽयमागत इत्याकाङ्क्षायाम् उत्तरम्—"देवस्य आसन्नपरिचारको दूतः" इत्युपरिष्टात् व्यक्तीभविष्यति। [एतद्धि भाविविरहस्य समासन्नतासूचनाय उपन्यस्तम्। सीताविवासनरूपप्रस्तुतवृत्तान्तपर्य्यायक्षेपकमेतत् तृतीयं पताकास्थानमवधेयम्। तथा हि,—"इयं गेहे लक्ष्मीः" इति श्लोकस्य चतुर्थपादान्ते "परमसह्यस्तु विरहः" इत्युक्तं राघवेण, ततः प्रतिहार्य्या प्रोक्तं "देव उपस्थितः" इति, एतेन सीताविरहः भवन्तम् अचिरादेव उपस्थास्यति इति अन्यकार्य्यम् पर्य्यायक्षेपकं वस्तु, विशेषनिश्चयप्राप्तिसहितं सदैवाव प्रस्तुतार्थादितमन्वितम्। तथा चोक्तं दर्पणे—"पर्य्यायक्षेपकं यस्तु लीनं सविनयं भवेत्। श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते॥" इति। एवमेव वेण्याम्, तथा हि,—"... ,—'ददामसेव करमोरु। भवेतोरुयुगलम्' इति ततः प्रविश्य कञ्चुकी आह—'देव! भग्नं नालेन" इत्यादि, अपि च मुद्राराक्षसे यथा, चाणक्यः,—"अपि नाम दुरात्मा राक्षसः गृह्येत," सिद्धा—"अज्ज गहीदो"। अस्यार्थः—राक्षसः,—

राम। अयि। क. ?

प्रती। आसस्रपरिचारओ देवस्स दुम्मुहो। * (श)

राम। [स्वगतम्।] गुडान्तचारी दुर्मुख, स मया पौरजानपदान् अपसर्पितुं प्रयुक्त. । (प) [प्रकाशम्।] आगच्छतु।

[प्रतीहारी निष्क्रान्ता।]

दुर्मुख। [प्रविश्य स्वगतम्।] हा कध सीदादेईए ईदसं

---

* आसन्नपरिचारको देवस्य दुर्मुख ।

"तदपि नाम दुरात्मा चाणक्यवटु" इति, उपसृत्य दौवारिक —"जेदु जेदु"। पुनश्च राचस,—"अतिसन्धातु शक्य स्यात्," दौवारिक —"अमच्चो" इत्यादिना अव्यक्तायस्य, राक्षसवशीकरणरूपस्य चाणक्यविजयस्य च तथा वेण्या दुर्योधनस्योरु भङ्गरूपस्य, प्रस्तुतस्य सूचनात् तृतीय पताकास्थानमेव सुधीभि मृग्यम्। धनिकमते तु—उत्तरचरितमेतत् गण्डनामक प्रस्तावनाङ्ग वेदितव्यम्। प्रस्तुतस्य सीताविवासनस्य सम्बद्धतया विरहस्य सहसाऽभिधानात्। एतद्धि प्रस्तावनाङ्ग भूततयाऽभिहित मूलकृता धनञ्जयेन, तथा हि,—"गण्ड प्रस्तुतसम्बन्धि भिन्नार्थं सहसोदितम्" इति]।

(श) आसन्नो निकटस्थ सन् परिचरति सेवते इति आसन्नपरिचारक , य सदा सन्निधौ स्थित्वा उपसेवते तथाभूत भृत्य इत्यर्थ । अस्य चरस्य भद्रनामधेयत्वेऽपि सीताऽपवादरूपदुर्वचनस्याभिधानात् दुर्मुख इति सञ्ज्ञा लोकपरम्परया आगतेति ज्ञेयम् , कविना च तदाख्यया आख्यापितोऽसौ। तथा च रघौ कालिदास,—"पप्रच्छ भद्र विजितारिभद्र" इति।

(प) गुडान्ते अन्त पुरे परित निर्विशङ्क चरतीति। अतीव विश्वस्त इत्यर्थ । ("स्त्र्यागार भूभुजामन्त पुर स्यादवरोधनम्। शुद्धान्तश्चावरोधश्च" इत्यमर)। पुरे निवसन्तीति पौरा, जनपदे भवा जानपदा [पौराश्च जानपदाश्चेति द्वन्द्व] नागरिकान् जनपदवासिन वैदेशिकांश्चेत्यर्थ । अपसर्पितु—गूढ चरितु, चररूपेण प्रच्छन्नो भूत्वा तेषां मनोगतभाव परीक्षितुम् , अप पृष्ठत प्रच्छन्नमित्यर्थ सर्पतीति अपसर्प ,—गूढचर । ["उपसर्पितुम्" इति पाठान्तरम्]।

अचिन्तणिज्जं जणाववादं देवस्स कधइस्सं ? अहवा णिओओ क्खु ईरिसो मन्दभाअस्स । * (ख)

सीता । [उत्स्वप्नायते] हा अज्जउत्त ! कहिं सि ? † (ग)

राम । अये ! सैवेयं रणरणकदायिनी चित्रदर्शनाद् विरह-भावना देव्याः स्वप्नोद्वेगं करोति । [सस्नेहमङ्गमस्याः परामृशन् ।] (घ)—

---

* हा कथं सीतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि ? अथवा नियोगः खलु ईदृशो मन्दभागस्य ?

† हा आर्य्यपुत्त्र ! कुत्र असि ?

(ख) हा कथमित्यादि ।—हा इति शोकसूचकमव्ययम् । तादृशपरीवादस्य कथयिष्यमाणत्वात् शोकः । ईदृशम्—एवंविधमरुन्तुदमित्यर्थः । अचिन्तनीयं—कदापि मनसा चिन्तयितुमप्यशक्यम्, अतर्कितोपपन्नमिति यावत् । सीतादेव्याः,—जनकतनयासम्बन्धिनमित्यर्थः । जनापवादं—लोकापवादम् । देवस्य—रामभद्रस्य [सम्बन्धविवक्षया षष्ठी] । मन्दः अल्पः भागः भाग्यं यस्य तथाविधस्य, दुर्भगस्येत्यर्थः । ईदृशः,—एवंविधः, "निखिललोकमानसाभिप्रायं विदित्वा यथायथं मदन्तिके उपवर्णय" इत्येवंरूपः, नियोगः,—प्रभोः आदेशः खलु । साम्प्रतमायद्भवता प्रभुणा अप्रीतिकरं सज्जनालोकापवादप्रकाशकरणरूपे कार्य्ये नियोजनात् आत्मनः अतिमहत् दौर्भाग्यमावेदितमित्यवधेयम् ।

(ग) उत्स्वप्नायते इति ।—उद्भूतः विलापादिप्रयोजकः स्वप्नः निद्राऽवस्थायां विलापादिः यस्याः, यद्वा—उद्रेजकः स्वप्नः यस्याः सा, सा इव आचरति इति उत्स्वप्नायते, ["कर्त्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति सूत्रेण उपमानभूतात् क्यङि लटि रूपम् । यद्वा—अनुत्स्वप्ना उत्स्वप्ना भवति इति च्व्यर्थे भृशादित्वात् क्यङि लटि रूपं बोध्यम्] । हा आर्य्यपुत्त्र !—स्वामिन् ! कुत्र असि—इदानीं क्व गतो भवसि, इति भविष्यद्विरहनिवेदकः स्वप्नप्रकारः अवधेयः ।—"स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः । कोपावेगभयग्लानिसुखदुःखादिकारकः ॥" इति दर्पणे लक्षणम् ।

(घ) अये इत्यादि ।—रणरणकदायिनी—दैन्यम् उत्कण्ठिकाकुलतां विदधती [illegible] । विरहस्य भविष्यतः विप्रयोगस्य भावना नियतानु-

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्य्यो रसः।

ध्यानरूपानुभवजनित स्मृतिजनक उद्बोधकसमवहितसंस्कारविशेष, चित्रदर्शनात् अशुभोत्पादनिदानभूताया सूपणखाया आलस्यमवलोक्य जायमाना इत्यर्थ, तथा सीताया स्वप्नावेग स्वप्न अपि उत्कण्ठा तज्जनितविलापादिकञ्च करोति—समुत्पादयतीत्यर्थ। सस्नेह—सप्रणय सानुरागमित्यर्थ, अस्या वैदेह्या अङ्ग—प्रतीक, परामृशन्—स्वहस्तेन सदयमुपसंवमान इत्यर्थ, सीताया अङ्गे स्व हस्तं सन्निवेशयन्निति यावत्। [केचित्त्वाङ्गपदमुदरपरमभिधाय वक्ष्यमाणश्लोकस्यापत्यायकत्व कल्पयन्ति, तदसत्, तथात्वे "उदरमस्या परामृशन्" इत्येव वक्तव्यत्वात्, न च "मय्यैवाद्यो जात करतलपरामर्शकलया द्विधा गर्भग्रन्थि" इति वक्ष्यमाणोक्तेरसङ्गत तयाऽङ्गपदस्योदरपरत्व कवेरभिमतमिति वाच्यम्, "सहजलज्जाजडस्य" इत्यत्र सीतायाः जागरणप्रतीते उत्स्वप्नायमानत्वविरोधादित्यवधेयम्]।

अथ चिरविरहविह्वलाया नियतपरिदेवनाविवशमानसाया मदेकजीविताया कातराक्ष्या प्रियाया वनवासे एवमेव कियन्ति सकरुणरुदितानि आसन्नित्यनुध्यायन् सस्नेहस्तावमर्षं तदीयमङ्गजातं, स्वीयानुपमसौभाग्यमित्याशंसन् तादृश्याय स्त्रिया गुणोपवर्णनं विलप्य बहुधाऽधुना तस्या दुःखसन्तापादीन् स्मारं स्मारम् अनुशोचति, अद्वैतमिति।—यत्र प्रेम—अहैतुकी अनुरक्ति, अथवा सर्वविधसम्भोगान्तर्गतविच्छेदाऽसहनरूपावस्थाविशेष, तथा च—"प्रेमाऽभिलाषो रागश्च स्नेह प्रेम रतिस्तथा। शृङ्गारश्चेति सम्भोग सप्तावस्थ प्रकीर्त्तित॥" इति। तस्यार्थो यथा रसरत्नाकरे—"प्रेमा दृष्ट्वा रम्येषु तांश्चन्नाऽप्यभिलाषक। रागस्तत्सङ्गबुद्धि स्यात् स्नेहस्तत्प्रवणक्रिया॥ तद्वियोगासह प्रेम रतिस्तत्सहवर्त्तनम्। शृङ्गारस्तत्सम क्रीडा सम्भोग सप्तधा क्रम॥" इति। ["भद्रं तस्य सुमानुषस्य" इति पाठे तु—यत् गुणवत्त्वाख्यारूपमनिर्वचनीय वस्तु]। सुखदुःखयो, पत्युरिति शेष, द्विधा इत द्वीतं भिन्नमित्यर्थ, तस्य भाव द्वैत भिन्नभाव तन्नास्ति यस्य तत् अद्वैतम्—एकरूप समान, पत्या सम सममुखदुःखभागित्यर्थ, यत्र सर्वासु अवस्थासु दशाविपर्य्ययेषु सुखेषु दुःखेषु चेत्यर्थ, अनुगुणम्—अनुकूलं, न च सुखेषु अनुकूलं दुःखेषु च प्रतिकूलमिति भाव, यत्र—यस्मिन् हृदयस्य—विषयार्ज्जनपरिरक्षणविनश्वरादिदुःखसन्तप्तस्येत्यर्थ, विश्राम,—जीवितावलम्बनभूतं, यदेव हि एकमवलम्ब्य संसारसुलभशोकक्षोभाद्युप

कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितम्
भद्रं प्रेम सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ॥ ३९ ॥

एतमपि वैक्लव्यदोलाचल हृदय स्थैर्य्यमापद्यते, विषयजशोकसन्तप्त मन सदैव यत् लब्ध्वा भग्न हृष्यति इति भाव , ["विश्राम" इति पदन्तु अपाणिनीयम् , घञि "नोदात्तोपदेशस्य" (७।३।३४ पा०) इति सूत्रेण वृद्धिनिषेधात्, किन्तु, श्रम एव श्राम इति "प्रज्ञादिभ्यश्च" (५।४।३८ पा०) इति सूत्रेण अणि कथञ्चित् योज्यम् इति केचित् , केचित् तु अदन्तचुरादे श्रामधातो रूपमिति व्याचक्षते समादधति च , परन्तु वोपदेवाचार्य्यमते "जनवध" इत्यादिसूत्रे "श्रम-उम विश्रमन्तु वा" इति ह्रस्वस्य वैकल्पिकविधानदर्शनात् श्रमधातो. घञि विश्रम विश्राम इति रूपद्वय भवतीति भाव्यम्]। यस्मिन् रस ,—अनुराग रतिरूप इत्यथ , ("रसो गन्धे रस स्वादे तिक्तादौ विषरागयो" इति विश्व ।) जरसा—वार्द्धकेन, अहार्य्य ,—हर्त्तुमशक्य , कूट इव अविकृत सन्, य सदैवास्ते इत्यर्थ , वार्द्धके हि प्रायश सर्वा एव इन्द्रिय प्रतिहता भवन्ति, सतीषु भार्य्यासु सुगभीरोऽकपटश्च अनुराग पुन न नश्यतीति भाव । तत्र तस्य अकृत्रिमत्वादस्वार्थकत्वाच्च वयसि इव विपुला प्रीति नितरा निर्भरमभिवर्द्धते इत्याशय । तथा कालेन—कियता समयेन जनसमीपे नियतपरिचयविस्तारेणेत्यथ , आवरणस्य हृदावरणरूपप्रति-बन्धकस्य लज्जादे अत्ययादपगमात , यद्वा—"आ वरणात्ययात्" इति पदद्वयम्। तत्र वरण विवाह , अत्यय निधनं, तत आ, तत्कालपर्य्यन्तावस्थायिना, विवाह कालात प्रभृति मरण यावत् स्थितवता, सुदीर्घेण कालेन , परिणते—परिपाक मुपेयुषि, स्नेह एव सार. स्थिरांश यत्र ("सारो बले स्थिरांशे च न्याय्ये क्लीव वरे त्रिषु" इत्यमर) तस्मिन्, स्नेहस्योत्कृष्टांशे, प्रगाढे अनुरागे इति भाव, यत् स्थित, हृदकपटप्रणयरूप फल सारभततया, असारव्यपगमात्, निश्चल सदैव वर्त्तते इत्यर्थ यथा हि दुग्धादेर्जलाशापगमात परिणते घनीभते हि स्नेहसारे नवनीत [illegible] स्यात तदन्तर्ज्ञानादीचारिरपगमात पर परिणतस्नेहसारे रूपान्तरिते [illegible] यद वस्त अविचलित सत स्थितमित्यर्थ , सुमानुषस्य शोभनस्य नरस्य [illegible] एकम अविच्छिन्न तत्—मन कल्पित निष्पन्नरूपमित्यर्थ , केवल प्रणय-[illegible] भद्र—मङ्गलम, असत्प्रेमनत ('श्व श्रेयस शिव भद्र कल्याण मङ्गल [illegible]" इत्यमर) कथमपि—कथञ्चिदपि महता योगेन काकतालीय-

न्यायेन वा प्राप्यते। अपि अशक्यसम्भावनायां, हि निश्चये। निर्दोषस्य परम परिपूतस्यापि सुमानुषस्य निष्प्रत्यूहशुभसङ्घटनमतीव दुर्घटम्। यत क्वचित कस्यचिज्जनस्य जाया जन्मान्तरीणमहातप फलभूता निरवच्छिन्नानन्दविधायिनी भवति, स्वयञ्च निरतिशय सुखमुपभुङ्क्ते, आवयोस्तु तत दूरापास्तमेव यत सीतादेवी जननात् प्रभृति एव सुखलेशमपि नान्वभुङ्क्त, इत्येतदेव, आस्ता तावत मदीया कथा न भृश व्यथाकरमिति हृदयम्। दुर्लभ खलु दम्पत्यो तथाविध प्रेम प्रायश इति तु सङ्क्षेप। सुष्ठूक्त कविना,—"अवाप्यते वा कथमन्यया द्वय तथाविध प्रेम पतिश्च तादृश।" इति।

अन्यथाऽपि व्याख्यायते,—तथा हि, यत प्रेम दाम्पत्य सर्वासु अवस्थासु जाग्रत स्वप्नसुषुप्तिप्रभृतिषु ये अनुभूयमाने सुखदु खे तयो अद्वैतम् अभिन्न सदैवानुगुणम् अनुगतम्, अभिन्नतया सुखदु खयोरापादकमिति यावत। यत्र च दाम्पत्यप्रेम्णि हृदयस्य सदुपदेशविशोधितस्य परिपूतस्य इत्यर्थ, विश्राम श्रमहरसुखसमुदायानुभव, यस्मिन् दाम्पत्ये प्रेम्णि च रस स्पृहारूप रतिश्च वा जरसा जरया च अहार्य्य हर्त्तुमशक्य। अथवा यस्मिन् दाम्पत्ये सति रस आह्लाद जरसाऽपि अहार्य्य हर्त्त न शक्यते, आ वरणात्ययात्, [वरण विवाह अत्यय देहपातश्चेति समाहार] विवाहात् प्रभृति निधन यावत वर्त्तमानेन कालेन सुदीर्घाखण्डकालेन परिणते उप चय गते प्रेमसारे सारभूते प्रेमणि स्थितम्, अविनश्वर सदिव परा कोटिमासाद्य विवृद्धि गतमिति यावत, सुमानुषस्य दाम्पत्यस्य ["सुमानुष तु दाम्पत्यम्" इत्यभि धानात् इति प्राञ्च, अन्ये तु प्रकरणात तच्छब्देन दाम्पत्ये लब्धे शोभन मानुषो येन इति विग्रहेण मनुष्यत्वाधायकम् इत्यर्थो लभ्यते, इति वदन्ति, सुमानुषस्य सौजन्यस्य इत्यपि केचित् व्याचक्षते। वस्तुतस्तु, सुमानुषमात्रसुलभस्येत्यर्थ, फल बलात् अत दाम्पत्यस्येति।] कथमपि सर्वप्रकारेणापि तत् प्रसिद्धमेक मुख्य भद्र क्षेम प्रेम प्राप्यते प्रार्थ्यते, अभिलष्यते इति यावत्। अनयशङ्कीनि बन्धुमित्रहृदयानि इति न्यायादिति भाव। यतो हि सुमानुषस्य भद्रं सर्वतोभावेनाकाङ्क्षणीयम् अभूत इति पूर्वेणान्वय इति। (अत्र नायक अनुकूल एकनायिकत्व)।

[अत्र प्रस्तुतायाः सीतायाः इति वक्तव्ये "सुमानुषस्य" इति कथनात् अप्रस्तुत प्रशसा अलङ्कार, स च, चतुर्थपादं प्रति हेतुत्वेनोपेताना पादत्रयाणा वाक्यभूताना निष्पादकत्वात् समुद्भूतेन काव्यलिङ्गेन सङ्कीर्यते]। शार्दूलविक्रीडित वृत्तम्।— "सूर्य्याश्वैर्मसजस्तता सगुरव शार्दूलविक्रीडितम्" इति लक्षणात्। एकोनविंशत्यक्षर पादच्छन्दसां १४९३३७तमप्रस्तारान्तर्गत वृत्तमिदम्॥ ३९॥

दुर्मुख। [उपसृत्य।] जअदि जअदि देओ। *

राम। ब्रूहि यदुपलब्धम्। (ख)

दुर्मुख। उवत्थुअन्ति देअ पोरजाणवदा,—विसुमरिदा अह्मे महाराअ-दसरहस्स रामदेवेण त्ति। † (ग)

राम। अर्थवाद एष, दोषन्तु मे कञ्चित् कथय, येन स प्रतिविधीयते। (घ)

दुर्मुख। [सास्रम्।] सुणादु देओ। ‡ [कर्णे एवमेवम्]। (ङ)

---

* जयति जयति देव।

† उपस्तुवन्ति देव पौरजानपदा विस्मारिता वयं महाराजदशरथस्य रामदेवेनेति।

‡ शृणोतु देव।

(ख) ब्रूहीति।—ब्रूहि—कथय, यत् उपलब्धं—प्राप्तं—ज्ञातमिति यावत्।

(ग) उपस्तुवन्तीति।—उपस्तुवन्ति—सर्वतो गायन्ति, महाराजस्य रामस्य शासन-गुणमहिम्ना वयं महाराजे दशरथेऽपि मन्दीकृतस्मृतयो जाता इति अनिशमेवावेदयन्ति इत्यर्थः। गुणाधिकस्य द्रव्यस्य लाभे, अपकृष्टस्य विस्मृतिः स्वाभाविकी। अत,—"फलेन सहकारस्य पुष्पोद्गम इव प्रजाः" इति सूक्तं कविना। [महाराजदशरथस्येति।—"अधीगर्थदयेशां कर्मणि" (२।३।५२ पा०) इति सूत्रेण कर्मणि षष्ठी]। रामदेवेन—देवतुल्यप्रभावशालिना रामभद्रेणेत्यर्थः।

(घ) अर्थवाद इति।—कस्यचिदर्थस्य निन्दायाः स्तुतेर्वा यो वादः सोऽर्थवादः। यदाहुः मीमांसकाः,—"गुणवादो विरोधे स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥" इति। अत्र तु स्तुत्यर्थवादः गुणकथनमित्यर्थः, प्रशंसा इति यावत्। ("अर्थवादः प्रशंसा च श्लाघा स्तुतिर्नुतिः" इति हलायुधः)। एषः—भवदुक्तरूपः। प्रतिविधीयते—प्रतिक्रियते। अस्माकमश्रुतौ गुणवादस्तु न कार्यः, वयं हि वयं दोषाणां समूलमेव निहन्तारः इत्याशयः।

(ङ) सास्रमिति।—सास्रं—सकरुणं बाष्पमुत्सृज्येत्यर्थः। शृणोतु देव,—महाराज रामचन्द्रः, किं तत्? तदेव कविरभिधत्ते,—"कर्णे एवमेवम" इति, ["एवम् इव" इति पाठे तु ... इति विभाव्यम्] यतो हि महतामपवादश्रवणस्य ... इति तस्यापि पापभाक्तया श्रोतुमयोग्यत्वेन कर्णे "एव

राम। अहह। तीव्रसवेगो वाग्वज्रः। (च) [इति मूर्च्छति।]
दुर्मुख। आस्सदु देवो।*

* आश्वसितु देव।

मिव" इत्युक्तम्। तथा हि प्राह,—"यथन्येकेन विशेष प्रयाजशाला प्रसङ्गत। कर्णे एवमिवेत्युक्ता काव्यवन्धे प्रयुज्यते॥" इति। रामभद्रप्रतिमविरे स्वमुत्र मस्थाप्य जना किल कर्णाकर्णिकतया एवमभिदधति,—अस्माकमधिराज एव स्वैण यत् दशाननोटवसितनिवासदूषितामपि सीता निर्विशङ्कमनुमेने सर्वथवा न्याय्य कापुरुषोचित दुष्करमेवैतत् किल, यतो हि अस्माकमपि स्त्रीषु नियतमेव एतदापतिष्यति, राज्ञामप्येतदनुमतत्वेन तदप्यस्माभिर्निर्बाध सहिष्यते, इत्यपसर्पो दुर्मुख राघवाय निभृतमभिदधे। तथा हि, रामायणे, विपञ्चाशे सर्गे उत्तर-काण्डम्—

"कीदृश हृदये तस्य सीतासम्भोगज सुखम्।
अङ्कमारोप्य तु पुरा रावणेन बलाद्धृताम्॥
लङ्कामपि पुरीं नीतामशोकवनिका गताम्।
रक्षसां वशमापन्ना कथ रामो न कुत्स्यति॥
अस्माकमपि दारेषु सहनीयं भविष्यति।
यथा हि कुरुते राजा प्रजा तमनुवर्त्तते॥
एवं बहुविधा वाचो वदन्ति पुरवासिन।
नगरेषु च सर्वेषु राजन्। जनपदेषु च॥" इति।

(च) अहह इति।—दुर्विषहवेदनासहितशोकसूचकमेतदव्ययम्। तीव्रसवेग,—तीव्र भीषण मर्माभिदित्यर्थ, सवेग पतनकालसमुत्पन्न असहनीयाभिघात यस्य तथाविध, वाग्वज्र,—वाग् नीचाना सदसद्विचाररहिताना वा वचन वज्र दम्भोलिरिव दु खातिदु खदायिका खलु, सीतायाः साधुचरिते यत् ते एवमन्याय्य माशंसन्ते, अतस्तेषां वचांसि शतकोटिरिव न मानस शतधा दारयन्तीति भाव। [अत्र रूपकालङ्कार। "ह्रादिनी वज्रमस्त्री स्यात कुलिश भिदुर पवि" इत्यमर-वाक्यव्याख्याने "वज्रम् अस्त्री स्यात्" इति केचित् पठन्ति, केचित् तु "विरुग्णो दयधाराय कुलिशो मम वक्षसि" इति भट्टौ कुलिशशब्दस्य पुलिङ्गतां दृष्ट्वा 'ह्रादिनी वज्रम्," "अस्त्री स्यात् कुलिशम्" इत्यन्वय कुर्वन्ति। तदत्र वज्रशब्दस्य पुलिङ्गता कथं सङ्गच्छते?—इति प्रश्ने—"वज्रोऽस्त्री हीरके पवौ" इति नानार्थे

राम। [आश्वस्य।]—

हा हा धिक् परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः।
एतत् तत् पुनरपि दैवदुर्विपाकात्
आलर्कं विषमिव सर्वतः प्रसृतम् ॥ ॥ ४० ॥

अमरवाक्यात्, एवञ्च वज्रशब्दस्य पुनपुंसकताया सिद्धायामपि पुंसि तत्प्रयोगाभावात् "भाति पद्मः सरोवरे" इत्यादिवत् अप्रयुक्तत्व दोष एव]। इति मूर्च्छति।—तच्छोकसवेग सोढुमशक्यत्वात सपदि मोहमुपागत इति भाव।

अथ कथञ्चित चरस्योपचारै सुतीव्रे शोकावेगे उपशमिते, ईषदाश्वस्य राघव भस्मीभूतस्यापि तदपवादबीजस्य दुर्दैवविपाकवशादेव पुन प्ररोहमाशङ्कमान निर्भरमनुशोचति, हा हेति।—अद्भुतै,—आश्चर्यकरै लोकाना विस्मयावहै अग्निपरीक्षारूपै कर्मभि, वैदेह्या,—सीताया, यत् परस्य शत्रो रावणस्य गृहे भवने अशोकवनिकायां, वास दश मासान् व्याप्य अवास्थिति एव दूषण दोष अपवाद इत्यर्थ प्रशमित—परिहृत प्रतिकृतमपि, असहायाया जानक्या शत्रुसदनवासजनित यदेव कौलीनबीजमाविरभूत् तत्तु वह्निपरीक्षया चारित्र्यविशुद्धि परीक्षमाणेन मया सर्वथा भस्मीकृतमपीत्यर्थ, तदेतत दैवस्य—दुरदृष्टस्य, दुर्विपाकात्,—विषमपरिणामात, दशाविपर्यासादेतो इति यावत। अलर्क,—मत्तकुक्कुर ("शुनको भषक श्वा स्यादलर्कस्तु स रोगित " इत्यमर) तस्येदमालर्कं विषमिव—मत्तकुक्कुरदंशजातगरलमिवेत्यर्थ यद्वा,—शुक्लार्कवृक्षजन्य ("शुक्लेऽलर्कप्रतापसौ" इत्यमर) पुनरपि— नवीकृत्य सर्वत प्रसृत—परित व्याप्तम्। हा हा—अहो अतीव क्षोभप्रदमतत् [हा इति खेदसूचकमव्ययम्। दैन्ये द्विरुक्ति]। धिक्, मामधन्यमिति शेष। यथा हि कदाचित्कस्यचिच्छरीरप्रविष्ट दुष्कुक्कुरविष मन्त्रादिदेवोपायैः प्रतिकृतमपि पुनरलक्षितरूपेण सर्वाङ्गेषु व्याप्त सत दौर्भाग्यवशात बहुकालानन्तर घोरविकाररूपेण आविर्भवति तद्वदिद वैदेहीगत परगृहवासदूषणमग्निपरीक्षाऽऽदिना प्रतिकृतमपि पुन सर्वाङ्गेषु कालान्तरेण नवत प्रसृत तदधुना सर्वदैवेदमप्रतिविधेय जातमिति भाव। [कामदानामित पर वक्तव्यानि मन्दभाग्य, दैवमचिन्त्य बलवदिति नाटकान्तर। [अत्र उपमाऽलङ्कार स्फुट। स च यथा हि मूलदोषाभावात् ... दुरपनेय सत्पथ बनवह्नि घनामय समन्तात् व्याप्नुवन्ति, तथा ... न नष्ट दारितोऽपि सीताऽपवादोऽद्य पुन प्रादुर्भूय दीर्घजानपदान्

तत् किमत्र मन्दभाग्यः करोमि? [विमृश्य सकरुणम्।] अथवा किमन्यत्? (छ)—

सतां केनापि कार्य्येण लोकस्याराधनं व्रतम्।
यत् पूरितं हि तातेन माञ्च प्राणांश्च मुञ्चता॥ ४१॥

समस्तानेव व्यानशे, अहो किं करवाणि? इति वस्तुध्वनिं व्यनक्ति]। प्रहर्षिणी वृत्तम्, तल्लक्षणादिकमुक्तं प्राक्॥ ४०॥

(छ) तदित्यादि।—तत् तस्मात् लोकापवादस्य सर्वत्र प्रसृतत्वादित्यर्थ, मन्दभाग्य,—हतभागधेय, लोकाननुरञ्जयितुं स्वगृहाधिदेवताभूताया अपि सीताया विसर्जने हेतुत्वादात्मन दुर्भगत्वमुक्तम्। अत्र—एतयो प्राणाधिकसीताविवासन दारुणलोकापवादरूपयो मध्ये, किं करोमि—अन्यत लोकसन्तोषणात् किं विदधामि? प्राणेभ्य गरीयसीमपि सीतात्यजामीति हृदयम्।

सकरुणं निर्भरं विलप्य बहुधा सीताया परीवादचालनोपाय कमपि चेतसा निश्चेतुमशक्नुवन् लोकानुरञ्जनस्य स्वकुलधर्मत्वेनावश्यपरिपालनीयत्वं समीक्ष्य सीताविवासनेन तद्दोषं परिमार्ष्टुमिच्छति, सतामिति।—केनापि कार्य्येण—येन केनापि उपायेन, निरपराधाया अपि सीताया निर्वासनेनेत्यर्थ, लोकस्य—लोकानामित्यर्थ, [जातावेकवचनम्] प्रकृतिपुञ्जानाम्, आराधन—प्रीणन, सता—सज्जनाना, व्रत—नियमवत अवश्यमेव पालनीयम्। तदेव द्रढयति, यदिति।—यद्धि—यदेव लोकानुराधनरूप कुलव्रत, पुन, तातेन—पित्रा दशरथेन, मा—प्राणसम्मितं तनय, प्राणान्—स्वजीवनञ्च मुञ्चता—विजहता सता, ["लक्षणहेत्वो क्रियाया" (३।२।१२६ पा०) इति पूरणक्रियाया हेतुत्वात् हेतौ शतृ]। पूरितं—परिपूर्णं कृत ["पूजितम्" इति पाठे तु—पूजित सत्कृत्य सयत्न परिपालितमित्यर्थ। चकारद्वयोपादानात् कार्य्यकारणयोरेककालिकत्व सूच्यते, अत एव व्रतरूपकारणस्य मद्वनवास स्वजीवनविसर्ज्जनरूपकार्य्यणाभेदेनाभिधानात् हेतुत्वं द्वारेऽपि ध्वन्यते] कैकयीं प्रीणयितुमनपराद्धं मां वनाय स्वप्राणान् चिराय विजहत् पिता दशरथ कुलधर्म्मानुपालनस्य परां काष्ठा प्रदर्शितवान्, तथा अहमपि निरपराधां दुर्वहगर्भगुर्व्वीं सीतां वने विसृजामि। इदानीं करुणां हृदयाभ्यन्तरात् दूरीकृत्य मानसमश्ममारवत् सुदृढ करणीयम्, अन्यथा लोकानुरञ्जनस्यासम्भावितत्वादित्याशय। यतो हि भगवता वशिष्ठेन इदानीमेव, "जामातृयज्ञेन वयं निरुद्धास्त्वं बाल

सम्प्रत्येव भगवता वशिष्ठेन सन्दिष्टम् ।

अपिच ।—यत् सावित्रैर्दीपितं भूमिपालैः
लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त ! धिङ्मामधन्यम् ॥ ४२ ॥

एवासि नवञ्च राज्यम्' इत्यादिना कुलधर्ममनुपालयितुमभीक्ष्णमेवोपदिष्टम्, अत सीतापरित्याग मया सर्वथा कर्त्तव्य इति तु सन्दर्भार्थ । [अत्र सता केनाप्युपायेन प्रकृतिरञ्जनं करणीयमिति सामान्येनाऽप्रस्तुतेन मया येन केनापि तत करणीयमेवेति विशेषावगतिरप्रस्तुतप्रशंसाऽलङ्कार , मया जनरञ्जनं करणीयमित्यस्य पुत्र-जीवितयोरत्यागेनापि पितृकर्त्तृकजनरञ्जनकृतत्वरूपसकारणेन समर्थनादर्थान्तरन्यासालङ्कारश्च तथा मोचनक्रियाऽभिसम्बद्धयो प्रस्तुतयो नाद्य प्राणाश्चेत्यनयो [illegible]भावेन तुल्ययोगितया सङ्कीर्णा] । अनुष्टुप् वृत्तम् ॥ ४१ ॥

अथ [illegible] दौभाग्य [illegible] दुग्धसिन्धुवत् सुविशालेऽतिधवले वैव-स्वते कुले [illegible] कलङ्कमाकलयति, यदिति ।—सविता सूर्य , ("भानुर्हंस [illegible] सविता रवि ' इत्यमर) तस्य गोत्रापत्ये ["तस्यापत्यम्" (४।१।९२ पा०) इति सूत्रेण [illegible]] सूर्यवंशीयैरित्यर्थ । लोकश्रेष्ठै ,—लोकेषु भुवनेषु [illegible] वा श्रेष्ठै प्रख्यातै भूमिपालै ,—क्षत्रधर्मे भूमिपरिपालनं प्राधान्येनापि कुर्व-द्भिरित्यर्थ यत्—सा [illegible], निरपवादमिति यावत, शुद्ध—सर्वथा दोषसम्पर्करहित, [illegible] यावत, चरित्र—प्रजाऽनुरञ्जनादिकार्यजात कुलमिवेत्यर्थ , दीपितम्—उज्ज्वलीकृत सर्वात्कृष्टतामापादितम् इति भाव । तदिदानी किम्भूत, तदेवाह, [illegible]ति ।—अस्मिन—एतस्मिन् एव महनीये कुले, मत्सम्बन्धात्—हतदैवस्य मम सम्पर्कात कश्मला—मलिना, किंवदन्ती—लोकवाद स्यात् भवेत चेत्, तदा हन्त [illegible]—[illegible] मा—धिक् , एतादृशि अस्मिन् कुले कालुष्यमारोपयत [illegible] प्रत्यत [illegible], किमित पर [illegible] [illegible] । [illegible] तु कश्मलाया किंवदन्त्या कथञ्चिदपि [illegible] [illegible] सीताविवासनमिदानीं विधेयमेवेति [illegible] । [एतेन [illegible] किंवदन्तीभिरुद्दीपनविभावै विलापादिभिरनुभावै विषाद [illegible] परिपुष्टता गत शोकरूपस्थायिभाव करुणरसता

हा देवि। देवयजनसम्भवे। हा स्वजन्मानुग्रहपवित्रीकृतवसुन्धरे। हा जनकवंशनन्दिनि। हा पावकवशिष्ठारुन्धतीप्रशस्तशीलशालिनि। हा रामैकजीविते। हा महाऽरण्यवासप्रियसखि। हा तातप्रिये। हा स्तोकप्रियवादिनि। कथमेवंविधायाः तव अयमीदृशः परिणामः ? (ज)—

भजते। अत्र प्रसिद्धे भूमिपालैः महनीयैः कर्मभिः उद्दीपिते अथ अन्येन स्वेन च सीतावनवासरूपातिजुगुप्सितकर्मणा कौलीनारोपणात् दूषिते सवितुरेकस्मिन् वंशे पूतत्वकल्मषत्वयोरन्योऽन्यविरुद्धधर्मयोः सङ्घटनात् विषमालङ्कारः]॥ ४२॥

(ज) सीताविवासनस्यावश्यकर्त्तव्यत्वेनेदानीं निश्चयात् भृशमभिवर्द्धमाने अनुशोचनावहुले तद्गुणानां निरतमनुध्यानादिभिः शतधा उद्वेलस्य शोकावेगस्य प्रसारं नाहुमशक्नुवन् रोरुद्यमानः मुहुः विलपति, हा देवीति।—हा देवि।—द्युतिमति। रामस्य हतदैवस्य निखिलशुभाकरभूते। इत्यर्थः, यद्वा—पूतचरित्रत्वात् देवीति सम्बोधनम्, अथवा "देवी कृताभिषेकायाम्" इत्यमरोक्तेः मया सह अभिषिक्ता भूत्वाऽपि मम राजसुखोपभोगं भवत्यास्तु वनवासदुःखम्, इति मत्वा देवीति सम्बोधनम्। देवेति।—देवाः इन्द्रादयः इज्यन्ते अस्मिन् इति देवयजनं यज्ञभूमिः पृथिवीत्यर्थः, सा एव सम्भवः उत्पत्तिस्थानं यस्याः तथाभूते। शुक्रशोणितदोषविनिर्मुक्तत्वात् जननादिदोषलेशरहिते। इत्यर्थः। स्वजन्मेति।—स्वस्याः आत्मनः जन्म सीतारूपेण शरीरपरिग्रह एवानुग्रहः दया तेन पवित्रीकृता महत्त्वमापादिता वसुन्धरा भूमिः यया तथाविधे। स्वजन्मस्वीकारानुग्रहपूतीकृतभूमिमण्डले। जनकेति।—जनकवंशस्य तन्नामराजपः कुलस्य, अथच जनक एव जनकः तातः इत्यर्थः। [अत एव श्लिष्टरूपकालङ्कारः]। नन्दिनि। आनन्दवर्द्धयित्रि। त्वदभावे इदानीं तत्कुलं निरानन्दमेव भवेदित्यर्थः, पावकेति।—पावकस्य सर्वदेवमयस्य अनलस्य, वशिष्ठस्य ब्रह्मर्षेः अस्मद्गुरोः, अरुन्धत्याः सतीनां ललामभूतायाश्च, यत् प्रशस्तं प्रशंसनीयं शीलं स्वभावः इत्यर्थः, अथवा तैः वशिष्ठादिभिः प्रशस्तं प्रशंसितं कालुष्यनिर्मुक्तमिति यावत् यत् शीलं वृत्तादिकं तेन। शालते इति शालिनि। परिशोभिते। अतीव पवित्रचरिते।। अतः त्वं परमपतिव्रतेति नान्यत्र संशयः इति भावः। [अत एव उदात्तालङ्कारध्वनिः] रामैकेति।—रामस्य ममेत्यर्थः एकं स्वयं जीवितं जीवनं तत्स्वरूपे। त्वया विना रामः क्षणमपि न जीविष्यति, इति

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तय।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ॥ ४३ ॥

भाव। तथा चोक्तम्।—"यस्या देव्या मनस्तस्मिंस्तस्य चास्या प्रतिष्ठितम्। तेनैव स च धन्यात्मा मुहूर्त्तमपि जीवति॥" इति। पक्षान्तरे—राम एव एकमद्वितीय जीवितं यस्याः तथाभूते। रामगतप्राणे। [उभयत्र रूपकम्]। महारण्येति।— महारण्ये दण्डकारण्ये तस्मिन् यो वासः वसतिः तत्र प्रियसखि। मिथः सम्भाषणादौ प्रीतिविवर्द्धिनि। सर्वेषामपि वनवासशोककातराणां हितमधुरभाषणादिना समूलमुन्मूलनात् "समप्राणः सखा मतः" इत्युक्तेः महानन्दविधायिनि। इत्यर्थः। तातेति।—ताताना दशरथादीनां प्रिये। प्रीतिविधायिनि। [अतस्तव परित्यागेन स्वस्य पितुरप्यहं क्लेशकारको भविष्यामीति भावः व्यज्यते]। स्तोकेति।— स्तोकम् अल्पञ्च प्रियं वदितुं शीलं यस्याः तथाभूते। मितमधुरवादिनि। एवंविधायाः —ईदृग्गुणगणोपेतायाः, तव विशुद्धसत्त्वस्वभावसम्पन्नायाः अग्निपरिशुद्धायाः [गर्भस्थितपवित्ररघुकुलाङ्कुरायाः अपि इति व्यज्यते] कथ—केन हेतुना, कस्य विषमस्य जन्मान्तरीयकर्मणः दुर्विपाकवशात् इत्यर्थः। ईदृश,—शाकुनिके श्वापदेभ्य विशिष्टस्यापि परिणाम,—दशाविपर्य्ययः ? भवति इति शेषः। आदर्शपूतचरितायाः असाधारणगुणगानविभूषितायाः ते ईदृशोऽननुरूपः परिणामः अतीव मर्मनिकृन्तनः इति तात्पर्य्यम्। [अत्र समुदायवाक्ये तु एतेषामेव प्रकृतार्थपरिपोषणाभिप्रायेण प्रयुक्तानां विशेषणपदानां साभिप्रायकतया परिकरालङ्कारः।—"उक्तिर्विशेषणैः साभिप्राये परिकरो मतः" इति लक्षणात्]।

सतां स्वभावपरिपूतानां दैवदुर्विपाकवशात् समापतन्तः दशाविपर्य्ययाः सर्वथा हि चेतसामुन्मादकाः भवन्तीति विभाव्य दैवस्याचिन्तनीयप्रसरत्वमभिधत्ते, त्वयेति।— त्वया—सतीनामग्रण्या, पूतचरितयेति यावत्, जगन्ति—त्रिलोकीलोकाः, पुण्यानि —["पूञो यत् णुक् ह्रस्वश्च" (उणा० ५।१५) इति। पुण्य—पवित्रता, तत्कर्म्मकारित्वात् अच्। अत एव अमरः, "—पुण्यं त्रिषु द्रव्ये पापपुण्यसुखादि च" इति।] पवित्राणि, त्वमनुदेति शेषः। जनानामुपजीव्यविरोधमाशङ्कते त्वयीति।—त्वयि—भवत्या, जनोक्तय,—लोकवचनानि अपुण्याः,—अपवित्राः श्मशान एतानि निन्दावचनानि इत्थं लङ्कामध्युषिता सीता दुर्वृत्तदशाननेन नूनं दूषिता इत्येवंविधाः इत्युक्ताः अकीर्त्तिकराः अपुण्यजनकाः कथं हि आविर्भूताः। अत एव लोकाः नाथ त्वत्र ममापि गृहाधिदैवताभूततात् नाथवन्तः भवन्ति,

[दुर्मुखं प्रति ।] दुर्मुख ! ब्रूहि लक्ष्मणम्,—एष ते नूतनो राजा रामः समाज्ञापयति ।—[कर्णे एवमेवम् ।](झ)

दुर्मुख । कधं दाणीं अग्गिपरिसुद्धाए गब्भपरिट्ठिद-

अत लोकैः मयि निधापितं नाथत्वं त्वत्कृतमेव त्वं तु तात्त्विकतया लोकानां नाथभूता भवसि, मम नाथत्वमौपचारिकमेवेत्याशयेनाह, नाथेति ।—त्वया जनाः, नाथ्यन्ते प्रार्थ्यन्ते इति नाथाः अभीष्टवस्तूनि मङ्गलानीति यावत्, तद्वन्तः सम्पन्नाः स्वच्छन्दवन्तः वा भवन्तीति शेषः, लक्ष्मीभूतत्वात् तस्याः इति भावः । त्वं स्वयं तादृशे नाथे स्थिते सतीत्यर्थः, अनाथा—अशरणा सती, विपत्स्यसे—विपन्ना भविष्यसि ? सर्वथा विगर्ह्योऽयं संसारः निर्विवेकश्च विधिरिति भावः । प्रतिकूलवर्त्तिनः विधातुः चरितं नूनं सुदुःसहं वर्तेते तु सङ्क्षेपः । [अत्र एकस्मिन् वस्तुनि सीतायाम् अत्यन्तमसम्भवतोः विभिन्नकालीनयोः पुण्यवदपुण्ययोः नाथवदनाथयोश्च विरूपयोः सङ्घटनात् अन्योऽन्यविरुद्धकार्यकारणयोश्च वा जननात् विषमालङ्कारः ।—"विरूपयोः सङ्घटना या च तद्विषमं मतम्" इति लक्षणात् । न ह्येष विरोधाभासः शङ्कनीयः, विरोधे हि दैशिकः कालिकश्च उभयविध एव विरोधः भासते, विषमे न तथा, केवलं दैशिक एव, अतः उभयविधविरोधाभावात्, केवलं दैशिकविरोधसत्त्वात् इति ध्येयम्]। पथ्यावक्त्रं वृत्तम् ॥ ४३ ॥

(झ) नूतनः,—अदृष्टाऽश्रुतपूर्वचरिततयाऽभिनवः इत्यर्थः, यतोऽस्यैतादृशी विगर्हिता वृत्तिर्यद्विदितसर्ववृत्तान्तोऽपि परीक्षया सीता निर्दोषा इति निश्चिकाय, निरतिशयस्नेहवानपि योऽसौ सर्वथा निर्दोषां स्वगतजीवितां प्रियतमां जानकीं प्रति एवं नृशंसमाज्ञापयतीति भावः । यद्वा नूतनः राजा इति ।—राज्यरक्षणकार्याणां कदाऽपि पुरा अकृतत्वेन नवे राज्ये अभिषिक्त एव "प्रजारञ्जनं हि केवलं राज्ञां परमः धर्मः" इति मन्यमानः करुणाऽऽकरोऽपि स्वयं स्त्रियाः कठोरगर्भाया अपि सीतायाः विवासने करुणालेशविरहितः, अतः कुतः तस्य कार्य्याकार्य्यविवेकविधुरस्य राजपदभाक्त्वम् ? राजेति विशेषकन्तु तस्य सर्वथा नूतनमेव एवंविधराजचरितस्यादृष्टाश्रुतपूर्वत्वादित्यवधेयम् । केचित्तु नवं नृपासनमध्यारूढ़ एव एष स्वानाम् अपरेषाञ्च सुखजननाद्रते तेषां निर्वासनं प्रथमतः करोति, अतस्तस्य सर्वथैव नूतनत्वं, पुरा तु कदा केनाऽपि राज्ञा एवं नृशंसस्य कर्मणः अननुष्ठितत्वादिति व्याचक्षते । एवमेवमिति ।—तपोवनप्रदर्शनमिषेण वाल्मीकिवनोपकण्ठे सीतां विसर्जय इति भावः ।

पवित्तरहुउलसन्ताणाए देईए दुज्जणवअणादो एव्व अणज्ज अज्झवसिद देएण ? * (ज)

राम । शान्तम् । कथ दुर्जनाः पौरजानपदाः ? (ट)—

इक्ष्वाकुवंशोऽभिमतः प्रजानां जातञ्च दैवाद्वचनीयवीजम् ।
यच्चाद्भुतं कर्म्म विशुद्धिकाले प्रत्येतु कस्तद्भुवि दूरवृत्तम् ॥ ४४ ॥

* कथमिदानीमग्निपरिशुद्धाया गर्भपरिस्फुटितपवित्ररघुकुलसन्तानाया देव्या दुर्जनवचनादेवमनाय्यमध्यवसित देवेन ?

(ज) कथमिति ।—केन हेतुना दुर्जनानां बीभत्सचरितानां पौरजानपदानां वचनात् "सीता कलुषिता" इति वाक्यमात्र एव देवेन विवेकिना परमकृपालुनाऽपि भगवता महाराजेन त्वया, अग्निना परिशुद्धाया सर्वथा निर्णीतविमलचरिताया तद्धास्याभूताया, जनापवादाङ्कुरान्मूलनाय सर्वसमक्षमग्नौ प्रविश्य तत्रापि स्वपातिव्रत्याधिष्ठितया दाहाभावकृत्य विख्यापितशोभनचारित्र्याया इति यावत, गर्भेण कुक्षिस्थेन शिशुना परिस्फुटितः आवेदितः पवित्रः अतीव पूतः जारजातत्वादिदोषादुष्टः रघुकुलसन्तानः रघुवंशाङ्कुरः यस्याः, यद्वा गर्भे उदरे परिस्फुटितः जनितः पवित्रः रघुकुलसन्तानः यस्याः तथाविधाया, [एतेन अशरणाया तस्या विवासने न केवलं तदात्मजायत्तान पातकम्, अपि तु रघुकुलोच्छेदश्च भविष्यति इति सूच्यते] एतत् एवमनाय्य—सतामननुमतं कर्म अध्यवसितम्—अनमोदितमाज्ञप्तमित्यर्थः ।

(ट) शान्तमिति ।—मा मैव नाम प्रजान्ते दुर्जना इति त्वया नैव वाच्यमिदम् । पुरवासिनः वैदेशिकाश्च कथं केन हेतुना दुर्जना अभवन् ? ते तु सर्वदा सज्जना एवेति रामाशयः ।

कथं हि स्वभावपरिपूतायामपि सीतायाम् एवमयथा दोषमुद्भावयन्तोऽपि ते पौराः सज्जना इत्युच्यते, तदेव सयुक्तिकमभिधत्ते, इक्ष्वाकुवंश इति ।—इक्ष्वाकोः राजर्षेः वंशः इक्ष्वाकुवंशः सन्तानः तत्प्रभृति मदवधिरित्यर्थः, प्रजानां—प्रकृतिपुञ्जानाम्, अभिमतः—प्रेयान्, पौरजानपदाः कदापि मनसा इक्ष्वाकुवंशीयानाम् अहितं न वाञ्छन्ति सुचिरमनुरक्ताः ते तेषु राजसु इति भावः । ("इक्ष्वाकुवंशोद्भव" इत्यपि पाठान्तरं दृश्यते, तदर्थस्तु—इक्ष्वाकुवंशादुद्भव उत्पत्तिर्यस्य तद, आदित्यात् कुलप्रादुर्भावात् मम इत्यर्थः । पक्षान्तरे तस्मिन्])। तर्हि सीतायां कथं त एव दुर्वादमवतारयन्ति ? इत्याशङ्कां परिहरति, दैवादिति ।—दैवात्—

तद् गच्छ।

दुर्मुख। हा देइ।*

[इति निष्क्रान्तः।]

राम। हा! कष्टमतिबीभत्सकर्म्मा नृशंसोऽस्मि संवृत्तः।(ठ)—

* हा देवि।

दुर्दैववशात् अस्माकमिति शेषः, प्राक्तनकर्मणां विषमयात् परिणामादिति भावः। वचनीयबीजं—लोकापवादबीजं, जातं—समुद्भूतम् उत्पन्नमित्यर्थः, तवाऽतिविशुद्धे वैवस्वतमनोरन्वये इति शेषः। पूर्वेषान्तु महाभागानां तथाविधदुर्दैवाभावात् वचनीयावसरो न जातः, अधुना तु अधन्यस्य मे तथात्वात् तैः निन्द्यतीति भावः। ननु वैदेह्याः वह्नौ विशोध्य गृहीततया लङ्केश्वरस्य भवने सुचिरस्थितिनिबन्धनं दूषणं परिहृतं, तत् कथमिदानीं तद्वचनीयतापातमाशङ्कते? इत्यत आह, यच्चेति।— यत्, विशुद्धिकाले—अग्निना सर्वथा परिशुद्धिसमये, यत् अद्भुतं—लोकोत्तरं कर्म्म, पतिव्रताऽऽदर्शभूततया तस्याः तदधिष्ठात्र्या सम्यक् समाश्वासनम्, अक्षतशरीरतया चाग्निमध्यात् साभरणायाः सचेलायाः तस्याः निष्क्रमणञ्च दैवैः गुरुभिः दशरथादिभिश्च मां प्रति बोधनम् इति, दूरे सुदूरवर्त्तिन्यां समुद्रमध्यवर्त्तिन्यां लोकैरगम्यायां लङ्कायां वृत्तं सम्पन्नं, अतस्तदद्भुतं कर्मेति शेषः, भुवि कः प्रत्येतु—विश्वसितु? यदि पौरजानपदास्तत् न विश्वसन्ति, तत्र तेषां दोषो नास्ति इति रामाशयः। [अत्र वचनीयबीजं प्रति प्रजाऽनुरक्तिर्दैवायत्तत्वात् दूरस्थत्वादिरूपाणां भूयसां कारणानां खले कपोतिकान्यायात् तत्करत्वेनाभिधानात् समुच्चयालङ्कारः, अपि च प्रत्ययाभावरूपकार्य्यं प्रति दूरस्थत्वपदार्थस्य हेतुत्वेनोत्कीर्त्तनात् पदार्थहेतुकं काव्यलिङ्गमित्यनयोरन्योऽन्यसापेक्षतया सङ्करः]। इन्द्रवज्रा वृत्तम्।—"स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति लक्षणात्। एकादशाक्षरपादच्छन्दसः ३५७तमप्रस्तारान्तर्गतञ्च ॥ ४४ ॥

(ठ) [अतिबीभत्स्यते अतिशयेन निन्द्यते इदमिति अतिबीभ—, बीभत्सं कर्माणि अप। बधेश्चित्तविकारे इति धातोः नित्यं सन्। "मान् बध दान् शानभ्यो दीर्घश्चाभ्यासस्य" (७।१।६ पा०) इति दीर्घत्वम्]। बीभत्सं जघन्यं, तादृशं कर्म यस्य स तथोक्तः, जुगुप्सिताखिलवृत्तः, अलीकात्लोकापवादभिया सतीमपि स्त्रियं विजह्दित्यर्थः। [नॄन् मानवान् शंसति हिनस्तीति नृशंसः। नृशंसोपपदात् शंसतेरच्]। नृशंसः,—क्रूरकर्मेत्यर्थः। संवृत्तोऽस्मि—सीतायां पाषाणवदतिकठोराशयः भवामीति।

शैशवात् प्रभृति पोषितां प्रियाम्
सौहृदादपृथगाश्रयामिमाम्।
छद्मना परिददामि मृत्यवे
सौनिको गृहशकुन्तिकामिव ॥ ४५ ॥

तत् किमिति अस्पर्शनीयः पातकी देवीं दूषयामि। (ड)

सीताविवासने आत्मनः समधिकं क्रौर्य्यं विश्वासघातकत्वञ्च सविलापं विवृणोति, शैशवादिति।—शैशवात् प्रभृति—आशैशव, बाल्यकालादारभ्येति यावत् ["कार्त्तिक्या आग्रहायणी मासे * * * कार्त्तिक्याः प्रभृति" इति भाष्यप्रयोगात् प्रभृतियोगे पञ्चमी] पोषितां—सयत्नं प्रतिपालिताम्, सौहृदात्—प्रणयातिरेकादित्यर्थः [सुहृदो भाव इत्यर्थे "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" (७।३।१९ पा०) इति सूत्रेण उभयपदवृद्धौ प्राप्तायामपि असिद्धविधेरनित्यत्वात् प्रथमपदवृद्धिः इति केचित्, केचित् तु आहुः सौहार्द्दमित्यस्यैव साधुत्वमवधेयम्।] अपृथक् अभिन्नः एकः आश्रयः आलम्बनं यस्याः तथाविधा—मदेकानुरागिणीं मां विहाय किमप्यजानतीमित्यर्थः, इमां प्रियां—प्रीतिकरीं, प्राणेभ्योऽपि गरीयसीम् [शिशुहृदयत्वेत्यपि व्यज्यते]। सौनिकः—मांसविक्रयीव, [षू प्रेरणे इति तौदादिकस्य सुवतेः क्तः, ततः आप्, सूना—प्राणिवधस्थानं प्राणिवधश्च। सूनं सूना वा जीविका यस्य स सौनिकः ("वैतंसिकः सौनिकः स्यात् कौटिको मांसविक्रयी" इति अमरमाला।)] गृहशकुन्तिका—गृहपालितपक्षिणीमिव यत्नतः गृहेषु परिवर्द्धितां पक्षिणीमिव [अनुकम्पायां कन्] छद्मना—छलेन, दोहदपूरणमिषेण मृत्यवे—अन्तकाय परिददामि—अर्पयामि, एतस्या विनाशं साधयामीत्यर्थः। यथा हि लुब्धकः शाकुनिको वा शैशवात् परिपालितां प्रियामपि पक्षिणीं धनलालसया पिशितलोलुपेभ्यो विक्रीणाति, तथैवाहमपि सरलहृदयां मदेकजीवितां सीतां दोहदपूरणव्यपदेशेन वनाय विसृजामि अतः अहो मे क्रौर्य्यमिति भावः। [अत्र पूर्णोपमाऽलङ्कारः, एतेन रामस्यातीव क्रौर्य्यं ध्वन्यते इत्यलङ्कारेण वस्तुध्वनिः]। रथोद्धता वृत्तम्।—'रान्नराविह रथोद्धता' इति लक्षणात् एतच्च ९९८तमपृष्ठागतम् ॥ ४५ ॥

(ड) तदित्यादि।—तत्—तदा स्वस्यातीवाधन्यत्वाद्धेतोः, अस्पर्शनीयः,—अति-दुष्टकर्मत्वात् स्पर्शनायोग्य इत्यर्थः, पातकी—पतिव्रताया भार्याया अकारणाश्र-यादकर्तुं... वक्तव्यात् ... मातृवधादि... गुर्वादिनिन्दनपातित्वात् ... परित्यागे पातित्यात् ... यदा—"ब्रह्महा ..."

[सीताया शिर स्वैरमुन्नमय्य बाहुमाकर्षन्। (ढ)]—

अपूर्वं कर्म्मचाण्डालमयि मुग्धे। विमुञ्च माम्।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम्॥ ४६॥

पतिताऽत्याग्यऽपतितत्यागिनश्च पतिता।" इति। देवी—सत्कारार्हा, पवित्रा सीता मिति यावत्, किम्—कथ हि नाम, दूषयामि—तद्देहस्पर्शनादिभि प्रकृत्यैव परिपूतां पापिनीं करोमीत्यर्थ। पतितस्पर्शे पापसङ्क्रमोऽपि भवति, तथाहि—गरुडपुराणम्।—"आलापात् गात्रसम्पर्शात् सवासात् सह भोजनात्। आसनात् शयनात् यानात् पाप सङ्क्रमते नृणाम्॥" इति।

(ढ) स्वैरमिति।—स्वैर—मन्द मन्दम्, उन्नमय्य—उत्थाप्य, [उत्पूर्वकात् नमयते ल्यप् "ल्यपि लघुपूर्वात्" (६।४।५६ पा०) इति णे अयादेश]। बाहु माकर्षन्—उपधानभूत स्वकर तन्मस्तकादपसारयन्।

अपूर्व्वेति।—अयि मुग्धे। सरलहृदयत्वात् कूटविवेकविरहिते। इत्यर्थ। त्वमिति शेष। अपूर्व्वेण अदृष्टचरेण अश्रुतपूर्व्वेण च कर्म्मणा सतीत्यागरूपेणेत्यर्थ, चण्डाल एव चाण्डाल, यद्वा—अपूर्वश्चासौ कर्मचाण्डाल त नृशसवीभत्सवृत्तमित्यर्थ, [निषादोऽपि स्वानुरक्तां सती गर्भिणीं स्वपत्नीमिव न त्यजति, अहन्तु, निरपराधामपि ता त्यजामीति ततोऽप्यधिक सवृत्त इति व्यतिरेकश्च व्यज्यते। नाह जात्या चण्डाल, परन्तु कर्म्मणा तथाभूत एव भवामीति भाव। तथा हि वशिष्ठ,—

"असूयको वा पिशुन कृतघ्नो दीर्घरोषक।
चत्वार कर्मचाण्डाला जन्मतश्चापि पञ्चम॥" इति।

एतेभ्य अधिकत्वादेतेष्वनन्तर्भुक्तत्वाच्चात्मन अपूर्वत्वमुक्त रामभद्रेणेति अवधेयम्]। तथाभूत मां विमुञ्च—विजहीहि, अतिनिष्करुण मामाश्रितायास्तवैतादृश समजायत दु खमिति भाव। यदि सात्त्विक एव त्वमेवम्भूत भवसि, तदा कथ नाम पुरा सतीनामपि शरणमासी ? इत्याशङ्कां निरस्यति, परित्यागस्य चावश्यकरणीयत्वमभि धत्ते,श्रितेति।—त्व चन्दनभ्रान्त्या—घनसारद्रुमभ्रमेण,दुर्विपाक—दु खजनको विपाक परिणामो यस्य तं तथोक्त,प्राणसहारकमित्यर्थ,प्रथमत प्रणयप्रदतया प्रतीयमानमपि परिणामे अरुन्तुदमित्यर्थ। विषद्रुम—विषवृक्ष श्रितासि। सत्पुरुषभ्रमेण अतिक्रूर कर्म्माण मामाश्रिताऽसीति भाव। त्व शीतलबोधेन हृदि परिपालयसि मां पुन प्राणघ्न विषमिति न जानासीति महती ते भ्रान्तिरित्यर्थ। अवेदमवधातव्यम्,—दृश्यते हि लोके फलिनतरुजातीयानामपि पादपानां मम्यत्वे तान् छिन्दन्ति जना,

[उत्थाय ।] हन्त विपर्य्यस्तः सम्प्रति जीवलोकः, अद्य पर्य्यवसितं जीवितप्रयोजनं रामस्य, शून्यमधुना जीर्णारण्यं जगत्, असारः संसारः, कष्टप्रायं शरीरम्, (ण) अशरणोऽस्मि, किं करोमि, का गतिः, क्व गच्छामि ? अथवा, (त)—

अशुभावहत्वे तु सुतरामेवेति, तत्रापि विषप्रसवत्वे कथैव नास्ति, दुर्विपाकतया लोकनाशकत्वे तु सर्वथा तेषां छेदनमेव प्रसक्तम् इत्यत्र किमुत वक्तव्यम् । यदि पुनः "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्" इति न्यायात् स्वयंपरिवर्द्धितस्य छेदनं न समीचीनमिति विभाव्यते, तथाऽपि तत्परित्यागस्तु सर्वथैव समुचितः । अतस्तथाविधं विषद्रुमदेशीयं मां सपदि विमुञ्चेति रामाशयः ।

[अत्र चन्दनद्रुमधर्मेण विरुद्धविषद्रुमसमाश्रयणं सर्वथाऽसम्भवदपि तयोरविरुद्ध-सम्बन्धं कल्पयति, स चासम्भवन् अपि चन्दनतरुधर्मेण विषवृक्षसमाश्रयणमिव त्वया मत्पुरुषभजनम् अतिदर्जनाश्रयं कृतं इति बिम्बप्रतिबिम्बभावं बोधयति अत असम्भवद्वस्तुसम्बन्धरूपा निदर्शना ज्ञेया] ॥ ४६ ॥

(ण) हन्तेत्यादि ।—हन्त इति खेदे अव्ययम् । जीवानां प्राणिनां लोकः, जीवलोकः,—निखिलप्राणिसमाधर्मतत् भूवलयमित्यर्थः, सम्प्रति सीताविरहे विपर्य्यस्तः,—वि विरुद्धं परि सर्वतः अस्तः क्षिप्तः, अन्यथाभूतत्वमागतः, विरुद्ध-परिणत इत्यर्थः, अधुना सर्वमेव मे दुःखहासीमदं खायतनमिव प्रतिभाति, प्रियतमान्यपि वस्तूनि इदानीम् अप्रियतां गतानि, किमधिकम् ? "तदा रम्याण्य-रम्याणि प्रियाः शल्यं तदाऽसवः । तदेकाकी सबन्धुः सन् इष्टेन रहितो यदा ॥" इति न्यायात् जीवितमपि कष्टजनकमिति भावः । रामस्य जीवितप्रयोजनमद्य पर्य्यवसितं—परिसमाप्तं स्वजीवनाधिकवैदेहीविरहितत्वादिति शेषः । स्वजनानां सुख-मेव रक्षिणा जीवितप्रयोजनं, मम तु सम्प्रति सर्वथैव तस्यासम्भवत्वादतः परं जीव-धारणं निष्प्रयोजनं फलाभावादित्यर्थः । इदं जगत् जीर्णं पादपलतादिभिः परिहीण-तया भग्नविरलप्रायम् अरण्यं वन तत्राभावात् जीवमहीरसेवितं विफलमिवाभाति । संसारोऽपि असारः—सारहीनः, सती भार्य्या सत्पुत्रश्च असारे सारः, तद्विनाकृततया सारहीनतदाऽयं च शोकोत्पादकतया अरमणीयः समभवत् । कष्टानां क्लेशानां प्रायो बाहुल्यं यत्र तदाविध नानापरिस्थितिमिदं शरीरं, तदभावस्य सर्वस्यैव वस्तुनः दुःखजनकत्वादिति भावः । [अस्मिन् सन्दर्भे अतिशयोक्तिरलङ्कारः] ।

(ण) अशरणोऽस्मि—नास्ति शरणं रक्षिता यस्य तथाभूतः, ("शरणं गृहरक्षित्रोः"

दुःखसंवेदनायैव रामे चैतन्यमर्पितम्।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः ॥ ४७ ॥

इति यावत्) निराश्रयो भवामि, अनवलम्बोऽस्मीत्यर्थः । दुर्विषहदुःखदहनाद्‌ात्मानं रक्षितुमिति शेषः । "गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ" या हि वैदेही पुरा मे आसीत्, तया विना अहमधुना सर्वैरेव विरहितोऽस्मीति भावः । का गतिः,—कोऽभ्युपायः ? समाश्वास प्रतीति भावः, आश्वासोपाया न्वेषणमिदानीं निष्फलमिति हृदयम् । इह स्त्रीविरहितत्वात् परत्र च पञ्चविधपातकिनः नरकपातस्यावश्यम्भावित्वात् नास्ति निष्कृतिः इति वाऽऽशयः, क्व गच्छामि ? —किमरण्यम् ? उत पातालविवरम् ? अथवा निधनं व्रजामीति विकल्पिताशयः ।

इदानीं पश्चात्तापमधिकृत्य आत्मनः सुमहत् दौर्भाग्यमावेदयन्, स्वभाग्यविपर्य्ययवशात् सर्वमेतदसम्भाविता दुःखसन्ततिः आपततीति सूचयति, दुःखे त्यादि ।—दुःखानां क्लेशानां संवेदनमनुभवः तस्मै, [निरवाच्छिन्नदुःखसमूहमुपभोक्तुमेवेत्यर्थः न तु सुखभोगाय इति ध्वनिः । निमित्तार्थे तुमर्थे वा चतुर्थी]। रामे— [हतभाग्ये मयीति ध्वनिः] चैतन्य—संज्ञा [न तु कदापि ज्ञानहीनता इति ध्वनिः] अर्पितम्—आहितम् । दुर्दैवभूतेन विधात्रेति शेषः, [न तु स्वयं जातम् इति ध्वनिः] सत्यपि चेतनधर्मे सुखदुःखादौ अधन्यस्य मे भाग्यविपर्य्ययात् नियतं दुःखानुभूतिरेव भवतीति बोध्यम् । काञ्चित् सुखानुभूतिं विना प्राणैः क्षणमपि न स्थीयते, अतस्तया सुखसम्भिन्नमेव दुःखं नूनमुपभुज्यते इत्याशङ्कामपनेतुमाह, मर्मेत्यादि ।—म्रियते यस्मिन्नाहते इति मर्म [म्रियतेः मनिन् प्रत्ययः] जीवनस्थानम् । मर्मणि उपघातो विद्यते येषां तैस्तथोक्तैः, यद्वा मर्माणि उपघ्नन्ति विव्यथयन्ति ये तैः अरुन्तुदैः [हन्तेः णिनिः । न तु सुखप्रदैः इति ध्वनिः] तथापि स्थिरैः,—निश्चलैः [न तु तदसहनात् चञ्चलैः इति ध्वनिः] प्राणैः [न तु शरीरैः इति ध्वनिः] वज्रकीलः वज्रमयः शङ्कुः इत्यर्थः, तेनेवाचरितं [न तु वंशदण्डादिवत् भुग्नमिति ध्वनिः]। अहो कठिनता प्राणानां यन्मर्माहता अपि न देहान्निर्गता इति भावः । एवञ्च प्राणविगम एवेदानीं श्रेयानिति रामाशयः । केचित् तु "प्राणैः चैतन्यं वज्रकीलायितम्" इति अन्वित्य "सत प्राणरूपै वज्रकीले कीलितं चैतन्यम्, अतो बहिर्निर्गन्तुं नेष्टे" इति व्याख्यानयन्ति, तदसत्,—अन्वयानुपपत्तेः । केचित् तु "वज्रकील अयितम्" वज्रकीलत्वं गतम्, इति व्याचक्षते,—तदपि न विचारसहम्, समासाभावात् । अन्ये तु "वज्रकीलयितम्" इति पठन्ति, व्याख्यान्ति च—वज्र

हा अम्ब अरुन्धति। हा भगवन्तौ वशिष्ठविश्वामित्रौ। हा भगवन् पावक। हा देवि भूतधात्रि। हा तात जनक। हा तात। हा मातरः। हा प्रियसख महाराज सुग्रीव। हा सौम्य हनूमन्। हा परमोपकारिन् लङ्काऽधिपते विभीषण! हा सखि त्रिजटे। दूषिता स्थ परिभूताः स्थ रामहतकेन। अथवा को नामाहमेतेषामाह्वाने? (घ)।—

कीलविशिष्टं कृतम्—[वज्रकीलवत् शब्दात् तत्करोत्यर्थे णिचि, मतुपो लुक्] अयमेव पक्षः साधीयान् इति मन्यामहे वयम् इति दिक्। [अत्र गद्योक्त 'अथवा'-पदेन [illegible] आक्षेपालङ्कारः तथा वज्रकीलायितमित्यत्र तु कष्ट-साहश्यबोधनात् उपमाऽलङ्कारः, अनयोः तिलतण्डुलवन्नैरपेक्ष्येणावस्थानात् संसृष्टि-र्वेदितव्या] ॥ ४७ ॥

(घ) हेति।—हा अम्ब मातः। ['अम्बार्थनद्योर्ह्रस्वः' (७।३।१०७ पा०) इति ह्रस्वः]। गुरुपत्न्या मातृतुल्यत्वादिति भावः। सतीनामग्रगण्या अरुन्धत्या सीतायाः पातिव्रत्यानुमोदनात् तद्वचनस्याप्यप्रमाणीकृतत्वेन, तां सम्बोध्य इव सखे-दोक्तिः। भगवन्ताविति।—[illegible] भगवतामपि वशिष्ठविश्वामित्राणां [illegible] प्रतिहता [illegible]। धिगहो तत्रभवतां वाचं सुविमलेष्वपि न [illegible]। पावकेति।—हा भगवन् हिरण्यरेतः। तव पावनानि वचांसि [illegible] न विश्वसन्ति, त्वदादेशपरा वाचा च व्यर्थीभूता। देवीति।—हा देवि [illegible]। [illegible] धात्रि। [illegible]। कथं त्वमेवविधान [illegible] लक्ष्मणाय [illegible] विफलं वचसि सतत वहसि इति [illegible]। तातेति।—हा तात पितः जनक। (पत्युः पितृत्वात् श्वशुरेऽपि [illegible]) [illegible]। हा तात। पितः दशरथ। हा मातरः कौशल्या-[illegible] वचनानि [illegible] न विश्वसन्ति, तथा तु [illegible] तदनु [illegible] वचनानि अपि परित्यक्तानि इति भावः। प्रियेति।—हा [illegible]। [illegible]। महाराज। किष्किन्धाधिपते। सुग्रीव। [illegible] विनाशि मम [illegible] कृत [illegible]। सौम्येति।—हा सौम्य। साधो। पूतचरित। [illegible] सीताकलापं [illegible] निवेद्य [illegible] शिरसि च

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ४८ ॥

सुमहाक्लेशं सविधाय, मम यदभूतपूर्व्वमानन्दमजीजनत्, तत्र च मदालिङ्गनसौभाग्यभागासी, तत्सर्व्वमधुना विफलमभूदित्याशय। परमेति।—हा परमोपकारिन्, स्वसहोदरस्यापि जीवनमनादृत्य किं पुनः स्वपक्षम्, आत्मभूतं पुत्रमपि विनाश्य सीतोद्धरणे मे महोपकारकारक। तवाऽपि मदीदृक कार्य्यजातं किमपि फलं नाऽसूतेति भाव। सखीति।—सखि। प्राणसमे। त्रिजटे। त्रिजटा नाम अतीव सीतायां वत्सला काचित् राक्षसी अशोकवनिकायां रावणेन सीतापरिरक्षणाय नियुक्ताऽपि रामविरहशोकार्त्ताया भीतिविह्वलाया वैदेह्या सान्त्वनाप्रवणैर्वचोभिः प्रतप्तं तन्मानसं क्रियच्च समतोलयत्, इयं हि सीतामनुकूलयितुं नियुक्तानां चेटीनामेकतमाऽऽसीत्, अतस्तामुद्दिश्यत्वमभिधानं वेदितव्यम्। रामहतकेनेति।—हत एव हतकः, सीताविवासनात् विगतशोकतया दुर्भगः, ["कुत्सितानि कुत्सनैः" (२।१।५३ पा०) इति सूत्रे "विशेषणं विशेष्येणेति परिभाषाते प्राप्ते विशेष्यस्य पूर्व्वनिपातार्थं आरम्भः" इति काशिकावचनात् राम इति विशेष्यस्य पूर्व्वनिपातः कुत्सिताद्यभिधायकत्वात्]। महाभागानामरुन्धतीप्रभृतीनां वचांसि अविगणय्य दुर्जनवादानुसारतः सीताया विवासनादात्मनः अधन्यत्वमभिहितम्। दूषिता,—रजकादिना अपवित्रीकृता, परिभूता,—तिरस्कृता, अवमानिता इति यावत्। वयं सर्व्व एव सीताचरिते विशुद्धे किमपि अविशङ्कमाना समभव ताः स्वीकर्त्तुमर्वाचीनः, दुरात्मना मया तु तां पापात्मामाशङ्क्य वने विवास्य युष्मद्वचांसि न प्रमाणीकृतानि, प्रत्युत तानि मिथ्याभूतानीति निरणायि, किमतः परं खेदकरमस्तीति भाव। ["मुषिता" इति पाठे—सीतारूपापहृतमस्वस्थतया [illegible] वञ्चिताय इत्यर्थः। मुष्णातेः रूपमेतत।] अथवा—पश्चात्तरं, नामेति कुत्सायाम्। ("नाम प्राकाश्य सम्भाव्य क्रोधोपगमकुत्सने" इत्यमरः।) तेषा—पूतात्मनाम्, आह्वाने—आकारणे, कोऽहं—किं योग्यः अहम्? इत्यर्थः। अहमतादृशः पापात्मा यत् तादृशानां पुण्यचरितानां महात्मनां नामापि आत्ममुखनोच्चारयितुं नाधिकारी भवामीति भाव। [अत एव आक्षेपालङ्कारः]।

पापकृतां रसनया पापात्मनिःसरणात् महाऽऽत्मनां तेषां नामोत्कीर्त्तने याचिकसमगात् दूषितत्वशङ्कायां हेतुं निर्दिशति, ते हीति।—हि—यतः, महात्मानः,—पवित्रचरिताः, ते—महाभागवशिष्ठविश्वामित्रादयः, कृतं प्रत्युपकारं घ्नन्तीति [मूल

योऽहम्—

विस्रम्भादुरसि निपत्य लब्धनिद्राम्
उन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वीम्
क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि ॥ ४९ ॥

विभज्यादित्वात् कप्रत्ययः] तेन—पूर्व्वकृतोपकारविस्मरणात् अकृतज्ञेनेत्यर्थः, कृतघ्न-लक्षणमाह स्कन्दपुराणम्—

"कृतस्य दोषं वदति सकामात्र करोति यः ।
न स्मरेच्च कृतं यस्तु चाश्रमान् यस्तु दूषयेत् ।
सर्व्वांस्तानृषिभिः सार्द्धं कृतघ्नानब्रवीन्मनुः ॥" इति ।

तस्य चाऽनिष्कृतिमाह अन्यत्र—

"ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे ।
निष्कृतिर्विहिता नाऽत्र कृतघ्ने नास्ति निष्कृतिः ॥" इति ।

पापात्मना—इहतेन मया, गृहीतम् उच्चारितं नाम येषां ते,—गृहीतनामानः, उच्चारितनामानस्ते इत्यर्थः अत एव पाप्मना—किल्बिषेण, स्पृश्यन्ते—संसृज्यन्ते इवेति मन्ये—चिन्तयामि [इत्युत्प्रेक्षा] अतिघोरपापानुष्ठानात् मे वाक्कृतसंसर्गादपि अभावपरिणताः ते नूनं दूषिता इति तु सन्दर्भसङ्क्षेपः । [अत स्पृश्यन्ते इवेत्यत्र वाच्या क्रियोत्प्रेक्षा अलङ्कारः, तथा गृहीतनामानः इत्यस्य यतः गृहीतनामानः अत एव पाप्मना स्पृश्यन्ते इति रीत्या पापोत्पादं प्रति हेतुत्वोत्कीर्त्तनात् पदार्थहेतुकं काव्यलिङ्गम् अनयोरङ्गाङ्गिभावेन सङ्करः] ॥ ४८ ॥

[सीताया पादौ शिरसि कृत्वा ।] देवि । देवि । अयं पश्चिमस्ते रामस्य शिरसा पादपङ्कजस्पर्शः । (द) [इति रोदिति ।]

[नेपथ्ये ।] अब्रह्मण्यम् अब्रह्मण्यम् ।। (ध)

अधिदैवताभूततया सुषमाविधायीं, प्रिया प्रियवादिनीं गृहिणीञ्च—द्वितीयहृदयभूतां भार्य्याम्, आतङ्केन स्वप्नोद्वेगेन स्फुरित दीर्घमुत्कुसता हृदयेन सम बाल्य गत कठोर परिणत यो गर्भस्तेन गुर्व्वी मन्थरा—गर्भभाराक्रान्ततया नितान्तविधुरां, वने श्वापदभयात् आत्मपरित्राणार्थं पलायितुमप्यक्षमामिति भाव । निर्घृण नि नास्ति घृणा करुणा यस्य स तथोक्त, निर्दय इत्यर्थ । ("कारुण्य करुणा घृणा इत्यमर")। अहमिति शेष । क्रव्यम् आममांसमदन्तीति क्रव्याद श्वापदा व्याघ्रादय, ["क्रव्ये च" (३।२।६९ पा०) इति विट्, पक्वमासभोजने तु क्रव्याद अणन्तो बोध्य । तथा च काशिका—"कथ तर्हि क्रव्याद ? कृतविकृत्तशब्दे उपपदे अण्, तस्य च पृषोदरादिपाठात् क्रव्यभाव" इति] तेभ्य, बलिमिव—यागाद्योपहारमिव,—("बलिर्दैत्यप्रभेदे च करचामरदण्डयो । उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि । गृहदारुप्रभेदे च जठरावयवेऽपि च ॥" इति मेदिनी ।) क्षिपामि—क्रव्याद प्रीणयितु परित्यजामि । [अत्र "क्रियार्थोपपदस्य कर्म्मणि स्थानिन" (२।३।१४ पा०) इति अप्रयुक्ततुमुन कर्म्मणि चतुर्थी]। अह मिदानीमेवमकरुणोऽस्मि—यत् वराकीं प्रियतमा जानकीं श्वापदसङ्कुले महारण्ये आमिषशकलमिव अनायासेनैव विकिरामीति भाव । [अत्रोपमालङ्कार स्फुट]। प्रहर्षिणी वृत्तम ॥ ४९ ॥

(द) पश्चिम इति ।—पश्चात्-शब्दात् डिमच्प्रत्यय । पश्चिम,—अन्तिम । पतत्अष्टकपवित्रचरितासि त्व यत्तव पादपङ्कजं मम शिरसा स्पर्शनयोग्यम् अत शिरसा एव तत् स्पृशामि, एष च स्पर्श शेष । ["शिरसि" इति क्वाचित्क पाठ, तत्र अवच्छेदे सप्तमी]। "पतिरेको गुरु स्त्रीणा सर्व्वत्राऽभ्यागतो गुरु" इति नियमात्, पत्न्या पादस्पर्श शिरसि आपातत अनुचित इव यद्यपि प्रतिभाति, तथापि,—"पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि । तेजश्च सर्वदेवानां मुनीनाञ्च सतीषु च ॥" इत्यादिवचनात्, स्त्रीसम्माननार्थोतनार्थ सतीनामग्र्या अरुन्धत्या अपि अधिकाया सीताया पादस्पर्श शिरसा रामकृत न विरुध्यत इति मन्यामहे ।

(ध) नेपथ्ये—अभिनेयवेशरचनागृहाभ्यन्तरे । अब्रह्मेति ।—ब्रह्मण्य हित ब्रह्मण्य, तत् न भवतीति अब्रह्मण्य, विप्राणा वेदानाञ्चाविनाशाना नाशो जात

राम । ज्ञायतां भो । किमेतत् ।

[पुनर्नेपथ्ये ।]—

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥ ५० ॥

इदानीम् इत्यर्थः । तदब्रह्मण्यं साम्प्रतमित्याशयः । यद्वा,—ब्रह्मणे विप्राय वेदाय वा साधु यत् तद् ब्रह्मण्यं नास्ति ब्रह्मण्यं वेदविप्रहितं यत्र तदब्रह्मण्यम्, सर्वनाशकृत् उत्पातो जात इति भावः, तच्च सम्प्रति प्रतिकर्त्तव्यमिति अवध्यताप्रार्थना, यथा अस्मान् देवयजीन् न निघ्नन्ति, तथा विधीयतां भवद्भिरिति फलितार्थः । ["अब्रह्मण्यमवध्योक्तौ" इत्यमरः । सम्भ्रमे द्विरुक्तिः, अतिशयकातरताद्योतनार्थं वा]।

किमत्याहितमभूत् तदेव सुविशदं व्यनक्ति, ऋषीणामिति ।—यमुनाया नद्या विशेषस्य तीरे तटभूमौ वसन्ति ये तथाभूतानां तदुपकूलवास्तव्यानाम्, [एतेन तेषां कोमलप्रकृतित्वं सूचितम्] उग्रं सुमहत् तपः येषां तथोक्तानां तपःसिद्धिसम्पन्नानाम् [एतेन तेषां शापदानादिना प्रतीकारयोग्यत्वमस्तीति गम्यते, एवमेवाह रघौ कालिदासः,—"बाणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम्" इति]। ऋषीणां—तपोधनानां, [का कथा तच्छिष्यभूतमुनीनामिति अर्थापत्तिर्ध्वन्यते] स्तोमः—समवायः लवणेन मधुदैत्यात्मजेन रावणभागिनेयेन, [लुनाति इति लवणः, नन्द्यादित्वात् ल्युः, निपातनात् णत्वम्] त्रासितः,—भीषितः सन्, त्रातारं—रक्षितारं शरण्यमिति यावत्, त्वाम् उपस्थितः,—प्राप्तः । तपःप्रत्यूहमाचरता विबुधद्विषा लवणेन भीषिताः तपोधनाः विघ्नप्रतिक्रियार्थिनः राममुपाययुः इति फलितार्थः । [पुरा किल दिग्विजयार्थं बहिर्गतस्य रावणस्य मातृष्वसेयी रूपयौवनवती कुम्भीनसी दैत्यपतिना मधुना अपजह्रे, तद्गर्भजातोऽयं लवण इति रामायणी कथा अनुसन्धेया । लवणो हि स्वमातुलस्य सुरासुराणां विजेतुः रावणस्य दुःखावर्णश्रवणेन नितान्तवितप्तहृदयः भगवतः राघवस्य किमपि अपकर्त्तुम् अक्षमः प्रतीकारादारब्ध सरलचेतःसु तपोधनेषु अत्याहितमकरोदिति । अत्र हि स्वदर्शोद्यम सीताविवासनात् पश्चिमम् अपि सीताविरहविधुरस्य असह्यपीडं सीतानिर्वासनं कदमपि कथमपि रामस्याऽपसारणाय आदावेव विनिवेशितं कविनेति विभाव्यम् । रामस्य निष्क्रमणात् परं कुमारः लक्ष्मणः दोहदपूरणमिषेण दुर्वहगर्भां तां सीतां दण्डकारण्ये विजहौ, रामस्य सन्निधौ तत्तु असम्भावितमभूदिति अन्यथा प्रदर्शितं मन्ये । एवमेव रघौ कालिदासः,—

राम। आः! कथमद्यापि राक्षसत्रासः॥ तद् यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्य समुन्मूलनाय शत्रुघ्नं प्रेषयामि। [कतिचित् पदानि गत्वा पुनः प्रतिनिवृत्य।] हा देवि। कथमेवंविधा गमिष्यसि। भगवति वसुन्धरे। श्लाघ्यां दुहितरमवेक्षस्व जानकीम् (न)।—

"कृतसीतापरित्यागः स रत्नाकरमेखलाम्।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्॥
लवणेन विलुप्तेज्या तामिस्रेण तमभ्ययुः।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः॥" इति]।

पथ्यावक्त्रं वृत्तम्॥ ५०॥

(न) आः इति कोपपीडोभयसूचकमव्ययम्। ("आस्तु स्यात् कोपपीडयोः" इत्यमरः)। अद्यापि—इदानीमपि रावणवधाव्यवहितोत्तरकालेऽपि शेषितराक्षसकुलत्वादित्याशयः। कथं—किमिति विस्मये, दुरात्मनः,—दुर्वृत्तस्य, कुम्भीनसी नाम रावणस्य स्वसा, कुम्भीव उष्ट्रेव कट्फलमिव वा चुक्रकलस इव वा नासिका यस्याः इति विग्रहे ["पद्दन्नोमास्—" (६।१।६३ पा०) इति सूत्रेण नसादेशः स्त्रियां ङीप् च निपात्यते।] तस्याः पुत्रस्य लवणस्य, समुन्मूलनाय—समूलमुच्छेदाय, यावत् प्रेषयामि—प्रेरयिष्यामि ["यावत्पुरानिपातयोर्लट्" (३।३।४ पा०) इति सूत्रेण लट्।] कतिचित्—कियन्ति पदानि गत्वा सीतां परिहायेति शेषः, पुनः प्रतिनिवृत्य—प्रत्यागत्य विहाय गन्तुमशक्यतयेति भावः। कथमेवंविधेति।—एवंदशामापन्ना गर्भिणी मया च वञ्चिता सती एकाकिनी, कथं जनशून्यामरण्यानीं गमिष्यसीति भावः। यद्वा,—एवमज्ञातकारणा विश्वस्तनिद्राऽपि, अचिरेण तु वनगमनाय आहूता अस्मान् परित्यज्याऽपुनर्दर्शनाय असहायैव गमिष्यसीति भावः। ["कथमेवङ्गता भविष्यसि" इति पाठे तु,—एवङ्गता—ईदृशीमवस्थामापन्ना, कथं—केन उपायेन, भविष्यसि—वर्त्तिष्यसे जीविष्यसीत्यर्थः]। मन्दभाग्या पत्नी मत्परित्यागात् अस्मात् क्षणादेव निःसहाया त्वमिति, तत् किमत्र विधेयमित्याह, भगवतीति।—भगवति।—सर्वज्ञे। वसुन्धरे।—पृथ्वि। श्लाघ्यां—महनीयमहीयस्त्वचरितां, दुहितरं—कन्याम्, अवेक्षस्व—विपदः त्रायस्व। त्वमिदानीं मैथिलीसहाया भवेत्यर्थः।

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम् ।
या देवयजने पुण्ये पुण्यशीलामजीजनः ॥ ५१ ॥

[इति निष्क्रान्ता । (प)]

सीता । हा सोम्म अज्जउत्त । कहिं सि । [सहसोत्थाय ।] हद्धी । हद्धी । दुस्सिविणरणरणअविप्पलद्धा अहं अज्जउत्त

अथेदानीं सीतायां कथङ्कारं श्लाघ्यत्वमित्थं सम्यक् सम्भूतं, तदेव विशदीकृत्य प्रकटयितुं तामुभयवंशैकशुभकरत्वेनोपवर्णयति, जनकानामिति ।—जनकानां—विदेहाधिपवंशप्रसूतानां, रघूणां—रघुकुलसमुद्भूतानाञ्च [तद्राजत्वात् सञ्ज्ञायामञि "तद्राजस्य बहुषु तेनैवास्त्रियाम्" (२।४।६२ पा०) इति बहुषु अञो लुक्] । कृत्स्नं—समग्रं, गोत्रस्य वंशस्य मङ्गलं शुभं, [विधेयप्राधान्यात् यदित्यस्य क्लीवत्वम्] । या हि जानकी पुरा पूततमस्य निमिवंशस्य पुरञ्जयान्ववायस्य च अखिलशुभैकविधात्री अधिदेवताभूता आसीत् इति भावः । या—सीतां, पुण्यं पवित्रं शीलं सदाचारं यस्याः तां—पूतचरितां, पुण्ये—अतिपवित्रे, देवा इज्यन्तेऽस्मिन्निति देवयजनं यज्ञभूमिः, तस्मिन् आकरदोषलेशरहिते इत्यर्थः, तथाविधायां वसुन्धरायाम् इति यावत्, अजीजनः—उदपीपदः, हे वसुधे ! त्वमिति शेषः । जनककुलस्य रघुकुलस्य च इयं मूर्त्तिमती श्रीः । विश्वम्भरे ! त्वमपि इमां प्रसूय श्लाघनीया महत्ता, अतस्तदवेक्षणं ते सर्वथोचितमित्यभिप्रायः । [अत्र पुण्यशीलायाः जनकतनयायाः जनकरघुकुलयोः निखिलकुशलत्वारोपात् उभयकुलयोर्वास्तवत्वेन तस्याः मङ्गलभूततया प्रकृतोपयोगित्वात् परिणामालङ्कारः] । पथ्यावक्त्रं वृत्तम् ॥ ५१ ॥

(प) [शाकुन्तले यथा शकुन्तलाप्रणयलीलापयोधिलहरीनिमग्नं नरपतिं सपदि तं सम्यक् अनुदघुनन्नुवन् महाकविकुलशेखरः तत्रभवान् कालिदासः कदाचिदपि तस्य कस्मादप्यसह्यपीडां जनयन् समागमं कमूचयन् मायाहाहाकारेण नरपतिं निष्क्रामयन् वैचित्र्यातिशयमजनयत, तथैवात्र भवभूतिः देवीं विरहविधुरामपि रामं शापकारणाय अक्षरशः परिकरस्य वसुना ... मुनीनां ... विबुधविदितं ... वधाय च निष्क्रमणं ... प्रतिष्ठापितवान् ... तत्रभवता कविना, पुनश्छेदकारकसीता ... इति वेदितव्यम् । तथा चोक्तम्—"... इति] ।

आक्रन्दामि। (विलोक्य।) हद्धी। हद्धी। कध एआइणी म प्पसुत्त उज्झिअ गदो अज्जउत्तो॥—ता किं दाणीं एद? भोदु से कुविस्सं—जइ त पेक्खन्ती अत्तणो प्पहविस्सं। को एत्थ परिअणो? * (फ)

---

* हा सौम्य आर्यपुत्र। कुत्रासि। हा धिक्। हा धिक्। दुःस्वप्नरणरणक विप्रलब्धाऽहमार्यपुत्रमाक्रन्दामि। हा धिक्। हा धिक्। कथम् एकाकिनी मा प्रसुप्तामुज्झित्वा गत आर्यपुत्र॥ तत् किमिदानीमेतत्? भवतु तस्मै कोपिष्यामि—यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि। कोऽत्र परिजनः?

(फ) स्वप्ने प्रलापबहुल वच उच्चार्य निद्रावेशविधुरतया प्रथमत चक्षुषी निमील्यैव इदमाह, हा सौम्येत्यादि। दुःस्वप्नेत्यादि।—दुःस्वप्ने विप्रलब्धादिभिर्घटिते स्वापसमये इत्यर्थ, य रणरणक प्रियतमविरहात जायमान उद्वेग तेन विप्रलब्धा। रामभद्रोऽत्र नास्तीति विस्मृत्य क्रन्दितुमारब्धत्वात, वस्तुत तत्र तदानीं रामो नास्तीति न विज्ञातवती, अत विप्रलब्धेत्युक्त, तत्तु अनुपदमेव व्यपगमिष्यति इति बोध्यम। आर्यपुत्र—रामम्, आक्रन्दामि—आकारयामीत्यर्थ। पश्चात्तु चक्षु उन्मील्य, दृष्ट्वा च प्राणाधिकविरहित तल्प, तदा रामविरहस्थचन्द्रमुखी अधीरा विग्ना कुररीव रोरूयमाना भर्तार चक्रन्द,—"हा धिक्। हा धिक्। कथमेकाकिनीम्" इत्यादि। एकाकिनीम्—असहायाम। उज्झित्वा—विहाय। तत किमिदानीमेतत?—पूर्वं हि कदापि भवान् एकाकिनी मा विहाय कुत्रापि न गतवान, तत् कथ हि मे इदानीम असम्भावितमेतत् दुःखमापतितमिति भाव। भवत्विति।—तत् यदेवास्तु इत्यर्थ। तस्मै—रामभद्राय, कोपिष्यामि—कपटकोप करिष्यामि, अन्यथाऽपराधस्य चालनात इत्यर्थ, यदि त—राम, प्रेक्षमाणा—पश्यन्ती सती, आत्मन,—स्वस्मै इत्यर्थ, [सम्बन्धविवक्षया षष्ठी] प्रभविष्यामि—प्रभुर्भविष्यामि, आर्यपुत्रस्य सौम्यमनोहररूप लावण्यदर्शनादिना तद्गतहृदया विमुग्धा च भूत्वा सपद्येव तदधीना भवामि, अत मानरूपकोपनार्थं प्रभुत्व मदीयपराहतमेव का कथा कोपस्येत्याशय। सत्य ह्येतत सतीनामेव भवति पतिसन्दर्शनादिति। [अत्र "हृष्टे निदर्शन भविष्यति दह्यमानस्य तस्मिन् जने" इत्युदाहृतवत तथा "अनापराधनामदर्शने तु अस्य न विप्रलम्भभेदता, किन्तु सम्भोगसम्बन्धाभावत्वम्" इत्युक्तवतो दर्पणकारस्य वाचानन्तरसभावनाचतुरै बोद्धव्यम]।

दुर्मुख। [प्रविश्य।] देइ। कुमारलक्खणो विसवेदि, सज्जो रहो, आरुहदु देई त्ति। (ब)

सीता। इअमह आरुहह्मि। [उत्थाय परिक्रम्य।] परिप्फुरइ विअ मे गब्भभारो, ता सणिअ गच्छह्म। † (भ)

दुर्मुख। इदो इदो देई। ‡

सीता। णमो णमो तवोधणाणं, णमो णमो रहुउलदेअदाण, णमो णमो अज्जउत्तचरणकमलाण, णमो णमो सअलगुरुअणाणं। § (म) [इति निष्क्रान्ता सर्वे]।

इति चित्रदर्शनी नाम प्रथमोऽङ्क ॥ १ ॥

* देवि। कुमारलक्ष्मणो विज्ञापयति, सज्जो रथ, आरोहतु देवीति।

† इयमहमारोहामि। परिस्फुरतीव मे गर्भभार, तत् शनैर्गच्छाम।

‡ इत इतो देवी।

§ नमो नमस्तपोधनेभ्य, नमो नमो रघुकुलदेवताभ्य, नमो नम आर्य्यपुत्रचरणकमलेभ्य नमो नम सकलगुरुजनेभ्य।

(ब) कुमारलक्ष्मण —सौमित्रि, देवरत्वेनैवसम्बोधनम्। विज्ञापयति—कथयति। सज्ज,—तव दोहदमापूरयितु वनप्रयाणाय प्रगुणीकृत, सुखगमनोपयोगिवास्तरणादिभि सनाथ इत्यर्थ।

(भ) परिस्फुरति—स्पन्दते। गर्भभार —भारभूत गर्भ, उदरस्थ शिशु इत्यर्थ। शनै —मन्दमन्दम्। ['सिढिलम्" इति पाठे—शिथिलमिति तस्यार्थ]।

(म) रघुकुलेत्यादि।—देवता हि विघ्नहारिण्य, अत प्रयाणकाले तासामभिवन्दनमुचितमेव।—"आदित्यमण्डले विष्णु ध्यात्वा यात्रा प्रवर्त्तयेत्" इति स्मरणात्। यद्यपि सतीना पत्युरेव केवल गुरुत्वेनादौ आर्य्यपुत्रचरणकमलान्यभिवन्द्य पश्चात् सकलगुरुजनाना वन्दनमुचित तथाप्यत्र प्रथम तपोधनादीना वन्दनन्तु पति[illegible]इति वेदितव्यम्। [मूले "तवोधणाण," "रहुउलदेअदाण" इत्यादि [illegible] "रघुकुलदेवतानाम्" इत्यत्र [illegible] [illegible] इति [illegible] [illegible] "इतुप्रदे [illegible]" इति [illegible]चार्य्यमतेन [illegible] इति ध्येयम्। [illegible]गौरवात् बहुवचनम्]।

प्रथमाङ्कस्य विवृतिः।



अथ तत्रभवान् निखिलमहाकविकुलसततोपगीयमानतुहिनाचलामलतुषारावदातविधौतपवित्रकीर्त्तिः कोविदकलापकुञ्जरशिरःशेखरः भवभूतिः, अदृष्टचरमश्रुतपूर्वमेकमभिनवं करुणविप्रलम्भाख्यशृङ्गाररसमयं नाटकमुपनिबद्धुमभीप्सुरादौ अनवगीतशिष्टाचारपरिप्राप्तां सज्जनसदाचारसञ्चरणपरिपूतविशोधिताञ्च कविकुलवन्दनाविधायिनीं द्वादशपदविनिबद्धां देवस्तुतिमयीं सभ्यानां महाऽऽनन्दसन्तानविधायिनीं नान्दीशिकामाशक्रे।

अथ सूत्रधारनटौ भगवत्कालप्रियनाथोत्सवसमये समवेतान् सभ्यसङ्घान् कवेः तत्रभवतः भवभूतेः कृतिमपूर्वामेकामभिनेष्याव इति विज्ञापयन्तौ अवान्तरे वीथ्याम् आयोध्यिकभूमिकामधिगत्य सूत्रधारः "यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः" इत्यादिना स्ववाक्यदोषमुररीकुर्वन् भगवतः प्रसीतस्य रामभद्रस्य नवे राज्याभिषेके प्रणीतुमारब्धवान् तत्कालसमुचितां सीतापवादं निरूपयितुं न्ययुङ्क्त। अथ यदा हि दशमुखं निहत्य सीतामुद्धृत्य च उत्तरकोशलमुपगम्य अभिषेकसदाचारम् अनुतिष्ठवान् भगवान् रामभद्रः, तत प्रभृति एव स्वानां लङ्कासमरसुहृदां तपोधनानाञ्च विसर्जनात् तदैव वशिष्ठाऽधिष्ठितानामरुन्धतीसहितानां श्वश्रूणां जामातृयज्ञस्य द्वादशवार्षिकं सत्रं प्रति दोहदवतीं कठोरगर्भगुर्वीं जानकीं विहाय प्रयाणात् च विमनायमानां सीतामनुमोदयितुं वासभवनप्रयाणं भगवतः रामभद्रस्याऽभिलपन्तौ प्रस्तुतकथाक्षेपिकां प्रस्तावनामुपन्यास्यता निष्क्रमिष्टाञ्च तौ।

अथ भगवान् करुणामयः रामभद्रः तत्रभवतां जनकानां विदेहगमनात् गुरुशोकसागरनिमग्नां सीतां सान्त्वयितुं शुद्धान्तागारमध्युवास। अत्रान्तरे सन्दिष्टावक्रः कष्यशृङ्गाश्रमात् रामं विज्ञापयितुं वशिष्ठसंवादमादायाऽयोध्यामुपाययौ। अथ मुनिप्रवरः प्राक् शालायां भगवत्याः अरुन्धत्याः निदेशात् सीतादोहदमापूरणीयमावेद्य उदीर्य्य च पश्चात् जानकीसमाश्वासनमयिष्ठां भगवतः वशिष्ठस्य वाचम्, सर्जस्व लं रघूणां कुलं प्रजासमाराधनेषु एव प्रमितमिति उपादिशत्, तच्छ्रुत्वैव भगवान् रामभद्रः प्रजानुरञ्जितस्नेहं दयां सुखं सर्वं हि जीवलोके विसृष्टसीगो, अन्येषां का कथा प्राणसमामपि जानकीं परित्यजतो नास्ति मे व्यथेति सपदि विषोदर्कमेतन्नाटकबीजभूतं सीताविवासनं प्रत्यशृणोत्।

अथ कियता गच्छता कालेन कुमार सौमित्रि दुर्मनायमाना सीता प्रीणयितु भगवता रामभद्रेण पुरत आदिष्टान् चित्रकरान्, ताडकानिधनाय भगवते रामभद्राय कौशिकेन सानुग्रह प्रसादीकृतानि सरहस्यानि जृम्भकास्त्राणि आरभ्य सीताया आ हुताशनविशुद्धे चित्राणि अङ्कापितानि, तानि समादाय च तान् समुपस्थितान्, व्यजिज्ञपत। तदाकर्णनसमकाल हि रघुमणि परिम्लानाननकान्ति सखेदमाह, देवि! एष हि अलीकलोकपरीवाद तें जीवितव्यशपमपसारिष्यति, अधन्येन च कुलधनभूत यज्ञ एव केवलमभीप्सता मया प्रसूनमालायिताया ते कियन्ति चरणावमर्द्दनानि कृतानि इति बहुधा सबाष्पगद्गद विललाप।

अथ स्वभावधीर रामभद्र तपोधनतपस्तेज सम्भूतानि दिव्यास्त्राणि सीतायै प्रादीदृशत, सा हर्षाविनम्रमुखी तानि सगौरव ववन्दे। तत मिथिलावृत्तान्त प्रादर्शयच्च। तदा तु जानकी प्रियतमसौम्यसुखमण्डलम् अचिरप्रभाद्युतिविद्योतितमपि चिरमदन निरीक्ष्य गद्गदकण्ठी अभाषीत, स्मरामि खलु सर्व यत् यूय चत्वार भ्रातर गृहीतनाङ्गलिकोपचारा तत्र वर्त्तन्ते इति। अथ लक्ष्मण विवाहात् परम् अयोध्यागमनपथे भगवद्भार्गवविजय दर्शितवान्। तत दृष्टा विनयमाहात्म्यपरीतमूर्त्ति रघुवंशकीर्त्ति गुरूणामवमाननाख्य श्रोतुमशक्नुवन् स्वविजयवार्तोपवर्णन च स्वस्य पुरत एवोपगीयमानमवलोक्य वैलक्ष्याऽवनतमुख "बहुतर द्रष्टव्यमस्ति—अन्यत्र दर्शय" इति लक्ष्मणाय निदिदेश।

अथ सौमित्रि मिथिलात वयमयोध्यामुपगता इति प्राह। तत नवजलधरविनिन्दितध्वनि रघुमणि तातपादजीवितदशाया मातॄणामनुपमस्नेहपीयूषधारानिषिक्ताना तेषा दिवसा कियत्सुखेन हि व्यतीता इति विभाव्य पर मोहमुपागत। जानकी च तदा कियन्ति सुखानि अदित, तदनिशमनुस्मरन् सीतायां रति प्रकटीकृत्य शृङ्गाररस सन्दधाचक्रे। ततस्तु लक्ष्मण मन्थराप्रस्ताव प्रास्तौत्। रामभद्रस्तु गुरुभिरप्यननुज्ञात स्ववनविवासन सर्वथैवाऽननुदनपि मातु कैकय्या अकीर्त्तिकरत्वेन तत्र तदैव विजहौ। अनुपद हि निषादाधिपतिनिषेवित शृङ्गवेरपुरमिङ्गुदीपादप मनादमदर्शयत। तत्र पुन यौवराज्यभाज देव राघव जटासंयमनिरतमवलोक्य भर्त्ता सीता कियदपि खिद्यमाना स्वभाग्यविपर्ययादेवमसम्भावित दु खमापतितमिति पर विसिस्माय। ततश्च प्रसन्नपुण्यसलिला रघुकुलदेवता भगवती भागीरथीमवलोक्य वन्दन सह चक्रतु। अथ भगवान रामभद्र 'अम्ब' सा तावत् शिवानुध्यानपरा भव इति दृष्टवान् एतेन च स्ववंशकुलाङ्कुरौ कुशलवौ भागीरथीपरिपालन कृ ता सा प्रागेवोत्प्रेक्षिताना कदाचित सनाथनत्व च विवव्रे। अथ लक्ष्मण

भरद्वाजाश्रमं कियत्कालमध्युष्य, ऋषिप्रदर्शितमार्गेण गच्छन् कालिन्दीतटस्थितं श्यामनामकं वटपादपं प्रदर्शितवान्।

अथ "किमिमं स्मरसि आर्यपुत्र"। इत्येव जानकीजिज्ञासया सर्वथा प्रकृतिरञ्जनो रामचन्द्रः अध्वश्रमजातश्रमापह मन्दमधुरशीतलानिलसम्पादितसंवाहनक्रियम् इमं कथं विस्मरामीति अपि च यस्य सुशीतलतलप्रान्ते अलसविलसितपवित्रगात्रैः अशिथिलपरिरम्भमादधती त्वं मम अमन्दोरसि विन्यस्य विश्राममुखं लभेथाः, तत् न विस्मृतं मया इत्युक्तवान्। ततो विन्ध्याटव्यां विराधोपरोधमाख्यत लक्ष्मणो जनस्थानप्रस्थानसमारम्भञ्च। तस्मिंश्च गिरिसरिन्निर्झराणामनिर्वचनीयानि सौभाग्यचिह्नानि वैखानसनिषेवितवनापान्तानि, गोदावरीकीलालकल्लोलकोलाहलमुखरितकन्दरम् अविरतवारिधाराविवर्षिवारिधरैरभ्यश्यामलं प्रस्रवणं नाम पर्वतमुपावर्णयत। वर्णितानि पुनः गोदावरोत्तीरे रतवनप्रसूनसुरभीणि स्वच्छन्दनिमज्जनानि, तदुपान्ततीरवनवर्त्तनानि च। पुण्यशयपरमणीये तस्मिन्नशिथिलपरिरम्भव्यापृतानां स्वेषां विभावरी गोदावरीतटविटपिपादप्रान्ते धरणिजानिन्दिताङ्गसङ्गमङ्गविनाऽणीरणीयसीवाऽभूत्।

अतः परं पञ्चवट्यां विकटमुखनासाया शूर्पणखायाः संवादमवलम्ब्य कमलकोमलमानसा सीता विगतवियोगविपुलक्लेशं पुनरापतितं इति मत्वा विरहविनयनम्रा बभूव। रामस्तु स्वयं वियोगवक्ता तथाविधां सीतां, "न चेयं पञ्चवटी न चापि शूर्पणखा, चित्रमेतत्" इति परिसान्त्वयन् पञ्चवटीवननिवासविवशस्वान्तस्तद्वृत्तान्तमपरोक्षमिव विज्ञाय क्षणं क्षोणीजायाः पञ्चवटीप्रस्थानरूपविगततिरस्कसस्मार। ततश्च कनकमृगमायया वैदेहीं मोहयित्वा अतुलैश्वर्य्यबलवर्त्ती रावणः समपहृत्य च तां कियतां राममोदनकृपणहृदयानां विचेतनानामपि विशेषक्लेशं सञ्जनयामास इत्युपवर्णिते तदानीं पतिपरायणा पवित्रचित्ता सीता मन्निमित्तमेव दुर्विषहं विषमक्लेशजालं बुभुजे भगवान् रामचन्द्रः इति विचिन्त्य नितरामनुतप्तवती। ततश्च सीताहरणमनुस्मृत्य गलदश्रु विलपतो लक्ष्मणस्य शोकोक्तिप्रवणार्द्रमानसस्य रामस्य च विलापवर्णनम्। अतश्च मन्वन्तरवृद्धगृध्रराजस्य जटायुषो विशेषविषेभकरं चरितमभिदधे।

अनन्तरं जनस्थानपश्चिमाशास्थितमञ्जुलकुञ्जमण्डितं दण्डकारण्यभागं दर्शयामास। दर्पप्रदं ऋष्यमूकनामनगं महामुनेः मतङ्गस्याश्रमपदं सिद्धशबरीं श्रमणां पम्पासरोवरञ्च प्रदर्शितवान्। ततश्च मदमत्तमल्लिकाक्षपरिचिर्णा पवनपवनं त्वम्पितचञ्चलनालश्वेतसरोजसमूहोपशोभितान् परमरमणीयकुवलयचयान्वितानेकानन्द

प्रदर्शितस्तरावरस्थाश्रमभागान् स्वाङ्गुप्रवाहोद्गमनपतनयोरन्तरालमवलोकितवान्। तत सौमित्रिः सीतापरिहरणजन्यशोकसागरमग्नजीवलोकमपि दीपकारक महाभाग मारुति प्रदर्शितवान्। सर्वजनरञ्जनाञ्जनानन्दनस्य साक्षात्कार सौभाग्यवशात् प्राप्त मत्-कृतार्थतया सम जगत् कृतार्थतामवापेति दाशरथिर्जगाद।

अथ सुरभिकुसुमसुशोभितकदम्बतरलशाखामण्डनमयूराङ्कितनृत्यभाजि यत्र चानु-भावमात्रावशिष्टप्रनष्टधूलिमलिनशरीरश्चीराय्यपुत्र इव विगतचैतन्यवत् तरुतले पतित साश्रुनेत्रसौमित्रिणा विधृत इति विचित्रचित्रगतस्य किं नाम? इत्येव वैदेही प्रवचनोपवर्णित कुसुमित व्रततितति-विराजमान मञ्जुकुञ्जाभभेदि तुङ्गशिखरोप-कण्ठस्य विनदत्सवलाकवलाहककाकलीकलितकुञ्जमण्डितस्य तस्य माल्यवत स्मरणा-ऽसहिष्णुना रामेण निवारितौ लक्ष्मण चित्रप्रदर्शनव्यापारात्। कौशल्यानन्दनस्य तया "बहुमानास्पदकपिदलसामुत्तरोत्तरप्रवर्धमानाद्भुतयुद्धचित्रमत पर परिश्रान्तेय विश्राम्यताम्" इति लक्ष्मणोक्तिरुपवर्णिता।

ततश्चित्रदर्शनतो जानक्या प्रसन्नगम्भीरारण्यश्रेणीभ्रमणसुशीतलसुभगसलिला-भागीरथीपरमपूतजलावगाहनवाञ्छाया विज्ञापिताया "गुरुजनाज्ञापालनाय चास्या मनोरथपूरण करणीयमिति सत्वारथी रथ सज्जीकृत्यानेतव्य" इत्थं समादिदेश दाश-रथि। ततस् निद्रावशवर्तितया परमप्रियस्वपतिपरितोषमातन्वती भयश्रमजनित घर्मबिन्दुरचिरया निशाकरकिरणसम्पर्शप्रसृतजलबिन्दुनिचित चन्द्रकान्तमणिनिर्मित-हारप्रतिमबाहुलता स्वकण्ठगतामित्यनुभयाऽनिर्वचनीयभाव बुबुधे रामभद्र। चित्र-प्रदर्शनव्याजेन इत्थ पूर्वरामचरित प्रदर्शित महाकविश्रीकण्ठेन।

अथ दुर्मुखोपस्थितौ विज्ञापितायां प्रतीहार्या पौरजानपदानां काव्यपरिज्ञानाय नियुक्तो गूढचर इति विचार्य प्रकाशनेन पुरप्रवेशनाज्ञा ददौ दाशरथि। "परम पवित्रचरित्राया जनकतनयाया अचिन्तनीयमिम लोकापवाद कथ स्वामिनि निवे-दयामि? अथवा नियुक्तोऽहं मन्दभाग्यसादृश कर्मणि" इति दुर्मुख समचिन्तयत्। तदानीं तु रामचन्द्र [illegible] विरहखिन्नया उद्वेज्यमानाया सीताया स्वप्नोद्वेगमाकर्ण्य विचलितचेता रघुपति सुदेह परिष्वजन् तदङ्ग, "निरुपधिनिर्मल दुर्लभमेव [illegible] [illegible] प्राप्यत" इति विस्मयाऽऽकुलितचेता आसीत्।

[illegible] पौरजानपदप्रत्यानुपवादम् रामस्य स्वदीयपरिजिज्ञासावसरे [illegible] सीताया रावणभवनवासजनितदुर्यशसाऽऽदन इति भगवतो [illegible] विष्टे। तत श्रुतिसमकालमेव कम्पधीरो रघुवीर तथाविध [illegible] सहदि मोहमुपागत।

अथ राघव "रघूणां प्रजारञ्जनमेव राजधर्म्म भगवद्वशिष्ठादिभिय सम्प्रति तादृशी निष्कलङ्कातिपूतरविवंशगौरवे मय्यपि चेत् कलङ्कस्तर्हि दौभाग्य किमस्मात् ? धिगस्मा जीवितान्तरतुल्यदारपारतन्त्र्यम् ॥ हे राममयजीविते । तव जन्मपरिग्रहरूपानुग्रह प्रकाशेन धरित्री पवित्रीभूता" इत्यादि बहु विलप्यापि स्वकर्त्तव्यवशात् "त्याज्या ऽसि" इति उक्त्वा सत्वर लक्ष्मणमानेतु दुर्मुख समादिदेश। सोऽपि लक्ष्मणा-नयनार्थोन्मुखो दुर्मुख सीताविवासनशोकसन्तप्तधी "कथ हि भगवान् दुर्जन वचसा अतीव पवित्राया गर्भस्थितपवित्ररघुकुलाङ्कुराया सीतायामेव व्यवस्यति" इति तदाकर्णनसमकालमुवाच। ततो विवशबुद्धिस्वभावो राघव दुर्भाग्यवशात् स्वकुले लोकापवादकलङ्कबीज समुद्भूतमिति विभाव्य दृषितनृशसाद्यतिवादैरात्मानमवमत्य स्वनिलयपरिपालितपक्षिपल्लवविक्रयिवत व्यवसितमतिकष्टञ्च इति मेने। सर्व्वत पवित्रामिमा स्पृष्ट्वा कथ पापभागिनी करोमीत्यस्त्रापूर्व्वकर्मचण्डाल मा विमुञ्चेत्याद्य भिधाय तस्या मस्तकोपधानभूत स्वबाहुमाकर्षन् सम्प्रति विपर्य्यस्तस्त जीवल्लोकस्य निजजीवनधारणानर्थकत्वञ्च चिन्तयन् वशिष्ठारुन्धतीविश्वामित्रादीन् लक्ष्यीकृत्य स्वदुर्ज्जनतामुपालब्धवान्। "विश्वासविशेषसञ्जातनिद्रा गर्भभारविनम्रा वराकी वैदेही कथ रात्रिञ्चरेभ्यो विनियोजयामि ?" इति सास्रु विललाप।

अथ यमुनातीरवासिभिर्ऋषिभिर्विज्ञापिते लवणत्रासे शत्रुघ्न लवणहननाय-मादिश्य सीतामपदु खितो रामचन्द्र गृहात् प्रतस्थे। अवान्तरे स्वप्नोत्थिता अजानती तु शोकसञ्चारपूर्ण स्वभाग्यविपर्य्यय रघुकुलकुलाधिदेवताभूता सतो सीता चिराय स्निग्धगम्भीरनिर्घोष स्यन्दन लक्ष्मणाधिनायकमधिरुह्य "रघुकुलदेवताभ्य आर्य्यपुत्र-चरणकमलेभ्य तपोधनेभ्यश्च नम" इति अभीक्ष्णमुदीर्य्य चिराय वनाय प्रतस्थे। इत्यञ्च समाप्तिमगमत् प्रथमाङ्क ।

इत्यशेषशास्त्राटवीमत्तगणपञ्चानन कुलपतिकल्प "वि,भ" इत्युपनामक-
श्रीमज्जीवानन्दविद्यासागर-भट्टाचार्य्यविरचितायां तदात्मजाभ्यां
श्रीमदाशुबोधविद्याभूषण श्रीमन्नित्यबोधविद्यारत्नाभ्यां
परिवर्त्तित परिवर्द्धिताया सुखबोधिनीसमा
ख्यायाम् उत्तररामचरितव्याख्यायां
प्रथमोऽङ्क ॥ १ ॥

द्वितीयोऽङ्कः ।

(पञ्चवटीप्रवेश ।)

[नेपथ्ये ।] स्वागत तपोधनायाः ? (क)

अध्वगवेशा तापसी । [प्रविश्य ।] अये । वनदेवता—इय फल-कुसुमपल्लवार्घ्येण मामुपतिष्ठते ॥ (ख)

(क) स्वागतमिति ।—सु सुखेन आगतमागमन, सुखस्य आगत प्राप्तिर्वा, भवतीति शेष । निरुपद्रवमागमन विज्ञातुमेव हि लोकसदाचारसिद्ध कुशलप्रश्न , तवागमने कि क्लेशो जात इत्याकारिक । ("स्वागत कुशलप्रश्ने" इत्यमर ।) [आत्रेयी वासन्त्यो अनीचपात्रत्वात् सस्कृतभाषाप्रयोग न दोषावह] ।

(ख) अध्वनि पथि गच्छन्तीति अध्वगा पथिका , तदुपयुक्त वेशो यस्या सा। अध्वगाना पथिकाना वेश इव वेश यस्या तथाविधा, इति वा व्याससवचनम्। (' अध्वनीनोऽध्वगोऽध्वन्य पान्थ पथिक इत्यपि" इति कोष)। वनेति।—वनदेवता —वनाधिदेवताभूता काचित तापसी (इय हि वासन्ती नाम सीताया प्रियसखी, तत्तु ततीयाङ्क व्यक्त भविष्यति)। फलति।—अर्घ्यम् [अर्हते करणे घञ्, न्यङ्क्वादि त्वात कुत्वम् ततो दंगाथ यत। अथ शब्दस्तु सामग्री सयकार क्लीवलिङ्गवाय पठ्यते, [illegible]कारस्तु वेदान्तपारग इति]। पूजार्थोपचार ,—दूर्वाक्षतादि ("मूल्ये पूजा विधावर्घ" इत्यमर) फलानि च कुसुमानि च पल्लवाय तैरुपचितेन अर्घ्येण, फलकुसुम[illegible]किसलयपरिकल्पितनार्घ्यपात्रेण उपरुद्धहस्तेत्यर्थ । उपतिष्ठते— [illegible] माभिति शेष । अतिथिपूजनस्यावश्यकर्तव्यतया, वेदविदमभ्यागता मामव- [illegible] अर्घ्याद्यर्पणसमर्था मदभिमुखमागच्छतीत्यर्थ । "सर्वदेवमयोऽतिथि' [illegible]वचनात् तथा देवत्व बोध्यम्। ["उपाद्देवपूजा—" इति वार्तिकात्तङान्तेन [illegible]]। [illegible]त्रिविधोपकरणं यद्यपि शास्त्रेण अर्घ्यरचना विहिता, तथापि वनौकसां [illegible] वनभूमिसुलभ फलकुसुमपल्लवादिभिरर्घ्यदान न विरुध्यते ।— [illegible] पुष्पमल्लजै स्थलजैरपि। पत्र सर्व यथालाभ भक्तिमान् सतत [illegible]। [illegible]। अर्घ्यद्रव्याणि यथा—"आप क्षीर कुशाग्राणि दधि [illegible] । यवा [illegible] प्रकीर्तितम ॥" सिद्धा क ,— [illegible] पुष्प दधिदूर्वाकुशैस्तिलै । सामान्य सर्वदेवा-

वनदेवता । [प्रविश्य अर्घ्यं विकीर्य (ग)]—

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया, तोयं, यदपि तपसो योग्यमशनम्,
फलं वा, मूलं वा, तदपि न पराधीनमिह वः ॥ १ ॥

नामार्घोऽयं परिकीर्तितः ॥" इति देवीपुराणम् । रक्तबिल्वं—कुङ्कुमं "जाफ्रान्" इत्यपभाषा । "अभावे दधिदुग्धादेमानसं वा प्रकल्पयेत" इत्याचारादर्शः । "चन्दनोदकसंमिश्रं दत्त्वाऽर्घ्यंकुसुमं रवेः । मधुपर्कं—" इत्यादि स्मृतिः । "दधिसर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभिः । प्रोच्यते मधुपर्कस्तु—" इत्यादि च शास्त्रदर्शनात् प्राक्कालप्रथितपूजाद्रव्याण्येतान्यवगम्यन्ते]।

(ग) अर्घ्यमिति ।—विकीर्य—विक्षिप्य, तापसी प्रतीति शेषः ।

विवासितायाः सीतायाः द्वादशपरिवत्सरेषु व्यतीतेषु किं हि कुशलमयम् अकुशलं वा उदन्तजातं समजनि, तत् तावत् नीरसं वस्तु विष्कम्भकेणावेदयितुम् अभीप्सुः तत्प्रियसखी वनदेवता वासन्ती, इदानीं प्रसङ्गतः वेदविदमातिथ्यमतिथि समुचितं सत्कृत्य तस्याः स्वच्छन्दचारित्वं सुमनायमानत्वञ्च प्रार्थयते, यथेच्छमिति ।—इदं—मदीयमित्यर्थः, वनं, वो—युष्माकमेवेति विनयोक्तिः । [न तु युष्मदनुरूपमेतत् स्पृहणीयप्रासादादिपरिशोभितमिति गम्यते, "युष्मदो गौरवे" इति बहुत्वम्]। सत्यमेव, यथाशक्ति सज्जनसभाजनस्य समुचितत्वात् आह, यथेच्छमिति ।—यथेच्छम्—इच्छानतिक्रमेण, यथारुचि इत्यर्थः, भोग्यम् एतत्—मम परस्य वेति विभाव्यात्र नाभिलापसङ्कोचः करणीय इत्यर्थः । यद्यपि वनभूमेः साधारणधनत्वेन यथेच्छमित्यादि शङ्काऽवसरं नोदेति, तथापि स्वस्य वनाधिदेवतात्वेन वने मदीयस्वत्वं वर्त्तते इति प्रतिपादनाय तथोक्तिः । शङ्काकारणं किमपि नास्तीति भावपरिमाह, अयमिति ।—अयम्—उपस्थित इत्यर्थः, मे सुदिवसः,—भवत्याः समागमात् शुभदिनं समुदितमित्यर्थः । कथमस्मत्समागमात् सुदिवसः ?—तत्रार्थान्तरन्यासपूर्वकमाह, सतामिति ।—सन्तीति सन्तस्तेषां सतां—प्राणिनां, पुण्येन—सुकृतेन, कथमपि—देवानुग्रहादिकारणादित्यर्थः, सद्भिः,—साधुभिः, सङ्गः,—समागमः, भवति—जायते । [एतेन साधुसङ्गस्य दुष्प्रापत्वं ध्वनितम्]। हि एवार्थे । तत्र पुण्यप्रकर्षानुकूलदैवादन्यत् साधनान्तरं नास्तीति भावः । एवञ्च जन्मान्तरीणशुभकर्मपरिपाकवशादेव भवादृशीनां पुण्यश्लोकानां सन्दर्शनं भवति, तेन जायतेऽयं मे सुदिवस इति फलितार्थः । अत

तापः। किमत्रोच्यते ? (घ)—

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः

प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।

मयाऽद्य दुर्लभः साधुनैवाऽवसरः प्राप्त इत्याशयः। ("सन्ये साधौ विद्यमाने" "प्रशस्तेऽभ्यर्हिते च सत्" इत्युभयत्राप्यमरः)। यथेच्छभोग्यप्रकारं प्रदर्शयति, तरुच्छायेति। —तरोः छाया [जातावेकवचनान्तेन समासः। तरूणां छाया इति विग्रहे "छाया बाहुल्ये" (२।४।२२ पा०) इति सूत्रेण क्लीवत्वप्रसक्तिः]। तोयं जलं यदपि तपसः तपश्चरणस्य इन्द्रियसंयमादेश्चानुकूलतया योग्यं फलं वा मूलं वा अशनं, यत्किञ्चित् फलमूलादि भोज्यमस्तीति, तदपि तपस्वियोग्यं तपःसाधकानां समुपयुक्तम् इत्यर्थः, ["नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" (१।२।६९ पा०) इति सूत्रेणैकशेषैकवद्भावौ]। इह वने वो युष्माकं न पराधीनम् अनन्यायत्तं, स्वाधीनमिति निष्कर्षः, ततश्च आत्मद्रव्यवत् सर्वमेतत् यथेच्छं यथासुखमुपभुङ्क्ष्वेति भावः। अत्र तपश्चरणयोग्याशनानि सुलभानि कुतः ? तदेव दर्शयति,—तथा हि अत्र प्रच्छायशीतले तरुतले निषद्याऽध्वखेदं विनोदय, वनप्रसूनसुरभि स्वादु निर्मलञ्च निर्झरिणीसलिलं निपीय तृषामुपशमय, कन्दमूलफलानि च भुक्त्वा बुभुक्षां वारयेति तात्पर्यम्। [अत्र पूर्वोक्ते, "सता सह" इत्यादिना सामान्यरूपेणाद्यतन सुदिवसरूपस्य विशेषार्थस्य सोपपत्तिकत्वकरणात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। अपि च, परार्द्धे यथेच्छभोग्यत्वरूपकार्यस्य "न पराधीनम्" इत्यादिना अपराधीनत्वरूपकारणेन समर्थनात् कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासश्च। इत्यनयोः सजातीयसङ्करः। तथा "अद्य मे सुदिवसः" इत्यादिकं प्रति अधिकहेतोरनभिधानात् जायमानं निर्हेतुकत्वदोषशङ्का, "भवत्सन्दर्शनात्" इत्यादि गम्यमानहेतुना निरसनीया]। शिखरिणी वृत्तं—"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणात्। अस्य प्रस्तारस्तु ५८३३० तमः ॥ १ ॥

(घ) अत्र भवदनुपालिते वने आगमनात् सुदिवसोत्पादविषये इत्यर्थः, किमुच्यते ? किञ्चिद् वक्तव्यं नास्तीति भावः। सतां समागमादन्यत् नास्ति किमपि हितकरमिह सर्वेषामिति तु तात्पर्यम्।

ननु सज्जनसमागमेन किं फलं न प्रसूयते, अत्र तत्प्रतिपादनपरः सन् आह—सज्जनसंदर्शनेन तापसी वनदेवतायाः साधुत्वं सर्वदा प्रशंसितुमारभते, प्रियेति —साधूनां सतां स्वभाव इति भावः, वृत्तिर्वर्तनं स्वभाव इत्यर्थः,

पुरो वा पश्चाद्वा तदिदमविपर्य्यासितरसम्
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

[इत्युपविशत ।]

कायकृतव्यवहार इति यावत्, प्राचुर्येण बाहुल्येन प्रिया निरतिशयप्रीतिजनिका। तथापि वाचा कौर्य्य दोष स्यात् तदाशङ्कामपनयति, मधुर इति।—वाचि वाक्ये निजम मधमनप्रकार, अथार मितभाषित्वरूप इत्यर्थ, विनयेन शिष्टाचारभूयिष्ठतया अनौद्धत्येनेति यावत, मधुर सुखद, न तु अशिक्षितानां सदृशा वागिव नितरां चेतांसि व्यथयतीति भाव। माधवी हि नितरां कर्णामृतमेव भाषन्ते इत्याशय। सत्यमेव मनोहरी कल्याणत्वे सहज गतमत प्रवाह प्रवर्त्तयति।—मतिबुद्धि प्रकृत्या स्वभावेन कल्याणी जीवानां शुभकर्त्री, सततं जगतां शुभोत्पादने व्याप्ता इत्यर्थ। तथापि असत्सङ्गवशात तदन्यथा भवितुमर्हतीति शङ्का निरस्यति, अनवगीत इति।—परिचय प्रणय अनवगीत कपटादिदोषरहितत्वादनिन्दित समधिकत्वसाधक इत्यर्थ। सतां चरितं गर्हालेशविनाकृतत्वेनाकल्मष तेषां प्रणयित्वमाधिक्यस्येति भाव। तत् तस्मात पूर्व्वोक्तबहुलगुणसंगादित्यर्थ, पुर अग्रे सतां प्रणयस्येति शेष पश्चात परस्मिन वा प्रणयात् परत वा तत्र कश्चित विशेषो नास्तीति भाव, परिचयस्य तदभावस्य च उभयत्रैव समत्वात अकल्मषत्वात् प्रार्थनालेशरहितत्वाच्च सर्व्वदैकरूपमिति यावत। अविपर्य्यासित विपर्य्ययमप्राप्त रस अनुरागो यस्मिन् तत तथाक्त समरस नित्यप्रीतिकरमित्यर्थ, यत्र हि काचित प्रार्थना विद्यते तत्रैव पुर वा पश्चाद्वा इति शङ्का आयाति, साधौ आचरिते साध्वाचरणमसाधौ तु असाध्वाचरणमिति दर्शनात्, यत्र तु नैव तत्र तु किमपि फल पुरो वा पश्चाद्वा इति भावनाया इति तु तात्पर्य्यम्। अनुपधि अकपट विशुद्ध मल्या निर्दोषमिदं रहस्य साधारणैरन्यैरनिर्वचनीय चरितमित्यर्थ, विजयते सर्व्वोत्कर्षेण वर्त्तते ["विपराभ्यां जे" (१।३।१९ पा०) इति सूत्रेण आत्मनेपदम्]। साधुचरितवत नान्यत किमपि अवदातमखिललोकहितकरञ्चास्ति इति भाव। ("कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे" इत्यमर)। [अत्र प्रस्ततवनदेवताचरित्रोत्कर्षवर्णनप्रसङ्गेन सद्चरित्रवर्णनादुदात्तालङ्कार। अपि च सतां चारित्र्योत्कर्षं प्रति प्रियप्रायवृत्तित्वादिरूपैककारणस्य पर्य्याप्तत्वेऽपि कारणान्तराणां तत्करत्वेनोपादानात समुच्चयालङ्कारः, इयमपि मापिच्छेन मतर। साधूनामित्यनेन वनदेवताया साधुत्वाभि

वन । का पुनरत्रभवतीमवगच्छामि ? (ङ)

ताप । आत्रेयी अस्मि । (च)

वन । आर्य्ये आत्रेयि । कुतः पुनरिहागम्यते, किं प्रयोजनं वा दण्डकारण्यप्रवेशे ? (छ)

धानाभिप्रायात् प्रस्तुतत्वप्रतीतेर्नावाप्रस्तुतप्रशंसा शङ्कनीया, तत्र हि केवलाप्रस्तुतात् प्रस्तुतावगम इत्यवगन्तव्यम् }। शिखरिणी वृत्तम् ॥ २ ॥

(ङ) कामिति ।—अत्रभवती का इति विज्ञातुमिच्छामीत्यर्थः ।

(च) आत्रेयीति ।—ब्राह्मणोचितसंस्कारोपपन्ना, आत्रेयी नामाऽहमस्मीत्यर्थः । अत्रिगोत्रसम्भूतत्वात् तस्याः तथैव प्रसिद्धिः । तथा हि, आत्रेयः शुक्लयजुःसम्प्रदायप्रवर्त्तकः, वंशगणनायां "भरद्वाज आत्रेयात्, आत्रेयो माण्टेः" इति शतपथब्राह्मणे दर्शनात्, शुक्लयजुषां सम्प्रदायप्रवर्त्तकवंशगणनायाम् "आत्रेयीपुत्रादात्रेयीपुत्रः" इत्यपि प्राक्तनब्राह्मणे दृश्यते, अत एव भारतेऽप्युक्तः—'पुंसवनकर्मणि स्त्रीसंस्कारा इत्येनोक्त्वा तत्सन्निधानादत्र धर्मः स्त्रीप्रधान उच्यते" इति । आत्रेयीपदस्य गर्भिण्याद्यभिधायकत्वेन रूढत्वमपि दृश्यते, तथा हि यमः,—

"जन्मप्रभृतिसंस्कारैः संस्कृता ब्रह्मवत्त या ।
गर्भिणी वा तथा या स्यात् तामात्रेयीं विनिर्दिशेत् ॥" इति ।

(छ) आर्य्ये इति ।—भो आत्रेयि । विदुषि । कुतः कस्मात् स्थानात् इह अत्र वने आगम्यते भवत्येति शेषः । किमिति ।—दण्डकारण्यागमनं भवत्या किमर्थं स्वीकृतमित्यर्थः ।

इदानीमात्मनः दण्डकारण्यप्रवेशप्रयोजनमभिधत्ते, अस्मिन्निति ।—अस्मिन् प्रदेशे दण्डकारण्ये अगस्त्यादयः उद्गीथं प्रणवं सामवेदान्तर्गतगानविशेषञ्च विदन्तीति तथोक्ताः ब्रह्मविदः उद्गीथवाच्यपरब्रह्मविदः सामोपासनाशीलाश्च अगस्त्यप्रमुखाः अगस्त्यप्रभृतयो मुनयः इत्यर्थः, वसन्ति तिष्ठन्ति ।

आत्रेयी। अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्याम्
वाल्मीकिपार्श्वादिह पर्य्यटामि॥ ३॥

तथा हि छान्दोग्ये—"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरो ऽस्मिन्नन्तराकाशः तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" इति। साम हि पञ्चविधाः सप्तविधा वा अवयवाः सन्ति। तत्र तावत् साम्न आद्यो भागः प्रस्तोत्रा गेयः प्रस्तावनामा, द्वितीयो भाग उद्गात्रा गेय उद्गीथनामा, तृतीयो भागः प्रतिहर्त्रा गेयः प्रतिहारनामा, चतुर्थो भागः पुनरुद्गात्रा गेय उपद्रवनामा, पञ्चभि युगपद्गेयः निधननामा इति पञ्चविधः। गानारम्भकाले सर्वे ऋत्विग्भिः मिलित्वा हुङ्कारकरणरूपः हिङ्कारः। ओङ्कारपूर्वकत्वात् सर्वेषां वेदानां प्रणवरूप प्रस्ताव एव। इति सप्तावयवत्वमतद्द्विः सप्तपञ्चमुक्तं छान्दोग्ये। अगस्त्यप्रमुखाणां तेषा मुद्गीथविद्याया ब्रीक्षाया पाण्डित्यत्वात् तयाऽभिधानं सङ्गच्छते इति बोध्यम्। तत्र हि छान्दोग्ये उद्गीथोपासना बहुधा प्रदर्शिता, "इटौ पञ्चविधं सामोपासीत" इत्यारभ्य "वर्षति स उद्गीथः" इत्युक्तम्, "ऋतुषु पञ्चविधं सामोपासीत" इत्यारभ्य "वर्षा उद्गीथः" इत्युक्तम्। "पशुषु पञ्चविधं सामोपासीत" इत्यारभ्य 'गाव उद्गीथः" इत्युक्तम्। "प्राणेषु पञ्चविधं परोवरीयः सामोपासीत" इत्यारभ्य "चक्षुरुद्गीथः" इत्युक्तम्। इति बहुधा उद्गीथोपासना विहिता। एवं हि 'द्यौ उद्गीथः" "गाव उद्गीथः" "आदित्य उद्गीथः" इत्यादिना तत्तद्दृष्ट्योपासना बहुधा उक्ता, विस्तरभयात् सर्वंत्र नोदाहृता। एष हि सगुणब्रह्मोपासनाविधिः। एतेन तथाविधा हि दण्डकारण्यवासिन अगस्त्यप्रमुखाः बहव ऋषयः सामगाः सगुणब्रह्मोपासनशीलाः कस्मिंश्च आसन्निति ज्ञायते]।

तेभ्यः अगस्त्यप्रमुखेभ्यः ["आख्यातोपयोगे" (१।४।२९ पा०) इत्यपादानत्वात् पञ्चमी] निगमान्तविद्यां निगमा वेदाः तेषामन्ता चरमभागा उपनिषद इत्यर्थः, तत्प्रतिपादितां ब्रह्मविद्यामधिगन्तुमध्येतुं वाल्मीकिपार्श्वात् वाल्मीकेः अन्तिकादिह दण्डकारण्ये पर्य्यटामि तेषामाश्रममन्विष्य भ्रमामीत्यर्थः। (पुरा हि द्विविधाः स्त्रियोऽनुश्रूयन्ते, गृहमेधिन्यो ब्रह्मवादिन्यश्चेति। तथा हि स्मर्यते,—"द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च, तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं

वन। यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणाय उपासते, तत् कोऽयमत्र आर्य्याया दीर्घप्रवासप्रयासः ? (ज)

आत्रे। तत्र महान् अध्ययनप्रत्यूह इति दीर्घप्रवासोऽङ्गीकृतः। (झ)

वन। कीदृशः ?

स्वगृहे च भैक्षचर्य्या" इति। यमोऽपि,—"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनञ्च वेदानां सावित्रीवाचनं तथा॥" इति। अतः गृहवधूनामेव केवलं वेदाध्ययनं निषिध्यते इति गम्यते। नृसिंहतापनीयश्रुतिस्तु इत्थमेवाह, तथा हि,—"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति" इति। "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् मृतः सोऽधो गच्छति" इति निबन्धकृतामभिमतं व्याख्यानन्तु गृहिणीविषयकमेव न तु ब्रह्मवादिनीपरमवधेयम्। अत आत्रेय्याः परमब्रह्मवादिन्या वेदाध्ययनं न विरुध्यते इति बोध्यम्)। इन्द्रवज्रा वृत्तम्॥ ३॥

(ज) यदेति।—यदा—यतः, यदि पुनरित्यर्थः। [तावत् वाक्यालङ्कारे] अन्येऽपि मुनयः बहवः अध्येतारः, पुराणं प्राचीनं प्राचीनत्वादिगुणैः प्रथितं पूजितञ्च यथा तथा ब्रह्माणं वेदान् परमात्मानं वा वदति उपदिशतीति ब्रह्मवादी तं तथोक्तम्। तमेव प्रासिद्धं वेदवक्तारमित्यर्थः, प्रचेतसः वरुणस्यापत्यं पुमानिति प्राचेतसो वाल्मीकिस्तम्। ब्रह्मणो वेदस्य पारमन्तस्तत्र अयनं गमनं, प्रथमतः प्रभृति आ समाप्तेरविच्छिन्नाध्ययनं तद्धि साङ्गोपाङ्गवेदेषु सम्यग्व्युत्पत्तिसाधनमित्यर्थः, तस्मै। दृश्यते हि यदेव वनवासिनं गुरुसकाशमुपगम्य समसैव एव वेदमभ्यस्यन्तीति, यद्वा—ब्रह्मणः वेदस्य पारे अन्ते अयनं गमनं तस्मै, अखिलसाङ्गवेदानध्येतुमित्यर्थः। उपासते—सेवन्ते। दीर्घप्रवासः महान्तं कालं व्याप्य सुदूरे प्रदेशे अवस्थानमित्यर्थः, तदर्थमायासः श्रमः इति यावत्। किं फलमभिप्रेत्य भवत्या स्वदेशमुत्सृज्य एतावान् विदेशवासोऽङ्गीक्रियते इत्याशयः।

(झ) तत्रेति।—अध्ययनस्य वेदपाठस्य प्रत्यूहो विघ्नः, 'विघ्नोऽन्तराय प्रत्यूहः" इत्यमरः। तत्रान्तरे महान् जात इति शेषः। अतः तद्विघ्नापनोदार्थं, दीर्घप्रवासः—सुदूरे विदेशे अवस्थानमङ्गीकृतः स्वीकृतः। [अङ्ग इति स्वीकारार्थकमव्ययम्, अनङ्गमङ्गं कृतम् इति अभूततद्भावे च्विः प्रत्ययः]।

आत्रे। तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतः स्तन्यत्यागमात्रके वयसि वर्त्तमानं दारकद्वयमुपनीतम्। तत् खलु न केवलमृषीणामपि तु चराचराणां भूतानामान्तराणि तत्त्वानि उपस्नेहयति। (ञ)

वन। अपि तयोर्नामसंविज्ञानमस्ति? (ट)

आत्रे। तयैव किल देवतया तयोः कुशलवौ इति नामनी प्रभावश्च आख्यातः। (ठ)

(ञ) तस्य भगवतः वाल्मीकेः सविधे इत्यर्थः, केनापि देवताविशेषेण—भगवत्या भागीरथ्येत्यर्थः, सर्व्वेषु प्रकारेषु निखिलेषु विषयेषु, अद्भुतमाश्चर्य्यजनकमिति यावत्। स्तन्येति—स्तने भवं स्तन्यं क्षीरं तस्य त्यागः मातृस्तन्यपरित्यागोपलक्षितः कालः इत्यर्थः, स एव मात्रा कालपरिमाणं यस्य तस्मिन्, तदुचिते वयसि बाल्ये इति यावत्, वर्त्तमानं, यस्यामवस्थायां शिशुभिः स्तन्यपरित्यागः क्रियते तादृग्वयस्कमित्यर्थः। दारकद्वयं—शिशुयुगलम्। उपनीतम्—आनीय प्रदत्तम्। तत्—दारकद्वयम्। खलु—निश्चये। ऋषीणां तत्रत्यानाम् अपूर्व्वप्रतिभासन्दर्शनेन विमोहितानां तपोधनानां, न केवलं तेषामपि तु चराचराणां भूतानां स्थावरजङ्गमात्मकनिखिलजीवसङ्कुलभुवनत्रयस्य। आन्तराणि—अभ्यन्तरवर्त्तीनि, तत्त्वानि—भावान् अन्तःकरणवृत्तीरिति यावत्, उपस्नेहयति—स्नेहवन्ति करोति, [स्नेहवच्छब्दात् "तत्करोति" (ग०) इति णिचि इष्ठवद्भावात् मतुब्लोपे उपपूर्व्वकात् स्नेहिधातोः लटि रूपमेतदिति ज्ञेयम्]। तयोः दारकयोरवलोकितयोः सतां सर्वेषामेव चेतांसि सममेव वात्सल्यरसाप्लुतानि भवन्तीति भावः। ["महानध्ययनप्रत्यूहः" इतः प्रभृति "तस्य भगवतः केनापि" इत्यन्तेन सन्दर्भेण, पुरा अष्टावक्रमुखे प्रवेशात् प्रथमाङ्कोपक्षिप्तस्य अत एव किञ्चित् ज्ञायमानतया लक्ष्यस्य सीताविवासनबीजस्य इदानीन्तु आत्रेयीवृत्तान्तेन कथञ्चिदुन्नीयमानस्य दृश्यादृश्यरूपतया उद्भेदात् अत्र प्रतिमुखसन्धिरिति प्राञ्चः। तथाहि दशरूपकम्।—"लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत्" इति]।

(ट) अपीति।—अपीति—प्रश्ने। तयोः,—दारकयोः। नामसंविज्ञानं—नाम्नोरभिधानयोः संविज्ञानम् अवगतिः।

(ठ) तयैवेति।—देवतया—भागीरथ्येति भावः। तयोः,—दारकयोः, कुशश्च

वन। कीदृशः प्रभावः ?

आत्रे। तयोः किल सरहस्यजृम्भकास्त्राणि आजन्मसिद्धानि इति। (ड)

वन। अहो नु भोः! चित्रमेतत्।

आत्रे। तौ च भगवता वाल्मीकिना धात्रीकर्मवस्तुतः परिगृह्य पोषितौ परिरक्षितौ च, वृत्तचौडकर्मणोश्च तयोः त्रयीवर्जमितरा विद्याः सावधानेन परिनिष्ठापिताः, तदनन्तरञ्च गर्भैकादशे वर्षे चात्रेण कल्पेन उपनीय तौ त्रयीविद्यामध्यापितौ, न ह्येताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति। (ढ) यतः,—

—[illegible] इति तौ नामनी अभिधाने, तदभिधानप्रवृत्तौ हेतुमाह रघौ तत्रभवान् कालिदासः, तथा हि,—"स तौ कुशलवान्मृष्टगर्भक्लेदौ तदाख्यया। कविः कुश-लवादेव चकार किल नामतः॥" इति। प्रभावश्च—लोकातिशायिशक्तिश्च। आख्यातः,—उदीरितः। तौ किन्नामधेयौ लोकविलक्षणप्रभावसम्पन्नौ वा इत्यादि तु आदिष्ट भगवत्या भागीरथ्या तौ वाल्मीकये विद्यामध्येतुं प्रतिपादितौ इत्यर्थः।

(ड) इदानीं तयोः अलौकिकं प्रभावं विशदीकर्तुमवतारयति, तयोरिति।—तयोः दारकयोः कुशलवयोः सरहस्यानि—रहस्यं [illegible] गोप्यं प्रयोगसंहारकुशलमन्त्रजातमित्यर्थः, तत्सहितानि, जृम्भकास्त्राणि—जृम्भयन्ति विपक्षान् जृम्भोपलक्षितनिद्रादिवशान् कुर्वन्ति यानि, तथाभूतानि अपूर्वाणि अस्त्राणि, तानि हि कौशिकोपसम्प्राप्तानि कृशाश्वतनयभूतानि। पुरा किल देवानां रक्षणाय ब्रह्मादिभिः तपोधनैः तपस्तेजसा सम्भृततया ज्योतिर्मयाणि अस्त्रवर्गजातं शूयन्ते, आजन्मसिद्धानि [illegible] [illegible], सम्भावयामीत्यत्र जन्मतः प्रभृति लब्धानि, सहजात एव [illegible] इत्यर्थः। [अत्रेदं मुखसन्धिर्विरचितः प्रथमाङ्कादारभ्य "सर्वथेदानीं [illegible] इत्यादिपद्यस्य बीजाङ्कुरत्वेन [illegible] समुत्पन्न-[illegible] [illegible] वेदितव्यम्। तथा चोक्तं दर्पणे—'फलप्रधानोपायस्य मुख-[illegible] [illegible] [illegible] प्रतिमुखञ्च तत्॥' इति।]

(ढ) तौ चेति।—तौ कुशलवौ भगवता [illegible] वाल्मीकिना [illegible] [illegible] परिपालनादिकं तथा

भृतकर्मणा जायमानेति शेष, या वत्सलता—वात्सल्य स्नेह इत्यर्थ, तां परिगृह्य—प्राप्य, स्वीकृत्येति यावत्, पोषितौ परिलालितौ परिरक्षितौ परिवर्धितौ च, भगवान् वाल्मीकि विगतस्पृह सन्नपि तौ हि अलौकिकलावण्यप्रतिभालङ्कृतौ बालकं सदय स्वीकृत्य तत प्रभृति तत्सम्बन्धवागुरया विनिबद्ध सादर लालयति परिरक्षति च इत्याशय । ["धात्रीकर्मवस्तुत" इति पाठान्तर दृश्यते, तदर्थस्तु—धात्रीकर्मरूपात् वस्तुत व्यापारात् तथाविधव्यापारमारभ्येति यावत् इति ल्यब्लोप पञ्चमी]

वृत्तेति।—वृत्त समाहित चौड कर्म ययो तयो, यथाविधिनिष्पादितचूडाकर्मणोरित्यर्थ सुतौ, [चूडा प्रयोजनमस्य इति चूडाशब्दात् अण्, चूडाकरणरूप संस्कारविशेष । तत्कालमाह वशिष्ठ,—

"तृतीये पञ्चमेऽब्दे वा स्वकुलाचारतो हितम् ।
चौलं शिशूना यवेन स्वगृह्योक्तविधानत ।
आधानतो जन्मतो वा सप्तमाब्देऽपि कारयेत् ॥"

गुरुरपि,—"तृतीयेऽब्दे शिशोर्गर्भाज्जन्मतो वा विशेषत ।
पञ्चमे सप्तमे वापि स्त्रिया पुंसोऽथवा समम् ॥" इति ।

"वृत्तचूडौ" इति पाठे—वृत्ता यथाविधिनिष्पादिता चूडा ययो तौ, तृतीयाब्दे चूडाकरणसंस्कारसंस्कृतौ, स्वस्वकुलाचारानुसारत एकां तिस्र पञ्च वा शिखा वर्जयित्वा स्वगृह्योक्तविधिना शिरसो वापन हि चूडाकरणसंस्कार अभिधीयते]।

त्रयीति।—त्रयी सामऋग्यजूंषि, तां वर्जयित्वा, [वर्जयते णमुल्] यद्वा—त्रय्या वर्जो वर्जनं यस्मिन् कर्मणि तद् यथा तथा, उपनयनं विना वेदपाठानधिकारात्, तथा हि मनु,—"नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते । शूद्रेण हि समस्तावद् यावद्वेदे न जायते ॥" इति । उपनयनात् प्रभृति एव वेदाध्ययनस्य विधानादिति भाव । इतरा विद्या दण्डनीतिधनुर्वेदादय सावधानेन—अवधानेन सह वर्तमान तेनावहितचित्तेन सयत्नेनेत्यर्थ, ऋषिणा इति शेष । परिनिष्ठापिता,—यथाविधि साकल्येन समुपदिष्टा इत्यर्थ, समनन्तरञ्च—इतरविद्योपदेशात् परमित्यर्थ । क्षात्रेण कल्पेन—क्षत्रियाणामुपदिष्टेन विधिना, उपनीय—उपनयनसंस्कारेण संस्कृत्य। अत्र मनु,—"गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश ॥" इति । तौ—बालकौ, त्रयीविद्यां—श्रुतिम्, अध्यापितौ—पाठितौ, ["गतिबुद्धि—" (१।४।५२ पा०) इति सूत्रेण कर्मत्वम्] । अतीति।—अतिप्रदीप्ता विमला तीक्ष्णा च प्रज्ञा बुद्धि ययो ताभ्यां कुशाग्रैकधीभ्यां ["प्रज्ञामेधाभ्याम्" इति पाठे तु—नवनवोन्मेषशालिनी बुद्धि प्रज्ञा, धारणावती धी मेधा, तत्सायाव

वितरति गुरुः प्राज्ञे विद्यां यथैव, तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च तयोर्भूयान् भेदः फलं प्रति, तद् यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥ ४ ॥

बोधकुशला वा इति विग्रहः । एताभ्याम्—दारकाभ्यां सह, अस्मदादेः,—मम अन्येषाञ्च जडधियामित्यर्थः, अध्ययनयोगः सतीर्थीभवनम्, एकस्मिन् गुरौ सम्भूय ताभ्यां सहाध्ययनं न अस्ति न सम्भवति, अस्मात् प्रागेव बालाभ्यां ताभ्यां द्राक् पाठस्यावबोधात्, एतस्मान्नितरां वैलक्ष्यमादधातीति भावः ।

अस्माकन्तु जडधियां तथाविधविवेकाभावादेव निरपेक्षस्य गुरौ सदुपदेश-ग्रहणापाटवं, न तु तत्र तस्य कोऽप्यणीयान् पक्षपातोऽस्तीति सूचयितुमवतारयति, वितरतीति ।—गुरुरध्यापकः प्राज्ञे प्रज्ञावति शिष्ये यथा विद्यां वितरति ददाति, जडे अल्पबुद्धावपि शिष्ये तथैव अविशेषेणैवेत्यर्थः वितरति उपदिशति, न तु तयोः प्राज्ञजडयोर्ज्ञाने शास्त्रार्थबोधे शक्तिं सामर्थ्यं करोति जनयति, वा—अथवा, शक्तिम् अपहन्ति—विनाशयति । [खलु निश्चये वाक्यालङ्कारे वा] । ("निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरः) । प्राज्ञस्य ज्ञाने अपूर्व्वां शक्तिं न सञ्चारयति, जडस्य च ज्ञाने स्वाभाविकीं तदीयां शक्तिं न नाशयति, द्विविधावपि शिष्यौ गुरुणा यथाविधि अविशेषेणैवाध्याप्येते इत्यर्थः । यदि तत्र कोऽपि भेदो नास्ति तर्हि फलं प्रति कथं वैषम्यमागच्छति, फलभेदस्यैव हि कारणभेदकल्पकत्वनियमात्, अतस्तत्र कारणान्तरप्रतिपादनमुखेनाह, भवतीति ।—तयोः प्राज्ञजडयोः फलं प्रति फलं शास्त्रज्ञानरूपे इत्यर्थः, भूयान् महान् भेदः विशेषः भवति । धीमान् हि अनायासेन गुरूपदेशं लब्ध्वा झटित्येव तदवबोधकुशलो भवति, जडस्तु अमेधस्तया सर्वथैव तदवबोधविहीनः, तत्र तु स्वस्वविवेकस्यैव नियामकत्वमिति वेदितव्यम् । तत्—भेदभवनं, यथा ["तद्-यथा इत्यत्र तद्यथा" इति पाठान्तरे तत्—भेदभवनं, तथा—निश्चितमित्यर्थः । एतादृशपाठेऽस्मिंस्तु यथाशब्दाभावात् फलभेदभवनं मणिमृत्तिकाचययोः बिम्बग्राहित्वाग्राहित्वाभ्यां बिम्बप्रतिबिम्बभावगमनात् दृष्टान्तालङ्कारः] । शुचिः स्वच्छो मणिः इत्यत्र मणिः दर्पणचन्द्रकान्तादिः बिम्बोद्ग्राहे प्रतिबिम्बग्रहणे तदाकारे स्वरूपे इत्यर्थः प्रभवति समर्थो भवति, मृदां मृत्तिकानां चयः स्तूपः न प्रभवती-

वटु। अयमसौ अध्ययनप्रत्यूहः?

आत्रे। अपरश्च।

वटु। अथ अपरः कः?

आत्रे। अथ स ब्रह्मर्षिरेकदा मध्यन्दिनसमये नदीं तमसामनुप्रपन्नः, तत्र च युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श। आकस्मिकप्रत्यवभासाच्च दैवीं वाचमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत्। (ग)—

त्यर्थः। °सत्यपि समाने सर्वत्र गुरोरुपदेशे अन्तेवासिनां स्वस्वधियः तैक्ष्ण्यातैक्ष्ण्यादि वशात् फलवैषम्यं दृश्यते, तत्र तु गुरोः नापराध इति भावः। [अत्र भेदभवन शुचिर्मणिरिवेति साम्यावगमात् यथाशब्दोपादानाच्च श्रौती उपमा। परन्तु एकवाक्य गतसादृश्यप्रतीतौ उपमा, सादृश्यस्य भिन्नवाक्यगतत्वे तु दृष्टान्त एव इति नवीनानां मतम्। "शुचिर्मणिर्बिम्बोद्ग्राहे इव प्राज्ञ एव उपदेशग्रहणे प्रभवति, मृदां चय इव जडो न प्रभवति" इति तात्पर्येण उपमेयावगमादेकवाक्यगतत्वात् उपमा स्यात्, अन्यथा तु दृष्टान्तः। दण्डिमते दृष्टान्ताख्योऽलङ्कारभेदो नास्ति। तन्मते तु—प्रतिवस्तूपमाख्यः उपमाभेदोऽङ्गीक्रियते।—"साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा" इति लक्षयता दर्पणकृता तन्मतं नाङ्गीकृतमिति नव्यमते उपमाप्रतिवस्तूपमयोः विविक्तविषयता स्फुटैव। यथासंख्यञ्चानयोः प्राज्ञजडयोः अन्वयबोधात् यथासंख्याऽलङ्कारः तथा "विद्यां ददाति" "शक्तिं नापहन्ति" "मणिः प्रभवति" "मृदां चयो न" इति अन्वयपर्यालोचनात् शाब्दीपरिसंख्याऽलङ्कारश्च, इत्येषां सापेक्षत्वेन सङ्करः। "न ताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति। यतः' इत्युत्तरार्धे ' "यतः" इत्यनेन कारणतया पद्यप्रतिपाद्यार्थस्यावबोधनादप्रस्तुतप्रशंसाया नास्त्यवसरः। तस्यास्तु स्वतन्त्रप्रभा जडत्वेनाङ्गीकारात् प्रत्युत तथा प्रस्तुतत्वादिव नेयम्]। हरिणी वृत्तम्।—"नसमरसला गः षड्वेदैर्हयैर्हरिणी मता" इति लक्षणात्। प्रस्तारस्यास्य १२२३४तम इति ॥ ८ ॥

(ग) अथेति।—स प्राचेतस आख्यायकः, ("मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः)। ब्रह्मर्षिः,—वाल्मीकिः, ब्रह्मा चासौ ऋषिश्चेति विग्रहः ('ब्रह्मा विधिः प्रजापतिः' इत्यमरः)। मध्यन्दिनसमये—मध्यं दिनस्य [इत्यत्र षष्ठी समासः अलुक् च] तदेव समयस्तस्मिन् मध्याह्नसमये इत्यर्थः। 'माध्यन्दिन

"मा निषाद ! प्रतिष्ठा त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥ ५ ॥

इति।

सवनाय" इति क्वचित्क पाठ, तदर्थस्तु—मध्यन्दिनसवनस्थवगाहनकर्मणे इति]। तमसा—तन्नाम्नीं नदीम्। अनुप्रपन्न,—अनु गत इत्यर्थ। युग्मचारिणौ,—युग्म द्वन्द्व यथा तथा चरत [इति णिनि] युग्मीभूय चरतौ, मिथुनभावेन स्थितयोरित्यर्थ। क्रौञ्चयो,—जलचरविहगविशेषयो। [क्रौञ्ची च क्रौञ्चश्चेति तयो "पुमान् स्त्रिया" (१।२।६७ पा०) इति पुंलिङ्गैकशेष]। एक—पुंलिङ्गोहात् क्रौञ्चम्। व्याधेन—पुलिन्देन। विध्यमान—बाणेन निहन्यमानम्। आकस्मिक अकस्मात् दृष्टकारणं विनापि सम्पद्यमान अचिन्तितप्रसूत इत्यर्थ, प्रत्यवभास प्रकाशो यस्यास्ता तथोक्ता निर्हेतुकाविर्भूताम्। ["दैवीं वाचमव्यतिकीर्णवर्णाम्" इत्यधिक पाठ क्वचित दृश्यते, तदर्थस्तु—अव्यतिकीर्णा निराकाङ्क्षत्वादिदोषरहिततया सुविस्पष्टा वर्णा अक्षरपङ्क्तय यस्या तथाभूतामिति। "परिणताम्" इत्यत्र तु "परिच्छिन्नाम्" इति पाठ दृश्यते, उभयत्र तु विनिबद्धामित्येवार्थ]। आनुष्टुभेन—तत्सम्बन्धिना [स्वार्थिकोऽण्प्रत्यय] अष्टभि अष्टभि अक्षरै सख्यातैकैकचरणेन छन्दसा—पद्य रूपेण (छन्द पद्येऽभिलाषे च" इत्यमर)। परिणता—नियमिताम्। अभ्युदैरयत्—उच्चारयामास।

तदेव कथम्भूतमासीदित्यपेक्षायामाह, मा निषाद इति।—रे निषाद! त्व शाश्वती [शश्वत् भवा इत्यर्थे औत्सर्गिक अण्] निरन्तरा बह्वी, समा,—वत्सरान् चिरकालमिति यावत् [अत्यन्तसंयोगे द्वितीया] प्रतिष्ठा स्थितिमाश्रयमित्यर्थ, "ब्रह्मपुच्छ प्रतिष्ठा" इत्यादिश्रुतौ अन्यत्र च काव्यादिषु तथैव दर्शनात। मा अगम न प्राप्नुहि न कदाचित त्व निरुद्वेगमेकत्र वास प्राप्स्यसीति भाव। [अडागमश्छान्दस, यद्वा माङ् नाड् किन्तु तत्प्रतिरूपक माशब्द, माशब्दयोगादतोऽत्रप्रयोग सार्वकालिक। अत न माङ्योगे' (६।४।७४ पा०) इति नैव अडागमप्रतिषेध। यद्वा —'मा, मा, तु, अम, गम' इति च्छेद। नास्ति मा लक्ष्मीर्यस्य, तत्सम्बोधने, मा अम' अलक्ष्मीक! निषाद! प्रतिष्ठा तु मा गम कदापि न प्राप्स्यसीत्यर्थ। एवञ्च मत न एष चद्रन्ददर्शिरिति विभाव्यम] यत् यस्मात त्व क्रौञ्चमिथुनात् एकमेकं हतवान् ! (क्रौञ्च इत्यस्य "दाह्-द्रक" इति भाषा)। काममोहित च ...मिथुन-सम्भोगेच्छं, एव क्रौञ्चमवधी हतवानसि।

वन। चित्रमाम्नायादन्योऽयं नूतनश्छन्दसामवतार.। (त)

यद्वा,—श्लोकोऽयं रामायणस्य बीजभूतत्वेन व्याख्यायते। तथा हि,—मा लक्ष्मी निषीदति अस्मिन्निति वस्। मानिषाद। लक्ष्मीपते। राम। भगवत रामस्य विष्णारंशभूतत्वात् सीतायाश्च लक्ष्मीरूपत्वादिति भाव। यत् यस्मात् त्वं क्रौञ्चमिथुनात् मन्दोदरी रावणरूपात् राक्षसद्वन्द्वात् काममोहितम् एक रावणम् अवधी हतवानसि, तस्मात् शाश्वती समा वत्सरान् यावत्संसारमिति भाव, प्रतिष्ठां नित्यसुखाभिव्यक्तिसमखण्डानन्दमित्यर्थ, अगम लभस्व। ["भाव्यर्थो भूतवद्गृह्यते" इति न्यायात् प्रार्थनार्था लुङ्]। अथवा—हे अनिषाद। निषाद सदृश। (सादृश्यार्थे नञ्, वनवासित्वात निषादसम्मुखत्वाच्च रामस्य निषादतुल्यता)। क्रौञ्च मिथुनात् इति सङ्केतेन तारा वालिनो सूचना। भ्रातृपत्न्या रुमाया रममाणत्वात तस्य काममोहितत्व वेदितव्यम्। अपरञ्च—नितरां सादयति ध्वंसयति लोकानिति निषाद रावण, तत्सम्बुद्धौ, हे निषाद। रावण। यत यस्मात त्वं क्रौञ्चमिथुनात् अल्पीभावाद्यात् क्रुञ्चते पचाद्यचि क्रुञ्च तत स्वार्थे अण् प्रत्ययेन क्रौञ्च इति सिद्ध, तयोर्मिथुनं तस्मात राज्यच्यवनवासादिदुःखेन पर कार्श्यं गतात् स्त्रीपुंसयुगलात् सीतारामरूपादित्यर्थ एकं काममोहित पतिरत स्त्रीजन सीतामित्यर्थ, अवधी हरणादिना वधतुल्यमतिघोरदुःख प्रापितवानसि, तस्मात त्वं शाश्वती समा प्रतिष्ठा स्वस्त्रीसाहित्येनेहलोकस्थितिमित्यर्थ, मा अगम न प्राप्नुहि, अचिरेण स्त्रिया वियुज्य म्रियस्वेति काव्यार्थ सूचित। यथा भगवान् रामभद्र त्वया सीताविरहित कृत, सा च सती रामविनाकृता, तथा त्वमपि स्वभार्यया विरहितो भव, सा च त्वया विरहिता चिर वियोगशोकार्त्ता भूयादिति तु निर्गलितार्थ।

अत करुणो रस, आलम्बनविभाव क्रौञ्च, तस्य च निषादकृत वध उद्दीपन विभाव, सहचरीक्रन्दितस अनुभाव, विषादचिन्तादयश्च व्यभिचारिण, एतैश्च रस परिणीपत्वमगात इति। तथा हि ध्वनिकार,—

"काव्यस्यात्मा स एवार्थस्तथा चादिकवे पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थ शोक श्लोकत्वमागत॥"

विविधविशिष्टवाच्यवाचकरचनाप्रपञ्चकरुण काव्यस्य स एवार्थ सारभूत सन्निहित सहचरीविरहकातरक्रौञ्चाक्रन्दजनित ... एव श्लोकतया परिणत॥ ५॥

(त) चित्रमिति।—आम्नाय गुरुत ... अधिगम्य यथाविधि अभ्यस्यते

र्षाविः। तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्द-ब्रह्मप्रकाशमृषिमुपसङ्गम्य भगवान् भूतभावनः पद्मयोनि-रवोचत्,—"ऋषे! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि, तद् ब्रूहि

इत्यासायी वेदमस्मात् इत्यर्थः अन्यः—अन्यविधोऽयं, नूतनः,—अभिनवः। छन्दसां नवतारः—प्रकाशः। मन्त्रादिरूपवेदभागानामपि छन्दोबद्धतया, वैदिकानि यावन्ति एव छन्दांसि अनियतपादवर्णस्वरयतिदोषदुष्टानि, ततः पुराऽनुष्टुप्छन्दसोऽनियत-प्रयोगात् प्रतिपादम् अक्षराणां नियतत्वेन वैषम्यात् सम्यक् संस्काराभावाच्चास्य न श्लोकस्य तदिमलक्षणतया नूतनत्वनिर्देशः। यद्यपि श्रुतौ एवंविधे बहूनि छन्दांसि अनुष्टुप् पङ्क्त्यादौ लोकग्रथितमस्त्येव तथापि प्रसिद्धेरभावात् "आम्नायादन्योऽयम्" इत्युक्तम्। एवंविधानां वृत्तानां श्रुतौ प्रायशः प्रसिद्धिर्हश्यते तथाहि मुण्डकोपनिषत्,—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥" इति।

(८) तेनेति।—तत्समयमभिव्याप्येत्यर्थः [प्रकृत्यादित्वात् तृतीया]। आवि-र्भूतेत्यादि।—आविः सम्यक् आविर्भूतः शब्दरूपब्रह्मणः प्रकाशः अनुष्टुप्छन्दोरूपेण "मा निषाद" इत्यादिरूपाम्नायकल्पस्य उदयः नवीभूततया प्रथमावतारः यस्मात् स तथो-क्तम्। ऋषिं—वाल्मीकिम्। उपसङ्गम्य—तत्समीपमेत्य। भूतभावन इति।—भूतेन अनुध्यानेन अभिध्यायेत्यर्थः स्वात् शरीरादिति शेषः, तथा च मनुः—'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः' इति। भावयति सृजतीति तथोक्तः यद्वा भूतं सत्त्वप्रतिरक्तमिति यावत् भावना अध्यवसायः सङ्कल्पः वा यस्य तथाविधः, अथवा भूतानि प्राणिसङ्घान् भावयति सृजति पालयति च यः तथोक्तः, सर्वप्राणि-स्रष्टेत्यर्थः। पद्मयोनिरिति—पद्मं विष्णुनाभिकमलं योनिः उत्पत्तिस्थानं यस्य स तथोक्तः ब्रह्मा इत्यर्थः। [पुरा किल "अहं श्रेष्ठः, मत्तो मदुदरमध्ये ब्रह्माण्डमस्ति" इत्युक्त्वा विवदमानयोः विष्णुब्रह्मणोः मध्ये ब्रह्मणः उदरमध्यं दृष्ट्वा निर्गत्य विष्णुरुवाच— "भोः, त्वदुदरे एक ब्रह्माण्डम् मदुदरे अनन्तब्रह्माण्डानि पश्य।" अथ तदेत्युक्त्वा ब्रह्मा यावत् विष्णूदरं प्रविवेश विष्णुर्यावत् समस्तानि इन्द्रियद्वाराणि निरुद्धवान्। ततः निर्गमनाय ब्रह्माणमुवाच विष्णुः—"भो ब्रह्मन्। यद्यत्रैव गच्छसि चेत्, तर्हि त्वां नैव विद्यामि मानदां सम्भावय"। अथ तदेत्युक्ते ब्रह्मणि स्वनाभिपद्मेन पुष्पवृन्त निर्गमद्वारमकरोत् विष्णुः। अतः ब्रह्मणः पद्मयोनित्वम्। इति ब्रह्मवैवर्तवार्ता अत्र अनुसन्धेया।] प्रबुद्धः—प्रबुद्धज्ञानवान्। वागात्मनि—वाङ्मये। ब्रह्मणि—

रामचरितम्। अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु, आद्यः कविरसि" इत्युक्त्वा तत्रैवान्तर्हितः। अथ भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्त्तमितिहासं रामायणं प्रणिनाय। (थ)

सामादिसमाम्नाये, ("वेदस्तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः" इत्यमरः।) अव्याहतेति।—अव्याहतम् अप्रतिहतं ज्योतिः प्रकाशो यस्य तत्, अकुण्ठितं देदीप्यमानञ्च। आर्षम्—ऋषीणामिदं मनुष्येषु अदृष्टचरं योगजमित्यर्थः। ते चक्षुः प्रतिभातु—अव्याहतं सत् ते ज्ञानचक्षुषी ज्योतिर्दुरवगाहमप्यर्थं प्रविशतु प्रकाशयतु चेत्यर्थः। इतः परं तव किमपि अज्ञातं न स्थास्यति, योगजसन्निकर्षेण भवान् सर्वमपि परोक्षं वस्तु, प्रत्यक्षवत् द्रक्ष्यतीति भावः। ["ते प्रातिभं चक्षुः" इति पाठः क्वचित् दृश्यते, तदर्थस्तु—प्रतिभा, नवनवोन्मेषशालिनी प्रज्ञा, तदात्मकमित्यर्थः]। अन्तर्हितः,—अदृश्यतां गतः। अथ—अनन्तरम्। प्राचेतसः—वाल्मीकिः। शब्दब्रह्मणः,—वेदस्य। तादृशम्—"मा निषाद" इत्यादिरूपम्। विवर्त्तं—परिणामं रूपान्तरमिति यावत्। यद्यपि वेदान्तेषु विवर्त्तशब्दस्य "अतत्त्वतः अन्यथा प्रथा" इति व्याख्यातं, तथापि तस्य तत्र अन्यथाख्यातिरूपतया, पारिभाषितत्वात्, तत् सारूप्यमादायैव प्रकरणानुरोधादेव व्याख्यातम्। इतिहासं—पुरावृत्तम्। [इतिह पारम्पर्य्योपदेशः आस्ते अस्मिन्निति व्युत्पत्त्या इतिहशब्दात् आस्ते घञ्]। रामायणं—रामः एवायनम् उपजीव्यत्वेन आश्रयो यस्य तथाभूतं करुणरसमयं महाकाव्यमित्यर्थः। प्रणिनाय—रचयामास। महात्मना वाल्मीकिना इदानीं रामायणरचनयैव कालो नीयते, अध्यापनावसरः तस्य इदानीं नास्तीति गम्यते, अयञ्चापरः प्रत्यूहः इति भावः। तथा च रामायणम्—

"तमुवाच ततो ब्रह्मा प्रहसन् मुनिपुङ्गवम्।
श्लोक एव त्वया बद्धो नात्र कार्य्या विचारणा॥
मच्छन्दादेव ते ब्रह्मन्! प्रवृत्तेयं सरस्वती।
रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम!॥
* * * *
न ते वागनृता काव्ये काचिदत्र भविष्यति।
कुरु रामकथां दिव्यां श्लोकबद्धां मनोरमाम्॥" इति १।२।३८।

वन । हन्त तर्हि पण्डित ससार ॥ (द)

आत्रे । तस्मादवोच, "तत्र महानध्ययनप्रत्यूहः" इति ।

वन । युज्यते ।

आत्रे । विश्रान्ताऽस्मि, भद्रे! सम्प्रति अगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वन । इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरी-तीरेण । (ध)

आत्रे । [सवाष्पम् ।] अपि एतत् तपोवनम्? अपि एषा पञ्च-वटी? अपि सरिदियं गोदावरी? अपि अयं गिरिः प्रस्रवणः? अपि वनदेवता जनस्थानवासिनी वासन्ती त्वम्? (न)

(द) हन्तेति। हन्त—हर्षे ("हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः" इत्यमरः)। तर्हि—तदा। ससार—पण्डितो जात इति शेषः। अधुना स भगवान् [illegible] महत इति भावः। [illegible] वाल्मीकेः रामायणरचनायां प्रवृत्तिदर्शनात् [illegible] पण्डितत्वं बोध्यम्। यद्यपि [illegible] वेदाः सन्ति, तथापि, "स्त्रीशूद्र[illegible] न श्रुतिगोचरा" इत्यादिदर्शनात् त्रैवर्णिकानामेव तत्र श्रवणाधि-कारः [illegible] तत्सार्वविद्यारित्वेन विद्यावत्त्वं, परन्तु इतिहासस्य रामा-[illegible] [illegible] तुल्यतया श्रवणाधिकारात् [illegible] । एवञ्च [illegible]तिहासात्मकस्य रामायणस्यानु-[illegible] वेदान् [illegible] सर्व एव [illegible] इति निष्कर्षः ।

वास। अस्ति एतत् सर्वम्। (प)

आत्रे। वत्से जानकि।—

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव नः करोति॥६॥

सर्व्वत्रैव अपि प्रश्नार्थबोधकमव्ययम्। "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि" इति)। विन्ध्याटव्या दक्षिणाहि जनस्थानप्रान्तवर्त्तिप्रस्रवणगिरिनिर्झरिणीतीरस्थं शमिभि वैखानसैः निषेवितं प्रसिद्धं तपसे वनम्। तद्दक्षिणा गोदावरीतीरस्थायिनी पञ्चवटी। अपि च, तद्देशं निकषा, यदुपत्यकापरिसरारब्धकल्लोलिनी नाना विहगकुलनिषेविता स्निग्धसलिला गोदावरी यत्कन्दरमुखरा प्रवहन्ती, स जन स्थानमध्यगतः सततवर्षुकमेघमेदुरितः गिरिः प्रस्रवणः, तत्रो सीतारामयो निरतिशयं प्रीतिमुत्पादयामास, तत्र किलैषा अधिदेवताभूता वासन्ती तौ गमूय माणा आत्मानं विनोदयन्ती सुचिरं सुखेन कालं निनाय, एतदखिलमनुध्यायन्ती परमविदुषी आत्रेयी मुहुः सवाष्पगद्गदं विललापेति तात्पर्य्यम्। [अत्राभीष्टस्य तपोवनस्य बहुकालमदृष्टत्वेन नष्टप्रायत्वात, तस्येदानीमन्वेषणपरत्वेनैतद्वचनम् "अप्येतत तपोवनम्" इति। एतत्, परिसर्परूपं प्रतिमुखाङ्गं वेदितव्यम्। तथा च दर्पणे—"इष्टनष्टानुसरणं परिसर्पश्च कथ्यते" इति]।

(प) अस्तीति।—एतत् तु सत्तास्वीकारवाचकमव्ययम्। यदात्थ तत तथैव इत्यर्थः।

इदानीमनुस्मृताया विवासिताया सीताया अत्याहितमाशङ्कमाना परं निर्व्विण्णा आत्रेयी तदुद्बोधकानि तानि तानि वस्तूनि सन्दृश्य निर्भरं विलपति, स इति।— प्रसङ्गादागता प्रासङ्गिक्यः तासां प्रसङ्गादुत्थितानामित्यर्थः,कथानां प्रश्नप्रतिवचनक्रमेण प्राप्तानामिति यावत, त्वत्सम्बन्धिवाक्यानां विषयः प्रतिपाद्यः त्वया एतत्कृतमित्यादि प्रकारेण वर्णितः सम्प्रति तु प्रत्यक्षविषयीभूत इत्यर्थः स एष ते तव वल्लभः प्रियो बन्धुवर्गो वासन्तीप्रमुखः ["वल्लभशाखिवर्ग" इति पाठे—सीताया स्वहस्तवर्द्धित त्वात प्रीतिप्रदत्वम्] दृश्यमानः विलोक्यमानः सन् नामैव शेषो यस्याः तथोक्ता नाममात्रावशिष्टा न तु शरीरेणेति यावत्, मृतामपीत्यर्थः, त्वां नः अस्माकं प्रत्यक्ष दृष्टामिव प्रत्यक्षं दृष्टा तामिव साक्षात् दृक्सम्बद्धामिव साक्षादुपस्थितामिवेति यावत्, करोति। अत्र पुनः वनदेवता जनस्थानखण्ड गोदावरीप्रभृतिषु तत्तत

वास। [सभय स्वगतम्।] कथ नामशेषामित्याह ॥ [प्रकाशम्।]
आर्य्ये। किम् अत्याहित सीतादेव्या. ? (फ)

आत्रे। न केवलमत्याहित सापवादमपि। (ब)

वास। कथमिव ?

[आत्रे। कर्णे एवमेवम्।] (भ)

वास। अहह। दारुणो दैवनिर्घात:। (म) [इति मूर्च्छति।]

आत्रे। भद्रे। समाश्वसिहि समाश्वसिहि।

वास। हा प्रियसखि। हा महाभागे। ईदृशस्ते निर्माण-

प्रियवन्तुनातञ्च सदृश्य मृतामपि ता स्नेहातिशयात जीवितामिवावलोकयामीति भाव। [अत्र वाच्या क्रियोत्प्रेक्षा, करोतीवेति परात्मना सम्भावनात्]। अत्र प्रथममुपेन्द्रवज्राङ्गत्वात कीर्त्तिनाम उपजाति वृत्तम् ॥ ६ ॥

(फ) नामशेषामिति श्रुत्वा सोत्कण्ठ प्रकाशमभिधत्ते, आर्य्ये। इति।—किमिति प्रश्न। अत्याहितम्—अमङ्गल, प्राणहानिरिति भावार्थ। अत्ययमाधीयते मनो यन्निवारणाय तदित्यर्थ। तथा चामर,—"अत्याहित महाभीति कर्म जीवानपेक्षि च" इति।

(ब) न केवलमिति।—अत्याहितन्तु जातमेव, नैतावदेव पर्य्याप्त परन्तु अपवादसहितमेव तदुदीयमानमभूत इत्यर्थ। अपवादसहितमेव तदत्याहितम् [illegible] जायतेति चूर्णकाभिप्राय।

(भ) एवमेवमिति।—सीताविवासनव्यापारस्य पौनरुक्त्यपरिहाराय आलङ्कारिकशास्त्रानुरोधाच्च कर्णे कथनम्। एतत् प्रपञ्चित प्राक्।

(म) अहहेति।—अतीवखेदसूचकमव्ययमेतत। दारुण,—दु सह, अरुन्तुद इति [illegible]। दैवनिर्घात —दैवस्य भाग्यस्य निघात [illegible] न केवल सीताया इदानीं [illegible]पि। दैवकृतवज्राघातसदृशोऽयमाघात इत्यर्थ। ('निर्घातो विद्युदुल्कादौ-राघात' इत्यमर)।

(य) [illegible]—प्रियसखि! [illegible] इत्यर्थ। महाभागे—महाभाग्यवति! [illegible] भाव। ते—तव, निर्माणस्य [illegible] एतदर्मानशीलनन्तिनदनाथमेव त्व [illegible] निर्घातदपातनर्मिति तात्पर्य्यम्। [अत्र

भाग:॥ रामभद्र! रामभद्र! अथवा अलं त्वया॥ आर्य्ये आत्रेयि! अथ तस्मादरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः? (च)

आत्रे। नहि नहि।

वास। हा कष्टम्! आर्य्यारुन्धती-वशिष्ठाऽधिष्ठिते रघुकुलगृहे जीवन्तीषु च प्रवृद्धराज्ञीषु कथमिदं जातम्? (र)

करुणो रसः, दैवनिन्दादिभिरनुभावैः विषादचिन्तादिभिश्च व्यभिचारिभिः स्थायिभावः शोकः स्फुटीक्रियते]। रामभद्र! इति शोकाद्विरुक्तिः। [अत्र "हा रामभद्र!" इत्यादिवचनस्य साक्षात् निरतिशयशोकोद्रेककरत्वेन वज्रवत् दुर्विषहदुःखप्रदत्वात् अतिकठोरवचनमेतत् वज्रनामकं प्रतिमुखाङ्गमुदीर्यते।—"प्रत्यक्षनिष्ठुरं वज्रम्" इति साहित्यदर्पणे]। केवलमलीकलोकापवादमाकर्ण्य प्राणसमाम् अकलुषां जानकीं विजने वने विहाय अतीव विगर्हितं कृत्यमनुष्ठितवानसीति भावः। अथवेति।—अलं त्वया निन्दितेनेत्यर्थः, निर्ममस्य तव निन्दया इदानीं किमपि फलं नास्तीति भावः। अथ कथञ्चित् शोकमङ्गीभमपनीयाह, आत्रेयीति।—अथ—अतःपरं, तस्मादरण्यात्—वाल्मीकितपोवनोपकण्ठात्, परित्यज्य सीतामिति शेषः। अति शोकोद्दीपकत्वेन जानकीनामग्रहणं नाकारीति सुधीभिरवधेयम्। निवृत्ते लक्ष्मणे—सौमित्रौ प्रस्थिते सतीत्यर्थः। किं वृत्तं—का दशा समजनि। इति काचिदस्ति प्रवृत्तिः,—तद्विषयिणी काऽपि कथा तव विदिता अस्ति किमु? इत्यर्थः। ("वार्त्ता प्रवृत्तिर्वृत्तान्त" इत्यमरः)। तद्विषयिणी कापि कथा श्रूयते किम इति प्रश्नार्थः।

(र) हा कष्टमिति।—अतिविषादसूचकमव्ययम्। आर्य्येत्यादि।—आर्य्याभ्यां कर्त्तव्याकर्त्तव्यनिर्णयपूर्व्वकप्रकृताचारस्थिताभ्याम्, अतमैनिरन्तितेषु गृहेषु काऽपि अशुभोत्पत्तिर्भवितुं न हि अर्हतीति भावः। अरुन्धत्या कुलगुरुपत्न्या वशिष्ठेन गुरुणा, अधिष्ठिते अधिनायकभमिकार्गत्य सततं सदुपदेशदानेन सर्पाध प्रवर्त्य सौभाग्यलक्ष्मीमानीयमाने इत्यर्थः। ["अधिष्ठितम्" भावे निष्ठाया न नास्ति। यत्र अतीन्द्रियप्रभाववान् गुरुः स्वयं सम्मानतापरः सपत्नी पुरस्तात् स्वयं तिष्ठति, तत्र कुलं कथमेवं पत्नीनिगमं जातं, इति सूचयितुं अत्रारुन्धती नामग्रहणं कृतम्]। रघुकुलगृहे—रघूणां रघुवंशीयानां यत् कुलमन्ववायं तेषां यद् गृहं तस्मिन्, गृहमन्तिततनिभपितोदवमिते इत्यर्थः। तस्मिन् कथं वृद्धासनेषु सुतिनं कृतिनश्च रामभद्रस्य अशरणाया सीताया विवासनं सुघोरम्

याते। ऋष्यशृङ्गसत्रे गुरुजनस्तदा आसीत्। सम्प्रति तु परिसमाप्तं तद् द्वादशवार्षिकं सत्रम्, ऋष्यशृङ्गेण च सम्पूज्य विसर्जिता गुरवः, ततो भगवती अरुन्धती "नाहं वधूविरहिताम् अयोध्यां गमिष्यामि" इत्याह, तदेव राममातृभिः अनुमोदितम्। तदनुरोधाद्भगवतो वशिष्ठस्य परिशुद्धा वाचः,—"यथा वाल्मीकि-तपोवनं गत्वा तत्र वत्स्याम" इति। (ल)

एतदन्याय्यं समाचरितमिति तात्पर्य्यम्। ["रघुकदम्बकेषु" इति पाठान्तरं दृश्यते, तदर्थस्तु—रघूणां रघुवंशोद्भवानां कदम्बकानि समूहा तेषु]। प्रवृद्धासु—वर्षीयसीषु मातृस्थानीयासु वयोवृद्धासु चेति प्र शब्दार्थः राज्ञीषु महाराजस्य स्वर्गगतदशरथस्य पत्नीषु कौशल्यादिषु [अत तासामाज्ञा अनुल्लङ्घनीयेति सूच्यते]। जीवन्तीषु—प्राणितीषु, अतस्तासु वर्त्तमानासु किमपि अकृत्यमुत्पादयितुं नालमित्याशयः। कथमिदं जातं—केन हेतुना तैः सीताविवासनात् रामभद्रः न निवारितः ? इति। [सन्दर्भेणानेन प्रथमाङ्कोपक्षिप्तबीजमुद्घाटितम्। विष्कम्भकस्य हि वृत्तानां वर्त्तिष्यमाणानाञ्च कथांशानां निदर्शकत्वात्]।

(ल) अथ वर्त्तिष्यमाणकथांशं चतुर्थाङ्कोपक्षिप्तं प्रस्तोतुमारभते, ऋष्यशृङ्ग-सत्रे इत्यादिना।—गुरुजनः—पूज्यवर्गः वशिष्ठकौशल्याप्रभृतयः इत्यर्थः। ऋष्य-शृङ्गसत्रे—जामातुः द्वादशवार्षिके यज्ञे। तदा—रामकृतसीताविवासनसमये। परिसमाप्तं—सम्पूर्णम्। द्वादशवार्षिकं—द्वादशभिः वर्षैः सम्भूतं [तद्धितार्थो द्विगुः "कालात् ठञ्" (४।१।११ पा०) इति ठञ्प्रत्ययः] सत्रं—यज्ञः। विसर्ज्जिताः,—स्वगृहं प्रति प्रयाणाय अनुमोदिताः। गुरवः—वशिष्ठादयः। वधूविरहिताम्—वध्वा स्नुषया सीतयेत्यर्थः, विरहितां—शून्याम् अधिदेवतापरित्यक्तामिति यावत्। राम-मातृभिः—कौशल्यादिभिः, तदेव—तथाविधमरुन्धतीवचनमेव, अनुमोदितं—सादरं स्वीकृतं, सम्यक् अन्तःकरणेन समर्थितञ्चेत्यर्थः। तदनुरोधात्—तासामरुन्धती-कौशल्यादीनाम्, अनुरोधात्—अभ्यागमात्। परिशुद्धाः,—सर्वथा निर्दोषाः स्पष्टा इति यावत्। यथा—एव प्रदेशे इत्यर्थः वाल्मीकितपोवनम् अस्तीति शेषः। यत्र हि सीता निवसति तत्रैव वयं वत्स्याम अन्यत्र गत्वा अलम् इति। एतानि सर्वदैव भगवत वशिष्ठस्य सर्वदैव तथ्यानि वचनानि रूपविशेषात् चतुर्थाङ्के सुस्फुट विहितानि।

वास। अथ स राजा किमारम्भः सम्प्रति ? (व)

आत्रे। तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः।

वास। हा धिक्! परिणीतमपि !! (श)

आत्रे। शान्तं पापम्। (ष)

वास। का तर्हि यज्ञे सहधर्मचारिणी ? (स)

आत्रे। हिरण्मयी सीताप्रतिकृतिः। (ह)

(व) अथेति।—आरभ्यते क्रियते इत्यारम्भः कर्म, कः आरम्भोऽस्येति किमारम्भः, कस्मिन् कर्मणि व्यापृत इत्यर्थः। प्रजानुरञ्जनार्थं गृहलक्ष्म्या अपि सीताया विवासनात्, नवे राज्येऽभिषिक्तस्य रामस्य राजेति विशेषणं साक्षेपोल्लुण्ठनोक्तिपरं वेदितव्यम्। सीताविवासनसमये, "एष ते नूतनः राजा रामः समाज्ञापयति" इति स्वयमेवोक्तं रामभद्रेणेति विभाव्यम्।

(श) हेति।—हा धिक्—कष्टसूचकमव्ययम्। परिणीतमपि।—विवाहोऽपि कृतः। न केवलं निरपराधां पत्नीं वनाय विसृज्य कृतकप्रणयित्वेन आत्मनः लघुचेतस्त्वं प्रख्यापितम् अपि तु स्त्र्यन्तरस्वीकारोऽपि कृत इत्यपिशब्दार्थः। [एतदेव न निरति शयाक्षेपकारणमिति गम्यते। "सस्त्रीको धर्ममाचरेत" इति स्मरणादश्वमेधादिषु च क्रतुषु अपत्नीकस्याधिकारविरहात्, "अश्वमेधः प्रक्रान्तः" इति आत्रेयीवचनेन राज्ञः सस्त्रीकत्वमपि ध्वनितम्। अत एवैतद्वासन्तीवचनस्य परिणयान्तरमन्तरेण तादृशं यज्ञानुष्ठानस्यावैधत्वमित्याशयः स्वीकृतः]।

(ष) शान्तमिति।—पापं—पापोत्पादकमित्यर्थः, पापवदिति यावत्, श्रवणा दपि पूतचेतसं सपापं करोति, अत एतत्, शान्तम्—अलीकम्, न वक्तव्यमित्यर्थः। रामेण सहधर्मचारिणीं सीतां विवास्य न हि परिणयान्तरं कृतं, तथात्वे नैतत् नो निर्भरं मनस्तापमासादयेत इति सन्दर्भार्थः। ["शान्तं शान्तम्" इति पाठे—एतादृशा ऽशिष्टाचारनिर्वचनं न कदाचित् सम्भवति रामभद्रस्य]।

(स) केति।—तर्हि—यदि, रामेण न परिणीता तदेत्यर्थः। यज्ञे—अश्वमेधे, का सहधर्मचारिणी—धर्मः वेदविहितम् इष्टसाधनं कर्मेत्यर्थः, चरति अनुतिष्ठति या, सह पत्येति शेषः, सा, अभिन्नतया धर्मकारिणी धर्मपत्नीत्यर्थः।

(ह) हिरण्मयीति।—हिरण्यस्य विकारः इति [विकारार्थे मयट्, "दाण्डिनायन—" (६।४।१७४ पा०) इत्यादिना यलोपः निपातः] सुवर्णमयी,

वास। हन्त भो.।—(क)

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ ॥ ७ ॥

स्वर्णनिर्म्मितां यावत्, सीताप्रतिकृतिं,—सीताया प्रतिमूर्त्तिं । विहितद्रव्याऽसम्पत्तौ प्रतिनिधिविधाने कात्यायनः,—

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥" इति ।

अपि च गरुडपुराणम्—"भार्य्या भर्त्तृव्रतं कुर्य्याद् भार्य्यायाश्च पतिस्तथा ।
असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते ॥" इति ।

[अत्र "हिरण्मयी सीताप्रतिकृतिः" इत्येतद्वचनस्य उत्कृष्टतरोत्तरप्रदत्वेनात्यनुराग-प्रकाशकत्वात् प्रगमनं नाम प्रतिमुखाङ्गं वेदितव्यम् । "—प्रगमनं वाक्यं स्यादुत्तरोत्तरम्' इति साहित्यदर्पणे]।

(क) हन्तेति।—हर्षविषादस्नेहविस्मयोक्तिरियम् । वराकीं जानकीं चिराय वहिः वनाय विसृज्य, न स्वभावधीरः रामभद्रः स्वहृदयतलात् तां नाहासीत्, एतत् सारभूतं कर्णामृतायमानं वचः समाकर्ण्य हृष्टाभूत् वासन्ती । एतदेव स्फुटतया वि[illegible] परवर्त्तिश्लोके ।

महोदारचरितानां चेतांसि अनिर्वचनीयानि इति जानती, मृणालकोमलानि अपि तानि इष्टानिष्टयोगमध्ये कालविशेषे कठोराणि भवन्तीति वर्णयति, वज्रादिति ।—वज्रादपि कठोराणि अतिकठिनानि, लोकनिन्दया केवलं प्राणभूतायाः सीताया विवासनादित्यर्थः, अपि च, कुसुमादपि मृदूनि मृदुतमानि, रावण-कृतापहारात् परं हृतनिष्कासितामपि समालिङ्ग्य निर्भररोदनकरणादित्यर्थः । अत्र पुनः [illegible] धर्माचरणाच्च । अश्वमेधादिक्रतौ सावकाश-तया सीताप्रतिकृतिकरणं हि मृदुत्वापादकमेव । पुरा हि यानि सीतायाः [illegible] आसन् तानि राममनांसि पुनः प्राणेभ्योऽपि प्रियतरां निरतिशयस्नेहभावितां वह्नितापपरीक्षया निर्दोषतया ज्ञातां सती-[illegible] परिष्वक्तुं पटीयांसि अभवन्, अतः लोकेभ्यः उत्तराणां [illegible] महतां जनानां चेतांसि हृदयानि विज्ञातुं विशदेन [illegible] को वा अर्हति योग्यो भवति ? न कोऽपीति भावः । दुरवगाह-हृदयाः खलु महान्तः इति सन्दर्भसारः । स्निग्धा सीता विसर्जितेति विषादः,

आवे । विसृष्टश्च वामदेवानुमन्त्रितो मेध्योऽश्वः, उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः, तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुः दत्तदिव्यास्त्रसम्प्रदायः चतुरङ्गसाधनान्वितोऽनुप्रहितः । (ख)

स्निग्धो रामो न निष्करुणः पापकारीति विश्वजनीनप्रवृत्तिरेव प्रमाणमिति न्यायात् निर्दोषामपि साधारणजनविगर्हितां सीतां विहाय महती निःस्वार्थता प्रजावत्सलता न्यायपरता च दर्शिता रामेणेति स्नेहविषादहर्षविस्मयविकाशकारणम् । [अत्र एकस्मिन् धर्म्मिणि लोकोत्तरचेतसि अन्योऽन्यविरुद्धयोः धर्म्मयोः कठोरत्वमृदुत्वयोः सङ्घटनात् विषमालङ्कारः । अपि चाप्रस्तुतात् सामान्यात् प्रस्तुतस्य रामभद्ररूपविशेषस्य प्रतीतेः अप्रस्तुतप्रशंसा, अपि च उत्तरार्द्धगतेन सामान्येन विशेषस्य रामभद्ररूपवस्तुनः समर्थनात् अर्थान्तरन्यासालङ्कारः । इत्येषामङ्गाङ्गिभावेनावस्थितेः सङ्करः । अत्र आरब्धहयमेधं रामभद्रमाकर्ण्य धर्म्मपत्नीं विहाय तदनुष्ठानस्यासम्भवं विज्ञाय च अकृपेण रामभद्रेण स्वप्रियसर्व्वां जानकीं विवास्य स्त्र्यन्तरं परिगृहीतमिति निश्चित्य भगवति रामभद्रे वासन्त्याः कियदरुचिरजायत, अथ हिरण्मयीं सीताप्रतिकृतिं यज्ञे सहधर्म्मचारिणीं विदित्वा तस्या एव रामभद्रे तथाभूताया अरतेः उपशमोऽभूत् इत्यथ "वज्रादपि कठोराणि" इत्यादिसन्दर्भः अरत्युपशमनात्मकं प्रतिमुखाङ्गभूतः शम एवेति दशरूपकम् । दर्पणकृन्मते तु एष रागजनकत्वेन विशेषवचनतया पुष्पनामकं प्रतिमुखाङ्गं वेदितव्यम् । "—पुष्पं विशेषवचनं मतम्" इति वचनात् । केचित्तु दर्पणकृन्मते तापनं नामैतत् प्रतिमुखाङ्गमिति व्याचक्षते । "उपायादर्शनं यत्तु तापनं नाम तद्भवेत्" इति दर्पणलक्षणात् । एतस्यैव "शम" इति नामान्तरं वदन्ति च]। पथ्यावक्त्रं वृत्तम् ॥ ७ ॥

(ख) विसृष्ट इति ।—वामदेवेन—तदाख्येन केनचित् ऋत्विजामन्यतमेन, कुलगुरौ वशिष्ठस्यासन्निध्यात् एतेनैवार्त्विज्यं कृतमिति भावः । अनुमन्त्रितः,—मन्त्रसंस्कृतः । मेध्यः,—मेधाय यज्ञाय हितः, यज्ञीय इत्यर्थः । [मेध्—वधे, मेध्यते वध्यते असाविति मेधते भौवादिकस्य ण्यत् मेध्यः, यज्ञे मध्य इत्यर्थः]। अश्वः,—यज्ञीयतुरङ्गः इत्यर्थः । विसृष्टः,—अव्याहतस्वैरगतये विमुक्तः । उपकल्पिताः,—निर्दिष्टाः नियोजिता इत्यर्थः । अधिष्ठाता—अधि अधिनायकत्वेन, स्थाता—स्थितिशीलः प्रधानपदारूढः, अधिनायकः सेनापतिरित्यर्थः । दत्तदिव्यास्त्रसम्प्रदायः,—दत्तः दिव्यानाम् अलौकिकानाम् अस्त्राणां सम्प्रदायः समूहः प्रयोगसंहार

वास । [ससेहकौतुकास्रम् ।] कुमारलक्ष्मणस्यापि पुत्रः ॥ हन्त मातर्जीवामि । (ग)

आवे । अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारि, सोरस्ताडनमब्रह्मण्यमुद्घोषितं, ततो "न राजापचारमन्तरेण प्रजासु अकालमृत्युश्चरति" इति आत्मदोषं निरूपयति करुणामये रामभद्रे, सहसैव अशरीरिणी वाक् उदचरत् । (घ)—

मन्त्रसहित यस्मै स तथोक्त, तथा चतुरङ्गसाधनान्वित,—चत्वारि अङ्गानि येषां तैस्तथोक्तै साधनै हस्त्यश्वरथपादातरूपोपकरणै रक्षणसाधनै इत्यर्थ., अन्वित अनुगत, ("हस्त्यश्वरथपादात सेनाङ्ग स्याच्चतुष्टयम्" इति, "निवर्त्तनोपकरणानुव्रज्यासु च साधनम्" इति चामर)। अनुप्रहित,—प्रेरित । ["विसृष्टश्च वामदेवानुमन्त्रित" इत्यारभ्य 'जनस्थान एव तपश्चरति" इत्यन्तेन सन्दर्भेणाव ब्रह्मक्षत्रशूद्रादिवर्णाना मेलनात् वर्णसंहारनामक प्रतिमुखसन्ध्यङ्ग वेदितव्यम्,—"चातुर्वर्ण्योपगमन वर्णसंहार इष्यते" इति दर्पणोक्ते]।

(ग) ससेहकौतुकास्रम्—कुमारलक्ष्मणस्य वार्त्ताश्रवणात् वात्सल्योदय, तत्तनयस्य च सेनानायकत्वश्रुते हर्षाधिक्यात् कौतुकाविर्भाव, तेषाञ्चेदानीमदर्शनात् अश्रुपात, स्नेहकौतुकास्रै सह वर्त्तमान यथा तथेति विग्रह, प्राग्भगवत रामभद्रस्य पुत्रयो कुशलवयो सवादश्रवणसमकाल हि अतिहर्ष आसीत्, अथ कुमारस्य लक्ष्मणस्य सौमित्र पुत्र जात इति श्रवणात् स हर्ष अतिभूमि गत इति अपि कारतात्पर्यम् । हन्त—हर्षे । मातर्जीवामि—प्रत्युज्जीवितास्मि । वरासा प्रियसख्या सीताया दारुणपरिणामश्रवणसमकालमेवाह मृतकल्पाऽभवम्, इदानीन्तु निरतिशयप्रेमवत सौमित्रे तनयजननसवादमसत्तायमानमाकर्ण्य पुनरागतप्राणा जातास्मि इत्याशय ।

(घ) अत्रान्तरे इति ।—अत्र—अस्मिन्, अन्तरे—अवकाशे । मृतम्—अकाले गतप्राणम् । राजद्वारि—राज्ञ रामभद्रस्य प्रासादद्वारभूमौ, उत्क्षिप्य—आरोप्येत्यर्थ । सोरस्ताडनम्—उरसो वक्षस्ताडनेन प्रहारेण सहितम्, पुत्रशोकार्दिततया उरस्ताडन कुर्वन् इत्यर्थ । अब्रह्मण्यम्—अवध्योक्तिरूपम् अप्रियम्, अन्याय्यमिति हलायुध । उद्घोषितम्—ब्राह्मणेन उच्चैरुच्चारितम् । ततः—तदनन्तरम् । राजापचार—राज्ञ तदधिकृतस्य पुरुषस्य वा च,

"शम्बूको नाम वृषलः पृथिव्या तप्यते तपः।
शीर्षच्छेद्यः स ते राम! तं हत्वा जीवय द्विजम्" ॥ ८॥

अपचारः धर्मव्यतिक्रमः तम्। अन्तरेण—विना, [अन्तरेणेत्यव्यय तद्योगे "अन्तराऽन्तरेण युक्ते" (२।३।४ पा०) इति द्वितीया]। प्रजासु—प्रकृतिपुञ्जेषु। अकालमृत्यु,—अनुचिते वयसि विनाश। न चरति—न प्रसरति, प्रजा नाऽकाले म्रियन्ते इत्यर्थः। तथा च रामायणम्—

"राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिता।
असद्वृत्ते हि नृपतावकाले म्रियते जन ॥" इति।

भारतेऽपि—"असाधुशासनाद्राज्ञो महाभौतिकपप्लव।
प्रवर्त्तते च नियतमकालमृत्युरीतय ॥" इति।

आत्मदोषम्—आत्मन स्वाधिकृतस्य राजपुरुषस्य वा शासनदोष प्रकृतिपुञ्जानाम् अयथापरिपीडनरूपमित्यर्थ। निरूपयति—निश्चिनोति, न हि मम दोषाद्दृते ब्राह्मण बाल अकाले मृत इति अवधारयति इत्यर्थ। करुणामये—परदुःखदुःखित्वरूपाऽनुकम्पाप्रचुरे, ना चेदेव तदा सर्व्वाधीश्वरस्य अनेककोटिसङ्ख्यातप्रजापालकस्य भगवत राघवस्य कस्यचिदेकस्य द्विजशिशो निधनात् नितरामाधिनाऽभविष्यदित्यर्थ। अशरीरिणी—न विद्यते शरीर ताल्वोष्ठपुटाघातादिक यस्या सा ["सर्वधनी" इत्यादिवत् इन्नन्तो बहुव्रीहि]। "अशरीरिणीवाक्" इत्येकपदत्वे—शरीर देह विद्यते अस्या इति शरीरिणी, सा न भवति इत्यशरीरिणी देवतत्वेन मनुष्यैरलक्षित शरीरा, सरस्वती इत्यर्थ, तस्या वाक्, उभयथापि आकाशवाणी इति भाव। उदचरत्— उदतिष्ठत। दैवी वाणी वभूवेत्यर्थ।

कथ सा दैवी वाणी? इत्याह, शम्बूको नामेति।—शम्बूको नाम तदाख्य कश्चित्, वृषल शूद्र, वृष धर्म लुनाति छिनत्ति, उपदेशनात् उपसेवनाद्वा इत्यर्थ इति व्युत्पत्ति, त्रैवर्णिकानां सुकृतापहारक, तथा च मनु,—

"न शूद्रे पातक किञ्चित् न च संस्कारमर्हति।
नास्याधिकारो धर्मेऽस्ति न धर्मात् प्रतिषेधनम् ॥" इति।

पृथिव्या भूम्या तप तप्यते तपस्यति ["तपस्तप कर्मकस्यैव" (३।१।८८ पा०) इति आत्मनेपद यक् च।] हे राम! स वृषल ते तव ["कृत्याना कर्त्तरि वा" (२।३।७१ पा०) इति सूत्रेण वैकल्पिकी षष्ठी।] शीर्षच्छेद्य शीर्षं तदवच्छेदे इत्यर्थ, छेद्य छेदयितुमर्ह, यद्वा—शिरश्छेदमर्हति शीर्षच्छेद्य। ["शीर्षच्छेदात् यच्" (५।१।६५

इति उपश्रुत्यैव आकृष्टकृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः सञ्चरितुमारब्धवान्। (ङ)

वास। शम्बूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति, तत् अपि नाम रामभद्रः पुनरपि इदं वनम् अलङ्कुर्य्यात्॥ (च)

पा०) इति सूत्रेण यत्प्रत्ययः, शिरसः शीर्षादेशस्तु निपात्यते, तेन च शीर्षच्छेद्य सिध्यति इति व्याचचते प्राञ्चः। अत्र तु "ते" इत्यत्र सम्बन्धे षष्ठी]। शूद्रस्य तपसि अनधिकारत्वेन वर्णधर्ममुल्लङ्घयतः शम्बूकस्य शिरश्छेद एव न्याय्य इत्यवधेयम्। तम् एवम्भूतं दण्डार्हं शम्बूकमित्यर्थः, हत्वा विनाश्य द्विजं गतप्राणं विप्रबालं जीवय रक्ष, प्रत्युज्जीवयेत्यर्थः॥ ८॥

(ङ) इत्युपश्रुत्यैवेति।—इति पूर्व्वोक्तां दैवीं वाचम्, उपश्रुत्यैव—समाकर्ण्यैव। आकृष्टकृपाणपाणिः,—आकृष्टः कोशाद्बहिष्कृतः कृपाणः खड्गः पाणौ यस्येति विग्रहः, उद्धतखड्गहस्त इत्यर्थः, ["प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" वा० इति सप्तम्यन्तस्य परनिपातः] जगत्पतिः,—जगतां पतिः पालकः, रामभद्र इति यावत्। शूद्रतापसान्वेषणाय—शूद्रतापसस्य शम्बूकस्य अन्वेषणाय, कुत्र स तपस्यतीति मार्गणायेत्यर्थः। पुष्पकं—पुष्पकनाम्ना प्रसिद्धं, [पुरा किल पुष्पकं नाम मनोहरं जवरूपं विमानं धनाधिपतये यक्षराजाय कुबेराय ब्रह्मणा दत्तम्, तं विजित्य गृहीतवन्तं रावणं निर्जित्य राघवस्तत् प्राप्तवान्। इति रामायणी कथा]। विमानं—व्योमयानम्। विदिशः,—आग्नेय्यादयः, ताः, दिशः प्राच्यादयः ताश्च सर्वाः।—["कालभावाध्वदेशानामन्तर्भूतक्रियान्तरे। सर्वैरकर्म्मकैर्योगे कर्म्मत्वमुपजायते॥" इति कर्मसंज्ञा इति कारिका]। ("दिशोर्मध्ये विदिक् स्त्रियाम्" इत्यमरः)। सञ्चरितुं—परिभ्रमितुम्। आरब्धवान्—प्रचक्रमे।

(च) धूमप इति।—धूमं पिबतीति ["आतोऽनुपसर्गे" (३।२।३ पा०) इति कप्रत्ययः] वृक्षशाखादौ पादौ बद्ध्वा धूमपानार्थम् अधोमुख इत्यर्थः, यज्ञीयधूमपानशीलत्वात् नित्योपवासित्वाच्चेति भावः। तत्—तस्मात्, अस्मिन्नेव दण्डकारण्ये तपश्चरणाद्धेतोः, [अपि नाम इदम् सम्भावनायां, द्वितीयन्तु प्रश्नद्योतकः। तद्योगे लिङ्]। अलङ्कुर्य्यात्—शोभयेत्, तर्हि भगवतः अहं सन्दर्शनं कर्तुमर्हामीत्याशयः।

आत्रे। भद्रे! गम्यतेऽधुना?

वास। एवमस्तु, कठोरीभूतोऽयं दिवसः। (छ)

तथा हि—

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि-
र्घर्मस्रंसितबन्धनैः स्वकुसुमैरर्चन्ति गोदावरीम्।

(छ) एवमस्त्विति।—तर्हि इदानीं गम्यतां भवतीभिरित्यर्थः। कुतः? तदेवोच्यते,—कठोरीभूत इति।—अकठोरः कठोरः सम्पद्यमानो भूतः इति कठोरीभूतः पूर्णतां गतः, मध्याह्नोऽभूदित्यर्थः, प्रचण्डचण्डांशोरंशुसन्तापस्य सोढुमशक्यत्वादित्याशयः।

अथेदानीं निदाघातपस्यातीवासहनीयत्ववर्णनमिषेण प्राकृतिकं तादृशदृश्यदर्शनादनुमीयमानं घर्मातपतापं विशदीकृत्य वर्णयति, कण्डूलेति।—कूले गोदावरीतीरे स्थिताः इति शेषः, मृदुस्निग्धकल्लोलमालाघातैः शिशिरीकृतरुचिरगोदावरीतीरतरूणामपि परमरामणीयकमवलोक्य तेषामेव प्राधान्येनातपतापोद्वेगोपवर्णनमित्यवधेयम्। छायेत्यादि—छायायामनातपे विश्रामजसुखमुपभुज्येति शेषः। अपस्किरमाणाः कीटनिष्कोषणार्थं तद्भक्षणाय हर्षेण तरुवल्कलेषु चञ्च्वाघातं कुर्वन्तः नखरैरालिखन्तः इत्यर्थः, ["किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्" इति वक्तव्यात् शानच्। "अपाच्चतुष्पाच्छकुनिष्वालेखने" (६।१।१४२ पा०) इति सूत्रेण अपात् परस्य किरतेः सुट्]। ये विष्किराः पक्षिणः। ("खगे विहङ्ग" इत्याद्यारभ्य "नगौकोवाजि विकिर वि विष्किरपतत्रयः" इत्यमरः।) तैर्मुखैः करणैर्व्याकृष्टा आकर्षणेन बहिष्कृताः कीटाः याभ्यस्तथोक्तास्त्वचो वल्कलानि येषां ते तथोक्ताः, येषां हि प्रच्छायमुशीतले तले विश्रामजसुखमुपभुञ्जाना विविधा विहगाः सानन्दं तरुत्वग्भ्यः चञ्चुभिः चरणैश्च कीटान् निष्कोष्य उपभुञ्जते इति भावः। [एतेन च मुनीनां गृहेषु अतिथयः नित्यमेव स्वयमागत्य भोज्यानि भुञ्जते इति प्रतीयते]। कूजत्क्लान्तेत्यादि।—तथा कूजन्ति मधुरमव्यक्तञ्च शब्दं कुर्वन्ति क्लान्तानि मध्याह्नसमागतप्रखरातपतापात् खेदमुपगतानि कपोतानां कुक्कुटानां चरणायुधविशेषाणाञ्च कुलानि येषु तथोक्ताः, अपि च येषां तथाविधेषु विटपेषु तलेषु च विशिष्टाः पारावताः वन्यकुक्कुटाश्च मधुरं रुवन्तः निद्रालसाश्च सन्तनिभरमानन्दं लभन्ते इति भावः। [एतेन च मध्याह्ने प्रौढ़स्तुमार्तण्डोत्तापवितप्तानां श्रान्तानां वटूनां नानाशास्त्राध्येतॄणाम्

छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः॥ ९॥

(इति परिक्रम्य निष्क्रान्ते।)

[इति विष्कम्भकः (ज)।]

आम्नायाभ्यसनम् उद्गीथाद्युपासनञ्च निर्बाधं भवतीति व्यज्यते]। कुलायद्रुमाः विहगावासभूततरवः। [कुलायभृता द्रुमा इति शाकपार्थिवादित्वात् समासः। "कुलायस्तु पुमान् स्थानमात्रे स्यात् पक्षिवासके" इति मेदिनी। एतेन च तेषां गृहमेधिना बहुकुटुम्बभरणे प्रसितत्वं ध्वन्यते]। कण्डूलेत्यादि।—तथा कण्डूलानां कण्डूयुतानां तद्बहुलानां वा, [कण्डूः कण्डूतिः विद्यते येषाम् इति "सिध्मादिभ्यश्च" (५।२।९७ पा०) इति सूत्रेण लच्प्रत्ययः] द्विपगण्डपिण्डानां द्वाभ्यां मुखनासिकाभ्यां पिबन्तीति द्विपाः हस्तिनः ("दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः" इत्यमरः।) तेषां गण्डा एव पिण्डाः तेषां करिकपोलभागानामिति यावत्, कषणेन कण्डूतिनिवारणार्थं घर्षणेन यः उत्कम्पः परिचालनं तेन सम्पातिभिः समूहेन पतद्भिः पतद्भिरित्यर्थः, [एतेन तत्र तपोवने दुरुहणास्ततत्त्वानि निर्णेतुं सततम् उपगतानां मनुजानां लक्ष्योपदेशतया च विगतभयानां तेभ्यः सगौरवद्रव्यदानानि अनिशमेव भवन्तीति व्यज्यते]। तथा घर्मेण आतपेन ("घर्मं स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्बुनोरपि" इति मेदिनी।) स्रंसितानि शिथिलितानि बन्धनानि वृन्तानि येषां तथाभूतैः स्वकुसुमैः [एतेन च निदाघतपे तैः अधिगतद्रव्याणि दिवसाद् अतिदिवसाच्च निःस्वेभ्यो दीयन्ते, इति प्रतीयते]। गोदावरीम् अर्चन्ति पूजयन्ति, मालादिकं दधतीति भावः। [अर्चन्तीति भ्वादिगणीयार्चधातोः प्रयोगः। एतैः सर्वैः स्नौतस्मार्तानिरतानां गृहमेधिनां माध्यन्दिनकृत्यं ध्वन्यते। अत्र कुसुमपतनस्य गोदावरीपूजनत्वेन सम्भावनात्, तद्वाचकशब्दाभावाच्च प्रतीयमानोत्प्रेक्षाऽलङ्कारः। स च समासोक्त्या सङ्कीर्यते। वृत्त्यनुप्रासश्च शब्दालङ्कारः]। वृत्तं शार्दूलविक्रीडितम्॥ ९॥

तत प्रविशति पुष्पकस्थ सदयोद्यतखङ्गो (भ) रामभद्र ।

राम । रे हस्त दक्षिण ! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।

चोक्त,—"मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजित । शुद्ध स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पित ॥" इति च साहित्यदर्पणे। तथा चात्र सीताविवासन, कुश लवोत्पत्ति, भगवत वाल्मीके सविधे च तेषा समर्पण यथाविधि शिक्षा चेत्याद्यतीत विषयाणामुपस्थापनम्, अपि च शम्बूकहननाय दण्डकारण्यमभित भगवत राघवस्य पर्य्यटन इयमेषस्यैवायोजनञ्च इत्यादीना वर्त्तिष्यमाणविषयाणाञ्च निर्द्देश वेदितव्य । [केचित्तु, चूलिका नाम अर्थोपक्षेपकोऽयमिति वदन्ति, नेपथ्यस्थितया वनदेवतया वासन्त्या आत्रेय्या प्रवेशस्य सूचितत्वात्। तत्तु न सम्यक् अर्थोपक्षेपकेषु पञ्चसु एकत्रैव चूलिका-विष्कम्भकयोर्द्वयोरेवार्थोपक्षेपकयोरवस्थानासम्भवात्। यद्यपि महावीरचरिते "भो भो वैमानिका । प्रवर्त्त्यन्तां प्रवर्त्त्यन्तां मङ्गलानि,—कृशाश्वान्तेवासी जयति भगवान् कौशिकमुनि" इत्यादौ एकत्रैव द्वयोरेव समावेश दृश्यते, तथापि तत्र नेपथ्यपात्राणि इन्द्रादिदेवा, विष्कम्भकपात्रे च शूर्पणखा माल्यवन्तौ इति पात्रभेदो दृश्यते, अत्र तु तथाऽभावादित्यवधेयम्]।

(भ) तत इति।—पुष्पकस्थ,—पुष्पकविमानारूढ । सदय सन्तापमुद्यत शूद्रकवधार्थम् उत्तोलित खड्ग कृपाण येन, तथाविध, करुणामयत्वेन वर्णधर्म्माचार मुल्लङ्घयत अपराधिन अपि शम्बूकस्य उपरि कृपाणनिपातने सदयत्व वेदितव्यम्।—

["त्रिभ्यो युगेभ्यस्त्रीन् वर्णान् धर्मश्च परिनिष्ठित ।
न शूद्रो लभते धर्मं युगतस्तु नरर्षभ ! ॥
हीनवर्णो नृपश्रेष्ठ ! तप्यते सुमहत् तप ।
भविष्यच्छूद्रयोन्यां हि तपश्चर्य्या कलौ युगे ।

* * * *

स त्व पुरुषशार्दूल ! मार्गस्व विषय स्वकम् ।
दुष्कृत यत्र पश्येथास्तत्र यत्न समाचर ॥
एव धर्मविवृद्धिश्च नृणाञ्चायुर्विवर्द्धनम् ।
भविष्यति नरश्रेष्ठ ! बालस्यास्य च जीवितम् ॥"

रामस्य गात्रमसि, दुर्वहगर्भखिन्न-
सीताविवासनपटो: करुणा कुतस्ते ? ॥ १० ॥

इत्यादि नारदवचनमाकर्ण्य दिनकरकुलेन्दु भगवान् भार्गवविजेता वृषल-तपस्विनः शम्बूकस्य वधायोद्यममकरोत् प्रसादञ्च कृतवान्। हारीतस्तु तपश्चरणे शूद्रस्यानधिकारमावेदयन् पापमेव भवति इत्यभिधत्ते, तथा हि,—

"अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्।
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते॥
इष्टापूर्त्तौ द्विजातीनां धर्मः सामान्य उच्यते।
अधिकारी भवेच्छूद्रः पूर्त्तधर्मे न वैदिके॥" इति।

तथा चानधिकारविरहात् तदनुतिष्ठतः अपराधः अस्त्येव, स तु न प्राणदण्ड-प्रयोजकः सत्यप्येव, नारदवाक्यात् विप्रबालस्य चोज्जीवनाय भगवानित्थं विदधे इति तत्त्वम्। तथा च मनु,—

"न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति।
नास्याधिकारो धर्मेऽस्ति न धर्मात् प्रतिषेधनम्॥" इति]।

इदानीं दण्डकारण्यमागतस्य रामभद्रस्य तपस्यन्तं निरपराधमपि अनयकारिणं शूद्रकं जिघांसितुं प्राक् कृपा प्रहृता, तस्य तु दण्डस्य द्विजशिशोः जीवनार्थमाहितत्वेन कथञ्चित् अगर्हणीयत्वेऽपि अनपराधदण्डविधानस्य नृपाणाम् अयशस्करत्वेन, वराकीं सीतां विवासयतः अकृपस्यात्मनः नास्ति तव कापि व्यपेक्षेति उपवर्णयितुमाह, रे इति।—रे हस्त। दक्षिण। रे अपसव्य हस्त। [रामावयवत्वेन श्रेष्ठत्वेऽपि तपस्विहननादरार्थं प्रहृतत्वेन अतीव निष्करुणत्वख्यापनाय रे इति नीचसम्बोधनपदमुपात्तम्] तस्य अकाले कालेन दैवस्वतक्षयं नीतस्य, तथा च रामायणे उत्तरकाण्डम्—

"ततः कतिपयाहस्सु वृद्धो जानपदो द्विजः।
मृतं बालमुपादाय राजद्वारमुपागमत्॥
* * * *
अप्राप्तयौवनं बालं पञ्चवर्षसहस्रकम्।
अकाले कालमापन्नं मम दुःखाय पुत्रकम्॥
* * * *
नेदृशं दृष्टपूर्वं मे श्रुतं वा घोरदर्शनम्।
मृत्युरप्राप्तकालानां रामस्य विषये ह्ययम्॥" इति।

[अथ कथञ्चित् प्रहृत्य (अ)]। कृतं रामसदृशं कर्म, अपि जीवेत् स ब्राह्मणशिशुः ? (ट)

द्विजस्य शिशोः विप्रबालस्य, जीवातवे प्रत्युज्जीवनाय ("जीवातुर्नास्त्रियां भक्ते जीविते जीवनौषधे" इति मेदिनी)। शूद्रमुनौ तपस्वितापसे तदुपरीत्यर्थः, कृपाण खड्ग विसृज मुञ्च तदुपरि पातयेत्यर्थः। अनपराधस्य तपस्विनः विशसने कथं हि जगति करुणामयेतिख्यातस्यापि उपजीवमङ्गल इव ते करुणा नोदेति ? इत्याशङ्कायामाह, रामस्येति।—दुर्वहः प्रकृष्टत्वात् दुःखेन वोढुं शक्यः यो गर्भः तेन खिन्ना क्लिष्टा तथा विधा या सीता तस्याः विवासनपटोः निर्वासनसमर्थस्य, रामस्य अकरुणरामस्येत्यर्थः, [अत्र रामपदम् अकरुणत्वरूपार्थान्तरसङ्क्रमित, सर्वलोकरमणत्वेन करुणामयराम पदस्य अकरुणरामपरत्वेन मुख्यार्थस्य स्वविशेषरूपार्थान्तरसङ्क्रमितत्वादर्थान्तरसङ्क्रमितवाच्यो ध्वनि, इत्यवधातव्यम्। अकरुणत्वातिशय्यस्याच व्यङ्ग्यम्] गात्रम् अङ्गम् असि भवसि, ते तव करुणा दया कुतः ? अतिकठिनस्य कठोरगर्भभारालसायाः सीतायाः विवासनपटुत्वेन निर्घृणस्य, अतिशीभत्सकर्मकृतः रामस्याङ्गत्वात् त्वयि करुणा न सम्भाव्यत एवेति भावः। तर्हि कथमिदानीं शूद्रतापसवधाय अथवा शङ्कसे ? इति शङ्कासन्दर्भाय। रामस्य गात्रत्वात् तव किमपि अकृतं नास्ति इति सखेदोक्तिः इत्यवधेयम्। [अत्र करुणाभावं प्रति सीताविवासनपटुत्वस्य हेतुत्वोक्तेः पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, अर्थापत्तिश्चेत्यनयोः सङ्करः। अपि चात्र "रामस्य गात्रमसि" इति वचनमनुपयुक्तं सत् रामस्येत्यनेन स्वस्यात्यन्तनिष्करुणत्वं गमीकरोति। तत्र "दुर्वहगर्भखिन्नसीताविवासनपटोः" इति वाक्यात प्राचीनमतेन विध्यलङ्कारः। तथाच—"सिद्धस्यैव विधानं यत्तदाहुर्विध्यलङ्कृतिम्"। यथा—"पञ्चमाद्वने काले कोकिलः कोकिलो भवेत॥" इति]। वसन्ततिलकं वृत्तम्॥ १०॥

(अ) कथञ्चिदिति।—दयासमुद्रस्य रामभद्रस्य तदानीम् अनपराधस्य शम्बूकस्याघोद्यतस्य यौवायां कृपाणनिपातो सुमहत कष्टमापादित, सत्यमेव द्विजशिशोरुज्जीवनार्थमेतदध्यवसितं वेदितव्यम्। सत्यं हि भवति एव सामान्यपुरुषस्य, का कथा दयावतारस्य ? कथञ्चित—दयार्द्रचित्ततया अतिकष्टेनेत्यर्थः,—"दूराह्वानं वधो युद्धम्" इत्यादि वचनेन रङ्गमध्ये वधप्रदर्शनाभावात वा 'कथञ्चित्' इत्युक्तं कविना।

(ट) रामसदृशमिति।—अत्र दारुणं क्रूरकर्मादृशं नूनं कर्म कृतवानित्यर्थः, न तु पितुः सदृशमिति भावः। [पिता हि पुरा मृगयार्थं वनं प्रयातः भ्रमात् अन्धक

दिव्यपुरुष। [प्रविश्य]। (ढ) जयति जयति देवः। (ड)—

दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवित शिशुरयं, मम चेयमृद्धि।

नूने बालस्य वधमकरोत. "पितु शतगुणं पुत्र" इति न्यायाच्चाह पितु महनीयगुण सद्भाव परिहृत्य दोषेषु एव वित्त श्रमवर्मिति, रामस्य सोपालम्भ व्यज्यते, येन हि पुरा वराकी सीता अनायासेनैव विसृष्टा, तथातीव नृशंसस्य तपस्विन शम्बूकस्य प्रतिघातन समुचितमेव उभयोस्तुल्यरूपत्वादित्याशय। पक्षा हि अकन्तुदोक्ति रामस्य]। अपीत्यादि।—अपिरत्र अवधारणे। इदानी स बालको निश्चित जीवितवान् इति भाव। अथवा सम्भावनायाम् अपि। तेन यदि न जीवति तदा ह्येव हत्याकर्म इत्याशङ्कावचननतत्। पावकवचसा सीताया पवित्रत्वनिश्चय इव दैववाण्या शिशुजीवनस्य निश्चितत्वेऽपि रुग्णान्यात विसदृशघटनसम्भवात इति भाव।

(ढ) दिव्यपुरुष इति।—शम्बूकशरीर विहाय देवत्वमधिगम्य स्वर्गीयवपुषा विराजमान इत्यर्थ। भगवदवतारस्य रामभद्रस्य हस्तेन तादृशनिकार साम्मुख्यञ्च अधिगतस्य शम्बूकस्य नश्वरपार्थिवशरीरनाशात् मनोहरदिव्यवपुषोऽवाप्ति, न तु तपश्चर्ययेत्यवधेयम्।

(ड) देव,—भगवान् जयति—सर्वोत्कर्षेण वर्त्तताम्। [सर्वोत्कर्षवाचकस्य जयशब्दस्य अत्यादर द्योतयितु हर्षात् वीप्सायां द्विर्वचनम्]।

यद्यपि स्वस्य शिरश्छेदरूपनिकारे तस्य तु द्विजशिशो प्रत्युज्जीवनफलकत्वेन आत्मनश्चापि उत्कर्षाधायकत्वेन, भगवत्कृतनिधनमपि महोदर्कं भवतीति प्रतिपाद यितु शूद्रकस्याऽनपराधस्य हननात् भृश दुःखित रामभद्र विजयनादेन प्रसौति, दत्तेति।—यमात् कृतान्तादपि, दत्तम् अभय येन तस्मिन् दत्ताभये (नारायणरूपत्वात् यमलोकादानीत ब्राह्मणशिशो पुनरुज्जीवनात यमादभयदातृत्व सिद्धम्) यमशासितु दण्डधारात् सा, यमभयनिवारके इत्यर्थ, मृतस्य शिशो सञ्जीवनात् मम शंशारात त्व यमादपि परित्राणे क्षम इति वा भाव। कुतो यमादप्य भयदत्वम्? इति, तद्दर्शयति,—त्वयि दण्ड धारयति शासन विदधातीति [दण् डह धा, णिचो ण्वुल्] दण्डधारे सति, मदीयशिरश्छेदरूप शासन कुर्वति सति, अय शिशुरकालमृत्यु सञ्जीवित प्रत्यागत [दिव्यवपुलाभात योगसन्निकर्षेण द्विज- शिशो प्रत्यक्षीकरणात् "अयम्" इति प्रत्यक्षनिर्देश इत्यवधेयम्, तदुक्तम्—

शम्बूक एष शिरसा चरणौ नतस्ते,
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

राम। इयमपि प्रिय नः, तदनुभूयतामुग्रस्य तपसः परिपाकः। (ढ)—

"इदमन्त सन्निकृष्ट समीपतरवर्त्ति चैतदो रूपम्" इति] मम च तपस्याकारिणः शूद्रस्य, परधर्मस्वीकारात् पापस्येत्यर्थः, इयम् कृतिः समुन्नतिः दिव्यवपुःप्राप्तिः इत्यर्थः, [अस्मिन् एव काले भगवता मय दण्डो विहित, तदैव मृतबालकस्य मम चेदं दशान्तरं जातमिति भावविहितमनया सूच्यते]। ननु कस्त्वम्? इत्याशयेनाह, एष इति।—एष एव देवत्वप्राप्तिहेतुकत्वादुपकृत इत्यर्थः, शम्बूकोऽयं शिरसा ते तव चरणौ नतः नमस्यति, [नमते वर्त्तमाने कर्त्तरि क्त]। ननु नाहं ते उपकारी, प्रत्युत संहारकत्वादपकारक एव, तत् कुतः अप्रियकारिणि एवं विनयः क्रियते? इत्यर्थान्तरन्यासेन विशदीकरोति, सदिति।—सत्सङ्गजानि साधुसंसर्गजातानि, निधनान्यपि मरणान्यपि, तारयन्ति संसाराब्धेरिति शेषः, उद्धारकारणानि भवन्ति इति सङ्क्षेपः,—"समुन्नयन् भूतिमनार्यसङ्गमात् वरं विरोधोऽपि समं महात्मभिः" इत्यादिदर्शनात्। सत्पुरुषसंसर्गकृतं सर्वमेव कर्म हिताय भवतीत्यहो सत्संसर्गमाहात्म्यम्! इति तु सन्दर्भतात्पर्य्यम्। [अत्र दण्डरूपात् कारणात् "कारणगुणा हि कार्य्यगुणमारभन्ते" इति न्यायात्, तद्विरुद्धस्य सम्पत्प्राप्तिरूपस्य कार्य्यस्योत्पाददर्शनात्, हेतुविरुद्धकार्य्योत्पत्तिरूपो विषमालङ्कारः, तस्य च द्वितीयार्द्धगतेन सामान्येन प्रथमार्द्धगतस्य विशेषस्य सोपपत्तिकत्वकरणात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, अनयोरङ्गाङ्गिभावतया सङ्करः]। वसन्ततिलकं वृत्तम् ॥ ११ ॥

(ढ) इयमिति।—एक द्विजपुत्रस्य पुनर्जीवनमपरस्य तव दिव्यदेहावाप्तिरिति। यदि हि पुनः द्विजशिशोरुज्जीवनार्थमेव शम्बूकवधोद्यमात् तदुज्जीवनमेव मुख्यमासीत्, अन्यच्च गौणं, तथापि, शम्बूकस्य दिव्यदेहावाप्तिः भगवतः रामस्य निरतिशयानन्ददायिका अभूत्, परेषामभ्युदयदर्शनात् सतां सार्व्वभौमिकरूपोदयदर्शनात्। उग्रस्य तपसः,—अतीव दुष्करस्य तपश्चरणस्य, परिपाकः,—परिणामः फलसिद्धिः दिव्यवपुरधिगतिरूपेत्यर्थः। अनुभूयतां—भुज्यतां, प्राप्यतामित्यर्थः।

यत्रानन्दाश्च, मोदाश्च, यत्र पुण्याश्च सम्पदः।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते ध्रुवाः॥ १२॥

शम्बूकः। युष्मत्पादप्रसादोपाय एष महिमा, किमत्र तपसः फलम्, अथवा महदुपकृतं तपसा। (ग)—

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विष्यन्निह वृषलकं योजनानां शतानि।

भगवतः रामभद्रस्य हस्तात् शिरश्छेदरूपं दण्डमधिगतस्य तपस्विनः शूद्रकस्य किं फलमासीत्? तदेव निरूपयति, यत्रेति।—यत्र येषु लोकेषु आनन्दाः, प्रियसन्दर्शनजनितानि सुखानि, आत्मसाक्षात्काराज्जायमानाः दुःखासम्भिन्नाः सुखसमुदाया वा, यत्र च मोदाश्च स्वाभिलाषमात्रोपनीतप्रियवस्तुलाभजन्या हर्षा दिव्यविषयोपभोगजनिता हर्षाश्च, अपि च, यत्र पुण्याः पवित्राः अकल्मषा इत्यर्थः, सम्पदः, अणिमादिविभूतयः, [“पुण्याभिसम्भवाः” इति पाठे—पुण्यात् तपस्याद्युद्भूतात् सम्भवः उत्पत्तिः येषाम्। इति आनन्दादेः विशेषणम्]। विराजो ब्रह्मण इमे ते वैराजा नाम ते तैजसाः तेजोमयाः नित्यालोकसम्पन्ना इत्यर्थः, लोकाः ब्रह्मलोका इति यावत्, ते तव सम्बन्धे, ध्रुवाः सुचिरभोगाय सन्तु भवन्तु, एवम्भूतं ते तपसः फलमस्त्विति भावः। अनुष्टुप् वृत्तम्॥ १२॥

(ग) युष्मत्पादेत्यादि।—युष्मत्पादानां भगवच्चरणानामित्यर्थः, यः प्रसादः अनुग्रहलक्षणादुपायः आगमो यस्य, यद्वा,—स एव उपायः प्रतिहारः कारणं वा यस्य तथाभूत एष महिमा माहात्म्यं वैराजलोकप्राप्तिरूपं दिव्यदेहावाप्त्यादिरूपश्च,—“धातुः प्रसादान्महिमानमीशम्” इति श्रुतेः। अत्र—एतादृशसिद्धिलाभविषये, तपसः फलं किम्? (काकुः) न किञ्चिदित्यर्थः। इयमचिन्तनीया पुण्यलोकावाप्तिः तवानुग्रहादेव भूता, न तु तपस इति भावः। अथवेति।—पक्षान्तरे। तपस एवैतत् फलं, कुतः?—यदेव दर्शनेन भवद्दर्शनेन भवाब्धिसन्तारकेण मे ईदृशः महोपकारः कृतः, तपसा विना भगवत्साक्षात्कारस्य असम्भवात् इति भावः।

किं यदि तपसा उपकृतं तदेव सप्रश्रयं विशिष्य विवृणोति, अन्वेष्टव्य इति।—भुवने त्रिलोक्यां भूतानां प्राणिनां नाथः पतिः, अत एव शरणे रक्षणे साधुः शरण्यः [illegible] निहतशत्रुरपि नियतमाश्रयणीय इत्यर्थः। (“शरणं गृहरक्षित्रोः” इति [illegible])। भवान् एव अन्वेष्टव्यः सततं हि श्रवणमनननिदिध्यासनादिभिः [illegible] निरतां साक्षात्करणीयः असि भवसि, मानुषरूपेण

क्रान्त्वा प्राप्तः स इह तपसां सम्प्रसादोऽन्यथा चेत्
क्वाऽयोध्यायाः पुनरुपगमो दण्डकायां वने वः ? ॥१३॥

राम। किं नाम दण्डकेयम् ? [सर्व्वतोऽवलोक्य] आम्, (त)—
स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम्।

साक्षान्नारायण एव भवानिति भावः। वृषलकः शूद्राधमम्, [कुत्सायां कन्, स्वधर्म्म शुश्रूषारूप विहाय परधर्म्मस्य स्वतन्त्रतपश्चरणरूपस्यानुष्ठानात् वृषलकत्वेन निर्देशः]। मार्गान्विष्यन्—मृगयन्, योजनानां शतानि, [दण्डकाऽयोध्ययोः दूरत्वेऽप्यपरिगणनीय सत्त्वेऽपि शतयोजनमविप्रकर्षावस्थायित्वमनयोः कथं सङ्गच्छते ? इति तु न शङ्कनीयं, "पृथिव्यां तप्यते तपः" इत्याशरीरिण्याः वाचमाकर्ण्य भगवतः शतयोजन मितायाः भुवः पर्य्यटनादिति ध्येयम्।] क्रान्त्वा अतिक्रम्य, इह अस्मिन् प्रदेशे दण्डकायां, यत् प्राप्तोऽसि आगतोऽसि, स तपसां तपोनिमित्तक इत्यर्थः, सम्प्रसादः अनुग्रहः परिपाकः इति यावत्, अन्यथा चेत् तन्नो यदि स्यादित्यर्थः, वो युष्माकं मन्वेष्टव्यानामित्यर्थः, अयोध्यायाः शतयोजनदूरवर्त्तिन्याः इति भावः, दण्डकायां वने दण्डकारण्ये पुनरुपगमः रावणादिवधानन्तरं पुनरागमनं क्व ? कुतः ? न सम्भवेदेवे त्यर्थः [विवक्षात सार्वविभक्तिकः अच्प्रत्ययः क्वादेशश्च]। अत्यन्तासम्भवितमेतदित्यर्थः, अतस्तपस एवैतत् फलं यदन्वेष्टव्योऽपि भवान् मदीयतपसैव इह प्राप्त इति भावः। यद्यहं तपो नाचरिष्यं तदा कथमपि भवान् इयद्दूरवर्त्तिन्यां दण्डकायां नागमिष्य दिति तात्पर्य्यम्। [अत्र भगवति रामभद्रे एकस्मिन् वस्तुनि जगज्जनान्वेष्टव्यत्व वृषलकाऽन्वेषकत्वरूपविरुद्धधर्म्मयोः एकत्रात्यन्तमसम्भवतोः समावेशात्, विरूपयो सङ्घटनारूपः विषमाऽलङ्कारः, अपि च वधार्थं भगवदागमनस्य वधोद्देश्यकस्य तपःफलभूतत्वाऽध्यवसितत्वात्, भेदेऽभेदाध्यवसानरूपाऽतिशयोक्तिः, अपि च चतुर्थ पादस्य पादत्रयवाक्यार्थं हेतुत्वेनाभिधानात् वाक्यार्थहेतुकं काव्यलिङ्गम्। एतेषां सङ्कराङ्गिभावात् सङ्करः]। मन्दाक्रान्ता वृत्तम्। लक्षणमुक्तम् प्राक् ॥ १३ ॥

(त) आमिति।—अनुभूतस्यापि अतिविस्मृतस्य द्रव्यस्य चिह्नदर्शनादिना यत् स्मरणं तत्प्रतिपादकमिदम् अव्ययम्, निश्चयेऽपि,—("आम् ज्ञाननिश्चयस्मृत्यो" इति हेमचन्द्र मेदिनी)।

अथेदानीं पूर्व्वपरिचिता दण्डकारण्यभागसम्पद विशिष्योपवर्णयितुमारभते, स्निग्धेति।—क्वचित् कस्यांचित् दिशि प्रदेशे वा, स्निग्धश्यामाः,—स्निग्धाः मसृणाः

एते तीर्थाश्रमगिरिसरिद्गर्त्तकान्तारमिश्रा.
संदृश्यन्ते परिचितभुवो दण्डकारण्यभागा. ॥ १४ ॥

शम्बूक। दण्डकैवेयम्, अत्र किल पूर्व्वं निवसता देवेन,—
चतुर्दशसहस्राणि रक्षसां भीमकर्म्मणाम्।
त्रयश्च दूषणखरत्रिमूर्द्धानो रणे हताः ॥ १५ ॥

नयनप्रीतिकरा सौम्यदर्शनतया इत्यर्थ, तथा श्यामा श्यामवर्णा कोमलतरुलतादिकिसलयाना सद्भावादित्यर्थ, अपरत अन्यस्यां दिशि प्रदेश वा भीषणी च, आभोग पूर्णता, असीमविस्तार इति यावत्, तेन रुचा अतिस्निग्धतया नयन कान्तिकरा, तरुलतिकादिभि कैश्चिदपि सर्व्वैश्च विरहिततया प्रथमदर्शनेन नितरा मानसोन्मादका इति भाव। तथा स्थाने स्थाने यत्र कुत्रचित, निर्झराणां शैलादध-पतितानां वारिप्रवाहाणा ("वारिप्रवाहो निर्झरो झर" इत्यमर)। झाङ्कते अव्यक्त शब्दविशेषे मुखरककुभ मुखरा ध्वनिता ककुभ दिशो यासु तथोक्ता, ("दिशस्तु ककुभ काष्ठा आशाश्च हरितश्च ता" इत्यमर)। तीर्थेत्यादि।—तथा तीर्थानि स्वपिलुण्जलादिसयुक्तस्थानानि, तथा चोक्तम्,—"प्रभावादद्भुताद्भूमे सलिलस्य च तेजसाम्। परिग्रहान्मुनीनाञ्च देशानां तीर्थता स्मृता ॥" इति। आश्रमा, मुनीनां निवासा, गिरय पर्व्वता, सरितो नद्य, गर्त्ता कन्दर्य्य, खातानि अवटा वा, तथा हि—"अतु सरसाख्यो च गतिर्यासा न विद्यते। न ता नदीशब्दधरा गर्त्तास्ता परिकीर्त्तिता ॥" इति। ["गर्त्त" इत्यत्र "गर्भ" इति क्वचित् पाठ, तदर्थस्तु ता गर्भे अभ्यन्तरे येषां तथाविधा] तै परिशोभिता इत्यर्थ, ये कान्तारा दुर्गमवर्त्मानि, ("महारण्ये दुर्गपथे कान्तार पुन्नपुंसकम्" इत्यमर) तैर्मिश्रा मिश्रिता, युक्ता इति यावत परिचितभुव, परिचिता अनुभूतपूर्व्वा भुव स्थानानि येषां तथोक्ता, एते सम्मुखस्था इत्यर्थ, दण्डकारण्यभागा, दण्डकारण्यस्य भागा अंशा प्रदेशा इत्यर्थ सदृश्यन्ते विलोक्यन्ते, मयेति शेष। [अत्र स्वभावोक्त्यलङ्कार। भयानको रसश्च भीषणाभोगरुक्षा भूभागा आलम्बनविभावा, मुखरककुभा घोरतरझाङ्कृतशैलोद्दीपनविभावा गद्गदस्वरभाषणदिक्प्रेक्षणादय अनुभावा, आवेगमोहदैन्यादयश्च व्यभिचारिण, एतैरभिव्यक्ता सहृदयमात्रसंवेद्या भीति भयानकरसता लभते]। मन्दाक्रान्ता वृत्तम् ॥ १४ ॥

दण्डकादा रहेङ्कावा घोररूपाणा रक्षसा विनाशात् अत्र जनस्थाने सर्व्वेषां स्वच्छन्दविहार संवृत्त इति इत्यावेदयति, चतुर्दशेति।—पुरा वनवासाऽवसरे

येन सिद्धचेतेऽस्मिन् जनस्थाने मातृस्थानामपि भीरुजान पदानामकुतोभयः सञ्चारो जातः। (थ)

राम। न केवल दण्डकेय, जनस्थानमपि॥ (द)

(अत निवसता देवेन इत्यध्याहार्य्यम्) भीममतीव क्रूर कर्म प्राणिहिंसनरूप येषां तथाविधाना, रक्षसा राक्षसानां, [सम्बन्धे षष्ठी] चतुर्दशसहस्राणि चतुर्दशगुणितानि सहस्राणि, तेषामधिनायकभूता दूषणखरविमूर्द्धान इति त्रयश्च, रणे हता विनाशिता। (रामस्य शौर्य्यातिशयप्रकटनार्थं "रणे" इति पदप्रयोग।) [समासान्त विधेरनित्यत्वात् "विमूर्द्धान" इत्यत्र "द्विविभ्या षो मूर्द्ध" (५।४।११५ पा०) इति न समासान्त ष। अत एवात्र न च्युतसंस्कारता दोष इति केचित्। केचित्तु तमेव दोष मत्वा कथयन्ति तदुद्धारप्रकार,—"त्रयश्च दूषणखरत्रिमूर्द्धा समरे हता" इति पाठ परिकल्प्य, यदि पुन, " विमूर्द्धा, न" इति छेद स्यात् तदा न अस्माक, रणे भवत्कृतसमरे इत्यर्थ, इत्यभिप्रेत्य व्याख्यातवन्त, एके तु "नो" किम्? इति काक्वर्थयोजनया सिद्धान्तानुभवसगौरवप्रत्यभिज्ञापन समाद्रियन्ते, तदा न भवति प्रोक्तदोषस्पर्श इति ध्येयम्]। पथ्यावक्त्र वृत्तम्॥ १५॥

(थ) येनेति।—येन—खरदूषणादिराक्षसनिधनेनेत्यर्थ। सिद्धानाम् अणिमादिसिद्धिमता मुनीनां देवयोनिविशेषाणां वा ("पिशाचो गुह्यक सिद्ध भूतोऽमी देवयोनय" इत्यमर)। चेत स्थान तस्मिन्। भीरुजानपदानां—भीरवो भयशीला ये जानपदा जनपदवासिन तेषाम्। ["भीरुजनानाम्" इत्यपि पाठ दृश्यते, तस्य तथैवार्थ।] अकुतोभय,—नास्ति कुतोऽपि कारणात् भय यस्मिन् स। ["मयूरव्यंसकादयश्च" (२।१।७२ पा०) इति निपातनात् समास]।

(द) न केवलमित्यादि।—अस्ति हि विन्ध्यशैलपादाददूरस्थिताया दण्डकाया उपान्ते महारण्य जनस्थान, तत्र पुरा भगवान् सीतया सौमित्रिणा च सह साम्राज्योपभोगज सुखमपि तृणाय मत्वा कियन्त काल निनाय, तत् सर्व्वमधुना स्मृतिपथमुदीयमान समिद्धाग्निशिखानिभ निर्व्वासिताया सीताया स्मरणात् जीवजीवनपरिहाराच्च शुष्केन्धनप्राय रघुमणे चेत निर्दहति स्म। एष हि सन्दर्भसार। दण्डकाया दर्शनस्य भर्त्तृ दुःखाकरत्वेन सा एव पुरा दुर्दशा आसीत्, इदानीन्तु हतदैवस्य मे कर्म्मविपाकात् ततोऽप्यधिकतर दुःखस्थानमासादितम् इत्यपि शब्दार्थ। ["दण्डकैव" इति पाठ—एवशब्दोऽवधारणार्थक]।

शम्बूकः। बाढम्। एतानि खलु सर्वभूतलोमहर्षणानि उन्मत्तचण्डश्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्य्यन्तानि दीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते। (ध)

तथाहि—

निष्कूजस्तिमिताः क्वचित्, क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः,
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः।

(ध) बाढमिति।—स्वीकारसूचकमव्ययमेतत्। ("भृशप्रतिज्ञयोर्बाढम्" इत्यमरः) "ओम् एवम्" इत्यादिवत्। सर्व्वभूतेत्यादि।—सर्वेषां भूतानां प्राणिनां लोमानि हर्षयन्तीति लोमहर्षणानि, येषु दृष्टेषु प्रभूतेन भयेनाभिभूतानां सर्वेषामेव जीवानां रोमाञ्चो जायते इति भावः, भीतिप्रदानि इत्यर्थः। उन्मत्तेत्यादि।—उन्मत्तानां क्षिप्तानाम् अत एव चण्डानामतिकोपनानां श्वापदानां [शुनः पदानीव पदानि येषां तथाभूतानाम्] हिंस्रपशूनां कुलानि सजातीयसमूहाः तैः सङ्कुलाः आकीर्णाः, ("सङ्कीर्णं सङ्कुलाकीर्णं" इत्यमरः) गिरिगह्वराः येषां तानि तथोक्तानि। जनस्थानेत्यादि।—जनस्थानं पर्य्यन्तं सीमा येषु तानि तथोक्तानि, जनस्थानस्य सीमारूपतया अवस्थितानीत्यर्थः। दीर्घारण्यानि—अत्यायतानि महावनानि। दक्षिणां दिशमभिवर्त्तन्ते—अवाचीं दिशं व्याप्य तिष्ठन्तीत्यर्थः, दक्षिणदिग्विलम्बितत्वात् तेषामतीव दीर्घत्वमिति भावः।

अथेदानीं जनस्थानस्य गम्भीरत्वं भीषणत्वञ्च प्रतिपादयितुं तत्स्थानस्थकोटरशयानां कलकलप्रियाणां विहगानामपि हिंस्रेभ्यः भयात् निःशब्दावस्थानं परिभ्रमणप्रिराणां सञ्चारवर्जनञ्च सूचयति, निष्कूजेति।—क्वचित् कुत्रचित् प्रदेशे जनस्थानस्येत्यर्थः, निष्कूजं कूजनस्याभावः [नञर्थेऽव्ययीभावः] तेन स्तिमिताः निश्चलाः, हिंस्रकाणां भयात् स्वभावसुलभं कलकलमपि विमुच्य यत्र तिर्य्यञ्चः मूकाः सन्तः नियतमासते का कथा अन्येषामित्यर्थः, यद्वा,—निः नास्ति कूजः कूजनम् अव्यक्तमधुरध्वनिः येषां तदाभूताः अत एव स्तिमिताः निश्चलाः हिंस्रकसञ्चारदर्शनादिति भावः, [इति त्रिपदसमासः। एतेन सिंहव्याघ्रादिश्वापदसञ्चारो ध्वन्यते]। क्वचिदपि, प्रोच्चण्डाः अतिदारुणतया रौद्रतराः सत्त्वानां सिंहव्याघ्रप्रमुखाणां श्वापदानां स्वनाः शब्दाः यासु ताः तथोक्ताः, श्वापदघोरगर्ज्जनैः प्रतिध्वनिता इत्यर्थः। क्वचिच्च, स्वेच्छया सुप्ताः निद्रिताः गभीराः अपरिमिताः भोगाः शरीराणि येषां ते तथोक्ताः ("भोगः सुखे धने चाहेः शरीरफणयोरपि" इति विश्वः) ["भोग" इत्यत्र क्वचित् "घोर" इति पाठः—तदयमर्थः

सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते ॥ १६ ॥

सुगमं । क्वचित्तु "घोष" इति पाठो दृश्यते । तत्र—गभीरः घोषः शब्दो येषां ते इति भुजगविशेषणम्] ये भुजगा अजगराः, तेषां श्वासैर्विषमयैरित्यर्थः, प्रदीप्ताः प्रज्वलिताः अग्नयो दावानला यासु तास्तथोक्ताः, यत्र हि यथेच्छं प्रगाढं निद्रितानां भीषणवपुषाम् अजगरव्यालानां गभीरघोषाः श्वासमारुताः क्वचित् पादपसङ्घर्ष जनितानां दावानलानां समेधका भवन्ति । तथा प्रदराणां गर्त्तानां भूविदाराणां ("फाट" इति भाषा) विदीर्णभूखण्डानामित्यर्थः, ("प्रदरो रोगभेदे स्यात् विदारे शरभङ्गयोः" इति मेदिनी, "प्रदरः स्त्रीरुजो भेदे प्रदरः शरभीतयोः" इति च विश्वः) उदरेषु मध्येषु विलसत् सुशीतलतया स्वच्छतया च शोभमानं, दुष्प्रापतया च स्वल्पं अम्भो जलं यासु ताः, तथोक्ताः सीमानो भागा इत्यर्थः, विद्यन्ते इति शेषः [एतेन भुवः प्रचण्डातपतापशुष्कत्वं व्यज्यते] यासु सीमासु दण्डकारण्योपान्तभूमिषु इत्यर्थः, तृष्यद्भिः आतपोल्लङ्घनात् बलवदम्भस्यतया तृषाऽऽर्त्तैः, सुपेयसलिलपूर्णकूपाद्यभावादित्यर्थः, तत्तत्स्थलेषु जलानां सुदूरकूपतलस्थितत्वेन तेषां तत्र पानासम्भवादित्याशयः । प्रतिसूर्य्यकैः कृकलासैः ("सरटः कृकलासः स्यात् प्रतिसूर्य्यशयानकौ" इति हलायुधः) अजगराणाम् आतपोत्तापजक्लेशोपशमाय शीतलपादपतलेषु गाढं प्रसुप्तानां व्यालविशेषाणां पूर्व्वोक्तानां दृहत्सर्पाणामित्यर्थः, स्वेदद्रवः घर्म्मवारि, ("स्वेदस्तु स्वेदने घर्म्मे" इति मेदिनी) पीयते । यस्यां हि जनस्थानसीमाशायिन्यामरण्यान्यां क्वचिदविरतचङ्क्रम्यमाणानां श्वापदकुलानां भीषणगर्जनमाकर्ण्य भयात् विहगाः तूष्णीम्भूय स्थिताः, मृगाश्च निःशब्दपदसञ्चारं क्रमन्ते, अत एव निःशब्दगभीराः वनभूमयः दृश्यन्ते । क्वचिच्च क्षुत्पीडिताः सिंहशार्दूलादयः भृशं गर्जनं कुर्म्मं भजन्ति, अत एव कोलाहलमुखरिताः, कुत्रचिच्च प्रसुप्ताः दन्दशूकाः घोरं निश्वसन्तः घर्म्मातिशयात् शाखिसङ्घर्षोद्भूतं दावानलं समेधयन्ति, प्रचुरजलाशयाद्यभावात् तृष्यन्तश्च सरटाः तृषावेगं विसोढुमशक्नुवानाः अजगरस्वेदद्रवं निपीय कथञ्चित् तृषां वारयन्ति, इत्यसौ रौद्रत्वं समस्त्यस्या इति तात्पर्य्यम् । [अत्र महारण्यस्य यथायथोपवर्णनात् स्वभावोक्त्यलङ्कारः, अपि चात्र, बीभत्सो रसः भयानकरसस्याङ्गभूततयोपवर्णित, इति रसवदलङ्कारः । तथाहि,—"रसभावौ तदाभासौ भावस्य प्रशमस्तथा । गुणीभूतत्वमायान्ति यदाऽलङ्कृतयस्तदा । रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ॥" इति दर्पणे । तथा चाऽत्र भयानकरसस्य आलम्बनविभावाः ग्रीष्मसत्त्वाः अजगराश्च,

राम। पश्यामि च जनस्थानं भूतपूर्वखरालयम्।
प्रत्यक्षानिव वृत्तान्तान् पूर्वाननुभवामि च ॥ १७ ॥

[सर्वतोऽवलोक्य।] सर्वथा प्रियारामा हि वैदेही आसीत्, एतानि तानि नाम कान्ताराणि, किमतः परं भयानकं स्यात्॥ (न)।—

तेषाञ्चोद्यानविचेष्टनानि घोरतरनिश्वासाश्चोद्दीपनविभावाः, नरविहगादीनां रोमाञ्चोत्कम्पकूजितादयश्चानुभावाः, ते ते त्रासदैन्यशङ्कादयश्च व्यभिचारिणो भावाः, एवमेतैर्व्यज्यमाना भीतिः भयानकरसतामेति, अपि चाङ्गभूतस्य बीभत्सस्य आलम्बनविभावाः अजगरस्वेदद्रवादयः, तत्र च दौर्गन्ध्यक्रिम्यादयश्चोद्दीपनविभावाः, सुसुखं तद्रसपानादयश्चानुभावास्तैः, मोहावेगादिभिश्च व्यभिचारिभावैः परिपुष्टा जुगुप्सा बीभत्सरसतामादत्ते इति ध्येयम्। अत्र निश्वायशब्दस्य गभीरशब्दस्याऽपरिमेयाद्यर्थे वाचकत्वाऽभावात् रूढिप्रयोजनादिभावेन लक्षणया तदर्थप्रतीतेः नेयार्थत्वदोषः, विशालत्वादितदर्थवाचकशब्देन परिहरणीयः]। शार्दूलविक्रीड़ितं वृत्तम् ॥ १६ ॥

अथ जनस्थानस्थितानां द्रव्यनिचयानां परिचयात् अनावेदितमपि अनन्यसाधारणतया तदेतदिति प्रत्यभिज्ञापयति इत्यभिप्रेत्याह, पश्यामि इति।—पूर्वं भूतः, [सुप्सुपेति समासः], यद्वा,—पूर्वस्मिन् काले भूतः [राजदन्तादित्वात् परनिपातः] खरस्य राक्षसविशेषस्य आलयो यस्मिन् तथाविधं, जनस्थानं पश्यामि, अरण्यान्याश्चेतस्याः अधुनाऽपि एतादृगेव भीमाकारकत्वं यत् तेषां राक्षसकण्टकानां समूलमुन्मूलनेऽपि तथैव तथाविधं भीत्यावहत्वं नापसरतीति भावः। अतः पूर्वान् पूर्वकालिकान्, वृत्तान्तान् उदन्तान्, प्रत्यक्षानिव अक्षमिन्द्रियं प्रतिगताः प्रत्यक्षाः (गतिसमासः) तानिव साक्षाद्दृश्यमानानिवेत्यर्थः, अनुभवामि प्रतीतिपथं पातयामि, साक्षात्करोमीति समुदितार्थः, [तेषां तेषामतीतविषयाणामिदानीं समुद्बोधकत्वात् तत्तज्जातीयवस्तुसन्दर्शनाच्च स्मृत्युदयात् प्रत्यक्षदृश्यमानत्वमित्युत्प्रेक्षा तथा क्रिययोः एकस्मिन् कर्त्तरि रामेऽन्वयात् दीपकालङ्कारः, अपि च भूतविषयाणां प्रत्यक्षायमाणत्वेन निर्देशात् भाविकालङ्कारध्वनिः, एताभ्यां सङ्गाव्यते।—"प्रस्तुताप्रस्तुतयोर्दीपकं तु निगद्यते। अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥" इति सा।१०८५पि]। पथ्यावक्त्रं वृत्तम् ॥ १७ ॥

(न) सर्वथेत्यादि।—वैदेही सीता, स्वच्छन्दानुवर्त्तनं विनैव आत्मनः तथात्वेन दुःखानिष्टजनादिरूपः। कान्ताराणीति।—का विशेषेण रम्यते यस्मिन्

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु।
इति हा रमते सीता स्नेहस्तस्याः स तादृशः॥ १८॥

इत्याराम उपवनम् [आरमते घञि रूपम्] प्रिय आरामो यस्या सा तथोक्ता वन दर्शनोत्सुका इत्यर्थ । पचान्तरे—आरामप्रिया, [बहुव्रीहौ प्रियशब्दस्य पाचिकपर निपातदर्शनादिति ध्येयम्]। ("आराम स्यादुपवन कृत्रिम वनमेव यत्" इत्यमर), अत्र लक्षणया वनमात्रपरत्वमवधेयम्। यद्वा,—प्रिय आराम [भावे घञ्] आरमण यस्या तथाविधा। एतानि तानि—तया सीतया सह मया प्रीत्या अनुभूतपूर्वाणि, सा हि मे महारण्यवासप्रियसखी आसीदित्याशय । कान्ताराणि महाऽरण्यानि, ("कान्तारोऽस्त्री महाऽरण्ये विले दुर्गमवर्त्मनि" इति मेदिनी)। अत परम्—एभ्य अधिक, किं—वस्तु, भयानक स्यात् ?—दु सहदु खावेगावहत्वादित्यर्थ सीता विरहितया जनस्थानप्रवेशस्य नितरामेव मर्मस्पृक्त्वमत एव सीतां विना अद्य सकलमेव भीषण दु खास्पदमिति भाव । यासु यासु हि वनस्थलीषु पुरा सीतया लक्ष्मणेन च सहाऽहमक्लेश महामोदेन च साऽमनिश बभ्रमितवान्, कथमिदानीं तद्विनाकृत असहाय सन् तासु तासु भ्रमिष्यामीति महादु खकरमेतदिति तात्पर्यम्।

तदीयामकल्मषामप्रार्थितोपनता प्रत्यर्पणाशालेशनिर्मुक्ताञ्च प्रीति प्रदर्शयितु स्वसहवासप्रणयित्व प्रस्तौति, त्वयेति।—अह त्वया सह मधुगन्धिषु [मधुन गन्ध लेश येषु ईषन्मधुगन्धविशिष्टेषु इत्यर्थ ("गन्धो गन्धक आमोदे लेशे सम्बन्धगर्व्वयो" इति विश्वोक्ते) "अल्पाख्यायाम्" (५।४।१३६ पा०) इति इदन्ताऽऽदेश]। "प्रचुर मधुविशिष्टायत्व" तु मधुन पुष्परसस्य बहुलगन्ध एषु, इति मत्वर्थीय इनि "भूमनिन्दाप्रशसासु" इत्युक्ते.] विविधवनप्रसूनसुशोभिततततिमत्त्वेत्यर्थ, वनेषु निवत्स्यामि अवस्थास्ये, न मे राज्यादिसुखेषु प्रयोजनमिति भाव, इति सचिन्त सौत्सुक्यञ्च उक्त्वेत्यर्थ, हा शोकावेगसूचकध्वनौ, सीता रमते सततम् आनन्द प्रका शितवती, दोहददशायान्तु सुतरामेवेत्यर्थ । [कारणस्य कार्याऽव्यवहितपूर्व सत्त्वस्यापेक्षितत्वात् रामसहकृतवनवासानन्तरमेव कार्य्यभूतसीतारमण युक्तम्, अत्र तु तथाविधपौर्वापर्यविपर्ययदर्शनात् कार्यहेत्वो पौर्वापर्यात्ययरूपातिशयोक्त्यल ङ्कार श्चिन्तनीय । अत्र क्वचित् "इति वारमतोवासीं" एव पठ्यते, तदयन्तु पूर्ववत्, पर 'व्याङ्परिभ्यो रम" (१।३।८३ पा०) इति परस्मैपदम्। "इति ह्यारमतोवासौ" पाठे तु—"ह"शब्दयोगात् 'हखतोर्लङ् च" (३।२।११६ पा०) इति लङ् विशेषस्तेवम्।] तदनुरागस्याकृत्रिमत्वमनुपमत्वञ्च व्यक्तीकरोति स्नेह इति।—तस्या

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत् तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ १८॥

स स्नेह मयि आहिता निरतिशया अनन्यसाधारणी च प्रीतिस्तादृश तथैव आसीत् इति शेष। मदेकसुखा सीता आसीदिति भाव। यद्वा, स तु तादृश, स इव आसीत, तस्य सदृश किमपि इह जगति नासीति तात्पर्यम्। तत्सदृशस्य वस्त्वन्तरस्यासत्वात् केऽपि सुभगे, पुरा तज्जातीयसुखस्यानास्वादितत्वादित्याशय। ["हृदयस्त्वेव जानाति प्रीतियोग परस्परम्" इत्यादि वक्ष्यमाणवचसा तस्य परिच्छेदातीतत्व गम्यते। अत्र सीतास्नेहस्यैकस्यैव वस्तुन उपमानोपमेयत्वपरिकल्पनात् अनन्वयाऽलङ्कार, "उपमानोपमेयत्वमेकस्यैव त्वनन्वय" इति साहित्यदर्पणात्, तेन च सीतास्नेहस्याऽलौकिकत्वमसाधारणत्वञ्च व्यज्यते, इत्यलङ्कारेण वस्तुध्वनिरिति ध्येयम्। अपि चात्र कारणभूतस्य सीतायास्तादृशस्नेहस्य तथाविधवनवासस्मरणादिकार्य्यं प्रति समर्थकत्वनादन्यासात्, कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कार, एतयो श्चान्याऽन्यनैरपेक्ष्येणैकत्रावस्थानात् संसृष्टि वेदितव्या]॥ १८॥

कथं हि सा धीरा जानकी तथाविधेषु मधुगन्धिषु वनेषु अभीक्ष्णं दोहदवती आसीत? कथं वा किञ्चिदपि अकुर्वाणे, प्रत्युताविषह्यदुःखदायके अतीवदारुण निष्कृपे त्वयि इत्थं प्रणयिनी आसीत्? इत्याक्षेपे, तस्या मुग्धाया अहेतुकस्नेहवत्त्व, दर्शनमात्रादेवानीषा, तस्या व्यलीकशतापहरणात तेषु तेषु मयि च अकपटनिरतिशयस्नेहवत्त्वमित्यभिदधाति, अकिञ्चिदिति।—अकिञ्चिदपि कुर्वाण किमपि प्रीतिकरं कर्म अकुर्वन्नपि प्रियो जन इति शेष, [यद्यप्यत्र क्रियया सह नञ साक्षादन्वितत्वेन प्रसज्यप्रतिषेधत्वात्, तेन नञा सार्द्धं तत्पुरुषसमास अयुक्त, पर्य्युदासेनैव तत्समासस्येष्टत्वादिति मन्यते, तथापि, क्वचित्, अश्राद्धभोजी चतुर्थ्यम्पश्यन्त्या अपुनर्गेया श्लोका इत्यादिवत् स्थलविशेषेषु तस्य पर्य्युदासत्वमङ्गीकृत्य तेन साकं समासोऽपि अङ्गीकृत आचार्य्यैरिति, तथाहि, यथा अश्राद्धभोजी इत्यत्र भोजनरूपक्रियया नञोऽन्वयमङ्गीकृत्य कर्त्तरि णिने प्रयोगात् कर्त्रंशेनैवान्वयोऽनिमततया स्वीकृत, तथा च न भोक्तृदोषावकाश, तद्वदिहापि अकिञ्चिदपि कुर्वाण इत्यत्र कर्त्तरि अपिशब्देन शानज्विधानदर्शनात् तत्कर्त्तरि एव तदन्वयलाभात तस्य किञ्चिदुपकृति अनु [illegible] जनात् इत्यर्थस्य तत्र न कोऽपि समासानुपपत्ति न वा अविमृष्ट [illegible] दोषावकाश इति केचित्। नात्र असमन्मतमनन्यसाधारण अवसर, तस्य हि [illegible] प्रादर्शनात् तत्सत्त्वे तु तत्रावगमात् झटिति बोधाऽनुदयात्

शम्बूक। तदलमेभिर्दुरासदैः। अथैतानि मदकलमयूरकण्ठकोमलच्छविभिः अवकीर्णानि पर्व्वतैः अविरलनिविष्ट-नीलबहुलच्छाय-तरुण-तरुषण्ड-मण्डितानि असम्भ्रान्तविविध-मृगयूथानि पश्यतु महानुभावः प्रशान्तगम्भीराणि मध्यमारण्यकानि (प)।—

विधेयाविमर्शदोषसत्त्वदशायान्तु यदेवाविमृष्टं भवति तस्यैव दुष्टत्वात्, अत्र तु नञ्विशेषणत्वेनान्विततया गुणीभावात् अविमृष्टविधेयांशरूपत्वमेव, तदुद्धारोपायस्तु प्रदर्शित इति सम्यक्]। सौख्ये सुखसमूहे दर्शनस्पर्शनसम्भाषणमात्रात्समापतिते इत्यर्थः, दुःखानि शरीरिभिरपरिहार्य्यान् शोकसन्तानान् अपोहति, नाशयति। प्रियजनानामेव हि सम्मोहिका अन्तर्निगूढा प्रीतिरासाद्यते, यत् ते कदाऽपि किमपि अकुर्वद्भिरपि नेत्रमोहनैः तदीयप्रीतिदर्शनैः प्रियजना नितराम् अनुरज्यन्ति इत्याशयः। एतदेव विशदीकृत्य उपपादयति, तद्धिति।—यो हि यस्य प्रियो वल्लभो जनः भवतीत्यर्थः, तत् तथाभूतं स्निग्धं जनं [विधेयप्राधान्यात् क्लीवत्वम्] तस्य अपीहनीयदुःखवतः नितरां प्रेमवतः जनस्य इत्यर्थः, किमपि द्रव्यं कश्चिदनिर्वचनीयः पदार्थः भवति, कथम्भूतं भवतीति वचसा विवेचयितुं न शक्यते इत्यभिप्रायः। सान्निध्य-मात्रेणैवालौकिकसुखसम्भारस्य जननादित्याशयः। तादृशस्निग्धजनस्य सङ्गात् दुःखसमूहस्य सम्यक्नोपघातदर्शनात् प्रियजनस्य किञ्चित्कारत्वशून्यस्यापि मे तद्दुःख-निवर्त्तकसन्निधिमात्रमेव्य वराकी जानकी वनवासजनितासीमदुःखसन्ततिं कदाऽपि कथमपि मनसि नाजीगणत्, अवाक्प्रसरमखिलं विषेहे इति तु तात्पर्य्यम्। अतः निखिलविपत्पातहेतुः तस्याः मया सार्द्धं कान्तारागमनदीर्घदमपि तदुद्दिश्य तस्याः युक्तमेवेति सन्दर्भसङ्क्षेपः। [अत्राप्रस्तुतात् प्रियसामान्यात् प्रस्तुतस्य सीतारूपप्रीतिकरस्य वस्तुनः प्रतीतेः अप्रस्तुतप्रशंसाऽलङ्कारः। अपि चात्र कारणभूतस्य अनिर्वचनीयद्रव्यभूतस्य प्रियवस्तुनः, तद्दर्शनसमुत्थसुखप्रवाहेण दुःखसमूहनाशरूपस्य कार्य्यस्य समर्थकत्वेनोपन्यासात् कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, एतयोः परस्परसापेक्ष्येण संस्थितेः सङ्करः]॥ १९॥

(प) अथ रामस्य अभावनीयामुत्कण्ठामालोक्य स च दण्डकारण्योपान्तस्य गभीरारण्यस्य कठोरतासन्दर्शनजनितेति बुद्धा पुनस्तदुपशमाय कठोरतां परित्यज्य जनस्थानमध्यमारण्यस्य स्निग्धत्वं वर्णयति, तदिति।—तत्—तस्मात्, एभिः,—दुःखं सम्पाद्यते एभिरिति दुरासदैः दुःखोत्पादकैः जीवानामातपक्लान्त्यादिसूचकैः वनविवरैः

इह समदशकुन्ताक्रान्तवानीरवीरुत्-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।

रिवघ भीषणतया दुष्प्रेक्षणीयैरिति यावत्, अलं—प्रयोजनं नास्ति । [व्यर्थार्थकाऽल-मच्ययशब्दयोगात् तृतीया, समर्थार्थकतद्योगे तु चतुर्थी भवति] ("अलं भूषणपर्याप्ति शक्तिवारणवाचकम्" इत्यमरः)। अथ पुनर्वाक्यारम्भे। पश्यतु महानुभाव एतानि प्रशान्तगम्भीराणि मध्यमारण्यानि। प्रशान्तत्वं गम्भीरत्वञ्च ख्यापयति, मदेति।—मदेन हर्षातिरेकेण कृत्वा येषाम् अव्यक्तमधुरं केकारवं कुर्वन्त इति यावत्, ये मयूरास्तेषां परमानन्दप्रफुल्लानामित्यर्थः ये कण्ठास्तद्वत् कोमला पेशलतया मनोमुग्धकारिणी इति यावत्, छविः कान्तिर्यया तैस्तयोक्तैः पर्वतैः अभ्यन्तरारण्यावच्छेदेन सुभगैः [पर्यन्तैः इति पाठः—पर्यन्तैः परिसरैः मध्यमारण्यस्येति शेषः]। जनस्थानोपान्तवनस्य अतीव भयावहत्वेऽपि दूरत एव परमरमणीयतया तत्राभासमानत्वात् इयमुक्तिः, मध्यमारण्यस्यैव आरण्यके रमणीयविविधविहङ्गमैरध्युषितत्वात् सुषमाऽतिशयवत्त्वं वेदितव्यम्। अवकीर्णानि—सङ्कुलानि। अविरलत्यादि।—तथा अविरलं निविडं यथा तथा निविष्टा स्थिता अत एव नीलेन बहला गाढश्यामा छाया येषां ते, एवम्भूता ये तरुणा नवीना समधिकवीर्यादिवत्त्वात् मनोहरा तरवः पादपा तेषां षण्डानि समूहा ("षण्डः पद्मादिसङ्घाते न स्त्री स्यात् गोपतौ पुमान्" इति मेदिनी। "पद्मादि" इत्यादिशब्दात् वृक्षादेः परिग्रहः) तैर्मण्डितानि भूषितानि, तथा असम्भ्रान्तानि भयादिरहितत्वात् स्वच्छन्दचराणि विविधानां मृगाणां पशूनां यूथानि येषु तानि तथोक्तानि। प्रशान्तगम्भीराणि—प्रशान्तानि हिंसकसङ्घातसञ्चारणाद्यभावात् अनुद्वेगकराणि, गम्भीराणि विशालतरुषण्डमण्डितत्वात् सुविस्तृतत्वाच्च तरसा विस्मयसम्भ्रमकराणि, मध्यमारण्यकानि—जनस्थानस्य मध्यभूमिभागस्थितानि विस्तारकानि विस्तृतविपिनानि, तदभ्यर्णोपान्तारण्यमेव नितरां भीषयते हिंसकपरिपूर्णत्वात्, तस्य तु तथात्वाभावात् सौम्यदर्शनत्वं वेदितव्यम्।

अथ विषादनलीनस्य राघवस्य मानसं प्रीणयितुमाह, इहेति।—इह अस्मिन् मध्यमारण्यभूमिभागे, समदैः यौवनोद्दामजनितमदातिरेकात् सततपुलकितैः शकुन्तैः विहङ्गैः आक्रान्ता अध्युषिता अत एवानारतं व्याधूताश्चेति भावः, या वानीरवीरुधः वेतसलतिकाः तासां प्रसवैः मनोहरप्रसूनैः सपदि शकुन्ताक्रमणात् अनारतमेव हन्तपुं दूषः, सुरभीणि सुरभीकृतानि शीतानि शीतलानि स्वच्छानि निर्मलानि तोयानि सलिलानि तासां तथाविधा । तथा फलभरेण फलसमूहानां परिणामात्

फलभर-परिणाम-श्याम-जम्बूनिकुञ्ज-
स्खलन-मुखर-भूरि-स्रोतसो निर्झरिण्यः ॥ २० ॥

अपि च।—दधति कुहरभाजामत्र भल्लूकयूनाम्
अनुरसितगुरूणि स्त्यानमम्बूकृतानि।
शिशिरकटुकषायः स्त्यायते शल्लकीनाम्
इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

परिपाकाद्धेतो श्यामा श्यामवर्णा, यद्वा फलभरेण स्तवकपुष्पप्रसवभारावनततया इति भावः, परिणामाः परिणामवन्तः ईषदवनता अत एव वेपमानाश्चेत्यर्थः, ये श्यामजम्बूनिकुञ्जाः श्यामाः जम्बूलतिकापिहितोदराः गर्भगृहाः इति यावत्, तेभ्यः स्खलनेन पतनेन मुखराणि शब्दायमानानि भूरीणि स्रोतांसि बहवः प्रवाहाः यासां तास्तथोक्ताः, निर्झरिण्यो गिरिनद्यो वहन्ति गच्छन्ति। फलानां परिणामः कुञ्जानां श्यामत्वे फलानां पतने च हेतुः। [अत्र स्वभावोक्त्यलङ्कारः]। मालिनी वृत्तम् ॥ २० ॥

कुत्रचिच्चैतस्य मध्यमारण्यस्य हिंस्रकभुजिष्ठतया तद्गर्जनप्रतिध्वानैः भीष्मतां, वन्यकुञ्जरोपसेविततया च मनुजानां स्वच्छन्दसञ्चाराच्चिन्त्य स्त्यानवर्णपादपानाव निर्यासगन्धैः मदमधरामोदकारित्वञ्चोपवर्णयितुं प्रस्तौति, दधतीति।—अत्र मध्यमारण्यकोपान्तभूविभागेषु कुहरभाजां गिरिगह्वरस्थितानां भल्लूकयूनां तरुणभल्लूकानाम्, अनुरसितेन गर्जनाद्यवहितोत्तरं जायमानेन प्रतिध्वनिना गुरूणि प्रतिशब्ददीर्घाणि अम्बूकृतानि सनिष्ठीवध्वनयः, ("अम्बूकृतं सनिष्ठीवम्" इत्यमरः)। स्त्यानं वृद्धिं दधति। ("स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि" इति विश्वः)। भल्लूका हि शैत्यादिवशात् ज्वरादिकाले वा स्वभावत एव निष्ठीवनसहितं ध्वनिं कुर्वन्ति। स तु ध्वनिः अनुरणनसहायकमेत्य वृद्धिं गत्वा नितरां पथिकमनांसि भीषयते इति भावः। अपरतश्च मध्यमारण्यकस्य गजयूथसञ्चारभ्यावहत्वञ्चोपपादयति, शिशिरेत्यादि।—तथा शल्लकीनां गजभक्ष्यलताविशेषाणां ("गन्धिनी गजभक्ष्या तु सुवहा सुरभी रसा। महेरुणा कुन्दुरुकी शल्लकी ह्लादिनीति च" इत्यमरः)। शिशिरः शीतलः कटुस्तीव्रः कषायः कषायरसोद्गारी सुरभिश्च, ("कटुतिक्तकषायास्तु सौरभे च प्रकीर्तिताः" इति हलायुधः)। इभैर्हस्तिभिर्मदस्राविभिरित्यर्थः, ("दन्ती" इत्याद्यारभ्य "इभः स्तम्बेरमः पद्मी" इत्यमरः)। दलिता विदारिता मर्दिताश्चेत्यर्थः, अत एव विकीर्णाः परितो विच्छिन्नाश्च ये ग्रन्थयः पर्वाणि तेषां

राम । [सबाष्पस्तम्भम् ।] भद्र ! शिवास्ते पन्थानो देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः । (फ)

शम्बूक । यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि । (ब)

[इति निष्क्रान्तः ।]

निष्यन्दस्य निस्रवस्य रसक्षरणस्येत्यर्थः, गन्धः स्थापितं वहति । इभमदगन्धैर्मिश्रितः सन् द्विगुणीभूय परितः प्रसरतीति भावः । एतदपि रामस्य सीतावियोगविधुराशयस्य मनःप्रसादनार्थं वर्णितम् । चित्ताकर्षकवस्तुवर्णनाश्रवणसमकालं हि प्रायशः मानसी व्यथा किंयदपि शाम्यतीति प्रसिद्धिः । [अत्राऽपि स्वभावोक्त्यलङ्कारः]। मालिनी वृत्तम् ॥ २१ ॥

(फ) सबाष्पस्तम्भमिति ।—बाष्पाणामश्रूणां सीतावियोगजनितानामित्यर्थः, स्तम्भः स्तम्भनं कथञ्चित् प्रियजनसंलापजनितेन हर्षेण उपशमीकरणं तेन सह वर्त्तमानं यथा तथा । रामस्य तु सीताविरहशोकावेगः तत्तद्दृष्टवन्यवस्तुसन्दर्शनात् एभिरपि शम्बूकवचनैर्न उपशान्तः, अपि तु एकाग्रतया वर्द्धित एवेति स कथञ्चिदपि स्तम्भयित्वा शम्बूकं विसृजति, शिवा इति ।—ते तव पन्थानः शिवाः सुखजनकाः सन्त्विति शेषः, पुण्येभ्यः पवित्रेभ्यो लोकेभ्यः भुवनेभ्यः पुण्यान् लोकान् गन्तुमित्यर्थः [“क्रियार्थोपपदस्य च कर्मणि स्थानिनः” (२।३।१४ पा०) इति सूत्रेण चतुर्थी]। [“देवयानाः” इति पाठान्तरं दृश्यते, तदर्थस्तु पुण्यलोकप्रयाणोपयोगिनः शुभाः सुखाय पन्थानः ते सन्तु इति, ते च पन्थानः “अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्” इति विविधा उपदिष्टाः । अथवा देवयानं देवविमानं भगवत्करकमलसंस्पर्शजनितपुण्यसन्ततिविपाकवशात् समुपस्थितम्, प्रतिपद्यस्व पावनलोकगमनार्थं आरोहेत्यर्थः । यद्वा देवयानं ज्योतिष्मता वर्त्मना अर्चिरादिमार्गेणेति यावत् हिरण्यगर्भलोकगमनमित्यर्थः, साधनादिनोपचारेण प्राप्नुहि, ब्रह्मानन्दसन्दोहं मोक्षं भजेति भावः । तद्गमनप्रकारो यथा छान्दोग्ये—“मासेभ्यः संवत्सरं संवत्सरादादित्यम् आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एनान् गमयत्येष देवयानः पन्था इति”। इति ।]
यद्यपि एतादृशं शूद्रस्य तपस्याधिकाराभावात् नैतादृशं फललाभः सम्भवतीति प्रतीयते, तथापि भगवद्दर्शनस्य महिमातिशयत्वादेवमुक्तमित्यूहनीयम् ।

(ब) पुराणेत्यादि ।—यावदवधारणे । ब्रह्मवादिषु वेदोपदिष्टेषु तपोधनेषु पुराणं प्राचीनं सनातनं पूजितमित्यर्थः, तस्य अतीव ब्रह्मपरायणोपासकेषु वृद्धत्वात्

राम । एतत् तदेव हि वनं पुनरद्य दृष्टम्
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।
आरण्यकाश्च गृहिणश्च रता स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥

इति भाव । यद्वा—पुराणं पुरातनोऽसौ ब्रह्मवादी वेदतत्त्वोपदेष्टा तमित्यर्थ । अगस्त्यमपि—तपोधनम्, अभिवाद्य—सत्कृत्य वान्दत्वा। शाश्वत—शश्वद्भवं क्षय रहितमपुनरावर्त्तनीयं, पदं—स्थानं ब्रह्मपदमिति यावत्, देवीपुराणमतस्य पतन राहित्यमावेदयति। तथा हि,—"सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम्। ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः" ॥ इति। अनुप्रविशामि—अनुगच्छामि, पूज्यानां पूजाव्यतिक्रमे श्रेयोलाभस्य प्रत्यूहभूतत्वादित्याशयः ।

अथेदानीं भगवान् रघुमणिः सुदुःसह तादृशं वनवासदुःखनिवहमपि सम्भूय वनौ भूत्वाऽपि गृही भवन् सीतया सह कियता सुखेन कालं निनायेति विचिन्त्याह, एतदिति।—तदेव प्रियया सह पूर्वं सुखेनाध्युषितं तया विना अद्य पुनर्दुःखकर मित्यर्थ, एतद्वनम् अद्य पुनः दृष्ट बहोः कालात् परं नयनपथं समागतमित्यर्थ । यस्मिन् वने पुरा पूर्वं चिरमेव चतुर्दश समा व्याप्य वयं सीता लक्ष्मण अहञ्चेत्यर्थ, वसन्त कृतनिवासा अत एव स्वधर्मे स्वोचिते रता वनिनामसकलमाचारमनुपालयन्त गृहिणश्च गृहस्थाश्च आरण्यका वानप्रस्थाश्च सन्त सांसारिकेषु गृहाश्रमसमुचितेषु एकदेव मनुष्यजन्मलभ्येषु सर्वेषु सुखेषु इत्यर्थ, रसज्ञा अभूम आस्वादज्ञा भूता । ("शृङ्गारादौ बले वीर्य्ये सुवर्णे विषशुक्रयोः । आस्वादे च रस प्राहु" इति शब्दा र्णव ।) प्रकृते वनवासिनः अभवन्त अपि वयं सीतया सह तासु तासु वनस्थलीषु सुचिरं विहरन्त गृहिणां यावद्भोगसाधनमुपभुञ्जाना अविदितगतयामा चिराय सुखेनानुपमेन कालं यापितवन्त । अत्रास्माकं सुखभोगानां परा काष्ठा जाता इति संक्षेप । पितुराज्ञया अरण्यनिषेवणात् वनित्वं, सीतया सह गृहस्थोचितसुख सन्तानोपभोगाच्च गृहित्वमवधेयम्। अत कारणभेदात् समुपजायमानयो विरुद्धयो रपि आश्रमयोरेकत्वाऽस्थानं सङ्गच्छते इति वेदितव्यम्। गृहस्थवनस्थाश्रममधि कृत्याह देवीपुराणम्,—"पञ्चनित्यं महायज्ञैः श्रद्दधानो दृढेन्द्रियः। देवताऽतिथि शिष्टाशी नियतो वेदकर्मसु ॥" इत्यादि। पञ्चमहायज्ञास्तु स्वाध्यायाग्निहोत्रातिथि पूजनपितृतर्पणबलिकर्मरूपाः । "भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च। संवि भागो यथान्यायं धर्मोऽयं वनवासिनः ॥" इत्यादि च। वसन्ततिलकं वृत्तम् ॥ २२ ॥

अपि च।—एते त एव गिरयो विरुवन्मयूरा-

स्तान्येव मत्तहरिणानि वनस्थलानि।

आमञ्जुवञ्जुललतानि च तान्यमूनि

नीरन्ध्रनीलनिचुलानि सरित्तटानि॥ २३॥

मेघमालेव यश्चायमारादपि विभाव्यते।

गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी॥ २४॥

निसर्गशोभाऽऽकरीभूतानां तासां हि वनस्थलीनां कियत् मानसोन्मादकरत्वमासीत्, सीतैरम्याभिरुपभुक्तासु स्वभावलीलास्थलीभूमिषु तासु तासु च मत्तहरिणा विश्रामजसुखोपभुक्तये निचुललतिकाकुञ्ज निर्भरमधिशय्य रोमन्थायमाना सीतया कथं हि सस्नेहमालोकिता? इति अनुध्यायन् रघुमणिः सगद्गदं पुनरभिधत्ते,एत इति।—त एव पूर्वपरिचिता इत्यर्थः,पुरा सीतया सार्द्धं मया सुचिरं सुखमध्युषिता इति यावत्, विरुवन्तः सुमधुरं केकारवं कुर्वन्तः मयूराः बर्हिणः येषु तथाविधाः सुमधुरकलालापकलाविशालिन इति यावत्, एते पुरतः दृश्यमानाः गिरयः पर्वताः, तान्येव सीतया नवदृष्टानीत्यर्थः, मत्ताः मदातिरेकात् अभितः धावन्तः अत एव प्रफुल्लाश्चेत्यर्थः,हरिणाः येषु तानि तथोक्तानि वातमत्तहरिणान्वितानि वनस्थलानि वनभूमयः, तानि च रमणादिनोपभुक्तानीत्यर्थः,अमूनि मम्मखवर्त्तीनि,आ अत्यर्थं मञ्जवोऽधिकमनोहरा इत्यर्थः, वञ्जुला अशोकवृक्षा वेतसा तिनिशा वा तेषां ते एव वा लता येषु तानि तथोक्तानि, ("वञ्जुलः पुंसि तिनिशे वेतसाशोकयोरपि" इति मेदिनी) नीरन्ध्रा निरवकाशा अविरलनिविष्टा इति यावत्, नीलाः श्यामवर्णा अनुपदेशजायमानतया अतिसरसकिसलयोपशोभिता इत्यर्थः, निचुला स्थलवेतसलतिका येषु तानि तथोक्तानि सरित्तटानि, सर्व्वत्र सन्तीति क्रियया अन्वयः। ("वानीरे कविभेदे स्यान्निचुलः स्थलवेतसः" इति शब्दार्णवः)। [अत्र क्रियापदस्याध्याहार्य्यत्वेनान्वयात् न्यूनपदत्वदोष नाशङ्कनीयः, प्राचीनैराचार्य्यैः क्रियापदस्याध्याहारादिस्थले तथाविधदोषस्यानङ्गीकारादिति विभावनीयम्। अत्र प्रस्तुतानां गिरिवनस्थलादिपदार्थसङ्घानाम् एकस्यां क्रियायामन्वयात् प्रस्तुतपदार्थानामेकधर्म्माभिसम्बन्धरूपः तुल्ययोगिताऽलङ्कारः।—"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्। एकधर्म्माभिसम्बन्धः स्यात् तदा तुल्ययोगिता॥" इति दर्पणात्]। वसन्ततिलकं वृत्तम्॥ २३॥

जनस्थानोपान्तवर्त्तिन निरन्तरपुष्पकादिभिर्गगन [illegible] समुपसेविततया मेघमाला [illegible] इति [illegible] गोदावरीं [illegible] प्रस्रवणगिरिं उपातभुनो सीतया

अस्यैवासीत् महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद् वयमपि रतास्तेषु पर्णोटजेषु।
गोदावर्य्याः पयसि विततश्यामलानोकहश्री-
रन्तः कूजन् मुखरशकुनो यत्र रम्यो वनान्तः ॥ २५ ॥

सहात्मनः विहरणमुपश्रुत्य इदानीं विसृष्टसीततया शर्मोत्या विलपन्नाह, मेघमालेवेत्यादि।—अयं पुरतः दृश्यमानः यः मेघमालेव कादम्बिनीव आरादपि दूरादपि ("आराद्दूरसमीपयोः" इत्यमरः) विभाव्यते पर्वततत्वेन प्रतीयते, सोऽयं प्रस्रवणो नाम गिरिः पर्वतविशेषः, इति वेदितव्यः। यत्र पर्वतोपान्तभूमौ इत्यर्थः, इयं गोदावरी नाम नदी प्रवहतीति शेषः, अस्यैव पाददेशप्रवाहिणी इयमवधातव्या इति भावः। अत्युन्नततया अस्यैव गिरेः सजलजलदपङ्क्तिरिव अतिदूरात् तथाविधप्रतीयमानत्वमित्यवधेयम्। [अत्रोपमाऽलङ्कारः स्फुट एव। अत्र चोपमानोपमेययोः लिङ्गव्यत्यासदर्शनात् "सुधेव धवलश्चन्द्रः" इत्यादिवत् भग्नप्रक्रमतादोषो नाशङ्कनीयः, उपमानोपमेयगतसाधारणधर्मस्यान्यथाभावादर्शनात् मेघमालत्वस्याजहल्लिङ्गतया लिङ्गविभेदेऽपि नोक्तदोषावसरः। "अयम्" इति पदस्य वारद्वयप्रयोगात् पुनरुक्तिदोषस्तु अस्त्येव इति विभावनीयम्]। पथ्यावक्त्रं वृत्तम् ॥ २४ ॥

तस्यैव शैलस्याधस्तात् सुमधुरारावैः विविधैः विहङ्गमैरध्युषिते तस्मिन्नेव वनान्ते रम्यां पर्णशालां विरचय्य सीतया सहाऽहं सुचिरं सुखमुषित्वा तत्पर्वतमधिशयानेन परमोपकारिणा पितृसुहृदा जटायुषा सस्नेहं निरीक्ष्यमाणः कालम् अनैषं, गोदावर्य्याश्च नद्याः विमलं कलधौतधवलञ्च सलिलं भृशमवगाह्य सीता काननवासजां वेदनामननुभूय कियता हि सुखेन दिवसं यापितवती तत् तद्वेदनां वन्ध्यां विलप्याह राघवेन्द्रः, अस्येति।—अस्यैव गिरेः प्रस्रवणस्येत्यर्थः, महति अत्युन्नते विशाले च, शिखरे शृङ्गे,("शिखरोऽस्त्री द्रुमाद्येऽद्रिशृङ्गे पुलककक्षयोः" इति मेदिनी)। गृध्राणां (दाक्षिणात्यानां "शकुनि" इति भाषा) राजा गृध्रराजः तस्य,['राजाहःसखिभ्यष्टच्' (५।४।९१ पा०) इति टच् समासान्तः] गरुडात्मजस्य पितृमित्रस्य अस्मत्पूजितस्य जटायुष इत्यर्थः, वासः वसतिरासीत्। तस्य तन्नामकस्य तच्छिखरस्य वाऽधस्तात् अधःप्रदेशे, तन्निम्नस्थेष्वित्यर्थः, [अधस्तादिति पदम् अधर इत्यस्मात् अस्तातिप्रत्ययेन, अधरस्य अधादेशेन च सिद्धम्] तेषु पूर्वानुभूतेषु पर्णोटजेषु; पर्णानाम् उटजेषु पर्णशालासु [अत्र उटजशब्देनैव पर्णशालार्थकत्वेऽपि पुनः पर्णग्रहणं कुटीरस्य पर्णरचितत्वविद्योतनार्थं, कुण्डलशब्दस्यैव कर्णभूषणार्थकत्वेऽपि श्रवणकुण्डलादिवद्

अा, तदत्रैव सा पञ्चवटी, यत्रातिचिरनिवासेन विविध-विस्रम्भातिप्रसङ्गसाक्षिण प्रदेशाः (भ) प्रियाया प्रियसखी च

प्रयोगवत।) वयमपि सीतारामलक्ष्मणा रता अत्यासक्ता सन्त न्यवसामेति शेष निजतसहजसौन्दर्य्यावलोकनतत्पराणामस्माक पथावासिष्वपि अत्यासक्तिरासीदिति भाव। यत्र यस्मिन् प्रदेशे गोदावर्य्या तन्नामधेयाया सरित पयसि जले विनताना फलभरावनताना सलिलपर्य्यन्तपतितानामित्यथ, श्यामलाना श्यामै पल्लवैविराज-मानानामनोकहाना हचाणा श्री शोभा यस्मिन् स तथोक्त, ["विनत" इत्यत्र "वितत" इति पाठे—विततानां पयसि प्रतिविम्बितानां श्यामलानाम् अनोकहाना श्री शोभा यस्मिन् स तथोक्त इत्यर्थाय। 'अनोकह" इत्यस्य अनस शकटस्य अक गति हन्तीति व्युत्पत्तिलभ्योऽर्थ पर्य्यालोचनीय, (अनस्+अक+हन्+ड। "अनोकह कुट साल पलाशी द्रुद्रुमागमा" इत्यमर)। एकदेशान्वयस्य सर्व्वत्र साधुत्वाभावेऽपि "प्रतियोगिपदादन्यद् यदन्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धत्वेन नेष्यते॥" इति नियमेन अत्र कारकेण पयसीत्यनेन वृत्तिशब्दैकदेशी-भूतविनतशब्दस्यान्वयेऽपि न चातिरिति सुधीभिर्भाव्यम्] तथा मुखरा शब्दायमाना शकुना पक्षिण, ("शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजा" इत्यमर) यस्मिन् स तथोक्त, अत एव अन्तर्मध्ये कूजन् प्रतिध्वनन्निव स्थित इत्यर्थ, [केचित्तु—"अन्त-कूजन्मुखरशकुन' इत्येकपद मन्यमाना अन्त अभ्यन्तरे कूजन्त रुवन्त मुखर-शकुना गीतपरा पक्षिण यत्र स तथोक्त इत्येव व्याचचत] रम्य रमणीय सुदृश्यसुश्राव्यसुसेव्यत्वादिना मनोहर इत्यर्थ, वनान्तो वनस्वरूपम्। (अत्र अन्तशब्द स्वरूपवाचक, तथा च मेदिनी—"अन्त स्वरूपे नाशे नाऽस्त्री शेषे चान्तिके त्रिषु" इति) इस्थित इति शेष। [अत्र कूजनस्य अप्राणिवनकर्तृकत्वासम्भवेऽपि अन्त-कूजन्निवेत्युक्त वने कूजनकर्तृत्वस्य प्रतीयमानतया भावाभिमानिनी प्रतीयमाना क्रियोत्प्रेक्षा नामालङ्कारो बोध्य]। मन्दाक्रान्ता वृत्तम्॥ २५॥

(भ) पूर्व्वदृष्टदण्डकारण्यारामणीयकमधुना पुनरवलोकयन् भगवान् रामचन्द्र ध्यानस्य तत्सर्वस्य सम्प्रति समुद्बोधितया पञ्चवटीप्रत्यभिज्ञया नितरा दूयमानो विलपति अा इति।—अा इति प्रत्यभिज्ञानसूचकमव्यय ("अा प्रगृह्य स्मृती वाक्ये" इति मेदिनी।) तत—तदा यत्तदेव बहुतरप्रत्यभिज्ञानेन दण्डकारण्यमिति सुस्थित-मित्यर्थ। अत्रैव—अस्मिन्नेव प्रदेशे, यत्र—पञ्चवट्याम्, अतिचिरनिवासेन,—अतिचिर बहुकाल व्याप्य यो निवास तेन, ["अत्यन्तसंयोगे च"(२।१।२९ पा०) इति द्वितीयया

वासन्ती नाम वनदेवता प्रतिवसति। तत् किमिदमापतितमद्य रामहतकस्य॥ (म) सम्प्रति हि (य)—

चिरोद्वेगारम्भी प्रसृत इव तीव्रो विषरस
कुतश्चित् संवेगात्प्रचलित इव शल्यस्य शकलः।

समास] बहुकालावस्थानेनेत्यर्थ, यत्र हि लोकैर्बहुकालमवस्थीयते कालेन तदवस्थाऽवस्था सुष्ठु परिज्ञाता भवेदिति तत्र विस्रम्भातिप्रसङ्गस्य सर्वथा सम्भव इत्याशय। विविक्तेति।—विस्रम्भेण काव्यान्तरप्रसिद्धतस्य लक्ष्मणस्य सत्वरप्रत्यावर्त्तन लोकप्रचार विरहिते चात्र अपरस्य कस्यचिदप्यागमनञ्चात्यन्तमसम्भवीति न कस्यापि दर्शनसम्भव इति विश्रामेन, ("समौ विस्रम्भविश्रम्भौ" इत्यमर) ये अतिप्रसङ्गा लज्जासङ्कोचादिवर्ज्जितविलक्षणप्रेमालापविहारादीनामत्याढ्य अधिकसम्बन्धा इत्यर्थ, ते विस्रम्भातिप्रसङ्गा, विविधानां अनेकप्रकाराणां विस्रम्भातिप्रसङ्गानां साक्षिण साक्षाद्द्रष्टार, आधारभूता इत्यर्थ, [साक्षीतिपदं "साक्षाद्द्रष्टरि सञ्ज्ञायाम" (५।२।९१ पा०) इति इनि प्रत्ययेन निपातनात् सिद्धम्] प्रदेशा,—स्थानानि सन्तीति शेष।

(म) सहज कृत्रिमं वा यदेव रामणीयक प्रियजनसङ्गतस्य चेतसि नितराम् अननुभूतपूर्वमानन्दमुत्पादयति, काले तदेव प्रियजनविरहिणो दृष्टिपथमापतितमधिकतर चेतो दुनोतीति नित्यसत्यायत्तो रघुमणिरपि प्रियाविरहितस्तांस्तान् सम्प्रत्यवलोकयन् नितरां दुःखितो विलपति तदिति।—तत—तस्मात्। आपतितम्—उपस्थित, प्रियया सार्द्धं पूर्वं सानन्दमवलोकितानामेतेषा दर्शनं सम्प्रति तया विरहितस्य मे नितरामरुन्तुद जातमिति समुदितार्थ।

(य) अरण्यवासकाले प्रियया सङ्गतो रघुनाथ पर्य्यटनस्योऽपि यामेव दण्डकारण्यरमणीयतामवलोक्य वनवासजमपि क्लेशजात विसस्मार, सम्प्रति तया विरहितोऽसौ तामेव रमणीयतामवलोक्य समुद्बोधितपूर्वस्मृतिरनुभूयमाना मर्म्मघातनां वक्ष्यमाणश्लोकेन विज्ञापयन्नाह, सम्प्रति हीति।

चिरोद्वेगेति।—चिरादुद्वेग हृदयदाहमारभते उत्पादयतीति चिरोद्वेगारम्भी, चित्तकुक्कुरादिविषस्येव कालान्तरपरिणामीत्यर्थ, (देहलीदीपन्यायेन विशेषणमिदमुत्तरोत्तरस्वपि वाक्येषु अन्वेति) प्रसृत सर्व्वावयवेषु व्याप्त तीव्र प्रत्युग्र विषरस इव विषद्रव इव। ("रसो गन्धे रस स्वादे तिक्तादौ विषरागयो। शृङ्गारादौ द्रवे वीर्य्ये देहधात्वम्बुपारदे॥" इति विश्व) अत्र रसशब्देन विषगत कश्चिदुत्कर्षो बोध्य, तथा

व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुन-
र्घनीभूतः शोको विकलयति सम्मूर्च्छयति च ॥ २६ ॥

तथापि तान् पूर्वसुहृदो भूमिभागान् पश्यामि। [निरूप्य] अहो। अनवस्थितो भूमिसन्निवेशः (र)। तथा हि—(ल)

कुतश्चित् यस्मात् कस्मादपि स्थानादागत्येत्यर्थः, सवेगादतिवेगात् निखात अन्तःप्रविष्टः शल्यस्य शङ्को तीक्ष्णाग्रस्य अस्त्रविशेषस्येत्यर्थः, ("वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः) शकल इव खण्ड इव ("भित्तं शकलखण्डे वा पुंसि" इत्यमरः) तथा हृन्मर्मणि हृदेव मर्म हृन्मर्म तस्मिन् हृदयरूपजीवस्थाने, रूढग्रन्थिः जातसन्धिः, सन्नद्धमूल इति यावत्, पुनः स्फुटितः विदीर्णः व्रणः इव ईर्म्ममिव ("व्रणोऽस्त्रियामीर्म्ममरुः क्लीवे" इत्यमरः) शोकः प्रियाविरहजं दुःखं पुनर्घनीभूतः [अघनो घनः सम्पद्यमानो भूतः इति घनीभूतः इत्यभूततद्भावे च्विप्रत्ययः] कालवशेन नष्टप्रायोऽपि पञ्चवट्यादिबहुविधोद्दीपकवस्तुसन्दर्शनात् पुनः सान्द्रतामधिगतः सन् विकलयति व्याकुलीकरोति (विकलं करोति इति विकलयति "तत् करोति तदाचष्टे" ग० इति णिच्) सम्मूर्च्छयति च सम्मोहयति च, मामिति शेषः। यथा तीव्रो हालाहलः कालक्रमेणान्तःशरीरं प्रसर्पन्नेव विकलयति, तथा मनसि विलीनप्रायोऽपि प्रियाविरहजः शोकोद्वेगः सम्प्रति सुचिरपरिचितानां वनगहनपर्वतादीनामवलोकनेन पुनः स्मृतिपथमारूढो नवीभूत इव मामतितरां विह्वलयतीति भावः। [अत्र केचित् द्वितीयपादे "निखात" इत्यत्र "चलित" इति पाठं मन्यमाना व्याचक्षते—कुतश्चित् यस्मात् कस्माच्चित् सवेगात् सम्भ्रमादिजन्यात् सङ्घट्टनात् चलितः कम्पितः शल्यस्य अन्तःशरीरप्रविष्टस्येति भावः, शकलः खण्ड इवेति। अत्र एकस्मिन्नेव शोकरूपोपमेये विषशल्यव्रणरूपाणां बहूनाम् उपमानानां दर्शनात् मालोपमानामालङ्कारः स्फुट एव, तथा विकलनसम्मूर्च्छनरूपयोरुभयोरेव क्रिययोः शोकरूपैककर्तृकत्वाद्दीपकञ्चाप्यलङ्कारो बोध्यः]। शिखरिणी वृत्तम् ॥ २६ ॥

(र) ननु "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति शोकोद्वेगहेतुभूतानामेतेषामवलोकनं यत्नतः परिहार्यतामित्याह, तथाऽपीति। तथाऽपि—एतेषां भूभागानां शोकोद्दीपकत्वेऽपि। पूर्वसुहृदः,—पूर्वं सुहृद्वत् कृतप्रियाचरणाः, एते हि पूर्वं नित्यसान्निध्येन बहुविधानुकूल्येन अस्माकं वनवासजमपि दुःखजातमपाकुर्वन्तः सुहृद्भूता इति भावः। निरूप्य—इतस्ततो विशेषेणावलोक्य। अनवस्थितः,—विपर्यस्तः, पूर्वावस्थातो वैलक्षण्येनावस्थित इत्यर्थः। भूमिसन्निवेशः,—भूमीनां तत्-

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिता
विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ २७ ॥

स्थानीयानां भभागानां सन्निवेशः अवस्थानम्, पुरा यादृश भूमिसंस्थानं दृष्टम् अधुना न तथाऽवस्थितमित्यर्थ।

(ख) सुचिरकालानन्तरं कार्य्यानुरोधात् दण्डकारण्यमनुप्रविष्टो दाशरथि पञ्चवट्यादिसन्दर्शनात् समुद्दीपितपूर्वस्मृतिगालस्थनविभावस्वरूपाणामतेषां सरिदुत्त भूधराणां सहजसौन्दर्य्यसन्दर्शनेन समुद्दीप्तप्रियाविरहजशोकोऽपि कमप्यनिर्वचनीय मानन्दसन्दोहमनुभवन्नितस्ततः समालोकयन् यदेवावस्थावैषम्यमन्वभवत्, तदेवेदानीं वक्ष्यमाणश्लोकेन विशदयन्नाह,—तथा हीति।

कीदृशमवस्थावैषम्यम्? इत्याह, पुरेति।—पुरा प्राक् अस्मिन्नेव वने प्रियतमया सीतया सहावस्थानकाले इत्यर्थ, यत्र यस्मिन् स्थाने सरितां नदीनां स्रोत प्रवाह आसीदिति शेष, अधुना सम्प्रति, सुचिरकालानन्तरं मम वर्त्तमानदर्शनावस्थाया मित्यर्थ, तत्र तस्मिन्नेव स्थाने पुलिनं सलिलसमुत्थितसिकतामयतटं सम्पन्नमिति शेष, पूर्वं यत्र स्रोतस्वतीप्रवाह प्रवहन्नविरतं कलं निनदन् सततमस्मानभ्यनन्दयत्, स एव सम्प्रति कुटिलकालवशेन सलिलसमुत्थितभूमिरूपेण सर्वथा परिणमन् कादाचित्कमपि स्वकीयं तत्स्थानसिलत्वं न कथमपि प्रमाणयतीति भाव। क्षिति रुहां वृक्षाणां [क्षितौ रोहन्ति उत्पद्यन्ते ये ते क्षितिरुहः तेषां, क्षिति+रुह+क्विप्] घनविरलभाव निविडत्वं प्रतनुत्वञ्चेत्यर्थ, विपर्य्यासं वैपरीत्यं यातः प्राप्तः, पुरा यत्र घनसन्निविष्टाः पादपा आसन्, तत्र ते कालवशेन विरलतामुपगताः, यत्र पुनरपरे पादपा विरलसन्निवेशमधिगता आसन्, सम्प्रति त एव घनीभूता इति नैव ते समुपयुज्यन्ते प्रत्यभिज्ञायामिति भाव। अत एव बहोः कालात् सुचिर समयात् परमिति शेष [बहुशब्दस्य सङ्ख्याप्रचुररूपोभयार्थकत्वेन सङ्ख्यावाचकात् नित्य बहुवचनं प्रचुरार्थकात्वेकवचनमपीति बहोरित्यत्र एकवचनप्रयोग "कि बहुना" इत्यादिबहुतरशिष्टप्रयोगवत् न कमपि दोषमावहतीति सुधीभिर्विभाव्यम्। "कालात्" इत्यत्र अनन्तरार्थे पञ्चमी, परमितिशब्दस्याध्याहारेण समन्वयो॥] दृष्टं अवलोकितम् इदं परिदृश्यमानं वनमरण्यम् अपरमिव अन्यदन्यमिव मन्ये अनु मवामि इत्यर्थ। ननु प्रत्यभिज्ञापकानां स्रोतःप्रभृतीनामन्यथाभावात

हन्त परिहरन्तमपि मामित पञ्चवटीस्नेहो बलादाकर्षतीव। (व) [सकरुणम्।]—

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत।

तदेवेदमरण्यमिति विनिश्चये कस्मादव्यभिचरितो हेतुः ? इत्यपेक्षायामाह, निवेश इति।—शैलानां पर्वतानाम् अनतिपरिवर्त्तनशीलतया सम्प्रत्यपि पूर्व्ववदवस्थितानामित्यर्थः, निवेशं संस्थानम्, अपरिवर्त्तितमवस्थानमित्यर्थः, इदं परिदृश्यमानं वनं तत् पूर्व्वदृष्टम् इति बुद्धिं ज्ञानं द्रढयति दृढीकरोति [दृढां करोति इति द्रढयति "तत्करोति तदाचष्टे" ग० इति णिचि "भृशक्षुद्रकृशपरिवृढानामेव रत्वं" वा० इति ऋकारस्य रत्वम्।] तदेवेदं वनमिति निश्चयज्ञानं जनयति इत्यर्थः। सर्व्वत्रैवानुमितेः प्रमात्वं प्रति साधनगतस्याव्यभिचरितत्वादेरपेक्षिततया अत्रापि पूर्व्वदृष्टतद्वनगततत्तच्छैलादिसाधनेन सुचिरकालेनाप्यनतिपरिवर्त्तनशीलतयाऽव्यभिचारिणा इदन्त्वावच्छिन्नपक्षकतद्वनत्वसाध्यकानुमितौ कस्यचिदपि हेत्वाभासस्य असत्त्वान्नेदमनुमानमप्रमात्वशङ्काकलङ्कितमिति भावः। [अत्र प्रकृते पञ्चवटीवने तादात्म्यसंसर्गकापरवनत्वप्रकारकोत्कटैककोटिकसंशयप्रदर्शनादुत्प्रेक्षानामालङ्कारः, सा अपरवनत्वरूपभावपदार्थप्रकारकतया भावाभिमानिनी, इवशब्दोत्थापिततया च वाच्या। तथा तस्मिन्नेव वने अन्यवनवद्बुद्धिं प्रति प्रथमद्वितीयपादोक्तसरिद्दृश्यादिगतावस्थावैषम्यार्थप्रतिपादकवाक्यार्थद्वयस्य हेतुतयोपन्यासात् काव्यलिङ्गमलङ्कारः। तथैतदलङ्कारद्वयप्रतिपादितवैचित्र्यविशिष्टवशेन च तद्वनगततत्तच्छैलादिसाधनेन इदन्त्वावच्छिन्नपक्षकतद्वनत्वसाध्यकानुमित्युत्पत्तेरनुमानालङ्कारश्चेत्येतेषामलङ्काराणाम् अङ्गाङ्गिभावेन सङ्करः]। शिखरिणी वृत्तम् ॥२७॥

(व) हन्तेति।—हन्तेति खेदसूचकमव्ययम्। परिहरन्तमपि—परित्यजन्तमपि, पञ्चवटीं परित्यज्य गच्छन्तमपीत्यर्थः। पञ्चवटीस्नेहः,—पञ्चवटीं प्रति प्रबलः अनुरागः। आकर्षतीव—प्रत्यावर्त्तयतीव [इति क्रियोत्प्रेक्षा], पूर्व्वमतिदीर्घकालवसतिसञ्जनितानुरागः पुनरेतद्वनसन्दर्शनात्प्रबलीभूतः सम्प्रत्येतद्वनत्यागे मन्मनः प्रत्यूहः सञ्जात इति भावः।

[illegible] दुःसहतया पूर्व्वानुभूतपञ्चवटीरामणीयक[illegible] एतानि [illegible] कथानि न [illegible] पञ्चवट्या स्वे गृहे [illegible] (यथा यथा तथैव [illegible]) तया निरूप-

एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा, गच्छत्वसम्भाव्य वा॥ २८॥

द्भवत्वरामणीयकादिभि राजभवनतुल्यायां यस्यामिति यावत। मया तया प्रिय समया सीतया सह तै भर्गयसुखहेतुतया विशेषत प्रसिद्धा दिवसा दिनानि नीता यापिता, [अत्र दिवसपदेन न केवल रजन्य समधिकसुखेन यापिता, परन्तु दिवसा अपीति ध्वन्यते, तेन च राजधान्यपेक्षयाऽस्या किञ्चिद्वैशिष्ट्यमपि द्योत्यते, तथा हि तत्र राजकार्य्यादिना दिवसेषु सहावस्थानमसम्भवम्, इह तु कार्य्यान्तरगुरुजनसान्नि ध्याद्यसम्भवतयाऽहर्निश निःसङ्कोचप्रणयाभिव्यक्तिरिति स्वप्नदादिशेष।] तथा दीर्घाभि प्रशंसाबाहुल्यादटनाबाहुल्याद्वा अतिविस्तृताभि तत्सम्बन्धिकथाभि दस्या पञ्चवट्या सम्बन्धिन्य विषयिण्य कथा आलापा ताभि एव यां पञ्चवटी मधिकृत्य प्रवृत्तैरालापैरेवेति यावत्, [एवकारेण च कथान्तरप्रवृत्तिव्युदास। यत्कथाभिरित्यनुक्त्वा यत्सम्बन्धिकथाभिरिति कथनात् पञ्चवटीवनसमीपवर्त्तिनामपि रम्यता व्यज्यते] सततम् अहर्निशम् आस्यीरत स्थितम् आवाभ्यामिति शेष, वनवासाद् गृहे प्रतिनिवृत्य प्रेयसा सह दिवानिशं पञ्चवटीविषयकालापमेवाकरव मिति भाव। [अत्र आस्योरत इति पाठेऽपि व्याख्यानं सुकरमेव, किन्तु प्रक्रमभङ्ग, भूतकालनिर्देशोपक्रमे वर्त्तमानकालिकप्रत्ययनिर्देशस्यानुचितत्वात।] सम्प्रति इदानीं नाशिता नाशं प्रापिता नाशार्थे विपिने विसृष्टेत्यर्थ, प्रियतमा प्राणेभ्योऽपि प्रिया पत्नी येन स तथाक्त, [अत्र नाशितप्रियतम इत्यनेन प्रियतमाया विनाशो यदि दैवाधीन स्यात्, तदा यथाकथञ्चित् सह्येत, अत्र तु विनाशोऽसौ मयैव प्रापित इति क्लेशातिशय्य, "सम्प्रति" इत्यनेन दु खस्य नवोभावश्च व्यज्यते] अत एव अद्य एक एकाकी सीताविरहित इति यावत्, पाप पापात्मा नृशंसकर्मा इत्यर्थ, राम तां चिरसहचरीभूतामित्यर्थ, सामान्यतो रमणीयवस्तूना सन्दर्शनमेव विरह शोककर कि पुन प्रियया सह प्रागनुभूतानामतपामिति भाव। पञ्चवटीं कथं केन प्रकारेण वा विलोकयतु पश्यतु, विलोकयितु शक्नुयादित्यर्थ, कथं वा असम्भाव्य किञ्चित्कालं दर्शनावस्थानादिना असमादृत्य गच्छतु अन्यतो व्रजतु? उभयमपि दुष्करमित्यभि प्राय। कदाचित् प्रियाया सम्बन्धित्वात् तदादृतत्वाच्च पञ्चवटी प्रिया सती मा सुखकरी, किन्तु यत्सम्बन्धित्वात पञ्चवटी प्रिया आसीत्, सेदानीं मृता, अत सा दु खकर्य्येव पञ्चवटी सन्दर्शनेन सोताऽस्मरणकारणतया दु खाय च सुखाय च भवतीति अत्र किञ्चित्कालमवस्थानमिदानीमितो गमनं चैतदुभयमपि अशक्य रामस्येति

शम्बूकः। [प्रविश्य।] जयति जयति देव। देव! भगवानगस्त्यो मत्तः श्रुतभवत्सन्निधानस्त्वामाह,—"परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा, सर्वे च महर्षयस्तदेहि सम्भावयास्मान्। अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसि" इति। (अ)

भाव। [अत्र रामस्य पापवक्तायां नाशितप्रियतम इति पदार्थस्य हेतुतयोपन्यासात् काव्यलिङ्गमलङ्कारः, तथा प्रथमपादे "यथा स्वे गृहे" इत्यत्र उपमाऽलङ्कारश्च, सा च यथा शब्दवाच्यतया श्रौती। तथैव च स्वभवन इव पञ्चवट्यां निरुपद्रवमृतुविहरणादिकमासीदिति वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिरुन्नेयः]। शार्दूलविक्रीडितं वृत्तम्॥ २८॥

(अ) भगवान्—भग ऐश्वर्यादिषड्गुणा विद्यते यस्य स भगवान्, ऐश्वर्यादिशालीत्यर्थः, "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥" मत्तः—मत्सकाशात् मन्मुखादित्यर्थः। श्रुतेति।—श्रुतम् आकर्णितं भवतः सन्निधानम् उपस्थितिः येन स तथोक्तः, आहेत्यस्य 'सज्जो भविष्यसीति" परोक्षप्रतीक्षान्तस्थेन इति शब्देनान्वयः। परिकल्पितेति।—परिकल्पितानि सज्जीकृतानि, आयोजितानीति यावत्, विमानात् पुष्पकात् अवतरणे मङ्गलानि अवतरणकालोचितमङ्गलजनकदूर्वाक्षतादिवस्तूनि यया सा तथोक्ता। वत्सला—त्वयि सस्नेहा [वत्सं कामं अस्या अस्तीति वत्सला, "वत्सांसाभ्यां कामबले" (५।२।९८ पा०) इति लच्प्रत्ययः] लोपामुद्रा—तन्नाम्नी अगस्त्यपत्नी। प्रतीक्षते—भवद्दर्शनार्थमवतिष्ठते, त्वां द्रष्टुं त्यक्तसर्वव्यापारा तिष्ठतीत्यर्थः। सर्वे च—सकलाश्रमवासिनः, [अत्र "आगस्त्याश्च" इति पाठे—अगस्त्याश्रमवासिनः, अगस्त्यगोत्रापत्यानि वेत्यर्थः]। सम्भावय—आगमनेन सम्मानयेत्यर्थः। प्रजविना—प्रकृष्टो जवो विद्यते यस्य तेन, अतिवेगगामिनेत्यर्थः, अस्माकं सम्भावनाया येन किञ्चित्कालक्षेपो भवेत् स रथे किञ्चिद्दोषकवेगोत्पादनेन पूरणीय इति भावः, ["न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यनुशासनात् तादृशस्थले कर्मधारयान्मत्वर्थीयप्रत्ययस्याऽसाधुत्वेऽपि प्रजविनेत्यत्र मत्वर्थीयेन इनि प्रत्ययेनाधिकस्यातिशयरूपार्थस्य वाच्यतया न दोष इति सुरभिविकाव्यम्]। अश्वमेधाय—अश्वमेधनामानं क्रतुं सम्पादयितुमित्यर्थः, [अत्र "क्रियार्थोपपदस्य च" (२।३।१४ पा०) इति चतुर्थी] सज्जः,—उद्योगीत्यर्थः।

एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा, गच्छत्वसम्भाव्य वा ॥ २८ ॥

इवत्वरामणीयकादिभि राजभवनतुल्यायां यस्यामिति यावत। मया तया प्रिय समया सीतया सह तं अत्यपसुखहेतुतया विश्रुत प्रसिद्धा दिवसा दिनानि नीता यापिता, [अत्र दिवसपदेन न केवल रजन्य समधिकसुखेन यापिता, परन्तु दिवसा अपीति ध्वन्यते, तत्र च राजधान्यपेक्षयाऽस्या किञ्चिद्वैशिष्ट्यमपि द्योत्यते, तथा हि तत्र राजकार्य्यादिना दिवसेषु सहावस्थानमसम्भवम्, इह तु कार्य्यान्तरगुरुजनसान्नि ध्याद्यसम्भवतयाऽहर्निश निःसङ्कोचप्रणयाभिव्यक्तिरिति स्वगृहादिशेष ।] तथा दीर्घाभि प्रसङ्गाबाहुल्याद्घटनाबाहुल्याद्वा अतिविस्तृताभि तत्सम्बन्धिकयाभि तस्या पञ्चवट्या सम्बन्धिन्य विषयिण्य कथा आलापा ताभि एव या पञ्चवटी-मधिकृत्य प्रवृत्तैरालापैरेवेति यावत्, [एवकारेण च कथान्तरप्रसक्तिर्व्युदास। यत्कथाभिरित्यनुक्त्वा यत्सम्बन्धिकथाभिरिति कथनात् पञ्चवटीवनसमीपवर्त्तिनामपि रम्यता व्यज्यते] सततम् अहर्निशम् आसीयत स्थितम् आवाभ्यामिति शेष, वनवासाद् गृहं प्रतिनिवृत्य प्रेयसा सह दिवानिश पञ्चवटीविषयकालापमेवाकरव मिति भाव। [अत्र आस्यावत इति पाठेऽपि व्याख्यानं सुकरमेव, किन्तु प्रक्रमभङ्ग, भूतकालनिर्देशोपक्रमे वर्त्तमानकालिकप्रत्ययनिर्देशस्यानुचितत्वात।] सम्प्रति इदानी नाशिता नाशं प्रापिता नाशाय विपिने विसृष्टेत्यथ, प्रियतमा प्राणेभ्योऽपि प्रिया पत्नी येन स तथाक्त, [अत्र नाशितप्रियतम इत्यनेन प्रियतमाया विनाशो यदि दैवाधीन स्यात्, तदा यथाकथंचित् सह्यत, अत्र तु विनाशोऽसौ मयैव प्रापित इति क्लेशातिशय, "सम्प्रति" इत्यनेन दु खस्य नवीभावश्च व्यज्यते] अत एव अद्य एक एकाकी सीताविरहित इति यावत्, पाप पापात्मा नृशंसकर्मा इत्यथ, राम तां चिरसहचरीभूतामित्यथ, सामान्यतो रमणीयवस्तूना सन्दर्शनमेव विरह क्लेशकर किं पुन प्रियया सह प्रागनुभूतानामतपामिति भाव। पञ्चवटी कथं केन प्रकारेण वा विलोकयतु पश्यतु, विलोकयितु शक्नुयादित्यथ, कथं वा असम्भाव्य किञ्चित्काल दर्शनावस्थानादिना असमादृत्य गच्छतु अन्यतो व्रजतु? उभयमपि सुदुष्करमित्यभि प्राय। कदाचित् प्रियाया सम्बन्धवत्त्वात् तदादृतत्वाच्च पञ्चवटी प्रिया तत सा सुखकरी, किन्तु यत्सम्बन्धवत्त्वात् पञ्चवटी प्रिया आसीत्, सेदानी मृता, अत सा दु खकरात्येवेय पञ्चवटी सन्दर्शनेन सीतास्मरणकारणतया दु खाय च सुखाय च भवतीति अत्र किञ्चित्कालमवस्थानमिदानीमितो गमन चेतदुभयमपि अशक्य रामस्येति

शम्बूकः । [प्रविश्य ।] जयति जयति देवः । देव ! भगवानगस्त्यो मत्तः श्रुतभवत्सन्निधानस्त्वामाह,—"परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा, सर्वे च महर्षयस्तदेहि सम्भावयास्मान् । अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसि" इति । (श्र)

भावः । [अत्र रामस्य पापवत्तायां नाशितप्रियतम इति पदार्थस्य हेतुतयोपन्यासात् काव्यलिङ्गमलङ्कारः, तथा प्रथमपादे "यथा स्वे गृहे" इत्यत्र उपमालङ्कारश्च, सा च यथा शब्दवाच्यतया श्रौती । तथैव च स्वभवन इव पञ्चवट्यां निरुपद्रवमुखविहरणादिकमासीदिति वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिरूहनीयः]। शार्दूलविक्रीडितं वृत्तम् ॥ २८ ॥

(श्र) भगवान्—भगः ऐश्वर्यादिषड्गुणा विद्यते यस्य स भगवान्, ऐश्वर्यादिशालीत्यर्थः, "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" मत्तः—मत्सकाशात् मन्मुखादित्यर्थः । श्रुतेति ।—श्रुतम् आकर्णितं भवतः सन्निधानम् उपस्थितिः येन स तथोक्तः, आहेत्यस्य 'सज्जो भविष्यसीति" पर्यन्तवाक्यान्तस्थेन इति शब्देनान्वयः । परिकल्पितेति ।—परिकल्पितानि सज्जीकृतानि, आयोजितानीति यावत्, विमानात् पुष्पकाद् अवतरणे मङ्गलानि अवतरणकालोचितमङ्गलजनकदूर्वाक्षतादिवस्तूनि यया सा तथोक्ता । वत्सला—त्वयि सस्नेहा [वत्सं कामम् अस्या अस्तीति वत्सला, "वत्सांसाभ्यां कामबले" (५।२।९८ पा०) इति लच्प्रत्ययः] लोपामुद्रा—तन्नाम्नी अगस्त्यपत्नी । प्रतीक्षते—भवद्दर्शनार्थमवतिष्ठते, त्वां द्रष्टुं त्यक्तसर्वव्यापारा तिष्ठतीत्यर्थः । सर्वे च—सकलाश्रमवासिनः, [अत्र "आगस्त्याः" इति पाठे—अगस्त्याश्रमवासिनः, अगस्त्यगोत्रापत्यानि वेत्यर्थः]। सम्भावय—आगमनेन सम्मानयेत्यर्थः । प्रजविना—प्रकृष्टो जवो विद्यते यस्य तेन, महावेगशालिनेत्यर्थः, अस्माकं सम्भावनायां यत् किञ्चित्कालक्षेपो भवेत् स रथे किञ्चिदधिकवेगोत्पादनेन पूरणीय इति भावः ["न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इत्यनुशासनात् तादृशस्थले कर्मधारयान्मत्वर्थीयप्रत्ययस्यासाधुत्वेऽपि प्रजविनेत्यत्र मत्वर्थीयेन इनि प्रत्ययेनाधिकस्यातिशयरूपार्थस्य वाच्यतया न दोष इति सुधीभिर्विभाव्यम्]। अश्वमेधाय—अश्वमेधनामानं क्रतुं सम्पादयितुमित्यर्थः, [अत्र "क्रियार्थोपपदस्य च" (२।३।१४ पा०) इति चतुर्थी] सज्जः,—उद्योगीत्यर्थः ।

राम। यथाऽऽज्ञापयति भगवान्। (प)

शम्बूक। इतस्तर्हि देव प्रवर्त्तयतु पुष्पकम्। (स)

राम। भगवति पञ्चवटि। गुरुजनानुरोधात् चण क्षम्यतामतिक्रमो रामस्य। (ह)

शम्बूक। देव। पश्य पश्य।—

कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुल क्रौञ्चावतोऽय गिरि।

(प) यथेति।—भगवान्—तप समुद्भूतैश्वर्य्यादिगुणशाली अगस्त्य। यथाऽऽज्ञापयति—यथैवादिशति, तदैवानुतिष्ठामीत्यर्थ।

(स) तर्हीति।—यदि भवान् भगवतोऽगस्त्यस्यादेश पालनीय इति मन्यते तर्हीत्यर्थ। इत,—अनेन पथा। प्रवर्त्तयतु—प्रेरयतु, चालयत्वित्यर्थ।

(ह) भगवतीति।—दुष्करतप प्रभावोद्भासितानामृषीणामाश्रमस्थलरूपतया पञ्चवट्या भगवतीति सम्बोधनम्। गुरुजनानुरोधात्—गुरुजनस्य पूजनीयस्यागस्त्यस्य अनुरोध छन्दानुवर्त्तन तस्मात्। अतिक्रम —असम्भावनया युक्ताचारस्य उल्लङ्घनम् उचिताचार विना अतिक्रम्य गमनं वा। क्षम्यता—मृष्यतां, भगवतोऽगस्त्यस्यादेशन तच्छन्दानुवर्त्तनाथमेवायमतिक्रमो न त्विच्छाकृत इति भाव।

अगस्त्यादेशेनालङ्घनीयेन सुचिर पूर्वसुहृत्पञ्चवटीशोभासन्दर्शनसुखमनुभवितुमसमर्थो रामभद्रस्तच्चिन्ताव्याकुलो भवेदिति शङ्कमान शम्बूक स्वभावशोभासन्दर्शनेन तस्य चित्तविक्षेपमनाकुर्वन् पथि प्राकृतशोभामुपवर्णयन्नाह कूजदिति।—कुञ्जा लताद्याच्छन्नानि स्थानान्येव कुटीरा चुद्रगृहा तेषु स्थिता कौशिकघटा पेचकसमूहा ("महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिक" इत्यमर) कूजन्तीनाम् अव्यक्त शब्दायमानानां कुञ्जकुटीरकौशिकघटाना कुञ्जस्थपेचकसमूहानामित्यर्थ, ये घुत्कारा घुतघुत इत्याकारा रवा तद्वन्तस्तद्विशिष्टा ये कोचकस्तम्बा वेणुविशेषगुच्छा (बांशझाड इति भाषा। "वेणव कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता" इति "अप्रकाण्डे स्तम्बगुल्मौ" इति चामर) तेषां आडम्बरेषु समूहेषु ("आडम्बरो गजानां पटहरवे गर्जिते प्रश्चे च" इति हलायुध) मूकानि कौशिकध्वाङ्क्षभिया शब्दमवतिष्ठमानानि मौकुलीनां वायसानां ("एकदृग् बलिभुग् ध्वाङ्क्षो मौकुलिर्वायसोऽन्यभृत्" इति कोष) कुलानि समूहा यस्मिन् स तथोक्त, अय पुरत परिदृश्यमान क्रौञ्चावत तन्नामधेय

एतस्मिन् प्रचलाकिना प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥ २९ ॥

अपि च ।—

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दक्षिणाः ।

गिरिः पर्वतः विद्यते इति शेषः, एवमग्रेऽपि गिरिर्विद्यते इति, पश्य पश्येति गद्यांशेनान्वयः । यत्र कुञ्जेषु शब्दायमानानां पेचकानां घुत्कारशब्दमाकर्ण्य चञ्चलस्वभावा अपि वायसास्तेभ्योऽनिष्टमाशङ्कमाना वासाग्रे अशब्दमवतिष्ठन्ते, तादृशोऽयं क्रौञ्चावताभिधेयो गिरिरस्माकं पुरतः प्रतिभातीति पश्येति समुदिताशयः । एतस्मिन् दृश्यमाने क्रौञ्चावताऽभिधेये गिरौ प्रचलताम् इतस्ततः परिधावतां प्रचलाकिना—प्रचलाकः शिखण्डः, स एषामस्तीति प्रचलाकिनः मयूराः तेषां ("प्रचलाकिसितापाङ्गशिखावलगतन्नता" इति त्रिकाण्डशेषः) कूजितैरव्यक्तशब्दैः केकाभिरित्यर्थः, उद्वेजिताः उद्वेगं नीताः सन्त्रस्ता इति यावत्, कुम्भीनसाः भयङ्करसर्पविशेषाः ("कुम्भीनसः क्रूरसर्पे स्त्रियां लवणमातरि" इति मेदिनी) [कुम्भी इव नासिका येषां ते कुम्भीनसाः "अञ् नासिकायाः संज्ञायां नसञ्चास्थूलात्" (५।४।११८ पा०) इति नासिकायाः नसादेशः, समासान्तः अच्प्रत्ययश्च] पुराणानां प्राचीनानां जीर्णानामित्यर्थः, चन्दनतरूणां चन्दनपादपानां, ["चन्दनतरु" इत्यत्र "रोहिणतरु" इति पाठे—रौहिणतरुः,—वटवृक्ष इत्यर्थः] स्कन्धेषु प्रकाण्डेषु उद्वेल्लन्ति इतस्ततश्चलन्ति, अतिमात्रं व्याकुलीभवन्तीति यावत्, [उत्पूर्वकस्य वेल्ल चलने इति भ्वादिगणीयवेल्लधातोरयं प्रयोगः] विषधराणां हि स्वल्पादकाल्पमयूराद्भीतिः अतितरां सौरभानीदिता च प्रसिद्धा, तथा प्राचीनावस्थाया चन्दनपादपस्य च सौरभातिशय्यमिति । अत्र चन्दनगन्धानन्दिताः कुम्भीनसाः मयूरभीत्या एतमेव पादपमाश्रित्य स्थातुं सौरभातिप्रीत्या सहसा तं विहाय गन्तुं वाऽसमर्था इत्यतर्कितविपत्तयाऽतितरां व्याकुलीभवन्तीति भावः । [अत्र [illegible] , तदा केनापिकूजितरूपपलायनकारणसत्त्वेऽपि कुम्भीनसानां पलायनरूपफलानुत्पत्तेः इति हेतौ फलाभावरूपा विशेषोक्तिः, तथा कुञ्ज [illegible] अलङ्काराणामङ्गाङ्गिभावेन सङ्करः । स्वभावोक्त्या [illegible] वस्तु ध्वन्यते इति अलङ्कारेण वस्तुध्वनिरप्यत्र [illegible]]। [illegible] इति छन्दः ॥ २९ ॥

पुनरपि [illegible], एत इति ।—कुहरेषु गह्वरेषु, गद्गद ताहश-

अन्योऽन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥ ३० ॥

इति निष्क्रान्ताः सर्वे । (क)

इति पञ्चवटीप्रवेशो नाम द्वितीयोऽङ्कः ।

विस्पष्टं यथा तथा नर्दन्ति शब्दं कुर्वन्ति गोदावर्य्याः स्वनामधन्यायाः सरितः वारीणि सलिलानि येषु ते तथोक्ताः गोदावरीजलकल्लोलितकुहरा इति यावत्, तथा मेघैः सजलजलदैरित्यर्थः, आलम्बिताः आक्रान्ताः शैलस्य अग्रभागाः येषां तानि अत एव नीलानि जलदाश्रिततया श्यामायमानानि शिखराणि शृङ्गाणि येषां ते तथोक्ताः, (अत्र शिखराग्रभागो मौलिः, पर्वताग्रभागश्च शिखरमिति भेदः) बहुविधधातुजातैः निखचितान्यपि एतेषां शृङ्गाणि अत्युन्नततया सजल-जलदसम्पर्कातिशयवशात् निरतिशयश्यामायमानानि प्रतिभान्तीति भावः । [एते-नैतेषां निरतिशयमौन्नत्यं प्राकृतिकसौन्दर्यशालित्वञ्च व्यज्यते] ते भवता परि-ज्ञातपूर्वाः एते परिदृश्यमानाः दक्षिणाः भारतवर्षस्य दक्षिणदिग्भागवर्त्तिनः क्षौणीभृतः पर्वताः । क्षौणीं पृथिवीं बिभ्रति धारयन्ति ये ते (क्षौणी + भृ + क्विप्) सन्तीति शेषः, तथा अन्योऽन्यप्रतिघातेन परस्परप्रतिरोधेन सङ्कुलम् उच्छृङ्खलं यथा तथा चलन्तः गच्छन्तः ये कल्लोलाः महातरङ्गाः तेषां कोलाहलैः उप-लक्षिताः [“इत्थम्भूतलक्षणे” (२।३।२१ पा०) इति तृतीया] उत्तालाः उत्कटाः, भीषणाः इति यावत्, (‘उत्ताल उत्कटे श्रेष्ठे विकराले प्लवङ्गमे” इति मेदिनी) तथा गभीरमगाधं पयो जलं येषां ते तथोक्ताः, अगाधसलिलाः इत्यर्थः, पुण्याः पवित्राः ते पूर्वपरिचिताः इमे परिदृश्यमानाः सरित्सङ्गमाः नदीसन्निपाताः विद्यन्ते इति शेषः । [“सरित्सङ्गमाः” इत्यत्र “कृदभिहितो भावो द्रव्यवत्प्रकाशते” इति न्यायात् सङ्गताः सरित इत्यर्थो लभ्यते इति बोध्यम् । अत्र शिखराणां जलद-चुम्बितमौलितया नानाविधधातुसम्भूतस्वकीयावर्णपरित्यागेन जलदगतश्यामलता-ग्रहणकथनात् तद्गुणो नामालङ्कारः] । शार्दूलविक्रीडितं वृत्तम् ॥ ३० ॥

(क) इतीति ।—अत्र रामशम्बूकयोरिह अवस्थानात् “सर्वे निष्क्रान्ताः” इति बहुलं कथं युज्यते ? इति नाशङ्कनीयम्, सारथिसाहित्येनैवान्योन्यसम्भवा-दिति ।

द्वितीयाङ्कस्य सङ्क्षिप्तविवृतिः।



अथावाङ्कप्रारम्भ एवाध्वगवेशा तापस्यातिथी नेपथ्योच्चारितवनदेवतास्वागतवचनमाकर्ण्य समधिगम्य च तदुपकल्पितमातिथ्य तदीयविनयमधुरव्याहारव्यवहारविनिमयेन स्वकीयामन्तर्गतां कृतज्ञतामतितरां विज्ञापयन्ती स्वसमीपमागतया तया सम तत्रैवोपविष्टा पृष्टा चात्रागमनकारणं तयैव, "सामाद्यशेषवेदविद्भिरगस्त्यप्रमुखैस्तपोधनैरध्युषितेऽस्मिन्नरण्ये तेभ्यो वेदान्तविद्यामधिगन्तु वाल्मीकिपार्श्वादिहोपस्थिता" इति प्रत्यवोचत।

अथ वेदवेदान्ताद्यशेषविशेषशास्त्रकाननसञ्चरणपञ्चाननाद्वाल्मीकेरनायासाध्याध्ययनसम्भवेऽपि तन्नादृत्य कथमेतादृग्दूरतरप्रवासप्रयासस्तत्रभवतीनामितीत्थं वनदेवतया तया जिज्ञासितासौ अलौकिकसामान्यशक्तिमती कुशलवाभिधेयौ कावपि तदन्तेवासिनौ रञ्जयत प्रतिभातिशय्य, तथा तस्यैव महर्षेर्मुखात् सुरतरतवक-वधोद्यतव्याधाभिशापार्थे झटिति विनिर्गतेनानुष्टुभेन छन्दसा पद्ययोन्यनुरोधेन तेनैव विरचितस्य रामायणस्य बहुलप्रचारश्च तत्रत्यमध्ययनप्रत्यूहमचीकथत्, अपृच्छच्चागस्त्याश्रमनार्गं वनदेवता तामेव।

अथ तत्कृतपथपरिचायककथाप्रसङ्गसङ्गतपञ्चवट्यादिनामश्रवणोद्दीपितातीतसीतास्मृतिस्तामेव वनदेवता सीतासहचरीय वासन्तीति प्रत्यभिजानत्यभिदधती च प्रलापवशाज्जानकी नामग्रहाम्, आपृच्छ्यमाना च तयैवासकृन्नामशेषा-कथनाभिप्राय, विहरमाना चालोकलोकापवादत सीताविवासनहत्त, तथा सुवर्णविनिर्मितसीताप्रतिकृतिप्रतिनिधिना शास्त्रविधिनानुष्ठीयमानमश्वमेधाभिधेयक्रतुञ्च सकरुणमसौ विललाप आललाप च पुन पुनरेतमेव विषयमधिकृत्यातिविस्तरत।

अथ कदाचनाङ्केन वासन्ती, अकालकालकवलितमात्मसुतमुरसा समुद्वहत मोगस्याऽनन्नमङ्गस्यानुष्ठपयत कस्यचिद् ब्राह्मणस्य सकरुणरोदनेनाकर्ण्यात्मापराधमाशङ्कमानो रघुनाथ सहसैव शम्बूकशूद्रस्य तपश्चरणसमुत्थाधर्मविघातोपायमाकाशवाणीमाकर्ण्य अनुदगातात्मावज्ञस्तद्वधाय कृपाणपाणि पुष्पक विमानमारुह्य तमन्विष्टु [illegible] दण्डकारण्यमभ्यागत्य तं जनस्थानस्थितस्य शम्बूकशूद्रस्य तपश्चरणस्थान, [illegible] पञ्चवटीं [illegible] प्रत्यागतपूर्वमानन्दमन्दीभूतमनन्तरं [illegible] च नानादर्शनान्यारामान् [illegible] दारुणातपतापदुरतिक्रमत्व [illegible]।

अथ शूद्रकमन्विष्यन् रामभद्रो जनस्थानमनुप्रविश्याहत्य च तमकृप कृपाणेन दिव्यान्दशामनयत्। ततो मिलित समभिनन्दितश्च पुन पुरःस्थेन तेन कृतप्रणतिना दिव्याकृतिना शम्बूकेन सहसा समुद्बोधितदण्डकारण्यागमनस्मृति, समवलोकयन् पूर्व्वपरिचितानामरण्यानामशेषसन्तापहारिणीं चित्तविनोदकारिणीं शोभां, सञ्चिन्तयन् खरदूषणादिवधवृत्तान्त, पर्य्यटंश्चेतस्तत सर्व्वत शुभाशीर्वचनपुरःसरमसु विससर्ज दिव्यपुरुषम्।

अथासावपि प्राप्तपदावाप्तित पूर्व्वमगस्त्यापिचरणयुगलमभिनन्दयितु तदाश्रममुपेत समादिष्टश्च स्वमुखात् श्रुतरामागमनवृत्तान्तेन तेनैव मुनिपुङ्गवेन वत्सलया लोपामुद्रया च रामभद्र पुनरिहोपस्थापयितु, पुनरपि पञ्चवटीमध्यस्थमस्य रामभद्रमुपागमत्, न्यवेदयच्च मुनिदम्पत्योर्वक्तव्यजात विशेषेण।

सहसा शम्बूकमुखात् सस्त्रीकस्य जगद्गुरोरगस्त्यस्यादेशवचनमाकर्ण्य विचिन्त्य च सुदुष्करत्व पूर्वसुहृद प्रियसहचरीमिव प्रियाया पञ्चवटी स्मरति सुचिरादस्यानिनाय भाव्य प्रस्थानस्य, नितरा सन्देहदोलामारूढ किङ्कर्त्तव्यविमूढ सर्वथाऽनिच्छन्नपि गुरुजनादेशस्यानतिक्रमणीयतया गृहीतानुमति पञ्चवटीसकाशात् तेन सम तदाश्रमपदमभिप्रतस्थे।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन कुलपतिकल्प "बि,ए" इत्युपनामक
श्रीमज्जीवानन्दविद्यासागर भट्टाचार्य्यविरचिताया, तदात्मजाभ्या
श्रीमदाशुबोधविद्याभूषण श्रीमन्नित्यबोधविद्यारत्नाभ्या
परिष्कृत परिवर्द्धिताया सुखबोधिनीसमा
ख्यायाम् उत्तररामचरितव्याख्याया
द्वितीयोऽङ्क ॥ २ ॥

तृतीयोऽङ्कः।

[ततः प्रविशति नदीद्वयम्—तमसा मुरला च]। (क)

तमसा। सखि मुरले! किमसि सम्भ्रान्तेव? (ख)

मुरला। भगवति तमसे! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं, जानास्येव यथा वधूत्यागात् प्रभृति, (ग)—

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥ १॥

(क) तत इति।—अत्र चेतनकर्तृकस्य प्रवेशस्य सलिलप्रवाहरूपाचेतननदीकर्तृकत्वासम्भवात् नदीद्वयपदेन नद्यधिष्ठातृदेवताद्वयमेवावगमनीयम्।

(ख) सम्भ्रान्तेव—व्याकुलेव, अस्थिरचित्तेवेति यावत्।

(ग) भगवतीति।—भगवति—ऐश्वर्य्यादिषड्गुणशालिनीत्यर्थः, तमसायास्तीर्थस्वरूपतया एव सम्बोधनं प्रयुक्तम्। सरिद्वरा—स्रोतस्वतीश्रेष्ठा, श्रेष्ठत्वन्तु तस्या माहात्म्यातिशयाद्बोध्यम्। अभिधातुं—वक्तुं, प्रेषितास्मीति पूर्वेणान्वयः। वधूत्यागात् प्रभृति—वध्वाः पत्न्याः सीतायाः, त्यागात्प्रभृति—विवासनमुपक्रम्य, भार्य्यात्यागमारभ्येति यावत्, ("वधूर्जाया स्नुषा स्त्री च" इत्यमरः)। [वधूत्यागादित्यत्र प्रभृति शब्दयोगे पञ्चमी]।

तमसया ससम्भ्रमप्रवेशकारणे पृष्टा मुरला भागीरथीं प्रति लोपामुद्राया वक्तव्यविज्ञापनप्रसङ्गेन रघुपतेस्तदानीन्तनमनोभावं विज्ञापयन्त्याह, अनिर्भिन्न इति।—गभीरत्वात् गाम्भीर्य्यात्, धैर्य्यातिशयवशादित्यर्थः, पक्षे—घनप्रलेपशालित्वात्, अत्यन्ताभ्यन्तरस्थितत्वादिति यावत्, अनिर्भिन्नः अप्रकाशितः, लोकलोचनबहिर्भूत इत्यर्थः, पक्षे—पात्रविर्भेदं न प्राप्तः, अविदीर्ण इति यावत्, अत एव अन्तः अन्तःकरणे गूढा अप्रकाशं स्थिता घना गाढा, अतिशयेनेति यावत्, व्यथा वेदना यस्य स तथोक्तः, पक्षे—अन्तर्मध्ये गूढा गुप्ता घना प्रगाढा व्यथा सन्तापः यस्य स तथोक्तः, रामस्य करुणो रसः सीताविरहजनितः शोक इत्यर्थः, पक्षे—रसः पारदः, पुटे वहिर्मृल्लेपावरुद्धपर्णादिनिर्म्मितपात्र-

तेन च तथाविधेष्टजनकष्टपातजन्मना (घ) प्रकर्षगतेन दीर्घशोकसन्तानेन (ङ) सम्प्रति अतितरां परिक्षीणो रामभद्रः,

---

विशेषे य पाकः औषधादीनां सन्तापनं तत्प्रतीकाशः तत्तुल्यः प्रतिभातीति शेषः, ["इकः काशे" (६।३।१२३ पा०) इति दीर्घता], यथा वह्नि प्रगाढतरमृत्प्रलेपात् रुद्धस्य पुटस्याभ्यन्तरवर्त्तिनो नितरां सन्तप्यमानस्य भेषजस्य सन्तापः कथमपि बहि र्नोपलक्ष्यते, तथा स्वाङ्गलक्ष्मीताविवासनसमुत्थः शोकसम्भारो नितरां दुःसहोऽपि रघुपतेनिसर्गधीरतया कथमप्यन्तर्निगूढो बहिर्न प्रकाशत इति भावः। पुटपाकश्चोक्तः परिभाषाप्रदीपे—

"पुटपक्वस्य द्रव्यस्य स्वरसो गृह्यते यतः।
अतोऽयं पुटपाकः स्यात् विधानं तस्य कथ्यते॥
द्रव्यमापोथितं जम्बू-वटपत्रादिसम्पुटे।
वेष्टयित्वा ततो बद्धा दृढं रज्ज्वादिना तथा॥
मृल्लेपं द्व्यङ्गुलं कुर्यादथवाऽङ्गुलिमात्रकम्।
दहेत् पुटान्तरादग्नौ यावल्लेपस्य रक्तता॥" इति।

[अत्र करुणविप्रलम्भाख्यो रसः स्वशब्देनोक्तः—"तामुद्दीप्यकुरङ्गाक्षीं रसो न कोऽप्यजायत" इत्यादिवत् दोषमावहतीत्यापाततः प्रतिभाति, "रसस्योक्तिः स्वशब्देन" इति रसदोषकथनप्रसङ्गे दर्पणकृदभिधानात्। वस्तुतस्तु यत्रालम्बनविभावादिव्यञ्ज्यो रसः स्वशब्देन वाच्यः स्यात्तत्रैवासौ दोषपदवीमारोहेत्, इह तु केवलं रामस्य तदानीन्तनावस्थावर्णनमुखेन रसशब्दोल्लेखात्र कापि दोषशङ्केति ध्येयम्। इह उपमा नामालङ्कारः, सा च सामान्यधर्मादीनां वाच्यतया पूर्णा, श्रुतिमात्रेणैवोपमेयोपमानगतसादृश्यलक्षणसम्बन्धावबोधकतया प्रतीकाशशब्दार्थानुसन्धानसापेक्षतया चार्थीति]। अनुष्टुप् वृत्तम्॥ १॥

(घ) तेनेति।—तेन—पुटपाकप्रतीकाशेनेत्यर्थः। तथाविधेति।—तथाविध ८५ निर्वासनसमुत्थ इत्यर्थः, इष्टजने प्रियजने, जनकतनयारूपे इति यावत्, य ८७ अनिष्टस्य, पातः पतनं, संघटनमिति यावत्, तस्मात् जन्म उत्पत्तिर्यस्य तेन १०।निर्वासनसम्भवेनेत्यर्थः।

(ङ) प्रकर्षेति।—प्रकर्षमातिशय्यं, गतेन प्राप्तेन, निरतिशयेनेत्यर्थः। दीर्घेति।—दीर्घेण बहुकालव्यापिना, निरवधिनेत्यर्थः, शोकसन्तानेन दुःखप्रवाहेण, निरवच्छिन्नशोकपरम्परयेत्यर्थः।

तमवलोक्य कम्पितमिव (च) मे हृदयम्। अधुना च प्रतिनिवर्त्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः (छ) प्रदेशा द्रष्टव्याः, तेषु च निसर्गधीरस्यापि एवंविधायामवस्थायाम् अतिगम्भीराभोगशोकक्षोभसंवेगात् (ज) पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि रामभद्रस्य, तद्भगवति गोदावरि! तत्र त्वया सावधानया भवितव्यम्।(झ)—

(च) सम्प्रतीति।—सम्प्रति—इदानीं, सीतानिर्व्वासनात् परमित्यर्थः। अतितराम्—अत्यर्थम्। परिक्षीणं,—अत्यन्तं कार्श्यमापन्नं। तं—तादृशं कार्श्यमापन्नं रामभद्रमित्यर्थः [सर्व्वत्र ल्यबन्तक्रियायाः समापिकया क्रियया सहैककर्तृकत्वमावश्यकम्, इह तु "अवलोक्य" इत्यनन्तरं स्थितादिपदाध्याहारेण तत् समाधेयम्]। कम्पितमिव—रामभद्रस्य भविष्यदनिष्टापातभीत्या सातिशयमस्थिरमिवेत्यर्थः।

(छ) प्रतिनिवर्त्तमानेनेति।—अगस्त्याश्रमादश्वमेधमनुष्ठातुमयोध्यां प्रतिगच्छता। नियतमेव—अवश्यमेव। वधूसहेति।—वध्वा सीतया सह सार्द्धं निवासे एकत्रावस्थाने ये विश्रम्भाः स्वच्छन्दविहरणादिविश्वस्तव्यापाराः तेषां साक्षिणः साक्षाद्द्रष्टारः, निर्जनत्वात् सीतारामयोः परस्परमसङ्कुचितचेष्टितानि यत्र अभवंस्तादृशा इति यावत्।

(ज) भवन्तु ते द्रष्टव्याः, का क्षतिस्तेन रामचन्द्रस्येत्याह, तेष्विति।—तेषु—प्रदेशेषु, प्रकृत्यातिरमणीयेष्विति यावत्। निसर्गधीरस्यापि—प्रकृत्यातिगम्भीरस्यापि, का कथा चपलचेतसामिति भावः। एवंविधायां—सीतावियोगजशोकेनातिविषण्णायामित्यर्थः, अवस्थायां—दशायाम्। अतिगम्भीरेति।—अतिगम्भीरः प्रगाढः, दुःसह इति यावत्, आभोगः प्रसरो यस्य तादृशो यः शोकः प्रियादिरहजं दुःखं, तेन यः क्षोभः प्रकृतिविपर्य्ययः, मर्म्मव्याघात इति यावत्, तस्य संवेगात् प्राबल्यात्।

(झ) पदे इति।—पदे पदे—प्रतिपदं, इतस्ततः सर्व्वत्रैवेत्यर्थः। महान्ति—घोराणि। प्रमादस्थानानि—प्रमादः अनवधानता, कर्त्तव्याकर्त्तव्यबुद्धिविपर्य्ययजं महद् दुःखमिति यावत्, तस्य स्थानानि उत्पत्तिस्थानानि कारणानीति यावत्। शङ्कनीयानि—सम्भावनीयानि। रामस्य महान्ति [illegible] सम्भवितुमर्हन्तीति भावः। तत्—तस्मात्, तेषु तेषु स्थानेषु सततविरहोद्दीपकवस्तुदर्शनेना[illegible] दृष्ट्वा। तत्र—[illegible] यावत्। सावधानया—[illegible] निरन्तरावहितयेत्यर्थः।

वीचीवातैः शीकरक्षोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेषितैस्तर्पयेति ॥ २ ॥

तमसा। उचितमेव दाक्षिण्यं स्नेहस्य, सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्यात्र सन्निहितः। (ञ)

ननु समयस्यैव कर्मणि विनियोगो युज्यते, नासमयस्येति गोदावर्या सलिलस्वरूपतया तयेदानीमवहितयापि रामस्य कीदृगुपकारसम्भावनेत्यपेक्षायां सलिलस्वरूपाया अप्यवधानप्रकारमुपदर्शयन्नाह, वीचीति।—शीकराणामम्बुकणानां ("शीकरोऽम्बुकणः स्मृतः" इत्यमरः) क्षोदेन चूर्णसम्पर्केण ("चूर्णे क्षोदः" इत्यमरः) शीतैः शीतलैः शीतलजलकणवाहिभिरित्यर्थः, पद्मकिञ्जल्कगन्धान् कमलकेशरसौरभाणि आकर्षद्भिः आकृष्य वहद्भिः, निरतिशयघ्राणतर्पणैरित्यर्थः, स्वैरं स्वैरं मन्दं मन्दं यथा स्यात् तथा प्रेषितैः प्रेरितैः (एभिर्विशेषणैर्वायोः क्रमशः शैत्य सौगन्ध्य मान्द्यञ्च दर्शितम्) तव वीचिवातैस्तरङ्गसम्पृक्तवायुभिः रामचन्द्रस्य जीवं जीवनं मोहे मोहे प्रतिमूर्च्छावस्थायां तर्पय पोषय। रामो हि यदा यदा दुःसहशोकसन्तापेन समाकुलितः मूर्च्छामधिगच्छेत्, तदा तदैव त्वमवहिता मन्दस्निग्धसुरभिसमीरणसञ्चालनेन तस्य मूर्च्छामपनयेरिति भावः। [मोहलक्षणं यथा साहित्यदर्पणे,—"मोहो विचित्तता भीति दुःखवेगानुचिन्तनैः। मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥" इति। तर्पयेत्यत्र विध्यर्थे "विधिनिमन्त्रणामन्त्रण—" (३।३।१६१ पा०)] इति लोट्। इतीति।—मुखामुखेन अभिहितस्य अगस्त्यपत्न्या वाक्यजातस्य समाप्तिसूचकमव्ययम्। तच्च "गोदावरीमभिधातुं प्रेषितास्मि" इति पूर्वेण अन्वेति। शालिनी नाम वृत्तम्, तल्लक्षणं यथा—"मात् तौ गौ चेच्छालिनी वेदलोकैः" इति। एकादशाक्षरपादच्छन्दसः २८८ तमप्रस्तारे शालिन्यन्तर्भावः ॥ २ ॥

(ञ) उचितमिति।—योग्यमित्यर्थः, दाक्षिण्यम्—आनुकूल्यम्। स्नेहस्य—वात्सल्यस्य, रामं प्रति परमवत्सला लोपामुद्रा तस्य भविष्यदन्यान्हितमाशङ्कमाना इदानीं यत् आनुकूल्यं दर्शयति, तद् युक्तमेव, परन्तु सम्प्रति नास्ति तस्य किमपि आवश्यकमिति समुदिताभिप्रायः। कुत एवम्? इत्याह, सञ्जीवनेत्यादि।—तु—किन्तु। सञ्जीवनोपायः,—मूर्च्छितस्य रामस्य संज्ञाप्रतिपत्तिहेतुः। मौलिकः,—

मुरला। कथमिव ? (ट)

तमसा। श्रूयताम्।—पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य गते लक्ष्मणे, सीतादेवी प्राप्तप्रसववेदना आत्मानम् अतिदुःखसंवेगाद्गङ्गाप्रवाहे निक्षिप्तवती, तदैव तत्र दारकद्वयं प्रसूता, भगवतीभ्यां पृथ्वीभागीरथीभ्याम् अभ्युपपन्ना रसातलञ्च नीता ; स्तन्यत्यागात् परेण च तद्दारकद्वयं तस्याः, प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती। (ठ)

मूलीभूतं, रामस्यैतादृशशोकमोहादे यत् मूलं कारणं, तदेव अद्य शोकमोहादेरपनोदनकारणं रामस्य निकटवर्त्तीत्यर्थः, सीता अद्य रामस्य अतिनिकटे वर्त्तते इति भावः।

(ट) कथमिवेति।—रामस्य सञ्जीवनोपायः सन्निहित इत्युक्तं, स उपायः कीदृशः ? इति मुरलाप्रश्नाभिप्रायः।

(ठ) श्रूयतामिति।—इदं हि वृत्तव्यापारकथनरूपं विष्कम्भाङ्गं,—"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः" इति साहित्यदर्पणवचनात्। वाल्मीकीत्यादि।—वाल्मीकेः तपोवनस्य आश्रमस्य उपकण्ठात् समीपात्। परित्यज्य—विहाय, सीतामिति शेषः। प्राप्तेत्यादि।—प्राप्ता—आसादिता, प्रसववेदना—प्रसवकालीनयन्त्रणा यया सा तथोक्ता, असहनीयप्रसववेदनया निरतिशयक्लेशमापन्नेत्यर्थः। आत्मानं—स्वदेहम्, ("आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" इति कोषः)। अतिदुःखसंवेगात्—दुःसहक्लेशातिशय्यादित्यर्थः। तदैव—निक्षेपाव्यवहितानन्तरमेव। तत्र—गङ्गाप्रवाहे। दारकद्वयं—शिशुद्वयं ("दारकौ बालकेऽपि स्यात्" इति मेदिनी) प्रसूता—प्रसूतवती [प्रसूता इत्यत्र कर्त्तरि निष्ठा]। अभ्युपपन्ना—धृता, अनुगृहीता वा ("अभ्युपपत्तिरनुग्रहः" इत्यमरः) रसातलं—पातालम्। नीता च—प्रापिता च। स्तन्यत्यागात्—स्तन्यस्य मातुः स्तनसम्भूतस्य पयसः त्यागात् परिहारात्। परेण—अनन्तरमित्यर्थः ['परेण' इति न एनबन्तपदं, तथा सति तेन योगे "एनपा द्वितीया च" (२।३।३१ पा०) इत्यनेन द्वितीयाविधानात् 'स्तन्यत्यागात्' इत्यत्र पञ्चमीविधानमयुक्तं स्यात्, वस्तुतस्तु अत्र अपवर्गे तृतीयेति]। तस्याः,—सीतायाः। प्राचेतसस्य—वाल्मीकेः [वाल्मीकेरित्यत्र परस्वत्वोत्पादकत्वाभावात् न सम्प्रदानता, अपि तु क्रियासम्बन्धमात्रविवक्षया षष्ठी] स्वयम्—आत्मना, स्वयं गत्वा दत्तवती, नत्वन्येनेत्यर्थः। [स्वयमर्पणोद्योगात् शिशुद्वयं प्रति गङ्गादेव्याः स्नेहातिशय्यं सूचितम्]।

मुरला। [सविस्मयम्]।—

ईदृशानां विपाकोऽपि जायते परमाद्भुतः।
यत्रोपकरणीभावमायात्येवंविधो जनः॥ ३॥

तमसा। इदानीन्तु शम्बूकवृत्तान्तेनानेन सम्भावितजनस्थानागमनं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी, यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं तदेवाशङ्क्य सीतासमेता, केनचिदिव गृह्याचारव्यपदेशेन (ङ) गोदावरीं विलोकयितुमागता।

तमसया वर्णितं सीतावृत्तान्तमाकर्ण्य मुरला स्वं यद् विस्मितमिवादर्शयत, तदेव विस्मयकारणमुपदर्शयन्त्याह, ईदृशानामिति।—ईदृशानां रामसदृशपरमाद्भुतचरितानामित्यर्थः, विपाकोऽपि दशाविपर्ययोऽपि, सम्पदः का कथा विपदपीत्यर्थः, परमाद्भुतः अत्यर्थं विस्मयजनकः, असाधारण इत्यर्थः, जायते भवतीत्यर्थः। यत्र विपाके एवंविधः पृथ्वीभागीरथीवाल्मीकिसदृशो जनः उपकरणीभावम् उपकारित्वम् आयाति प्राप्नोति, उपकरणार्थं सहायो भवतीत्यर्थः। येषां क्षणिकं दर्शनं सततं समाराधनतत्परैः अपि न सुघटं तेऽपि एवंविधानां विपाके स्वत एव उपकर्त्तुं यतन्ते इति परमाद्भुतत्वं विपाकस्येति भावः। [अत्र विपाकस्य परमाद्भुतत्वं प्रति उत्तरार्द्धवाक्यार्थस्य हेतुतयोपन्यासात् काव्यलिङ्गमलङ्कारः]। अनुष्टुप् वृत्तम्॥ ३॥

(ङ) शम्बूकेति।—शम्बूकस्य वृत्तान्तः शिरश्छेदनविधानात्मको व्यापारः तेन। सम्भावितेति।—सम्भावितम् उत्प्रेक्षितं जनस्थाने आगमनम् उपस्थितिः यस्य स तम्। सरयूमुखात्—सरयूः अयोध्यासमीपवर्त्तिनी काचित् नदी तस्याः मुखात्। उपश्रुत्य—समाकर्ण्य ज्ञात्वेत्यर्थः। [अत्र रामभद्रस्य श्रावणप्रत्यक्षमात्रासम्भवेन 'रामभद्रमुपश्रुत्य" इत्यस्य कथं सङ्गतिः? इति नाशङ्कनीयम्, श्रुधातोः शाब्दबोधवाचितया रामभद्रे तत्कर्मत्वसम्भवादिति चिन्त्यम्] यदेव—रामस्य अत्याहितमेव। सीतासमेता—सीतया जानक्या सह समेता सङ्गता, मिलिता सतीत्यर्थः। गृह्याचारेति।—गृहस्य यः आचारः कुलक्रमागतो व्यवहारः तस्य व्यपदेशेन व्याजेन, कुलोचितानुष्ठानच्छलेनेत्यर्थः। [गृह्याचारव्यपदेशेनेत्यत्र प्रकृतोपयोगिच्छलग्रहणरूपम् अभूताहरणं नाम सन्ध्यङ्गमुक्तम्—'तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्" इति साहित्यदर्पणः]।

मुरला। सुविचिन्तित भगवत्या, भागीरथ्या। राजधानी-स्थितस्य खलु तैस्तैर्जगतामाभ्युदयिकैः कार्य्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः, अव्यग्रस्य पुनरस्य (ढ) शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ इति, तत् कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात्? (ण)

तमसा। उक्तमेव भगवत्या भागीरथीदेव्या,—"वत्से। देवयजनसम्भवे सीते। अद्य खलु आयुष्मतोः कुशलवयोर्द्वादशजन्मसंवत्सरस्य सङ्ख्यामङ्गलग्रन्थिरभिवर्ध्यते, (त) तदात्मनः पुराण-

---

(ढ) सुविचिन्तित—साधुविवेचितम्। भगवत्या—ऐश्वर्य्यादिषड्गुणशालिन्या इत्यर्थः, सततशोकोद्दीपकवस्तुसन्दर्शनेन रामस्यावश्यम्भाविनि विपत्पाते सीतामेव सान्त्वनोपायत्वेनावधार्य भागीरथ्या युक्तियुक्तमाचरितमिति भावः। राजधानीस्थितस्य—राजधान्याम् अयोध्यायां वर्त्तमानस्य, आभ्युदयिकैः,—उन्नतिसाधकैः बहुभिः प्रजाहितकरव्यापारैरित्यर्थः। चित्तविक्षेपाः,—चित्तस्य विक्षेपाः विविधदिक्षु क्षेपाः। नियताः,—नियन्त्रिताः, रुद्धप्रसारा इति यावत्, भवन्तीति शेषः, अतः शोकस्य न अवकाश इति भावः। अव्यग्रस्य पुनः,—सम्प्रति अविक्षिप्तचित्तस्य व्यापारान्तरासक्तिशून्यस्येत्यर्थः।

(ण) शोकमात्रेति।—शोक एव इति शोकमात्रं केवलः शोक इत्यर्थः, तत् द्वितीयं यस्य तथोक्तस्य, सीताविरहजदुःखैकसहचरस्येत्यर्थः। अनर्थ,—अनिष्टहेतुरित्यर्थः। [अत्र "अनर्थ" इत्यस्य कार्य्यकारणभावसम्बन्धेन लक्षणया "आयुर्घृतम्" इतिवत् अनर्थहेतुरूपोऽर्थो बोध्यः। एवञ्च पञ्चवटीप्रवेशो रामस्य अत्यन्तानिष्टसम्पादनरूपकार्य्ये अव्यभिचारी हेतुरिति सूच्यते]। तत्—तस्मात्। आश्वासनीय,—आश्वासयितुं शक्य इत्यर्थः।

(त) उक्तमेव—कथितमेव [अत्र एवशब्दः स्वायोगं व्यवच्छिनत्ति इति बोध्यम्, "उक्तमेवंरूपं किं पुनरन्यया इति" इति वक्ष्यमाणेनान्वयः]। आयुष्मतो,—दीर्घजीविनावित्यर्थः [आयुः जीवनकालः, स प्रशस्ततया विद्यते ययोः तौ आयुष्मन्तौ, अत्र प्राशस्त्यार्थे मतुप्, "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥" इत्यनुशासनात्]। द्वादशेति।—जन्मसंवत्सरात् आरभ्य द्वादशसंख्यापूरणस्यागतस्य वत्सरस्येत्यर्थः [द्वादशानां पूरण इति द्वादशः "तस्य

श्वशुरम् एतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देव स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व। (य) न च त्वामवनिपृष्ठवर्त्तिनीमस्मत्प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति,

---

पूरणे डट्" (५।२।४८ पा०) इति डट् प्रत्ययः, स चासौ जन्मसंवत्सरश्चेति तस्य]। सङ्क्रोति।—वयःकालनिरूपणाय मङ्गलाश्रयः हस्ते धारणीये सूत्रे ग्रन्थिरित्यर्थः, (प्रतिवर्षं जन्मतिथौ गणपतिं दिनपतिञ्च सम्पूज्य मात्रादिभिः बालकानां मङ्गलार्थं करे सूत्रमभिबध्यते इति आचारः, तच्च सूत्रं जन्मग्रन्थिरित्यभिधीयते। तदुक्तं कृत्यचिन्तामणौ—"गुडदुग्धतिलान्नाद्यैर्जन्मग्रन्थेश्च बन्धनम्। गुग्गुलं निम्बसिद्धार्थदूर्वागोरोचनान्वितम्। सम्पूज्य भानुविघ्नेशौ सहपि प्रार्थयेदिदम्॥" इति)। अभिबध्यते—संनह्यते, वाल्मीकिनेति शेषः।

(थ) अथ तयोर्वाल्मीक्याश्रमस्थितत्वेन असमीपवर्त्तितया मया किमपरमिदानीमनुष्ठेयम्? इत्याह, तदिति।—तत्—तस्मात्, पुत्रस्य जन्मतिथौ जननीनां कस्यचित् मङ्गलाचरणस्य अवश्यकर्त्तव्यत्वादित्यर्थः। पुराणश्वशुरः—आदिमः श्वशुरः, श्वशुरवंशस्य आदिपुरुषमिति यावत्। [सीतायाः श्वशुरवंशस्य सूर्य्यादाविर्भूततया तदुपासनायाः अस्याः फलावश्यम्भाव इति सूचनाय सवितुः पुराणश्वशुरत्वविशेषणं बोध्यम्]। एतावतः—इयत्संख्यकस्य। मानवस्य—वैवस्वतमनुसम्बन्धिनः तदपत्यस्येत्यर्थः। (अत्र सवितुर्वैवस्वतो नाम मनुः, ततः इक्ष्वाकुः, ततः रघुरित्येवं वंशप्रवर्त्तकानामेषां वंशः समजनीति ज्ञेयम्)। प्रसवितारम्—उत्पादयितारम्। अपहतेति।—अपहतः विनाशितः, पाप्मा—पापं येन तं, स्वमहिम्ना निरस्तसमस्तपापतया सर्वैराराधनीयमिति भावः। सवितारं—देवं, सूर्य्यदेवमित्यर्थः। स्वहस्तेति।—स्वहस्तेन स्वकरेण अवचितैः अवलूनैः, स्वयं सङ्गृहीतैरिति यावत्। (तेन च पूजायाः फलातिशय्यसम्भावना सूचिता,—"समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्" इति पद्मपुराणीयवचने श्रोत्रियपदस्य उपलक्षणतया सर्वस्यैव पूजाधिकारिणः स्वयमुपचितकुसुमादिभिरर्चनाया विहितत्वात्)। उपतिष्ठस्व—सेवस्व। [अत्र "उपाद्देवपूजा—" इति वार्त्तिकसूत्रेण देवपूजायाम् उपात् तिष्ठतेरात्मनेपदम्]।

(द) स्वयं कुसुमचयचयनार्थमितस्ततः पर्य्यटन्ती कदाचिच्चेदहं साधारणजननयनपथपथिका भवेयं तदा लोकालापपरम्परातः श्रुतमदागमनवृत्तान्तः आर्य्यपुत्रो नूनमन्यन्तमनर्थमुत्पादयिष्यतीति सीताशङ्काम् आशङ्कमाना भागीरथी तां पूर्वत एव निरस्यति, न चेति।—अस्य च "द्रक्ष्यन्ति" इति परेणान्वयः। अवनिपृष्ठवर्त्तिनीं—

किं पुनर्मर्त्याः" इति। अहञ्च आज्ञापिता,—"तमसे! त्वयि प्रकृष्टप्रेमैव वधूर्वत्सा जानकीति, अतस्त्वमेवास्याः प्रत्यनन्तरीभव" इति। साहमधुना यथादिष्टमनुतिष्ठामि। (द)

मुरला। अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि। (ध)

तमसा। तदियं गोदावरीह्रदान्निष्क्रम्य (न)—
परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकवरीकमाननम्।

पृथिवीतलस्थिता, ("गोत्रा कुः पृथिवी पृथ्वी आर्वानिर्मेदिनी मही" इत्यमरः)। अस्मत्प्रभावात्—अस्माकं वरमहिम्ना इति यावत्। [अस्माकं प्रभावः अस्मत्प्रभावः, अत्र बहुवचनप्रयोगस्तु "अस्मदो द्वयोश्च" (१।२।५८ पा०) इत्यनेन सूत्रेण समर्थनीयः]। द्रक्ष्यन्ति—द्रष्टुं शक्ष्यन्तीत्यर्थः। "वनदेवता अपि" इत्यत्र अपिकारव्यवच्छेद्यं दर्शयति, किमिति।—मर्त्याः,—मर्त्ये पृथिव्यां भवा इति मर्त्याः, मानवा इत्यर्थः। ("मनुष्या मानुषा मर्त्या मनुजा मानवा नराः" इत्यमरः) मम माहात्म्यादलौकिकशक्तिशालिनीभिर्वनदेवताभिरपि द्रष्टुमशक्यां त्वां मानवाः पुनर्न द्रक्ष्यन्तीत्यत्र किमु वक्तव्यम्? इति भावः। अहं—तमसा। प्रकृष्टप्रेमा—प्रकृष्टं सातिशयं प्रेम प्रीतिर्यस्याः सा तथाक्ता, सर्वाधिकप्रणयशालिनीति यावत्। वधूः,—स्नुषा, ("—वधूः स्त्री सारिवीषधी। स्नुषाशटीनवोढासु। भार्यापृक्काङ्गनासु च॥" इति मेदिनी। अत्र स्वकीयपूर्वपुरुषभगीरथेनानीततया भागीरथी रामस्य मातृस्थानीयेति सा सीता वधूरित्यभिहितवतीत्यवधेयम्) प्रत्यनन्तरीभव—अप्रत्यनन्तरा प्रत्यनन्तरा भव इति प्रत्यनन्तरीभव—सन्निहिता भव, सततं सीतासाहचर्यमुपगता, तदानुकूल्यं विधेहीति यावत्। यथादिष्टम्—आदिष्टम् आदेशः, तदनतिक्रम्य इति यथादिष्टम्, आदेशानुरूपमित्यर्थः।

(ध) अमुं वृत्तान्तमिति।—तमसामुखाच्छ्रुतं सीतासहितायाः भागीरथ्याः आगमनरूपं व्यापारम्। तर्कयामि—सम्भावयामि।

(न) तत्—तस्मात्, रामस्य अचिरादेव अत्रागमनसम्भवादित्यर्थः। इयं—परिदृश्यमाना, श्लोकस्थेन "जानकी" इत्यनेनान्वयः। निष्क्रम्य—निर्याय, उत्थाय इति यावत्, "वनमेति" इति श्लोकांशेनान्वयः।

करुणस्य मूर्त्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ॥ ४ ॥

मुरला। इयं हि सा।—

सहजसौन्दर्य्यातिशयवशान्मधुरतराकृतिरपि सम्प्रत्यहरहरसह्यविरहवेदनाऽतिदूनाक्षीणाप्यतितरां काममप्यभिनवामतिरमणीयामभिख्यामधिगता सतीकुलललामभूता सीता सर्व्वेषामेव समवेदनाभाजनं जातेति वर्णयन्त्याह, परिपाण्डुरित्यादि।—परिपाण्डू दुःसहप्रियपरित्यागशोकाभिभवात् पाण्डुवर्णौ दुर्बलौ क्षीणौ च कपोलौ गण्डौ यस्मिन् तत् तथोक्तं, तथापि सुन्दरं मनोहरं, तथा विलोला संस्काराभावात् स्रस्ता लम्बिनी कवरी केशपाशः यस्मिन् तत् तथोक्तम् ("कवरी केशवेशोऽथ धम्मिल्लः संयताः कचाः" इत्यमरः) आननं मुखं दधती धारयन्ती जानकी जनकनन्दिनी सीता करुणस्य शोकस्य मूर्त्तिः आकृतिरिव, मूर्त्तिमान् शोक इवेत्यर्थः, अथवा शरीरिणी मूर्त्तिमती, विरहव्यथेव रामवियोगवेदनेव, वनम् अरण्यम्, एति आगच्छति, ["मूर्त्तिरथवा" इत्यत्र "मूर्त्तिरिव वा" इति पाठोऽपि सुस्पष्ट एवायं]। सततं प्रियतमविरहशोकसन्तप्ता चिन्ताक्षीणमाननमादधानापि सहजसौन्दर्य्यातिशयवशात् सम्प्रत्यपि निरुपमरमणीयाकृतिरियं दृश्यते इति भावः। पतिव्रताया लक्षणमाह अङ्गिराः,—

"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥"

अस्यानुरूपः कश्चित् श्लोकः यथा शाकुन्तले—

"वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति॥"

प्रकृतेनायं निरपेक्षं समालोच्यते चेत् तदा सुललितशब्दसम्पत्त्यार्थसम्पत्त्यालङ्कारसम्पत्त्या च सुकुमारचेतसां चेतसि विच्छित्तिविशेषाधायकतया इतः प्रकृतस्यैव गौरवातिशय्यदर्शनादनिच्छद्भिरप्यस्माभिः प्रकृतस्यैव साधीयस्त्वं वाच्यमिति सुधीभिर्विचारणीयम्। [सर्व्वत्र कपोलयोः पाण्डुता क्षीणता च सौन्दर्य्यहीनकारणतयैव प्रसिद्धा, इह तु तयोर्विद्यमानतायामपि सौन्दर्य्योत्पत्तिकथनात् प्रथमपादे विषमालङ्कारः, तथा तृतीयचतुर्थपादयोर्भावाभिमानि वाच्योत्प्रेक्षाद्वयञ्चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिः]। मञ्जुभाषिणी वृत्तं, तल्लक्षणं यथा—"सजसा जगौ च यदि मञ्जुभाषिणी" इति॥ ४॥

किसलयमिव मुग्ध बन्धनाद् विप्रलून
हृदयकुसुमशोषी दारुणो दीर्घशोक ।

सहजत कुसुमसुकुमाराकृति लोकलोचनानन्दविधायिनी जनकनन्दिनीमिदानी-मतितरामप्रियविरहकातरामवलोक्य सातिशयमन्तर्दूयमाना मुरला तदीयां परिदृश्य-मानामवस्थामुपवर्णयन्ती आह, किसलयमिति।—शरदिज शरत्कालभव [अनेन घर्मस्य अतितापहेतुता व्यज्यते। "शरदिज" इत्यत्र शरदि जायते य इति "सप्तम्या जनेर्ड" (३।२।९७ पा०) इति डप्रत्यय, तत "प्रावृट्शरत्कालदिवां जे" (६।३।१५ पा०) इति सप्तम्या अलुक् च] घर्म आतप ("घर्म स्यादातपे ग्रीष्मेऽप्युष्मस्वेदाम्भसोरपि" इति मेदिनी)। केतकस्य पुष्पम् ["अवयवे च प्राण्योषधिवृक्षेभ्य" (४।३।१३५ पा०) इत्यण्, तत "पुष्पमूलेषु बहुलम्" वा० इति तद्धितलुकि हरीतक्यादित्वात् स्त्रीत्वम्] ("द्विहीन प्रसवे सर्वं हरी-तक्यादय स्त्रियाम्" इत्यमरोक्ते) तस्या केतककुसुमस्य गर्भपत्र कुसुममध्य-गतदलमिव, [अत्र गर्भशब्दग्रहणेन मृदुतातिशय्य पाण्डुता च व्यज्यते] हृदय सुकुमारतया कुसुमम् इव [अत्र व्याघ्रादेराकृतिगणत्वात् "उपमित व्याघ्रादिभि" (२।१।५६ पा०) इत्यनेन उपमितसमास ।] तत शोषयति य स तथोक्त , निरतिशयसुकुमारतया कुसुमसदृशमस्या हृदयमयमतितरां तापयतीति भाव । दारुण विषम, दु सह इत्यर्थ, [तपनातप विरहतापयोरयमेव विशेषो यदितरो रात्रिदिनं प्रखरतप्रभावेण म्लापयन्नितरपदार्थान् हतप्रभान करोति, अन्तिमस्तु म्लापयन्नपि विलासिन केनाप्यभिनवेनानुभवैकगम्येन शोभाऽतिशय्येन पुनरलङ्करोति व्ययमतिदारुणोऽप्यदारुण एवेत्यवगम्यते ।] दीर्घ सुचिरकालव्यापी, निरवधिरिति यावत् य शोक प्रियविरहजन्य सन्ताप, मुग्ध मनोहर, बन्धनात वृन्तात ("वृन्तादीनां फलं शस्य हन्त प्रसवबन्धनम्" इत्यमर) विप्रलून प्रसह्य विच्छिन्न किसलय नवपल्लव मिव, अस्या सीताया परिपाण्डु परित पाण्डुवर्णं, विदीर्णगलितमित्यर्थ यावत, क्षाम कृश ['क्षाम' इति पदं क्षैधातो क्तप्रत्ययेन सिद्धम्, "क्षायो म" (८।२।५३ पा०) इति सूत्रेण तस्य मकारादेश] शरीर, ग्लपयति ग्लानि प्रापयति। यथा प्रचण्डतरदिनकरकिरणनिकर ... गुप्यमाण ... कुसुमसुकुमार किसलयसमान ... जनयति, तथा दु सहविरहानलतापसम्पन्नानेन जानकी ... अतितरां ... [अत्र किसलयेत्यादिष्, ... , ... च ... मा च

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम्॥ ५॥

[इति परिक्रम्य निष्क्रान्ते]। (प)

इति विष्कम्भकः। (फ)

इवशब्दवाच्यतया श्रौती। अत्र लिङ्गादभ्यूहनरूपम् अनुमानं नाम सन्ध्यङ्गमुक्तम्]। वृत्तं मालिनी॥ ५॥

(प) इतीति।—इति इत्यमालपन्त्यौ इति शेषः। निष्क्रान्ते—तमसामुरले इति शेषः।

(फ) विष्कम्भक इति।—विष्कम्भकस्य लक्षणादिकं विस्तरतः द्वितीयाङ्कप्रारम्भे उक्तमिति नात्र पुनरुच्यते। अत्रापि "प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया" इत्यादिना मुरलाकथितवाक्येन, तथा "श्रूयतां पुरा किल" इत्यादिना तमसाकथितवाक्येन च अतीतकथांशानां निदर्शनं, तथा "अहमप्याज्ञापिता, तमसे! त्वयि प्रकृष्टप्रेमैव" इत्यादिना तमसाकथितवाक्येन च वक्ष्यमाण-कथांशानां निदर्शनं वेदितव्यम्। तस्य च शुद्धसङ्कीर्णरूपत्वेन द्वैविध्यं, प्रकृतस्य तु तमसामुरलारूपाभ्यां मध्यमाभ्यां पात्राभ्यां सम्प्रयोजितत्वात् शुद्धरूपत्वमेव, "मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः॥" इति साहित्यदर्पणोक्तवचनात्।

अथेदं चिन्त्यते,—इह हि सकलकाव्यकलाऽऽलोचनलोललोचनानाम् अधुना-तनानां मनसि समुद्भवत्यभिनवं कौतुकं सततं,—यत् सरसकवितारसपरवशमानसेन कविकुलपतिना भवभूतिना विरचिते सुपरिचितेऽस्मिन्नुत्तररामचरिते कथमनन्यकल्पना-प्रसूतः शुद्धविष्कम्भकः उपनिबद्धोऽत्र तृतीयेऽङ्के?—तथाहि, सत्यप्यभिनवे कविनवनव-भावोद्भावनपाटवे प्रयोजनमनुयुज्य चेन्न लभ्यते सदुत्तरं किञ्चित्, तदा व्यर्थपदार्थ-समावेशनापङ्किलकविहृतचेतसां चेतसि नैवोपजायते कियानपि परितोषलवः, इत्येतेषाम् अत्यद्भुतं समाकूतं विभाति। यदि च तृणोऽभ्यन्तरः साधारणेन मन्यामहे, तदापि "तुष्यतु दुर्जनः" इति न्यायेन साम्प्रतमेव ब्रूमः, तथाहि—अनितरसाधा-रणकल्पनैकधना कवयो हि कुटिलसमालोचकविलोचनपथमतिक्रमाणा स्वाधीनमेवोपनिबध्नन्ति काव्यजातम्। तत्र च सरसकाव्यरसास्वादवञ्चितानां दु[illegible]नां कुटिलकटाक्षपातस्तेषां पाषाणनिपात एव भवति।

[नेपथ्ये] प्रमाद प्रमाद' ॥ (ब)

[ततः प्रविशति पुष्पावचयव्यग्रहस्ता सकरुणौत्सुक्यम् आकर्णयन्ती सीता]। (भ)

परमाद्यतन्तु विचार्यमाणे न ह्येवंविधा कविकुललामभूता' कालिदास भवभूतिप्रमुखा नियत भावपारतन्त्र्येणास्वतन्त्रा अपि किमपि प्रयोजनमननुसन्दधाना कुत्राप्युपनिबध्नन्ति किञ्चिदित्येव ब्रूम। इहापि चेदतिनिपुणधियाऽतिसूक्ष्मगौत्स्यते प्रयोजनं किञ्चित् तदाऽस्माकमपि लोचनपथमुपैति प्रयोजनत्रितयमेवापातत, प्रथमतस्तु तावदलोकसाधारणपूतचरिताया सतीकुलललामभूताया सीताया अलौकिकपातिव्रत्यप्रदर्शनं, तथाहि प्रचुरतरप्रमाणावगतविशुद्धभावां सीताम् अतिशुद्धपूतचरितां विदित्वाऽपि अन्तरेणैव निर्वासनसाधकं कञ्चिदपराधं केवलं लोकानुरञ्जनार्थं विजनकानने विवासयितरि भर्त्तरि रामचन्द्रे अस्मत सापराधेऽपि कथमप्यनभिव्यञ्जयन्ती लेशतोऽपि विरागं, प्रकटयन्ती च प्रतिपदमेवावर्णनीय कातरताऽतिशय्य मुहुर्मोहमापन्ने भर्त्तरि सीता समदर्शयत् सम्प्रत्यपि परां कोटिं पातिव्रत्यधर्मस्य। द्वितीयतस्तावदासन्या सहालापावसरे राजकीयकठोरकर्त्तव्यपारतन्त्र्येणैवानिच्छताऽपि रामेण निरपराधा निर्वासिता सीतेति समन्तात् विज्ञापनम्। तथा तृतीयत सर्वान्तर्यामिणा जगत्स्वामिना रामेण निर्दयं निर्वासिता सीता भर्त्तैवमवमता वनवाससहचरीणां वासन्त्यादीनां समक्ष मुखमपि दर्शयितुं लज्जमाना सम्प्रति तत्तत्सखीसमक्षमेवाप्युपात्तमुखात "अस्ति चाश्वमेधाय हिरण्मयी सीताप्रतिकृति" इत्यादिकमाकर्णयन्ती जानकी परित्यक्तवत्यात्मन्यवज्ञाजातामिति प्रत्यापनञ्चेति सुधाभिर्विभाव्यम्।

(ब) प्रमाद इति।—प्रमाद,—महान् अनिष्टापात इत्यर्थ, (यदि च प्रमादशब्दस्य अनवधानतार्थोऽयं लोकप्रसिद्ध, तथापि अनिष्टापातरूपार्थेऽपि बहुतरप्रयोगदर्शनात् तत्रापि अयं भाक्त इत्यवधेयम्)।

(भ) पुष्पेत्यादि।—पुष्पाणां कुसुमानाम् अवचये सञ्चयनकार्ये व्यग्रौ व्यापृतौ हस्तौ यस्याः सा तथोक्ता। सकरुणेत्यादि।—करुणा सहसा पूर्व्वपरिचितपञ्चवट्यादिदर्शनसमुद्बुद्धपूर्व्वस्मृतिजन्य शोक, औत्सुक्यं पूर्व्वसुखदानतया पुन पुनदर्शनाय तत्कण्ठा, ताभ्या सहितं यथा स्यात् तथेत्यर्थ। आकर्णयन्ती—शृण्वन्ती, नेपथ्ये प्रमादशब्दमिति शेष।

सीता। अह्महे! जाणामि पिअसही मे वासन्दी वाहरदि त्ति *। (म)

पुनर्नेपथ्ये।—

सीतादेव्या स्वकरचलितैः शल्लकीपल्लवाग्रै-
रग्रे लोलः करिकलभको यः पुरा पोषितोऽभूत्।

सीता। किं तस्स ? †

* अहो! जानामि प्रियसखी मे वासन्ती व्याहरतीति।

† किं तस्य ?

(म) अहो इति।—[अहो इति विस्मयसूचकमव्ययम्]। अकस्माद्वासन्तीकण्ठस्वरश्रवणं विस्मयकारणम्। जानामि—मन्ये। व्याहरति—कथयति, पाराचितपूर्व्वतत्कण्ठस्वरत्वेन प्रतीयमानत्वादिति भावः।

"प्रमादः प्रमादः" इति नेपथ्यालापवचनानवसान एव प्रविशन्त्यां जनकनन्दिन्यां तद्वासन्तीव्याहारत्वेनाशङ्कमानायाम् अन्तरान्तरा सीतीक्तिव्यवहितं नेपथ्यांशावशिष्टं नेपथ्यतः पुनरप्यवशिष्टं श्लोकेन व्याहरति, सीतादेव्या इत्यादि।—पुरा पूर्व्वस्मिन् काले, रामस्य अरण्यवाससमये इत्यर्थः, अग्रे सीतायाः सम्मुखे इति शेषः, लोलः पल्लवग्रहणार्थं चपलः ("लोलश्चलसतृष्णयोः" इत्यमरः) यः करिकलभकः हस्तिशावकः, [अत्र यद्यपि कलभशब्दस्यैव करिशावकार्थकत्वेन पुनः करिपदसमभिव्याहारः अधिकपदतादोषदुष्टत्वमुद्भावयति, तथापि "विशिष्टवाचकपदानां सति विशेषणपदसमभिव्याहारे विशेष्यमात्रपरत्वं करिकलभादिशब्दवत्" इति वामनसूत्रादेव कलभशब्दस्य करिरूपविशेषणशब्दसमभिव्याहृतत्वेन सामान्यतः शावकमात्रपरतया न कापि दोषशङ्केति, अत एव कलभशब्दार्थप्रदर्शनप्रसङ्गे "शावकमात्रपरत्वेन करिकलभकरमर्दितसमालकिसलया मेदिनी" इति वाचस्पत्याभिधानेऽपि दृश्यते इत्यवधेयम्। "कलभकः" इत्यत्र कलभशब्दादनुकम्पायां कन्प्रत्ययः]। सीतादेव्या जनकनन्दिन्या स्वकरेण स्वहस्तेन कलितैः धृतैः अवचितैर्वा, लवनेन कर्त्तितैः धृतैः सङ्गृहीतैर्वेति भावः [एतेन सीतायास्तस्मिन्नतिशयस्नेहप्रवणता सूचिता] शल्लकीनां तदाख्यानां गजप्रियाणां वृक्षविशेषाणां पल्लवाग्रैः अग्रकिसलयैरित्यर्थः, पोषितः पालितः अभूत्, सोऽयं करिकलभकः वध्वा निजजायया करेणुकया इत्यर्थः,

पुनरनपथ्ये।—

लब्ध्वा सार्द्धं पयसि विहरन् सोऽयमन्येन वेगा-
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥ ६ ॥

सीता। [ससम्भ्रमं कतिचित्पदानि गत्वा] अज्जउत्त! परित्ताआहि परित्ताआहि मम तं पुत्तअं। [स्मृतिमभिनीय सवैक्लव्यम्]। हद्धी हद्धी ताइं ज्जेव चिरपरिचिदाइं अक्खराइं पञ्चवटीदंसणेण मं मन्दभाइणी अणुरुन्धन्ति, (य) हा अज्जउत्त!—"

[इति मूर्च्छति]।

* आर्य्यपुत्र! परित्रायस्व परित्रायस्व मम तं पुत्रकम्। हा धिक् हा धिक् तान्येव चिरपरिचितानि अक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुरुन्धन्ति, हा आर्य्यपुत्र!—"

सार्द्धं सह पयसि जले विहरन् क्रीडन्, जलकेलिं कुर्वन्नित्यर्थः, अन्येन अपरेण केनचित् उद्दामेन उच्छृङ्खलेन, मत्तेनेत्यर्थः, ("उद्दामो बन्धरहिते स्वतन्त्रे च प्रचण्डके" इति मेदिनी) द्विरदपतिना गजपतिना, अतिमहतेति भावः, वेगात् जवेन, [दर्पादिति पाठे—बलगर्वात् इत्यर्थः,] सन्निपत्य कुतोऽपि समागत्य, अभियुक्तः आक्रान्तः। अपत्यस्नेहाकृष्टा जानकी स्वकरावचितैः पल्लवैर्यमपत्यनिर्विशेषं पुपोष, स एवायं करिशावकः सम्प्रत्यपरेण केनचिदाक्रान्तोऽशरणो विपद्यते, इति तं परित्रायस्वेति सानुदिताकृतम्। मन्दाक्रान्ता वृत्तम् ॥ ६ ॥

(य) ससम्भ्रममिति।—सचकितं,ससाध्वसम् इत्यर्थः, सहसा पुत्रकाभिभव-श्रवणादिति भावः। ("सम्भ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि" इति मेदिनी)। कतिचित्—कियन्ति, पदानि—पादन्यासानित्यर्थः, किञ्चिदग्रसरीभूय इति यावत्। पुत्रकं—पुत्रनिर्विशेषेण पालितं, पुत्रप्रतिकृतिमित्यर्थः, [अत्र "इवे प्रतिकृतौ" (५।३।९६ पा०) इति सूत्रेण कन्प्रत्ययः]। स्मृतिमभिनीय—पूर्ववृत्तान्तस्मरणं [illegible] अभिनयेन दर्शयित्वा। सवैक्लव्यं—व्याकुलतासहितम्, आहेति शेषः। चिरपरिचितानि—चिराभ्यस्तानि, पुत्र पुनः पुनः कथनादिति भावः। अक्षराणि—[illegible] पदानि, "आर्य्यपुत्र" इत्येवरूपा वर्णा इत्यर्थः, मन्दभागिनी—[illegible] मन्दभागिनी ताम्, [illegible] [अत्र [illegible] "[illegible]" इत्यनुशासनेन [illegible] [illegible]-

तमसा। [प्रविश्य] वत्से! समाश्वसिहि समाश्वसिहि।

[नेपथ्ये।] विमानराज! अत्रैव स्थीयताम्। (र)

सीता। [ससाध्वस ससाध्वसोत्कम्पोल्लासम्।] अम्महे! जलभरिद-मेहत्थणिदगम्भीरमसलो कुदो णु एसो भारदीणिग्घोसो भरन्तकस्सविवरं म पि मन्दभाइणी झत्ति उस्सावेदि? * (ल)

* अहो! जलभृतमेघस्तनितगम्भीरमांसल कुतो नु एष भारतीनिर्घोष भ्रियमाणकर्णविवरा मामपि मन्दभागिनीं झटिति उत्श्वासयति?

मेवापातत प्रतिभाति, तथापि—"भूमनिन्दाप्रशंसासु" इत्यादिना मत्वर्थीयप्रत्ययानाम् अन्वयव्यतिरिक्तप्राशस्त्यादिरूपाधिकार्थबोधकतया केवल बहुव्रीह्यादिना तदबोधकतया च अतिरिक्तस्य प्राशस्त्यार्थस्य विवक्षितत्वेन कर्मधारयादिनिप्रत्यय कृत, तेन च अत्यन्तमन्दभाग्यवत्त्वरूपार्थो लभ्यत इत्येव समाधेयम्, यद्वा—मन्द भजत इति णिनुप्रत्ययात् स्त्रियां सिद्धम्]। अनुरुन्धन्ति—अनुसरन्ति, अभ्यासवशात् अधुनाऽपि मन्मुखात् उच्चरन्ति इति यावत्।

(र) विमानराज इति।—विमानेषु व्योमयानेषु रथेषु इत्यर्थ, राजा श्रेष्ठ इति विमानराज तत्सम्बुद्धौ, (पुष्पकविमानस्य सम्बोधनम्। रामचन्द्रस्योक्तिरियम्)। स्थीयतां—निष्पत्यतां, त्वयेति शेष। (पुष्पकादे स्वर्गीयविमानत्वेन तस्मिंश्चेतनवद्व्यवहार)।

(ल) ससाध्वसेत्यादि।—साध्वसेन भयेन, उत्कम्पेन सात्त्विकभावरूपेण वेपथुना, उल्लासेन आनन्देन च सहित यथा स्यात् तथा, आहेति शेष। (अत्र सहसा भर्तृकण्ठस्वराकर्णनेन स्त्रीस्वभावसुलभ साध्वस, सुचिरकालानन्तर लिभती ऽप्यसम्भावित भर्तृकण्ठस्वरमाकर्ण्य पुन प्रियस्मरणत सात्त्विकभावोदयादुत्कम्प, तथा यद्ययं तत्त्वत एव आर्यपुत्रकण्ठस्वर स्यात्, तदा भाग्यादद्य पुनरपि प्रियसमागमसम्भावनेति पतिव्रताया सीताया पतिदर्शनलालसया उल्लास इति बोध्यम्)। जलभृतस्य जलपूर्णस्य मेघस्य स्तनितमिव गर्जितमिव, ["स्तनित गर्जित मेघनिर्घोषे रसितादि च" इत्यमरोक्ते "मेघस्तनित" शब्दस्य प्रयोगे मेघशब्दस्य वैयर्थ्य न दोषाय इत्यादि विवेचितमस्माभि "करिकलभ"शब्दे पूर्वत्र १६६ पृष्ठे १८ पङ्क्तौ] गम्भीरो धीरो मांसलो वीर्यवान् एष श्रूयमाण, भारतीनिर्घोष वाक्यध्वनिरित्यर्थ, सजलजलदनादसदृशगम्भीरपुष्ट वाक्शब्द इति यावत्। नु इति

तमसा। [सस्मितास्रम्।] अयि वत्से! (व)—

किमव्यक्तोऽसि निनदे कुतस्त्येऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता ? ॥ ७ ॥

वितर्के पृच्छायां वा, ("—नु वितर्कोपमानयोः। विकल्पानुनयातीते प्रश्ने हेत्वपदेश्ययोः" इति मेदिनी)। कुत,—कस्मात् जनात् उत्पन्न इत्यथ। म्रियमाणेत्यादि।—म्रियमाण पूर्यमाण कर्णयोर्विवर रन्ध्र यस्या, ता तथोक्तां चिराकाङ्क्षितरवश्रवणपरितृप्तकर्णकुहरामिति यावत्। नामपीति।—का कथा अन्यासाम् ? इत्यथ। भर्त्ता लोकापवादात् चिराय निर्वासिततया निरतिशयदुर्भाग्यवत्तया च कथमपि पुन प्रियतमसमागमासम्भवात् नियत म्रियमाणाया मम पुनरार्य्यपुत्रचरणदर्शनाशा दूरापास्तैवेति अपिकाराशय। झटिति—शीघ्रम्, उच्छ्वासयति—जीवयति, रामदर्शने आशा जनयतीति भाव।

(व) सस्मितेति।—अहो सुचिरपरिचितेऽप्यस्मिन् पतिकण्ठस्वरेऽस्या सन्देह इति चिन्तया स्मितम्। विरागहेतावपि पतिव्रतेयं पुन पतिदर्शनाकाङ्क्षया क्षुभ्यति, परन्तु एतयो परस्परसाक्षात्कारो न स्यादिति चिन्तया अस्र, ताभ्या सहित यथा स्यात् तथा, आहेति शेष।

विदितसकलवृत्तान्ता अपि तमसा सखीसकाशं भावगुप्त्यर्थं सम्भ्रमत्यनभिज्ञेवाह, किमिति।—स्तनयित्नोर्मेघस्य, [स्तनयति य स स्तनयित्नुरिति अदन्तचुरादिगणीयात् स्तनधातो इत्नुच्प्रत्ययेन सिद्धम्] ("अथ मेघो वारिवाह स्तनयित्नुर्बलाहक" इत्यमर) निनद शब्द (अत्रापि "निनदे" इति पूर्व्वार्द्धादनुषञ्जनीयम्) मयूरी इव [मह्या पृथिव्या रौति या सा मयूरी (मही + रु + क) पृषोदरादित्वात् साधु] शिखिनीव, कुतस्त्ये [कुतो भव इति कुतस्त्य "अव्ययात् त्यप्" (४।२।१०४ पा०) इत्यनेन त्यप्प्रत्यय] कस्मादपरिज्ञातस्थानादागतेऽपि, शब्दोत्पत्तिस्थानविशेषविज्ञाने हि शब्दानुसारेण पुरुषविशेषविज्ञानमपि सम्भवति, अत्र तु "कुतोऽयमागत शब्द" इति स्थाननिर्णयासम्भवादेव पुरुषविशेषनिर्णयासम्भवोऽपीति भाव। अव्यक्ते अपरिस्फुटे, व्यक्ततरतया अप्रतीयमाने इत्यर्थ, निनदे विनानराज। अतैव स्रोतसाम्" ... इति कथम् इत्थ एतादृशी, चकिता चञ्चला उत्कण्ठिता ... वर्त्तसे इत्यर्थ। ["चकितोत्कण्ठितम्" इत्यपि ... अत्र सहसा ... चकिता, तथा सुचिरकालानन्तर पुन,

सीता। भअवदि। किं भणासि अपरिप्फुडं त्ति? मए उण सरसंजोएण पच्चभिआणिदं, अज्जउत्तो ज्जेव व्वाहरदि त्ति। * (ग)

तम। श्रूयते, तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा जनस्थानमागत इति। (घ)

---

* भगवति! किं भणसि अपरिस्फुटेति? मया पुनः स्वरसंयोगेन प्रत्यभिज्ञातम्, आर्य्यपुत्र एव व्याहरतीति।

पतिसमागमपददर्शनसम्भावनात् उत्कण्ठितता चेति बोध्यम्। उत्कण्ठालक्षणं यथा—"रागे त्वलब्धविषये वेदना महती तु या। संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः॥" इति। अत्र उपमानामालङ्कारः, सा च इवशब्दवाच्यतया, श्रौती। तथाऽत्र "आस" इति क्रियापदस्य उपमानभूतया मञ्जूष्या अन्वये "अस्ति" विपरिणामस्यावश्यकतया "लतेव राजसे तन्वि" इति साहित्यदर्पणधृतोदाहरणवत् उपमागतभग्नप्रक्रमतारूपालङ्कारदोषो बोध्यः, स च "निनदे कथमव्यक्ते" इति "किमव्यक्ते नु निनदे" इति वा पाठान्तरं कल्पयित्वा समाधातुं शक्यते इति चिन्त्यम्]। पथ्यावक्त्रं वृत्तम्॥ ७॥

(ग) भगवतीति।—तमसे इत्यर्थः। अपरिस्फुटेति।—अविस्पष्टेत्यर्थः। (पूर्वं 'किमव्यक्तोऽसि" इति श्लोके तमसया अव्यक्तेति शब्दो व्यवहृतः, अत्र सीतावाक्ये तमसावाक्यप्रतीकत्वेन "अपरिस्फुटेति" इत्यमुल्लेखः तद्वाक्यार्थमात्रग्रहणेन, न तु स्वरूपतः इति बोध्यम्)। स्वरसंयोगेन—श्रुतौ कण्ठस्वरसम्बन्धेनेत्यर्थः। प्रत्यभिज्ञातः—स एवायमिति ज्ञातः, (अनुभूतस्य उद्बोधकसहभावेन पुनः स्मरणं प्रत्यभिज्ञा, इति तार्किकाः)। व्याहरति—कथयति।

(घ) श्रूयते इति।—लोकपरम्परया इति शेषः। अस्य च—"आगत इति" इति वक्ष्यमाणेतिशब्देन अन्वयः। तपस्यतः,—तपश्चरतः, [तपश्चरतीत्यर्थे "कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोः" (३।१।१५ पा०) इत्यनेन क्यङ्, तथा 'तपसः परस्मैपदञ्च (वा०) इत्यनेन च परस्मैपदमिति शतृप्रत्ययः] शूद्रस्य—शम्बूकस्य। दण्डधारणाय—दण्डविधानाय इत्यर्थः, [दण्डधारणाय इदम् इति दण्डधारणार्थम् "अर्थेन सह नित्यसमासो विशेष्यलिङ्गता च" (वा०) इति

सीता। दिट्ठिआ अपरिहीणराअधम्मो क्खु सो राआ। * (स)

[नेपथ्ये]—यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम् ।
एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

---

* दिष्ट्या अपरिहीणराजधर्मः खलु स राजा।

नित्यसमासः] ऐक्ष्वाकः —इक्ष्वाकुकुलोत्पन्नः [ऐक्ष्वाक इति, इक्ष्वाकोर्गोत्रापत्यं पुमान् इति व्युत्पत्त्या "दाण्डिनायन—" (६।४।१७४ पा०) इत्यनेन निपात्यते]।

(स) दिष्ट्या—भाग्येन, [दिष्ट्या इति तृतीयान्तप्रतिरूपकमव्ययम्] अपरिहीणः अपरित्यक्तः राजधर्मो येन स तथोक्तः यथाशास्त्रमनुष्ठितराजकार्य्यः, दैववशात् विरहविधुरोऽपि राजधर्मात् न विचलित इत्यर्थः ।

सम्प्रत्यगस्त्याश्रमादयोध्यां प्रतिनिवर्त्तमानो रामचन्द्रः पथि पञ्चवटीमनुप्रविश्य सुचिरसहवाससुहृद्द्रुममृगाद्युपलक्षितपदार्थावलोकनात् तानेवेदानीं पूर्व्वसुहृत्त्वेन प्रत्यभिजानन् नेपथ्यतः प्राह, यत्रेति।—यत्र येषु तटेषु द्रुमाः वृक्षाः अपि, तथा मृगाः अपि पशवोऽपि, ("मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः" इति मेदिनी) मे मम बन्धवः बहुकालमेकत्रावस्थानात् बान्धवा इव प्रणयिनः, तथा यानि तटानि, ["अधिशीङ्स्थासां कर्म", "उपान्वध्याङ्वसः" (१।४।४८ पा०) इति सूत्रेण अधिपूर्व्ववसतेराधिकरणस्य कर्मत्वेन द्वितीया।] प्रियया जनकनन्दिन्या सह चरति यः स तथोक्तः, प्रियया सीतया सहितः सन्, चिरं बहुकालम् अध्यवात्सम् अध्युषितवान्, पूर्व्वमरण्यवासकाले चिरतमया सहैकत्रावस्थानादमितानन्दसम्पादकतया अस्माकमतिप्रियाण्येतानि तटानीति भावः। बहवो निर्झराः जलप्रवाहाः येषु ते तथोक्ताः, कन्दरा गर्त्ता येषु तानि तथोक्तानि ("उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः" इति "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा" इति चामरः)। एतानि परिदृश्यमानानि, तानि पूर्व्वपरिचितानीत्यर्थः, गोदावर्य्याः नद्याः परिसरस्य प्रान्तवर्त्तिनः इत्यर्थः, गिरेः पर्व्वतस्य प्रस्रवणस्येति यावत्, तटानि प्रदेशाः वर्त्तन्ते इति शेषः। अस्मात् पद्यात् प्रियासहचरस्य [illegible] सुहृद्भावमुपगता, [illegible]

सीता। [दृष्ट्वा।] हा कधं पहादचन्दमण्डलावण्डुरपरिक्खामदुब्बलेण आआरेण अत्त सोम्मगम्भीराणुभावमेत्तपच्चभिआणिदो अज्जउत्तो ज्जेव, ता म धारेहि। * (ह)

[इति तमसामाश्लिष्य मूर्च्छति]।

तमसा। [धारयन्ती।] वत्से। समाश्वसिहि समाश्वसिहि।

[नेपथ्ये]। अनेन पञ्चवटीदर्शनेन।—

---

* हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्बलेनाकारेण अथ सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञात आर्य्यपुत्त्र एव, तन्मां धारय।

दण्डापूपिकया लाभादर्थापत्तिर्नामालङ्कारः। तल्लक्षणं यथा दर्पणे,—"दण्डापूपिकयाऽन्यथागमोऽर्थापत्तिरिष्यते" इति]। वसन्ततिलकं वृत्तम्॥ ८॥

(ह) हा कथमिति।—हा इति विषादे ("हा विषादशुगर्त्तिषु" इत्यमरः) कथमिति सम्भावनायाम्। प्रभातेत्यादि।—प्रभाते प्रत्यूषे यत् चन्द्रमण्डलं सुधाकरविम्बं तदिव आ समन्तात् पाण्डुरं विरहसन्तापातिरेकाद् धूसरवर्णं, अतिम्लान इति यावत्, परिक्षामोऽतिकृशस्तया दुर्बलः शक्तिहीनत्वेन प्रतीयमानश्च यः आकारः आकृतिस्तेन उपलक्षित इत्यर्थः, [अत्र "इत्थम्भूतलक्षणे" (२।३।२१ पा०) इति उपलक्षणे तृतीया]। सौम्येत्यादि।—सौम्येन प्रशान्तेन गम्भीरेण धीरेण च अनुभावमात्रेण केवलेन प्रभावेण, केवलाकृतिगतसहजतेजोमहिम्नेति यावत्, प्रत्यभिज्ञातः पूर्ब्बसंस्कारवशादुद्बोधकसहभावेन "स एवायमार्य्यपुत्र" इति कथमपि ज्ञात इत्यर्थः। चिरविरहसन्तापेनातिक्षीणमलिनाकृतेरार्य्यपुत्रस्य पूर्ब्बाकारविपर्य्ययात् "स एवायं न वा?" इति संशयमस्माकमुत्पादयन्नपि स्वकीयप्रसन्नगम्भीरस्वभावप्रभावेण स्वयमेव "स एवायम्" इति निश्चाययतीति भावः। तत्—तस्मात्, आर्य्यपुत्रस्यैतादृशदुरवस्थावलोकनेनाचिरमेव मम मोहसम्भवादित्यर्थः। धारय—अवलम्बस्व, इतरथा मूर्च्छया भूमौ पतने मम गुरुतराघातसम्भवः, तस्मिन् सति चीत्काराद्आत्मप्रकाशसम्भावना, यदृच्छया समागतस्य आर्य्यपुत्रस्य चरणकमलसन्दर्शनजनितसुखलाभसङ्कल्पितापूर्ब्बधर्मप्रतिनिरुद्धैवेति भावः।

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः ।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम् ॥ ९ ॥

हा प्रिये जानकि ! (क)

तमसा । [स्वगतम् ।] इदं तदाशङ्कितं गुरुजनेनापि । (ख)

सीता । [समाश्वस्य ।] हा कथं एदं ॥ *

---

* हा ! कथमिदम् ॥

अथ गच्छन् पथि पञ्चवटीशोभासमृद्धिमवलोकयन्नेवविधैर्विविधैरुद्दीपकैः स्मृतातीतवृत्तान्तजातो जानकीनाथो मुहुर्मुह्यमानः साधिक्षेपमाह, अन्तरिति ।— अन्तः अन्तःकरणे, लीनस्य गूढं स्थितस्य, उद्दामं शोकोद्दीपकदण्डकादिदर्शनेन अत्यन्तमधिकं सर्वमाच्छाद्य धग्धगिति, घोररावमिति यावत्, ज्वलिष्यतः देदीपिष्यतः, दुःखाग्नेः शोकानलस्य, धूमस्योत्पीडः इव घनीभूतः धूमराशिरिव, मोहः मूर्च्छा, अद्य अधुना, मां मम चैतन्यमित्यर्थः, प्राक् दुःखाग्नेः प्रज्वलनस्य पूर्वमित्यर्थः, आवृणोति आच्छादयति, अतिशयेन शोकाभिभूतोऽस्मीति भावः, यथा कश्चित् सूक्ष्मभावेणावतिष्ठमानोऽनलः कदाचित् वायुरागसम्पर्कादत्यन्तघनीभूतेन धूमपटलेन सूचयत्येतदव्यवहिताग्रचरणभाविभीषणप्रज्वलनं स्वस्य, तथा ममापि प्रियावियोगजः शोकावेगः कार्यान्तरव्यापृततया प्रागन्तर्निगूढोऽपि सम्प्रत्युद्दीपकेनवीभूतः नाऽदृश्यः मम भविष्यदत्याहितमवावेदयतीति समुदिताशयः । [अत्र पूर्वार्द्धे "दुःखाग्नेः" इत्यत्र "दुःखमग्निरिव" इत्युपमितसमासात् लुप्तोपमा, परार्द्धे चासौ श्रौतात्युभयोः परस्परमङ्गाङ्गिभावेन सङ्करः । केचित्तु "दुःखाग्नेः" इत्यत्र भविष्यज्ज्वलनसम्बन्धात् निरङ्गरूपकमाहुस्तदसमीचीनतया न श्रव्यं यावत्, पराद्धगोपमयैकवाच्यताया एव युक्तत्वादित्यवधेयम्]। अनुष्टुप् वृत्तम् ॥ ९ ॥

(क) हा प्रिये जानकि ।—कुत इदानीं त्वं ॥ इति भावः ।

(ख) इदमिति ।—तदिदं—रामस्य शोकाभिभूतिमोहपतनादिकं, सम्प्रत्युपस्थितमिति यावत् । गुरुजनेन—नागारणोपापामुद्राप्रभृतिनेत्यर्थः । आशङ्कितं—सम्भावितं, यदि गुरुजनेनावश्यम्भावितया सम्भावितं कथ्यतस्तदिदानीं दृश्यत इति भावः ।

[पुनर्नेपथ्ये।] हा देवि। दण्डकारण्यवासप्रियसखि। हा विदेहराजपुत्रि। (ग)

[इति मूर्च्छति]।

सीता। हद्धी। हद्धी॥ म मन्दभाइणी व्याहरिअ आमीलन्तणेत्तणीलुप्पलो मुच्छिदो ज्जेव अज्जउत्तो। हा हा। कधं धरणीपिट्ठे णिरुस्साहणीसह विपल्हत्थो? भअवदि तमसे। परित्ताआहि परित्ताआहि, जीआवेहि अज्जउत्त। * (घ)

[इति पादयो पतति]।

---

* हा धिक्। हा धिक्॥ मा मन्दभागिनीं व्याहृत्य आमीलन्नेत्रनीलोत्पलो मूर्च्छित एव आर्य्यपुत्त्र, हा हा। कथ धरणीपृष्ठे निरुत्साहनिःसह विपर्यस्त? भगवति तमसे। परित्रायस्व परित्रायस्व, जीवय आर्य्यपुत्त्रम्।

(ग) दण्डकेत्यादि।—दण्डकारण्ये जनस्थाने वास, तत्र प्रियसखी इति दण्डकारण्यवासप्रियसखी, पूर्वं जनस्थानावस्थानकाले सहायरूपेण विशेषतो नानाप्रकारोपकारकरणादिति भाव।

(घ) मामिति।—मां सीतामित्यर्थ। मन्दभागिनीं—हतभाग्याम्। व्याहृत्य—उद्देशेन उच्चार्य, भाग्यहीना मामेव नामत उल्लिख्य इति यावत्। ["व्याहृत्य" इत्यत्र "उद्दिश्य" इति पाठे—उद्देशेन मन्नाम उच्चार्य" इत्यर्थो बोध्य]। आमीलदिति।—आमीलती ईषन्मुद्रिते नेत्रे नयने नीलोत्पले नीलेन्दीवरे इव यस्य स तथोक्त, ईषन्मुद्रितनयनकमल इत्यर्थ। [अत्र लुप्तोपमानामालङ्कार]। निरुत्साहात् निरतिशयशोकावेगेन उत्साहभङ्गात् नैराश्यवशात् निःसहम् अक्षममवशमित्यर्थ, यथा स्यात् तथा, [निरुत्साहनिःसहम्" इत्यत्र "निद्रानिःसहम्" इति पाठे—"निद्रा व्याहत निश्चेष्टा यस्मिन् कर्मणि, तद् यथा स्यात् तथा, निःसहम् अक्षम विवशमिति यावत्, यथा स्यात् तथा निपतित" इत्यर्थो बोध्य]। धरणीपृष्ठे—धरण्या पृथिव्या पृष्ठमुपरिभाग तस्मिन्, भूतले इत्यर्थ, विपर्यस्त,—निपतित। "हा धिक् हा धिक्" इत्यत्र "परित्रायस्व परित्रायस्व" इत्यत्र च आभीक्ष्ण्ये द्विरुक्तिर्न दोषपदवीमारोहति,—"विषादे विस्मये हर्षे खेदे दैन्यावधारणे। प्रसादने सम्भ्रमे च द्विस्त्रिरुक्तिर्न दुष्यति॥" इति वचनात्।

तमसा।—त्वमेव ननु कल्याणि! सञ्जीवय जगत्पतिम्।
प्रियस्पर्शो हि पाणिस्ते तत्रैव नियता भव॥ १०॥

सीता। जं भोदु तं भोदु, जधा भअवदी भणादि। * (ङ)

[इति ससम्भ्रमं निष्क्रान्ता]।

* यद्भवतु तद्भवतु, यथा भगवती भणति।

जनकनन्दिन्या नामग्राहं विलपन्तं जानकीजीवनमकस्मान्मुह्यमानमवलोक्य सम्भविष्यद्विपद्भीतिकातरया सपादग्रहमावेदिता पतिव्रतासमाचारपरिरक्षणकामा तमसा तामेव जगज्जीवनजीवनसाधनत्वेन निरूपयन्ती वक्ति, त्वमिति।—ननु भोः कल्याणि शुभे! [अत्र ननु इति आमन्त्रणार्थकमव्ययम् ("प्रश्नावधारणानुज्ञाऽनुनयामन्त्रणे ननु" इत्यमरः) एवंविधे चिरनिर्वासनेऽपि भाग्यादद्य ते प्रियतमस्पर्शलाभ इति सूचनाय "कल्याणि" इति सम्बोधनम्]। त्वमेव जगत्पतिं लोकनाथं, राममिति शेषः, सञ्जीवय करस्पर्शादिना सचेतनं कुरु, [अत्र एवशब्दस्य अन्ययोगव्यवच्छेदार्थकतया "एष रामस्य प्रतीकारस्त्वयैव साध्यो नान्यया" इत्यर्थो लभ्यते]। कथं मयैव साध्यो न च त्वया? इत्याशङ्क्याह,—प्रियस्पर्श इति।—हि यतः, ते तव पाणिः करः, प्रियः स्पर्शो यस्य स तथोक्तः, रामाभिज्ञातत्वात् त्वत्पाणिस्पर्श एव त्वद्वियोगाकुलस्य तस्य अव्यभिचारितया चैतन्यसम्पादक इति भावः। तस्मादित्यूह्यं, त्वत्पाणिस्पर्शव्यतिरेकेणास्य चैतन्यसम्पादकहेतोरभावादिति तदर्थः; तत्रैव स्वपाणिना प्रियतमाङ्गस्पर्श एव नियता व्यापृता भव। [अत्र चानेकविधाः पाठभेदाः दृश्यन्ते, तत्र च द्वाविमावादरणीयौ, तद्यथा—"तत्रैव नियतो भव" इति पाठे—तत्र तस्मिन्नेव तव पाणिस्पर्शे, भवः सञ्जीवनं रामस्येति शेषः, नियतः स्थिरः, तव पाणिस्पर्श एव अस्य सञ्जीवनोपाय रामस्येति भावः। तथा "तत्रैव निरतो जनः" इति पाठे—तत्र तस्मिन्नेव तव पाणिस्पर्श एव जनः रामः इत्यर्थः, निरतः नितरां [illegible] सततानुध्यानशील इत्यर्थः, यस्यैव एतादृशं [illegible], सम्प्रति कर[illegible] तदनु[illegible] [illegible] पुनरुज्जीविष्यतीति भावः,—इत्यर्थो बोध्यः। अत्र पराद्धस्य[illegible] [illegible] प्रति हेतुतया उपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गं [illegible]। तल्लक्षणं यथा दर्पणे,—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" इति]। अनुष्टुब् वृत्तम्॥ १०॥

(ङ) [illegible]।—[illegible]। [illegible]पुत्रेणानन्दनतयेदानीमस्य [illegible] तदा [illegible] पुनः [illegible] मयि दृष्टस्पृष्टो वा भवतु,

[ततः प्रविशति भूमौ निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामभद्रः]। (च)

सीता। [किञ्चित् सहर्षम् आत्मगतम् (छ)।] जाणे पुणो वि पच्चागदं विअ जीविदं तेल्लोअणाहस्स। * (ज)

* जाने पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य।

नायमवसरस्तद्विचारणायाः, परन्त्वविचार्य्यैव मम भविष्यदिष्टमनिष्टं वा भवति चिरमेवानुष्ठेयो मया आर्य्यपुत्रस्य पुनर्जीवनोपाय इति भगवत्योपदिष्टमेवानुतिष्ठामीति भावः।

(च) तत इति।—भूमौ निपतितः,—मूर्च्छितः सन् भूतले पतितः। सास्रया—अश्रुमुख्या, प्रेयांसं सहसा मूर्च्छितमवलोक्य गलदश्रुलोचनया इति यावत्। स्पृश्यमानः,—परामृश्यमानः। साह्लादोच्छ्वासः,—आह्लादेन सहसा प्रियतमाङ्गसङ्गजेन आनन्देन, उच्छ्वासेन पुनः सञ्ज्ञालाभात् निश्वाससञ्चारेण च सहितः इत्यर्थः।

(छ) किञ्चिदिति।—न पूर्णतयेति यावत्। सहर्षं—सानन्दम्। इदानीं श्वाससञ्चारेऽपि पुनर्वाक्यस्फूर्त्तिमन्तरा नास्य पुनर्जीवने सम्पूर्णो विश्वास इति नाह्लादस्य पूर्णता, अपि तु पूर्व्वावस्थातो वर्त्तमानावस्थायां किञ्चिदुत्कर्षदर्शनात् किञ्चिदानन्दो जात इति आशयः। आत्मगतं—स्वगतमित्यर्थः, आह इति शेषः, पाठकपरिज्ञानायमेव हि तस्य नाटके लेखनं, वस्तुतस्तु मनोगतो भावः। स च भावः अभिनयकाले मन्दमुच्चारणीयः। तथाहि—"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्" इति दर्पणः।

(ज) जाने इति।—मन्ये इत्यर्थः। [ज्ञाधातोः परस्मैपदित्वेऽपि अत्र अकर्म्मकत्वविवक्षात् "अकर्म्मकाच्च" (१।३।४५ पा०) इत्यनेनात्मनेपदम्। अत्र केचित् "पुनरपि" इत्यादिवाक्यार्थं ज्ञाधातोः कर्म्मत्वेन मन्यमानाः "जानामि" इत्येवमेव पाठमाहुः] प्रत्यागतमिव—परावृत्य आगतमिवेत्यर्थः। [अत्रोत्प्रेक्षया तावदेवमवगम्यते यत्, यद्यपि गतजीवितस्य पुनर्जीवनमसम्भवीति मयाऽवगम्यते, तथापि आर्य्यपुत्रस्य तादृगचेतनावस्थादर्शनेन कृततज्जीवनाशङ्कया मया सम्प्रति पुनः श्वाससञ्चारदर्शनेन पुनः प्राप्तजीवितः इवायम् मन्यते इति] त्रिलोकनाथस्य—त्रिभुवनस्वामिनो रामचन्द्रस्य। [त्रयाणां लोकानां नाथः तस्य, "तद्धितार्थोत्तरपदसमाहारे" (२।१।५१ पा०) इति उत्तरपदसमासः। "त्रयाणां लोकानां समाहारः

राजा । हन्त भो. । किमेतत् ? (भ)—

प्रश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः ।
आतप्तजीवनमनःपरितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः ॥ ११ ॥

इति त्रिलोकं तस्य नाथ” इति तु न समीचीनम्, समाहारद्विगौ “द्विगोः” (४।१।२१ पा०) इति सूत्रेण ङीप्प्रत्ययावश्यम्भावात् । क्वचित्तु पुस्तके “त्रैलोक्य-नाथस्य” इत्यपि पाठो दृश्यते, एवन्तु न कापि दोषशङ्का इति बोध्यम्]।

(भ) हन्तेति ।—हन्त इति हर्षसूचकमव्ययम् । (“हन्त वाक्यारम्भखेदविषाद-हर्षसम्भ्रमे” इति मेदिनी)। सुचिरपरिचितपादपपर्व्वतादिदर्शनोद्बोधितपूर्व्वस्मृति-रथ नाशादिलुप्तचेतनोऽपि सहसा चिराभ्यस्तहस्तावमर्शात् प्राप्तसंज्ञः सीतापतिः किमप्यनवलोकयन्नेव संज्ञासाधनं, वक्ष्यमाणरूपेण सन्दिह्यमान आह, किमेतदिति । —अस्य च श्लोकस्थेन “प्रश्च्योतनम्” इत्यनेन अन्वयः ।

संशयप्रकारमाह, प्रश्च्योतनमिति ।—नु इति सर्व्वत्रैव वितर्के । (“नु वितर्कोप-मानयोः । विकल्पानुनयातीतप्रश्ने हेत्वपदेशयोः” इति मेदिनी) किमेतदिति पूर्व्वेणान्वयः । किं नु एतद् हरिचन्दनपल्लवानां सुरतरुपल्लवानां, तन्नामवृक्षविशेषस्य किसलयानामिति यावत्, (“पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्प-वृक्षश्च पुंसि वा हरिचन्दनम्” इत्यमरः) [अत्र अङ्गुलिस्पर्शशीतलतायै शैत्याति-शयशीतलताया पल्लवपदग्रहणम्] प्रश्च्योतनं द्रवः, क्षरितो रस इति यावत्, अलौकिककारणव्यतिरेकेण कुतोऽयमलौकिकसुखसम्भव इति भावः । वृक्षविशेष-पल्लवरसाद् वा कथमेव सुखोत्पादनसम्भावनेत्याह, निष्पीडितेति ।—निष्पीडितः रसाय करेण आमर्दितः यः इन्दुकरकन्दलः सुधाकरकरकलापः तस्माज्जायते यः स तथोक्तः सेकः रसधारापतनं नु ? मन्ये सुधांशुकिरणानि एकत्र कृत्वा केनचिदामर्द्य रसोऽयं निःसारितः अन्यथा अत्र अमृतस्य कुतः सम्भवः ? इति भावः । आतप्तयोः सन्तापदग्धयोर्जीवनमनसोः आत्मचेतसोः परितर्पणः सम्यक् सुखदः, [अत्र “आतप्तजीवितस्य” इत्यपि पाठो दृश्यते, तस्यार्थः,—आ समन्तात् तप्तस्य जीवितरूपस्य शरीरस्य परितर्पणः इत्यनेनान्वयः] सञ्जीवयतीति सञ्जीवनः [‘परि-तर्पण, सञ्जीवन” इत्यादिकं “नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः” (३ । १ ।१३४ पा०) इत्यनेन नन्द्यादित्वात् कर्त्तरि ल्युप्रत्ययेन सिद्धम्] औषधं कल्यायितं फलपाका

[ततः प्रविशति भूमौ निपतितः सानन्दया सीतया स्पृश्यमानः
सानन्दोच्छ्वासो रामभद्रः]। (च)

सीता। [किञ्चित् सहर्षम् आत्मगतम् (छ)।] जाणे पुणो वि पच्चागदं विअ जीविदं तेल्लोअणाहस्स। १ (ज)

१ जाने पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य।

नायमवसरस्तद्विचारणाया, परन्त्वविचार्य्यैव मम भविष्यदिष्टमनिष्टं वा भवतु चिरमेवानुष्ठेयो मया आर्य्यपुत्रस्य पुनर्जीवनोपाय इति भगवत्योपदिष्टमेवानुतिष्ठामीति भावः।

(च) ततः इति।—भूमौ निपतितः,—मूर्च्छितः सन् भूतले शयितः। सास्रया—अश्रु मुञ्चन्त्या, प्रेयांस सहसा मूर्च्छितमवलोक्य मन्दमुर्ल्लोचनया इति यावत्। स्पृश्यमानः,—परामृश्यमानः। सानन्दोच्छ्वासः,—आह्लादेन सहसा प्रियतमाङ्गसङ्गजेन आनन्देन, उच्छ्वासेन पुनः सञ्ज्ञालाभात् निश्वासस्य सञ्चारेण च सहितः इत्यर्थः।

(छ) किञ्चिदिति।—न पूर्णतयेति यावत्। सहर्ष—सानन्दम्। इदानीं श्वासस्य सञ्चारेऽपि पुनर्वाक्यस्फूर्त्तिमन्तरा नास्य पुनर्जीवने सम्पूर्णो विश्वास इति नाह्लादस्य पूर्णता, अपि तु पूर्व्वावस्थातो वर्त्तमानावस्थाया किञ्चिदुत्कर्षदर्शनात् किञ्चिदानन्दो जात इति आशयः। आत्मगत—स्वगतमित्यर्थः, आह इति शेषः, पाठकपरिज्ञानार्थमेव हि तस्य नाटके लेखनं, वस्तुतस्तु मनोगतो भावः। स च भावः अभिनयकाले मन्दमुच्चारणीयः। तथाहि—"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्" इति दर्पणः।

(ज) जाने इति।—मन्ये इत्यर्थः। [ज्ञाधातोः परस्मैपदित्वेऽपि अत्र अजन्मकर्त्तृविवक्षात "अकर्म्मकाच्च" (१।३।४५ पा०) इत्यनेनात्मनेपदम्। अत्र केचित् "पुनरपि" इत्यादिवाक्यार्थं ज्ञाधातोः कर्म्मत्वेन मन्यमानाः "जानामि" इत्येवमेव पाठमाहुः।] प्रत्यागतमिव—परावृत्य आगतमिवेत्यर्थः। [अर्वाग्रेचया तावदेवमवगम्यते यत्, यद्यपि गतजीवितस्य पुनर्जीवनमसम्भवीति मयाऽवगम्यते, तथापि आर्य्यपुत्रस्य तादृगचेतनावस्थादर्शनेन कृततज्जीवनापगमशङ्कया मया सम्प्रति पुनः श्वासस्य सञ्चारदर्शनेन पुनः प्राप्तजीवित इवायम् मन्यते इति] त्रिलोकनाथस्य—त्रिभुवनस्वामिनो रामचन्द्रस्य। [त्रयाणां लोकानां नाथः तस्य, "तद्धितार्थोत्तरपदसमाहारे" (२।१।५१ पा०) इति उत्तरपदसमासः। "त्रयाणां लोकानां समाहार

राम। हन्त भोः। किमेतत्? (क)—

प्रश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः।
आतप्तजीवनमनःपरितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः॥ ११॥

इति त्रिलोक तस्य नाथ" इति तु न समीचीनम्, समाहारद्विगौ "द्विगो" (४।१। १ पा०) इति सूत्रेण ङीप्प्रत्ययावश्यम्भावात्। क्वचित्तु पुस्तके "त्रैलोक्य-नाथस्य" इत्यपि पाठो दृश्यते, एवन्तु न कापि दोषशङ्का इति बोध्यम्]।

(क) हन्तेति।—हन्त इति हर्षसूचकमव्ययम्। ("हन्त वाक्यारम्भखेदविषाद-हर्षसम्भ्रम" इति मेदिनी)। सुचिरपरिचितपादपपर्व्वतादिदर्शनोद्दीपितपूर्व्वस्मृति-रय माहाविलप्तचेतनोऽपि सहसा चिराभ्यस्तहस्तावमर्शात् ग्रन्ते प्राप्तसञ्ज्ञ सीतापति किमप्यनवलोकयन्नपि सञ्ज्ञासाधनं, वक्ष्यमाणरूपेण सम्प्रश्यमाण आह, किमेतदिति। —अस्य च श्लोकस्थेन "प्रश्च्योतनम्" इत्यनेन अन्वय।

सञ्ज्ञाप्रकारमाह, प्रश्च्योतनमिति।—नु इति सर्व्वत्रैव वितर्के। ("नु वितर्काप-मानयो। विकल्पानुनयातीत प्रश्ने हेत्वपदेशयो" इति मेदिनी) किमेतदिति पूर्व्वेणान्वय। किं नु एतद् हरिचन्दनपल्लवानां सुरतरुपल्लवानां, तन्नामकवृक्षविशेषस्य किसलयानामिति यावत्, ("पञ्चैते देवतरव मन्दार पारिजातक। सन्तान कल्प वृक्षश्च पुंसि वा हरिचन्दनम्" इत्यमर) [अत्र अङ्गुलिस्पर्शप्रश्च्योतनार्थे प्रत्याति-प्रश्च्योतनार्थञ्च पल्लवपदग्रहणम्] प्रश्च्योतनं द्रव, चरितो रस इति यावत्, अलौकिककारणव्यतिरेकेण कुतोऽयमलौकिकसुखसम्भव इति भाव। वृक्षविशेष-पल्लवरसाद् वा कथमेव सुखोत्पादनसम्भावनेत्याह, निष्पीडितेति।—निष्पीडित रसाय करेण आमर्दितं य इन्दुकरकन्दल सुधाकरकरकलाप तस्माज्जायते य स तथोक्त, सेक रसधारापतनं नु? मन्ये सुधांशुकिरणानि एकत्र कृत्वा केनचिदामर्द्य रसोऽयं निःसारित अन्यथा अत्र अमृतस्य कुत सम्भव? इति भाव। आतप्तयो सन्तापदग्धयोर्जीवनमनसो आत्मचेतसो परितर्पण सम्यक् सुखद, [अत्र "आतप्तजीविततरा" इत्यपि पाठो दृश्यते, तस्यार्थश्च,—आ समन्तात् तप्तस्य जीवितरूपस्य तरोर्वृक्षस्य परितर्पण इत्यनेनान्वय] सञ्जीवयतीति सञ्जीवन ["परि-तर्पण, सञ्जीवन" इत्यादिक "नन्दिग्रहिपचादिभ्यो ल्युणिन्यच" (३। १।१३४ पा०) इत्यनेन नन्द्यादित्वात् कर्त्तरि ल्युप्रत्ययेन सिद्धम्] औषधं कल्पायित फलपाका

स्पर्शः पुरा परिचितो नियत स एष
सञ्जीवनश्च मनसः परिमोहणश्च।
सन्तापजां सपदि यः प्रतिहृत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति ॥ १२ ॥

न्नाया लताया रस इव, ("ओषध्य फलपाकान्ता" इत्यमर) हृदि हृदये, प्रसिक्त प्रलिप्तो नु ? अन्यथा व्यथापगमात् कुत इयं दग्धजीवित सुखोत्पत्तिरिति भाव। [अत्र "स्पर्श पुरा परिचितो नियत स एष" इत्यादिपरश्लोकोक्तवचनेनाविशेषित स्पर्शविषयकज्ञानस्य अनुभवितरि सत्त्वप्रमापणात्, प्रकृते च स्पर्शे प्रश्चोतनादीनां "स समयो मतिर्या स्यादेकवाभावभावजो" इत्युक्तलक्षणकभावाभावोभयकोटिकत्वगयस्य कविप्रौढोक्तिसिद्धतया नि सन्देह सन्देहालङ्कार। तस्य च समयपर्य्यवसिततया शुद्धत्वं, तथाच दर्पण,—"सन्देह प्रकृतेऽन्यस्य समय प्रतिभोत्थित। शुद्धो निश्चय गर्भोऽसौ निश्चयान्त इति त्रिधा ॥" इति। केचित्तु अत्र प्रकृते स्पर्शे प्रश्चोतनादो नामप्रकृतानां सम्भावनां मन्यमाना उत्प्रेक्षालङ्कारमाहुस्तच्चिन्त्यम्। तथाच "निष्पीडितन्दु—" इत्यादौ प्रकृतस्पर्शरूपविषयनिगरणेन तादृशसेकादेरभेदप्रतिपत्ते-रतिशयोक्तिरित्यनयोरङ्गाङ्गिभावेन सङ्कर]। वसन्ततिलक वृत्तम् ॥ ११ ॥

पूर्व्वमुक्तरूपेण समय्य सम्प्रति प्रकृतस्य सुचिरपरिचितस्पर्शरूपत्वमेव निश्चिनोति, स्पर्श इति।—पुरा पूर्वस्मिन् काले, सीतया साहमेकवावस्थानदशायामिति यावत्, नियतम् अभीक्ष्ण यथा स्यात् तथा परिचित अभ्यस्त, मनस चेतस, [अत्र "सञ्जी-वन" इति कृदन्तक्रियाया कर्मणि "कर्त्तृकर्मणो कृति" (२।३।६५ पा०) इति सूत्रेण षष्ठी] सञ्जीवन उत्साहप्रद, विषादापनोदनेन परितोषण इति यावत्, परिमोहणश्च आनन्दसम्भारात् मोहोत्पादक, चित्तद्रुतिकारक इत्यर्थ, [परिमोहण" इत्यत्र "अवे विभाषा अकखादावषान्त उपदेशे" (८।४।१८। पा०) इत्यनेन वैकल्पिक णत्वम्। अत एव क्वचिद्दन्त्यान्तोऽपि पाठ दृश्यते] एष सम्प्रत्यनुभूयमान, स स्पर्श, य स्पर्श सन्तापजा सीतावियोगजन्यां मूर्च्छां मोह सपदि तत्क्षणात् झटितीत्यर्थ, प्रतिहृत्य निवार्य्य, पुन भूय आनन्दनेन सुखोत्पादनेन, जडता सुखजां विह्वलतामित्यर्थ, आतनोति विस्तारयति, करोतीत्यर्थ। [अत्र तच्छन्दसहकृतयच्छन्दस्य उत्तराङ्गगतत्वेन अविमृष्टविधेयांशत्वरूपो दोषो बोध्य। स च प्रथमपादस्य "स्पर्श पुरा परिचितो नियतं सुकान्त" इत्येवं पाठ परिवर्त्तनेन समाधेय, केवलयच्छन्दस्य उत्तरवाक्यगतत्वेऽपि दोषाभावात् "आत्मा

सीता। [ससाध्वसोत्कम्पमपसृत्य (ञ)।] एत्तिअं ज्जेव दाणिं मे वहुदरं।* (ट)

राम। [उपविश्य।] न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि। (ठ)

* एतावदेव इदानीं मे बहुतरम्।

जानाति यत्नाय" इतिवत् तथा च दर्पणे,—"यच्छब्दस्य उत्तरवाक्यगतत्वेन उपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम्" इति। अथवा परार्द्धे प्रथमं पठितत्वाऽसौ निर्बाधः समाधेः। अत्र परार्द्धे "मूर्च्छां प्रतिहत्य जडतां तनोति" इत्यत्र विरुद्धार्थाभिधानात् विरोधालङ्कारः, तथा च "विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वच" इति काव्यप्रकाशे। स च विरोधः जडताशब्दस्य आनन्दविह्वलतारूपार्थसम्पादनेन परिहरणीयः। तथाऽत्र निश्चयालङ्कारमपि केचिदाहुस्तन्न समीचीनं प्रतिभाति, तथाहि—"अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः" इति लक्षणे निश्चयात्सन्देहादस्य भेदकथनावसरे संशयनिश्चययोरेकाधिकरणावस्थानानवस्थानाभ्यां निश्चयान्तसन्देहनिश्चययोर्भेदस्य दर्शितत्वात्, प्रकृते च एकाधिकरणकसंशयनिर्णयदर्शनाश्च तावच्छ्रुतोऽपि निश्चयालङ्कारसम्भव इति सुधीभिर्विभाव्यम्]। वसन्ततिलकं वृत्तम्॥ १२॥

(ञ) ससाध्वसोत्कम्पमिति।—साध्वसेन अननुमतसन्निधानवशात् भयेन य उत्कम्पः शरीरचाञ्चल्यं तेन सहितं यथा स्यात् तथेत्यर्थः। [ससाध्वसकरुणमिति पाठे—सदयीकरणमेतत्]।

(ट) एतावदिति।—एतावदेव—सदायस्पर्शस्य निरतिशयानन्दहेतुत्वज्ञानपर्य्यन्तमेव। इदानीं—वियोगसमये। बहुतरं—सातिशयशान्तिजनकमिति यावत्, [illegible] निःशालतायां तत पुनराश्लेषवस्तुप्रसङ्गादिसुखसम्भावनाया [illegible] तदा स्यात् ततश्च प्रतनुखानुभूतिसाक्षात्कार एव पर्याप्तत्वेन मन्यते [illegible]।

सीता। हद्दी। हद्दी॥ किं त्ति मं अज्जउत्तो मग्गिस्सदि। * (ड)

राम। भवतु, पश्यामि। [इति समन्तादवलोकयति।] (ढ)

सीता। भअवदि तमसे। ओसरह्म, जइ दाव मं पेक्खिस्सदि, तदो अणब्भणुणादसण्णिधाणेण अहिअं पि मम महाराओ कुविस्सदि। † (ण)

---

* हा धिक्। हा धिक्। किमिति मामार्यपुत्रो मार्गिष्यति।

† भगवति तमसे। अपसराम, यदि तावन्मां प्रेक्षिष्यते, तदा अनभ्यनुज्ञातसन्निधानेन अधिकमपि मह्यं महाराजः कोपिष्यति।

समागमस्येदानीमसम्भाव्यमानतया अनुभूतस्पर्शस्यानन्यसाधारणतया च रघुपतेरियं विस्मयविकल्पिता पृच्छेति बोध्यम्। [एतदिष्टजनाभिसन्धानरूपमधिबलं नाम सन्ध्यङ्गमुक्तं, तथा च— "इष्टजनसन्धानं बुधा अधिबलं विदुः" इति]।

(ड) हा धिगिति।—हा इति आर्त्ते, ("हा विषादशुगार्त्तिषु" इत्यमरः) धिगिति आत्मभर्त्सनायां, ("धिक् भर्त्सने च निन्दायां") तथाच—यस्याहं सततसहचारिणी प्रणयिनी आसं स एवेदानीं मम मन्दभागिन्या अन्वेषणार्थं यतिष्यमाणो दृश्यत इति महद् खमापतितमिति भावः। मार्गिष्यति—अन्वेषिष्यति। रामस्य तदानीन्तनीं चेष्टामवलोक्य सीता तत्कर्त्तृकभविष्यदन्वेषणं सम्भावितवतीति बोध्यम्।

(ढ) भवत्विति।—अस्या अभ्युपपत्तेः हेतुभूता सीता अन्या वा भवत्वित्यर्थः। पश्यामि—इतस्ततोऽन्वेषणेन तत्त्वतो निरूपयामीत्यर्थः।

(ण) भगवतीति।—अपसराम,—इतोऽपसृत्य अन्यत्र याम इत्यर्थः, [अत्र सीतातमसयोर्द्वित्वेपि "अस्मदो द्वयोश्च" (१।२।५९) इति सूत्रेण बहुवचनप्रयोगः। "अपसराव" इत्यपि पाठः क्वचित् पुस्तके दृश्यते]। अनभ्यनुज्ञातेत्यादि।—न अभ्यनुज्ञातं अनुमोदितमिति अनभ्यनुज्ञातं, इदानीं मत्समीपवर्त्तिनी सती मां परिचरत्वेव नानुमतमिति यावत्, यत् सन्निधानं समीपावस्थानं, तेन हेतुना इत्यर्थः। अधिकं—अतिशयं, "लोकसमक्षं पतिसान्निध्यमेव प्रगल्भतासूचकतया पत्युरुद्वेगकरं, किमुत लोकापवादाच्चिरनिर्व्वासिताया समवज्ञाताया पुनरननुमोदिताया मम सान्निध्यमिति" अयमत्राधिकपदस्य तात्पर्य्यार्थः।

तमसा। अयि वत्से! भागीरथीवरप्रभावाद् वनदेवतानामपि अदृश्यासि संवृत्तासि। (त)

सीता। आ, अत्थि एदं। (थ)

रामः। हा प्रिये जानकि! ननु प्रिये जानकि!!

सीता। (समन्युगद्गदम्।) अज्जउत्त! असरिसं क्खु एदं वअणं इमस्स वुत्तन्तस्स। (सास्रम्।) अहवा किं त्ति वज्जमई जम्मन्तरेसु वि पुणो असम्भाविददुल्लहदंसणं मं ज्जेव मन्दभाइणी उद्दिसिअ वच्छलस्स एववादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं। अहं एदस्स हिअअं जाणामि मम वि एसो त्ति। (द)

(थ) आ, अस्त्येतत्।

(द) आर्यपुत्र! असदृशं खलु एतद्वचनमस्य वृत्तान्तस्य। अथवा किमिति वज्रमयी जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनं मामेव मन्दभागिनीमुद्दिश्य वत्सलस्य एवंवादिन आर्यपुत्रस्य उपरि निरनुक्रोशा भविष्यामि। अहमेतस्य हृदयं जानामि, ममाप्येष इति।

[illegible] "[illegible]" (१।४।३९।१०) [illegible]। महाराज —[illegible] रामचन्द्र, [illegible] [illegible] वादराभानामपि [illegible], [illegible] [illegible] [illegible] "महाराज- [illegible]

(त) [illegible]—[illegible]। भागीरथीवरप्रभावात्—[illegible]। वनदेवतानामपि—[illegible] [illegible] रामस्येति [illegible]- [illegible]

राम। [सर्वतो विलोक्य सनिर्वेदम्।] हा। न काचित् अत्र। (ध)

रेकेण वाष्पावरुद्धकण्ठतया वैस्वर्येण अस्पष्टोच्चारणेन, ताभ्यां सहितं यथा स्यात् तथा, आहेति शेषः। (—"मन्युः पुमान् क्रुधि। दैन्ये शोके च यज्ञे च" इति मेदिनी, "मदसम्मदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः" इति दर्पणः)। आर्य्यपुत्रेति।—आर्य्यपुत्र।—स्वामिन्। एतद्वचनं—"हा प्रिये जानकि।" इति सस्नेहसम्भाषणम्। अस्य हतात्मनः—अनेन परीक्षितविशुद्धभावाया अपि पौरजनापवादात् निदय-निवासनरूपपापाचारस्य। असदृशम्—अयोग्यम्, पौरजनापवादान्निर्व्वासिता प्रति कठोरमामन्त्रणमेवोचितं, न तु "प्रिये" इत्यनुरागातिरेकसूचकमिति भावः। सुचिरं रक्षोगृहवासेऽपि लिप्ततायाऽपि नाविश्वस्तोऽयमार्य्यपुत्रो मयि निरतिशयमनु-रक्तोऽपि केवलं राजधर्म्म इति प्रजानुरञ्जनाय कथमपि मां विवासितवानिति समुपयुज्यते नायमनुयोग इति पक्षान्तरमाह, अथवेति।—अथवा—पक्षान्तरे। वज्रमयी—वज्रनिर्मिता, वज्रसदृशकठिनामित्यर्थः, अन्यथा कथं निवासनानन्तर-मपि न मृताऽस्मीति भावः। जन्मान्तरेष्वपि—परजन्मस्वपि। पुनरसम्भावितेति।—पुन-रसम्भावितम् अनाशंसितं दुर्लभं दर्शनं रामदर्शनं यस्याः तां तथोक्ताम्, अस्मिंस्तु जन्मनि चिराय निर्व्वासिताया अपि भागीरथीवरप्रभावाद् अदृश्यतया भाग्यात् सान्निध्येऽपि अदर्शनं जातमिति जन्मान्तरे तत्सम्भावनं सुतरामसम्भवीति भावः। मन्दभागिनी—पतिविवासिततया सौभाग्यविरहिताम्। मामेव—सीतामेव, न त्वन्यामित्यर्थः, जानकीति नामतः आमन्त्रणादिति भावः। उद्दिश्य—लक्ष्यीकृत्य। वत्सलस्य—स्नेहवतः। एववादिनः,—"प्रिये जानकि।" इत्यादिवचनेन शोकं कुर्व्वत इत्यर्थः। निरनुक्रोशा—निर्दया, कठोरेति यावत्, न नवेवमिदानीं वक्तव्यमिति भावः। ("कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्यथो हसः" इत्यमरः) [अत्र "अनुक्रोश"-शब्देन "मद्विरागातिदूनस्यार्य्यपुत्रस्य दुःखशोकातिदुःसहामवस्थामवलोक्य मया मुक्तकण्ठं रोदितव्यं ततः कथमहमेव कठोरा भवामि" इति व्यज्यते, अनुक्रोशपर्य्याय-कथनावसरे अनुक्रोश शब्दस्य "अनुक्रोशति मुक्तकण्ठं रोदित्यनेन इति अनुक्रोशः" इत्यमरव्याख्यादर्शनात्। "अथवा किमिति वज्रमयी जन्मान्तरेष्वपि पुनरसम्भावित दुर्लभदर्शनस्य" इत्यपि पाठः क्वचित् दृश्यते, तदर्थस्तु—वज्रमयी—निरतिशय-कठिनहृदयाऽपि अहं, "निरनुक्रोशा भविष्यामि" इति परेण अन्वयः। असम्भावित दुर्लभदर्शनस्येति—"आर्य्यपुत्रस्य" इत्यस्य विशेषणं, अन्यान्तु स्पष्ट एव]।

(ध) सर्वत इति।—सर्वतः,—सर्वासु दिक्षु। सनिर्वेदं—निर्वेद

सीता। भअवदि तमसे। तहा णिक्कारणपरिच्चाइणो वि एदस्स एदिणा एव्वविधेण दसणेण कीदिसो मे हिअआणुबन्धो त्ति ण आणामि ण आणामि। * (न)

तमसा। जानामि वत्से। जानामि।—

तटस्थं नैराश्यादपि च कलुषं विप्रियवशात्
वियोगे दीर्घेऽस्मिन् झटिति घटनोत्तम्भितमिव।

---

* भगवति तमसे! तथा निष्कारणपरित्यागिनोऽप्येतस्य एतेन एवंविधेन दर्शनेन कीदृशो मे हृदयानुबन्ध इति न जानामि न जानामि।

स्वावमानना तेन सह वर्त्तमानं यथा स्यात् तथा, चाहेति शेषः,—निर्वेदं नैराश्यं तेन सहितमिति वा तदर्थः। (तत्त्वज्ञानापदीर्घ्यादेर्निर्वेदः स्वावमानना" इति दर्पणः) सीतामुद्दिश्य तथा विलप्य परितोऽन्विष्य च अनधिगततया दूयमानात्मावस्था रामस्येति बोध्यम्। न काचिदिति—यतोऽत्र कोऽपि जनो नास्ति, सुतरां कुतः सीतासत्तासम्भव इति तात्पर्य्यार्थः।

(न) भगवतीति।—तथा—अग्निपरीक्षया मदीयविशुद्धताज्ञाने सत्यपीत्यर्थः। निष्कारणपरित्यागिनोऽपि—न्याय्यं कञ्चिन्निर्वासनहेतुमन्तरेणैव मां निर्वासितवतोऽपि। एतस्य—आर्य्यपुत्रस्य। एतेन—परिदृश्यमानेन। एवंविधेन—मद्वियोगकातरताव्यञ्जकेनेत्यर्थः। हृदयानुबन्धः,—हृदयस्य मनसः अनुबन्धः अवस्थाविशेषः, मनोवृत्तिरिति यावत्। न जानामि—निश्चयेन अवगन्तुमहामीत्यर्थः, (न जानामि न जानामीति द्विर्वचनं दीनतातिरेकसूचकं, दैन्ये द्विरुक्तिस्तु न दोषाय इति बोध्यम्, ममानन्यगामितया अनलपरीक्षया च विदित्वाप्यतिविशुद्धभावं मे चरित्रस्य, केवलं प्रजानुरञ्जनार्थं चिराय मे निर्जनारण्यवासो व्यवस्थापित इति सत्यपि प्रभूततरे विरागहेतौ सम्प्रत्येवमिमं मामकशोककातरमवलोक्यातिदूनास्मि सहर्त्तेति भावः।

दुःसहविरहकातरं प्रियतममवलोक्यातिदूनाया अप्यनिर्व्वचनीयमनोभाववशया विवरीतुमक्षमाया जनकतनयायास्तदानीन्तनीमवस्थां तत्त्वतः पर्य्यालोच्य सम्प्रति तामेव विवृण्वन्त्याह, तटस्थमिति।—तव हृदयं मनः, नैराश्यात् पुनः समागमसम्भावनाविरहात्, तटस्थमुदासीनम्, [एतेन 'तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीम् अनुबध्नन्ति" इति वाक्येनाभिमता सीताऽवस्था प्रतिपादिता], अपि च किञ्च, विप्रियवशात् निष्कारणनिर्वासनरूपाप्रिय-

प्रसन्नं सौजन्यादपि तु करुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव ॥ १३ ॥

राम । देवि !—

प्रसाद इव मूर्त्तस्ते स्पर्शः स्नेहार्द्रशीतलः ।
अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि ! ॥ १४ ॥

कार्य्यवशात् कलुषं मलिनं कोपाकुलम् इति यावत् [अनेन "अमङ्गलं खल्वेतद्वचनम् अस्य वृत्तान्तस्य" इत्यनेनाभिमता सीतावस्था प्रतिपादिता] दीर्घे दीर्घकालव्यापिनि, अस्मिन् वियोगे विरहे, झटिति अकस्मात्, घटनया मिलनेन असम्भावितसन्दर्शनेन इति यावत्, उत्तम्भितमिव स्तब्धप्रायं, सातिशयविस्मयवशात् किंकर्त्तव्यविमूढमिवेति यावत्, [अत्र "उदः स्थास्तम्भोः पूर्व्वस्य" (८।४।६१ पा०) इत्यनेन स्तम्भे सकारलोपः । अत्र "झटितिघटनात् स्तम्भितमिव" इत्यपि क्वचित् पाठः । झटितिघटनात् आकस्मिकसङ्घटनात् स्तम्भितमिव विस्मयस्तिमितमिव इति तदर्थः । [एतेन "प्रभातचन्द्रमण्डलापाण्डुरेत्यादिना विवक्षितावस्था प्रतिपादिता], सौजन्यात् सुजनताज्ञापनात्, स्नेहानुरागव्यञ्जकवाक्यादिना रामस्य निर्दोषत्वावगमादित्यर्थः, प्रसन्नं प्रीतम्, [अनेन "अथवा किमिति वज्रमयीं जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनाम्" इत्यादिनाऽभिहितावस्था दर्शिता] अपि तु तथा, करुणैः शोकव्यञ्जकैः रामस्य वाक्चेष्टितादिभिः, गाढं घनीभूतं करुणः शोको यस्य यस्मिन् वा तत् तथोक्तम्, अत एव अस्मिन् क्षणे अधुना, प्रेम्णा दयितं प्रतिप्रीत्या, द्रवीभूतमिव द्रवत्वमापन्नमिव, अवशमित्यर्थः, जातमिति शेषः, निष्कारणनिर्वासनादप्रसन्नमपि ते हृदयं सम्प्रति त्वन्नामग्रहणपुरःसरमस्य सकरुणपरिदेवनमाकर्ण्य पुनः प्रसन्नं सद्विगलितमिवेति भावः । [अत्र प्रथमपादे एकस्मिन्नेव हृदयधर्म्मिणि औदासीन्य कालुष्यरूपविरुद्धपदार्थद्वयसमावेशाद्विरोधालङ्कारः स च कालविशेषमन्तर्भाव्य समाधातुं शक्यते, तथा द्वितीये चतुर्थे च पादे क्रियोत्प्रेक्षाद्वयं, तच्च भावाभिमानि, इवशब्दोत्थापिततया च वाच्यमिति सुधीभिर्विभाव्यम्]। शिखरिणी वृत्तं, तल्लक्षणं यथा—"रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति ॥ १३ ॥

पूर्व्वं नियतमनुभूततयाऽतिचिरपरिचितोऽयं जानकीकरस्पर्शो यद्यपि च वैजात्यवशेन सीतास्तित्वमिह प्रमापयति, तदपि परितोऽन्विष्य तामलभमानो रामचन्द्रो विलपति, प्रसाद इति।—स्नेहेन स्नेहरसेन आर्द्रः सिक्तः अत एव शीतलः सन्तापहारकः

सीता। एदे दे अगाधदसिदसिणेहसभारा आणन्दणिस्सन्दिणो सुदा मए अज्जउत्तस्स उल्लावा, जाण पच्चएण णिक्कारणपरिच्चाअसल्लिदो वि बहुमदो मे जम्मलाहो। ° (प)

° एते ते अगाधदर्शितस्नेहसम्भारा आनन्दनिस्यन्दिन श्रुता मया आर्य्यपुत्रस्य उल्लापा येषा प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो मे जन्मलाभ ।

इत्यत्र, न स्पर्श कृत्स मूर्त्तिमान् प्रसाद इव अनुग्रह इव, साकारा प्रसन्नता इवेत्यथ, ("मम नेष्वप्यसि अभग्नेन प्रणय" इति आदरातिशयात् प्रणयेऽपि प्रसादत्वोपचार)। अद्यापि निर्वासनादिनिर्दयव्यवहारानन्तरमपि, यद्वा—अद्यापि स्पर्शाभावक्षणेऽपि, का कथा स्पर्शक्षणे ? इति भाव, माम् आनन्दयति सुखयति। [नन्दयति या सा नन्दिनी, ग्रहादित्वात् णिनि] हे नन्दिनि! आनन्ददायिनि! त्व पुन क्व कुत्र असि भवसि? न दृश्यसे इति यावत। [अत्र प्रथमपादे प्रकृते स्पर्शेऽप्रकृतस्य मूर्त्तिमत्प्रसादस्य सम्भावनात् भावाभिमानिनी वाच्योत्प्रेक्षानामालङ्कार, तथा कारणीभूतायां सीतायामदृष्टायामपि कार्य्यस्वरूपस्य तदीयस्पर्शस्य ख्यापनात् विभावना इत्यपीति केचित। तल्लक्षण यथा—"विभावना विना हेतु कार्य्योत्पत्तिर्यदुच्यते" इति]। अनुष्टुब् वृत्तम्॥ १४॥

(प) नहि अदृश्यमानायामपि सुचिरोपभोगानुभूतसंस्कारवशात् करस्पर्शमिम मदीयमिति निश्चित्य मन्नामोल्लेखपूर्व्व बहुविलपन्तमार्य्यपुत्र परितो मामन्विष्य तीव्रालोचनशालिनया जनकतनया निष्कारणनिर्वासिताऽप्यात्मप्रसादमधिकतरमुपलभमाना दुःखाकरमपि जीवन सार्थक मन्यमाना आह, एत इति।—एते—श्रूयमाणा। ते—पूर्व्वपरिचिता। अगाधेत्यादि।—अगाधमधिक यथा स्यात तथा दर्शित स्नेहसम्भार प्रणयातिशयो येषु ते तथोक्ता प्रकटितामितप्रणयातिरेका इति यावत्। आनन्दनिस्यन्दिन —परमानन्दजनका। उल्लापा,—उच्चैर्विलापा। येषाम—उल्लापानाम्। प्रत्ययेन—श्रावणेन अनुभवेन। निष्कारणेत्यादि।—निष्कारणम् अहेतुक य परित्याग निर्वासन स एव शल्य शङ्कु तज्जातमस्य इति स तथोक्त, [अत्र रूपकमलङ्कार] अकारणनिर्वासनजनितकलङ्कपङ्किलतया निखातकीलक इव दुःसहदुःखग्रहस्त इत्यथ। [शल्यित इत्यत्र 'तदस्य सञ्जात तारकादिभ्य इतच्" (५।२।३६पा०) इति इतच्प्रत्यय]। बहुमत —श्लाघ्य, सम्प्रति मत्कृतेन विलपन्तमार्य्यपुत्रमवलोकयन्त्यकारणपरित्यागिनोऽपि तस्य निर्दोषत्वावगमात् जीवन बहुमन्ये इति भाव।

राम। अथवा कुतः पुनः प्रियतमा, नूनं सङ्कल्पाभ्यास-पाटवोपादान एष रामस्य भ्रमः। (फ)

[नेपथ्ये। प्रमादः प्रमादः। "सीतादेव्या स्वकरकलितैः" इत्यर्द्धं पठ्यते]।

राम। [सकरुणौत्सुक्यम्।] किं तस्य ?—

[पुनर्नेपथ्ये। "वध्वा सार्द्धम्" इत्युत्तरार्द्धं पठ्यते]।

सीता। को दाणीं अहिउज्जिस्सदि ? * (ब)

---

* क इदानीमभियोक्ष्यते ?

(फ) हिंस्रश्वापदसङ्कुलेऽतिभीषणे वने निर्वासिताया सीताया एतावता कालेन मरणस्यैवावश्यम्भावितया तस्याः कुतः पुनरिहसमागमसम्भव इति समुपजातविवेकी जानकीजीवनः पुनराह, अथवेति।—कुतः,—कस्मात्कारणात्। पुनः,—भूयः, सुचिरवनवासेन तस्याः मरणस्यैव अवश्यम्भावादिति भावः। प्रियतमा—प्रेमपात्री सीता, सम्भवेदिति शेषः। तत्समागमासम्भवे कथं तर्हि तत्पाणिस्पर्शोऽनुभूतः ? इत्याह—नूनमिति। सङ्कल्पेत्यादि।—सङ्कल्पानां "सीता मामाह्वयति, मयि सानुरागा प्रियं वक्ति" इत्यादिरूपमानसव्यापाराणां ("सङ्कल्पः कर्म्ममानसम्" इत्यमरः) अभ्यासेन पौनःपुन्येन यत् पाटवं नैपुण्यं तदेव उपादानम् उत्पत्तिकारणं यस्य स तथोक्तः। एषः,—अयं स्पर्शस्य सीतासम्बन्धित्वेन अनुभवः। भ्रमः,—भ्रान्तिः, यथा जाग्रदवस्थायां नियतमनुभूयमानोऽर्थः सुप्तिदशायामुतस्वप्नावस्थायामाकस्मिकमेव पुनरनुभूयमानत्वेन स्फुरति, तथा सङ्गतावस्थायां जानकीकृततत्तद्व्यवहाराणामिदानीमाभोग्येन सङ्कल्पनादतदीयेऽपि अस्मिन् स्पर्शे मम तदीयत्वभ्रमः समुत्पन्न इति भावः। [अत्र रामस्य स्वोक्तावपि "रामस्य" इति नामतः कथनात् सत्त्वशालित्वादसकलगुणगणनिलयोऽप्ययं सम्प्रति सुदुःसहविरहतापात् प्राकृत इव धमान्धो जात इति वस्तु व्यज्यते]।

(ब) क इति।—इदानीं—इदृङ्नि सहायदशायामित्यर्थः। अभियोक्ष्यते—मया पुत्रत्वेन पोषितस्य करिकलभकस्य साहाय्यार्थं कलं करिराजं अभियास्यतीत्यर्थः, इदानीमसहाया भवामीति बलवता पीड्यमानं तं परिरक्षितुमसमर्थास्मीति मे महद्दुःखमिति भावः।

राम। क्वासौ क्वासौ दुरात्मा यः प्रियायाः पुत्रकं वधू-द्वितीयमभिभवति ? [इति उत्तिष्ठति]। (म)

वासन्ती। [प्रविश्य सम्भ्रान्ता]। कथं देवो रघुनन्दनः॥ (न)

सीता। कहं पिअसही मे वासंदी॥ *

वासन्ती। जयति जयति देवः।

राम। [निरूप्य]। कथं देव्याः प्रियसखी वासन्ती॥

वासन्ती। देव। त्वर्य्यतां त्वर्य्यताम्॥—इतो जटायुगिरि-शिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य्य सम्भावयतु (य) देव्याः पुत्रकं देवः।

---

* कथं प्रियसखी मे वासन्ती॥

(म) क्वेति।—असौ—प्रियापुत्रकाभिभावकः। दुरात्मा—दुष्टस्वभावः, ("आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः)। क्व—कुत्र, वर्त्तते इति शेषः। [अत्र "क्वासौ क्वासौ" इति द्विरुक्तिः,—"विवादे विस्मये हर्षे खेदे दैन्यावधारणे। प्रसादने सम्भ्रमे च द्वित्रिरुक्तिर्न दुष्यति॥" इति नियमान्न दोषाय]। प्रियायाः,—मम प्रणयिन्याः जनकनन्दिन्याः। पुत्रकं—कृत्रिमं पुत्रम्। [अत्र "इवे प्रतिकृतौ" (५।३।९६ पा०) इति कन् प्रत्ययः। एतेन तस्मिन् स्नेहातिशय्येनावश्यरक्षणीयत्वं सूचितम्]। वधूद्वितीयं—वधूर्जाया द्वितीया सहचरी यस्य स तथोक्तः, प्रियया करेणुकया सह विहरन्तमिति यावत्। अभिभवति—आक्रम्य पराजयते, नूनमिदानीमेव अहं यथोचितप्रतिविधानेन तं शिक्षयामीति भावः। उत्तिष्ठति—एतस्य प्रतिविधानाय सत्वरम् आसनादुद्गच्छतीत्यर्थः। ["उदोऽनूर्द्ध्वकर्मणि" (१।३।२४ पा०) इत्यनेन उत्पूर्वकात्तिष्ठतेरनूर्द्ध्वचेष्टायामेव आत्मनेपदविधानात्, अत्र च ऊर्द्ध्वगमनार्थत्वान्नात्मनेपदमिति बोध्यम्]।

(न) सम्भ्रान्तेति।—सत्वरा द्विरदपतेराक्रमणात् प्रियसहचर्य्याः सीतायाः पुत्रकं रक्षयितुं कस्यचिद्रक्षकस्यान्वेषणाय अतिशयव्यग्रचित्ता इति यावत्। [अत्र [illegible]]। तथाच सा [illegible] रघुनन्दन एव दृष्ट इति महान् विस्मयहेतुः इति तात्पर्य्यम्।

(य) देवेति।—त्वर्य्यतां—त्वरया गम्यतामित्यर्थः, [अत्रापि सम्भ्रमे

सीता। हा ताद जटाओ! सुण्णं तुए विणा जणट्ठाणं॥ * (र)

राम। अहह! हृदयमर्म्मच्छिदः खलु अमी कथोद्घाताः॥ (ल)

---

* हा तात जटायो! शून्यं त्वया विना जनस्थानम्॥

द्विर्वचनम्] अन्यथा कालातिपाते विपदापातसम्भव इति भावः। सत्वरेण मया क्व गन्तव्यं किं वा कर्त्तव्यमित्याकाङ्क्षायामाह, इत इति।—अस्मात् स्थानात्। जटायुगिरिशिखरस्य—जटायुना तन्नामकेन गृध्रराजेन अध्युषितो गिरिरिति जटायुगिरिः, [शाकपार्थिवादित्वात् उत्तरपदलोपी समासः] तस्य शिखरं शृङ्गं तस्य (जटायुना अध्युषितत्वात् पर्व्वतस्यास्य "जटायुगिरि" इति संज्ञा जाता) ['एनपा द्वितीया" (२।३।३१ पा०) अत्र एनपेति योगविभागात् षष्ठी]। दक्षिणेन—दक्षिणस्यां दिशि इत्यर्थः, स्थितेन इति शेषः। सीतातीर्थेन—सीतायास्तीर्थं जलावतारप्रदेशः तेन, सीता येन घट्टेन प्रत्यहं गोदावरीमवतरति स्म तेन घट्टेन इत्यर्थः। ('तीर्थं योनौ जलावतारे च" इति विश्वः)। गोदावरी—तन्नाम्नीं नदीम्। अवतीर्य—अवरुह्य, प्रविश्येत्यर्थः। सम्भावयतु—रक्षतु, बलवत आक्रमणात् परित्राणेन अनुगृह्णातु इत्यर्थः। देव्या,—जनकनन्दिन्या। पुत्रक—कृतकतनयं, करिकलभकमिति यावत्। देवः,—भवान्। [अत्र "जटायुगिरिशिखरस्य दक्षिणेन" इत्यत्र—"जटायुगिरिशिखरस्य एकदक्षिणेन" इति 'जटायुशिखरिदक्षिणेन" इति च पाठान्तरद्वयं वर्त्तते। आद्ये,—जटायुगिरिशिखरस्य—जटायुपर्व्वतशृङ्गस्य, एकदक्षिणेन—दक्षिणैकदेशस्थितेन इत्यर्थः। अन्तिमे तु स्पष्ट एवार्थः]।

(र) वासन्तीवाक्ये जटायुगिरिशब्दश्रवणात् समुद्बोधितपूर्व्वस्मृतिः सीता विलपन्ती आह, हा तातेति।—तात—मान्य। श्वशुरसुहृत्त्वेन जटायुषः तातेति सम्बोधनम्। शून्य—शून्यवत् प्रतीयमानम्, अनाथमिति यावत्।

(ल) हृदयेत्यादि।—हृदयस्य अन्तःकरणस्य मर्म्माणि जीवनस्थानानि छिन्दन्ति ये ते तथोक्ताः, तत्तत्पूर्व्ववृत्तघटनतया निरतिशयहृदयविदारका इति यावत्। कथोद्घाताः—कथानां पूर्व्ववृत्तान्तघटितानां जटायुगिरि-गोदावरी-सीता-तीर्थप्रभृतीनां वचनानाम् उद्घाताः आरम्भाः, उच्चारणानि इति यावत्, ('स्यादभ्यादान

वासन्ती। इत इतो देवः।

सीता। भअवदि। सच्चं एव्व वणदेवदा वि मं ण पेक्खदि ? * (व)

तमसा। अयि वत्से! सर्वदेवताभ्यः प्रकृष्टमैश्वर्यं भागीरथीदेव्याः, तत् किमाशङ्कसे ? (श)

---

* भगवति! सत्यमेव वनदेवताऽपि मां न प्रेक्षते ?

सुदति चारम्भ इत्यमर)। विपन्नां सीतामुद्दिश्य जटायुषः प्राणपातः तथा सीताहरणम् एवमादयः पूर्ववृत्तान्ताः सम्प्रति त्वदीयवाक्यसमुद्बोधिताः सन्तः मदीयं मन्मं विदारयन्तीति भावः।

(व) पूर्वं रामदर्शनभीता सीता तमसया "भागीरथीवरप्रभावाद्वनदेवतानामप्यदृश्या महत्ताऽसि" इत्येवमाश्वासिता आसीत्, तथा स्वस्य मर्त्यानामदृश्यता परीक्षिता अतो, सम्प्रति तु देवशक्तिसम्पन्नानां वासन्तीप्रभृतिवनदेवतानामपि अदृश्यतायां सन्दिग्धा पृच्छति, भगवतीति।—वनदेवता—वासन्तीप्रभृतिः वनाधिष्ठात्री देवी। सत्यमेव—यथार्थं किं, नो चेत् तदाऽऽवयोरेतयोरनुसरणं न युज्यते इति भावः।

(श) अयीति।—सर्वदेवताभ्यः,—सकलाभ्यो देवीभ्यः। [अत्र "पञ्चमी विभक्ते" (२।३।४२ पा०) इति सूत्रेण निर्द्धारणे पञ्चमी]। प्रकृष्टं—प्राप्तप्रकर्षं, प्रबलमिति यावत्। ऐश्वर्यम्—अणिमाद्यष्टसिद्धिः, निखिलदेवताभ्यः प्रकृष्टशक्तिमत्या भागीरथ्याः वरप्रभावेण त्वमदृश्यतां गतेति साधारणदेवशक्तिमतीनां वासन्त्यादिवनदेवतानामदर्शनीयतायामसंशयं विजानीहि संशयमिति भावः। अणिमाद्यैश्वर्यं यथा,—

"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥" इति।

एवं "अणिमा—अणुभावः, यतः शिलामपि प्रविशति। लघिमा—लघुभावः, यतः सूर्यमरीचीनवलम्ब्य सूर्यलोकं याति। प्राप्तिः,—अङ्गुल्यग्रेण स्पृशति चन्द्रम्। प्राकाम्यम्—इच्छानभिघातः, यतो भूमावुन्मज्जति निमज्जति—यथोदके। महिमा—महतो भावः, यतो महान् भवति। ईशित्वं—यतः भूतभौतिकानां प्रभवस्थितिनाशे। वशित्वं—यतः भूतभौतिकं वशीभवत्यवश्यम्। यच्च कामावसायिता सा सत्यसङ्कल्पता, यथाऽस्य सङ्कल्पो भवति भूतेषु, तथैव भूतानि भवन्ति।" इति तत्त्वकौमुद्या

सीता। तदो अणुसरह्म। *(घ) [इति परिक्रामतः]।

राम। [परिक्रम्य]। भगवति गोदावरि! नमस्ते।

वासन्ती। [निरूप्य]। देव! देव! मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण। (ङ)

राम। विजयतामायुष्मान्।

सीता। अह्महे ईदिसो एसो संवुत्तो॥ †(च)

राम। देवि! दिष्ट्या वर्द्धसे। (छ)—

---

* ततोऽनुसराम।

† अहो ईदृश एष संवृत्तः॥

वाचस्पतिमिश्रलेखः। प्रकृते तु व्यामावसायित्वरूपैश्वर्य्यप्रभावेण सीताया अदृश्यत्वं सम्पादितमिति बोध्यम्।

(घ) तत इति।—यतः सत्यमेवाहं वासन्त्या अप्यदर्शनीया सञ्जाताऽस्मि ततः इत्यर्थः। अनुसरामः,—पश्चात् यामः, आर्य्यपुत्रवासन्त्योरिति शेषः। परिक्रामतः,—परिभ्राम्यतः, सीतातमसे इति शेषः।

(ङ) निरूप्येति।—विशेषतोऽवलोक्य। ["देव देव" इति हर्षे द्विरुक्तिः, "विवादे विस्मये हर्षे" इत्यादिनियमात्]। मोदस्व—प्रहृष्य, मनो विनोदयेत्यर्थः। विजयिना—उन्मदद्विरदविजयकारिणा। यस्य पराभवमाशङ्कमानानामस्माकमेतावान् प्रयासः, सोऽयं कालेनातिबलः स्वयमेव दुष्टान्यद्विरदराजं विजित्य पश्यत प्रियया सह विहरतीति पश्यन् प्रीणात्विति भावः।

(च) अहो इति।—[अहो इत्याश्चर्य्यबोधकमव्ययम्]। एषः,—दृश्यमानः, मया पुत्रत्वेन परिपोषितः करिकलभक इति यावत्। ईदृशः,—उन्मदद्विरदविजयसमर्थः प्रबलबलशाली। संवृत्तः,—जातः। इयताऽल्पकालेन मम कृतकतनयोऽसौ करिशावक एव बलीयान् जात इति महदाश्चर्य्यमिति भावः।

(छ) देवीति।—एतत्तु सीतामुद्दिश्य सम्बोधनम्। दिष्ट्या—भाग्येनेत्यर्थः, [तृतीयान्तप्रतिरूपकमव्ययमिदम्]। वर्द्धसे—वृद्धिं नीताऽसि, भाग्येनैव तवाय कृतकतनयः आनन्दवर्द्धनो जात इति भावः।

येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु। लवलीपल्लवः कर्णपूरात्।
सोऽय पुत्रस्तव मदमुचा वारणाना विजेता
यत् कल्याण वयसि तरुणे भाजन तस्य जातः॥ १५॥

सहसा सीतापुत्रकाभिभवश्रवणकातरो रघुवर कृतत्वरस्तदन्तिकमुपेतस्त स्यवज्ञावलेपाद् दारुणवारणराजविजयिन विलोक्यातिप्रीतस्तदानीन्तनतदवस्थोपवर्णन-सुखेन सीताया सौभाग्यहेतुमुपदर्शयन्नाह, येनेति।—हे सुतनु सुन्दरि। [सु शोभना तनुर्यस्या सा सुतनू, तत्सम्बुद्धौ। "अम्बार्थनद्योर्ह्रस्व" (७।३।१०७ पा०) इति ह्रस्व]। ("स्त्रिया मूर्त्तिस्तनुस्तनू" इत्यमर)। उद्गच्छत् उत्तिष्ठत्, नवोद्भिन्नमित्यर्थ, यत् बिसकिसलय मृणालपल्लव, मृणालाग्रमिति यावत्, तदिव स्निग्ध कोमल दन्ताङ्कुर अचिरोद्गतदन्त यस्य तेन तथोक्तेन, येन करिशावकेनेत्यर्थ, ते तव, कर्णपूरात् कर्णाभरणात् लवलीपल्लवनिर्मितादित्यर्थ, [कर्णमूलादिति पाठे तु श्रवणमूलभागादित्यर्थ] लवलीपल्लव लवली लताविशेष ("नोराड़" इति वङ्गभाषा) तस्या पल्लव किसलय, कर्णावतंसीकृत इति यावत्, व्याकृष्ट करेण आकृष्य गृहीत। मदमुचा मदस्राविणा, मत्तानामित्यर्थ, वारणाना हस्तिना, विजेता परिभावक, सोऽय तव पुत्र पुत्रीकृत करिशावक इत्यर्थ, तरुणे वयसि यौवने, यत् कल्याण मङ्गलम् अतिशयितबलशौर्य्यादिक, तस्य भाजन पात्र, जात। ["उद्देश्यविधेययोरुद्देश्यवचनत्वमाख्यातस्य" इति काशिका-प्रमाणात् "जात" इत्यत्र पुंस्त्वनिर्देश, अस्यैव प्रधानक्रियारूपत्वादिति सुधीभिर्विभाव्यम्]। पूर्व्वमस्मदीयारण्यवासदशाया योऽयमतिकिशोरवयास्त्वया तनयीकृत करिशावक स्निग्धकोमलकिसलयादानप्रदानेनाविरत क्रीड़ित, सम्प्रत्येतावताऽल्पीयसा कालेन तामस मत्तमातङ्गभङ्गक्षम बलीयसामुत्तम सम-[illegible]तमया विहरन्तमालोक्य त्वदीयभाग्यवशादेव सम्भावयामीति भाव। [अत्र उत्तरार्द्धेऽपि तरुणवय समुचितकल्याणोत्पत्तिरूपचतुर्थपादार्थं प्रति मदमुग्वारणविजेतृत्व-रूपहेतोर्यदादिगतवाक्यार्थस्य हेतुविधयोपन्यासात् वाक्यार्थहेतुक काव्यलिङ्गमलङ्कार, तथा "उद्गच्छद्बिसकिसलय" इत्यादौ लुप्तोपमा चेत्यनयोरङ्गाङ्गिभावेन सङ्कर]। मन्दाक्रान्ता वृत्तम्॥ १५॥

सीता। अविउत्तो दाणीं अअं दीहाऊ इमाए सोम्मदंसणाए होदु।* (ख)

राम। सखि वासन्ति। पश्य पश्य कान्तानुवृत्तिचातुर्य्यमपि शिक्षितं वत्सेन। (ग)—

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसङ्क्रान्तयः।

* अवियुक्त इदानीमयं दीर्घायुरनया सौम्यदर्शनया भवतु।

(ख) सुतदर्शिताभिलाषिणी विजनवनवासिनी जनकराजनन्दिनी सुचिरमनुभवन्ती अतिदारुणां प्रियविरहवेदनां, स्वयमवलोकयन्ती चातिविषमां दशां जीवितनाथस्य, जगतीह विरहमेव दम्पत्यो सर्वतोऽधिकतया क्लेशदं मन्यमाना एतयोर्भाविविरहशङ्कयाऽऽतङ्किता सत्स्वप्यनेकविधेष्वाशीर्वचनेषु अनयोरन्योऽन्यमविच्छेदमेव चिराय कामयमाना आह, अवियुक्त इति।—मिलित इत्यर्थः। अयं—दृश्यमानः, प्रियया समं पयसि विहरन्नित्यर्थः। दीर्घायुः,—चिरजीवी, मम पुत्रक इति शेषः। अनया—पुरोवर्त्तिन्या। सौम्यदर्शनया—कमनीयाकृत्या, सुदर्शनया इति यावत्।

(ग) सखीति।—[अत्र "पश्य पश्य" इति विस्मये द्विवचनम्]। कान्तानुवृत्तिचातुर्य्य—कान्तायाः प्रियायाः करेणुकायाः अनुवृत्तौ चित्तानुरञ्जने चातुर्य्यं चतुरता, नैपुण्यमिति यावत्, न केवलं शिशुरयं शक्तिमत्तया तरुणोचितमाचरति, अपि तु कान्तानुवर्त्तननिपुणतयाऽपीति भावः।

प्रियतमया करेणुकया समं सलिलविहारसुखमनुभवन्तमं करिशावकमालोक्य यदिदमुक्तं "कान्तानुवृत्तिचातुर्य्यम्" इत्यादि, सम्प्रति तदेव तत्कार्य्यैः समर्थयन् सीतापतिराह, लीलोत्खातेति।—यत् यस्मात् हेतो, खेलात् अनुरागवशात्, प्रणयातिशय्यादित्यर्थः, लीलया क्रीडया, अक्लेशेनेति यावत्, उत्खाताः उत्पाटिताः ये मृणालकाण्डाः मृणालस्तम्बाः, बिससमूहा इत्यर्थः, ("काण्डः स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः" इति मेदिनी) तेषां ये कवलच्छेदाः ग्रासार्द्धखण्डाः, करेणुकायाः आस्याभ्यन्तरवर्त्तिनः मृणालखण्डा इति यावत्, तेषु [इति अधिकरणे सप्तमी] यद्वा,—लीलया उत्खाताः ये मृणालकाण्डाः त एव कवलाः ग्रासाः तेषां छेदेषु अवसानेषु सत्सु [इति भावे सप्तमी] ("ग्रासस्तु कवलः पुमान्," इत्यमरः) पुष्यद्भिः विकसद्भिः, पुष्करैः पद्मैः, ("बिसप्रसून

सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत् स्नेहादनराललालनलिनीपत्रातपत्रं धृतम् ॥ १६ ॥

राजीवपुष्कराम्भोरुहाणि च" इत्यमरः) वासितस्य सुरभितस्य, पयसः जलस्य, गण्डूषाणां मुखपूरितानामित्यर्थः, ("गण्डूषो मुखपूर्त्तौस्यात्पुष्करवस्तुतोन्मिते" इति मेदिनी) सद्धारया उद्धारा, सम्पादिता कृता। करेणुकया कवलीकृतेषु आस्या भ्यन्तरवर्त्तिषु मृणालदलखण्डेषु स्ववदनपरिपूरित सलिल प्रवाहातिरेकात् वेगेन परितो विक्षिप्तमिति समुदितार्थः, ["पुष्पासुष्करवासितस्य" इत्यत्र "पुष्पस्तुष्कर-वासितस्य" इति पाठोऽपि च दृश्यते। तथा "सम्पादिता" इत्यत्र "सम्पातिता" इति पाठे—गण्डूषधारा सम्पातिता विक्षिप्ता इत्यर्थः] तथा, शीकरिणा शीकरा जल-कणाः सन्ति यस्मिन् तेन जलकणसंवलितेति यावत्, ("शीकरोऽम्बुकणाः स्मृताः" इत्यमरः) करेण शुण्डेन, ("करो वर्षोपले रश्मौ पाणौ प्रत्ययशुण्डयोः" इति मेदिनी) कामं पर्याप्तं यथा तथा, ("कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम्" इत्यमरः) सेकः सेचनं, विहितः सम्पादितः, सलिलकेलिरतायाः करेण्वाः उत्तापोप-शान्तये तस्याः सर्वशरीरेषु शुण्डादण्डेन सलिलकणाः विक्षिप्ता इत्यर्थः, विरामे पुनः सलिलसेकावसाने तु, सेकानन्तरमेवेत्यर्थः, अनरालम् अवक्रं, सरलमिति यावत्, ("अरालं कुटिलं वक्रम्" इत्यमरः) नालं मृणालं यस्य तादृशं यन्नलिनीपत्रं पद्मपत्रं तदेव आतपत्रम् आतपवारणं छत्रमित्यर्थः, [आतपात् त्रायते यत् तत् आतपत्रम् आतप+त्रै+क] धृतं करिणा आतपनिवारणार्थं मस्तकोपरि विततमित्यर्थः। [अत्र स्वरूपतः करभदम्पत्योरुदानीन्तनावस्थावर्णनात् स्वभावोक्तिरलङ्कारः, तथा नलिनीपत्रस्य आतपत्रस्वरूपतयोपवर्णनात् निरङ्गकेवलरूपकमित्यनयोरङ्गाङ्गिभावेन सङ्करः। अत्र प्रियतमया करेणुकया समं करिशावकस्य तादृशसलिलविहारादिरूप सम्भोगविशेषोपवर्णनात्—"दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। यत्रानुरक्ता-वन्योन्य सम्भोगोऽयमुदाहृतः ॥" इत्युक्तलक्षणसम्भोगाख्यशृङ्गाररसः स्फुट एव, परन्तु—"शून्ये सङ्केतगेहे...वनान्तरेषु वल्लान्तरे वल्लभनाङ्कवन्तौ। पद्मविपक्षीकलनादमङ्गीसङ्गीत-कङ्कीकुरुते स्म नद्धौ ॥" इत्यादिदर्पणकृदुदाहरणवद् इह तस्य तिर्य्यग्गततया—"अनौ-चित्यप्रवृत्तत्वे आभासो रसभावयोः" इति "प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्य-गादिगते। शृङ्गारेऽनौचित्यं, रौद्रे गुर्वादिगतकोपे ॥" इति च दर्पणकृल्लक्षणेन आभासत्वेन परिगणनात् अत्र सम्भोगशृङ्गाररसाभास एव, न तु विशुद्धः शृङ्गाररस इति सुधीभिर्विभाव्यम्]। वृत्तं शार्दूलविक्रीडितम् ॥ १६ ॥

सीता। भअवदि तमसे। अअ दाव ईदिसो जादो, दे उण ण आणामि कुसलवा एत्तिएण कालेण कीदिसा विअ होंति।* (घ)

तमसा। यादृशोऽयं तादृशौ तावपि। (ङ)

सीता। ईदिसी अहं मदभाइणी, जाए ण केअलं णिरतरं अज्जउत्तविरहो पुत्तविरहो वि।† (च)

---

* भगवति तमसे। अयं तावदीदृशो जातः, तौ पुनर्न जानामि कुशलवौ एतावता कालेन कीदृशौ इव भवतः।

† ईदृशी अहं मन्दभागिनी, यस्या न केवलं निरन्तरमार्य्यपुत्त्रविरहः, पुत्त्रविरहोऽपि।

(घ) भगवतीति।—अयं—मया पुत्त्रत्वेन पालितः इत्यर्थः। तावदिति—वाक्यालङ्कारे। ईदृशः,—युवकोचितशक्तिदृढ़ाङ्गादियुक्तः। तौ—मत्पुत्त्रौ। पुनः,—किन्तु। एतावता—इयता, मत्यागानन्तरं शस्त्रशास्त्रादिविद्याभ्यासार्थं यावत्कालं वाल्मीकितपोवने वर्त्तेते इयत्परिमाणेनेत्यर्थः। कालेन—समयेन, एभिर्वर्षैरिति यावत्, [अत्र 'अपवर्गे तृतीया" (२।३।६ पा०) इति तृतीया]। कीदृशौ—वयोऽनुरूपशक्त्यादियुक्तौ तदयुक्तौ वा इत्यर्थः। [अत्र—"पुनः तौ कुशलवौ एतावता कालेन कीदृशाविव भवतः इति न जानामि" इति अन्वयः, तथा च "तौ पुनः कुशलवौ" इति वाक्यं "न जानामि" इत्यनेन व्यवहितमपि प्रियपुत्त्रकदर्शन कुशलव-स्मरणजनिताह्लादेन ससम्भ्रममुक्ततया न गर्भितपदतादोषमावहतीति विभाव्यम्]।

(ङ) यादृश इति।—अयं—पारदृश्यमानः करिशावकः। यादृशः,—तदयोचितशक्तिदृढ़ाङ्गादिसम्पन्नः। तौ—कुशलवौ। तादृशौ—एतत्सदृशशक्तिदृढ़ाङ्गादिशालिनौ, भवतः इति शेषः। (अत्र करिशावकापेक्षया कुशलवयोः वयःकनिष्ठत्वेन समानशक्त्याद्यसम्भवेऽपि केवलं सीतामनस्तुष्टिसम्पादनाय साम्याभिधानं, न तु तत्त्वतः इति बोध्यम्)।

(च) ईदृशीति।—मन्दभागिनी—दुर्भाग्यशालिनी। निरन्तरं—नास्ति अन्तरं व्यवधानं यस्मिन् तत्, अविरतमित्यर्थः, [अत्र "क्रियाविशेषणानां कर्मत्वम्" इति वार्त्तिकेन क्रियाविशेषणे द्वितीया] आर्य्यपुत्त्रविरहः,—आर्य्यपुत्त्रस्य

तमसा। भवितव्यता इयमीदृशी। (छ)

सीता। किं वा मए पसूदाए, जेण तादिस बि मम पुत्तकाणं ईसिविरलकोमलधवलदसणुज्जलकवोल अणुबद्धमुद्धकाअली-विहसिद णिवद्धकाअसिहण्डअं अमलमुहपुंडरीअजुअलं ण परिचुंबिदं अज्जउत्तेण। * (ज)

* किं वा मया प्रसूतया, येन तादृशमपि मम पुत्रयोरीषद्विरलकोमलधवल-दशनोज्ज्वलकपोलमनुबद्धमुग्धकाकलीविहसितं निबद्धकाकशिखण्डकममलमुख-पुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण।

भर्त्तुः रामचन्द्रस्य विरहः विच्छेदः। पुत्रविरहोऽपि—पुत्रयोः कुशलवयोः विरहः विच्छेदोऽपीत्यर्थः। दुर्भाग्यवशादार्यपुत्रपरित्यक्ताऽपि अहं यदि पुत्रमुखदर्शनेन सुखमुपलभेय तदाऽपि मे काचित् सान्त्वना स्यात्, आजन्मतत्तदपि न मया लभ्यते इति मे महतीयं दुर्भाग्यपरम्परेति भावः।

(छ) भवितव्यता—पदार्थानामवश्यम्भावित्वं, नियतिरिति यावत्, [भवि-तव्यस्य भाव इति भवितव्यता, भवितव्यमिति तु "कृत्यल्युटो बहुलम्" (३।३।११३ पा०) इति भवते कर्त्तरि तव्यप्रत्ययः]। इयं—त्वया इदानीमनुभूयमाना। ईदृशी—एवंविधा, पतिपुत्राभ्यां सह चिरविरहकारिणीत्यर्थः। दुर्भाग्यादेव तवेयं दुर्दशा, न त्वित्थाकृतेति नानुशोचनीयमिति भावः।

(ज) पत्यौ पुत्रमुखचुम्बनादिना प्रीतिमापन्ने हि प्रसवस्य सार्थकता जायते, मम तु मन्दभागिन्याः प्रसवानन्तरं नावलोकितमप्यार्यपुत्रेण कदाचित् तादृशं सुतमुखकमलयुगलमिति व्यर्थ एव मे तनययुगलप्रसवक्लेश इत्याशयवती जनक-नन्दिनी सखेदमाह, किं वेति।—प्रसूतया—प्रसवकारिण्या [अत्र प्रसूतं प्रसवः, (प्र+सू+भावे क्त) तदस्ति यस्याः सा प्रसूता, "अर्श आदिभ्योऽच्" (५।२। १२७ पा०) इति अच्प्रत्ययः, अथवा—अकर्मकत्वविवक्षया सूधातोरकर्मक-त्वात् "गत्यर्थाकर्मक—" (३।४।७२ पा०) इति कर्त्तरि क्तः]। मया—सीतया [अत्र अलमर्थककिंशब्दयोगे तृतीया, यद्वा,—गम्यमानसाधनक्रियापेक्षया करणत्वात् "गम्यमानाऽपि क्रिया विभक्तौ प्रयोजिका" (वा०) इति तृतीया]। येन—

तमसा। अस्तु देवताप्रसादात्। (भ)

सीता। भअवदि तमसे। एदिणा अपच्चसंसुमरणेण उस्स-

देतना। तादृशमपि—मयाऽनुभूत मिरतिशयरमणीयमपीत्यर्थः। मम पुत्रकौ,—मम तनयौ, कुशलवयोरिति यावत्। [अत्र "पुत्रकयो" इत्यपि क्वचित् पाठो दृश्यते, तदर्थस्तु—अनुकम्पितौ पुत्रौ इति पुत्रकौ तयो "अनुकम्पायाम्" (५।३।७६ पा०) इति कन्प्रत्यय, स्नेहास्पदतनयोरित्यर्थ]। ईषदित्यादि।—ईषद्विरला अनतिघना कोमला सुकुमारा धवला श्वेताश्च ये दशना दन्ता तै उज्ज्वलौ कान्तिपूर्णौ कपोलौ गण्डौ यस्मिन् तत् तथोक्त, नातिसश्लिष्टसुकुमाररुचिरदशनदीप्यमानगण्डस्थलमित्यर्थ, ("रदना दशना दन्ता" इत्यमर) [अत्र स्वभावत सुन्दरयो कपोलयो प्रकृत्या रक्तत्वेऽपि धवलदशनोज्ज्वलप्रभाभि रापादितश्वेतिमतया स्वकीयरक्तिमगुणत्यागेन अन्यदीयोज्ज्वलधवलिमग्रहणात् तद्गुणालङ्कार,—"तद्गुण स्वगुणत्यागादत्युत्कृष्टगुणग्रह" इति तल्लक्षणात्]। अनुबद्धेत्यादि।—अनुबद्धे नियते मुग्धे मनोहरे काकलीविहसिते काकली मृदुमधुरास्फुटशब्द [कु ईषत् कल इति काकली "ईषदर्थे—" (६।३।१०५ पा०) इति कुशब्दस्य स्थाने "का" आदेश, तत "षिद्गौरादिभ्यश्च" (४।१।४१ पा०) इति ङीप्] विहसित मधुरहास्यञ्च ते यस्मिन् तत् तथोक्तम्। ("काकली तु कले सूक्ष्मे" इत्यमर। "मधुरस्वर विहसितम्" इति च साहित्यदर्पण)। निबद्धेत्यादि।—निबद्धौ धृतौ काकशिखण्डकौ काकपक्षौ येन तत् तथोक्तम्, (यद्यपि "काकपक्ष शिखण्डक" इत्यमरोक्तेन शिखण्डकशब्देनैव काकपक्षबोध इति काकशब्दो निरर्थक स्तथाऽपि इह करिकलभादिशब्दवत् प्रयोगान्न दोष इति बोध्यम्)। अमलेति।—अमलमुखपुण्डरीकयो निर्मलमुखपद्मयो [मुखे पुण्डरीके इव इति मुखपुण्डरीके, अमले मुखपुण्डरीके इति अमलमुखपुण्डरीके तयो "उपमित व्याघ्रादिभि" (२।१।५६ पा०) इति उपमितसमास। अत्र उपमा नामालङ्कारो बोध्य]। युगल द्वन्द्वम्, अतिसुन्दरवदनकमलयुगलमित्यर्थ। आर्यपुत्रेण—पत्या रामेण। न परिचुम्बित—न सम्यक् चुम्बन कृतमित्यर्थ। विफल पुत्रयोजन्म मम च मन्दभागिन्या गर्भधारणमिति भाव।

(भ) देवताप्रसादात्—देवानुग्रहवशादित्यर्थ। अस्तु—पत्या रामेण तव तनययोर्मुखपुण्डरीकयुगल परिचुम्बित भवत्वित्यर्थ। ममाशीर्वादात् त्वमचिरादेव पतिपुत्रसङ्गता भविष्यसीति भाव।

सिदपण्हुदत्थणी ताण अ पिदुणो सण्णिधाणेण खणमेत्तं संसारिणी ह्मि संवुत्ता। * (ञ)

तमसा। किमत्र उच्यते? प्रसवः खलु प्रकर्षपर्य्यन्तः स्नेहस्य। परश्चैतदन्योऽन्यसंश्लेषणं पित्रोः। (ट)—

---

* भगवति तमसे! एतेन अपत्यसंस्मरणेन उच्छ्वसितप्रस्नुतस्तनी तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिणी अस्मि संवृत्ता।

(ञ) अपत्यसंस्मरणेन—अपत्ययोः पुत्रयोः संस्मरणेन सञ्चिन्तनेन पुत्र-विषयकचिन्तया, स्मृतिपथारूढेन पुत्रवृत्तान्तेन इति यावत्। उच्छ्वसितप्रस्नुतस्तनी—उच्छ्वसितौ दुग्धागमात् स्फीतौ प्रस्नुतौ क्षीरं स्रवन्तौ स्तनौ यस्याः सा तथोक्ता, पुत्रस्मरणजनितपय स्फीतस्रवत्पयोधरा इति यावत्, एतदेव हि यथार्थं लक्षणं जनन्याः तनयं प्रति स्नेहप्रकर्षस्य। तयोः,—पुत्रयोः, कुशलवयोरित्यर्थः। पितुः,—जनकस्य, मम आर्य्य-पुत्रस्य रामस्येति यावत्, (चिरात् पतिपुत्रविरहकातरा जानकी गभीरविषादेन रामनामार्य्यपुत्रादिशब्देन अभिधातुमपि क्लिश्यमाना "तयोः पितुः" इत्येवम् अभिहित-वतीति बोध्यम्)। सन्निधानेन—समीपावस्थानेन, क्षणमात्रं—मुहूर्त्तमात्रम्, [अत्र "कालाध्वनोरत्यन्तसंयोगे च" (२।३।५ पा०) इति द्वितीया]। संसारिणी—गृहस्थोचितसौभाग्यवती, दैवात् स्वामिसन्निधानात् अपत्यचिन्तया पयोधराभ्यां दुग्धस्रावाच्च मुहूर्त्तमात्रं गृहस्थधर्म्मानाचरन्ती इवेति यावत्। संवृत्ता—जाता। अस्मि—भवामि, अभवमिति शेषः। अपरापरसाधारणोपभोग्यं गार्हस्थ्यफलं सत्-स्वपि पतिपुत्रादिषु मया नोपभुक्तमिति भावः।

(ट) जानकी यदिदमुक्तवती—"अपत्यसंस्मरणेन उच्छ्वसितप्रस्नुतस्तनी" इति, तमसा तन्मति तदेव समर्थयन्ती आह, किमिति।—अत्र—अस्मिन् पुत्रस्नेहविषये। किमुच्यते—किं कथ्यते? नात्र किमपि वक्तव्यमिति भावः। प्रसवः,—अपत्यम्, [प्रसूयते इति प्रसवः, कर्म्मणि अप्प्रत्ययः] ("—प्रसवो गर्भमोचने। उत्पादे फलपुष्पेऽपि फले च कुसुमेऽपि च॥" इति मेदिनी)। खलु—निश्चितम्। स्नेहस्य—अनुरागस्य। प्रकर्षपर्य्यन्तः,—प्रकर्षस्य आतिशय्यस्य पर्य्यन्तः चरमसीमा, परा काष्ठा इति यावत्, अपत्यजन्मनैव हृदयोरनुरागस्य परमोत्कर्षो भवति, नातः परमस्य उत्कर्षः सम्भाव्यते इति भावः। परश्च—अपरञ्च, कथयामीति शेषः। एतत्—एष प्रसवः इत्यर्थः, [अत्र विधेयप्राधान्यात् क्लीवत्वम्]। पित्रोः,—जननीजनकयोः,

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥ १७ ॥

[माता च पिता च इति पितरौ तयोः "पिता मात्रा" (१।२।७० पा०) इति वैकल्पिक एकशेष, पक्षे मातापितराविति]। अन्योऽन्यसंश्लेषणम्—अन्योऽन्यस्य परस्परस्य संश्लेषण बन्धन, संयोजनग्रन्थिरिति यावत्, आपामरसाधारणजीवनमन परिलप्यं न खल्वेतदपत्यम्, अपि तु मातापित्रोः संसारसुखसम्भोगाथिनोरन्तःकर ण्योरन्योऽन्यसंश्लेषसङ्घटनप्रकाः सम्बन्धविशेष इति भाव ।

पूर्वं यदिदमुक्त "परस्वेतदन्योऽन्यसंश्लेषण पित्रो " इति, सम्प्रति तदेव दृढयन्नो आह, अन्तरिति ।—दम्पत्योः पतिपत्न्योः [जाया च पतिश्च तौ दम्पती "जायाया दम्भावो जम्भावश्च वा निपात्यते" इति नियमात् जायाशब्दस्य दमादेशो निपात नात्] अन्तःकरणतत्त्वस्य मन सारस्य, गूढनिहितस्य अन्तःकरणसारभूतस्य पदार्थस्य तत्त्वस्य, चतुर्विंशतितत्त्वान्तर्गतस्य मनस. इति वा, (साङ्ख्याना हि चतुर्विंशति तत्त्वानि, अन्तःकरण हि तदन्तर्गतमेक तत्त्व, तच्च व्यापारभेदेन त्रिधा भिद्यते, तथा च साङ्ख्यतत्त्वकौमुदी,—

"अन्तःकरण त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकाल बाह्य त्रिकालमाभ्यन्तर करणम् ॥"

"अन्तःकरण त्रिविधं बुद्धिरहङ्कारो मन इति शरीराभ्यन्तरवर्त्तित्वादन्तःकरणम्" इति । शङ्करमतानुयायिनो वेदान्तिकास्तु—अस्य चतुर्विधत्वं मन्यन्ते, तद्यथा,—

"मनो बुद्धिरहङ्कारश्चित्त करणमान्तरम् ।
संशयो निश्चयो गर्व स्मरण विषया अमी" ॥ इति ।

स्नेहसंश्रयात् उभयोरेव प्रगाढवात्सल्यस्य एकास्पदत्वादित्यर्थं, अपत्यमिति सन्तति रूप [न पतति अस्मात् कुलम् अनेन इति अपत्य, नञ् + पत + यत्] अयम् एक अद्वितीय, आनन्दग्रन्थि उभयो स्नेहसम्मिलनादानन्दमयं बन्धनमित्यर्थ, बध्यते सनह्यते, विधात्रा इति शेष , प्रणयभङ्गनिवारणायान्यस्य, स च जन्मर्म सारेण स्नेहसूत्रेण बध्यते इति भाव । यथा स्वतन्त्राधिकरणावस्थितयो सजातीययोरपि पदार्थयो सम्बन्धाभावान्न कदाऽपि कथमपि ऐक्य सम्भवति, अथ कथमपि तयो सामानाधिकरण्ये जाते पुनस्तावेव परस्परमिलितौ एकीभूतौ राजेते, तथा नियतमन्योऽन्यानुरागप्रवणमपि जायापत्योरन्तःकरणयुगल पृथगा श्रयाश्रिततया पूर्वं न तथा संश्लिष्टमपि पर भाग्यातिशयात् स्नेहद्वारेण सन्तति-

वासन्ती। इतोऽपि देवः पश्यतु। (ट)—

स्फुरदुरुसदताण्डवोत्सवान्ते
स्वयमचिरोद्गतमुग्धलोलबर्हः।
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ १८ ॥

उपनिक्षनेवाधिकरणमधिगत चिरायाच्छेद्यबन्धनेन बध्यत इत्यर्थ विग्रहाय। [यथा केनचित् भ्रमभयात् स्वशरीरं कुत्रचिद् दृढं बध्यते, तथा गृहस्थे स्नेहसूत्रेण अपत्ये आत्मा बध्यते इति ध्वनि। अत्र आनन्दमयग्रन्थिरूपारोप्यमाणविषयस्य दम्पत्योरन्योऽन्यवात्सल्यप्रकर्षापादकत्वेन अपत्यस्वरूपारोपविषयात्मतया परिणमनात् परिणामो नाम अलङ्कार]। अनुष्टुप् वृत्तम् ॥ १७ ॥

(ट) इत इति।—देव,—भवान् रामचन्द्र इत्यर्थ। इतोऽपि—अस्यामपि दिशि। पश्यतु—अवलोकयतु, "शिखण्डी नदति" इति वक्ष्यमाणश्लोकांशेनान्वय।

पुराऽरण्यवासकाले प्रियतमया परिपोषित करिकरभकमिदानीं कालवशात् तरुणोचितकोमलन उन्मदाहिरददर्पदमनक्षममालोक्य विस्मृत सीतानाथ वासन्ती पुनरपि जानकीपरिपोषितमपर कलापिनमेक दर्शयन्ती आह, स्फुरदुरीति।—अचिरेण उद्गतम् उत्पन्न मुग्ध मनोहर लोल चञ्चलञ्च बर्ह पिच्छ यस्य स तथोक्त, नवमदरमणीयचलत्कलाप इत्यर्थ, [एतेन मयूरस्यातिसौन्दर्यं व्यज्यते] ("लोलश्चञ्चलतरलौ" इति "पिच्छबर्हे नपुंसके" इति चामर) अचिरजातयौवन इति भाव, तथा उत् उद्गता शिखा चूडा यस्य स तथोक्त, उन्नतचूड इति यावत्, अत एव मणि मुकुट यस्य स तथोक्त मणिमयमुकुटधारीव इत्यर्थ, अथवा, उच्छिख उद्गतप्रभाजाल, मणिमुकुट मणिमय शिरोवेष्टक इव प्रतीयमान, [शाकपार्थिवादित्वात् उत्तरपदलोपी समास]। नानावर्णविचित्रपिच्छचन्द्रककलापाना विस्तराम्बरपटले परितो विस्फुरिततया मरकतेन्द्रनीलपद्मरागादिमणिनिखचित किरीट इव विराजमान इत्यर्थ। ("मकुटञ्चाथ मुकुट किरीटं पुनपुंसकम्" इत्यमर) स सीतया पुरा पालित इत्यर्थ, एष, सम्प्रति अस्मत्पुरोवर्त्तिकदम्बशाखाया परिदृश्यमान इति यावत्, शिखण्डी मयूर ("शिखण्डी ना कलापि स्यात् गाईयारिमयूरयो" इति मेदिनी) वधूसख वधूद्वितीय सन्नित्यर्थ, [वध्वा समाप्याया सखा इति वधूसख, "राजाह सखिभ्यष्टच्" (५।४।९१ पा०) इति समासान्त, टच्प्रत्यय] स्फुरदुरुसदताण्डवोत्सवान्ते, नदतीति यावत्, नदेन हर्षेण रेवता य ताण्डवोत्सव, नृत्योत्सवस्यान्ते

सीता। [सकौतुकास्रम्]। एसो सो एसो सो । * (ड)

राम । वत्स ! मोदस्व, वयमद्य वर्त्तामहे । (ढ)

सीता। एव्व भोदु । † (ण)

---

* एष स एष स ।

† एवं भवतु ।

अवसाने, कदम्बे कदम्बवृक्षे, स्वयम् आत्मना, अनन्यप्रणोदित इत्यर्थः, नदति शब्दायते, केकारवं करोतीत्यर्थः । ["अनुदिवसमवर्द्धयत् प्रिया ते यमचिरनिर्गतमुग्धलोलबर्हम्" इत्यपि क्वचित् पाठः । तस्यायमर्थः,—अचिरनिर्गतमुग्धलोलबर्हं प्रत्ययोत्पन्नसुन्दर-चन्द्रकं यं शिखण्डिनं ते तव प्रिया जानकी अनुदिवसं प्रतिदिनम् अवर्द्धयत् वर्द्धितवती, स एष इति परेणान्वयः इति]। योऽयं शैशवे जनकतनयया नियतम् अपत्यस्नेहेन परिपोषितः, शैशवसुलभसारल्यचापल्यादिभिश्च तस्याः मानसमभ्यनन्दयत्, सोऽयं सम्प्रति अभिनवोद्भिन्नयौवनतया नवीनभावमापन्नः प्रियतमया समेतः प्रलम्बकदम्बशाखामाश्रित्य केलिपरम्पराजन्योल्लासमुपभुञ्जानः कलापी केकारवं विदधातीति भावः । [अत्र उपमा नाम अलङ्कारः । यथा रूढिप्रयोजनाभावात् अशक्तिकृतलक्ष्यार्थप्रकाशकतया "कमले चरणाघातं मुखं सुमुखि ! तेऽकरोत्" इत्यत्र नेयार्थत्वदोषः, तथा "अतरुणमदः" इत्यत्र तरुणशब्दस्य यौवनवति रूढतया, इह अन्यार्थे रूढिप्रयोजनाभावेऽपि लक्षणया अन्यार्थबोधनात् नेयार्थत्वदोषो बोध्यः]। पुष्पिताग्राया वृत्तम्, तल्लक्षणं यथा—"अयुजि नयुगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा" इति ॥ १८ ॥

(ड) एष इति ।—अस्माभिः परिदृश्यमानः । सः,—मया पूर्वं सस्नेहं परिवर्द्धितः शिखण्डी इत्यर्थः । (अत्रापि "विवादे विस्मये हर्षे" इति नियमात् हर्षे द्विर्वचनं न दोषाय)।

(ढ) वत्स ! इति ।—तात ! मयूर इत्यर्थः । मोदस्व—आनन्दं लभस्व । तव हेतुमाह, वयमिति ।—अहं सीतासखी वासन्ती च इत्यर्थः, [अत्र "अस्मदो द्वयोश्च" (१।२।५९ पा०) इति सूत्रेण द्वयोरपि बहुवचनं साध्विति बोध्यम्]। वर्त्तामहे—पुनः उपस्थिता भवामः, सुखदुःखयोर्हि समवेदकसुजनसमागम एव पूर्णता जायते इति भावः ।

(ण) एवमिति ।—एतदीयानन्दप्रकाशसमये सहसा आर्य्यपुत्रसान्निध्येन अस्य अत्यन्तं प्रमोदः जायतामित्यर्थः ।

राम।—भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति चक्षुः
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥ १९ ॥

हन्त ॥ तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते। (त)—

सम्प्रति कदम्बशाखासमारूढं केलिपरं प्रियासङ्गयुक्तं भुजङ्गभुजमालोक्य समुद्दीपितपूर्व्वस्मृतिर्जानकीपतिः खिद्यमान आह, भ्रमिष्विति।—भ्रमिषु सञ्चरणेषु, शिखण्डिनः चक्रवद्भ्रमणेषु सत्स्वित्यर्थः, कृता पुटयोर्नेत्रावरणयोरन्तः अभ्यन्तरे मण्डलावृत्तिः वर्त्तुलाकारभ्रमणं येन तत् तथाभूतं, चक्षुः सीतायाः स्वीयनयनं, प्रचलितयोः चञ्चलयोः चतुरयोः सविलासयोः सङ्केतसूचकाकारप्रदर्शनकुशलयोरिति यावत्, भ्रुवोः ताण्डवैर्नृत्यैः, इतस्ततः पुनः पुनः सञ्चारैरिति यावत्, मण्डयन्त्या भूषयन्त्या, स्वयं ताण्डवचातुर्य्यं शिक्षयितुमितस्ततो भ्राम्यमाणस्यास्य शिखिनः सञ्चारानुसारेणैव स्वचक्षुरितस्ततः प्रसारयन्त्येति यावत्, मुग्धया तदानीं नवयौवनसम्पन्नतया अतिमनोरमया, सीतयेति शेषः, (मुग्धालक्षणं यथा साहित्यदर्पणे—"प्रथमावतीर्णयौवनमदनविकारा रतौ वामा। कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥" इति) करकिसलयाभ्यां करपल्लवाभ्यां सम्पादितैः तालैः कालक्रियापरिमाणैः, करतलसंयोगजशब्दसूचितैः कालपरिमाणैरिति यावत्, ("तालः कालक्रियामानम्" इत्यमरः) नर्त्यमानं सम्पाद्यमानताण्डवं, त्वां सुतमिव वत्सलेन स्नेहमयेन मनसा स्मरामि। पुरा कुतुकपरवशया प्रियतमया करपल्लवतालैर्यो नर्त्तितः सोऽयं शिखिशावकः कालेनान्यथा परिणततया प्रियायाः पुत्रक इत्यतिवत्सलं मां स्वकीयां पुरातनीं दशामिदानीं स्मारयतीति भावः। [अत्र स्वभावोक्तिरलङ्कारः, तथा "करकिसलय" इत्यत्र लुप्तोपमा, चतुर्थपादे च श्रौती उपमा, इत्येषां परस्परमङ्गाङ्गिभावेन सङ्करः। केचित्त्वत्र स्मरणालङ्कारमप्याहुः]। अत्र मालिनी वृत्तम्, तल्लक्षणं यथा—"ननमयययुतेयं मालिनी भोगिलोकैः" इति। प्रस्तारादिकन्तु पूर्व्वमुक्तम्॥ १९॥

(त) हन्तेति।—हर्षसूचकमव्ययं, ("हन्त वाक्यारम्भखेदविषादहर्षसम्भ्रमे" इति मेदिनी)। तिर्य्यञ्चोऽपि—तिर्य्यग्जातयः पक्षिणोऽपि। परिचयं—संस्तवं, विशेषतो ज्ञाननिवहम्। अनुरुध्यन्ते—अनुसरन्ति, स्मरन्ति इत्यर्थः। [दैवादिकस्य रुधधातोः

कतिपयकुसुमोद्गमः कदम्बः ।
प्रियतमया परिवर्द्धितो य आसीत् ।

सीता । [निरूप्य सास्रम्] । सुट्ठु पच्चभिआणिदं अज्जउत्तेण * ।(थ)

राम ।—स्मरति गिरिमयूर एष देव्याः
स्वजन इवात्र यतः प्रमोदमेति ॥ २० ॥

* सुष्ठु प्रत्यभिज्ञातमार्य्यपुत्त्रेण ।

रूपमिदम्] तिर्य्यग्योनिसम्भवोऽप्ययं शिखिशावकः वनवासकालोचितमस्मदीयपरिचयं साम्प्रतमपि अनुस्मरन् साधुतरव्यवहारेणास्मान् सुखयतीति महदाश्चर्य्यमिति भावः ।

(थ) निरूप्य—स एवायं कदम्बो न वेति तत्त्वतो निश्चित्य । सास्रम्—अश्रु-सहितमित्यर्थः, पूर्वपरिचितकदम्बपादपदर्शनेन समुद्दीपितपूर्ववृत्तान्ताया सीतायाः शोकोदयात् अश्रुपात इति बोध्यम् । सुष्ठु—सम्यक् । प्रत्यभिज्ञात—उद्दीपकसह-भावेन सम्मृतम् , स एवायं कदम्बतरुरिति सत्यमेव इति भावः ।

मानवेतरजातीयानां तिरश्चामपि पूर्वपरिचयानुस्मरणरूपं यदिदं पूर्वमुक्तं, तदेव सम्प्रति समर्थयमान आह, कतिपयेति ।—कतिपयानां कियतां, स्वल्पानामित्यर्थः, कुसुमानां पुष्पाणाम्, उद्गमः उद्भवः यस्मिन् स तथोक्तः, विरलकुसुमालङ्कृत इत्यर्थः, स्वल्पावयवत्वादिति भावः, यः कदम्बः तदाख्यः वृक्षविशेषः, प्रियतमया सीतया, परिवर्द्धितः जलसेचनादिना वृद्धिं नीतः, परिपालित इति यावत्, आसीत्, एष पुरतः परिदृश्यमानः, गिरिमयूरः गिरिचरः गिरिप्रियो वा मयूरः इति गिरि-मयूरः पर्वतविहारी शिखण्डीत्यर्थः, [अत्र शाकपार्थिवादित्वादुत्तरपदलोपी समासः । इह मयूरमात्रकथनेनैवार्थसिद्धौ गिरिमयूर इति कथनात्—"भूधरशिखराणा-मत्युन्नतानां प्रियतरजलधरान्तिकावस्थिततया निरुपद्रवतया च अतिप्रियत्वात् तत्र नियतमवस्थितोऽपि आशैशवम् एतस्य एकयैव जनकतनयया संवर्द्धिततया बाल्य-सुहृदमेतं कदम्बपादपमाश्रित ततोऽपि अधिकतरं सुखमधिगच्छति" इत्यर्थो व्यज्यते]। देव्याः सीतायाः, तं कदम्बतरुमिति शेषः, स्मरति इदानीमपि प्रत्यभि-जानातीत्यर्थः , अथवा—एष गिरिमयूरः देव्याः सीतायाः स्मरति देवीं सीतां स्मरतीत्यर्थः, [देव्या इत्यत्र "अधीगर्थदयेशां कर्म्मणि" (२।३।५२ पा०) इति कर्म्मणि शैषिकी षष्ठी] बाल्ये पुत्त्रवत् परिपोषयित्र्याः मातृतुल्यायाः सीतादेव्याः स्मरणं विना कथं तत्परिवर्द्धितेऽस्मिन् कदम्बपादपेऽस्य वृद्धिगतानन्दलाभः ? इति भावः ।

वासन्ती। अत्र तावदासनपरिग्रहं करोतु देवः। (द)—

एतत् तदेव कदलीवनमध्यवर्त्ति
कान्तासखस्य शयनीयशिलातलं ते।
अत्र स्थिता तृणमदाद् बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

ननु कथं त्वयैव सम्भाव्यते? इत्याह,—यत यस्मात् हेतोः, अत्र कदम्बतरौ, स्वजने इव स्वनाहतुल्यसीतापरिवर्द्धितत्वात् आत्मीयजने इव, यथा,—"स्मरति गिरिमयूर एष" इत्येकं वाक्यं, तथा "देव्या, स्वजन इवात्र यतः प्रमोदमेति" इत्यपरं वाक्यम्; तथाच "एष गिरिमयूरः तं कदम्बञ्च स्मरति, यतः अत्र देव्या स्वजन इव प्रमोदमेति" इत्येवमन्वयः। प्रमोदम् आनन्दम्, एति प्राप्नोति, अनुभवतीति यावत्। पूर्वं वनवासदशायां सीतादेवी यमिमं शिखिशावकं कदम्बपादपञ्च तमेव स्वेच्छा-हारपानदानादिभिः सलिलसेचनादिना च अपत्यनिर्विशेषं पुपोष, यौ च चिरमेकत्राव-स्थानसम्भूतभ्रातृभावाविव परमानन्दमनुभवन्तौ कालं निन्यतुः, तयोरयं शिखि-शावकः सम्प्रति विहाय अपरान् सुखसम्भोगोचितान् पा-पपर्वतादीन् प्राक्तनप्रणय-वशेनाकृष्टः तमेव कदम्बपादपमाश्रितः सुहृत्समागमसुखमनुभवन्निव नन्दतीति समुदितार्थः। [अत्र तृतीयपादगतवाक्यार्थं प्रति चतुर्थपादगतवाक्यार्थस्य हेतुतयोप-न्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथा "स्वजन इव" इत्यत्र उपमा च, इत्यनयोः परस्परनिरपेक्षतया संसृष्टिः]। पुष्पिताग्रा वृत्तम् ॥ २० ॥

(द) अत्रेति।—एतस्मिन् परिदृश्यमाने शिलातले इत्यर्थः। तावत्—अव-धारणे, एतस्मिन्नेव इत्यर्थः, ("तावन्मानेऽवधारणे" इति मेदिनी)। देव,—भवान् रामचन्द्र इति यावत्। आसनपरिग्रहं करोतु—उपविशतु इत्यर्थः।

अथ वासन्ती रामस्य उपवेशनार्थं यदेव शिलातलं निर्दिदेश, तत्रैवोप-वेशनस्य हेतुप्रदर्शनपुरःसरं सम्प्रति तदेव शिलातलं विवृणोति, तथा रामेण तिरश्चा-मपि पूर्वपरिचयकारणत्वेन यदुक्तं, तदपि द्रढयति, एतदिति।—कान्तासखस्य प्रियासहचरस्य, सीतासङ्गतस्येत्यर्थः, ते तव, एतत् परिदृश्यमानं, तदेव पूर्वाभ्यस्तमेव, प्रागध्युषितमेवेति यावत्, कदलीवनमध्यवर्त्ति रम्भाकाननपरिवृतनिलयं, [कदलीनां वनस्य मध्ये वर्त्तते यत् तदिति विग्रहः] शयनीयशिलातलं शय्याभूतं शिलाखण्डं, वर्त्तते इति शेषः, [अत्र शेते अस्मिन् इति शयनीयं "कृत्यल्युटो बहुलम्" (३।३।११३ पा०) इति शीङः अधिकरणे अनीयर्]। पूर्वं प्रियासङ्गतावस्थायां भवान्

राम। इदं तावदशक्यमेव द्रष्टुम्। (ध)

[इति अन्यतो रुदन्नुपविशति]। (न)

सीता। सहि वासदि! किं तुए किदं अज्जउत्तस्स मम अ एदं दसअंतीए? हद्धी! हद्धी! सो ज्जेव अज्जउत्तो, तं ज्जेव पंचवटीवणं, सा ज्जेव पिअसही वासदी, ते ज्जेव विविह-विस्सम्भसाक्खिणो गोदावरीकाणणुद्देसा, ते ज्जेव जादणिव्विसेसा मिअपक्खिपादवा, सा ज्जेव चाहं, मम उण मदभाइणीए

---

* सखि वासन्ति! किं त्वया कृतमार्य्यपुत्रस्य मम च एतद्दर्शयन्त्या? हा धिक्! हा धिक्! स एव आर्य्यपुत्र, तदेव पञ्चवटीवन, सैव प्रियसखी वासन्ती, त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशा, त एव जातनिर्विशेषा

यत्र शयाना वनवासजमपि दुःख विसस्मार, सम्प्रति तस्मिन्नेव उपविष्ट क्षणं पूर्ववृत्त-स्मरणसुखमनुभवन्त्स्मि लभतामिति भाव। ननु तदेवैतदस्मदध्युषित शिलातलमिति कथ त्वया परिचीयते? इत्याह, यत्रेति।—यत् यस्मात्, सीता जानकी, अत्र अस्मिन् शिलातले, स्थिता उपविष्टा सती, तेभ्य पुरोवर्त्तिभ्यो हरिणकेभ्य इति यावत्, बहुश बहुवार, ["बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्" (५।४।४२ पा०) इति शस्प्रत्यय] तृण शष्पम्, अदात् दत्तवती, भक्षणार्थमिति शेष, तत तस्मात् कारणात्, हरिणकै कुरङ्गकै, इदानीमपि सीताप्रदत्तशष्पलाभाशया उपस्थितैरिति यावत्, न विमुच्यते अद्यापि न परित्यज्यते, एतत् शिलातलमिति शेष। (अत्र स्म इति पादपूरणे 'तु हि च स्म ह वै पादपूरणे—" इत्यमराक्ते। प्रकृते अस्य अतीतत्वबोधकत्वन्तु न युज्यते, इदम प्रत्यक्षरूपतया परिदृश्यमानानामेव मृगाणामपरित्यागकथनादिति ध्येयम्)। वसन्ततिलक वृत्तम्। लक्षणादिकन्तूक्तं प्राक्॥ २१॥

(ध) इद पुरत परिदृश्यमान शिलातलम्। तावत्—वाक्यालङ्कृतौ, साकल्ये वा। द्रष्टुमशक्य—सीतया सह कृताना तत्तद्रह क्रीड़ादीना स्मारकतया दु सहशोकोद्दीपकत्वात् दर्शनायोग्यमिति यावत्।

(न) इति—एवमुक्त्वेत्यर्थः। अन्यत,—अन्यस्मिन् प्रदेशे, तादृशशोकोद्दीपकत्वेन द्रष्टुमप्यशक्येऽस्मिन् शिलातले उपवेशनस्य अयुक्ततया ततोऽपरस्मिन् एव उपवेशन कुर्वन् इति भाव.।

दीसत पिं सव्वं ज्जेव एदं णत्थि त्ति, ता ईदिसो जीअलोअस्स परिअत्तो *। (प)

मृगपक्षिपादपा, सैव चाहं, मम पुनर्मन्दभागिन्या दृश्यमानमपि सर्वमेवैतत् नास्तीति, तदीदृशो जीवलोकस्य परिवर्त्तः।

(प) त्वया—भवत्या। किं कृतम् ?—किमनुष्ठितम् ? एकपदत्वे—कुत्सित कृतमिति। आर्य्यपुत्त्रस्य—स्वामिन रामचन्द्रस्य मम—सीतायाश्च [उभयत्र सम्बन्धमात्रविवक्षया षष्ठी] एतत्—शिलातलम्, शिलातलप्रदर्शनेन आवयो शोकसमुद्दीपयन्त्या त्वया मद्दनिष्टमनुष्ठितमिति भाव। विविधविस्रम्भसाक्षिण,—विविधाना नानाप्रकाराणां विस्रम्भाणाम् असङ्कुचिताऽऽहारविहारादिव्यापाराणां साक्षिण साक्षाद्द्रष्टार.। गोदावरीकाननोद्देशा,—गोदावर्य्या तन्नामसरित काननोद्देशा वनभूमय.। जातनिर्विशेषा,—जातिभ्य पुत्त्रेभ्य नि नास्ति विशेष प्रभेदो येषा ते तथोक्ता, पुत्त्रतुल्यानन्दजनका इत्यर्थ। मृगपक्षिपादपा —मृगा पशव [मृग्यन्ते अन्विष्यन्ते ये ते मृगा इति व्युत्पत्त्या पशुमात्रे मृगशब्द प्रयुज्यते, तथाच "मृग पशौ कुरङ्गे च करिनक्षत्रभेदयो" इति मेदिनी] पक्षिण खगा पादपा वृक्षाश्च, सन्तीति शेष:। पुन,—किन्तु। मन्दभागिन्या,—हतभाग्याया, मम सम्बन्धे इत्यन्वय। दृश्यमानमपि—चक्षुर्विषयभूतमपि। एतत्—पुरोवर्त्ति। सर्वमेव—सकलमेव, पञ्चवटीगोदावरीप्रभृतिकमित्यर्थ। नास्ति—सुखोत्पादकत्वरूपेण न वर्त्तते इवेत्यर्थ, स्वरूपत सदप्येतत् पञ्चवटीगोदावरीप्रभृतिक प्रागिव इदानीम् आनन्दाजनकतया असदिव प्रतिभातीति भाव। अथैव्य विलपन्ती जनकनन्दिनी सुखदुःखयो चक्रनेमिक्रमेण अपरिवर्त्तिताइव जगतत्त्व मनसा पर्य्यालोच्य आत्मान सान्त्वयन्ती आह, तदिति।—तत्—तस्मात्, पूर्वमत्यानन्दप्रदानामपि एषा सम्प्रति आनन्दानुत्पादकत्वादित्यर्थ। ईदृश,—एतादृश। जीवलोकस्य—भुवनस्य। परिवर्त्त,—दशाविपर्य्यास, मदीयदशाविपर्य्ययेण इव जगतामपि गुणविपर्य्यय इति भाव। [अत्र पूर्वमपारानन्दसन्दोहजनकतया तद्धेतुत्वेन सुपरिचितानामप्येतेषां वन-नदीप्रभृतीनाम् इदानीं मदजनकत्वात् विशेषोक्तिरलङ्कार, तथा तेषा प्रत्यक्षपरिदृश्यमानतया स्वरूपत सत्त्वेऽपि सम्प्रति पूर्ववदानन्दोत्पादनरूपकार्य्यकारित्वाभावात् "नास्तीति" इत्यनेन असत्तया सम्भावनाद् उत्प्रेक्षा, सा च इवादिशब्दावाच्यतया प्रतीयमाना इति ध्येयम्]।

वासन्ती। सखि सीते ! कथं न पश्यसि रामस्य अवस्थाम् ? (फ)—

कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्सवं
सततमपि ते स्वेच्छादृश्यो नव नवमेव यः।
विकलकरणः पाण्डुः सोऽयं शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशां प्रियः॥ २२॥

(फ) अवस्था—दशाम्। तदर्थमेव सकरुण विलपन्तमिमं रामचन्द्र यदि पश्ये तदा नून त्वमप्यात्मानं बहु मन्यमाना एनं सान्त्वयितुमात्मानं नियोजये-रिति भाव.। सीता दृष्टा नैषा वासन्त्युक्ति., किन्तु तामुद्दिश्यैव, भागीरथीवरात् रामवद्वासन्त्या अपि सीतादर्शनासामर्थ्यादिति तु उक्तप्रायम्।

वासन्ती जनकतनयामुद्दिश्य यदिदमुक्तवती "कथं न पश्यसि रामस्यावस्थाम्" इति, सम्प्रति तामेव प्रियाविरहमलिनामतिशोचनीयां रामस्य अवस्थामुपवर्णयन्ती आह, कुवलयेति।—सततमनुवेलं, निवाधमित्यर्थं, ते तव, [अत्र "न" इति पाठे—अस्माकमित्यर्थ.] स्वेच्छया इच्छामात्रेण दृश्योऽपि द्रष्टुं शक्योऽपि, यथाऽस्य दृश्यमानोऽपीत्यर्थ., यो राम, कुवलयदलस्निग्धैः नीलोत्पलदलकोमलैः, अङ्गैरवयवैः, नव नवमेव अननुभूतपूर्वमेव, [नवं नवमित्यत्र वीप्साया द्विभाव] नयनयो नेत्रयो, उत्सवम् आनन्दं, ददौ वितताार। एवम्भूतमधुरमूर्त्ति य आसीदिति यावत्, आकाङ्क्षा मात्रेणैव सुलभदर्शनतया मुहुरवलोक्यमानोऽपि सहजालौकिकसौन्दर्यातिशयवशेन प्रतिदर्शनम् अभिनवत्वेन प्रतीयमानतया नित्यं नूतनमेव नयनामोदमाततानेति निष्कर्ष.। [अत्र "ददन्नयनोत्सवम्" इति पाठे—नयनोत्सवं ददत् य सततमपि ते स्वेच्छादृश्य आसीदिति अन्वयो बोध्य, "लट शतृशानचावप्रथमासमानाधिकरणे" (३।२।१२४ पा०) इति शतृप्रत्ययश्च वेदितव्य]। स तादृशो मधुरमूर्त्तिरित्यर्थ, अय पुरोवर्त्ती राम, शुचा त्वद्विरहशोकेन, (इदन्तु देहलीदीपन्यायेन "विकलकरण" इत्यादिषु त्रिष्वेव हेतुविधया अन्वेति) विकलकरण विवशेन्द्रिय, पाण्डु धूसरवर्ण, मलिनकान्तिरित्यर्थ, ["पाण्डु सोऽयम्" इत्यत्र "पाण्डुच्छाय" इत्यपि पाठो दृश्यते, तत्रापि मलिनकान्तिरित्येवार्थ, "छाया सूर्यप्रिया कान्ति प्रतिबिम्बमना-तप" इत्यमर] परिदुर्बल अत्यन्त कृश, स इति स एवायमिति, कथमपि कथञ्चित्, अतिकष्टेनेत्यर्थ, उन्नेतव्य अभिज्ञातव्य, तथापि दुःसहप्रबलशोकसन्तापेन क्षीण-मलिनाकृतिरपि, दृशां चक्षुषाम्, [अत्र "दृशो" इति पाठे—नयनयोरित्यर्थ, चक्षु-रादीन्द्रियाणां द्वित्वावच्छिन्नजातितया इह द्विवचन बोध्यम्] प्रिय. प्रीतिकर.। एव·

सीता। पेक्खामि सहि! पेक्खामि। * (ब)

तमसा। पुत्रि! पश्यन्ती प्रियं भूयाः। (भ)

सीता। हा देव्व! एसो मए विणा अह्मपि एदेण विणा त्ति सिविणे वि केण संभाविद आसी? ता मुहुत्तकं पि जम्मंतरादो विअ अणुलद्धदंसणा वाहसलिलंतरेसु पेक्खामि दाव वच्छलं अज्जउत्तं †। [इति रुदती पश्यति]। (म)

---

* प्रेचे सखि। प्रेचे।

† हा दैव! एष मया विना अहमप्येतेन विनेति स्वप्नेऽपि केन सम्भावित-मासीत्? तन्मुहूर्त्तकमपि जन्मान्तरत इव अनुलब्धदर्शना वाष्पसलिलान्तरेषु प्रेचे तावद्वत्सलमार्य्यपुत्रम्।

मनोज्ञसाधारणमधुरतराकृतिरयं रघुनन्दनः दुःसहविरहतापचोषमलिनोऽपि लोको-त्तरमधुराकृतितया सर्वास्वेवावस्थासु प्रियदर्शनं लोकलोचनानन्दमुत्पादयन् "उदेति सविता ताम्रः ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता॥" इति सत्यं पमाणयतीति भावः। [अत्र मलिनकान्तिकृशतादिकारणानां सत्त्वेऽपि दृशा-नप्रियत्वरूपकार्य्यस्याभावात् विशेषोक्तिः, अथवा पाण्डुच्छायाकृशताद्यभावरूप-कारणाभावसत्त्वेऽपि प्रियदर्शनत्वरूपकार्य्यस्य उत्पत्तिकथनात् विभावना, एवं विभावनाविशेषोक्तिमूलकः सन्देहसङ्करो नामालङ्कारः, तथा "कुवलयदलस्निग्धैः" इत्यत्र लुप्तोपमा चेति सुधीभिर्विभाव्यम्]। हरिणी वृत्तम्। तल्लक्षणं यथा—"नसमरसला गः षड्वेदैर्हयैर्हरिणी मता" इति। "वितरति गुरुः" इति श्लोके प्रस्तारोऽटिक द्रष्टव्यम्॥ २२॥

(ब) सीता "सखि सीते! कथं न पश्यसि?" इत्यादि वासन्तीवचनस्य प्रत्युत्तरमाह, प्रेचे इति।—प्रेचे—पश्यामि [अत्र द्विरुक्त्या प्रेचणे निश्चयो बोध्यते, प्रेचे एव इति तदर्थः] आर्य्यपुत्रस्य ईदृशीं दुरवस्थां पश्याम्येव, किन्तु प्रतीकारा-समर्थया मया दृष्टापि किमनर्थेरम्? इति भावः।

(भ) पुत्रि।—हे तनये! वत्से इत्यर्थः। प्रियं—रामम्। पश्यन्ती—प्रेचमाणा। भूयाः,—भव, निरन्तरं प्रियं प्रेचस्व, पुनरपि प्रियेण समागमो भवतु इति भावः। [अत्र "पश्य प्रियं भूयः" इति पाठे—भूयः,—पुनः पुनरित्यर्थः। प्रियं—रामनित्यर्थः]।

(म) हेति।—हा—इति विषादे। ("हा विषादे च शोके च कुत्साद् खादयोः

रामश्च। [सस्नेहास्र परिष्वज्य]। (य)—

रपि" इति मेदिनी)। दैव।—विधात।, धप,—धार्य्येणस्य नाम। मया विना—मम साहचर्य्यम् ऋते, अवतिष्ठेत इति शेष। अहं—सीता अपि। एतेन विना—आर्य्यपुत्रविरहिता इत्यर्थ, अवतिष्ठेयेति शेष। इति—इत्थम्। केन—जनेनेत्यर्थ। स्वप्नेऽपि—सुप्तिदशायामपि। उत्प्रेक्षितम्—उत्प्रेक्षितम्? न केनापि इत्यर्थ। स्वप्ने हि सामर्थ्यादसम्भवदपि वस्तु अनुभवविषयतामापद्यते, आवयोस्तु जीवतोर्विरहसम्भावना केनचित् सुप्तिदशायामपि न कृता, तदप्यो। दैवदुर्विपाकात् स्वप्नेऽप्यसम्भवत् तदेव आवयो सम्प्रति सञ्जातमिति भाव। तत्—तस्मात्, चिरविरहानन्तर भाग्यात् साक्षात्कारलाभादित्यर्थ। मुहूर्त्तकमपि—अल्पक्षणमपि व्याप्येत्यर्थ, भाग्यविपर्य्ययात सुचिरावलोकनासम्भवादिति भाव। [अल्पो मुहूर्त्त इति मुहूर्त्तक तम, "अल्पे" (५।३।८५ पा०) इति मुहूर्त्तादल्पार्थे कन्, तत "कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति द्वितीया]। जन्मान्तरत इव—अन्यस्मिन् जन्मनि इव इत्यर्थ, [अन्यत् जन्म इति जन्मान्तर तस्मिन् "आद्यादिभ्य उपसंख्यानम्" (वा०) इति सप्तम्यास्तसि। अत्र "जन्मान्तरात्" इत्यपि पाठो दृश्यते, जन्मान्तर प्राप्य इति तदर्थ, तत्र "ल्यब्लोपे कर्म्मण्यधिकरणे च" (वा०) इति ल्यब्लोपे पञ्चमी]। अनुलब्धदर्शना—पुन प्राप्तसाक्षात्कारा, अहमिति शेष। [अनुलब्धं दर्शन यया सा इति विग्रह। अत्र "लब्धदर्शनम्" इति पाठे—लब्ध दर्शन यस्य तथोक्तम् इति विग्रहेण एतत् "आर्य्यपुत्रम्" इत्यस्य विशेषणम्]। वाष्पसलिलान्तरेषु—वाष्पसलिलानां नयनजलानाम् अन्तरेषु पतनोद्गमनयोरवकाशेषु। वत्सल—मयि नितरामनुरागिणम्। प्रेक्षे—पश्यामि। का कथा समागमस्य? क्षणिकदर्शनस्यापि अतिदुर्लभतया, भाग्यलब्धेन तेनैव सम्प्रति आत्मान तर्पयामीति भाव। इति—इत्थ निश्चित्य। सतृष्ण—साग्रहम्, यथा पिपासाऽऽकुलकण्ठ पानीयमधिगत साग्रह सन् पिबति, तथा सीताऽपि चिरविरहकातरतया भाग्याल्लब्ध त प्राणप्रियतम सादरमवेक्षते इति तात्पर्य्यम्।

(य) सस्नेहास्र—स्नेहेन सीता प्रति वात्सल्येन यद् अस्र नयनाम्बु तेन सहित यथा स्यात् तथा। परिष्वज्य—आलिङ्ग्य, [परिपूर्वात् स्वजतेर्ल्यप्, तत: "उपसर्गात् सुनोतिसुवतिस्यति—" (८।३।६५ पा०) इति षत्वम्]।

विलुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती तृष्णयोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः॥ २३॥

वासन्ती। ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।

चिरविरहकातरामतितरां पतिध्यानपरां जानकीं सुचिरकालात् परमद्य स्वामिसाक्षात्कारलाभादनन्यमनसा तदेकबद्धदृष्टिमालोक्य तमसा तदीयां तदानीन्तनीमवस्थाम् उपवर्णयन्ती आह, विलुलितेति।—आनन्दशोकप्रभवं स्वामिसन्दर्शनजनितात् आनन्दात्, विरहजनितात् तथा पुनर्मिलनाभावसम्भावनसमुत्थात् शोकाच्च प्रभव उत्पत्तिर्यस्य तं तथोक्तं, युगपदानन्ददुःखसमुत्थमिति यावत्, यद्वा—प्रभवति अस्मादिति प्रभवं कारणम्, आनन्दशोकौ प्रभवं कारणं यस्य तं तथोक्तम्, अतिपूरैः प्रवाहवेगैः, विलुलितं विगलितं, बाष्पमश्रु, अवसृजन्ती अभिवर्षन्ती, तृष्णया शश्वद्दर्शनेच्छया हेतुना, उत्ताना विस्फारिता अत एव दीर्घा च दूरविलम्बिता च, निश्चलत्वाद्दीर्घेव प्रतीयमाना इत्यर्थः, स्नेहनिष्यन्दिनी स्नेहसूचिका, धवलबहला अञ्जनराहित्यात् अतिशयशुभ्रा, मुग्धा मनोहारिणी च, अत एव दुग्धकुल्येव पयःपूरितकृत्रिमाल्पसरिदिव प्रतीयमाना, ("कुल्याल्पा कृत्रिमा सरित्" इत्यमरः) ते तव, दृष्टिः दर्शनं, हृदयेशं जीवितेश्वरं रामं, स्नपयति आप्लावयति। ["दुग्धकुल्येव" इत्यत्र प्रकृताया दृष्टेः शुभ्रतातिशयसाम्यात् पयःपूरितकृत्रिमाल्पसरिद्रूपेण सम्भावनादुत्प्रेक्षानामालङ्कारः, एवं यथा काचित् कञ्चित् स्नपनार्थं स्नेहद्रव्येण समभिलिप्य जलं वर्षति, तद्वत् तव दृष्टिः रामं स्नेहेन संयोज्य नेत्रजलं वर्षतीति दृष्ट्या कञ्चित् पुमांसं स्नपयन्त्याः कस्याश्चिन्नायिकाया व्यवहारसमारोपात् समासोक्तिः। किञ्च दृष्टेः स्नपनकर्तृत्वासम्बन्धेऽपि तत्सम्बन्धकथनादतिशयोक्तिरित्येतेषां परस्परमङ्गाङ्गिभावेन सङ्करः]। मालिनी वृत्तम्॥ २३॥

अथ वनभूमेरधिष्ठात्री देवी वासन्ती सुचिरकालानन्तरं प्रियसहचरं स्वभवनमिव वनभूमिमागतं प्रियातिथिं सीतापतिं सत्कर्तुं निदेशवर्तिनः अनुचरानिव पादपपवनादीन् उचितमातिथ्यमुपकल्पयितुं यथाक्रममादिशति, ददत्विति।—तरवो वृक्षाः, मधु च्योतन्तीति मधुश्च्युतः [यद्यपि चरणार्थकस्य च्युतधातोरकर्मकत्वं सिद्धं, तथापि क्वचित् सकर्मकताप्यस्य कविभिरङ्गीकृता, तथाच "रक्तनयोनितु च्युताः" इति भट्टौ (१५।५१), मालतीमाधवे च—"निश्चोतन्ते सुतनु कवरीविन्दवो यावदेते"

कलमविरलं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः ॥ २४ ॥

इति । अत "मधु यौतिति एभ्य" इति व्युत्पत्ति माधीरमी इति] मधुसंवलित मन्त्र, [एतेन मधुरकल्पनमपि सूच्यते] पुष्प स्रोतोपत्रे कुसुमे फलैश्च करणैरर्घ्य पूजासाधनं, मधुयुतानि पुष्पाणि फलानि चेत्यर्थ, ददतु, रामायेति शेष । स्फुटितानां विकसितानां कमलानां पद्मानाम् आमोदस्य सौरभस्य प्राज्यो बाहुल्यं येषु ते तथोक्ताः [एतेन वायौ सौरभातिशय्यं दर्शितम्] ("आमोदः सोऽतिनिर्हारी" इति "प्राज्यो भूरिप्रयोगमने" इति चामरः) वनानिला अरण्यवाताः अथवा सलिलवाताः, ("वनं नपुंसकं नीरे निवासालयकानने" इति मेदिनी) [एतेन शैत्यमप्युक्तम्] प्रवान्तु प्रकृष्टं सुखकरं, मन्दमिति यावत्, वहन्तु रामस्य शरीरसन्तापमपनेतुमविश्रान्तं धीरसञ्चारेण एव वीजयन्त्वित्यर्थः । रत्या प्रिया गमनसमुद्भूतेन अनुरागभरेण उत्कण्ठा उज्जनितशोभा इत्यर्थ, [उत् ऊर्ध्वगता कण्ठा येषां ते तथोक्ता इति विग्रहः] यद्वा—रत्या क्रीडायां सुरते वा उत्कण्ठा औत्सुक्यं येषां ते तथोक्ताः, कालवशात् परस्परं कामक्रीडासक्ताः इति यावत्, [एतेन सुमधुरध्वनित्वं व्यज्यते] शकुन्तयः पक्षिणः, ("शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः" इत्यमरः) अविरलम् अविश्रान्तं, कलं मधुरं यथा तथा, क्वणन्तु गायन्तु, स्वकीया स्फुटमधुरध्वनिना गृहागतं महाराजं स्तुतिपाठका इव स्तुतिगीतिमङ्गलैः तोषयन्तु इति भावः । कुतः ? इत्याह, पुनरिति ।—देवो भगवान्, अयं रामः, स्वयम् आत्मना, पञ्चवटीवसतिसुखलाभाय सम्प्राप्तं स्वप्रार्थनापरिचालित इति यावत्, ["प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) इति तृतीया] पुनः भूयः, इदं वनमागतः । राज्ञो रामस्य सम्माननार्थं तरवः अर्घ्यभाजनधारिणः, वरीवरवाताः व्यजनकारिणः, पक्षिणश्च वैतालिका भवन्त्विति भावः । वनाधिदेवतात्वात् वासन्त्या कथितमेतद् युक्तमेव [यथा कश्चिन्नरपतिः स्वभवनमागतमतिथिभूतमपरं कञ्चन नरनाथं स्वागतवचनैरभ्यर्च्य फलजलकुसुमादिविरचितमर्घ्यपात्रमधुपर्कमुपकल्प्य शीतसुरभिव्यजनैर्मन्दमुपवीज्य मागधैश्चार्थोपकलापं घोषयन्नुपचरति, तथा इयमपि वनाधिष्ठात्री देवी वासन्ती स्वनिर्देशवर्तिभिः पवनपादपादिभिः तानि तानि सम्पाद्य रामं तोषयतीति वस्तु व्यज्यते, इति शब्दशक्तिमूलो वस्तुध्वनिः । अत्र पूर्वपादत्रितयगतवाक्यार्थानाम् अर्घ्यदानादीनां प्रति रामागमनरूपचतुर्थपादगतवाक्यार्थस्य हेतुत्वेन निर्देशात् काव्यलिङ्गमलङ्कारः]। हरिणी वृत्तम् ॥ २४ ॥

राम। एहि सखि वासन्ति। नन्वितः स्थीयताम्। (र)

वासन्ती। [उपविश्य सास्रम्]। महाराज। अपि कुशलं कुमार-लक्ष्मणस्य? (ल)

राम। [अश्रुतिमभिनीय]। (व)—

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्य ॥ २५ ॥

(र) सखि!—सहचरि! एहि—इत आगच्छ। "ननु" इति—अनुज्ञायाम् अनुनये वा ("ननुशब्दो विनियहे। अनुप्रश्ने परकृतावधिकारे च सम्भ्रमे। आमन्त्रणेऽप्यनुनये प्रश्नानुज्ञाऽवधारणे॥" इति मेदिनी)। इतः,—अस्मिन्, पुरोवर्त्तिनि स्थाने इत्यर्थः। स्थीयताम्—उपविश्यताम्।

(ल) सास्रम्—सनयनजलम्, पूर्ववृत्तान्तस्मरणेन वासन्त्या अश्रुपातः। अत्र अपिशब्दः प्रश्नबोधकः, ("अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये" इति मेदिनी)। "महाराज!" इति वासन्त्या निष्ठुरणमामन्त्रणपदम्। (सुचिरमेकत्र वासेन एतयोरुभयोः निरतिशयप्रणयसद्भावेऽपि सम्प्रति वासन्ती प्राणाधिकप्रियतमायाः सहचर्य्याः सीतायाः अकारणनिर्वासनवृत्तान्तश्रवणेन अतिदुःखिता उदासीना इव प्रणयपात्रेऽपि रामे कठोरमामन्त्रणमभिहितवतीति बोध्यम्)। कुशलं—मङ्गलम्। कुमारलक्ष्मणस्य—कुमारस्य सौमित्रेः, (पूर्व-मरण्यवासकाले ससीतालक्ष्मणेन रामेण परिचये प्रणये च जातेऽपि सर्व्वतोऽधिक-प्रेमास्पदायाः सीतायाः कुशलप्रश्नं पूर्वमकृत्वा केवलं लक्ष्मणस्य कुशलप्रश्नकरणेन वासन्ती "एतावता कालेन निर्वासितायाः सीतायाः मरणावश्यम्भावात् तत्कुशलप्रश्नो निरर्थक एव" इति मनोभावं व्यनक्तीति। वनमध्ये एकाकिनीं सीतां परित्यक्तवतः लक्ष्मणस्य कुशलप्रश्नं वासन्त्या तिरस्कारगर्भा सोल्लुण्ठनोक्तिरिति बोध्यम्)।

(व) अश्रुतिम्—अनाकर्णनम्। अभिनीय—अभिनयेन प्रकाश्य, वासन्त्या-भिहितं सोल्लुण्ठवचनं श्रुत्वाऽपि अश्रुत्वा इवेत्यर्थः, आह इति शेषः।

अतिदुःखदायाः निर्व्वासनवार्त्तायाः निष्कारणनिर्वासनवार्त्ताश्रवणात् सीतायाः वासन्त्याः रामाभिमुखमनुयोगपथगतमनु श्रमनभीष्टमावेदयन्ति विषयान्तरमुप-क्षिपति, करकमलेति।—सीरध्वजस्य मिथिलाऽधिपतेर्जनकस्य अपत्यं स्त्री इति मैथिली

वासन्ती। महाराज! ननु पृच्छामि, अपि कुशलं कुमारलक्ष्मणस्य? (ग)

राम। [स्वगतम्]। अये! महाराजेति निष्प्रणयमामन्त्रणपदं, सौमित्रिमात्रे च बाष्पस्खलिताक्षरः कुशलप्रश्नः, तथा मन्ये विदितसीतावृत्तान्तेयमिति। [प्रकाशम्]। आं कुशलं कुमारस्य। (घ)

[इति रोदिति]।

जानकी [मिथिलायां भवः इति मैथिलः "तस्येदम्" (४।३।१२० पा०) इति अण्प्रत्ययः, ततः मैथिलस्य अपत्यं स्त्री इति मैथिली "अत इञ्" (४।१।९५ पा०) इति अपत्यार्थे इञ्, ततश्च "इतो मनुष्यजातेः" (४।१।६५ पा०) इति ङीप्] करः कमलमिव निरतिशयकोमलतया रक्तवर्णतया च पद्ममिव तेन वितीर्णैः दत्तैः अम्बुनीवारशष्पैः जलतृणधान्यनवोद्गततृणैः करणैः ("तृणधान्यानि नीवाराः" इति "शष्पं बालतृणम्" इति चामरः) यान् तरुशकुनिकुरङ्गान् वृक्षपक्षिहरिणान्, यथासंख्यम् अन्वयः,—सलिलसिक्तैः पादपान्, तृणधान्यैर्विहगान्, कोमलतृणैः हरिणान् इत्यर्थः। अपुष्यत् पपोष। तेषु तरुशकुनिकुरङ्गेषु दृष्टेषु सत्सु, ममेति शेषः, प्रस्तरस्य पाषाणस्य उद्भेदे उद्भिद्य द्रवीकरणे योग्यः समर्थः द्रव इव कोऽपि अनिर्वचनीयः इत्यर्थः, मम हृदयस्य चित्तस्य विकारः शोकादिजन्यविकृतिर्भवति, अनेन विकारेण पाषाणा अपि द्रवीभवन्ति किं पुनर्मांसास्थिमज्जाद्यः देहः इति भावः। [अत्र प्रथमोद्दिष्टानामम्बुनीवारशष्पाणामनन्तरं यथाक्रमं तरुशकुनिकुरङ्गाणामुद्देशात् यथासंख्यमलङ्कारः, "यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यत्" इति दर्पणलक्षणात्। स च "'प्रस्तरोद्भेदयोग्यः द्रव इव" इत्युत्प्रेक्षया, तथा "करकमलवितीर्णैः" इत्यत्र करः कमलमिवेति समासगतया उपमया च संसृज्यते। एवमत्र "प्रस्तरोद्भेदयोग्यः" इति विशेषणप्रक्षेपात् हृदये प्रस्तरवदतिकाठिन्यावद्योतनेन उपमालङ्कारश्चान्यो ध्वन्यते इति बोध्यम्]। मालिनी वृत्तम् ॥ २५ ॥

(ग) वासन्ती पूर्वोक्तं स्ववचनं रामो न श्रुतवानिति निश्चित्य "ननु पृच्छामि" इत्यनेन अन्यासक्तमानसं तं स्ववचसि अवधानपरं विधाय भूयोऽप्याह, अपीति।— अन्यत् सर्वं पूर्वं व्याख्यातम्।

(घ) निष्प्रणयं—प्रणयाभावसूचकम्, [निर्गतः प्रणयो यस्मादिति तत् निष्प्रणयम् इति विग्रहः] आमन्त्रणपदं—सम्बोधनपदम्। सौमित्रिमात्रे च—केवले लक्ष्मणे च, लक्ष्मणमात्रविषयः, न तु सीताविषयः इत्यर्थः, [सुमित्राया अपत्यं पुमान् इति सौमित्रिः,

वासन्ती । अयि देव ! किमिति दारुणो दारुणः खल्वसि ? (स)

सीता । सहि वासदि ! किं तुमं सि एव्ववादिणी, पिअारहो क्खु सव्वस्स अज्जउत्तो, विसेसदो मम पिअसहीए * । (ह)

* सखि वासन्ति ! किं त्वमसि एववादिनी, प्रियार्हः खलु सर्व्वस्य आर्य्यपुत्रः, विशेषतो मम प्रियसख्याः ।

"बाह्वादिभ्यश्च" (४।१।९६ पा०) इति सुमित्राशब्दात् इञ्प्रत्ययः, सौमित्रिरेव इति सौमित्रिमात्रे तस्मिन् "मयूरव्यंसकादयश्च" (२।१।७२ पा०) इति समासः, तत्र विषयाधिकरणे "सप्तम्यधिकरणे च" (२।३।३६ पा०) इति सप्तमी]। कुशलप्रश्नः,—मङ्गलजिज्ञासा। वाष्पस्खलिताक्षरः,—वाष्पेण वाष्पभरावरुद्धकण्ठतयेत्यर्थः स्खलितानि अस्पष्टोच्चारितानि अक्षराणि यस्मिन् स तथोक्तः। तथा—तेन हेतुना। मन्ये—सम्भावयामि। विदितसीतावृत्तान्ता—विदितः ज्ञातः सीतावृत्तान्तः सीतानिर्वासनव्यापारः यया सा तथोक्ता। इयं सीतानिर्वासनवृत्तान्तं ज्ञातवतीत्यर्थः अन्यथा सीताया अपि कुशलं पृच्छेदिति भावः। [अत्र "सीतायाः त्यागरूपो वृत्तान्तः इति सीतावृत्तान्तः" इत्यत्र त्यागपदाकथनेन रामस्य त्यागशब्दोच्चारणे क्लेशोद्दीपकतया असामर्थ्यमेव द्योत्यते, तथा च न्यूनपदता न दोषाय अपि तु रामस्य शोभायैव जातेति बोध्यम्] आम्—एवं, लक्ष्मणस्य कुशलमेवेत्यर्थः, [आमिति स्वीकारसूचकमव्ययम्]।

(स) रामस्य प्रत्युत्तरमाकर्ण्य वासन्ती स्वकृतप्रश्नाभिप्रायो रामेण अवगमित इति निश्चित्य आह, अयीति।—किमिति—कथम्। दारुणो दारुणः,—अतिदारुणः, अतिकठोरः इत्यर्थः [अत्र आतिशय्ये द्विरुक्तिः], अन्यथा को नाम निष्कारणं निरपराधां प्रियतमां सहधर्मिणीं निर्वासयतीति भावः।

(ह) सीताविषयिणीं वार्त्तामधिकृत्य रामं तिरस्कुर्व्वत्या वासन्त्या सीता तदाकर्णनासहना इव वासन्तीं ततो निवर्त्तयति, सखीति।—किम्—कथम्। एववादिनी—"दारुणो दारुणः" इत्येवंकठोरभाषिणी। तत्र को दोषः ? इत्याह, प्रियार्ह इति।—प्रियवचनार्हः इत्यर्थः। विशेषतः,—विशेषेण, ["प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) इति तृतीया। ततः "इतराभ्योऽपि दृश्यन्ते" (५।३।१४ पा०) इति तसिः]। प्रियसख्याः,—प्रियसहचराजनस्येत्यर्थः, यतः आर्य्यपुत्रः मम प्राणेभ्योऽपि प्रियान् अतः मम प्रियसहचरीभिरपि तस्मिन् साधारणादधिकतया आदरः कर्त्तव्य इति भावः।

वासन्ती।—त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव, शान्तमथवा किमिहोत्तरेण? ॥ २६ ॥

[इति मूर्च्छति]।

वासन्ती "दारुणो दारुण" इति यदभिहितवती सम्प्रति तदेव युक्त्या समर्थयमाना आह, त्वमिति।—त्वं मे मम जीवितं प्राणाः, जीवितवत् प्रियतमेत्यर्थः, असीति शेषः, त्वां विना नाहं जीवामीति भावः, त्वं मे मम द्वितीयं हृदयम् असि भवान्, सर्व्वविषयेष्वेव परस्परमेकात्मतया अपरम् अन्तःकरणमित्यर्थः, त्वदज्ञातं मे किमपि रहस्यं नास्तीति भावः। त्वं मे नयनयोः नेत्रयोः कौमुदी ज्योत्स्ना, कौमुदीव स्निग्धकरी प्रीतिजनिका च इत्यर्थः, ("कौ मोदन्ते जना यस्यां तेनासौ कौमुदी मता" इति कौमुदीपदनिरुक्तेः) न मे चक्षुषस्त्वया विना तृप्तिरिति भावः। त्वं मे अङ्गे अमृतं पीयूषं सुधावदनिर्व्वचनीयसुखोत्पादिनीत्यर्थः, त्वदधिकं सुखकारणं मे किमपि नास्तीति भावः। इत्यादिभिः एवमादिभिः प्रियशतैः असितैः प्रियवचनैः श्रुतिसुखकरचाटुभिरिति यावत्। (अत्र शतशब्दोऽपरिमितत्वबोधकः "शतं सहस्रमयुतं सर्व्वमानन्त्यवाचकम्" इत्युक्तेः,) मुग्धां 'प्रथमावतीर्णयौवनमदनविकारा रतौ वामा। कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥" इत्युक्तलक्षणां सरलहृदयां बालाम् अनुरुध्य प्रीणयित्वा, सीता यदि एवं सरलहृदयतया त्वयि निरतिशयं विश्वस्ता नाभविष्यत् तदा त्वम् एवंविधैरमितैश्चाटुवचनैः तां कथमपि प्रतारयितुं न प्राभविष्यः इति भावः, तामेव निरतिशयविश्वस्तहृदयां त्वदेकमात्रजीवितामित्यर्थः, निर्व्वासितवानिति वाक्यशेषः वासन्त्या निश्वासबाष्पावरोधशोकसम्भारद्योतनार्थं कविना न कृतः, तदुच्चारणाशक्तेर्वासन्त्या तत्रैव विश्राम इत्याशयः। अथ सा कथञ्चित् आत्मानं संयम्य असम्पूर्णां निजोक्तिमिदानीं समापयितुम् उद्युक्ताऽपि तादृशनिर्म्ममचेतनं पाषाणोपमस्य रामस्य समप्रदर्शनेन पुनः करुणासम्पादनप्रयासो विफल एवेति मन्यमाना आह, शान्तमिति।—अथवा किंवा शान्तम् असम्बन्धात् अप्रतिकार्य्यत्वाच्च पुनः किमपि न कथनीयम्, एतदवलम्ब्य भवन्तमुपालभ्य न किमपि फलं भविष्यतीति भावः। इह अस्मिन् सीताविषये उत्तरेण वाक्येन, सीतायास्तादृशदशाविपर्य्यासात् परेण वाग्विन्यासेन किम्? किं प्रयोजनम्? अधुना तत् सर्व्वथैव निष्प्रयोजनमिति भावः। [इह "त्वं जीवितम्"

राम। स्थाने खलु वाक्यनिवृत्तिर्मोहश्च। सखि! समाश्वसिहि समाश्वसिहि। (क)

वासन्ती। [समाश्वस्य]। तत् किमिदमकार्य्यमनुष्ठितं देवेन? (ख)

सीता। सहि वासन्दि! विरम विरम। * (ग)

राम। लोको न मृष्यतीति। (घ)

वासन्ती। तत् कस्य हेतोः? (ङ)

* सखि वासन्ति! विरम विरम।

इत्यत्र "त्वं कौमुदी नयनयोरमृतं त्वमङ्गे" इत्यत्र च युष्मत्पदवाच्ये जीवितकौमुदी-सुधातादात्म्यारोपात् रूपकम्, तच्च सर्व्वत्र केवलस्यैव रूपणात् मालारूपं निरङ्गम्। एवं "त्वमसि मे हृदयं द्वितीयम्" इत्यत्र एकस्य जनस्य हृदयद्वयासम्बन्धेऽपि तत्सम्बन्धकथनात् असम्बन्धे सम्बन्धकथनरूपाऽतिशयोक्तिः, तथा "तामेव" इत्यनन्तरं विवक्षितस्य "निर्वासितवान्" इति वाक्यसमापकांशस्य "निष्करुणे त्वयि इतोऽधिकमनर्थकम्" इत्येवं विशेषप्रतिपत्तये निषेधवदाभासनात् आक्षेपनामकश्चालङ्कारः, इत्येतेषां परस्परं निरपेक्षतया संसृष्टिः]। वसन्ततिलकं वृत्तम् ॥ २६ ॥

(क) वाक्यनिवृत्तिः,—वासन्त्या वाग्विरामः। मोहश्च—मूर्च्छा च। स्थाने खलु—युज्यते एव, इदं द्वयमपि सीतायाः प्रियसख्याः तव युक्तमेवेत्यर्थः, ("युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः) अतिशयितशोकोद्दीपकत्वादस्याः निर्वासनजन्यस्य वासन्त्योद्भूतभावस्येति भावः।

(ख) तत्—तस्मात्, यदि मम वाक्यनिवृत्तेर्मोहस्य च युक्तत्वं मन्यसे तदेत्यर्थः। किम्?—कथम्। अकार्य्यम्—अनुचितं कार्य्यम्।

(ग) विरम—ईदृशकठोरवाक्यकथनात् विरता भवेत्यर्थः, (अत्र सम्भ्रमे द्विरुक्तिः,—"विवादे विस्मये हर्षे—" इत्याद्युक्तेः)।

(घ) लोकः,—प्रकृतिवर्गः, राज्याधिवासी जनः इत्यर्थः। न मृष्यति—न तितिक्षते, सीतायाः गृहावस्थानमिति शेषः, तन्न प्रकृतिवर्गस्य वाञ्छितमित्यर्थः। इति—अस्माद्धेतोः, इदमकार्य्यमप्यनुष्ठितं मयेति शेषः। मम प्रकृतिवर्गः सीतायाः विशुद्धिं प्रति सन्दिहान तस्याः राजगृहावस्थानं न बहु मन्यते इति तामनिच्छन्नपि निर्वासितवानस्मीति भावः।

(ङ) तत्—लोकस्य अमर्षणम्। कस्य हेतोः,—केन हेतुना? कस्मात् कारणात् लोको न मृष्यतीत्यर्थः। [अत्र "षष्ठी हेतुप्रयोगे" (२।३।२६ पा०) इति षष्ठी]।

राम। स एव जानाति किमपि। (च)

तमसा। उचितस्तदुपालम्भः। (छ)

वासन्ती।—अयि कठोर! यशः किल ते प्रियं
किमयशो ननु घोरमतः परम्?।
किमभवद्विपिने हरिणीदृशः
कथय नाथ! कथं वत मन्यसे?॥ २७॥

(च) स एव—पुरवासी जन एव नान्यो नादृशं कश्चिदिति एवकारार्थः। किमपि—अनिर्वचनीयम्, अस्माभिरज्ञातमयशः, निमित्तमिति शेषः। तादृशयशसः प्रकृतकारणाभावात् न मया न वा अन्येन बुद्धिमता ज्ञातव्यमिति भावः। अन्यथा अस्मा निष्करुणाय लोकाः, लोकानुरञ्जनञ्च मे कर्त्तव्यं, तत् किं मया क्रियतां सीतापरित्यागादन्यत इति फलितार्थः।

(छ) तदुपालम्भः,—तस्य लोकस्य उपालम्भः, [उपि कृते "लभेश्च" (७।१।६४ पा०) इति सूत्रेण नुमागमः] तिरस्कारः। उचितः,—न्याय्यः, आसीदिति शेषः, ("अभ्रेषोऽप्युचितं न्याय्यम्" इति कोषः)। अतिपवित्रचरितायाः जनकसुतायाः निर्निमित्तकापवादविघोषणात् कृतापराधः पौरजन एव दण्डनीयः, न तु लेशतोऽपि कञ्चिदपराधमकुर्वाणा सीता दण्डार्हेति भावः।

पौरजनानामयश एव निरपराधाया अपि सीताया निर्वासने हेतुरिति यदुक्तं रामेणोक्तं, तत्राह, अयीति।—अयि कठोर! हे कठिनहृदय! ते तव यशः कीर्त्तिः प्रकृतिकृतगुणानुकीर्त्तनमिति यावत्, प्रियम् आदरणीयं, किलेति प्रसिद्धौ, निश्चये वा। निरपराधायाः प्राणेभ्योऽपि प्रियतमायाः सीतायाः निर्वासनेनापि प्रकृतीनां मनो रञ्जयता त्वया यशस एव श्रेष्ठत्वमङ्गीकृतमिति भावः। किं तत? इत्याह, किमिति।—ननु भो देव! अतः अस्मात्, अतिपवित्रचरित्रा निरपराधा सीता निर्दयं निर्वासयताः यदयशः सञ्चितमित्यस्मादित्यर्थः, परम् अधिकम् अयशः अकीर्त्तिः लोकापवाद इति यावत्, किं स्यात्? यशोधनत्वेन भुवि विख्यातस्यापि तव प्राणप्रियतमायाः निरपराधायाः आसन्नप्रसवायाः धर्मपत्न्याः निर्जनवननिर्वासनतत्कृत्यमिदमयशः तव सर्वं यशोऽपाकरोतीति भावः। ननु कः स दुष्टस्य अयशसो हेतुः? इत्याह, किमिति।—नाथ हे प्रभो! हरिणीदृशः मृगलोचनायाः प्रजावत्या इति यावत्, [एतेन निर्जने अरण्ये एकाकिन्याः परित्यागात् रमणीजनसुलभेन भयेन तदा हरिण्या इव तस्याः नयने चञ्चले

सीता। तुम ज्जेव सहि वामदि। दारुणा कठोरा अ, जा एव्वं अज्जउत्तं पदित्तं पदीवेसि। * (ज)

तमसा। प्रणय एवैट व्याहरति शोकश्च। (झ)

राम। सखि! किमत्र मन्तव्यम्? (ञ)—

* त्वमेव सखि वामासि। दारुणा कठोरा च, या एवम् आर्य्यपुत्त्र प्रदीप्तं प्रदीपयसि।

जाते इत्यर्थो व्यज्यते] सीताया इति शेष, विपिने हिंस्रश्वापदसङ्कुले वने किम् अभवत् कीदृशी अवस्था जाता, कथय ब्रूहि, तदिति शेष। वत खेदे, ("वतानन्दामन्त्रणसन्तोषखेदानुक्रोशविस्मये" इति मेदिनी)। कथं किंप्रकारं मन्यसे भावयसि? अथवा—कथं मन्यसे किमुपेक्षसे, सर्वं विचिन्त्य किं निर्णीतं वा,नीति कथयेत्यर्थ, अहो ते अविवेकित्वं चित्तकाठिन्यञ्चेति भाव। [अत्र रामो राजधर्म्मानुसारात् पौरचित्तानुरञ्जनहारेण यशोलाभाशया सीता निर्वासितवान्, फलतस्तु तद्वैपरीत्येन प्राणप्रियाया आसन्नप्रसवाया निरपराधाया जनकतनयाया निवासनाल्लोकापवाद एव अजनीति "यहाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भव" इत्युक्तलक्षणको विषमो नाम अलङ्कार, तथा "हरिणीदृश" इत्यत्र समासगता लुप्तोपमा चेत्यनयो सङ्करः]। द्रुतविलम्बितं वृत्तम्, 'द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात्। इद हि १४६४तमप्रस्तारान्तर्भूत वृत्तम् ॥२७॥

(ज) त्वमेवेति।—अत्र एवशब्देन अन्ययोग व्यवच्छिनत्ति, नान्या इत्यर्थ। दारुणा—भीषणस्वभावा। कठोरा—निर्दया च। एवं—परिदृश्यमानरूपेण। प्रदीप्त—शोकावेगेन तापमानम्। प्रदीपयसि—सन्तापयसि, एवंविधनिर्दयव्यवहारेण मद्वियोगशोकसन्तप्तमपि आर्य्यपुत्त्र पुनर्नितरां शोकाभिभूत करोषीत्यर्थ। [अत्र "एव्वं विलवन्ती पदीवेसि" इति पाठे—"एवं विलपन्ती प्रदीपयसि" इत्यनुवाद]।

(झ) प्रणय,—रामं प्रति अनुराग। शोक,—त्वद्विवासनजनितो दु खातिशय। इद—पूर्वोक्तप्रकारम्, अयि कठोरेत्यादि वासन्तीकथितमुपालम्भवचनम्। व्याहरति—कथयति। शोको मोहश्च एतामित्थंवादिनीं करोति, अतो नास्या दोष इत्यर्थ।

(ञ) वासन्त्या पूर्वं शोकावेशेन "कथं वत मन्यसे" इति पृष्टो राम सम्प्रति प्रतिवक्ति, सखीति।—सखि—सङ्गिनि। अत्र—अस्मिन्, सीताविषये इत्यर्थ।

वत्सैकहायनकुरङ्गविलोलदृष्टे-
स्तस्याः परिस्फुरितगर्भभरालसायाः ।
ज्योत्स्नामयी च मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

किं मन्तव्यम्—अपरं किं विभावनीयम् ? नूनं सा मृतेति किमप्यन्यत् नास्ति चिन्तनीयमिति भावः ।

असहायाया निर्जनवननिवासिताया सीताया मरणादन्यत् न किञ्चिदस्ति सम्भावनीयमिति यदुक्तं, तदेव समर्थयमान आह वत्सैकेति।—वत्सस्य भीतस्य एकहायनस्य एकवर्षवयस्कस्य [एकं हायनं वर्षं यस्य स एकहायनः "हायनो न स्त्रियां वर्षे पर्याचिर्व्रीहिभेदयोः" इति मेदिनी] कुरङ्गस्य हरिणस्येव विलोला चपला दृष्टिः नयनं यस्याः तथोक्तायाः भीतिविह्वलहरिणशावकवच्चपलायतदृशः इत्यर्थः, कुरङ्गदृष्टिः स्वभावत एव चञ्चला, तत्रापि वत्सस्य एकहायनस्येति च विशेषणद्वयं चाञ्चल्यातिशयद्योतनार्थं, भीतत्वात् शिशुत्वाच्चाधिकचञ्चला हि हरिणदृष्टिर्भवतीति प्रसिद्धिः । परिस्फुरितस्य भयादतिकम्पितस्य गर्भस्य भरेण भारेण अलसायाः मन्थरायाः, भीतिहेतोः आत्मत्राणासमर्थाया इति यावत्, तस्याः सीतायाः ज्योत्स्नामयी चन्द्रिकामयी चन्द्रिकावत् स्नेहलावण्यमयी इत्यर्थः, [अत्र ज्योत्स्नामयीति विशेषणेन क्रव्याद्भ्यः आत्मगोपनमपि न सम्भाव्यमिति द्योत्यते । "ज्योत्स्नामयीव" इति पाठे—ज्योत्स्नात्मिकेव ज्योत्स्नावत् स्नेहलावण्यमयी कार्कश्यादिदोषरहिता चेत्यर्थः] मृदु कोमलम् अपरिणतमिति यावत् यत् बालमृणालम् अचिरोद्गतं बिसदण्डः तस्मादीषदूना इति मृदुबालमृणालकल्पा च कोमलमृणालाङ्कुरनिभा अतिपेलवा सुखभङ्गुरा च इत्यर्थः, ["ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" (५।३।६७ पा०) इति ईषदसमाप्त्यर्थे कल्पप् प्रत्ययः] अङ्गलतिका देहलता [अल्पा लता इति लतिका "अल्पे च" (५।३।८५पा०) इति लताशब्दात् अल्पार्थे कप्रत्ययः, ततः "केऽणः" (७।४।१३ पा०) इति ह्रस्वः, ततः "प्रत्ययस्थात् कात् पूर्वस्यात —" (७।३।४४ पा०) इति अकारस्य इत्] नियतं निश्चितं, क्रव्यम् आममांसम् अदन्तीति क्रव्यादः ["क्रव्ये च" (३।२।६९ पा०) इति सूत्रेण विट्प्रत्ययः] तैस्तथोक्तैर्मांसलोलुपैः वनचरैः श्वापदैर्विलुप्ता भक्षितेत्यर्थः । [६९ "वत्सैकहायन—" इत्यत्र, तथा "मृदुबालमृणालकल्पा" इत्यत्र च समासगता उपमा । एवम् "अङ्गलतिका" इत्यत्र रूपकञ्चेत्येतयोः सङ्करः । अत्र "मृदुबालमृणालकल्पा" इत्यनन्तरं पठितुमुचितस्य चकारस्य "ज्योत्स्नामयी"

सीता। अज्जउत्त। धरामि एसा धरामि। * (ट)

राम। हा प्रिये जानकि! क्वासि? (ठ)

सीता। हद्धी। हद्धी। अज्जउत्तो वि पमुक्ककण्ठं रोइदि॥ † (ड)

तमसा। वत्से! साम्प्रतिकमेवैतत्, कर्त्तव्यानि दुःखितैर्दुःखनिर्वापणानि। यतः, (ढ)—

* आर्य्यपुत्र। ध्रिये एषा ध्रिये।

† हा धिक्। हा धिक्। आर्य्यपुत्रोऽपि प्रमुक्तकण्ठं रोदिति॥

इत्यनन्तर पाठात् अस्थानपदता दोष ... च "स्फटलवालमृणालकल्पा" इति पाठं कल्पयित्वा समाधेयः]। वसन्ततिलकं वृत्तम्॥ २८॥

(ट) आर्य्यपुत्र—स्वामिन्। एषा—मूर्त्तिमत्येव परिदृश्यमानेत्यर्थः अहमिति शेषः। ध्रिये—जीवामि नैव मृता नाहमत्यापि मन्दभागिनी क्वाप्यात्मवलनिर्पातितेति भावः। ["ध्रिये" इति तौदादिकात् अवस्थानवाचिनो धृधातो कर्त्तरि लटि रूपम्। अत सम्भ्रमे द्विवचनम्]। रामस्य दुःखातिशय्यमसहमानाया विस्मृतात्मनः सीताया उक्तिरियम्।

(ठ) रामः स्वयं "क्वाप्यङ्गिरङ्गलतिका नियतं विलुप्ता" इति कथयन् विवृद्धसीतावियोगशोकः सम्प्रत्युच्चैर्विलपन्नाह, हा प्रिये इति।—क्व—कुत्र? अस्मिन् लोके, स्वर्लोके वेत्यर्थः।

(ड) आर्य्यपुत्रोऽपि—सहजमधुपलचेतसां प्राकृतानां का कथा लोकातिरिक्तधैर्य्यगाम्भीर्य्यादिगुणगणोपेतः स्वामी रामभद्रोऽपीत्यर्थः। प्रमुक्तकण्ठम्—उच्चैःस्वरमित्यर्थः। [प्रमुक्तः कण्ठो यस्मिन् रोदने तत् यथा तथा]। रोदिति—विलपतीत्यर्थः। अलौकिकधैर्य्यशालिनोऽप्येव प्राकृतवदुच्चैर्विलापः असहनीयः अस्य शोकवेगं सूचयतीति भावः।

(ढ) वत्से—सीते। एतत—उच्चैःस्वरं रोदनं, रामस्य इति शेषः। साम्प्रतिकमेव—उचितमेव (युक्ते हे साम्प्रतं स्थाने" इत्यमरः)। दुःखितैः—शोकार्त्तैः, जनैरिति शेषः, दुःखनिर्वापणानि—शोकोपशमनानि, विलापरोदनादीनीत्यर्थः। कर्त्तव्यानि—विधेयानि। यतः,—यस्मात् कारणात्, वक्ष्यमाणश्लोकेनास्य सम्बन्धः।

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ॥ २९ ॥

विशेषतो रामभद्रस्य बहुतरप्रकारकष्टो जीवलोकः । (ग)—
इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्मः क्लमयति ।

प्रबलदुःखोपहतचेतसा प्रलापादन्यः कोऽपि दुःखोपशमहेतुर्नास्तीति यदुक्तं, तदेव समर्थयमाना आह, पूरोत्पीडे इति ।—तडागस्य जलाशयविशेषस्य ("पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः" इत्यमरः) पूरोत्पीडे पूरस्य तीरद्वयतटद्वयमध्यवर्त्तिजलभागस्य उत्पीडे अत्यन्तवृद्धौ जलवृद्धिजन्ये निर्गमोद्दाने सतीत्यर्थः, परीवाहः प्रणाल्या प्रवृद्धजलराशेनिःसारणम्, [अत्र परिपूर्व्वात् वहतेर्घञि "उपसर्गस्य घञ्यमनुष्ये बहुलम्" (६।३।१२२ पा०) इति उपसर्गस्य दीर्घता] प्रतिक्रिया प्रतीकारः चिकित्सेति यावत्, अन्यथा विवृद्धजलराशेरप्रतिहतवेगवशेन अन्ततः सेतुभङ्ग-समीपस्थभूमज्जनादिदोषोत्पत्तेरिति भावः च तथा शोकक्षोभे प्रबलदुःखावेगे सति यद्वा—शोकेन प्रबलेष्टवियोगजन्यदुःखेन क्षोभे अत्यन्तमस्थैर्य्ये जाते सति हृदयं चित्तं प्रलापैः प्रमुक्तकण्ठरुदितैः धार्य्यते पुनश्चरत्वाप्यते, यथा जलवृद्धौ कयाचित्प्रणाल्या जलनिःसारणं तडागादिरक्षणोपायः तथा शोकवृद्धौ तदुद्दिष्कारणरूपप्रलापैरोदनमेव आत्मत्राणोपाय इति भावः । [अत्र पूरोत्पीडेन शोकक्षोभस्य, तडागेन हृदयस्य, परीवाहेण प्रलापानां, प्रणिधानगम्यसाम्यतया दृष्टान्तो नामालङ्कारः, तथा च दर्पणे,—"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" इति]। पथ्यावक्त्रं वृत्तम् ॥२९॥

(ग) विशेषतः—अन्यापेक्षया विशेषेण । बहुतरप्रकारकष्टः,—नानाविध-क्लेशपूर्णः, [बहुतराः प्रकारा येषां, तथोक्तानि कष्टानि यस्मिन् (जीवलोके) स तथोक्त इति विग्रहः]। जीवलोकः—संसारः । सामान्यतः क्लेशबहुलेऽप्यस्मिन् संसारे नियतं राज्यशासनाद्यतिभारक्लिष्टस्य मनसि त्वद्विरहक्लेशो दुःसहो जात इति युज्यत एवास्य मुक्तकण्ठविलाप इति भावः ।

रामसम्बन्धे जीवलोकस्य यद् बहुतरप्रकारकष्टत्वमुक्तं, सम्प्रति तदेव विवृण्वती आह, इदमिति ।—अभियुक्तेन निरन्तरमवहितेन, अविक्षिप्तेनेत्यर्थः, इतरथा विक्षिप्त-चेतसा कृतमपि राजकार्य्यं नानवद्यं स्यादिति भावः, मनसा चेतसा इदं परिदृश्यमानं विश्वं जगत् विधिवत् यथाविधानं, शास्त्रविधिमनतिक्रम्येत्यर्थः, [विधिमर्हतीति विधिवत्, विधिशब्दात् "तदर्हम्" (५।१।११७ पा०) इति अर्हार्थे वतिप्रत्ययः]

स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम् ॥ ३० ॥

पाल्यं रक्षणीयम्, अन्यथा प्रजापालनव्रतानां क्षत्रियाणां स्वधर्म्मापालननिबन्धनः पापस्पर्शः सम्भवेदिति भावः, तच्च राज्यपालनमेकमतीव कष्टकरमित्याशयः। अत्र आतपः कुसुमानिव कुसुमं यथा तथा प्रियाशोकः सीताविच्छेदजनितं दुःखं जीवं जीवनं क्लमयति म्लपयति, यथा प्रखरदिवाकरतापः निरतिशयसुकुमारं कुसुमभारम् अहरहः सन्तापयन् समूलशोषं शोषयति, तथाऽयं प्रियावियोगजः शोकः सम्प्रति सातिशयं वर्द्धमानः विशालराज्यपालनाकृष्टं मामकं जीवनमान्तरान्तर-शादयतीति विशदार्थः, एतदपि कष्टात् कष्टतरमिति भावः। ननु दुःखातिशये विलाप एवैको विनोदोपायः, अतः तेनैव किं न विनोदयसि चेत्? इत्यत्र आह, स्वयमिति।—स्वयम् आत्मनैव त्यागं प्रियापरिवर्जनं कृत्वा विलपनविनोदोऽपि विलपनेन पश्चात् रोदनादिना विनोदोऽपि शोकापनोदनचेष्टाऽपि, अथवा—विलपनमेव विनोदः, सोऽपीत्यर्थः, असुलभः न सुलभावकाशः विशाधारविरोधितया न घटत इत्यर्थः, स्वयमेव निरपराधामकाण्डभागिनीं सहधर्म्मिणीं विवास्य अविवेकिवत् पुनस्तदर्थं रोदयमानं मां सर्वे निन्दिष्यन्तीति आशङ्कैव मम विलपनविनोदेऽपि प्रत्यूह इति भावः। शोकापनोदनचेष्टाऽपि न कर्त्तुं शक्या इत्येतदपि अपरं महत् कष्टकरम् इति आशयः। पूर्वोक्तप्रकारेण कदाचिदपि रामस्य न दुःखवेगप्रकाशावसर इति महानस्य क्लेशः। अत्र "असम्भवः" इत्यनुक्त्वा "असुलभः" इति कथनात् "इदानीमिव कदाचित् निर्जने तु विलापः सम्भवत्येव" इत्यर्थो लभ्यते। ननु यदि प्रकाशं विलप्य विनोदमाप्तुं न शक्यते तदा किमिदानीं कादाचित्कविलापेन? इत्याह, तदिति।—तत् तदपि, तादृशविनोदालाभेऽपि, रुदितं मुक्तकण्ठो विलापः लाभो हि लाभ एव, ननु यतः अद्यापि सम्प्रत्यपि एतावद्दीर्घकालात् परमपीत्यर्थः, उच्छ्वासः जीवनधारणम् ("उच्छ्वास प्राणनेऽपि च। आख्यायिकापरिच्छेदेऽप्याश्वासेऽपि पुनानयत्" इति मेदिनी) भवति, अन्तरान्तरा रहसि मुक्तकण्ठरोदनं तावद्दुःखापनोदकमपि न विफलम्, अपि तु अस्य प्राणधारणनिदानतया नितरामुपकारकत्वमस्तीति भावः। [अत्र कष्टरूपे एकस्मिन् कार्य्ये विश्वपालनप्रियाशोकविलापानवसराणां कारणानां खलेकपोतिकान्यायेन युगपदुपस्थितत्वात् समुच्चयो नामालङ्कारः, स च "कुसुममिव घर्म्मः" इत्युक्तया उपमया सङ्कीर्य्यते, किञ्च "असुलभः" इत्यत्र नञः "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्य-

राम । कष्टं भोः ! कष्टम्—

दलति हृदयं गाढोद्वेगं द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ ३१ ॥

प्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥" इत्युक्तलक्षणकप्रसज्यप्रतिषेधार्थकतया प्रधानतया प्रयोगो युक्तः, इह तु तस्य समासे गुणीभूततया अविमृष्टविधेयांशत्वरूपो दोषश्चिन्त्यः]। शिखरिणीवृत्तम् ॥ ३० ॥

नियतमतिदुःसहोऽपि सीताविरहक्लेशः कथमप्यन्तर्निगृहीतः सम्प्रति वासन्तीकथितकठोरवचसा नवीभूतः सातिशयं पीडयतीति तं कथमप्यसहमानः सीतापतिर्यदुक्तवान् "कष्टं भोः कष्टम्" इति, सम्प्रति तदेव महद्दुःखं विलक्षणमाह, दलतीति ।—गाढोद्वेगं प्रगाढशोकसम्भारं हृदयम् अन्तःकरणं दलति स्फुटति, [स्फोटनार्थो दलिरकर्मकः । अत्र "दलति हृदयं गाढोद्वेगः" इत्यपि पाठो दृश्यते, तथाच—गाढोद्वेगः प्रगाढशोकसम्भारः हृदयं दलति विदारयति इत्यर्थः । मूलोक्तात् नायं साधीयान् पाठः, यतः अस्मिन् पाठे प्रक्रमभङ्गदोषः सम्भवति, तथाहि द्वितीयतृतीयचतुर्थपादेषु द्वयोः क्रिययोरेकः एव कर्त्ता प्रक्रान्तः इह तु "दलति" इत्यस्य कर्त्ता "गाढोद्वेगः" इति तथा "भिद्यते" इत्यस्य कर्त्ता "हृदयम्" इति, मूलधृतपाठे तु न तद्दोषशङ्का इति विभाव्यम्]। तथापि तु किल तत् हृदयं द्विधा द्विखण्डीभूय न भिद्यते विदीर्णं न भवतीत्यर्थः, ["भिद्यते" इति भिदेः कर्मकर्त्तृवाच्ये प्रयोगः] हृदये विदीर्णे सति आश्रयापायात् क्लेशोऽपि न स्यादिति आशयः । विकलः विवशः दुःसहशोकावेगेन प्रक्षीण इत्यर्थः, कायः देहः [कायः इति चिञ्धातोः "निवासचितिशरीरोपसमाधानेष्वादेश्च कः" (३।३।४१ पा०) इति घञ्, चकारस्य च ककारः] मोहं दुःसहशोकसम्भारात् अचेतनभावं वहति धारयति, चेतनां सञ्ज्ञां च न मुञ्चति न सम्पूर्णरूपेण परित्यजति, क्षणे क्षणे चैतन्यञ्च भवतीत्यर्थः, चिरमोहरूपमृत्यौ सति दुःखज्ञानाभावात् सर्व एव शोको निर्वापितः स्यादिति भावः । अन्तर्दाहः मानसः तनूं शरीरं ("स्त्रियां मूर्त्तिस्तनुस्तनूः" इत्यमरः) ज्वलयति सन्तापयति [ज्वलयतीति ज्वलतेर्णिजन्तस्य रूपम्, "ज्वलह्वल—" (घटा० ग०) इति अनुपसृष्टस्य ज्वलनं पाक्षिकी मित्संज्ञा ततश्च "मितां ह्रस्वः" (६।४।९२ पा०) इति ह्रस्वः । पक्षे—ज्वालयति] न च तां भस्मसात् भस्मावशेषां [कार्त्स्न्येन भस्म सम्पद्यते

सीता । एवम्णेदम् । * (त)

राम । हे भवन्तः पौरजानपदाः !—

न किल भवतां स्थानं देव्या गृहेऽभिमतं तत-

स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।

* एवन्निदम् ।

इति भक्षतात भवति 'विभाषा सति काङ्क्षा' (५।४।५२ पा०) इति भस्मशब्दात् वातिप्रत्यय] करोति, तथा सति न मे दुःखं स्यादिति भावः । विधिर्विधाता ("विधिर्विधाने दैवे च" इत्यमरः) मर्माणि स्पृशतु शीलमस्य इति मर्मच्छेदो मम स्थानच्छेदनशील प्रहरति मारितभाव, बलात मम मर्माणि छिनत्तीत्यर्थः, जीवित प्राणान् न कृन्तति न छिनत्ति, न हन्तीत्यर्थः, तथा सति मे सकृदेव दुःखावसानं स्यात्, अन्यथा दैवदुर्विपाक इति भावः । [इह कर्तृविहितप्रत्ययान्तक्रियाप्रदर्शनप्रक्रम "भिद्यते" इति क्रियाया कर्मकर्तरि प्रयोग प्रक्रमभङ्गदोषमावहति । अत्र यद्दहति तन्न भिद्यते, यन्मुह्यति तन्न चेतना मुञ्चति, दन्दलयति तन्न भस्मीकरोति, यच्च प्रहरति तन्न हन्तीति प्रतिपाद क्रिययोर्मिथोविरुद्धवदाभासमानतया विरोधाभासो नामालङ्कार, केचित्तु हृदयदलनादिरूपात कथिताद वस्तुन स्वसङ्गमस्य भेदनस्य व्यपोहनात परिसङ्ख्यानाद । अत मन समुत्पन्न खेदो नाम विमर्शसन्धि प्रदर्शित, तल्लक्षणं यथा दर्पणे,—"मनश्चेष्टासमुत्पन्नः श्रमः खेद इति स्मृत" इति]। हरिणी वृत्तम् ॥ २१ ॥

(त) स्वयमन्तरनुनयमानया स्वकीयावस्थया रामवर्णितावस्थाया याथार्थ्य शोकुवाणा जानकी रामोक्ति समर्थयन्ती आह, एवमिदम ।—इदं—पूर्वोक्त रामवचनम् । एवम—इत्यमेव, यथाकथितरूपमेवेत्यर्थ । नु सम्भावयामीत्यर्थ । अहमपि इत्थंरूपां दशामनुभवन्ती त्वदुक्तियाथार्थ्य साक्षीभवामीति भाव ।

सीतावियोगो नियतमन्तरनुभवतामानाम् एतासामतिविषमादरा मूल, तथापि पौरजानपदापरित ष धात प्रियतमावियोगविचिन्तनमिति सीतापरित्यागेनि वं हृद्य नस्मात सावनापनाय नीत ।—देव्या सीताया गृहे मदीये भवने, राज भान्यानियथ स्थानमवस्थान ताम इत्यर्थ भवता युष्माक न अभिमतं अनुमोदितम् भवतीति न च किन्तु तिष्ठ । सुचिर रक्षोगृहावस्थानात सीताया न पत्व नाम इत्यानिर्नवोऽत्ययम पुनर्गृहेण नानुमन्यते इति इत्युत्सुखान न न नातिनेति भाव । ततस्तस्मात कारणात देवी गृहावस्थानस्य पुनरनभिमतत्वात्, ,

चिरपरिचितास्ते ते भावा परिद्रवयन्ति मा
इदमशरणैरद्याप्येवं प्रसीदत रुद्यते ॥ ३२ ॥

सा देवीति शेष, तृणमिव अनादृतघासादिवत शून्ये विजने, निराश्रये इत्यर्थ, वने अरण्ये त्यक्ता विसृष्टा निर्वासितेति यावत, न चापि सा अनुशोचिता निरपराधां तां पवित्रां विदित्वाऽपि केवल युष्मदनुरञ्जनाय निर्वासिता तामुद्दिश्य कदाचिदनुतापोऽपि न कृत इत्यर्थ, [अत्र "न वाऽप्यनुशोचिता" इत्यपि क्वचित पाठ] मया इति शेष । चिरपरिचिता सीतया सह सुचिरमेकत्र वासेन पुरा चिरमनुभूता ते ते भावा पदार्था शाखिशिखिशिलातलादय इत्यर्थ, अद्यापि अधुनाऽपि बहुतिथे काले गतेऽपीत्यर्थ, मा परिद्रवयन्ति पारद्रववन्त कुर्वन्ति, सर्वथा व्याकुलीकुर्वन्तीत्यर्थ, [परिपूर्वात् द्रववच्छब्दात् तत्करोतीत्यर्थे "तत्करोति तदाचष्टे" (ग०) इति णिच्, इष्ठवद्भावात मतुब्लोपे टिलोपे च इद रूपम्। "परिभ्रमयन्ति" इत्यपि क्वचित् पाठ, तत्र—विचेतनीकुर्वन्तीत्यर्थ]। इदम् अस्मात कारणात, [अत्र अस्मादित्यर्थे इदमित्यव्ययम्] नास्ति शरण रक्षक येषा त अशरणैरनवलम्बै, यद्वा—अस्मिन् विषये अशरणा इति इदमशरणा त एतस्मिन् विषये उपायहीनैरित्यर्थ, अस्माभिरिति शेष, ("शरण गृहरक्षित्रोर्वधरक्षणयोरपि" इति मेदिनी) एवम् इत्थ रुद्यते विलप्यते, प्रसीदत, यूयमिति शेष । [रुद्यत इत्यत्र याच्यत इति पाठान्तरम्, तत्र अशरणैं इद याच्यते प्रार्थ्यत यत अधुना तत्क्लेशस्वीकारात् इदानीमपि यूय प्रसीदत मयि सुप्रसन्ना भवतेत्यर्थ]। भवतामनुरञ्जनायैव मया पूर्वोक्तानि दुष्कराणि कृतानि भवद्भिस्तु मदर्थे न किमपि कृतमिति पौरजानपदानुद्दिश्य रामस्य शोक । भवताम् असन्तोषमपाकर्तुमेव सर्वथा निरपराधां सीताम् अतिपवित्रां विदित्वाऽपि विजने वने तृणमिव विमर्जयता, तथा तदर्थे क्षणमपि पश्चात्तापमकुर्वता मया युष्मत् कृते किं किं दुष्कर न कृतम्? साम्प्रतन्तु एभिश्चिरपरिचितपादपपर्वतादिभिरुद्दीपितपूर्वस्मृतिनिरवलम्बोऽस्मि जात इति मयि प्रसादपरवशैर्भवद्भिरद्याप्यनुमन्यते चेत्, तदा निरपराधा तां पुनर्गृह्णमानीय दु सहोऽयं शोकावेगोऽपनेतुं शक्यते इति निर्गलितार्थ । [अत्र यद्यपि "मां परिद्रवयन्ति' इत्यत्र अस्मच्छब्दे एकवचनमुक्त्वा पुन "अशरणैरस्माभि" इत्यत्र बहुवचनप्रयोगो न युज्यते, तथाप्येव निर्देश रामस्य चित्तविक्षेपसूचकतया विप्रलम्भाख्यशृङ्गार पुष्णातीति न कोऽपि दोष । अत्र पश्चात्ताप प्रति सीतात्यागस्य हेतुतया, तत्सत्त्वेऽपि पश्चात्तापरूपफलादर्शनात् विशेषोक्तिरलङ्कार, तथा "तृणमिव" इत्यत्र उपमा चेत्यनयो परस्परनिरपेक्षतया संसृष्टि । एवं

तमसा। अतिगम्भीरमापूरणं शोकसागरस्य। (थ)

वासन्ती। देव! अतिक्रान्ते धैर्य्यमवलम्ब्यताम्। (द)

राम। सखि! किमुच्यते धैर्य्यमिति॥ (ध)—

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रनष्टमिव नामापि न च रामो न जीवति॥ ३३॥

"हसीव धवलश्चन्द्रः" "कायेव ता भूपतिरन्वगच्छत्" इत्यादिवत् उपमानोपमेययो-र्लिङ्गभेदेऽपि न क्षतिरिति विभाव्यम्]। हरिणी वृत्तम्॥ ३२॥

(थ) शोकसागरस्य—शोक एव सागरः दुरुत्तीर्णतया जलधिः इति शोकसागरः दुःखरूपार्णवः तस्य। [अत्र शोके सागराभेदारोपात् रूपकमलङ्कारः]। अति-गम्भीरम्—अतिगूढमित्यर्थः। आपूरणं—पूर्णता। [अवपूरणमिति पाठे—अव-पूरणम्—आवर्त्तः]।

(द) अतिक्रान्ते—अतीतविषये सीतावियोगरूपे, धैर्य्यम् अवलम्ब्यताम्, गतस्य शोचना निष्फला तव धैर्य्यावलम्बनमेव श्रेयस्करम् इति भावः।

(ध) किमुच्यते धैर्य्यमिति॥—मत्प्रदर्शितात् परमपि धैर्य्यमस्ति? इति साक्षेपोक्तिः। धैर्य्यस्य विषयः कः कथ्यते भवत्या? मया हि धैर्य्यस्य परा काष्ठा प्रदर्शितेति भावः।

वासन्त्या धैर्य्यावलम्बनार्थमुपदिष्टो जानकीनाथस्ता धैर्य्यस्य परां कोटिमहं दर्शितवानिति बोधयन् तदेव दर्शयति, देव्येति।—देव्या सीतया शून्यस्य विरहितस्य, तादृशे विजने वने एकाकिन्याः तस्याः निर्वासनेन मरणावश्यम्भावादिति भावः, जगतः लोकस्य द्वादशः द्वादशानां पूरणीभूतः [द्वादशानां पूरणः इति द्वादशः "तस्य पूरणे डट्" (५।२।४८ पा०) इति डट्] परिवत्सरः संवत्सरः प्रवर्त्तत इति शेषः, तस्याः सीतायाः इत्यूह्यं, नामापि प्रनष्टमिव विलुप्तमिव, एतावता कालेन न केवलं सा मृता, अपि तु सुदीर्घकालात्ययवशादधुना तस्याः नामापि केनचिन्नोच्चार्यते इत्यर्थः, च अथच रामो न जीवति इति न, अपि तु जीवत्येव, रामरूपेण पाषाणमयोऽहमद्यापि वर्त्तमानोऽस्मि, अतः प्रियतमाविरहेऽपि मन्मम जीवनधारणं तदेव परा काष्ठा धैर्य्यस्येति भावः। [इह "प्रनष्टमिव नामापि" इत्यत्र सुदीर्घकालात्ययात् नामनि प्रनष्टत्वसम्भावनादुत्प्रेक्षानामालङ्कारः]। पथ्यावक्त्रं वृत्तम्॥ ३३॥

सीता। मोहिदम्हि अज्जउत्तस्स एदेहिं वअणेहिं *। (न)

तमसा। एव वत्से। (प)—

नैता प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः।

एतास्ता मधुनो धाराः श्च्योतन्ति सविषास्त्वयि ॥ ३४ ॥

---

* मोहितास्मि आर्य्यपुत्रस्य एतैर्वचनैः।

(न) आर्य्यपुत्रस्य—स्वामिनः रामचन्द्रस्य। एतैः,—पूर्वोक्तरूपैः मयि प्रगाढ-प्रेमव्यञ्जकैरित्यर्थः। मोहिता—मोहं प्रापिता निरतिशयानन्दविह्वलेत्यर्थः। सा निष्करुणं परित्यजतोऽपि सम्प्रति मदर्थमेव विलपतः आर्य्यपुत्रस्य प्रणयातिरेकसूचक-वचनश्रवणेन आनन्दविह्वलापि अस्य वियोगदुःखदर्शनेन मूर्च्छया समाविष्टास्मीति भावः। ["मोहितास्मि एतैः आर्य्यपुत्रवचनैः" इति पाठेऽपि तुल्य एवार्थः]।

(प) एवम्—इत्थं, त्वया यदुच्यते तत् तथैवेत्यर्थः।

पत्युः प्रणयातिरेकसूचकवचनेष्वपि दुःसहवियोगकातरतादर्शनेन प्रियसखीं प्रायेण मूर्च्छितामालोक्य तमसा समवेदनाप्रदर्शनपुरःसरं तद्वचनमेव समर्थयमानाऽऽह, नैता।—स्नेहेन प्रणयेन आर्द्राः शीतलाः अनुरागबहुला इत्यर्थः, तथा शोकेन दुःसहवियोगदुःखेन हेतुना दारुणाः निष्ठुराः एताः रामेण इतःपूर्व्वमुच्चारिताः वाचः वचनानि न प्रियतमाः न एकान्ततः अभीष्टाः, भवन्तीति शेषः, निरतिशयप्रेमाभि-व्यञ्जकतया प्रियाः अपि दुःसहवियोगदुःखरूचतया न एकान्ततः प्रियत्वमावहन्तीति भावः, अतः ताः पूर्व्वकथिताः एताः वाचः मधुनः क्षौद्रस्य सविषाः गरलसम्पृक्ताः धाराः प्रपाताः त्वयि श्च्योतन्ति चरन्ति। यद्वा—प्रियतमाः स्नेहार्द्राः शोकदारुणाः एताः वाचो न, अपि तु ताः एताः सविषाः मधुनो धाराः त्वयि श्च्योतन्ति स्रवन्ती-त्यर्थः। सुधासमाकारा मकरन्दधारा यथा सरसास्वादमधुरतया परमपरितोष-कारिण्यपि दारुणगरलसम्पृक्ता चेत्, अपहरति चेतनामास्वादकस्य, तथैव गभीरानुरागप्रकटनमधुरा स्वामिनो वचनधारा प्रगाढशोकचोभव्यञ्जकतया नैकान्ततः प्रीणाति ते चेतः इति भावः। [अत्र एकस्मिन् एव रामवचसि स्नेहार्द्रत्व शोकदारुणत्वरूपविरुद्धधर्मद्वयसम्बन्धकथनात् विरोधाभासो नामालङ्कारः, तथा सीतायां सविषमधुधाराक्षरणस्य असम्भवतया मधुधाराभिः रामवचनानाम् उप-मानोपमेयभावबोधनात् असम्भवद्वस्तुसम्बन्धरूपा निदर्शना, तथा चानयोरङ्गाङ्गिभावेन सङ्करः। यद्वा कल्पे तु—उपमेयरूपाः प्रकृताः वाचः प्रतिषिध्य उपमानरूपाणां

राम। अयि वासन्ति। मया खलु (फ)—

यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दंशः।
तथैव तीव्रो हृदि शोकशङ्कु-
र्मर्माणि कृन्तन्नपि किं न सोढः ? ॥ ३५ ॥

सविषमधुधारायां सत्यतया स्थापनात् "नेदं नभोमण्डलमम्बुराशिः" इति दर्पणकृदुदाहरणवदत्रापि अपह्नुतिरलङ्कारः]। अनुष्टुब् वृत्तम् ॥ ३४ ॥

(फ) राम "अतिक्रान्ते धैर्यमवलम्ब्यताम्" इति वासन्त्या अनुयोगे "देव्या शून्यस्य" इत्यादिना धैर्यपराकाष्ठाप्रदर्शनपुरःसरं निरस्यापि पुनरपि विशेषतः स्वस्य धीरत्वं प्रमापयितुमाह, अयीति।—मया—रामेण, "किं न सोढः" इति शोकशङ्कुनान्वयः। खल्विति वाक्यभूषायाम्।

कीदृशं तद्वैर्यम् ? इत्याह, यथेति।—अन्तः हृदये प्रत्युप्तं विद्धं [प्रतिपूर्वात् वपतेर्निष्ठाप्रत्ययस्य रूपम्] तिरश्चीनं तिर्यग्भावापन्नं, तिर्यग्भावेन विद्धस्य सहसा निःसारयितुमशक्यत्वात् निरतिशययातनाप्रदमिति भावः, [तिरोऽञ्चति इति विग्रहे तिरस्शब्दपूर्वादञ्चतेः क्विन् इति तिर्यच् "तिरसस्तिर्यलोपे" (६।३।९४पा०) इत्यनेन तिरसः 'तिरि' आदेशः, ततश्च तिर्यगेव इति स्वार्थे "विभाषाञ्चेरदिक्स्त्रियाम्" (५।४।८ पा०) इति खप्रत्ययः] अलातशल्यं यथा ज्वलदङ्गारमयशङ्कुरिव ("अङ्गारोऽलातमुल्मुकम्" इत्यमरः) च एव सविषो विषात्मको दंशः दन्तप्रवेशः यथा, तथैव तद्वदेव तीव्रस्तीक्ष्णः नितरां दुःसहः इत्यर्थः, हृदि अन्तःकरणे निहित इति शेषः, शोकशङ्कुः शोककीलः शाणितलौहकीलवदतिभीषणः प्रियाविप्रयोगशोकः इत्यर्थः ("वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः) मर्माणि जीवनस्थानानि कृन्तन् छिन्दन्नपि किं न सोढः ? न व्यसह्यत किम् ? अपि तु सोढ एव, मयेति शेषः। [सहेः कर्मणि निष्ठाप्रत्ययः, पक्षे सहित इति] तत् किमपरं करिष्यामि धैर्यावलम्बने तद्देवेति भावः। [अत्र प्रधानाङ्गशोकरूपोपमेयस्य अलातशल्यदंशरूपाभ्यामुपमानाभ्यां दर्शनात् मालोपमालङ्कारः, तथा "शोकशङ्कुः" इत्यत्र उपमानसाधकवचनाभ्याहारवशात् उपमायां वा, इह केवलं निरङ्गरूपकञ्चेत्यनयोः अङ्गाङ्गिभावेन सङ्करः]। इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम्। सा हि उपजातिगणान्तर्गतचतुर्दशविधस्य "हंसी" नामा पञ्चमः प्रस्तारः ॥ ३५ ॥

सीता। एव ह्मि मन्दभाइणी पुणो वि आआसआरिणी अज्जउत्तस्स। * (ब)

राम। एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मे संस्तुतबहुतरप्रियदर्शनादुद्दामोऽयमावेग। (भ) तथाहि,—

लोलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मयाऽऽधीयते तं तमन्तः।

* एवमस्मि मन्दभागिनी पुनरप्यायासकारिणी आर्यपुत्रस्य।

(ब) मन्दभागिनी—निरतिशयभाग्यहीना, अहमिति शेष। पुनरपि—भूयोऽपि, पूर्वमेकदा दशाननकृतहरणव्यापारेण तथा आयासकारणत्वात् पुनःपदम्। एवम्—इत्थम्, अतिदारुणरूपेण इत्यर्थ। आयासकारिणी—दुःखहेतुभूता, हतभागिन्या मयैव विरहशोकनायमेव क्लेशमनुभवतीति अहमेवास्य क्लेशस्य निदानमिति मां धिगिति भाव।

(भ) ननु यद्येवम् अरुन्तुदमपि शोकशङ्कुं विषह्य त्वया धीरताया पराकाष्ठा दर्शिता, तदा सम्प्रति कथमेव त्वं शोकविह्वल नितान्तमधीर इव विलपसीत्याक्षेपमाशङ्क्य सीतापतिराह, एवमिति।—एवम्—उक्तप्रकारेण। अतिनिष्कम्पेत्यादि।—अतिनिष्कम्पम् अतिनिश्चलं यथा तथा स्तम्भितं स्थिरीकृतम् अन्तःकरणं येन तस्य तथाकृतस्य यत्नेन धैर्यमालम्ब्य स्थितस्येत्यर्थ। मे—मम। अयम्—सम्प्रत्यनुभूयमान। आवेग,—प्रियतमावियोगसम्भूत शोकप्रवाह। संस्तुतेत्यादि—संस्तुतानां पूर्वपरिचितानां ("संस्तवः स्यात् परिचय" इत्यमर) बहुतराणां प्रियाणां जनानां पादपपर्वतकुरङ्गविहङ्गमादिवस्तूनाञ्च दर्शनात्। उद्दाम,—अतिभूमिं गत। परिचितवस्तुदर्शनात् तु सहसोद्भूतोऽयं वेग कष्टेनापि न निवर्त्तनीय इति भाव।

सम्प्रति शोकावेगस्य उद्दामत्वमेव दर्शयति, लोलेति।—लोलादपि चञ्चलादपि उल्लोलम् अतिचञ्चलमिति यावत्, तद् यथा तथा क्षुभितस्य उद्वेलस्य वेगभयस्तेन चालनापन्नस्येत्यर्थ, करुणस्य प्रियजनवियोगप्रभवस्य शोकस्य [करणस्येति पाठे—करणस्य इन्द्रियगणस्य] यदुज्जृम्भणम् उद्रेक, अतिवृद्धिरिति यावत्, तस्य स्तम्भनार्थं प्रतिरोधाय, यद्वा—लोलाः चञ्चला ये उल्लोलाः महोर्मयः तद्वत् क्षुभित आलोडित ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति समासः] य करुण,

भित्त्वा भित्त्वा प्रसरति बलात् कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ २६ ॥

सीता। एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुक्खसक्खो-
हेण पफ्फुरिदणिअदुक्खं विअ आकम्पिदं मे हिअअं। * (म)

* एतेन आर्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसङ्क्षोभेण प्रस्फुरितनिजदुःख-
मिवाकम्पितं मे हृदयम्।

शोकस्यायमावेगः रसः तस्य यत् उज्जृम्भणम् आतिहाडः तस्य स्तम्भनार्थं प्रतिरोधार्थं
मित्यर्थः ("—अर्धोर्मिषु। महत्सूल्लोलकल्लोलौ" इत्यमरः)। मया यो यो यत्र
यादृशो यादृशः प्रयासः इत्यर्थः, कथमपि कृच्छ्रेण आधीयते आश्रीयते क्रियते
इत्यर्थः, कोऽपि अननुभूतपूर्वः अनिर्वचनीयः इति यावत्, चेतोविकारः चित्तवैक्लव्य
तोयस्य जलस्य अप्रतिहतरयः अनिरुद्धवेगः ओघः प्रवाहः, राशिरित्यर्थः, सैकतं
सिकतामयं, वालुकानिर्मितमिति यावत्, [सिकताभिर्निर्मितमिति सैकतम्
"सिकताशर्कराभ्याञ्च" (५।२।१०४ पा०) इति सिकताशब्दात् अण्, तथा
"आपः सुमनसो वर्षा अप्सरः सिकताः समाः। एताः स्त्रियां बहुत्वे स्युरेकत्वेऽपि
क्वचिन्मताः॥" इति सिकताशब्दस्य बहुवचनान्तता] सेतुम् आलिमिव ("सेतु-
रालौ स्त्रियां पुमान्" इत्यमरः) तं तं पूर्वोक्तं यत्नमिति शेषः, भित्त्वा भित्त्वा पुनः
पुनः भङ्क्त्वा, मोघीकृत्येत्यर्थः, ["यो यः, तं तं, भित्त्वा भित्त्वा" इत्येतेषु स्थलेषु "नित्य-
वीप्सयोः" (८।१।४ पा०) इति यथासम्भवं नित्यवीप्सार्थयोर्द्विर्वचनम्] बलात् प्रसह्य
वेगेनेत्यर्थः [बलादित्यत्र "ल्यब्लोपे कर्मण्यधिकरणे च" (वा०) इति पञ्चमी,
"विभाषा गुणेऽस्त्रियाम्" (२।३।२५ पा०) इति वा पञ्चमी] अन्तः मनसि प्रसरति
प्रसारमापद्यते, प्रविशतीति वा, यथा अतिप्रयत्नसम्पादितोऽपि अङ्कुरः सिकता-
सेतुबन्धः उत्तालजलौघोऽप्रतिहतवेगं निरोद्धुं न कथमप्यर्हति, तथा मया यथाशक्ति
समुत्पादितोऽप्युद्यमः दुःसहमिमं प्रियावियोगसम्भूतं शोकावेगम् अपनेतुं नार्हतीति,
तत् किमेव पुरस्तादुपदिश्यते भवत्या? इति भावः। [अत्र चतुर्थपादे एकस्मिन्नेव
वाक्ये जलप्रवाहचित्तविकारयोरुपमानोपमेयभावकथनात् उपमा नामालङ्कारः,
सा च इवशब्दोपादानतया श्रौती। प्रथमपादे च लोलोल्लोलेत्यादिवर्णानाम्
श्रोत्रप्रत्यासत्तया करुणरसस्य प्रतिकूलत्वात् अत्र प्रातिकूल्यवर्णत्वदोषः इति केचित्]।
मन्दाक्रान्ता वृत्तम्॥ २६॥

(म) एतेन—बाधावगाहमानेन। दुर्वारदारुणारम्भेण—दुर्वारं निरोद्धु-

वासन्ती। [स्वगतम्।] कष्टमभ्यापन्नो देवः, तदन्यतः क्षिपामि तावत्। [प्रकाशम्] चिरपरिचितानामेतेषां जनस्थानभागानामवलोकनेन आत्मानमानन्दयतु देवः। (य)

रामः। एवमस्तु। (र)

[इति उत्थाय परिक्रामति।] (ल)

सीता। सन्दीवणाओ ज्जेव दुक्खस्स पिअसहीविणोदणोवाआ त्ति मण्णेदि। * (व)

* सन्दीपना एव दुःखस्य प्रियसखीविनोदनोपाया इति मन्यते।

सशङ्कः अत एव दारुणः भीषणः आरम्भः प्रक्रमो यस्य तेन तथोक्तेन। भर्तुः पुत्रस्य—स्वामिनो रामस्य। दुःखसङ्क्षोभेण—शोकसंवेगेन। प्रस्फुरितेत्यादि।—प्रस्फुरितम् उद्रिक्तं निजं स्वकीयं दुःखं शोकः यस्मिन् तत् तथोक्तम्। मे हृदय—मदीयं चेतः। आकम्पितमिव—कम्पाकुलमिवेत्यर्थः। शोककारणस्य वियोगस्य उभयत्रैव समानत्वादिति भावः। ["आकम्पितमिव" इत्यत्र क्रियोत्प्रेक्षाऽलङ्कारः, सा च इवशब्दोत्थापिततया वाच्या]।

(य) कष्टमिति—दुःखसूचकमव्ययम्। अभ्यापन्नः,—अभि अभितः आपन्नः दुःसहशोकावेगेन निरतिशयं विपन्नः, निरतिशयशोकाकुलः इत्यर्थः। यद्वा—कष्ट—दुःखम्, अभ्यापन्नः,—प्राप्तः इत्यर्थः। देवः,—रामः। ततः—तस्मात्, एभिः शोकसन्दीपकवाक्यैः एतस्य दुःसहदुःखसम्भवादित्यर्थः। अन्यतः,—अन्यस्मिन् विषये। क्षिपामि—आकर्षयामि, अस्य चित्तं विषयान्तरे सञ्चारयामीत्यर्थः। तावदिति—वाक्यालङ्कृतौ। चिरपरिचितानां—पूर्वं प्रियतमया सह बहुकालमवस्थानात् चिराभ्यस्तानाम्। एतेषां—परिदृश्यमानानाम् [इदानीमिति पाठे—"अवलोकनेन" इति "आनन्दयतु" इत्यनेन वा परिणामान्वयः]। जनस्थानभागानाम्—जनस्थानस्य भागाः अंशविशेषाः तेषाम्। ["अवलोकनेन" इत्यस्य कर्मणि 'कर्तृकर्मणोः कृति" (२।३।६५ पा०) इति षष्ठी]। अवलोकनेन—दर्शनेन। आत्मानं—चित्तम्, ("आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि" इति मेदिनी)। आनन्दयतु—विनोदयतु।

(र) एवम्—इत्थं, त्वया कथितमेवेत्यर्थः। अस्तु—भवतु, त्वया यदुक्तं तदेव करोमीत्यर्थः।

(ल) परिक्रामति—परितः पादसञ्चारेण भ्रमतीत्यर्थः।

(व) प्रियसख्या—प्रियसहचर्या वासन्त्या। दुःखस्य—विरहशोकस्य। सन्दीपना

वासन्ती। देव देव।—

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीरोधसि।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥२७॥

एव—पूर्वस्मृतिसमुद्बोधकतया उत्तेजका एव, उद्दीपनाहेतव एवेत्यर्थः। विनोदनोपायाः,—शोकापनोदनसाधनानीत्यर्थः। इति—इत्थम्। मन्यते—निश्चिनोति। पूर्वकथितानां निजवचनानाम् अतिदुःखहेतुतां मन्यमाना वासन्ती आर्य्यपुत्रस्य चित्तमन्यासक्तं विधातुकामा राम यत् जनस्थानभागानवलोकयितुम् उपदिदेश, तन्न युक्तं, तेषामप्यधिकतया पूर्ववृत्तस्मारकत्वेन दुःखहेतुत्वादिति भावः। [अत्र विनोदनहेतुत्वेन निर्दिष्टस्य जनस्थानभागदर्शनस्य तत्कार्य्यं प्रति विरुद्धतया विरुद्धकार्य्यकारणनिदर्शनाद्विषमालङ्कारः]।

स्ववचसा पूर्वस्मृतिसमुद्बोधात् राममतिक्लिष्टमालोक्य वासन्ती तम् अन्यासक्तमानसं विधाय विनोदयितुकामा आह, अस्मिन्निति।—अस्मिन्नेव पुरोवर्त्तिनि इत्यर्थः, लतागृहे निकुञ्जे त्वं तस्याः सीतायाः मार्गे प्रत्यागमनवर्त्मनि दत्ते ईक्षणे येन सः तथोक्तः अनवस्थाः आसीः गोदावरीं गतायाः सीतायाः प्रत्यागमनविलम्बनात् तदागमनपथे सतृष्णदृष्टिक्षेपः प्रतीक्षमाणः आसीरित्यर्थः, सा सीता गोदावर्य्याः रोधसि तीरे [रुणद्धि जलमिति रोधः, इति रुधेरसुन्प्रत्ययः] ("कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु" इत्यमरः) ["गोदावरीसैकते" इति पाठेऽपि तुल्य एवार्थः] चिरं बहुक्षणं हंसैः कृतम् आहितं कौतुकं दर्शनाभिलाषः यस्याः सा तथोक्ता ("कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्" इत्यमरः) अभूत् बभूव। आयान्त्या गोदावरीतटात् प्रतिनिवर्त्तमानयेत्यर्थः, [आयाति या सा आयान्ती तया, आङ्पूर्वात् याधातोः शतृप्रत्ययः, ततश्च स्त्रियां ङीपि कृते "आच्छीनद्योर्नुम्" (७।१।८० पा०) इति पाक्षिके नुम्प्रत्यये, पक्षे आयात्या] तया सीतया त्वां भवन्तं परिदुर्मनायितमिव कालविलम्बान्नितरामुत्कण्ठितहृदयमिव [परि परितः दुर् दुःस्थं मनो यस्य सः परिदुर्मनाः, अपरिदुर्मनाः परिदुर्मना भवतीत्यर्थे परिदुर्मनस् शब्दात् "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" (३।१।१२ पा०) इति क्यङि सलोपे च कृते "अकृत्सार्वधातुकयोर्दीर्घः" (७।४।२५ पा०) इति दीर्घे ततश्च क्तप्रत्यये कृते पदमेतत् निष्पन्नम्] वीक्ष्य दृष्ट्वा कातर्य्यात् त्वत्कोपसम्भावनाजनितव्याकुलतया वामात्

सीता। दारुणासि सहि वासन्दि। दारुणासि, जा एदेहि हिअअमम्मगूढसल्लघट्टणेहि पुणो पुणो म मन्दभाइणी अज्जउत्त अ सन्दावेसि। * (ग्र)

* दारुणाऽसि सखि वासन्ति। दारुणाऽसि, या एतैर्हृदयमर्मगूढशल्यघट्टनै पुन पुनर्मां मन्दभागिनीमार्य्यपुत्रञ्च सन्तापयसि।

[ईषत् तरति या सा कातरा "ईषदर्थे" (६।३।१०५ पा०) इति को कादेश, ततश्च कातराया भाव इत्यर्थे "गुणवचनब्राह्मणादिभ्य कर्मणि च" (५।१।१२४ पा०) इति ष्यञ्प्रत्यय] अरविन्दकुड्मलनिभ कमलकोरकसदृश [अरविन्दस्य कुड्मलेन सदृश इति अस्वपदविग्रहनित्यसमासे अरविन्दकुड्मलनिभ इति पद सिद्धम्, "—स्युरुत्तरपदे त्वमी। निभसङ्काशनीकाशप्रतीकाशोपमादय" इत्यमरोक्ते। "कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे" इति मेदिनी] मुग्ध मनोहर प्रणामस्य अञ्जलि त्वा प्रसादयितु युक्तपाणिरित्यर्थ, [अत्र—प्रणामाय अञ्जलिरित्यर्थे प्रणामस्य अञ्जलिरिति अश्वघासादिवत् तादर्थ्ये षष्ठीसमास] बद्ध रचित आसीदिति शेष। [अत्र "अरविन्दकुड्मलनिभ" इत्यशे कमलकोरकेण अञ्जले साहृश्यकथनादुपमा नामालङ्कार, सा च तुल्यार्थकनिभशब्दोत्थापिततया आर्थी,—"आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वति' इति दर्पणोक्ते, तथा "परिदुर्मनायित मिव" इत्यत्र उत्प्रेक्षा चेत्यनयो परस्परनिरपेक्षतया ससृष्टि]। शार्दूलविक्रीडित वृत्तम्॥ ३७॥

(ग्र) दारुणा असि—अतिनिष्करुणा भवसि, त्वमिति शेष। अत्र "दारुणाऽसि दारुणाऽसि" इति खेदे द्विरुक्ति। या—त्वमित्यर्थ। एतै,—श्रुतपूर्वैरित्यर्थ। हृदयमर्म्मेत्यादि।—हृदयस्य अन्त करणस्य मर्म्मणि प्राणस्थाने गूढस्य प्रच्छन्नरूपेण अवस्थितस्य शल्यस्य वियोगदु खरूपस्य शङ्को घट्टनै इतस्तत सञ्चालनैरित्यर्थ। मन्दभागिनीं—हतभाग्याम्। आर्य्यपुत्रञ्च—स्वामिनं रामञ्चेत्यर्थ। सन्तापयसि—पीडयसि। यथाऽतिपेलवे छन्नस्थाणि निहितमपि शल्य कथमपि सह्यते, पुनस्तदेव चेत् कुतश्चिदाघातात् सहसा सञ्चालित स्यात्, तदा चिरावस्थानेन कथञ्चिन्निगृहीतमपि सुतरामसहनीय भवेत, तथा अतिदु सहोऽपि शोकावेग दीर्घकालातिरेकात् कथमप्यन्तनिगृहीतोऽपि त्वदीयवचोभिरिदानीं नवीकृत इव युगपदावयो मर्म्म पीडयतीति भाव।

राम । चण्डि जानकि ! इतस्ततो दृश्यसे इव न चानुकम्पसे । (ष)—

> हा हा देवि ! स्फुटति हृदयं स्रसते देहबन्धः
> शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
> सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
> विष्वङ्मोहः स्थगयति, कथं मन्दभाग्यः करोमि ॥ ३८ ॥

[इति मूर्च्छति ।]

(ष) चण्डि !—अतिकोपने, एवं सकरुणं विलपन्तमपि मां यतो नानुकम्पसे, तन्मन्ये निष्कारणनिर्वासनेनैव अतिकुपिता त्वं मयि एवमाचरसीति चण्डीत्या मन्त्रणम् । इतस्ततः,—अभितः, चतुर्दिक्षु इत्यर्थः । दृश्यसे इव—मया साक्षात्क्रियसे इव, (भागीरथीवरमाहात्म्यात् साक्षात् सीतामवलोकयितुमशक्नुवन्नपि सततसीताऽनुध्यानपरतया "त्रिभुवनमपि तन्मयं विरहे" इति सर्वमेव सीतामयमवलोकयन् उद्भ्रान्तचित्तो जानकीनाथ इत्यमुक्तवानिति बोध्यम्) । च—किन्तु, ("चान्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे ॥" इति मेदिनी) । नानुकम्पसे—साक्षादुपस्थिता सती सादरसम्भाषणादिना न दयसे, ममेति शेषः ।

दुःसहशोकसन्तप्तमानसतया अत्यन्तमन्तर्ज्वलतः स्वस्यानुकम्पनीयत्वमेव दर्शयन्नाह, हा हेति ।—हा इति शोकसूचकमव्ययम्, ("हा विषादशुगर्त्तिषु" इत्यमरः । अत्र खेदातिशय्यं द्विभावः) । देवि ! सीते ! हृदयम् उरःस्थलमित्यर्थः, स्फुटति विदीर्यते, देहबन्धः शरीरबन्धनं, कायाऽवयवसन्धिरित्यर्थः, स्रसते शिथिलीभवति, ["ध्वंसते" इति पाठे—विशीर्णीभवतीत्यर्थः ।] जगत् विश्वं शून्यम् असत्कल्पमित्यर्थः, मन्ये जानामि, अविरता अविश्रान्ता ज्वाला शोकाग्निशिखा यस्मिन् तद् यथा तथा, अन्तः अन्तःकरणे [अन्तरित्यवच्छेदे सप्तमी] ज्वलामि दग्धोऽस्मि, विधुरः प्रियावियोगदुःखेन कातरः अन्तरात्मा जीवः सीदन् नियतक्लेशपरम्परासहनेन अवसन्नः सन् अन्धे अन्धङ्करणे, प्रगाढे इति यावत्, [अन्धयति लोकान् यत् तत् अन्धं तस्मिन् अन्धे इति अन्धिधातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४ पा०) इति पचादित्वादच्] तमसि अन्धकारे मज्जतीव निलीयते इव, तथा मोहः अचैतन्यं, विचित्ततेति यावत्, (मोहलक्षणं यथा दर्पणे—"मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः । मूर्च्छनाऽज्ञानपतनभ्रमणाऽदर्शनादिकृत् ॥"

सीता। हद्दी। हद्दी। पुणो वि प्पमूढो अज्जउत्तो। * (स)

वासन्ती। देव! समाश्वसिहि समाश्वसिहि।

सीता। हा अज्जउत्त! म मन्दभाइणी उद्दिसिअ सअलजीअलोअमङ्गलाधारस्स दे वार वार समइदजीविददारुणो दसापरिणामो त्ति हा हदम्हि। † (ह)

[इति मूर्च्छति।]

* हा धिक्। हा धिक्। पुनरपि प्रमूढ आर्यपुत्र।

† हा आर्यपुत्र! मा मन्दभागिनीमुद्दिश्य सकलजीवलोकमङ्गलाधारस्य त वार वार सशयितजीवितदारुणो दशापरिणाम इति हा हताऽस्मि।

इति) विष्वक् समन्तात्, सर्वविषयानित्यर्थ, स्थगयति आवृणोति मोहाच्छादनात् न किमपि मे ज्ञानविषयो भवतीत्यर्थ। एव सति मन्दभाग्य दुर्भाग्य अहमिति शेष, कथ कि करोमि अनुतिष्ठामि? कमुपायमाश्रयामीत्यर्थ अस्य प्रतिविधानार्थमिति शेष। दु सहवियोगवह्निना वह्निरन्तरैव दह्यमान नियतक्लेशपरम्पराऽनुभवेन मुहुर्मुह्यमान नियतमन्धतमसावृत दु मह्मिद दु ख प्रतिविधातु न कमप्युपाय पश्यामीति भाव। [अत्र अन्धङ्करणे तमसि अन्तरात्मन मज्जनसम्भावनादुत्प्रेक्षा नामालङ्कार]। मन्दाक्रान्ता वृत्तम॥ ३८॥

(स) पुनरपि—भूयोऽपि। प्रमूढ,—अत्यर्थ मूर्च्छित।

(ह) मन्दभागिनी—अतिदुर्भाग्याम्। उद्दिश्य—लक्ष्यीकृत्य, मदर्थमेवेत्यर्थ। सकलेत्यादि।—सकल समग्र जीवलोक जगत तस्य मङ्गलाधार कल्याणनिलय तस्य, जीवितो त सतत सकललोककल्याण साधयति तस्येत्यर्थ। वार वार—पुन पुन, न तु कदाचिदित्यर्थ। सशयितेति।—सशयित स्थास्यति न स्थास्यति वेति सन्देहमापन्न जीवित जीवन यस्मिन् स तथोक्तश्चासौ, अत एव दारुण भीषणश्चेति सशयितजीवितदारुण प्राणानामस्थिरसन्देहवशादतिभयावह इत्यर्थ। [एतयो विशेषणयोरेक विशेष्य कल्पयित्वा नीललोहितादिवत् कर्मधारयसमास कर्त्तव्य]। दशापरिणाम —अवस्थाविपर्यास, मूर्च्छारूपप्रकृतावस्थापरिवर्त्तनामित्यर्थ। इति—अस्मात् हेतो। हताऽस्मि—आर्यपुत्रस्य ईदृशपरिणामदर्शनेन प्रायेण मृताऽस्मीत्यर्थ। कायाऽसत्त्वे छायासत्त्ववत् आर्यपुत्रस्य अकुशले मम कुशल कथमपि न सम्भाव्यमिति भाव।

तमसा। वत्से। समाश्वसिहि समाश्वसिहि, पुनस्त्वत्पाणिस्पर्श एव सञ्जीवनोपायो रामभद्रस्य। (क)

वासन्ती। कथमद्यापि नोच्छ्वसिति॥ हा प्रियसखि! सीते! क्वाऽसि? सम्भावयात्मनो जीवितेश्वरम्। (ख)

सीता। [ससम्भ्रममुपसृत्य हृदि ललाटे च स्पृशति]। (ग)

वासन्ती। दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः। (घ)

(क) मुहुरेव विलापिन स्वस्वामिन सहसा मूर्च्छितमालोक्य प्राणापायशङ्काऽऽतङ्किता प्रियसखीं जानकीमपि मूर्च्छितामवेत्य तमसा तां समाश्वासयन्ती आह, वत्से! इति।—समाश्वसिहि—आश्वस्ता भव (सम्भ्रमे द्विरुक्ति)। आश्वासे हेतुमाह, पुनरिति।—पुन,—भूय इत्यथ, ("प्रियस्पर्शो हि पाणिस्ते" "स्पर्शं पुरा परिचित" इत्यादिना पूर्वमप्येकदा सीतापाणिस्पर्शेन राघवस्य सञ्जीवनात् अत "पुन" इत्युक्तम्)। त्वत्पाणिस्पर्श,—तव करस्पर्श, [पाणिना स्पर्श इति पाणिस्पर्श, तव पाणिस्पर्श त्वत्पाणिस्पर्श इति विग्रह] अत एवकारो ऽन्ययोगव्यवच्छेदायक, तेन—तव करस्पर्श विना जगति नान्यत् किमपि अस्य सञ्जीवनसाधन वर्त्तत इत्यर्थो लभ्यते। सञ्जीवनोपाय,—पुनर्जीवनसाधनम्। ननु सहचरि! स्वामिनि मूर्च्छितेऽपि मैव नैषी, तन्मूर्च्छाऽपगमैकसाधनस्य कार्य्यत परीक्षितपूर्वस्य त्वत्करावमर्शस्य त्वदायत्तत्वादिति भाव।

(ख) कथ—किम। अद्यापि—इदानीमपि, एतावता कालेनापीत्यथ। न उच्छ्वसिति—न चेतना लभत, रामभद्र इति शेष। क्वाऽसि—कुत्र वर्त्तसे? स्वामिन एव दुर्दशाया तव अन्यत्रावस्थान न युक्तमिति भाव। आत्मन,—स्वस्य। जीवितेश्वर—प्राणनाथ, स्वजीवितस्य ईश्वरे अकल्याणभाजि, स्वजीवितस्यापि नितराम् अशरणता सुतरामेव अकल्याणमिति भाव। सम्भावय—स्वोपस्थित्या सम्भावित कुरु इत्यर्थ।

(ग) ससम्भ्रम—त्वरान्वित यथा स्यात् तथा। उपसृत्य—समीपमेत्य। हृदि—वक्षसि। ललाटे—भाले च, [उभयत्र औपश्लेषिकाधिकरणे सप्तमी] रामभद्रस्य इति शेष, स्पृशति स्पर्श नाटयति।

(घ) [illegible] सीताया [illegible] तत्पाणिस्पर्शेनैव प्राप्तचेतने रामभद्रे [illegible] वासन्ती आह, दिष्ट्येति।—दिष्ट्या—

राम। आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा बहिरपि वा शरीरधातून्।
संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपरविधं तनोति मोहम्॥ ३८॥

[आनन्दनिमीलिताक्ष एव] सखि वासन्ति। दिष्ट्या वर्द्धसे।(ड)

भाग्येनेत्यर्थः। प्रत्यापन्नचेतनः,—प्रत्यापन्ना पुनरागता चेतना संज्ञा यस्य स तथोक्तः, भवतीति शेषः।

दुःसहदुःखावेगेनातितरां मुह्यन्नपि जानकीजीवनं सहसा बहुशः परिचितपूर्वम् अदृष्टहेतुकममृतमधुरं करस्पर्शमुपेतः अत्यानन्दितः विस्मित इवाह, आलिम्पन्निति।— संस्पर्शः अनुभूयमानो जानकीकरस्पर्शः, अमृतमयैः सुधात्मकैः [अमृतस्य स्वरूपा इति अमृतमयाः "तत्प्रकृतवचने मयट्" (५।४।२१ पा०) इति अमृतशब्दात् मयट्] प्रलेपैः प्रकृष्टैः लेपैः अन्तर्वा अभ्यन्तरस्थितान् बहिरपि वा बहिःस्थितांश्च, शरीरधातून् देहोपादानभूतरसादीन् [दधति शरीरं पुष्णन्ति इति धातवः दधातेरौणादिकः तुन्। "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः" इति सुश्रुतसंहिता] आलिम्पन्निव लिप्तान् कुर्वन्निव सदयं समन्तात् व्याप्नुवन् सन्नित्यर्थः, जीवयन् चेतयन् मोहादस्तचेतने मयि पुनः प्राणसञ्चारं कुर्वन्नित्यर्थः, मामिति शेषः, पुनरपि भूयोऽपि, (पूर्वमप्येकदा एवमेवैतत्पाणिस्पर्शेन चेतनाप्राप्तेरेव पुनःपदम्)। अकस्मात् सहसा अतर्कितरूपेणेत्यर्थः, आनन्दात् निरतिशयाह्लादवशात्, यद्वा—आनन्दं प्राप्य, [अत्र "विभाषा गुणेऽस्त्रियाम्" (२।३।२५ पा०) इति हेतौ पञ्चमी "ल्यब्लोपे कर्मण्यधिकरणे च" (वा०) इति ल्यब्लोपे वा पञ्चमी] अपरविधं दुःखानुपादानकतयाऽत्यन्तविलक्षणं सुखजन्यमित्यर्थः, मोहं विषयान्तराग्रहणरूपं जाड्यं, तनोति विस्तारयति, प्रवर्त्तयतीत्यर्थः। [अत्र प्रथमपादे प्रकृते संस्पर्शे पीयूषप्रलेपविलेपनकर्तृत्वसम्भावनादुत्प्रेक्षा नामालङ्कारः, तथा चरमे "जीवयन् मोहं तनोति" इत्यत्र जीवयतो मोहविस्तारकर्त्तृत्वस्य आपाततो विरुद्धतया विरोधाभासश्चेत्यनयोः अङ्गाङ्गिभावेन सङ्करः]। प्रहर्षिणी वृत्तम्। तल्लक्षणं यथा,—"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" इति। एतत्समारब्ध १४०१ सङ्ख्याकः॥ ३८॥

(ड) आनन्देति।—आनन्देन सुधामधुरस्पर्शसुखेन निमीलिते मुद्रिते अक्षिणी नेत्रे यस्य स तथोक्तः सुखानुभूतौ नेत्रनिमीलनं स्वाभाविकमेव। दिष्ट्या वर्द्धसे— मदीयभाग्यादयेन तवापि भाग्योदयो जात इत्यर्थः।

वासन्ती। देव। कथमिव?

राम। सखि। किमन्यत्, पुनः प्राप्ता जानकी। (च)

वासन्ती। अयि देव। क्व सा?

राम। [स्पर्शसुखमभिनीय]। पश्य ननु इयं पुरत एव। (छ)

वासन्ती। अयि देव। किमिति मर्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःखदग्धामपि पुनर्मन्दभागिनीं दहसि माम्? (ज)

सीता। ओसरिदुं इच्छामि, एसो उण चिरसब्भावसोम्मसीअलेण अज्जउत्तप्फंसेण दीहदारुणं वि सन्दावं झत्ति हरन्तेण वज्जलेवोवणद्धो विअ सिढिलणीसहविपज्जत्थो वेवदि अवसो विअ मे हत्थो। * (झ)

* अपसर्त्तुमिच्छामि, एष पुनश्चिरसद्भावसौम्यशीतलेनार्य्यपुत्रस्पर्शेन दीर्घदारुणमपि सन्तापं झटिति हरता वज्रलेपोपनद्ध इव स्विद्यन् निःसहविपर्य्यस्तो वेपतेऽवश इव मे हस्तः।

(च) किमन्यत—अपरं किं कथयामीत्यर्थः। पुनः प्राप्ता—पुनरप्यासादिता।

(छ) ननु इति सम्बोधने। इयं—सन्निकृष्टा, मदीयप्रत्यक्षविषयीभूतेत्यर्थः, ["इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥" इति नियमात् अत्र प्रत्यक्षविषये इदमः प्रयोगः]। पुरत एव—अग्रत एव एवकारेण व्यवहितत्वव्यवच्छिन्नात्त।

(ज) किमिति—कथम्। मर्मच्छेदेति।—मर्म्मणः जीवनस्थानस्य छेदेन भेदेन दारुणैरतिदुःसहैः, निरतिशयमर्म्मविदारकैरित्यर्थः। प्रलापैः,—"इयं पुरत एव" इति उन्मत्तवाक्यैः, सीतायाः मरणनिश्चयेन कथमपि तस्याः अत्र उपस्थित्यसम्भवादिति भावः। प्रियसखीति।—प्रियसख्याः प्रियसहचर्य्याः सीतायाः दुःखेन वियोगक्लेशेन ज्वलदनलनिभेनेति यावत्, दग्धां सन्तप्तामपि। दहसि—सन्तापयसि, पीडयसीत्यर्थः दुःसहप्रियसहचरीविरहकातरायां मयि क्षते क्षारमिव तवैतदुन्मत्तवचनमतिदुःसहं जातमिति भावः।

(झ) सहसा प्रियतमाऽङ्गस्पर्शेन सञ्जातकम्पात्मकसात्त्विकभावा स्वामिसन्दर्शनमप्रकृष्टा वदति तस्मात् स्थानादपसर्त्तुकामा आह, अपसर्त्तुमिति।—अपसर्त्तुम्—अन्यत्र गन्तुम्। इच्छामि—अभिलषामि, अन्यथा महाननर्थः सम्भविष्यति

राम। सखि ! कुतः प्रलापाः ? (ञ)—

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधरः

चिरं स्वैच्छास्पर्शैरमृतशिशिरैर्यः परिचितः ।

सीता। अज्जउत्त ! सो ज्जेव दाणिं सि तुमम् ? * (ट)

---

* आर्य्यपुत्र ! स एव इदानीमसि त्वम् ?

इति भावः । चिरसद्भावेति ।—चिरसद्भावेन चिरप्रणयेन अविचलितप्रेमणा इत्यर्थः, सौम्यो मनोहरः शीतलः स्निग्धस्तेन । वज्रलेपोपनद्ध,—वज्रेण यो लेपो लेपनम्, आमतिन्दुकफलादिमिश्रणजनितः आधुनिक "सिमेण्ट" आद्यपरनामा वराह-संहितायुक्तो द्रव्यविशेषो वा वज्रलेपः, तेन उपनद्ध इव दृढ़निबद्ध इव कथमपि उत्थापयितुमशक्य इत्यर्थः । वराहसंहितोक्तः वज्रलेपो यथा—"आमं तिन्दुकमामं कपित्थकं पुष्पमपि च शाल्मल्याः । वीजानि शल्लकीनां धन्वनवल्को वचा चेति ॥ एतैः सलिलद्रोणः क्वाथयितव्योऽष्टभागशेषश्च । अवतार्य्योऽस्य च कल्को द्रव्यैरेतैः समनुयोज्यः ॥ श्रीवासकरसगुग्गुलभल्लातककुन्दुरुकसर्जरसैः । अतसीविल्वैश्च युतः कल्कोऽयं वज्रलेपाख्यः ॥ प्रासादहर्म्यवलभीलिङ्गप्रतिमासु कुड्यकूपेषु । सन्तप्तो दातव्यो वर्षसहस्रायुतस्थायी ॥" इति । ५७म अध्यायः । स्विद्यन्—सात्त्विक-भावोद्रिकात् घर्माक्तः । निःसहेति ।—निःसहं नितरां यथा स्यात् तथा विपर्य्यस्तं विरुद्धभावं गतं, जडभावमापन्नं इत्यर्थः । इदानीमतादृशभावस्यानौचित्यादिति भावः । अवशः,—स्वव्यापाराक्षमः । वेपते—कम्पते, एतेन पञ्चमः सात्त्विकभाव उक्तः । सात्त्विकभावा यथा दर्पणे—"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥" इति ।

(ञ) रामः "किमिति प्रलापैर्मां दहसि" इत्यादिवासन्तीवचनं प्रत्युत्तरयन्नाह, सखीति ।—कुतः,—कस्माद्धेतोः । प्रलापाः,—निरर्थकवचनानि, स्युरिति शेषः । "पुनः प्राप्ता जानकी" इति मदीयवचनमुन्मत्तवचनवदनर्थकमिति सम्भावयितुं नोचितमिति भावः ।

(ट) 'गृहीत" इत्यादिश्लोकस्य पूर्वार्द्धमाकर्ण्य स्वामिनः स्वस्मिन्ननितर-साधारणमनुरागमनुभूय जनकतनया सविस्मयं वक्ति, आर्य्यपुत्रेति ।—इदानीम्—इदानीमपीत्यर्थः । स एव—पूर्व्ववत् मदेकान्तानुरागी एव, मां प्रति तादृक्प्रणय-वानेवेत्यर्थः, त्वयि न कोऽपि विपर्य्ययो लक्ष्यते मम तु दशाविपर्य्ययः केवलमदृष्टा-धीन इति भावः । यद्वा—इदानीं—सम्प्रति, ईदृगनुरागप्रकाशकाले इत्यर्थः । स

राम । स एवायं तस्यास्तुहिनकरकौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥४०॥
[इति गृह्णाति] । (ठ)

सीता । हद्धी । हद्धी । अज्जउत्तप्फंसमोहिदाए प्पमादो क्खु मे संवुत्तो । * (ड)

* हा धिक् ! हा धिक् ! आर्यपुत्रस्पर्शमोहिताया प्रमादः खलु मे संवृत्तः ।

एवं— निरपराधाया अपि मम विजनवनाविवासनेनातिदारुण आसीत्, स एवेत्यर्थः । न ह्येतत् कथमपि सम्भवतीत्यर्थः काका व्यज्यते । तादृगातिदारुणे दृष्टलोकसाधारणानुराग पापाणे पङ्कजोद्भववदत्यन्तमसम्भवीति भावः ।

ननु यदि नैतत् प्रलापः तर्हि निर्जनारण्यनिवासितायाः एतावता कालेनावश्यं मृतायाः सीतायाः सम्प्रत्यत्र कथम् उपस्थितिसम्भवः ? इत्याशङ्कामपनेतुमनुभव-साक्षिकं तद्याथार्थ्यं प्रतिपादयन् सीतापतिराह, गृहीत इति ।—पूर्वे शैशवे इत्यर्थः, पाणिग्रहणविधौ विवाहसंस्कारावसरे कङ्कणं कराभरणविशेषः वैवाहिकमङ्गलसूत्रविशेषो वा (कङ्कणं करभूषायां सूत्रमण्डलधारयोः" इति मेदिनी) तस्य धरः कङ्कणधरः मङ्गलसूत्रसमलङ्कृत इत्यर्थः, यः प्रियायाः पाणिः गृहीतः धृतः, मयेति शेषः, तथा यः पाणिः अमृतशिशिरैः सुधावच्छीतलैः सुखकरैरित्यर्थः, स्वेच्छास्पर्शैः स्वेच्छया स्वाच्छन्द्येन स्पर्शाः सम्पर्काः इत्यर्थः, तैः अनियतस्पर्शैरिति यावत् चिरं दीर्घकालं व्याप्य परिचितः परिज्ञातः इति पूर्वार्द्धार्थः । पूर्वार्द्धेन स्वप्रतिपाद्यमुपन्यस्य सम्प्रति तदेव वाक्यमुपसंहरति, स एवेति ।—तस्याः सीतायाः तुहिनैः तुषारैः करकाभिः वर्षोपलैश्च ("अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' इति वर्षोपलस्तु करका" इति चामरः) सह यत् औपम्यं तादृशशीतलत्वात् सादृश्यं तेन सुभगः सन्तापहारकत्वात् सुन्दरः, ललितः सुकुमारः यत् लवलीकन्दलं लवलीप्ररोहः तन्निभः तत्सदृशः (लवली नीवारः इति नाम्ना प्रसिद्धः) स एव अयं स्पर्शेन अनुभूयमानः पाणिः करः मया लब्धः प्राप्तः । [अत्र "अमृतशिशिरैः" "तुहिनकरकौपम्यसुभग" "ललितलवलीकन्दलनिभः" इति पदत्रये उपमाऽलङ्कारः । किञ्च "मया लब्धः पाणिः" इत्यत्र लवलीकन्दलनिभः इति पदोपादानात् समाप्तपुनरात्तता नाम

राम। सखि वासन्ति! आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि, तत् त्वं तावदेनां धारय। (ढ)

वासन्ती। कष्टम्! उन्माद एव। (ण)

सीता। [ससम्भ्रममाक्षिप्यापसर्पति]। (त)

राम। हा धिक् प्रमादः, हा धिक् प्रमादः॥—

करपल्लवः स तस्याः सहसैव जडो जडात् परिभ्रष्टः।
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन्॥४१॥

सात्त्विकभावोदयेन जडीभूता प्रियेण पुनर्गृहीता सीता स्वप्रकाशभीता आह, हा धिगिति।—आर्य्यपुत्रेति।—आर्य्यपुत्रस्य स्वामिनो रामस्य स्पर्शेन मोहितायाः विचित्तता प्राप्ताया। प्रमादः,—अनवधानताजनितो दोष इत्यर्थः। आर्य्यपुत्रस्य सञ्ज्ञालाभानन्तरमेव इतोऽनपसरन्त्या मया न साधु कृतमिति भावः।

(ढ) सुदीर्घं वियोगदुःखमनुभूय सम्प्रति भाग्यलब्धायाः सीतायाः पुनरपायशङ्कया भीतः रामचन्द्रः आह, सखीति।—आनन्देति।—आनन्देन प्रियतमाकरस्पर्शसम्भवेन हर्षेण निमीलितानि अवशानि स्वस्वव्यापारे अशक्तानीति यावत्, इन्द्रियाणि चक्षुरादिज्ञानेन्द्रियाणि वागादिकर्म्मेन्द्रियाणि च यस्य स तथोक्तः। साध्वसेन—साध्वसं हर्षातिरेकसम्भूतवैक्लव्यं तेन [साधु अत्यन्तम् अस्यते निक्षिप्यते मनोऽनेनेति साध्वसं, साधु+अस्+अच्] ("भीतिर्भीः साध्वसं भयम्" इत्यमरः)। परवान् अस्मि—पराधीनः भवामि, नाहमात्मनि प्रभवामीत्यर्थः। ("परतन्त्रः पराधीनः परवान् नाथवानपि" इत्यमरः)। इदानीं कथमप्यसम्भावितं प्रियापाणिस्पर्शसुखमनुभूय स्तब्धीभूतोऽस्मीति नाहं सीतां धारयितुं शक्नोमीति भावः।

(ण) उन्मादः,—उन्मत्तता, बुद्धिविभ्रम इति यावत्, रामस्य जात इति शेषः। कष्टम्—एतदतीव दुःखकरमित्यर्थः, इतरथा प्रत्यक्षतोऽदृश्यमानायामपि वैदेह्यां कथं प्रत्यक्षदर्शीव व्यवहरतीति भावः।

(त) आक्षिप्य—आकृष्य, रामधृतं स्वकीयं पाणिं बलादाच्छिद्येत्यर्थः। ससम्भ्रमं—सत्वरम्। अपसर्पति—अपसृत्य दूरं यातीत्यर्थः।

बहोः कालात् परं भाग्यात् पुनर्लब्धस्यापि प्रियायाः करपल्लवस्य सहसा परिभ्रंशे स्वकीयमनवहितत्वमेव हेतुरिति समर्थयमान आह, करपल्लव इति।—जडः विवशः, स्वव्यापारानमः इत्यर्थः, प्रकम्पी वेपमानः, स्विद्यन् स्वेदाक्तः तस्याः सीतायाः सः इतः पुनरेव मया लब्धः करपल्लवः कोमलाङ्गुलिसनाथतया पल्लवसदृशः करः जडात्

सीता। हद्धी। हद्धी। अज्ज वि अणवत्थिदत्थिमिदमूढ-घुम्मन्तणअणो ण पज्जवत्थावेदि अत्ताणअं। * (ध)

तमसा। [ससेहहासकौतुकं निर्वर्ण्य]। (द)—

* हा धिक्! हा धिक्! अद्यापि अनवस्थितस्तिमितमूढघूर्णन्नयनो न पर्यवस्थापयत्यात्मानम्।

सङ्क्षोभितात् विवशतया दृढमाकृष्टमवमादित्यर्थः, परिकम्पेण सकम्पात् स्विद्यत घर्माप्लुतात् मम करात् हस्तात् सहसैव झटित्येव परिभ्रष्टः परिच्युतः, विगलित इति यावत्, मम अनवधानतो विना कथं मान्यलक्ष्म्यापि पुनरपगमः इति भावः। [अत्र सीतारामदारुभयोरपि समेन सात्त्विकभाववर्णनेन रत्याख्यस्थायिभावस्य परिपुष्टतया विप्रलम्भशृङ्गाररसो भवतीति बोध्यम्। सात्त्विकभावाश्च प्रागुक्ताः। तथाऽत्र सहसा करात् करपरिभ्रंशे जडत्वादीनां हेतुतया पदार्थहेतुकं काव्यलिङ्ग-मलङ्कारः, एवं 'करपल्लव' इत्यत्र लुप्तोपमा च इत्यनयोः परस्परनिरपेक्षतया संसृष्टिः]। आर्या नाम मात्रावृत्तम्। तल्लक्षणं यथा—"लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे जः। षष्ठो जश्च नलघु वा प्रथमार्द्धे नियतमार्यायाः॥" इत्यादि। अत्र पूर्वार्द्धे षष्ठस्य (– ⏑ –) जगणत्वात् यतिव्यवस्थाभावः। इयं हि सप्तदशलघु-सद्भावात् चत्वार्यपि नायक (जगण) चतुष्टयान्वितत्वात् वेश्या जातिः॥ ४१॥

(ध) अनवस्थितेति।—अनवस्थिते अकस्मात् प्राप्तसीताकरपरिभ्रंशात् अस्थिरे स्तिमिते पूर्वानुभूतस्पर्शसुखस्मृत्या निश्चले मूढे विषयज्ञानरहिते तथा घूर्णन्ती सातापविपदप्राप्ताशङ्कया धावन्ती नयने चक्षुषी यस्य सः। [अत्र अनवस्थित-त्वादिरूपाणाम् एतासां परस्परं विरुद्धावस्थानाम् एकत्र युगपद् अवस्थानासम्भवात् क्रमशः वर्णनेन व्यवस्था बोध्या] आत्मानं—स्वमित्यर्थः। न पर्यवस्थापयति—प्रकृतिस्थं करोति, तथा निरोद्धुं न शक्नोतीत्यर्थः, इदानीं कथमपि न सम्भावित-मानीतककरस्पर्शम् अकस्मादनुभूय स्पर्शानन्दविह्वलः आर्यपुत्रः सहसा पुनः करापसरणात् सीतादृष्टा नासन्त्यनापादायतुमर्हसीत्यहो मे वज्रकठोराया निष्करुणत्व-मिति भावः।

(द) ससेहेति।—स्नेहेन स्वाभाविकेन वात्सल्येन, हासेन व्यङ्ग्यतया प्रथमं निर्भर्त्सनापि ... अकारणेन तात पुनरपसरणेऽति हास्येन कौतुकेन, इदम् ... दर्शनीय इति कौतूहलेन ... तदा। निर्वर्ण्य—दृष्ट्वेत्यर्थः, आहतिनेपः।

सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव ॥ ४२ ॥

सीता । [स्वगतम् ।] अम्महे ! अवसेण एदेण अत्ताणएण लज्जाविदह्मि भअवदीए तमसाए, किंत्ति किल एसा मण्णिस्सदि एसो दे परिच्चाओ एसो अ हिअआसङ्गो त्ति । * (ध)

* अम्महे ! अवशेन एतेनात्मना लज्जापितास्मि भगवत्या तमसया, किमिति किल एषा मंस्यते, एष ते परित्याग एष च हृदयासङ्ग इति ।

जनकनन्दिनीं सहसा क्षणं प्रियतमाऽङ्गसङ्गसुखेन बहिःप्रकाशितस्वेदरोमाञ्चकम्पादिसात्त्विकभावतया स्वं मनोभावं गोपायितुं कथञ्चिदसमर्थामालोक्य तमसा तस्यास्तदानीन्तनीमवस्थामुपवर्णयन्ती आह, सस्वेदेति ।—वत्सा सीता प्रियस्य पत्युः रामस्य स्पर्शेन अङ्गसङ्गेनेत्यर्थः, यत् सुखं तेन स्पर्शजनितेन आह्लादेन हेतुनेत्यर्थः, सस्वेदानि स्वेदार्द्राणि रोमाञ्चितानि पुलकितानि कम्पितानि च वेपमानानि च अङ्गानि गात्रावयवा इत्यर्थः, यस्याः सा तथोक्ता घर्मजलाप्लुतपुलकितवेपमानगात्रावयवेत्यर्थः, सती [अत्र स्त्रियां पाक्षिकः ङीष्] मरुता वायुना नवाम्भसा च वर्षारम्भे नववृष्टजलेन च यथाक्रमं प्रविधूता कम्पिता सिक्ता च उक्षिता च सती [नायं शाब्दिकसम्मतः प्रयोगः, तथा हि—समर्थं हि पदं समर्थेन समस्यते नासमर्थं, तथाच प्रकृते मरुत्प्रविधूतपदयोः नवाम्भःसिक्तपदयोश्च परस्परमन्वयसमर्थयोरपि यथाक्रमं समासे नवाम्भःशब्देन प्रविधूतशब्देन च व्यवहिततया असामर्थ्यात् तादृशसमासो न साधुरिति सुधीभिर्विभाव्यम्] तथा स्फुटा विकसिता कोरकाः कलिका यस्याः सा तथाभूता स्फुटोद्गतकेसरेत्यर्थः, कदम्बयष्टिः कदम्बशाखेव [अत्र यष्टिशब्दप्रयोगेण क्लीबता द्योत्यते, सम्भावितस्य लिङ्गवैषम्यरूपस्य उपमादोषस्य परिहारश्च भवतीति बोध्यम्] जाता सहसा । [अत्र उपमा नामालङ्कारः, सा च इवशब्दोपादानतया श्रौती, उपमानोपमेयगतसामान्यधर्माणां वाच्यतया च पूर्णा, परन्तु नेयं विशुद्धा, उपमेयांशे दर्शितानां धर्माणां क्रमस्य उपमानांशे अपरिरक्षितत्वात्, तथा "मरुन्नवाम्भःप्रविधूतसिक्ता" इत्यत्र प्रथमोद्दिष्टयोः मरुन्नवाम्भःपदयोरनु यथाक्रमं प्रविधूतसिक्तपदयोरुद्देशात् यथासङ्ख्या चेत्यनयोरन्योन्यसापेक्षतया सङ्करः] । इन्द्रवज्रोपेन्द्रवज्रयोर्मिश्रणात् उपजातिर्वृत्तम्, एतच्च चतुर्दशधाप्रस्तारान्वितायाः उपजातेः द्वादशसङ्ख्यको 'रामा' नामको भेदः ॥ ४२ ॥

(ध) तमसायाः सकौतुकमालोकनं तदानीन्तनावस्थासमालोचनञ्च विज्ञाय

राम। [सर्वतोऽवलोक्य]। कथं नास्त्येव, ननु अकरुणे वैदेहि।—" (न)

सीता। सच्चं अकरुणह्मि, जा एव्वंविधं तुमं पेक्खन्ती णं धरामि ज्जेव जीविदम्। * (प)

---

* सत्यमकरुणाऽस्मि, या एवंविधं त्वां प्रेक्षमाणा ननु धराम्येव जीवितम्।

लज्जावनम्रा सीता आत्मगतमाह, अम्महे इति।—इदं सम्भ्रमसूचकमव्ययम्। अवशेन—आनन्दविह्वलेन, प्रियस्पर्शसुखानुभवपरवशेनेत्यर्थः। एतेन—मदीयेन स्वेद-रोमाञ्चकम्पान्वितेनेत्यर्थः। आत्मना—देहेन हेतुना, [अत्र "हेतौ" (२।३।२३ पा०) इति तृतीया। "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" इति विश्वः]। लज्जापिताऽस्मि—त्रपां नीताऽस्मि, लज्जाक्रान्ताऽस्मीति यावत्। ["लज्जाम् आपिता" इति द्वितीयासमासेन "लज्जापिता" इति पदं सिद्धम्। केचित्तु "लज्ज् प्रकाशने' इति धातोरदन्तचुरादिषु पाठं कल्पयित्वा अदन्तत्वेन वृद्धिं स्वीकृत्य पद-मेतत् साधयन्ति। शाकटायनस्तु कथाप्रभृतीनां सर्वेषामेव धातूनां पुकं विधाय कथापयति, गणापयति, लज्जापयति इत्यादिकं साधयतीति ध्येयम्]। परि त्यागः,—परिवर्जनम्। हृदयासङ्गः,—हृदयस्य चेतसः आसङ्गः आसक्तिः, अनुरागः इति यावत्, [अत्र अभिषङ्गः इति पाठे—संसर्गः इत्यर्थः]। असौ त्वामासन्नप्रसवाम् असहायाञ्च विजनेऽरण्ये निवासितवान्, त्वया तु अतिनिष्करुणेऽप्यस्मिन् एवमनुरागः प्रदर्शितः, यत् क्षणमङ्गसङ्गेनैव स्वेदपुलककम्पयुगपदाकुलिता आनन्दपरवशा च सञ्जाता निष्कारणनिर्वासयितरि अभिमानाप्रदर्शनेन ते लघुतैव जातेति तमसाया विद्रवासः भविष्यतीति भावः। इति—इत्थम्। एषा—तमसा। मन्यते—भासते।

(न) प्रमादतः स्वकरात् विच्युतामपि सीतामितस्ततोऽन्विष्यापि अलभमानो रामचन्द्र आह, कथमिति।—कथमिति—विस्मये। नास्त्येव—न विद्यत एव, अत्र सीतेति शेषः। सीता यदि अत्र कुत्रापि स्यात् तदा उपलभ्येत इति भावः। नन्विति सकरुणसम्बोधने। अकरुणे।—नास्ति करुणा दया यस्याः तत्सम्बुद्धौ, निर्दये। इत्यर्थः, वक्ष्यमाणरामोक्तिनिर्गतेन "क्वासि" इत्यनेनान्वयः।

(प) स्वामिना अभिहितम् "अकरुणे' इति सम्बोधनपदमाकर्ण्य सीता सानु-कम्पमाह सच्चमिति।—सत्य—यथार्थमित्यर्थः, ननु अकारुण्ये नास्ति कोऽपि सन्देह

राम। "—क्वासि देवि। प्रसीद न मामेवंविधं परित्यक्तु-मर्हसि। (फ)

सीता। अइ अज्जउत्त। विवरीदं विअ एद। * (ब)

वासन्ती। देव। प्रसीद प्रसीद, स्वेनैव लोकोत्तरेण धैर्य्येण सस्तभ्यातिभूमिगतविप्रलम्भमात्मानम्, कुतोऽत्र मे प्रियसखी सीता ? (भ)

---

* अयि आर्य्यपुत्र। विपरीतमिवैतत्।

इति भावः। या—अहम्। एवंविधं—दुःसहमद्वियोगदुःखकातरमित्यर्थः। प्रेक्षमाणा—स्वयं साक्षात्कुर्वाणा। जीवितं—प्राणान्। धरामि—बिभर्मि, एवकारस्त्वन्ययोगव्यवच्छेदार्थकः, तेन "न तु त्यजामि" इत्यर्थो लभ्यते। अत्र नन्वित्यनुनये। दयितं दुःसहदुःखम्रियमाणं साक्षादवेक्षमाणया पतिव्रतया एवया प्राणविनिमयेनापि तद्दुःखापनयं करणीयं इति तद्विरुद्धाचरणपरायणाया मम तु निर्दयत्वं सुव्यक्तमेवेति भावः।

(फ) क्वासि—मम दृष्टिविषये कुत्र वर्त्तसे इत्यर्थः। प्रसीद—पुनरपि दर्शनस्पर्शनदानेन मामनुगृहाणेत्यर्थः। एवंविधं—दुःसहवियोगक्लेशकातरं, प्रायेण कामस्य दशमीं दशामुपेतमित्यर्थः। परित्यक्तुं—विहाय अन्यत्र गन्तुमित्यर्थः। अर्हसि—शक्नोषि दयितं दुःखकातरमशरणञ्चावेक्षमाणाया एवया कथमपि नासौ परित्याज्य इति भावः।

(ब) अयीति कोमलसम्बोधने। आर्य्यपुत्र।—स्वामिन्। एतत्—त्वदुक्तं "न मामेवंविधम्" इत्यादिवचनमित्यर्थः। विपरीतं—विरुद्धमिव आभातीति शेषः। यतस्त्वमेव मां परित्यक्तवान्, नाहं त्वां परित्यक्तवतीति भावः। पतिव्रता विनीता सीता रामवाक्यमन्यथा प्रतिपादयितुं न शक्नोति द्योतनाय अत्र इवशब्द-प्रयोगः।

(भ) स्वेन—स्वकीयेन, स्वाभाविकेनेत्यर्थः। लोकोत्तरेण—लोकातिशायिना, असाधारणेन अन्योपदेशनिरपेक्षेणेत्यर्थः। धैर्य्येण—चित्तस्थैर्य्येण, मनसोऽविकारितयेति यावत्। अतिभूमीत्यादि।—भूमिं चरमसीमाम् अतिक्रान्ता इति अतिभूमिः, तां गतः प्राप्तः सीमातिगः इत्यर्थः, [अत्र भूमिशब्दः चरमसीमार्थे लाक्षणिकः] विप्रलम्भो विरहशोको यस्य तं तथोक्तम्, अतिविरुद्धवियोगशोकावेग

राम। व्यक्तं नास्ति, कथमन्यथा वासन्ती अपि तां न पश्येत्, अपि खलु स्वप्न एष स्यात्, न चास्मि प्रसुप्तः, कुतो वा रामस्य स्वप्नः ? सर्वथा स एवैष भगवान् अनेकवारपरिकल्पनानिर्मितो विप्रलम्भः पुनः पुनरनुबध्नाति माम्। (म)

मित्यर्थः। ('विप्रलम्भो विप्रयोगः' इत्यमरः)। आत्मानं—मानसम् ("आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि' इति मेदिनी)। संस्तम्भय—स्थिरीकुरु, शोकातिरेकविकृतमपि प्रकृतिस्थं विधेहीति यावत्।

(म) 'कुतोऽत्र प्रियसखी' इति प्रागुक्तवासन्तीवचनेन लब्धचेतनो रघुनन्दनः स्वानुभूतौ सन्दिहान आह, व्यक्तमिति।—व्यक्तम्—असन्दिग्धं, सीता अत्र नास्ति इत्येव सत्यमित्यर्थः। अन्यथा—इतरथा, चेदत्र विद्येतेत्यर्थः, वासन्त्यपि—अलौकिकशक्तिमती वनदेवताऽपीत्यर्थः, तां—सीतां, कथं—कस्मात्, न पश्येत्—नेक्षेत ? यतः सीता अनितरसाधारणप्रभावशालिन्या वासन्त्या अपि दृष्टिविषयो न भवति, तस्मात् नूनमेव सा अत्र नास्तीति भावः। इदानीमात्मनः सर्वथा भ्रमसम्भवात् वनदेवतायाश्च अलौकिकशक्तिमत्तया ज्ञानप्रकर्षद्योतनाय "वासन्ती" इत्युक्तम्। एवं योग्यानुपलब्धेरेव सीताया असत्त्वनिर्णयात् स्वानुभवस्य भ्रमरूपता-माह, अपीति।—एषः,—त्वगिन्द्रियजन्यः सीताया अनुभवः। स्वप्नः,—सुप्तिकालीनः मनोविकारः, ("स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः" इति दर्पणः)। अत्र अपिशब्दः सम्भावनार्थकः, ("अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये' इति मेदिनी)। खलुशब्दो वाक्यालङ्कारः। सोऽपि न सम्भवतीत्याह, न चेति।—अस्मि—अहम्। प्रसुप्तः,—निद्रितः। अत एव कुतः,—कस्मात्, केन रूपेणेत्यर्थः। रामस्य—मम। अप्रसुप्तस्य हि कथमपि न स्वप्नसम्भवः, प्रसुप्तविज्ञानस्यैव स्वप्नपदार्थत्वात् "स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्' इति अमरवचनात् पूर्व्वोक्तदर्पणवचनाच्च। प्रागुक्तरूपं विकल्पं सन्त्यज्य स्वयमेव सिद्धान्तमाह, सर्व्वथेति।—अनेकवारेत्यादि।—अनेकवारं बहुशः परिकल्पना पुनः पुनः चिन्ता इति अनेकवारपरिकल्पना [अनेकवारमित्यत्र "कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति अत्यन्तसंयोगे द्वितीया, ततश्च परिकल्पनाशब्देन द्वितीयासमासः] तया निर्मितः उत्पादितः निरन्तरचिन्ताजन्य इत्यर्थः। स एव—पूर्व्वं बहुशः अनुभूत एव इत्यर्थः, विप्रलम्भः प्रतारणाविशेषः। भगवान्—प्रतारणासाधनसमर्थतया अलङ्घ्यशक्तिमानित्यर्थः। विप्रलम्भः,—प्रतारणा, जगत्प्रसिद्धावतारेणापि मायावतारादिरूप

सीता। मए ज्जेव दारुणाए विप्पलद्धो अज्जउत्तो।* (य)

वासन्ती। देव! पश्य पश्य।—

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथः

पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः।

* मयैव दारुणया विप्रलब्ध आर्यपुत्रः।

भ्रम इत्यर्थः। पुनः पुनः,—भूयोभूयः। मामनुधावति—मया सह धावति, इतः पूर्वं बहुवारम् अनेनाहं विप्रलब्धः, सम्प्रत्यपि, तथैव जातः इत्येवमत्यन्तं प्रतारितो ऽस्मीति भावः। [तस्य दर्शनीयत्वं चास्य रागो भगवानित्यनेन ध्वन्यते]।

(य) दारुणया—निष्करुणया। विप्रलब्धः,—प्रतारितः सहसा परित्याजितः इत्यर्थः। नायमलीककल्पनाप्रभवो विप्रलम्भो येनायमार्यपुत्रः क्रियते, अपि तु नितान्तनृशंसया मयैव अदृष्टया उपपादित इति भावः।

इ सहविरहयोगकातरं राममेवं विलपन्तमालोक्य तम् अन्यासक्तमानसं कर्तुकामा वासन्ती सहसा ससम्भ्रमं "देव! पश्य पश्य" इत्यादिना स्ववक्तव्यमुपक्रम्य सम्प्रति दर्शनीयमेवाह, देवेति।—जटायुषा जटायुर्नामकगृध्रराजेन, [जटं रूढतमायु र्यस्य सः जटायुः, अथवा—जटा पक्षमूलमेवायुर्यस्य स तथोक्तः। [अस्मात्पाठे तु—जटया याति इति जटायुः, जटाशब्दोत्तर'या' धातोः "मृगय्वादयश्च" (उ० पा० १ सू० ३७) इति मृगय्वादित्वात् कुप्रत्ययः। अत्रैव श्लोके तृतीय पादे दृष्टशजटायुशब्दः प्रयुक्तः। दीर्घजीवित्वात् तस्यैव संज्ञा] विघटितः भग्नः पौलस्त्यस्य पुलस्त्यगोत्रापत्यस्य रावणस्य (पुलस्त्यो हि ब्रह्मणः मानसपुत्रेषु चतुर्थः, तस्य विश्रवा नाम एकः पुत्र आसीत्, रावणस्तु तस्यैव पुत्र इति पुलस्त्यस्य नप्ता रावण इति पौराणिकी वार्त्ता) कार्ष्णायसः कृष्णवर्णेन उत्कृष्टलौहविशेषेण विनिर्मितः लौहमयः इत्यर्थः, [कृष्णञ्च तदयश्चेति कृष्णायसम् "अनोऽश्मायःसरसां जातिसंज्ञयोः" (५।४।९४ पा०) इति समासान्तः टच्। कृष्णायसस्य विकार इति कार्ष्णायसः "तस्य विकारः" (४।३।१३४ पा०) इति अण् प्रत्ययः]। अयं दृश्यमानः रथः स्यन्दनः वर्त्तते इति पश्य, त्वमिति शेषः। पुरतः अग्रतः वर्त्तमानाः पिशाचवदनाः विकटमुखाः इत्यर्थः, [पिशितमाचामन्ति अश्नन्ति इति पिशाचाः पिशितशब्दोत्तरमाचमधातोडप्रत्ययेन पृषोदरादित्वात् साधुः, तेषामिव वदनानि येषां ते पिशाचवदनाः इति उपमानपूर्व्वपदः बहुव्रीहिः उत्तरपद लोपश्च] कङ्कालशेषाः अस्थिपञ्जरावशिष्टाः ('शरीरस्यास्थि कङ्कालं तथा स्यादस्थि

खड्गच्छिन्नजटायुपक्षतिरित, सीता ज्वलन्तीं वहन्
अन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥ ४३ ॥

पञ्जरम् इति हलायुधः। खगाः जटायुनिहताः रावणरथवाहनमहाकायखचरविशेषाः (अवापि विघटिताः इति वचनव्यत्यासेन अनुषज्यते) वर्त्तन्ते तानपि पश्येत्यूह्यम्। इतः अस्मात् पुरतोऽङ्गुल्या निर्दिश्यमानात् स्थानादित्यर्थः, अरिः शत्रुः रावण इत्यर्थः, खड्गेन छिन्ने जटायोः पक्षती पक्षमूले येन स तथोक्तः सन् अस्मिन्नेव स्थाने जटायोः पक्षती छिन्ने इति भावः [पक्षस्य मूलम् इति पक्षतिः "पक्षात् तिः" (५।२।२५ पा०) इति पक्षशब्दात् मूलार्थे तिप्रत्ययः] ज्वलन्तीं लावण्यमय्या कान्त्या जाज्वल्यमानां बलादपहरणजनितक्रोधेन उद्दीप्यमानां वा [अत्र उपमानभूत विद्युद्धर्मचाञ्चल्यानुरोधात् अपहरणात्मकेऽपाये सीतायाः विचेष्टमानत्वमपि व्यज्यते] सीतां वैदेहीं वहन् बलात् गृहीत्वेत्यर्थः अन्तः अभ्यन्तरे व्याकुला चञ्चला, देदीप्यमानेति यावत्, विद्युत् तडित् यस्य स तथोक्तः अम्बुदो मेघ इव [अम्बु जलं ददाति इति अम्बुदः, अम्बुशब्दात् ददातेः "आतोऽनुपसर्गे कः" (३।२।३ पा०) इति कप्रत्ययः। अत्र रावणराक्षसस्य कृष्णवर्णत्वात् बृहत्कायत्वाच्च मेघौपम्यं बोध्यम्] द्याम् आकाशम्, ("द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। नभोऽन्तरीक्षं गगनम्—" इत्यमरः)। अभ्युदस्थात् अभ्युत् पपात। [उत्पूर्वकस्थाधातोः "उदोऽनूर्ध्वकर्मणि" (१।३।२४ पा०) इत्यनेन अनूर्ध्वचेष्टायामेव आत्मनेपदविधानात् अत्र च तस्य ऊर्ध्वचेष्टाबोधकत्वात् नात्मनेपदमिति बोध्यम्]। पुरा किल वर्णिवेशधारी लङ्केश्वरः दण्डकारण्यादसहायां जनकतनयां छलेनापहृत्य रथेन गगनपथेन गच्छन् दशरथस्य नृपतेर्मित्रेण जटायुषा तरसा पक्षानिलवेगेन भग्नरथः अतिक्रुद्धः परस्परं दीर्घकालं युध्यमानं तं कथमपि दुराजितुकामः असिना तस्य पक्षौ छित्त्वा सीतामादाय लङ्कां प्रतस्थे, इति रामायणकथाऽत्रानुसन्धेया। [अत्र रावणस्य बृहदाकारकृष्णवर्णाभ्यां मेघसदृशतया सीतायाश्च स्वाभाविकोज्ज्वल्यनानैकचाञ्चल्याभ्यां विद्युत्सदृशतया सीतोपेतस्य रावणस्य विद्युद्भासाऽम्बुदेनोपमितत्वात् उपमाऽलङ्कारः, तथा अभ्युद्भ्यां परस्य स्थाधातोः अभ्युत्थानरूपोर्ध्वगमनबोधकत्वात् तदर्थे अवाचक इति अत्र ऊर्ध्वगमनार्थे प्रयुक्तत्वात् अवाचकत्वदोषः। स चैव परिहर्त्तुं शक्यते, तथाहि—"अभि" इति पृथक् पदम्, "उदस्थात्" इति क्रियाया विशेषणं, तथाच नास्ति भीः भीतिः यत्र तत् अभि निर्भयं यथा स्यात् तथेत्यर्थः, उदस्थात् उत्पपात इति]। शार्दूलविक्रीडितं वृत्तम् ॥ ४३ ॥

सीता। [सभयम्।] अज्जउत्त! तादो आवादीअदि, अहं अ अवहरिअामि, परित्ताहि परित्ताहि। १ (र)

राम। [सवेगमुत्थाय।] आ पाप! तातप्राणसीतापहारिन्! क्व यासि? (ल)

वासन्ती। अयि देव राक्षसकुलप्रलयधूमकेतो! अद्यापि ते मन्युविषयः? (व)

१ आर्य्यपुत्र! तातो व्यापाद्यते, अहञ्चापह्रिये, परित्रायस्व परित्रायस्व।

(र) सहसा वासन्तीमुखात् पौलस्त्यजटायुवृत्तान्तश्रवणेन पूर्ववृत्तान्तस्मरणात् अतिभीता सीता तदानीन्तनीमवस्थामिदानीमनुभवन्तीव ससम्भ्रममाह, आर्य्य पुत्रेति।—तात,—पितृतुल्यो जटायुः, [अत्र श्वशुरस्य दशरथस्य मित्रत्वेन पूज्यत्वात् जटायुषि सीतायाः तातशब्दप्रयोगः। तथाच—"पूर्वे पितरि पूज्ये च तातशब्दः प्रयुज्यते" इति]। व्यापाद्यते—सपक्षच्छेदं हन्यते, रावणेन इति शेषः, [तत्र रावणशब्दोच्चारणादपि भीता सीता स्ववाक्ये कर्तृपदं नाभिहितवतीति बोध्यम्]। अपह्रिये—अपहृत्य नीये इत्यर्थः। परित्रायस्व—शत्रुहस्तात् रक्ष, मां तातञ्चेति शेषः। अत्र सम्भ्रमे द्विरुक्तिः।

(ल) रामोऽपि सीतया उच्चैरभिहितं परित्रायस्वेति कातरवचनमाकर्ण्य विस्मृतात्मवृत्तान्तः तत्परित्राणार्थं सत्वरमुत्थाय आह आ इति।—आ इति कोप व्यञ्जकमव्ययम् ('आस्तु स्यात् कोपपीडयोः" इत्यमरः)। पाप!—पापाचारिन्, [पापं विद्यतेऽस्य इति पापः, अस्त्यर्थे पापशब्दात् "अर्श आदिभ्योऽच्" (५।२।१२७ पा०) इति अच्प्रत्ययः। प्रतारणया परस्त्रीहरणेन अन्यायसमरेण परप्राणहरणेन च अस्य पापाचारित्वं बोध्यम्]। तातप्राणेति।—तातस्य जटायोः प्राणान् सीताञ्च अपहरति यः सः, तत्सम्बोधने। तातस्य प्राणान् प्रेयसीं सीताञ्च बलादपहृत्य क्व पलायसे इति समुदितार्थः, जीवतो मे न मत्तो मुक्तिस्तवेति भावः [अत्र "त्रोटकं पुनः सरम्भवाक्" इति दर्पणोक्तलक्षणकं रोषसम्भ्रमवचनरूपं सन्ध्यङ्गमभिहितमिति ज्ञेयम्]।

(व) राक्षसकुलेति।—राक्षसानां निशाचराणां कुलस्य वंशस्य प्रलये ध्वंसे धूमकेतुः प्रलयसूचकधूमकेतुनामकोत्पातविशेष इव, तत्सम्बुद्धौ, निर्मूलविनाशित क्रव्यादवंशेत्यर्थः। यथाहि धूमकेतुः उदितः सन् लोकानां क्षयकारकः तथा त्वमपि राक्षसानां

सीता। अह्नो। उन्मत्त ह्मि संवुत्ता। (अ)

राम। अन्वर्थ एवायमधुना प्रलापो वर्त्तते। (ष)—

उपायाना भावादविरतविनोदव्यतिकरै
विमर्दैर्वीराणा जगति जनिताऽत्यद्भुतरस।

अहो। उन्मत्ताऽस्मि संवृत्ता।

मित्यथ। यद्वा—राक्षसकुलस्य प्रलये धूमकेतुरनल निशाचरवंशनाशे प्रलयानलस्वरूपेत्यथ। ("अग्न्युत्पातौ धूमकेतु" इत्यमर)। [अत्र रूपकमलङ्कार]। अद्यापि—इदानीमपि, समूलनाश राक्षसवंशविनाशानन्तरमपीत्यथ। मन्युविषय,—कोपपात्रम्, अस्तीति शेष, ("मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमर), [इत पूर्वं तवैव रावणोऽसौ सवंशनाश विनाशित इति ते कोपपात्रमिदानीं किमपि नास्त्येवेति काक्वा व्यज्यते]।

(अ) वासन्तीकथित तथ्यवचनमाकर्ण्य स्वकीया भ्रान्तिमवगम्याह, अहो इति।—उन्मत्ता—कामस्य अष्टमी दशानामा उन्मादयुक्तेत्यथ। कामदशा पूर्वमुक्ता। उन्मादलक्षण यथा दर्पणे,—"चित्तसम्मोह उन्माद कामशोकभयादिभि। अस्थानहासरुदितगीतप्रलपनादिकृत्॥" उन्मत्तो हि अतिक्रान्तविषयमपि वर्त्तमानतया गृह्णाति तादृशविषयग्रहण ममापि वर्त्तते, अतोऽहम् उन्मत्ताऽस्मि, अन्यथा कुत एतद्रावणादिदर्शनम्? इति भाव।

(ष) अधुना—सम्प्रति। अन्वर्थ एव—अर्थमनुगत इति अन्वर्थ, यथार्थ एव। "प्रलापोऽनर्थक वच" इति अमरवचनात्, जटायुप्राणसीताऽपहरणादिव्यापाराणा सम्प्रति अवास्तवत्वादिति भाव। अयम्—आ पापेत्यादि मत्कृत प्रयोग। प्रलाप —निर्विषया वाक्। वर्त्तते—प्रवर्त्तते, रावणाद्यभावादधुना तादृश प्रयोग निरर्थकतया प्रतिपन्नो भवतीत्यथ। यथार्थमेव इदम् अनर्थक वच अधुना वर्त्तत एव सीताप्रमादिव्यापारोऽपि परिकल्पनानिर्मित एव न पुनरधुना तत्तद्विषय इति समुदितार्थ।

रावणेनापहृताया सीताया तद्वियोग सोढ, कथमिदानी न सह्यते, कथ वा एतादृश प्रलापादि प्रवर्त्तन? इत्याशङ्क्य सीतापतिरात्मदोष परिहरति, उपायानामिति। —उपायाना पुन सीताप्राप्ति साधनानाम [उपायन्ते समधिगम्यन्ते प्रदाया वैरिति [illegible] करणे घञ्प्रत्यय] भावात सद्भावात रावणेनापहृताया सीताया [illegible] आसीदित्यथ, अधुना तु उपायाभाव इत्याशय। अविरता

वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरिदानीन्तु विरहः ? ॥ ४४ ॥

अविश्रान्ता ये विनोदा उद्धाराय सीताऽन्वेषणसेतुबन्धनवैरनिर्यातनमन्त्रणाविजयलाभादिचित्तस्थैर्य्यकरव्यापारा तेषां व्यतिकरः सम्पर्कः मेलनमिति यावत्, येषु तादृशे, वीराणां रावणकुम्भकर्णमेघनादादीनां लक्ष्मणसुग्रीवाङ्गदहनूमत्प्रभृतीनाञ्च विमर्दे परस्परमिलनदर्शनामर्षणसङ्घर्षणनिधनादिव्यापारे जगति भुवने जनितः उत्पादितः अति अतिशयितः (अन्येषां युद्धेऽद्भुतत्वसत्त्वेऽपि रामरावणयुद्धसदृशयुद्धस्य अभूतपूर्व्वत्वात् अद्भुतेऽपि अतिशयितत्वविशेषणम्) अद्भुतः विस्मय एव रसः मनसा द्रुतिकारणं वीररसप्रभवरसः इत्यर्थः, येन स तथोक्तः, (रसविदो हि अद्भुतरसस्य वीररसप्रभवत्वमाहुः, तथा हि "हास्यो भवति शृङ्गारात् करुणो रौद्रकर्म्मणः । अद्भुतश्च तथा वीराद् बीभत्साच्च भयानकः ॥" इति) अधुना तु विनोदकारणाभावात् तादृश इत्यर्थः, मुग्धाक्ष्याः मनोहरनयनायाः सीतायाः [मुग्धे अक्षिणी यस्याः तथोक्तायाः इति विग्रहे बहुव्रीहौ 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" (५।४।११३ पा०) इति समासान्तः षच्, ततश्च "षिद्गौरादिभ्यश्च" (४।१।४१ पा०) इति स्त्रियां ङीष्प्रत्ययः] सः पूर्व्वः चिराय अनुभूतः वियोगः विरहः खलु निश्चये, रिपूणां शत्रूणां रावणादीनां घातः वध एव अवधिः पर्य्यन्तः यस्य स तादृशः अभूत्, रिपूणां रावणादीनां वधोत्तरमेव सीतायाः पुनरुद्धारसम्भवेन तदानीन्तनविरहस्य नातिदुःसहत्वमासीदिति भावः, तु किन्तु इदानीम् अधुना निनास्ति अवधिरन्तो यस्य स निरवधिः अनन्तः, तादृशहिंस्रजन्तुसमाकुलवननिवासनात् तस्याः मरणावश्यम्भाविन पुनः समागमासम्भवादिति भावः, तात्पर्य्यात् उपायाभावादप्रतिविधेयः विनोदाभावाद् दुःसहश्च इत्यर्थः, विरहः विच्छेदः कथं तूष्णीं व्यापारान्तराभावात् वाग्व्यापारं विनाऽपि सह्यः सहनीयः ? न कथमपि सहनीय इत्यर्थः, अत एव नैष प्रलापः अनैसर्गिक इत्यधिक्षेपणीयः, न वा विस्मयजनकः, अपि तु नैसर्गिकत्वादवश्यम्भावी एवेति भावः । [अत्र प्राक्तनेदानीन्तनविरहयोरुपमानोपमेयभावबोधात् उपमानभूतप्राक्तनविरहात् उपमेयस्वरूपेदानीन्तनविरहस्य अधिकदुःसहत्वकथनात् व्यतिरेकालङ्कारः, तथा विरहस्य असह्यत्वे निरवधित्वस्य हेतुविधया कथनात् पदार्थहेतुकं काव्यलिङ्गञ्च इत्यनयोरङ्गाङ्गिभावेन सङ्करः । एवं यद्यप्यत्र पूर्व्वमेकदा विरहस्य सोढत्वेन "कथं तूष्णीं सह्यः" इत्यनन्तरं वक्तव्यस्य पुनःपदस्य अकथनात् न्यूनपदता दोषः, तथा

सीता। णिरवधि त्ति हा हदह्मि मन्दभाइणी।* (स)

[इति रोदिति]।

राम। हा कष्टम्!—

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्य्यं हरीणां वृथा,

प्रज्ञा जाम्बवतोऽपि, यत्र न गतिः पुत्रस्य वायोरपि।

---

* निरवधिरिति हा हतास्मि मन्दभागिनी।

तृतीयपादे वियोगशब्दोल्लेखात् चतुर्थपादे तदादिपदेन वक्तव्यस्य विरहशब्दस्य शब्दत कथनात् पुनरुक्तता दोषश्च लक्ष्यते, तथापि "चक्रावानन्दमग्रादे स्यान्यून-पदता गुण" इति दर्पणवचनात् "विवादे विस्मये हिस्त्रिरुक्तिर्न दुष्यति" इति नियमाच्च विप्रलम्भाख्यशृङ्गाररसस्य पोषकतया एतयोर्भूषकत्वमेव, न तु दूषकत्वम्। यद्वा—चतुर्थपादस्य "कथ तूर्ष्णीं सखी निरवधिरय सम्प्रति पुन" इति पाठान्तर-कल्पनया समाधेयम्। अत एव "निरवधिरय त्वप्रतिविध" इत्यपि पाठो दृश्यते इति सुधीभिरालोचनीयम्]। शिखरिणी वृत्तम्॥ ४४॥

(स) "निरवधिरिदानीन्तु विरह" इति प्रियतमाऽऽक्षेपवचनमाकर्ण्य भविष्यत्-समागमेऽपि विगताशा सीता म्रियमाणेवाह, निरवधिरिति।—पूर्ववत् विरहावसान पुन समागमसम्भावना च नास्ति इत्यह हताऽस्मि, पुन समागमाशयैव जीविता, अधुना तदभावात् मृत्युयातनावन्निरतिशययातना मां परिभवति, न ता सोढु शक्नोमीति भाव।

प्रागेकदा दैवदुर्विपाकात् रावणेन हृता दुस्तरसागरपार नीता सीता येषा सामर्थ्येनोद्धृता सम्प्रति तेषा हनूमज्जाम्बवल्लक्ष्मणप्रभृतीनाम् अनितरसाधारण शक्तिमत्ता सत्त्वेऽपि, का कथा पुनरुद्धारस्य, तदवस्थान स्थानमपि निर्णेतुमशक्तो जानकीजीवन खिद्यमान आह, व्यर्थमिति।—यत्र यस्मिन् स्थाने मे मम कपीन्द्रसख्य सुग्रीवमैत्र्यम् अपि व्यर्थं निष्फल, न पूर्ववदुद्धारक्षममित्यर्थ, [वि विफल अर्थ यस्य तत् व्यर्थम् इति विग्रह] सीताया मरणसम्भावनात् लोकान्त-रिततया सख्याना तत्रासामर्थ्यादिति भाव, हरीणा वानराणां चमूभूताना-[illegible], ("शक्राहिचन्द्रयमानिलशुक्रेषु हरिर्ना कपिलं त्रिषु" इत्यमर) वीर्य्यं पराक्रम [illegible] निष्फलम, अकिञ्चित्करमित्यर्थ, लोकान्तरवासिषु सख्याना वीर्य्यप्रकाशा-[illegible]दिति भाव ("वृथा निरर्थकाविध्यो" इत्यमर) यत्र जाम्बवत भल्लूक

मार्गं यत्र न विश्वकर्म्मतनयः कर्त्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये ! क्वासि मे ॥ ४५ ॥

पततेरपि प्रभा प्रसरा बुद्धिः, प्रतिभेति यावत् यत्रापि तथेत्यनुषज्यते। सत्त्वानां बुद्धिकौशलं सत्त्व एव प्रभवति न तु लोकान्तरे इति भावः, यत्र वायोः पुत्रस्य हनुमतोऽप्यस्य, गतिः प्रचारो न भ्रमतीति शेषः, [अत्र वायुपुत्रकथनेन "कारणगुणाः कार्य्यगुणमारभन्ते" इति न्यायात् वायोरिव हनुमतोऽपि सर्व्वत्रगत्वमप्रतिहतगामित्वञ्च ध्वन्यते, तथाच—दुर्लङ्घ्यसागरपारं गत्वा येन सर्व्वत्रगत्वं प्रख्यापितं, तेनाप्यगम्यगमनोऽयं परलोक इति भावः] यत्र यस्मिन् स्थाने विश्वकर्म्मणः देवशिल्पिनः कृतध्वजमुनिशापात् वानररूपधारणं इत्यर्थः, तनयः सुतः नलोऽपि नलनाम्ना प्रसिद्धो वानरोऽपि [अत्र नले विश्वकर्म्मतनयत्वविशेषणेन 'यतो नलः देवशिल्पिनः विश्वकर्म्मणः सुतः, ततः सर्व्वथा तस्मिन् तादृशशिल्पकलाकौशलसम्भवः 'सुतः पितृगुणं धत्ते' इति स्मरणात्" इत्यर्थो व्यज्यते] मार्गं सेतुबन्धनादिना पन्थानं कर्त्तुं न क्षमः न समर्थः, सौमित्रेः लक्ष्मणस्यापि [सुमित्रायाः अपत्यं पुमान् इति सौमित्रिः, सुमित्राशब्दात् "बाह्वादिभ्यश्च" (४।१।९६ पा०) इति अपत्यार्थे इञ्] पत्रिणां बाणानामविषये अलक्ष्ये यत्र लक्ष्मणस्यापि बाणानाम् अविषये तत्र इत्यर्थः, हे मम [अत्र स्त्रीकारेऽपि अस्मच्छब्दप्रयोगात् एतादृशमहाशक्तिमतोऽपि मम प्रिया त्वम् दुर्गमस्थानस्था दुःखमापन्नेति महान् क्लेशः, इत्यर्थो व्यज्यते] प्रिये प्रीतिदायिनि जानकि ! एवम्भूते तव मम अज्ञाते इत्यर्थः, क्व कुत्र स्थाने असि वर्त्तसे ? पूर्वं सुग्रीवस्य सैन्यादिदानसाहाय्यात् वानराणां पराक्रमसाहाय्यात् जाम्बवतो मन्त्रणाबलात् हनूमतो जलधिलङ्घन सीतोद्देशन लङ्कादाहनादि सार्वभौमिकव्यापारात् नलस्य सेतुबन्धनसौष्ठवात् लक्ष्मणस्य इन्द्रजिदादिवधनैपुण्यात् युद्धकौशलात् त्वमुद्धृताऽऽसीः, अधुना तु तेषां सर्व्वेषामेव वैफल्यं पश्यामीति पुनरुद्धारे नितान्तं निराशोऽस्मीति भावः। [अत्र इदानीन्तनसीताऽवस्थानस्थाननिर्णयरूपकार्य्यं प्रति कारणीभूतायाम् एकस्याः कपीन्द्रसख्यव्यवतायाः सत्त्वे कपीतन्यायेन जाम्बवत्प्रभृतीनामनिष्फलत्वादीनामपि तथा कथनात् समुच्चयो नामालङ्कारः, तेन च सीताधिकात् पूर्व्वानुभूतविरहात् निरवधिकस्य वर्त्तमानविरहस्य दुःसहत्वाधिक्यसाधनात् व्यतिरेकालङ्कारः ध्वन्यते इत्यलङ्कारेणालङ्कारध्वनिः] पुरा किल ब्रह्मणो निर्देशेन देवाः वानरयोनिं लभमानाः रावणवधे रामस्य सहायाः अभवन्, तदा हि अञ्जनाऽभिधेयायाः कस्याश्चित् वानर्य्याः गर्भे असीमसाहस्य मारु

सीता । बहु मणाविद ह्मि त पुव्वविरह । * (ह)

राम । सखि वासन्ति ! सुहृदा दुःखायैव इदानीं रामस्य दर्शनं, तदिदं कियच्चिरं त्वां रोदयिष्यति, तदनुजानीहि मां गमनाय । (क)

सीता । [सोद्वेगं तमसामवलम्ब्य ।] भअवदि तमसे ! कहं गच्छदि ज्जेव अज्जउत्तो ॥ † (ख)

---

* बहु मानिताऽस्मि तं पूर्व्वविरहम् ।

† भगवति तमसे ! कथं गच्छत्येवार्य्यपुत्र ॥

तस्य औरसेन हनूमान्नाम कपिराजं समजनीति, तथा ऋतध्वजाभिधेयस्य कस्यचित् मुनेरभिशापेन वानरयोनिमुपेतस्य विश्वकर्म्मण औरसेन घृताचीनाम्ना कन्याश्चित् स्वेच्छाया गर्भे कपिपुङ्गवो नलो जन्म लभे इति च पौराणिकी कथा अनुसन्धेया । शार्दूलविक्रीडितं वृत्तम् ॥ ४५ ॥

(ह) अस्मि—अहम्, अस्मीति अहमित्यर्थे अव्ययं, तद्यथा—"दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि ! नाऽस्मि दूये । उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर्यद् भिद्यते मृदु पदं ननु सा व्यथा मे ॥" इति । तं—प्रागनुभूततया ज्ञातप्रसिद्धम् । पूर्व्वविरहं—रावणहरणजन्यं वियोगम् । बहुमानिता—श्लाघ्यरूपेण अङ्गीकारिता, [मनधातोः णिजन्तात् निष्ठाप्रत्ययः] आर्य्यपुत्त्रेणेति शेषः । तथा च निरवधिरिदानीन्तु विरहः" इत्यार्य्यपुत्त्रवचनेन वर्त्तमानविरहस्य निरवधितया पुनर्मेलनासम्भवात्, पूर्व्वविरहे च रावणवधानन्तरं पुनः समागमात् इदानीन्तनात् प्राक्तनस्यैव श्लाघ्यत्वमिति भावः । ['बहु मानयामि तं पूर्व्वविरहम्' इत्यपि क्वचित् पाठः, अयन्तु सुगमः]।

(क) सुहृदा—सदायनुखदुःखयोः सतोः सुखदुःखे अनुभवता भवादृशाजनेन । दुःखाय—क्लेशाय, दुःखमुत्पादयितुमित्यर्थः । इदानीं—सम्प्रति, दुःसहशोकावेगेन विवशीभावादस्यादानीत्वम् । इदं—रामस्य दर्शनम् । कियच्चिरं—कियन्तं दीर्घकालम् । अनुजानीहि—अनुमन्यस्व । गमनाय—गन्तुम् [क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः (२।३।१४ पा०) इति तुमर्थे चतुर्थी]।

(ख) ५ भगवत्या ... चित्त ... आदेकस्मात् प्रियतमावाक्यादपि यत् विनोदयन्ती ... रामचन्द्रेण ... इत्याकर्ण्य पुनरपि तद्दुःखनाशङ्कमाना

तमसा। वत्से! समाश्वसिहि, समाश्वसिहि। ननु आवामपि आयुष्मतोः कुशलवयोर्वर्षवर्द्धनमङ्गलानि सम्पादयितुं भागीरथीपदान्तिकमेव गच्छाव। (ग)

सीता। भअवदि! प्पसीद, खणमेत्तं वि दाव दुल्लहं जणं पेक्खामि। * (घ)

राम। अस्ति चेदानीमश्वमेधाय सहधर्म्मचारिणी मे—"(ङ)

* भगवति! प्रसाद, क्षणमात्रमपि तावत् दुर्लभं जनं प्रेक्षे।

आह, भगवतीति। गच्छात्येव—यात्येव, गमने वामन्त्या अनुमतिं याचमानं तद्लाभेऽपि गन्तुमुद्यतं इत्येवकारार्थः।

(ग) आयुष्मतो,—दीर्घजीविनोरित्यर्थः, [आयुः प्रशस्ततया बाहुल्येन वा विद्यते ययोः तयोरिति विग्रहे आयुःशब्दात् अस्त्यर्थे 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥" इत्यनुशासनात् भूम्नि प्रशंसायां वा मतुप्]। वर्षवर्द्धनमङ्गलानि—द्वादशवत्सरवयःपूर्त्तिनिमित्तककर्त्तव्यानि दीर्घजीविमार्कण्डेयप्रभृतिदेवपूजादिमङ्गलाचरणानीत्यर्थः, तथा च तिथितत्त्वे—

"द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम्।
मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा॥
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम्।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्चयेत॥" इति।

भागीरथीपादान्तिकं—जाह्नवीचरणसमीपम्, राम चक्षुर्विषयमतिक्रान्तेऽपि वियोगक्लेशं पुनर्नवीभूतमाशङ्कमाना मा भैषीः, यतः आवामपि सम्प्रत्येव जाह्नवीचरणान्तिकमुपेत्य श्रीमतोर्जन्मदिवसोत्सवेन क्लेशमिमं विस्मर्तुं प्रभवाव इति भावः।

(घ) रामे दृष्टिपथमनतिक्रान्ते एव तमसाया भागीरथीचरणसमीपगमनप्रस्तावमाकर्ण्य प्रवलपतिदर्शनेच्छाकातरा सीता सखीं सानुनयमाह, भगवतीति। प्रसीद—आर्य्यपुत्रो यावत् दृग्विषयं नात्येति तावत्कालविलम्बेन मामनुगृहाणेत्यर्थः। दुर्लभम्—असुलभं, भाग्यलभ्यमिति यावत्, यदि तावद् भाग्येन अस्य दर्शनलाभो जातः, तदा यावद् दृष्टिपथं नातिक्रामति तावत् पश्यामीति भावः। ["दुर्लभदर्शनम्" इति पाठान्तरम्]।

(ङ) ननु यदि इहापि न चित्तविनोदः, तदा स्वदेशगमनेऽपि कुतः

सीता । [सोत्कम्पम् ।] अज्जउत्त ! का ! सा ॥ १ (च)

राम । "—हिरण्मयी सीताया प्रतिकृति । (छ)

१ आर्य्यपुत्र ! का सा ॥

सान्त्वनाया सम्भव ? इत्याशङ्क्याह, अस्ति चेति ।—अश्वमेधाय—अश्वमेधाभिधेय यज्ञ सम्पादयितुमित्यर्थ, "सस्त्रीको धर्म्ममाचरेत्" इति विधिवाक्यात अश्वमेधादधर्म्म कर्म्मणि सहधर्म्मिण्या उपयोग बोध्य, [अत्र 'क्रियार्थोपपदस्य च कर्म्मणि स्थानिन" (२।३।१४ पा०) इति चतुर्थी]। "तत्रापि तावद् बाष्पदिग्ध चक्षुर्विनोदयामि" इति वक्ष्यमाणेन वाक्यशेष ।

(च) "अश्वमेधाय सहधर्म्मचारिणी अस्ति' इति पतिमुखात् आकर्ण्य पत्यु पुन परिणयनाशङ्कया भीता सीता उत्कम्पिता आह, आर्य्यपुत्रेति ।—सा त्वदुक्ता सहधर्म्मचारिणी । का—किंनामधेया ।

(छ) हिरण्मयी—स्वर्णात्मिका, सुवर्णविनिर्म्मितेति यावत्, [अत्र "मयड् वैतयो —" (४।३।१४३ पा०) इति विकारे मयट्]। प्रतिकृति,—प्रतिनिधि, प्रतिमूर्त्तिरिति यावत्, ("प्रतिकृतिरर्च्चायां प्रतिनिधिप्रतिकारयोश्च स्त्री ।" इति मेदिनी)। "मुख्याभावे प्रतिनिधि शास्त्रार्थ" इति वदता धर्म्मशास्त्रविदा मते विधिवाक्यत प्राप्तस्य वस्तुन कथमप्यलाभे तदनुकारिणापरेणापि कार्य्यसिद्धिर्भवति, तथा च कात्यायन,—"यथोक्तवस्त्वसम्पत्तौ ग्राह्य तदनुकारि यत । यवानामिव गोधूमा व्रीहीणामिव शालय ॥" इति । अत्रापि मुख्याया सहधर्म्मिण्या सीताया अभावात् तत्प्रतिमूर्त्तिरूपप्रतिनिधिना सस्त्रीकधर्म्माचरणशास्त्रपालनेन यज्ञनिर्वाह इति । इदमत्रावधेयम्—अत्र साम्प्रतिकक्लेशसहनासहस्य रघुनाथस्य तत्प्रतीकाराय सहचरीसकाश स्वभवनगमनानुमतिमात्रप्रार्थनाया एव युक्ततया, तथा प्रयोजनादिक निमग्न मज्जितोऽपि अस्मिं कथ स्वत एव सहचरीसम्भावितशङ्कानिरसनमुखेन सीताप्रतिकृत्यादिक सान्त्वनोपाय निर्दिशतीति नाशङ्क्य, स्वामिन स्वदासमनादिन [illegible] अनुरागात् अनेकश वाचादवनताया अपि सीताया चिराय वियुक्तदारस्य नरस्य [illegible] निदर्शनविलासशालिन नरपते दारान्तरपरिग्रहस्य स्वाभाविकतया [illegible] तदा [illegible] नानाशङ्कानर्थकान् [illegible] रामनुखेण [illegible] [illegible] तदा च रामस्य दारान्तरापरिग्रहात् चिरविरहितया इह [illegible] रघुपतिर्जानीते ।

सीता। [सोच्छ्वास सास्रम्।] अज्जउत्तो दाणीं सि तुमं। अह्महे! उक्खादिद दाणीं मे परिच्चाअलज्जासल्लं अज्जउत्तेण। *(ञ)

राम। तथापि तावद्वाष्पदिग्धं चक्षुर्विनोदयामि। (झ)

---

* आर्य्यपुत्र इदानीमसि त्वम्। अहो! उत्खातमिदानीं मे परित्याग लज्जाशल्यमार्य्यपुत्रेण।

(ञ) सोच्छ्वासमिति।—उच्छ्वासेन आयासेन सह वर्त्तमानं पूर्व्वं सहधर्म्म चारिणीशब्दश्रवणेन उद्विग्ना सीता पुनः 'सीताया प्रतिकृतिः" इति श्रवणात् आश्वासो बोध्यः ("उच्छ्वास प्राणनेऽपि च। आख्यायिकापरिच्छेदेऽप्याश्वासेऽपि पुमानयम्।" इति मेदिनी)। सास्रम्—आनन्दाश्रुसहितम् [एतद्द्वयम् 'आह" इति ऊह्यक्रियाया विशेषणम्]। आर्य्यपुत्र,—पतिशब्दवाच्य, मत्प्रतिकृतावपि अनुरागि तया यथार्थ एव आर्य्यपुत्रशब्दभाक् त्वमसि इति समुदितार्थः। परित्यागेति।—परित्यागजन्या या लज्जा लोकसन्निधौ अप्रतिभत्वं तद्रूपं यत् शल्यं शङ्कुः तत्। (अत्र परित्यागस्य निष्कारणकतया अत्यन्तदुःखजनकत्वात् तज्जन्यलज्जाया शल्यत्वारोपो बोध्य)। उत्खात—मम हृदयादुद्धृतम्। पवित्राया धर्म्मपत्न्या धर्म्मकार्य्ये उप-योगितया अश्वमेधयज्ञार्थं मत्प्रतिकृतिकरणात् मयि अनुरक्तिः मत्पवित्रता च लोकेषु प्रदर्शिता आर्य्यपुत्रेणेति भावः।

(झ) सम्प्रति रामः स्ववाक्यशेषमाह, तथेति।—तथापि—हिरण्मय्यां सीता प्रतिकृतावपि, साक्षात्सीताया कथमपि प्राप्तिसम्भावनाविरहात् तत्प्रतिनिधिनैव कार्य्यसम्पादनमिति भावः। वाष्पदिग्ध—अश्रुपूर्णम् इत्यर्थः। विनोदयामि—तर्पयामि, [एतेन सीताया प्रतिकृतिनिर्म्माणे नयनविनोदनमेव मुख्यं फलम्, अश्वमेधे सहधर्म्मिणी योगफलम् आनुषङ्गिकमिति व्यज्यते]। अवेदमवधेयम्—भागीरथीवरमाहात्म्येन रामस्य सीतादर्शनं तदाक्यश्रवणयोरसम्भवात् यथाक्रममुच्चारितमपि "अस्ति चाश्वमेधाय सहधर्म्मचारिणी मे हिरण्मयी सीताया प्रतिकृतिः, तथापि तावद् वाष्पदिग्धं चक्षु र्विनोदयामि" इति रामवचनम् अन्तरान्तरा यथास्थानं यथाकालञ्च प्रयुक्तेन सीता वाक्येन विमिश्रितम् अन्योन्यालापवदाभासमानतया चमत्कारातिरेकमादधत् कवे र्वचनरचनापाटवमाविष्करोतीति।

सीता। धण्णा सा, जा अज्जउत्तेण बहु मणीअदि, जा अ अज्जउत्त विणोदयन्ती आसाणिबन्धण जादा जीअलोअस्स। १ (ञ)

तमसा। [सस्मितस्नेहास्रं परिष्वज्य।] अयि वत्से! एवमात्मा स्तूयते। (ट)

---

१ धन्या सा या आर्य्यपुत्रेण बहु मन्यते, या च आर्य्यपुत्रं विनोदयन्ती आशानिबन्धनं जाता जीवलोकस्य।

(ञ) धन्या—श्लाघ्या, बहुमतेत्यर्थः, [धनं लब्धी इति धन्या, धनगणात् 'धनगणं लब्धा' (४।४।८४ पा०) इति यत्प्रत्ययः]। सा—हिरण्मयी सीतायाः प्रतिकृतिः। बहु मन्यते—बहुमानास्पदीक्रियते, नयनविनोदनहेतुत्वेन यज्ञे सहधर्म्मचारिण्यास्थानपूरणेन च समाद्रियते इत्यर्थः। विनोदयन्ती—नयनानन्दमापादयन्ती सतीत्यर्थः। आशानिबन्धनम्—आशाहेतुस्वरूपा। जाता—भूता, [जातेति उद्देश्यप्राधान्यस्याविवक्षया "उद्देश्यविधेययोर्बहुवचनत्वनाख्यातस्य" इत्यनुशासनात् 'जाता' इत्यत्रैव न अत्र प्रधानक्रियारूपत्वात्] यस्मिन् कल्याणभाजि निखिलमपि जगत् धनमाप्नोति एव दृष्ट्वाया चित्तविनोदनेन तस्य एव आर्य्यपुत्रस्य जीवनं रक्षन्ती जीवलोकस्यैव उपकारिणी जातेति भावः। राज्ञः परिग्रहान्तरपरिहृतायाः स्वप्रति कृतानादरायाः अपि पूर्व्वाभिनिवेशात् 'तथापि तावदार्य्यपुत्रस्य चक्षुर्विनोदयामि' इति मानसात्स्वपुनरुत्पादितलज्जायाः सीताया निर्वेदवचनमिदम्। [अथ सा धन्या, अहं न धन्या, सा बहुमानिता अहं अवमानिता, सा आर्य्यपुत्रस्य विनोदनस्थानम् अहं न तथा, सा आर्य्यपुत्रस्य सुस्थतायाः राज्यं मनोदाम्यस्य च कारणमिति आशानिबन्धनं अहं तु न तथा इत्यादि ध्वन्यते। एतेन स्त्रियः स्थानेन सपत्नीपराभवात् केवलं अहं तु केवलं दारान्तरपरिग्रहं अन्यथा न सहन्ते इति भावोऽपि व्यज्यते]।

सीता। [सलज्जमधोमुखी स्वगतम्।] परिहसिद म्हि भअवदीए तमसाए। * (ठ)

वासन्ती। महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति पुनर्यथा कार्य्यहानिर्न भवति तथाऽऽस्ताम्। (ड)

सीता। पडिउला दाणीं मे वासन्ती संवुत्ता। † (ढ)

---

* परिहसिताऽस्मि भगवत्या तमसया।

† प्रतिकूला इदानीं मे वासन्ती संवृत्ता।

(ठ) सलज्ज—लज्जासहित स्वप्रकृताया स्वप्रशंसाया अन्यसमक्ष लज्जा-हेतुत्वादिति भाव। अधोमुखी—नतवदना [अधोभूत मुख यस्या सा "स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात्" (४।१।५४ पा०) इति स्त्रियां ङीप्]। सीता अधोमुखी सती सलज्ज स्वगतञ्च यथा स्यात तथा आहेति अन्वय। परिहसिता—उपहास-पात्रीकृतेत्यर्थ।

(ड) पूर्वोक्तेषु रामवाक्येषु अन्यस्मिन् अंशे कस्यचिद् वक्तव्यस्य अभावात् वासन्ती "तदनुजानीहि मां गमनाय" इत्यंशस्यैव उत्तरमाह, महानिति।—अयम्—इदानीं मनुभूयमान। व्यतिकर,—समागम, परस्परसम्मेलनमिति यावत। महान्—निरतिशय। प्रसाद —अनुग्रह, त्वमेतावन्त क्लेश स्वीकृत्य स्वयम् ईदृश विजन कानमागत यदस्माभिर्मिलित, तेनैव अस्मासु महान् अनुग्रहो दर्शित इति भाव। ["प्रसाद" इत्यत्र 'प्रमाद" इति पाठ—प्रमाद्यते अनेनेति प्रमाद कर्त्तव्येषु विषयान्तरेषु अनवधानताजनक इत्यर्थ, अनेन समागमेन त्व मां परित्यक्त नेच्छसि अहमपि त्वां, शोके च वय निमग्ना इति सर्व्वमन्यत विस्मृताऽस्मीत्यर्थ] तथापि अहं त्वत्कर्त्तव्ये अन्तरायो न स्यामित्याह, गमनमिति।—पुन,—किन्तु। गमन प्रति—गमनविषये इत्यर्थ। कार्य्यहानि,—राजकार्य्यक्षतिरित्यर्थ। तथा—तादृश प्रकार। तव कार्य्यहान्या ममापि कार्य्यहानिरित्यतो येन तव कार्य्यहानि न स्यात् तथा कुर्व्विति भाव।

(ढ) प्रतिकूला—अननुकूला, इत परमपि पतिसमागमे विघ्नकारिणीत्यर्थ, तद्गमनानुज्ञानादिति भाव। [एतेन सीताया भर्त्तरि प्रणयातिरेक, तथा तद्दर्शने आकाङ्क्षाया अदम्यत्वात् पुनरपि तमवलोकयितु बलवती वासना च ध्वन्यते इति बोध्यम्]।

तमसा। वत्से। एहि गच्छाव।

सीता। [सकष्टम्।] एव्व करेह्म। * (ण)

तमसा। कथं वा गम्यते, यस्यास्तव (त)—

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः।
मर्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते॥ ४६॥

---

* एवं कुर्वः।

(ण) सकष्टं—कष्टेन दुःखेन सहितं यथा स्यात् तथा, वासन्त्या अभ्यनुज्ञातस्य रामस्य इदानीमेव गमनावश्यम्भावात् कष्टेनैव सीताया स्वप्रतिगमने सम्मतिदानमिति बोध्यम्। एवं कुर्व,—गच्छाव इत्यर्थः, रामे प्रस्थिते अवस्थानप्रयोजनाभावेन इतः प्रतिगमनस्यैव युक्तत्वादिति भावः। [अत्र "गच्छाव" इत्युक्ता "एवं कुर्व" इति कथनेन सीताया अनिच्छाकृतगमनं सूच्यते]।

(त) तमसा सीताया वर्त्तमानामवस्थां पर्य्यालोच्य आह, कथमिति।—वा—अथवा, पक्षान्तरे इत्यर्थः। कथं—केन उपायेन। गम्यते—गन्तुं शक्यते, त्वयेति शेषः। यावत् प्रियदयितोऽयं तव नयनपथं नातिवर्त्तते तावत्कालं ते इतोऽन्यत्र गमनमसम्भवमेवेति भावः। "यस्यास्तव" इत्यस्य वक्ष्यमाणश्लोकस्थेन "चक्षुषः" इत्यनेनान्वयः।

इदानीं गमनाशक्यत्वे हेतुमाह, प्रत्युप्तस्येति।—दयिते प्रिये रामे प्रत्युप्तस्येव गभीरं प्रविष्टस्येव तृष्णया प्रत्यक्षदर्शनेच्छया दीर्घस्य दीर्घभावापन्नस्य कियत्कालं दृष्टाऽपि अतृप्ततया विस्फारितत्वादनिमेषत्वाच्च विस्तृतस्येवेत्यर्थः, चक्षुषः नयनस्य [अत्र "कर्तृकर्मणोः कृति" (२।३।६५ पा०) इति कर्मणि षष्ठी, तथा जातौ एकवचनम्] "यस्यास्तव" इति पूर्वोक्तगद्यांशेनान्वयः। मर्मच्छेदपरैः आकर्षणव्यापारैः हृदयविदारकैरित्यर्थः, यत्नैः आकर्षणायासैः आकर्षः दयितदर्शनात् आक्षेपः न समाप्यते एतावता कालमापि न सम्पूर्णः क्रियते। यथा केनचिद् योजकवस्तुना युक्तस्य पदार्थद्वयस्य योजकवस्तूद्धरणं विना न परस्परं पार्थक्यं सम्भवति, तद्वत् दृष्ट्या मिलितायास्तव दृष्ट्युद्धारं विना न इतः प्रतिगमनं सम्भवति, दृष्टेरुद्धारश्च आकर्षादिना [illegible] च नितरां दुःसहः अतो रामं परित्यज्य तव इतः [illegible] न सुकरमिति भावः। [अत्र दयिते वस्तुतोऽनिखातस्यापि

उ—२५

सीता। णमो णमो अपुव्वपुण्णजणिददंसणाणं अज्जउत्तचरणकमलाणं। * (थ) [इति मूर्च्छति।]

तमसा। वत्से! समाश्वसिहि समाश्वसिहि।

सीता। [समाश्वस्य।] किअच्चिरं वा मेहन्तरेण पुण्णिमाचन्दस्स दंसणं। † (द)

---

* नमो नमोऽपूर्वपुण्यजनितदर्शनेभ्य आर्य्यपुत्रचरणकमलेभ्यः।

† किअच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम्।

चक्षुषः निखातत्वसम्भावनात् वाच्या क्रियोत्प्रेक्षा नाम अलङ्कारः]। पथ्यावक्त्रं वृत्तम्॥ ४६॥

(थ) अपूर्व्वेत्यादि।—अपूर्वेण अत्युत्कृष्टेन पुण्येन जनितं सम्पादितं दर्शनं येषां तेभ्यः, मया किमपि अपूर्वं पुण्यं कृतं तेनैवाद्य आर्य्यपुत्रचरणदर्शनं जातमिति भावः। आर्य्यपुत्रचरणकमलेभ्यः,—आर्य्यपुत्रस्य स्वामिनः चरणाः पादाः कमलानीव [अत्र उपमाऽलङ्कारः] तेभ्यः स्वामिपादपद्मेभ्य इत्यर्थः, [नमःस्वस्ति स्वाहा—" (२।३।१६ पा०) इति नमःशब्दयोगे चतुर्थी, गौरवे च बहुत्वम्]।

(द) अन्धकारसमाच्छन्नायां रजन्यां चन्द्रखद्योतविलास इव चिरवियोगदुःखधारासु भाग्यादुपपन्नः क्षणिकप्रियपादसन्दर्शनानन्द एव मे श्रेयानिति मन्यमाना आत्मनैव आत्मानमाश्वासयन्ती जानकी पक्षान्तरमाह, किअदिति।—वा—अथवा। किअच्चिरं—कियन्तं दीर्घकालं, व्याप्येति शेषः। मेघान्तरेण—जलधरावकाशेन। पूर्णिमाचन्द्रस्य—राकाशशिनः। दर्शनं—साक्षात्कारः, सम्भवेदिति शेषः। [अत्र काक्वा "अत्यल्पक्षणमेव सम्भवेत्, वायुसञ्चालितेन मेघेन पुनरावरणात्" इत्यर्थो व्यज्यते]। अयमत्र भावः,—यथा मेघाच्छन्ने दुर्दिने भाग्यात् कदाचित् वायुना मेघावरणापगमे जातं क्षणिकमपि राकानिशाकरसन्दर्शनं नयनानन्दमापादयत् भवति श्लाघास्पदं दर्शकानां, तथा निरवधिकायाम् दुःखस्य सुदुःखैकदशायां केवलं पूर्व्वसञ्चितपुण्यपवनानुकूल्येन कथमपि सङ्घटितम् अतिदुर्लभं क्षणिकमपि आर्य्यपुत्रचरणसन्दर्शनं मम श्लाघ्यमेवेति इदानीमाश्वस्ताऽस्मीति। [अत्र सुचिरपूर्णचन्द्रदर्शनासम्भवरूपादप्रस्तुतात् सुचिरार्य्यपुत्रचरणदर्शनासम्भवरूपस्य प्रस्तुतस्य कथनादप्रस्तुतप्रशंसानामालङ्कारः]।

तमसा। अहो सविधानकम्। (घ)—

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान्।
आवर्त्तबुद्बुदतरङ्गमयान् विकारा-
नम्भो यथा, सलिलमेव तु तत् समग्रम्॥ ४७॥

(घ) अहो—विस्मयकरम्। सविधानकं—विधातृनियमितकार्य्यकारणभाववैचित्र्यं येन कारणेन किं किं कार्य्यमुत्पद्यते तन्निरूपणे न शक्यमित्यर्थः।

तदेव समर्थयते, एक इति।—एक एव मुख्य एव करुणः प्रियवियोगजन्यशोकस्थायिभावः रसः काव्यानुशीलनविशदमानसानां सामाजिकानां निरतिशयानन्दस्वरूपः निमित्तभेदात् व्यञ्जकविभावानुभावादिविच्छित्तिविशेषात् दर्शनस्पर्शादिकारणविशेषादिति यावत्, भिन्नः भेदं गतः सन् पृथक् पृथक् भिन्नरूपान्, हर्षविषादादिरूपानित्यर्थः, विवर्त्तान् आकारान्, परिणामानित्यर्थः, आश्रयते इव भजते इव, परमार्थतः अभिन्नोऽपि भेदवानिव लक्ष्यते इति भावः। यथा अत्रैव अङ्के दर्शितः करुणो रसः तत्तत्स्थानासनाक्षापनपादपपर्व्वतादिदर्शनाङ्गस्पर्शनादिभिः कारणविशेषैः नानारूपतामापन्नः शृङ्गारहास्याद्भुतादिरसरूपतया परिणतो दृश्यते। तत्र वेदान्तमतसिद्धमनुरूपं विवर्त्तोदाहरणमेकमवतार्य्य समर्थयमान आह, यथेति।—यथा अम्भः जलम् आवर्त्तबुद्बुदतरङ्गमयान् गतिवशेन घूर्णमानत्वात् [illegible]रूपान् वायुमध्यतया बिम्बमयत्वात् बुद्बुदरूपान् पवनचालिततया तरङ्गात्मकत्वाच्च ऊर्म्मिरूपान् विकारान् विविधान् आकारान्, विवर्त्तानिति यावत्, आश्रयते इति शेषः, तु किन्तु तत् समग्रमेव आवर्त्तादिकम् एकं सलिलं जलरूपः एक एव पदार्थः। सीतायाः प्रियविरहजन्यमनोविकारोऽपि कारणभेदात् हर्षविषादक्रो[illegible]तिनिर्देशानुपादन्नतान् बहुनाकारान् धत्ते, अतो हर्षादयोऽपि करुणरसस्य विकारा इत्येतदाश्चर्य्यं सविधानकं पश्यामीत्यर्थः। केचित्तु उक्तिरीतिबीजमन्यथा [illegible] शोकानन्दघ्ना व्याचक्षते, तथाहि— वीरशृङ्गारयोरेकं प्रधानं यत्र [illegible] वीरशृङ्गारयोरन्यतरस्य प्रामाणिकप्राधान्येऽपि अन्येषामपि रसानां [illegible] प्राधान्यम्? किञ्च, करुणरसस्य दुःखात्मकतया तस्य रसत्वे एव [illegible] प्राधान्यम्? इति शङ्कां परिहर्त्तुकामः कविः तमसामुखेन [illegible]तदा वदति, एक इति।—रसः सामाजिकानां निभृत-

राम । अयि विमानराज ! इत इतः । (न)

[इति सर्वे उत्तिष्ठन्ति ।]

तमसावासन्त्यौ सीतारामौ प्रति । (प)—

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता ।

नन्दसंविद्रूप करुण इष्टवियोगजन्यदुःखातिशय एक मुख्य एव सन्नपि निमित्त भेदात सलिलपतितत्व-दग्धत्वादिरूपोपाधिभेदात भिन्न विलक्षण इव पृथक् पृथक् विवर्तान वासन्तीसीतारामादिषु परस्परविलक्षणावस्थाभेदान आश्रयते भजति । अन्यत पूर्ववत । तथाच प्राचुर्यात रागिविरागिसाधारण्याच्च करुण एव एक मुख्य रस, अपरे तु तद्विकारा इति कवेराशय । [अत्र प्रथमार्द्धे "आश्रयते इव" इत्यत्र वाच्याक्रियोत्प्रेक्षा, तथा द्वितीयार्द्धे 'अम्भो यथा" इत्यत्र उपमालिङ्गस्य यथाशब्दस्य सत्त्वात् श्रौती उपमा चेत्यनयोरङ्गाङ्गिभावेन सङ्कर । एव "रसस्योक्ति स्वशब्देन" इत्यस्य व्याख्यायां दर्पणकृता "रसस्य स्वशब्दो रसशब्द शृङ्गारादिशब्दश्च" इत्यभिहितेऽपि अत्र स्वशब्देन रसकथन न दोषपदवीमारोहति, अस्य कथमपि अन्यथा उपादातुमशक्यत्वेन सामाजिकानन्दानुभवाविघातकतया प्रकृतरसानपकर्षकत्वादिति सुधीभिर्विभाव्यम्]। वसन्ततिलक वृत्तम् ॥ ४७ ॥

(न) विमानराज—स्यन्दनश्रेष्ठ । व्योमयानेषु पुष्पकस्यैव प्राधान्यात पुष्पकस्य विमानराजत्वम् । इत इत,—अनेनानेन पथा गम्यतामिति शेष । पुष्पकस्य चालकादेशानुरूपगमने शक्ति प्रसिद्धेति तस्मिन् सचेतने इव रामस्यादेश इति बोध्यम् ।

(प) तमसा सीता प्रति, वासन्ती राम प्रतीति यथाक्रममन्वेति ।

परस्पर विहाय स्वस्थान गन्तुकामा तमसा वासन्ती च सीतारामयो कुशल माशसमाना आह, अवनिरिति ।—अवनि पृथ्वी अमरसिन्धु सुरधुनी गङ्गा अस्मद्विधाभि अस्मादृशीभि तमसासदृशीभि नदीभि वासन्तीसदृशीभि वन देवताभिश्चेत्यर्थ, सार्द्ध सह मिलिता इति शेष, तथा च छन्दसा वेदादन्येषाम् अनुष्टुप्प्रभृतीनामित्यर्थ, आद्य प्रथम प्रयोक्ता प्रयोगकर्त्ता तत्पूर्वकवेरनुष्टुप्छन्दसो प्रयोगादर्शनात्, कुलपति "मुनीना दशसाहस्र योऽन्नपानादिपोषणात् । अध्यापयति विप्रर्षि स वै कुलपति स्मृत" ॥ इति लक्षणोपेत मुनिर्वाल्मीकि

स च मुनिरनुयातारुन्धतीको वशिष्ठ-
स्त्वयि वितरतु भद्रं भूयसे मङ्गलाय॥ ४८॥

[इति निष्क्रान्ताः सर्वे।]

इति छाया नाम तृतीयोऽङ्कः। (फ)

अनुयाता अनु सह धर्म्मार्थं याता सहधर्म्मिणीत्यर्थ, अरुन्धती यस्य तथोक्तः स मुनि वशिष्ठश्च भूयसे महते मङ्गलाय भुवनहितायेत्यर्थ, त्वयि भद्रं मङ्गल ("श्वःश्रेयस शिव भद्र कल्याण मङ्गल शुभम्" इत्यमर) वितरतु ददातु। त्वन्मङ्गलेनैव भुवनमङ्गलमिति भाव। [अत्र गर्भवीजस्य ऋषिश्रेयोवितरणरूपस्य उद्भेदनादाक्षेपो नाम सन्ध्यङ्गमुक्तम्। दर्पणकृन्मते तु आशीर्नाम नाट्यालङ्कार "आशीरिष्टजनाशसा" इति तल्लक्षणादिति ध्येयम्]। मालिनी वृत्तम्॥ ४८॥

(फ) अस्मिन्नङ्के सीताया अदृश्यरूपेण प्रवेशेऽपि कदाचित अङ्गस्पर्शादिना रामानुभवविषयत्वात् छायारूपेण आभासमानतया अस्य अङ्कस्य नाम कविना छायेति कथितम्।

तृतीयाङ्कस्य सङ्क्षिप्तविवृतिः ।



अथाङ्कारम्भे मुरला नाम काचित् तटिनी तमसया सह रङ्गं प्रविष्टा, पृष्टा चानया समभ्यागमनकारणं तत्रैव "अहरहर्विरहातपतापतप्यमानमानसं चिरपरिचितप्रियासहवाससान्निध्यशून्यायमानप्रमादं परिक्षीणदीनं जानकीजीवनं सम्भविष्यदापदं परिवातुम् उत्तरङ्गतरङ्गसङ्गशीतलैर्विकचकमलकिञ्जल्कसुरभीकृतैः मृदुमन्दसम्पातैर्वातैरस्य सम्भाव्यमानमोहप्रशापनेन नितान्तमवहिता भव" इति भागीरथी वक्तुमगस्त्यपत्न्या लोपामुद्रया प्रेषिता तत्सकाशं यामीति प्रत्युवाच। तमसाऽपि स्नेहाल्लोपामुद्राऽऽविष्कृतमुपायमाकर्ण्य इत्थमेवागच्छमानया भागीरथ्या च उद्भावितमुपायमचाकथत्, तथाहि पुरा लक्ष्मणेन परित्यक्ता आसन्नसत्त्वा सीता कदाचित् दुःसहप्रसववेदनामसहमाना गङ्गाऽम्भसि निपात्यात्मानमसूत सुतयुगलम्। ताभ्याञ्च शरणाभ्यां सार्द्धमसौ भगवत्या पृथ्वीभागीरथ्याप्रसादमुपेता रसातलमनायि।

अथ कालेन भागीरथी सीतासुतयुगलं वयःप्राप्तमालोक्य स्वयं तत् वाल्मीकिं समर्प्य सम्प्रति शम्बूकवधानन्तरप्रत्यावृत्तं रामभद्रं सम्भावितजनस्थानागमनमाकर्ण्य सीतां स्वप्रभावात् वनदेवतानामप्यदर्शनीयतां विधाप्य स्वसुतयोः कुशलवयोः द्वादशवार्षिकोत्सवे स्वगुरवशादिपुरुषसवितृसमर्चनार्थं स्वहस्तकृतकुसुमावचयव्याजेन गोदावरीतीरं निनाय, आदिदेश च मां तत्प्रकृष्टप्रेमतया तस्याः प्रत्यक्षगां भवितुमित्यहमिदानीं तदादेशमनुतिष्ठामीति। तमसामुखादेव श्रुतभागीरथीवृत्तान्ताऽचिरात् रामागमनं तर्कयन्ती मुरला वृत्तमेतल्लोपामुद्रायै विज्ञापयितुं प्रस्थातुकामामालोक्य तमसा गोदावर्युत्सङ्गाद्विनिष्क्रम्य अरण्याभिमुखमायान्ती द सन्तविरहक्षीणसलिलाऽऽकृति सीता न्यवेदयत। मुरलाऽपि सत्वरमेव तत्र तथाविधां सीतामवेत्य दुःखाकुलिता मिलिता च तमसया रङ्गात् निष्क्रान्तेति विष्कम्भकसङ्क्षेपः।

अथ रङ्गमुपस्थिता वियोगशोकाकुलिता सीता कुसुमावचयव्यग्रहस्ताऽपि नेपथ्यात् "प्रमादः प्रमादः" इति वासन्तीवचनं सकरुणमाकर्णयन्ती पुनरपि स्वेन स्वकरपरिपोषितस्य करिकरभकस्य उन्मददिरदरदाभिभवमाकर्ण्य सहसा स्वभावसारल्येनैव "आर्यपुत्र! परित्रायस्व" इति सुचिरपरिचितान्यक्षराणि उच्चारयाम्

नास, सुनोद च तेन स्मृतातीताखिलवृत्तान्ता अतिसन्तप्ता तत्क्षणमेव। ततो रङ्गमभ्येत्य तमसाया मूर्च्छितां सीतां समाश्वासयन्त्यां भयोऽपि नेपथ्यादुच्चरत् "विमानराज! अत्रैव स्थीयताम्" इति वचनं स्वरपरिचयेन रामस्यैवागमनमाशङ्कमाना कातर्य्यमादधाना सीता अव्यक्ते कुतस्त्येऽप्यस्मिन् वचसि औत्सुक्यप्रदर्शनेन तमसया समनुयुक्ता श्रुतस्वरस्यातिपरिचितत्वादव्यक्तत्वमेवास्य निरस्य सहचरीवच प्रत्युत्तरयाञ्चकार, प्रश्रश्च च प्रियतम तमसामुखात् राजधर्म्मानुसारेण शम्बूकवधार्थमिदानीम् अत्रापि रामागमनसम्भावना विज्ञाय।

अथ पुनर्नेपथ्यादुच्चरित पूर्व्वपरिचितमृगपादपादिविषयकमाक्षेपवचनमाकर्णयन्ती जानकी स्वामिस्वरमर्थागमसम्भ्रमात् समन्तादन्विष्य सहसा पुरतः स्वशोकक्षीणमलिनाकृतिं साक्षादार्य्यपुत्रमेव अवलोक्य मूर्च्छन्ती तमसया पुनः समाश्वासि, एवं पुनरपि पञ्चवटीसन्दर्शनसमुद्बुद्धपूर्व्वस्मृतिदाशरथिः "हा प्रिये' इति जानकीमामन्त्र्य अन्तर्दाह ज्वलयती दुःखाग्रैर्धूमरूपेण मोहेन स्वस्यावरणम् उच्चैर्विज्ञाप्य पुनरामन्त्र्य नामतस्तानमूर्च्छीत।

अथ सीतया स्वात्मानमुद्दिश्य सकरुणमेव विलपन्तनाथ्यपुत्त्रं मूर्च्छितमालोक्य न कथमपि सञ्जीवयितुं पादयोः याच्यमानया तमसया तत्पाणिस्पर्श एव अमोघ सञ्जीवनोपाय निरधारि। असावपि अविचार्य्यैव अशेषान् गुणदोषान् सहचरीनिदेशात् सम्भ्रमनिपात पतिपादपङ्कज ससम्भ्रम सवाष्प च भीतिस्विन्नेन हस्तेन आपादमस्तकं तस्य, समालोक्य च तमचिरादेव पुनःप्रत्यागतजीवित जीवितनाथं नितरामनुग्रहन, व्यतर्कयच्च बहुधा रामस्तमतिपरिचित च्युतचन्दनपङ्कसम्मित कृतचित्तहर्षं सीताकरस्पर्शमिति। इतश्च प्रमादाद्रामसकाशं प्रकाशितमात्मानमाशङ्कमाना पुनः सावधाना भवितु यतमाना तमसया भयी भागीरथीवरस्मारणेन समाश्वासिता सीता मुहुः स्वात्मानमुद्दिश्यैव सकरुणविलापिनः स्वामिनः सानुरागवचनश्रुते द्रवीभवदन्तरया सन्त्वया निष्ठुतमस्यमपि मनोभाव कथमपि सहचरी न्यवेदयत्। [illegible] तमसाऽपि तत्सकाशमेव आकारेङ्गितैरशती बहिःप्रकाशमान तदीय [illegible] कलुष मौनाव विस्तरेण।

[illegible] चिरपरिचितस्पर्शसम्भाविता सीतामितस्ततः सम्यगन्विष्यापि अलभमान [illegible] वन वितर्कयन् रामः सीता च युगपदेव पुनर्नेपथ्यादुच्चरित [illegible] इत्यादिसकरुणवचनमाकर्ण्याकुलतामगच्छत, [illegible] रामः पुरत एव ससम्भ्रमनुपस्थिता वासन्तीम्, अथयोश्च [illegible] विस्तरेण।

अथ तथैव सीतापुत्रकपरित्राणाय सत्वरं गोदावरीं गन्तुमनाः सीतानाथः तत्प्रदर्शितेनैव पथा प्रतस्थे, सीताऽपि सहचरीस्मारितभागीरथीवरप्रभावा आत्मप्रकाशशङ्काऽसत्त्वात् तमनुससार, आगत्यैव च तत्रोपस्थितेव करेणुका पश्यति स्म बहुधा विहरन्तं स्वपुत्रकं करिकलभकमायूथेण। तमेवमसम्भावितकारव्यवहारमालोक्य दृष्टाऽपि समुद्बुद्धकुशलवस्मृतिर्गलितदुःखिता सीता तमसया पुनः समाश्वासि। सर्वथा रघुनाथं प्रसादयन्ती वासन्ती अपि सीतापुत्रकं प्रलम्बकदम्बशाखासमारूढं नृत्यपरं शिखण्डिमिथुनञ्चावलोक्य हर्षशोकाकुलमतिं सीतापतिं पूर्वपरिचितं शयनीयशिलातलम् अध्यासितुमनुरुरोध। प्रत्यग्रहृदयव्यथम् रघुनाथं तं शोकोद्दीपकतया द्रष्टुमप्यसमर्थः रुदन्नन्यतः समुपाविशत्।

अथ स्वामिनं तथा रुदन्तमालोक्य निरतिशयनिविण्णा जानकी तद्दुःखनिदानं भर्त्तारं वासन्तीमेव अधिचिक्षेप। वासन्त्यापि पत्युरीदृगवस्थायाम् अनुपस्थितेर्निर्भर्त्सिता सीता, तादृगवस्थादर्शनेऽपि स्वस्याः प्रतीकाराक्षमत्वमचीकथत्।

अथ स्वाधिकाररता वनदेवता वासन्ती स्वभवनं वनमागतमतिथिं दाशरथिम् अभिनन्दयितुं स्वाधिकारगतान् पादपपतत्रिपवनानादिदेश, उपविवेश च निभृतं रामाधिकृतस्यैव स्थानस्यैकान्ते पृच्छन्ती महाराजेत्यामन्त्रणपरःसरं केवलं लक्ष्मणस्यैव कुशलम्। पुरतः परिदृश्यमानस्वभावशोभावर्णनेन तच्च दाशरथिः श्रुतमप्यश्रुतमिव अभिनिनाय। तं तथोन्मनसं स्ववचसि सत्वरमवधानपरं विधातुं वासन्त्या पुनरपि तदेव पृच्छ्यमानो रघुनन्दनः महाराजेति निष्प्रणयामन्त्रणपदाकर्णनेन अस्याः सीताविवासनवृत्तान्तज्ञानं सशङ्कानः सजलनयनः आः कुशलं कुमारस्येति प्रत्युवाच। अधिचिक्षेप च तथैव असौ, त्वं जीवितमित्यादिना तस्य अमानुषदारुणत्वप्रख्यापनेन। तदाकर्ण्यातिदुःखिता सीताप्यात्माथमाश्यपुत्रमेव अधिक्षिपन्तीं वासन्तीं प्रच्छन्नविग्रहाऽपि व्यग्रतया विरम विरमेति निषिषेध।

अथ वासन्त्या साधिक्षेपं तदनार्य्यकार्य्यनिदानं पृष्टो जानकीजानिः प्रजाऽनुरञ्जनमेव सीताविवासननिदानम् अचीकथत्, व्यलपच्च स्वकार्य्यस्यैवममानुषिकदारुणत्वमुपवर्णयन् स्वयमेव। अशोचीच्च तदानीं पौरजानपदानुद्दिश्य तेषां पुनः प्रसादमर्थयमानः सविशेषम्। अन्यतमतमसाऽपि स्वामिशोकसन्दर्शनकातरा सीतामाश्वासयन्ती, दर्शयन्ती च शोके सति विलापस्यैव अत्यावश्यकताम्, अचीकथत् रामस्य सर्व्वथा सांसारिकक्लेशं जातम्।

अथ वासन्त्या धैर्य्यमवलम्बितुमुपदिष्टः शोकपरिक्लिष्टो रामः आमूलवृत्तख्यापनेन आत्मधैर्य्यस्य परां कोटिं प्रकटयन् पूर्व्वपरिचितानां पादपपतत्रिपर्व्वतादीनाम् आक

...कसन्दर्शनेनैव साम्प्रतिकचित्तविकारनिदानं निर्दिदेश, व्याचचक्षे च व्यथतां प्रबल...लवेगरोधने नैकतरतेतीरिव स्वचित्तसंयमे प्रबलस्यापि स्वप्रयासस्य।

अथाकर्ण्यास्य सकरुणवचनजातं साम्प्रतमितोऽप्यधिकोऽधिक्षेपः सर्वथा अनुचित...त्यवगच्छन्ती वासन्ती तमन्यासक्तचित्तं कर्तुकामा, प्रियतमया सीतया सार्द्धमध्युषितं ...र्व्वमपूर्व्वं लतागृहं दर्शयामास। ततस्तदालोकनदून रघुनन्दनं शोकमापन्नमालोक्य ...तज्जीवनापायभीता सीता तमर्मोपदेशात् परिचिततरेण करेण मृतप्रायं काय... स्पृशन्ती मृतवज्जतमिव प्रियं पुनरुज्जीवयामास।

अथ पुनः प्राप्तचेतनो जानकीजीवनं अनुभूतचरेण सीताकरस्पर्शेन वासन्त्यै सीतां पुनः प्राप्तां व्याचचाण तया उन्मत्तप्रलापालापित्वेनाधिक्षिप्तः, पुनरपि स्वानुभवप्रमाणेन स्वोक्तयाथार्थ्यं प्रमापयन् स्वेदात्मकसात्त्विकभावोद्गमात् सिक्तकरत्वेन तद्धारणे स्वस्याक्षमत्वमुक्त्वा तां गृहीत वामित्यौमनरोध। सीताऽपि सहसा प्रियतमाऽङ्गसङ्गेन सञ्जातसात्त्विकभावा स्वकीयामनवधानतामाशङ्कमाना तत्करात् स्वकरमाक्षिप्यापसरन्ती तमसासमक्षं स्वेदार्द्रं कम्पितश्चाङ्गं दर्शयन्ती ललज्जे।

अथ सहसा स्वकरात् करे परिभ्रष्टे प्राप्तनिधिप्रणाशादिवातिदुःखितं सीतानाथं वासन्त्या "नेयं सीता, अपितु दुःसहवियोगशोकसमुत्थो भ्रमः" इति पुनःपुनः प्रतिबोधितः सहचर्या, अनुपलब्ध्यादिप्रमाणेन तस्या असत्त्वमेव बहुधा वितर्क्य भगवतो विप्रलम्भस्यैवायमप्रतिकार्यस्वभावः प्रभाव इति निश्चिकाय। मुहुरेव विलपन्तं तं पुनरप्यन्यासक्तचित्तं कर्तुकामा वनदेवता अशेषभग्नावशेषरावणरथखर कङ्कालजालानि अदर्शयत्। तन्मुखात् रावणनामश्रवणादेव रघुनन्दनः समतीतां अपि घटनावलीं प्रत्यक्षदृश्यामिव मन्यमान आमन्त्रयमाणश्च रावणं तातप्राण सीताऽपहारिन्निति समरूपदन्तव्य एव।

अथ तमेव अलीककोपाकुलमालोक्य विबोध्य चास्य वृत्तान्तस्य असाम्प्रतिकत्वं वासन्तो पुनरपि समाश्वासयामास। रामोऽपि विदितात्मभ्रमः स्वोक्तं सर्वं प्रलापमेव मत्वा साम्प्रतिकस्य वियोगस्य निरवधित्वेन असहनीयत्वं विभावयन् शुचरशतितराम्। ...नस्य एव सीतामामन्त्र्य प्रबलनललक्षणादिसहायानामपि ज्ञानाविषये त्वं क्व स्थितेत्यपृच्छत्, व्यज्ञापयच्च तां वनदेवताम् इत्थं स्वशोकसमभागिसुहृज्जनमनस्ताप परिहर्तुकामो रामः स्वनववनगमनाभिलाषम्, अवदच्च भवनगमनोत्तरं हिरण्मय्या सीताप्रतिकृत्या समन्तात् परिवृतयोर्नैवयों सा प्रतिकृतिविनोदोपायम्।

अथ तमसा समाश्वासितचित्तदर्शनानन्दिता सीता रामस्य सहसा जिगमिषाव... ...नात् पुनर्निरवधिविरहाशङ्कानिर्दिताला नेक्य, तस्याऽपि कुशलवयोर्द्वादशवर्षवर्द्धन

मङ्गलविधानायमिति गौतमेन भागीरथीपादान्तिकगमनस्यावश्यकतां विबोधयन्ती आश्वासयामास ।

इतश्च पतिमुखात् सहधर्मचारिणीगर्भ्यश्रवणेन सपत्नीप्रतिभीता सीता वासन्ती कृतप्रश्नोत्तरमुखेण पुनस्तन्मुखादेव सीताप्रतिकृतिगर्भ्यश्रवणान्निर्वृता बभूव । वासन्ती च अनिच्छन्ती अपि कार्य्यहानिनिरासाय रामस्य गृहगमनमनुमन्यमाना तमसया सह सीतारामयोर्यथायथं गमनमाशंसमाना, तस्मात् स्थानात् प्रतस्थे । सीताप्यतिदुःखिता भागीरथीपादान्तिकमेव गन्तुमुपचक्रमे । रामश्च स्वभवनगमनाय रथं चलितुमादिदेशेति ।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन कुलपतिकल्प "वि,प" इत्युपनामक-
श्रीमज्जीवानन्दविद्यासागर भट्टाचार्य्यविरचितायां, तदात्मजाभ्यां
श्रीमदाशुबोधविद्याभूषण श्रीमन्नित्यबोधविद्यारत्नाभ्यां
परिवर्त्तित परिवर्द्धितायां सुखबोधिनीसमा
ख्यायाम् उत्तररामचरितव्याख्यायां
तृतीयोऽङ्कः ॥ ३ ॥

चतुर्थोऽङ्कः।

[ततः प्रविशतस्तापस्यौ।]

एका। सौधातकि! दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य। तथाहि, (क)—

नीवारौदनमण्डमुष्णमधुरं सद्यः प्रसूताप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति।

(क) एका इति।—उपस्थितयोस्तापसयोरन्यतरा, आहेति शेषः। उपस्थितयोः प्रथमत एव नामापरिज्ञानात् एकप्रभृतिशब्देन उल्लेखः। सौधातकि—एतत् सहागतस्य नाम्नः सम्बोधनम्, [सुधातुरपत्यं पुमान् इति सौधातकिः, सुधातृ शब्दात् "अपत्याय सुधातुरकङ् च" (४।१।९७ पा०) इति अकङ्, चकारात् इञ् च]। भूयिष्ठेत्यादि।—भूयिष्ठं—बाहुल्येन [इदमेषामतिशयेन बहु इत्यर्थे बहु शब्दात् "अतिशायने तमबिष्ठनौ" (५।३।५५ पा०) इति इष्ठन्, ततश्च "बहोर्लोपो भू च बहोः" (६।४।१५८ पा०) इति बहोर्भूरादेशः, ततश्च "इष्ठस्य यिट् च" (६।४।१५९ पा०) इति बहोः परस्य इष्ठस्य लोपः यिडागमश्च इति भूयिष्ठपदं सिद्धम्] सन्निधापिताः निमन्त्रणेन जनरवेण च समुपस्थापिताः अतिथिजनाः यस्मिन् तस्य तथोक्तस्य अनेकाभ्यागतजनसनाथस्येत्यर्थः। भगवतः,—ऐश्वर्यशालिनः, [एतेन वनवासी तपस्वी अपि वाल्मीकिः समागतातिथीनामातिथ्ये शक्तिमानित्यर्थो व्यज्यते]। आश्रमपदस्य—आश्रमस्थानस्य, तापसावासस्येत्यर्थः, ("पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः" इति मेदिनी)। समधिकारम्भरमणीयता—समधिकारम्भेण प्रचुरतररूपेण अतिथिसत्कारानुष्ठानेन अतिथिसेवाय बहुतरस्नानासनपानभोजनपरिवेशनादिकार्यगौरवेणेत्यर्थः, रमणीयता चारुता सुदृश्यत्वमित्यर्थः। दृश्यताम्—साक्षात्क्रियताम्। तथाहि—तमेवार्थम् प्रपञ्चयति।

[illegible] यदेतद् आश्रमपदस्य आतिथ्यसम्पादनायोजनरमणीयत्वमुक्तं तदेव [illegible], नीवारेति।—तपोवनमृगः आश्रमहरिणः [एतेन तपोवने मुनिभिः

गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते ॥ १ ॥

मत्स्नेह सवर्द्धिततया अतिविश्वस्त इति मनुष्यलोकसमागमेऽपि निर्भीक इत्यर्था व्यज्यते] सद्यःप्रसूतया अचिरमुक्तगर्भया प्रियया स्वपत्न्या पीतात् [समाने अह्नि इति सद्य, पृषोदरादित्वात साधु । सद्य प्रसूता इति सद्यःप्रसूता, "सह सुपा" (२।१।४ पा०) इति समास । इह सद्यःपदेन मृग्याः सातिशयतृष्णावत्त्वद्योतनाथम् । प्रसूतेति कर्त्तरि क्त । सा चासौ प्रिया चेति सद्यःप्रसूताप्रिया, तया पीतम् इति सद्यःप्रसूताप्रियापीत तस्मात् । च्युतसंस्कृतिदोषदुष्टतया नायं पाठ समीचीनतया प्रतिभाति, "प्रसूताप्रिया" इत्यंशे प्रसूताशब्दे प्राप्तस्य पुंवद्भावस्य अभावात् । न च "स्त्रियाः पुंवत—" (६।३।३४ पा०) इत्यनेन पूरणीप्रियादिषु परेषु पुंवद्भावस्य प्रतिषेधात् कथमत्र पुंवद्भावप्राप्तिरिति वाच्यम्, अस्य सूत्रस्य बहुव्रीहि समासविषयतया कर्म्मधारये "पुंवत्कर्म्मधारयजातीयदेशीयेषु" (६।३।४२ पा०) इत्यनेन सामान्यत प्राप्तस्य पुंवद्भावस्य कथमपि प्रतिषेद्धुमशक्यत्वात् , अत एव केचनात्र "सद्य प्रसूतप्रियापीतात्" इति पाठान्तर कल्पयन्ति इति सुधिया स्वधिया विभाव्यम्] अभ्यधिकम् अतिरिक्त पीतावशिष्टमित्यर्थ , [एतेन तिर्य्यग्योनिरपि अय मृग स्वप्रिया प्रणयपरवश स्वय क्षुधापिपासयोर्विद्यमानत्वेऽपि प्रेयस्यामत्यनुरागेण सद्यःप्रसूततया तस्या पिपासाया प्राबल्य जानान तामादौ आपरितोष पाययित्वा, तद्भुक्तावशिष्ट पिबतीत्यर्थो व्यज्यते] उष्ण मधुरश्च सुखाद्यमित्यर्थ, [उष्णश्च मधुरश्च इति उष्ण मधुर, नीललोहितादिवद्विशेषणसमास । अचिरमुक्तगर्भाया हि उष्णद्रव्यपानम् आशु यत्नणोपशमकमिति उष्णत्वोक्ति प्रकृतोपयोगितामापद्यत] नीवारौदनमण्ड तृणधान्यान्नमण्ड, पर्य्याप्त यथेष्ट यथा तथा आचामति पिबति , [आङ्पूर्वात् चमते लटि आचामति इति सिद्धम् "आङि चम इति वक्तव्यम्" (वा०) इति दीर्घं, अन्यत्र चमति विचमति इत्यादि । अत्र मण्डस्य पर्य्याप्तपानकथनेन आश्रमे अभितातिथिजनभोजनोपयोगिप्रचुरान्नाद्यायोजन, तथा प्रियापीतावशिष्टे मण्डे प्रियोच्छिष्टतया अस्य समधिकसमादरश्च ध्वन्यते इति बोध्यम्] मण्डस्य बहुलत्वात् सद्यःप्रसूताऽपि मृगी न समस्त मण्ड पातु शशाक, अवशिष्टेन मृगस्यापि पर्य्याप्त आहारोऽभूदित्यर्थ । किञ्च सर्पिष्मत सघृतस्य, घृतपक्वस्येत्यर्थ , भक्तस्य अन्नस्य ("पोलाओ" इति भाषा) स्फुरता उद्गच्छता गन्धेन सौरभेण मनाक् ईषत्, ("मनागत्यल्पमन्दयो" इति मेदिनी) अनुसृत अनुगत मिश्रित इत्यर्थ, कर्कन्ध्वा कोल्या फलै मिश्राणां

सौधातकि । आअदं अणज्झाअकारणं सविसेसभूदं अज्ज जिण्णकुच्चाणं । * (ख)

प्रथम । [विहस्य ।] अपूर्वः कोऽपि ते बहुमानहेतुर्गुरुषु सौधातके । (ग)

---

* आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्चानाम् ।

शाकानां वास्तूकादीनां पचनादुत्थितः आमोदः घृतपक्वभक्तामोदसहितः कौलिफलमिश्रशाकपाकादन्यगन्धविशेषः इत्यर्थः, परिस्तीर्य्यते सर्व्वतो व्याप्नोति । [परिस्तीर्य्यते इति कर्म्मकर्त्तरि प्रयोगः, यद्वा—कर्म्मणि एवायं प्रयोगः वायुना इति कर्त्तृपदम् एतत्कल्पे ऊहनीयम्। अत्र स्वभावोक्तिरलङ्कारः, तथाच दर्पणे,—"स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्" इति]। शार्द्दूलविक्रीडितं वृत्तम् ॥ १ ॥

(ख) जीर्णकूर्च्चानां—जीर्णं वार्द्धक्येन शुक्लीभूतं कूर्चं श्मश्रु येषां तेषां पक्वश्मश्रूणामतिवृद्धानामित्यर्थः । यद्वा—जीर्णं शिथिलं कूर्चं भ्रूद्वयान्तर्वर्त्ति स्थानं येषां तेषां, वार्द्धक्ये हि भ्रुवोर्मध्यदेशः श्लथीभवति इति सिद्धम् ("कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे" इति मेदिनी)। आगतम्—आगमनम् उपस्थितिरिति यावत् । सविशेषभूतं—विशेषरूपम्, केनापि उपायेन उपेक्षितुमशक्यमित्यर्थः । [विशेषेण सह वर्त्तमानम् सविशेषं, ततश्च सविशेषं भूतम् इति सविशेषभूतं "सह सुपा" (२।१।४ पा०) इति समासः द्वितीयातत्पुरुषो वा। वसिष्ठादेः शिष्टत्वस्य असन्दिग्धतया विशेषतया अध्ययननिषेधः, साधारणातिथेस्तु न तथेति सविशेषपदतात्पर्य्यम्]। अनध्यायकारणम्—अनध्यायस्य स्वाध्यायाभावस्य कारणं, शिष्टसमागमरूपं इत्यर्थः ।—"अनध्यायं प्रकुर्व्वीत शिष्टे च गृहमागते" इति वचनात् शिष्टसमादरानध्यायः शास्त्रसम्मत एव इति बोध्यम् । सोपहासवचनमिदम् ।

(ग) विहस्य—विकृतहास्यं विशेषहास्यं वा कृत्वा, ग्राम्यस्य कूर्चशब्दस्य तादृशसज्जनमान्येषु वसिष्ठादिषु प्रयुक्तत्वादस्य विकृतहास्यं विशेषहास्यं वा ज्ञेयम्। गुरुषु—पूज्येषु अभ्यागतेषु—वसिष्ठादिषु, अभ्यागतस्य गुरुत्वे प्रमाणं यथा,—"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गुरुः ॥" इति । अपूर्व्वः—अभिनवः । कोऽपि—असाधारणः इत्यर्थः । बहुमानहेतुः,—बहुमानस्य विशिष्टगौरवस्य हेतुः कारणं, वर्त्तते इति शेषः, विशिष्टगौरवपात्रेषु

सौधा। भो भाण्डायण। किणामधेओ एसो महन्तस्स त्थविरसत्थस्स धुरन्धरो अज्ज चीरधारओ अदिधी आअदो *? (घ)

भाण्डायन। धिक् प्रहसनम्। नन्वयमृष्यशृङ्गाश्रमात् अरुन्धतीपुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान् वसिष्ठः प्राप्तः, तत् किमेवं प्रलपसि ? (ङ)

---

* भो भाण्डायन। किंनामधेय एष महतः स्थविरसार्थस्य धुरन्धरोऽद्य चीरधारकोऽतिथिरागतः ?

एतेषु तव सम्मानप्रदर्शनमेव उचितं, त्वया तु पात्रापात्रे अविविच्यैव पूज्येष्वप्येतेषु परिहासव्यञ्जकः शब्दः प्रयुक्तः इत्ययुक्तमेवाचरितमिति भावः। यद्वा सौधातकिं प्रति प्रथमतापसस्य इयं सोल्लुण्ठनोक्तिरिति ध्येयम्।

(घ) भाण्डायन।—इदन्तु प्रथमतापसस्य नाम्ना सम्बोधनम् [भण्डस्य महर्षेर्युवाऽपत्यमिति भाण्डायनः, भण्डशब्दात् 'गर्गादिभ्यो यञ्' (४।१।१०५ पा०) इति यञ्, ततः "यञिञोश्च" (४।१।१०१ पा०) इति फक्]। स्थविरसार्थस्य—वृद्धसमूहस्य, धुरन्धरः,—श्रेष्ठः, [धुरं धरति इति धुरन्धरः, धुर् शब्दात धरतेः खच्प्रत्ययेन निपातनात् सिद्धम्]। चीरधारकः,—जीर्णवसनधारीत्यर्थः। किं नामधेयः,—किं नामधेयम् आख्या यस्य सः, किमाख्य इति यावत्। स्थविरधुरन्धर इति हास्यकरः प्रयोगः।

(ङ) प्रहसनम्—गुरुजनान् प्रति उपहासम्, असम्मानसूचकवाक्यप्रयोगम् इत्यर्थः। धिक्—निन्दायाम्, एवं परिहासः शिष्टविगर्हिततया सर्व्वथैव अयुक्त इत्यर्थः, [प्रहसनमित्यत्र धिक्शब्दयोगे द्वितीया]। 'स्थविरसार्थस्य धुरन्धर" इति "चीरधारक" इति च प्रयोगः परिहासव्यञ्जकः। नन्विति सम्बोधने। अरुन्धतीपुरस्कृतान्—अरुन्धत्या तन्नामवसिष्ठपत्न्या पुरस्कृताः, यद्वा—अरुन्धती पुरस्कृता अग्रेसरी येषां तान् तथोक्तान्। दारान्—भार्य्याः, कौशल्यामित्यर्थः। अधिष्ठाय—तेषां नायको भूत्वेत्यर्थः। प्राप्तः,—समागतः, अतिथिः सन्नुपस्थित इत्यर्थः। तत्—तस्मात्। किं—कथम्। एवम्—उक्तरूपेण। प्रलपसि—निरर्थकं कथयसि, उपहससीत्यर्थः, नैतद् युज्यते इति भावः।

सौधा। हु वसिट्ठो। * (च)

भाण्डा। अथ किम् ? (छ)

सौधा। मए उण जाणिदं, वग्घो वा विओ वा एसो त्ति। † (ज)

भाण्डा। आः किमुक्तं भवति ? (झ)

सौधा। तेण परावडिदेण ज्जेव सा वराइआ कल्लाणिआ मडमडाइदा। ‡ (ञ)

---

* हु वशिष्ठ ।

† मया पुनर्ज्ञातं, व्याघ्रो वा वृको वा एष इति ।

‡ तेन परापतितेनैव सा वराकिका कल्याणिका मडमडायिता ।

(च) हुवित्ति प्रश्ने ("हु वितर्के परिप्रश्ने" इत्यमरः)।

(छ) अथ किम् ? [सम्मतिसूचकपदमिदम् अव्ययम् "और क्या ?" इति हिन्दी भाषा] अथ वसिष्ठ एवेत्यर्थः ।

(ज) पुनः,—किन्तु। ज्ञातं—विदितम्। किं ज्ञातमित्याह, एष इति।—एषः,—जीर्णकूपादिमान् समागतः,—अभ्यागतः । व्याघ्रः,—द्वीपी। वृकः,—कुक्कुराकारव्याघ्रभेदः । वाकारद्वयं वितर्के, (वा स्यात् विकल्पोपमयोर्वितर्के पादपूरणे" इति मेदिनी 'कोकस्त्वीहामृगो वृकः" इत्यमरः) व्याघ्रवृकादिवद्-बहुरोमपूर्णस्थूलशरीरत्वात् अस्य तत्त्वेन वितर्कः । सोपहासोक्तिरियम्।

(झ) आः इति—सविरक्तिकोपव्यञ्जकमव्ययम् ("आः प्रगृह्य स्मृतौ वाक्ये ऽप्यास्तु स्यात् कोपपीडयोः' इत्यमरः)। उक्तं—कथितं, त्वयेति शेषः, किमेतद् अयुक्तं भवतीति समुदितार्थः, महान् दोषावहस्ते अनुचितवाक्प्रयोग इति भावः । यद्वा—श्रेष्ठं ज्येष्ठञ्च वसिष्ठमेवमुपहससि इत्ययुक्तमेव ।

(ञ) परापतितेनैव—आगतमात्रेणैव, व्याघ्रादिवदिति यावत् । सा—अस्मत्-परिचिता। वराकिका—दीना, स्वयमात्मरक्षणासमर्थत्वेन शोच्येत्यर्थः । कल्याणिका—वत्सतरी ["कल्लोडका" इति पाठे तु एवार्थः]। मडमडायिता—मडमडेति शब्देन चर्वयित्वा भक्षिता। मडमडेति अस्थिचर्वणकालीनोऽव्यक्तानुकरण

भाण्डा। समांसो मधुपर्क इति आम्नायं बहुमन्यमानाः श्रोत्रियायाऽभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः, तं हि धर्मसूत्रकाराः समामनन्ति। (८)

शब्दः। [तादृशाच्च अनुकरणशब्दात् "अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्" (५।४।५७ पा०) इति डाच्, ततश्च मडमडाकरोति इत्यर्थे "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति क्यषि मडमडायः इति नामधातौ कर्मणि क्त, स्त्रियां मड़मड़ायिता]। व्याघ्रादिर्यथा सहसा आगत्य यं कञ्चिदाहत्य अस्य्ना चर्व्वणे आत्मानं नियोजयति, तथा अयमपि इति, तत् जाय न भणामि "व्याघ्री वा वृकी वा" इत्यादीति भावः।

(८) "समांसो मधुपर्कः" इत्याम्नायप्रमाणमुपन्यस्य वसिष्ठस्य वत्सतरीमांसभक्षणे प्रत्यवायं निरस्यन्नाह, समांस इति।—मांसेन सह वर्त्तमानः इति समांसः, पलसहित इत्यर्थः। मधुपर्कः,—अतिथ्यादिपूजोपचारभेदः, [मधुना पृच्यतेऽसौ इति मधुपर्कः मधु + पृच् + घञ्]। मधुपर्कमाह कालिकापुराणे,—"दधि सर्पि जलं चौद्रं सितेताभिस्तु पञ्चभिः। प्रोच्यते मधुपर्कस्तु सर्वदेवौघतुष्टये॥" इति। इति—एवम्, उक्तरूपानुपूर्व्विकमित्यर्थः। आम्नायं—वेदवचनम् [आम्नायते अभ्यस्यते इत्याम्नायः वेदः। आङ्पूर्वात् म्नाधातोः घञ्प्रत्ययः]। बहुमन्यमानाः,—असन्दिग्धप्रमाणत्वेन आद्रियमाणाः। गृहमेधिनः,—गृहैर्दारैर्मेधन्ते सङ्गच्छन्ते इति गृहमेधिनः गृहाश्रमस्थाः। अभ्यागताय—गृहागताय अतिथये इत्यर्थः। श्रोत्रियाय—अधीतवेदाय ब्राह्मणाय, [छन्दोऽधीते इति घप्रत्ययेन श्रोत्रियः सिद्धः] श्रोत्रियलक्षणमाह देवलः,—"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥" इति। तथा च शाङ्करभाष्यम्—"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥" इति। वत्सतरीम्—अल्पवयस्कां गावत्सां, डिङ्खायनीमित्यर्थः। [वत्सशब्दात् अतिशाल्यार्थे "वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे" (५।३।९१ पा०) इति तरप्, ततश्च स्त्रियां ङीप्] महोक्षं—महावृषभं, [महांश्चासौ उक्षा चेति विग्रहे "अचतुर विचतुर—" (५।४।७७ पा०) इति अच् प्रत्ययान्तो निपातः]। महाजं—वृहच्छागम्। निर्वपन्ति—भोजनार्थं ददति, घ्नन्ति इत्यर्थः। ननु "समांसो मधुपर्कः" इति श्रुतेः देवोद्देश्यकमधुपर्कपरतया श्रोत्रियाय तदर्पणं न युज्यते इत्याह, तमिति।—तं—श्रोत्रियब्राह्मणोद्देश्यकं वत्सतरी

सौधा। भो णिग्गिहीदोसि। * (ठ)

भाण्डा। कथमिव ?

सौधा। जेण आअदेसु बसिट्ठमिस्सेसु बच्छदरी विससिदा, अज्ज ज्जेव पच्चागदस्स राएसिणो जणअस्स भअवदा बम्मीएण वि दहिमहूहि ज्जेव णिव्वत्तिदो महुवक्को, बच्छदरी उण विसज्जिदा। † (ड)

---

* भो। निगृहीतोऽसि।

† येन आगतेषु वसिष्ठमिश्रेषु वत्सतरी विशसिता, अद्य एव पर्य्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिनाऽपि दधिमधुभिरेव निर्वर्त्तित मधुपर्कः, वत्सतरी पुन विसर्जिता।

महोक्षमहाजानाम् अन्यतमनिर्वापरूपमित्यर्थ। धर्मसूत्रकारा,—धर्मशास्त्र विधिनिषधात्मकोपदेशसूत्ररचयितार, धर्मशास्त्रप्रणेतार मन्वादय इत्यर्थ। समामनन्ति —समुपदिशन्ति। हि शब्दो निश्चयवाचक। तदनुसारेणैव अद्य परमश्रोत्रियाय वसिष्ठाय कल्याणिका दत्तेति भाव।

(ठ) निगृहीत,—पराभूत, स्वपक्षसमर्थनेऽसमर्थत्वात्, मयेति शेष। अनेन सौधातकि भाण्डायनस्य अज्ञानवत्त्वमुपहसति। मधुपर्कस्य जीवहिंसासमेतस्य शास्त्रार्थत्वे सर्व्वत्रैव तदनुष्ठान स्यात्, तत्तु न भवतीति त्वम् अनर्थक कथयसीति भाव।

(ड) मधुपर्कानुरोधेन जीवहिंसा न शास्त्रार्थ, तत्र तस्या नियतत्वे अद्यैव वाल्मीकिना जनकाय दत्ते मधुपर्केऽपि वत्सतरी दत्ता स्यादिति युक्त्या भाण्डायनोक्ते अयौक्तिकत्व दर्शयति, येनेति।—येन—हेतुना। वसिष्ठमिश्रेषु—महामान्येषु वसिष्ठेषु [गौरवे बहुत्वम्, अत्र मिश्रशब्द पूज्यत्वबोधक] आगतेषु—अभ्यागतरूपेण उपस्थितेषु सत्सु। वत्सतरी—त्रिहायनी गौरित्यर्थ। विशसिता—मारिता, [व्यापादनार्थकात् विपूर्व्वात् शसते कर्म्मणि क्त, स्त्रियां टाप्] मधुपर्कार्थमिति शेष। [illegible] इत्यादि, अद्येति।—अद्यैव—अस्मिन्नेव दिवस, [एवकारेण दिनान्तरव्यवच्छेद, तेन च सद्य रुद्धत्वतया न विस्मृतिसम्भावनेत्याशयो द्योत्यते]। पर्य्यागतस्य—समुपस्थितस्य। राजर्षे,—राज्यशालिन तपस्विन, अभ्यर्थनार्हमिति [illegible], [एतेन विशेषणेन तदुद्देश्यकमधुपर्के नाऽऽडम्बरसम्भव इति व्यज्यते।]

भाण्डा। अनिवृत्तमांसानामेव कल्पमृषयो मन्यन्ते, निवृत्तमांसस्तु तत्रभवान् जनकः। (ढ)

वाल्मीकिनाऽपि—सकलशास्त्रज्ञेन महर्षिणा प्राचेतसेनापि इत्यर्थः। अत्र शास्त्रज्ञानविरहितस्य तु भ्रान्ततया कदाचित् प्रमादसम्भवेऽपि साङ्गवेदविद्यापारदर्शिनो वाल्मीकेस्तु सर्वथा तदसम्भव इत्यपिकारार्थः। दधिमधुभिरेव—विकृतदुग्धक्षौद्रप्रभृतिभिरेवेत्यर्थः, एवकारेण वत्सतरीव्यवच्छेदः। निर्वर्त्तितः,—सम्पादितः। पुनः,—किन्तु। विसर्जिता—परित्याजिता न तु मधुपर्कघटकपदार्थपूरणाय आलब्धेत्यर्थः। अयमत्र भावः,—"समांसो मधुपर्कः" इति श्रुतेर्यदि अभ्यागतसाधारणमधुपर्कपरता स्यात् स्यादपि वाल्मीकिजनकोद्देश्यकमधुपर्के वत्सतरीविशसनम्, अतः श्रुतेः देवोद्देश्यकमधुपर्कपरतैव सामान्यतो मधुपर्कस्य दधिघृतमधुशर्कराभिर्विहितत्वात्। उक्तञ्च,—"दधि सर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभिः। प्रोच्यते मधुपर्कस्तु क्वचिदन्यविधोऽपि च॥" इति।

(ढ) भाण्डायनः सौधातकेः शास्त्रस्य प्रकृतार्थनिर्णये भ्रान्तिमालोक्य सम्प्रति मधुपर्के समांसत्वामांसत्वयोरधिकारिभेदेन व्यवस्थां प्रदर्श्य तस्य भ्रमनिरासपुरःसरं स्वमतमेव द्रढयति, अनिवृत्तेति।—ऋषयः,—धर्मशास्त्रप्रणेतारः मुनयः। अनिवृत्तमांसानाम्—अपरित्यक्तमांसभोजनानां, मांसभक्षणशीलानामित्यर्थः, [निवृत्तं मांसं येषां ते निवृत्तमांसाः, न निवृत्तमांसाः इति अनिवृत्तमांसाः, तेषाम्, यद्वा—न निवृत्ताः इति अनिवृत्ताः मांसादनिवृत्ता इति अनिवृत्तमांसाः तेषामिति विग्रहः। अत्र मांसपदेन लक्षणया मांसभोजनं बोध्यते]। एव—"समांसो मधुपर्कः" इति श्रुतिसिद्धं मधुपर्के मांसदानरूपम्। कल्पं—विधिम्। मन्यन्ते—स्मरन्ति। नन्वेवञ्चेत् कथं तर्हि वेदविदामग्रेसरेणापि वाल्मीकिना तन्नानुष्ठितमित्याह, निवृत्तेति।—तु किन्तु। तत्रभवान्—पूज्यः, ("त्रिषु तत्रभवान् पूज्यस्तथैवात्रभवानपि" इति वैजयन्ती)। जनकः,—तन्नामा राजर्षिः। निवृत्तमांसः,—मांसभक्षणाद्विरतः, अत एव तस्मिन् आगते विसर्जिता, अनिवृत्तमांसे पुनर्वासिष्ठे उपस्थिते प्रथमं कल्पिता वत्सतरी हतेति भावः। नन्वेवं मधुपर्के मांसदानस्य अनिवृत्तमांसस्थले शास्त्रीयत्वेन दातुः तथा कर्त्तव्यत्वेऽपि पलितकेशस्य वर्षीयसो वसिष्ठस्य तद्भोजनन्तु अयुक्तमिति चेन्न, मधुपर्के प्रदत्तमांसस्य अभोजने प्रत्यवायश्रवणात् वसिष्ठेन तन्नोपेक्षितम्, तथाच—मनुः,—"नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः। स प्रेत्य पशुतां याति सम्भवानेकविंशतिम्॥ न मांसभक्षणे दोषो न मद्ये न च

सौधा। किं णिमित्तं ? २ (ग)

भाण्डा। स तदेव देव्या सीताया तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तथास्य कतिपये संवत्सराश्चन्द्रद्वीपे तपोवने तपस्तप्यमानस्य। (त)

२ किं निमित्तम् ?

नियने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला॥" इति। न चैव सति राजर्षे जनकस्य प्रत्यवायभागित्वमिति शङ्का, तस्य वैखानसव्रतावलम्बित्वेन निरामिषाशित्वात्, तथाच मनुः—"भक्षयेत् प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया। दैवे नियुक्तः श्राद्धे वा नियमे च विवर्जयेत्॥" इति सर्वं सुधीभिर्भाव्यम्।

(ग) किं निमित्तं—किं कारणम् ? जनकस्य निवृत्तमांसत्वे को हेतुरित्यर्थः।

(त) सौधातकिना पृष्टो भाण्डायनः जनकस्य मांसनिवृत्तौ हेतुमाह, स इति।—स,—जनकः। तदेव—सीतायाः निर्वासनवार्त्ताश्रवणाव्यवहितोत्तरमेव। तादृशं—तथाविधम् अतिभीषणमित्यर्थः। दैवदुर्विपाकं—दैवं पूर्वजन्मार्जितं कर्म, "पूर्वजन्मार्जितं कर्म तद्दैवमिति कथ्यते" तथा,—"प्राग्जन्मनि कृतं कर्म शुभं वा यदि वाऽशुभम्। दैवशब्देन निर्दिष्टमिह जन्मनि तद् बुधैः॥" इति। पूर्वजन्म च वर्त्तमानजन्मकालस्य प्राक्काल इति बोध्यम्। शरीरस्य प्रतिक्षणध्वंसित्वात् प्राग्वर्त्तिशरीरस्य च परकालेऽनवस्थानात् कर्म च अपरशरीरकृतमपीति बोध्यम्। तस्य दुर्विपाकं दुष्टं परिणामं कुफलमिति यावत् [विपच्यते इति विपाकः, विपूर्वात् पचतेः भावे घञ्] तं दुर्भाग्यदुर्विलसितमिदमित्यर्थः। वैखानसः,—वानप्रस्थः [विशेषेण खनति विदारयति धनादीन् आत्मानं क्लेशयति इति वैखानसः। वि खन - ड धन - अतुन् कर्म० स्वार्थे अण्] वानप्रस्थाश्रममाह याज्ञवल्क्यः,—वानप्रस्थो ब्रह्मचर्य्येण सहैव वा। पुत्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव

सौधा। तदो किं त्ति आअदो ? * (य)

भाण्डा। चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुम्। (द)

सौधा। अवि अज्ज सम्बन्धिणीहिं समं सवुत्तं से दंसणं ण वत्ति। † (ध)

भाण्डा। सम्प्रत्येव भगवता वसिष्ठेन देव्याः कौशल्यायाः सकाशं भगवती अरुन्धती प्रहिता, यत् स्वयमुपेत्य वैदेहो द्रष्टव्य इति। (न)

* ततः किमिति आगतः ?

† अपि अद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं न वेति।

वानप्रस्थरूपेणेत्यर्थः। अस्य—जनकस्य। कतिपये—कियन्तः [कतिपयशब्दस्य "प्रथमचरमतयाल्पार्द्ध—" (१।१।३३ पा०) इति सर्वनामत्वे जसः शादेशः]। संवत्सराः,—अब्दाः, अतीता इति शेषः। चन्द्रद्वीपतपोवने—चन्द्रद्वीपस्य तदाख्यस्य कस्यचित् स्थानस्य तपोवने आश्रमे। तपस्तप्यमानस्य—तपस्यामनुतिष्ठतः, [अत्र "तपस्तपःकर्मकस्यैव" (३।१।८८ पा०) इत्यनेन तप् धातोरात्मनेपदम् यक् च]।

(य) ततः,—तस्मात् चन्द्रद्वीपतपोवनादित्यर्थः। किमिति—कथम्। आगतः,—इहोपस्थितः।

(द) चिरन्तनेति।—चिरन्तनः,—चिरकालीनः, प्रियसुहृत्—प्रेमास्पदमित्रं, तं—प्राचीनबन्धुमित्यर्थः, [अत्र चिरं भवः इत्यर्थे चिरमित्यव्ययात् "सायंचिरंप्राह्णेप्रगे—" (४।३।२३ पा०) इति ट्युल्, तुट् च]। प्राचेतसं—वाल्मीकिम्। द्रष्टुं—साक्षात्कर्त्तुं, पूर्वोक्तसौधातकिवाक्यस्थेन "आगतः" इत्यनेन अन्वयः।

(ध) अत्र अपि शब्दः प्रश्नार्थकः। सम्बन्धिनीभिः,—कुटुम्बिनीभिः कौशल्याप्रभृतिभिः। समं—सह, ('साकं सार्द्धं समं सह" इत्यमरः)। अस्य—जनकस्य। दर्शनं—साक्षात्कारः। संवृत्तं—सञ्जातम्, (अत्र—"अद्य सम्बन्धिनीभिः समम् अस्य दर्शनं संवृत्तं न वेति अपि ज्ञायते ?" इत्येवमन्वयः कार्य्यः, अन्यथा नवेत्यतः विकल्पबोधकः वा शब्देनैव जिज्ञासाया अपि अर्थत एव बोधनात् अपेर्निरर्थकत्वापत्तिः स्यादिति ध्येयम्)।

(न) प्रहिता—प्रेरिता। वक्ष्यमाणसंवादं वक्तुमिति शेषः। किमर्थमित्याह,

सौधा। जधा एदे त्थविरा परप्परं मिलिदा, तधा अह्मे वि वटुएहिं सम मिलिअ अणज्झाअमहूसव खेलन्ता सम्भावेह्म । * (प) [इति परिक्रामतः ।]

भाण्डा। तदय ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतस-वसिष्ठावुपास्य सम्प्रति आश्रमबहिर्वृक्षमूलमधितिष्ठति, य एष (फ),—

---

* यथा एते स्थविरा परस्परमिलिता, तथा आवामपि वटुभिः समं मिलित्वा अनध्यायमहोत्सवं खेलन्तौ सम्भावयाव ।

यदिति। स्वयम—आत्मना न तु प्रतिनिधिनेत्यर्थः । स्वयमनुपस्थितौ वैवाहिके ममादरशैथिल्यप्रकाश सम्भवेदिति भाव । उपेत्य—उपस्थाय। वैदेह,—विदेहाधिपतिर्जनक, [विदेहस्य ईश्वर इति वैदेह "तस्येश्वर" (५।१।४२ पा०) इति विदेहशब्दात् अण्]। द्रष्टव्य,—साक्षात्कर्त्तव्य, तथा च इदानीमपि कुटुम्बिनीभि समं साक्षात्कारो नाभूत्, कौशल्याया तत्रानुपस्थितत्वादिति तात्पर्य्यम् ।

(प) स्थविरा,—वृद्धा । परस्परमिलिता,—अन्योन्यमेकत्र समवेता । आवा—सौधातकि भाण्डायनौ। वटुभि,—अल्पवयस्कै ब्राह्मणै । खेलन्तौ—क्रीडन्तौ, खेलनेनेत्यर्थ, ["लक्षणहेत्वो क्रियाया" (३।२।१२६ पा०) इति क्रियाया परिचायके हेतौ चार्थे वर्त्तमानाद्धातोर्लट शत शानच विधानात् अत्र खेलते हेत्वर्थे शतृप्रत्यय] अनध्यायमहोत्सवं—पाठविघ्नरूपमानन्दजनकव्यापारम् । सम्भावयाव,—सम्मानयाव, क्रीडया उपभुञ्ज्वहे इत्यर्थ ।

(फ) तत—तस्मात्, कौशल्यया सममिदानीमपि साक्षात्काराभावादित्यर्थ । अय—पुरत परिदृश्यमान । ब्रह्मवादी—वेदोपदेष्टा, अधीतवेदवेदान्त इत्यर्थ, [ब्रह्म वदितु शीलमस्य इति ब्रह्मशब्दपूर्वात् वदते शीलार्थे णिन् प्रत्यय] प्राचेतसवसिष्ठौ—वाल्मीकिवसिष्ठौ। उपास्य—आराध्य, दर्शनसल्लापादिकं कृत्वेत्यर्थ । वृक्षमूलम्—आश्रमतरोरधोदेशम् [वृक्षमूलमिति "अधिशीङ्स्थासा कर्म" (१।४।४६ पा०) इत्यधिपूर्वकस्य तिष्ठतेराधारस्य कर्मत्वम्]। य एष इति अन्ववहितेन श्लोकस्थेन ... इति क्रियापदेनान्वय ।

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते।
अन्तःप्रसृप्तदहनो ज्वलन्निव वनस्पतिः॥ २॥

[निष्क्रान्तौ।]

इति विष्कम्भकः। (व)

प्राणेभ्योऽपि प्रियतमाया दुहितुः सीतायाः सापवाददपरित्यागेन अन्तर्निरुद्धातमन्यु विदेहनाथ तत्रतत्रामानमालोक्य भाण्डायनः तस्य तदानीन्तनीमवस्थां वर्णयन्नाह, हृदीति।—हृदि अन्तःकरणे नित्यानुषक्तेन सततावस्थितेन सीताशोकेन सीतावियोगदुःखेन, अन्तःमध्ये प्रसृप्तः उदञ्चितः, [प्रसुप्त इति पाठे—निहितः, प्रदीप्त इति पाठे तु—प्रज्वलितः इत्यर्थः] दहनो वह्निर्यस्य सः [सीताशोकः दहन इवेति ध्वनिः] तथाभूतः अभ्यन्तरलीनपावकः इत्यर्थः, ज्वलन् ज्वलिष्यमाणः इत्यर्थः वनस्पतिः शमीवृक्ष इव तप्यते तापमनुभवति, जनक इति शेषः। [अत्र—उपमानामालङ्कारः सा च—इवशब्दवाच्यतया श्रौती। एवं वनस्पतिसाधारण्ये अन्तर्लीनपावकत्वः असम्भवतया सामान्यशब्दस्य विशेषपरतानियममङ्गीकृत्यैव शमीरूपवनस्पतिविशेषबोधनेऽपि वक्तुमुचितस्य शमीरूपस्य वनस्पतेर्विशेषतोऽकथनात् विशेषेऽविशेषदोषश्चिन्त्यः]। पथ्यावक्त्रं वृत्तम्॥ २॥

(व) विष्कम्भकस्य लक्षणादिकन्तु पूर्वमुक्तम्, सम्प्रति शुद्धसङ्कीर्णभेदभिन्नयोस्तयोः कतरोऽयमिति विचार्यते, तथाहि,—"मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः॥" इति दर्पणवचनात् भाण्डायनसौधातकिरूपाभ्यां नीचमध्यमपात्राभ्यां सम्प्रयोजिततया अस्य सङ्कीर्णरूप एव भेदेऽन्तर्भवति। न चैतयोरुभयोरेव मुनिशिष्यतया मध्यमपात्रत्वमिति तादृशाभ्यां ताभ्यां सम्प्रयोजितस्यास्य शुद्धताया एव उचितत्वात् कथं सङ्कीर्णरूपत्वमिति वाच्यम्, एतयोरेकस्य सौधातकेर्मध्यमपात्रत्वाभावेन तथात्वात्। अथ किं नाम नीचत्वं मध्यमत्वं वा योर्निष्कृष्टलक्षणमिति चेत् शृणु, संस्कृतभाषाभाषित्वमेव मध्यमत्वं प्राकृतादिभाषाभाषित्वञ्च नीचत्वमिति ब्रूमः, तथा च सौधातकेरसंस्कृतभाषितया नीचलक्षणान्तर्गतत्वाद् अस्य सङ्कीर्णरूपत्वमेवेति सुधीभिर्विभाव्यम्। एवं "स तदैव दृष्ट्वा सीतायास्तादृशं दैवदुर्विपाकम्" इत्यादिना भाण्डायनवाक्येन वृत्तानां, तथा "सम्प्रत्येव भगवता वसिष्ठेन देव्या कौशल्यायाः" इत्यादिना च भाण्डायनवाक्येन वर्त्तिष्यमाणानां कथांशानां निदर्शनतया विष्कम्भकलक्षणसङ्गतिर्बोध्या।

[तत प्रविशति जनक ।]

जनक ।—अपत्ये यत् तादृग् दुरितमभवत् तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन् मर्माणि क्रकच इव मन्युर्विरमति ॥२॥

प्राणेभ्योऽपि प्रियतमाया आसन्नप्रसवाया असहाया सीताया पूतस्वभावाया अपि सापवादनिवासनवार्त्ताश्रवणात् प्रभृति दु सहशोकावेगेनान्तर्दूयमान जनक, विलपति, अपत्य इति ।—अपत्ये दुहितरि सीतायां तादृक् तथाविधम् अतिशोकावहतया अनिर्वचनीयमित्यर्थ, यद् दुरितम् आसन्नप्रसवावस्थायां वननिर्वासनरूप दुर्गत दुरवस्थेति यावत्, अभवत जात, महता विपुलन तीव्रेण उग्रेण, अत्यन्तदु सहनेत्यर्थ, व्यथयता दु खयता [णिजन्तात् व्यथधातो मित्त्वात शतृप्रत्यये कृते "मिता ह्रस्व" (६।४।९२ पा०) इति ह्रस्व] तथा व्रणित क्षत, सञ्जातव्रणमिति यावत्, [व्रण सञ्जातमस्य इति व्रणित, व्रणशब्दात् 'तदस्य सञ्जात तारकादिभ्य इतच" (५।२।३६ पा०) इति इतच्] हृदय येन तन तथोक्तेन तेन दुरितेन विषक्त हृदि दृढतर निहित नव इव नूतन इव, कालातिपातेऽपि अमन्दीभूत इत्यर्थ, अत एव पटु कुशल, त्यागिनोऽपि मम हृदयाच्छेदने समर्थ इत्यर्थ, पक्षे—छेदनपटु, अति तीक्ष्णत्वात् छेदनकुशल इति यावत्, धारावाही धारया सातत्येन, निरन्तरमित्यर्थ, वहति सञ्चरतीति धारावाही निरन्तरस्थायी, अनिवृत्त इति यावत्, पक्षे—धारया कर्त्तनसाधनाग्रभागेण वहति पुन पुन निर्गमोद्गमाभ्या सरतीति तथोक्त मर्माणि अन्त सन्धिस्थानानि निकृन्तन् विदारयन्, पक्षे—छिन्दन्, अत एव क्रकच करपत्रमिव [क्र" इति अव्यक्तशब्द कचति शब्दायते इति क्रकच करपत्र, क्र शब्दपूर्वात् कचते पचाद्यच्] मे मम मन्यु सीतानिवासनजनित शोक ("क्रकचोऽस्त्री करपत्रम्" इति "मन्यु दैन्ये क्रतौ क्रुधि" इति चामर) चिरेणापि कालातिक्रमणापि न विरमति न शाम्यति । [रमधातोरात्मनेपदित्वेऽपि अत्र विपूर्वात् रमते "व्याङ्परिभ्यो रम" (१।३।८३ पा०) इति परस्मैपदम्] सीतानिवासन मामतिशय व्यथयतीति भाव । [अत्र उपमानामालङ्कार, सा च उपमानोपमेयगतसाधारणधर्मस्य औपम्यवाचकपदस्य च वाच्यतया पूर्णा, तथा "नव इव" इत्यत्र उत्प्रेक्षा चेत्यनयोरङ्गाङ्गिभावेन सङ्कर]। शिखरिणी वृत्तम् ॥ २ ॥

कष्टम् एव नाम जरसा दुःखेन च दुरामर्देन भूयः पराक-सान्तपन प्रभृतिभिस्तपोभिरात्तरसधातुः अनुपयुज्यमानो न अद्यापि मे दग्धदेह पतति॥ अन्धतामिस्रा हि असूर्य्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते ये आत्मघातिन इत्येवमृषयो मन्यन्ते, अनेकसवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावना स्पष्टनिर्भास प्रत्यग्र इव दारुणो न मे दुःखसवेग. प्रशाम्यति। अयि मातर्देवयजनसम्भवे देवि सीते। ईदृशस्ते निर्माणभाग परिणतः, येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते। हा हा पुत्रि। (भ)—

(भ) कष्टमित्यतिदुःसहदुःखसूचकमव्ययम्। एवम—इत्य, साम्प्रतमनुभूय मानेनेत्यर्थ। जरसा—वार्द्धकेन। दुरामर्देन—दुःसहेन। दुःखेन—सीतानिवासन समुत्थेन शोकेन। पराकेत्यादि।—पराक द्वादशदिवस व्याप्य उपवाससाध्य प्रायश्चित्तरूप व्रतविशेष, तथाच मनु,—"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। पराको नाम कृच्छ्रोऽय सर्वपापापनोदन॥" इति। बृहस्पतिश्च "जपहोमरत कुर्य्याद द्वादशाहमभोजनम्। पराक एष विख्यात सर्व्वपापप्रणाशन॥" इति च। सान्तपन—पञ्चगव्यकुशोदकपानेनैकदिनम् उपवासेन चैकदिनमिति द्वैदिव सिकव्रतभेद, [सन्तापयति इति ल्युट्, तत स्वार्थे अण्] तथा च मनु,—"गोमूत्र गोमय क्षीर दधि सर्पि कुशोदकम्। एकरात्रोपवासश्च कृच्छ्र सान्तपन स्मृतम्॥" इति। याज्ञवल्क्यश्च—"गोमूत्र गोमय क्षीर दधि सर्पि कुशोदकम्। जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्र सान्तपन चरन्॥ पृथक् सान्तपनद्रव्यै षडह सोपवासक। सप्ताहेन तु कृच्छ्रोऽय महासान्तपन स्मृत॥" इति। पराकश्च सान्तपनश्च ते पराकसान्तपने, ते प्रभृतिनी आदिनी येषा तै [अत्र प्रभृतिशब्देन—"एकैक ह्रासयेत् पिण्ड कृष्णे शुक्ले च वर्द्धयेत्। उपस्पृशस्त्रिषवणमेतच्चान्द्रायण स्मृतम्॥" इति मनूक्तलक्षणकचान्द्रायणादिपरिग्रहो बोध्य]। तपोभि,—क्लेशसम्पाद्यै व्रतै, कायशोषकनियमविशेषैरिति यावत। भूय,—बाहुल्येन। आत्त रसधातु,—आत्ता गृहीता, विशोषिता इति यावत, रसा रक्तप्रभृतय द्रवपदार्था धातव,—रसासृङ्मांसप्रभृतयो यस्य स तथोक्त, अत्र शरीरान्तर्वर्त्तिद्रवभावमेव रसशब्द वाच्य, तदन्यो धातुरिति बोद्धव्यम्। यद्वा—रसा एव धातव देहधातव रसासृङ्

मासमेगेऽस्मिन्ननुपरूपा यस्य स, ('रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे ॥" इति मेदिनी) अत एव अनुपयुज्यमान —अन्नपानादिना असेव्यमान, अन्नपानादिजन्यां पुष्टिमनधिगच्छन्नित्यर्थ , यद्वा—न उपयुज्यते कार्येषु इति अनुपयुज्यमान, जरसा दु सहेन सीताविवासनक्लेशेन तथा शरीरशोषकेणविधक्लेशेन नितान्तक्षीणदुर्बलतया कायिकमानसिकसर्वविधव्यापारे सम्यगपटुरित्यर्थ । दग्धदेह,—दग्धपदार्थवत् सारशून्य काय । न पतति—न विशीर्यते न भस्मसात् भवतीति यावत्, यथा स्वसष्टेनाग्निना दग्धस्थूणो गृहादि अन्तःसारशून्यत्वेऽपि कदाचित् प्रत्यवतिष्ठते, तथा सततमन्तर्ज्वलता सीता शोकाग्निना दग्धीभूतोऽपि मे काय नाद्यापि पततीति मे दुर्भाग्यमेव अत्र निदानमिति भाव । ननु यद्येव दु सहक्लेशदग्धस्यापि ते देहस्य न स्वत पात, तदा त्वयैव भृगुपातादिना त्यज्यतामयमित्याह, अन्धेति।—अन्धतामिस्रा,—अन्धम् अन्धकरण तामिस्र तम सहति प्रगाढ तम इत्यर्थ, यत्र अतिभीषणदु खोत्पादका इत्यर्थ । [अन्धयति इति अन्ध "नन्दिग्रहिपचादिभ्यो ल्युणिन्यच" (३।१।१३४ पा०) इति पचाद्यच्। तमिस्र तमस्तति, तमिस्रमेव इति तामिस्रम् इति स्वार्थे अण्, अन्ध तामिस्र येषु ते अन्धतामिस्रा] अत्र अन्धतामिस्रशब्द "तमिस्रमन्धतामिस्र महारौरवरौरवौ । नरक कालसूत्र महानरकमेव च ॥" इत्यादिना मनुना गणितेषु एकविंशतिनरकभेदेषु द्वितीये नरके बोध्य । असूर्या,—नास्ति सूर्य सूर्यकर येषु ते सूर्यरश्मिरहिता आलोकमात्ररहिता इत्यर्थ [अत्र "असुर्या" इति ह्रस्वमध्योऽपि पाठ परिदृश्यते तत्र असुराणामिमे इत्यसुर्या असुरसम्बन्धिन पातालादय इत्यर्थ । तत्त्वतो विचार्यमाणे तु अयमेव पाठ साधीयान्, तथाहि—"असुर्या नाम ते लोका' इति कविवाक्यांशो हि "असुर्या नाम ते लोका अन्धेन तमसाऽऽवृता । तांस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जना ॥" इति वाजसनेयिसंहितावचनस्यैव प्रत्यर्तीक, तथा च तत्र ह्रस्वमध्यपाठस्यैव सत्त्वात् अत्रापि ह्रस्वमध्य एव पाठो युक्त । न च तथापि [illegible] कि प्रमाणमिति वाच्यम्, "असुराणामिमे इत्यसुर्या" इति तद्वाक्यस्य [illegible] "अन्धेन तमसाऽऽवृता" इति विशेषणेनैव गतार्थत्वे सूर्यालोकाभावबोधकस्य [illegible] 'असुर्या' इति विशेषणस्य वैयर्थ्याच्च। उक्त [illegible] आत्मनिकटाध्याहारदर्शने तु मूलपाठस्य व्याख्या अन्यथैव प्रतीयते तथा च आह—"एव स्वात्मकर्मपरान् निन्दति । ये के च ये केचित नरा आत्मानं घ्नन्ति [illegible] अविद्वांस कामकर्मपरा विद्यमानस्याजरामरस्य आत्मनो [illegible] तिरस्करणादात्महनस्तादृशा ते प्रेत्य मृत्वा देह त्यक्त्वा तान्

अनियतरुदितस्मितं विराजत्-
कतिपयकोमलदन्तकुड्मलाग्रम्।

लोकान् जन्मानि स्थावरान्तानि आपगच्छन्ति प्राप्नुवन्ति। तान् कान्?—नाम प्रसिद्धं, ते ये यत्तदोर्व्यत्ययः, ये लोकाः लोक्यन्ते दृश्यन्ते भुज्यन्ते कर्मफलानि यत्रेति लोकाः जन्मानि, असुर्याः असुराणामिमे असुर्याः, असुषु प्राणेषु रमन्ते असुराः प्राणपोषणपराः अद्वैतमपेक्ष्य देवा अपि असुराः। कीदृशा लोकाः?—अन्धेन तमसा अदर्शनात्मकेनाज्ञानेन आवृताः आच्छादिताः। अनात्मज्ञाः पुनर्जायन्ते म्रियन्ते चेत्यर्थः।" इति। एवञ्च भाष्यकारमतमनाश्रित्य व्याख्या भाष्येणैव गतार्थेति न पुनस्तदर्थं प्रयासः कृत इति सुधीभिर्विभाव्यम्] लोकाः,—अतिघोरनरकस्थानविशेषाः। तेभ्यः,—आत्मघातिभ्यः तथा शास्त्यर्थमित्यर्थः, ["तेभ्यः" इत्यत्र—"कर्मणा यमभिप्रैति स सम्प्रदानम्" (१।४।३२ पा०) इति सम्प्रदानतया चतुर्थी]। प्रतिविधीयन्ते—निर्दिश्यन्ते। तत्र प्रमाणं यथा,—"अन्धं तमः प्रविशन्ति ये के चात्महनो जनाः" इति श्रुतिः। ननु नरकभीतेरात्महत्या मा भूत् कालप्रतीक्षा तु कर्त्तुं शक्यते एव, काले सर्व्वस्यैव विलयदर्शनात् अस्यापि दुःखस्य अवसानं सम्भवात्याह, अनेकेति।—अनेकेषां बहूनां संवत्सराणाम् अब्दानाम् अतिक्रमेऽपि अपगमेऽपि। प्रतिक्षणेति।—प्रतिक्षणं परिभावनया परिचिन्तया स्पष्टः परिस्फुटः निभासः प्रकाशः यस्य स तथोक्तः, प्रतिक्षणं मनसि वर्त्तमान इत्यर्थः। ["स्पष्ट" इति पदं णिजन्तस्य स्पशधातोः क्तप्रत्ययेन "वा दान्तशान्तपूर्ण—" (७।२।२७ पा०) इति निपातनात् पक्षे सिद्धं,] अत एव प्रत्यग्रः इव—चिन्तात्यागेन अलुप्तत्वात् नूतन इव प्रतीयमान इत्यर्थः। दारुणः,—हृदयविदारणः। दुःखसंवेगः,—शोकप्राबल्यम्। मातः।—यज्ञभूमिसमुद्भूततया अतिपवित्रत्वात् मातृसम। यद्वा—मातरीव स्निग्धायां सीतायां सम्बुद्धसम्बोधनम्। देवयजनसम्भवे।—यज्ञभूमिसमुत्पन्ने। [एतेन एव पवित्रायास्ते ईदृक् परिणामः विरुद्ध एवेति व्यज्यते]। ईदृशः,—एवम्प्रकारः सापवादनिवासनरूपः। निर्म्माणभागः,—सृष्टेः परिणामः इत्यर्थः। येन—असत्परिणामेन हेतुना। लज्जया—सापवादनिवासननिमित्तया त्रपया। स्वच्छन्दं—छन्दानुरूपं, यथेच्छमित्यर्थः। आक्रन्दितुमपि—उच्चैः रोदितुमपि, तादृक्‌चरित्रवदीयापवादेन निवासितां त्वामुद्दिश्य मयि रुदति लोकाः मां दुश्चरित्रतनयाशोकविह्वलमालोक्य निन्दिष्यन्तीति भावः।

प्रियजनविरहे हि जगतस्तन्मयतया नियततदवस्थापरिभावनया च तन्मूर्त्तिः सततमेव भावयितुर्मनसि जागर्त्तीति प्राणेभ्योऽपि प्रियतमा नयनमनोरमा सीता तद्गतन

वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जुजल्पितं ते ॥ ४ ॥

भगवति वसुन्धरे। सत्यमतिदृढाऽसि। (म)—

मनसा सम्प्रत्यविरतमनुचिन्तयन् जनकः स्मृतिपथसमारूढां तदीयां शैशवावस्थामुपवर्णयन्नाह, अनियतेति।—अनियतं विषयसम्बन्धरहितम्, अहेतुकमिति यावत्, रुदितं रोदनं स्मितं मृदुहसितञ्च यस्मिन् तत् तथोक्तं विराजन्ति विकासमानानि कतिपयानि शिशुत्वात् अल्पसङ्ख्याकानि, विचतुराणीति यावत्, कोमलानि सुकुमाराणि ("कचि" इति भाषा) दन्तकुड्मलानां दशनमुकुलानाम् अग्राणि पुरोभागा यस्मिन् तत् तथोक्तं, कुड्मलसदृशकोमलविरलदन्तवदित्यर्थः, तथा स्खलत् पतत् सर्व्ववर्णानुच्चारणात् न परिस्फुटमुच्चरदित्यर्थः, असमञ्जसं न कर्तृकर्म्मक्रियादिसमन्वयसूचकयथोचितविभक्त्यादिसमन्वितं, मञ्जु ललितं सुस्वरत्वात् सुश्राव्यमिति भावः, जल्पितं भाषितं वचनमिति यावत्, यस्मिन् तत् तथोक्तं, शिशोः बालिकायाः ते तव वदनं कमलमिव वदनकमलम् अल्पं वदनकमलम् इति वदनकमलकं, शिशुकालिकम् अरविन्दसुन्दरमाननमित्यर्थः, यद्वा—मञ्जु इति च्छेदः, जल्पितस्य विशेषणम्। तथात्वे स्मित-मुग्ध-वाक्यानीति वीथि स्मरणीयानि बोध्यानि। ["वदनकमलकम्" इत्यत्र—"अल्पे" (५।३।८८ पा०) इति अल्पार्थे कन्] स्मरामि चिन्तयामीत्यर्थः, प्राणाधिके! न जाने त्वमिदानीं क्व गतेति, तथापि प्राक्शैशवे विभिन्नाकारेण नियतपरिलक्षिता ते कुसुमसुकुमारा मूर्त्तिः सततं स्मृतिपथमारूढा मामाकुलीकरोतीति भावः। [अत्र रुदितहसितपदानुरोधात् मुखकमलमित्युपमितसमासः, रुदितहसितयोः मुख एव सम्भवात् मुखस्य प्राधान्यं, तच्च उपमितसमासेनैव भवतीति उपमायाः साधकसद्भावेन उपमाऽलङ्कार एव, रूपके तु प्रधानीभूते वदनरूपे कमले रुदितस्मितयोर्विशेषणविधया अन्वयाऽसम्भवात्। सा च समासे उपमावाचकस्य इवशब्दस्य लोपात् लुप्ता, तथा स्वभावोक्तिश्चेत्यनयोः परस्परनिरपेक्षतया तिलतण्डुलवत् संसृष्टिः]। अभिज्ञानशकुन्तलेऽपि अस्यानुरूपः श्लोकोऽयं परिदृश्यते, यथा,—"आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्। अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति॥" इति। पुष्पिताग्रा वृत्तम्॥ ४॥

(म) भगवति—नाहं मानुषाणि प्रतीकारसमर्था। इत्यत्र। वसुन्धरे—४।६४।१।१८८। [अत्र वननामभिज्ञातत्वात् तवान्तःकरणस्य एतावत् काठिन्यं यद्, एतादृशी देवदुर्लभानामपि वनराजपुत्री नष्टाऽनालोच्य न कोऽपि

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः।

प्रतीकारः कृत इति तिरस्कारो व्यज्यते]। मन्ये—निश्चितमेव, नान्यत्र कोऽपि संशय इति यावत्। अतिदृढोऽसि—अतिकठिनहृदयोऽसीत्यर्थः, कन्यायामस्यामेवंविध परित्यागरूपदुःखदर्शनादिति भावः।

सीतायाः अतिपूता विदित्वाऽपि केवलं राजधर्मानुसारेण तां निर्वासयता रघुपतिना अतिदृढत्वमवलम्बितं, वसुन्धरायास्तु तदानीं तादृग्दृढताऽवलम्बने कस्यापि न्याय्य हेतोरसद्भावात् तथा न युक्तमाचरितमित्याशयवान् मिथिलापतिरस्या दृढत्वमेव ख्यापयति, त्वमिति।—त्वं पूर्वोक्तसम्बोधनाद्दिष्या पृथवी, वह्निरग्निः, मुनयो तपः प्रभावात् त्रिकालविदः वसिष्ठवाल्मीकिप्रभृतयः वसिष्ठगृहिणी वसिष्ठपत्नी अरुन्धतीत्यर्थः, गङ्गा पतितपावनी सुरधुनी च, यदि वा तथा रघोः रघुवंशीयाना मित्यर्थः, कुलगुरुः कुलमूलत्वेन पूजनीय इत्यर्थः, यद्वा—वंशस्य आदिपुरुषः ["रघोः कुलगुरुः" इत्यत्र सापेक्षत्वेऽपि गमकत्वात् समासः] देवः देवशक्तिसम्पन्नः स्वयं साक्षा दित्यर्थः, [अत्र स्वयमिति तृतीयान्तमात्मबोधकमव्ययम् "प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) इति तृतीया] भास्करः सूर्यश्चेत्यर्थः, यस्याः सीतायाः माहात्म्यं महिमानं सच्चरित्रत्वपातिव्रत्यादिकमिति यावत्, विदुः जानन्ति [विद्धातोर्लटि प्रथम पुरुषस्य बहुवचने रूपं "विदो लटो वा" (३।४।८३ पा०) इति झेरुसादेशः। न च "तयोः परं क्रियाकालैकत्वे" इति क्रमदीश्वरकृतसूत्रेण नामयुष्मदस्मत्सु वाच्येषु तेषां यः परः, स एव भवति, तथाच—स च त्वञ्च अहञ्च गच्छामः, स च त्वञ्च गच्छथ, अहञ्च त्वञ्च स च गच्छामः, इति नियमात् अत्र युष्मत्समभिव्याहृतनाम कर्तृकत्वेऽपि "विदुः" इति क्रियायां कथं प्रथमपुरुषविभक्तिरिति वाच्यं, नाम युष्मदस्मदां परं परं प्रधानमिति नियमस्य प्रायिकत्वात्। न च तत्रापि किं प्रमाणमिति वाच्यम्, "अहं वा कुम्भकर्णो वा त्वं वा भ्राता विभीषणः। इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम्॥" इत्यत्र वहधातोर्नामयुष्मदस्मत्कर्तृकत्वेऽपि प्रथमपुरुषप्रयोगदर्शनात्। केचित्तु "विदुः" इति न क्रियैक्यं, तथा सति पृथव्यादीनां सर्वेषामेव अन्यानपेक्षप्रमाणत्वप्रतीतिर्न भवति, अपितु कर्तृपदेषु "मुनयः" इत्यस्य बहुत्वमादाय नामविभक्तिः प्रयुक्ता, अन्यत्र तु यथायोग्यं विभक्ति परिणामेन सङ्गतिः कार्या, तथाच त्वं यस्याः माहात्म्यं वेत्थ, वह्निर्वेद, मुनयो विदुः

विद्या वागिव यामसूत भवती, शुद्धिं गतायाः पुर-
स्तस्यास्त्व दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ॥५॥

[नेपथ्ये।] इत इतो भगवतीमहादेव्यौ। (य)

रित्येवमन्वय इत्याह] भवती त्व यां सीतां वाक् सरस्वती देवी विद्यामिव ज्ञानमिव, अथवा—वाग् उपनिषद्रूपा वाणी विद्यामिव तत्त्वविद्यामिव असूत जनयामास, वाक् यथा विद्याम् उद्गिरति तद्वत् त्व निर्दोषां याम् उद्भावयामासिथेत्यथ, हे दारुणे। कठिनहृदये। पुर तव अग्रत एव जगद्व्यापिस्वरूपतया अग्निपरीक्षाचिवे लङ्कायामपि तदानीं तवास्तित्वसत्त्वादिति भाव, शुद्धि शोधन, निर्दोषत्वमिति यावत, गताया प्राप्ताया अग्निपरीक्षाया निर्दोषत्वेन ज्ञाताया अदुष्टाया इत्यथ, ["शुद्धि गताया पुर" इत्यत्र "तदस्तु या दैवतम्" इत्यपि पाठो दृश्यते, तत्रायमथ,— तद्वत् वह्निगङ्गाभास्करवत् या जानकी दैवत देवतारूपतया माननीयेत्यर्थ, अत्र विधेयप्राधान्यात क्लीवत्वम्, देवता एव इति दैवत स्वार्थे अण्, माल्यादिशब्द- वत् क्वचित् स्वार्थिका प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इति स्त्रीलिङ्गस्यापि देवताशब्दस्य स्वार्थिकप्रत्ययान्तस्य क्लीवत्वम्] तस्या तद्रूपाया मूर्त्तिमत् पवित्रता- स्वरूपाया इत्यथ, दुहितु स्वकन्याया अपि सीताया तथा तेन प्रकारेण अनाथाया यथा प्रतीकारचेष्टा विनेवेत्यर्थ, विशसन निर्वासनदण्डेन वने व्याघ्रादिभि प्रतिघातन किं कथ केन प्रकारेणेत्यथ, अमृष्यथा सोढवती, सीता यदि यथायत एव दुश्चरित्रा स्यात्, तदा शास्त्रत कृतापराधाया तस्या एवं निर्वासने तव आनुकूल्य तस्यां कथमपि न सम्भवेत्, परन्तु स्वसमक्षमग्नौ परीक्षितविशुद्धभावाया आसन्न- प्रसवाया स्वसुताया निरपराधत्व चरित्रोत्कर्षञ्च तत्त्वतो विदित्वाऽपि दृष्ट्वाऽपि च पुरत एव ईदृगतिभीषणम् अहेतुकं परिणाम न कथमपि प्रतिविदधिथ इत्यहो भवत्या नैष्ठुर्यम् इति भाव। [अत्र प्रस्तुताया पृथिव्या अप्रस्तुतानां वाग्यादीनाञ्च सर्वेषामेव एकयैव वेदनक्रियया अन्वयात दीपकालङ्कार, तल्लक्षण यथा दर्पणे,— "अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते। अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥" इति, तथा "विद्या वागिव" इत्यत्र श्रौती उपमेत्यनयो परस्परनिरपेक्षतया संसृष्टि, "गङ्गा च यस्या विदु" इत्यर्थ समुच्चयालङ्कारश्च व्यज्यते]। शार्दूलविक्रीडित वृत्तम् ॥ ५ ॥

(य) सीताया निरपराधत्वे वदति नारायणेन "सममुपेत्य वैदेही द्रष्टव्य" इति लोके या वस्तु वर्णितम् अहिता भगवत्यरुन्धतीति यत् कथित, सम्प्रति इत एवा-

जनकः। [दृष्ट्वा।] अये! कञ्चुकिनोपदिश्यमानमार्गा भगवती अरुन्धती। [उत्थाय।] का पुनर्महादेवीत्याह। [निरूप्य।] हा! कथं महाराजदशरथस्य धर्मपत्नी प्रियसखी मे कौशल्या? क एवं प्रत्येति सैवेयमिति। (र)—

आसीदियं दशरथस्य गृहे यथा श्रीः,
श्रीरेव वा किमुपमानपदेन, सैषा।

गच्छन्ती कौशल्योपेता तामेवारुन्धतीं कञ्चुकी गन्तव्यपथं दर्शयन् नेपथ्यादाह, इत इति।—इत इत,—एतस्मिन् एतस्मिन् अध्वनि, अथवा,—इत एतस्मिन् अध्वनि इत आगच्छतं [इण् धातो लट् तस्]। भगवतीमहादेव्यौ—अरुन्धतीकौशल्ये इत्यर्थः, चलतामिति शेषः।

(र) अये इति सम्भ्रमसूचकमव्ययम्, ("अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च" इति मेदिनी)। कञ्चुकिना—तदाख्येन कञ्चुकिना। उपदिश्यमानमार्गा—प्रदर्श्यमानपथा। महादेवीति।—"भगवतीमहादेव्यौ" इति नेपथ्योक्तवाक्यान्तर्गतमहादेवीशब्दः। निरूप्य—पर्य्यवेक्ष्य, हेतुभिर्विचार्य्य वा। हा कथमिति।—अत्र हाशब्दो विषादसूचकः। धर्म्मपत्नी—सहधर्म्मचारिणी [धर्म्मस्य पत्नी इति धर्म्मपत्नी, अश्वघासादिवत् तादर्थ्ये षष्ठीसमासः]। प्रत्येति—विश्वसिति। येयं कौशल्या प्राक् परमानन्दसन्दोहमनुभवन्ती वहन्ती च किमप्यनिर्वचनीयरामणीयकं निर्निमेषमस्माभिरवलोकिता, सम्प्रति असौ नानाविधशोकसन्तप्ता परिक्षीणमलिना क्षतिरिति तां सैवेयमिति प्रत्यभिज्ञातुमपि न पारयामीति भावः।

प्रत्यभिज्ञानायोग्यत्वं दर्शयति, आसीदिति।—इयं परिदृश्यमाना परन्तु अप्रत्यभिज्ञातव्या कौशल्या इत्यर्थः, दशरथस्य सार्व्वभौमायोध्याऽधिपतेः गृहे श्रीर्यथा लक्ष्मीरिव आसीत, रामवनगमनदशरथमरणादेः प्राक् साक्षात् राजलक्ष्मीरिव तत्रातिष्ठदित्यर्थः। औपम्यवाचकस्य यथाशब्दस्य प्रयोगे हि, तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वरूपस्य भेदगर्भस्य सादृश्यस्यावबोधात् राजलक्ष्म्या सह अस्याः भेदोऽवगम्यते इति तदभेदमेव समर्थयितुमाह, श्रीरेव वेति।—वा अथवा उपमानपदेन औपम्यवाचकयथाशब्दप्रयोगेण किम्? उपमाद्योतकयथाशब्देनालमित्यर्थः, उपमानभूतया श्रिया अस्याः अभेदत्वात् भेदगर्भौपम्यवाचकपदप्रयोगो निरर्थक इति भावः। सा लक्ष्मीसदृशी लक्ष्मीभूता वा

कष्टं वतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो ! विपाकः ॥ ६ ॥

एषा कौशल्या, वत हा, कष्टं दुःखम् [अत्र दुःखातिशयद्योतनाय "वत" कष्टम्" इति समानार्थकपदद्वयप्रयोगः] दैववशेन विधिवशेन अननुकूलभाग्ये नेत्यर्थः, दुःखात्मकं दुःखस्वभावं, दुःखरूपेण उपादानेन निर्म्मितमिति यावत्, [दुःखमेव आत्मा स्वभावो यस्य तत् दुःखात्मकं "शेषाद्विभाषा" (५।४।१५४ पा०) इति समासान्तः कप्रत्ययः । "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" इति विश्वः] अन्यद् अपरं मनुष्यातिरिक्तमित्यर्थः, किमपि अज्ञाताश्रुतपूर्वं किञ्चिद् भूतं जीवविशेषः जाता सम्पन्ना । [उद्देश्यविधेयस्थले हि प्रायशः विधेयप्राधान्यस्य सिद्धान्तितत्वेऽपि "उद्देश्यविधेययोरुद्देश्यवचनत्वमाख्यातस्य" इति काशिका-वचनात् आख्यातपदेन प्रधानक्रियायाः बाधाच्च अत्र आख्याते उद्देश्यप्राधान्य स्वीकारेण जातेत्यत्र स्त्रीत्वमिति बोध्यम्] । अहो ! विपाकः दशापरिणामः, अस्याः एवम्भूतः शोचनीयपरिणामः न काऽपि मनसा अपि अचिन्तयदिति भावः । [अत्र प्रथमपादे उपमाऽलङ्कारः, सा च यथाशब्दद्योतिततया श्रौती । द्वितीयपादे च रूपकं, प्रतिपक्षभूत कौशल्यारूपे उपमेये भूतरूपस्य उपमानस्य तादात्म्यारोपात् । न चात्र शब्देन विषयिणा अभेदाध्यवसानेन कौशल्यारूपस्य विषयस्य अध-करणात् अतिशयोक्तिरेव युक्तेति वाच्यं, रूपकातिशयोक्त्योः अन्योन्यभेदव्यवस्थाप-नार्थं हि रूपकलक्षणान्तर्गतविषयदलं वाच्यत्वविशेषणस्य आवश्यकत्वम्, अन्यथा लतानूत्न लोना हरिणपरिहीणा हिमकरः स्वयं हाराकारा गलति जलधारा कुवलयात् । धुनाति बन्धूकं तिलकुसुमजन्मा हि पवनो बहिद्वारे पुष्पं परिणमति कस्यापि कृतिनः ॥' अत्र अतिशयोक्तिस्थले रूपकलक्षणस्यातिव्याप्तिः, निरपह्नव-विषये मुखादौ निष्कलङ्कचन्द्राद्युपमानतादात्म्यारोपात् । रूपकलक्षणे विषये वाच्यत्वविशेषणदाने तु अत्र विषयस्य मुखादेरवाच्यतया न रूपकलक्षणस्य अति व्याप्तिः । एवञ्च प्रकृते इयम्" इत्यनेन आरोपविषयस्य शब्दतः कथनं नातिशयोक्तिः, अपितु रूपकमेवेति सुधियः स्वाधिया पर्यालोचयन्तु । एवम् अनिष्टस्य कौशल्याया दशरथस्य सकलकल्याणनिदानत्वस्य वैलक्षण्यं [illegible] इत्यनेन पूर्वोक्तश्लोकाद्यस्य [illegible] समानतया [illegible] कष्टं वतान्यदिव इत्यत्र [illegible] च श्लेषमल-[illegible] वसन्ततिलकं वृत्तम् ॥ ६ ॥

अयमपरप्रायो दशाविपर्य्यासः। (ल)
य एव मे जनः पूर्व्वमासीन्मूर्त्तो महोत्सवः।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम्॥ ७॥

(ल) अयम्—अनुभूयमानः, कौशल्यया सह साक्षात्काररूपः। अपरप्रायः,—बाहुल्येन अपरः अन्यथाभावप्राप्त इति यावत्। ["अपरः प्रायः" इति पाठे—अपरभावं गत इत्यर्थः, प्रपूर्वात् गत्यर्थात् इण्धातोरच्। "अपरः पापः" इति च पाठे—पापः जन्मान्तरीणपापकारणकः अधर्म्मजन्य इत्यर्थः, अयं पुनरपरः पापहेतुकः अवस्थान्तरोपपात इति समुदितार्थः]। दशाविपर्य्यासः,—अवस्थावैकल्यं, विपरीतावस्थासमागम इत्यर्थः, जात ममेति शेषः, इतः पूर्वं केवलमहं सीतायाः सापवादनिर्वासनवृत्तान्तश्रवणेन नियतमन्तर्दाहं दग्धः, साम्प्रतन्तु आवयोः परस्परसन्दर्शनेन समुद्बोधितपूर्व्वस्मृततया भीषणदावदाहसदृशोऽयमपरविधोऽन्तर्दाहः समुत्पन्न इति भावः।

उक्तमवस्थाविपर्य्यासमेव कथयति, य इति। य एव कौशल्यारूपः जनः पूर्वं सीतायाः निर्वासनात् तथा प्रियसखस्य दशरथस्य परलोकगमनाच्च प्रागित्यर्थः, मे मम सम्बन्धे मूर्त्तः शरीरी दर्शनादिना अतिशयानन्दजनकत्वात् मूर्त्तिमानित्यर्थः, महोत्सवः परमानन्दसन्दोह इवेत्यर्थः, आसीत् बभूव, रामेण दुःसाध्ये धनुर्भङ्गे साधिते सत्वगुणगणवरेण्याय धन्याय तस्मै स्वसुतापणभूतां सीतां समर्प्य दशरथकौशल्यादिभिः वैवाहिकादिसम्बन्धेन मिलिता जनकः सांसारिकसुखसम्पदः परां कोटिमुपभुञ्जानः यस्याः कौशल्यायाः दर्शनं महोत्सवमिवाजीगणदिति भावः। तस्य एव प्रियदर्शनस्य जनस्य दर्शनं साक्षात्कारः क्षते शरीरस्य निकृत्तस्थाने स्फुटितव्रणादौ वा क्षारं लवणमिव ("क्षारो रसान्तरे धूर्त्ते लवणे काचभस्मनोः" इति मेदिनी) असह्यं अत्यन्तदुःखजनकत्वात् सोढुमशक्यं [सह्यते यत् तत् सह्यं, न सह्यम् असह्यं "शकिसहोश्च" (३।१।९९ पा०) इति सहर्यत्प्रत्ययः] जातं सवृत्तम्। [अत्र प्रथमार्द्धे निरपह्नवावयवे कौशल्यारूपे जने महोत्सवतादात्म्याध्यासात् रूपकं, तत्रापि अत्यन्तासम्भवस्य मूर्त्तत्वरूपस्य वैशिष्ट्यस्य आरोपणात् अधिकारूढवैशिष्ट्यरूपकम्, तथा द्वितीयार्द्धे उपमा चेत्यनयोः परस्परनिरपेक्षतया संसृष्टिः। केचित्तु अत्र विरूपयोः सङ्घटनात् विषमालङ्कारोऽपीत्याहुः]। अनुष्टुप् वृत्तम्॥ ७॥

[ततः प्रविशति अरुन्धती कौशल्या कञ्चुकी च।]

अरु। ननु ब्रवीमि, द्रष्टव्यः स्वयमुपेत्य वैदेह इत्येष व कुलगुरोरादेशः, अत एवाह प्रेषिता, ततः कोऽयं पदे पदे महान् अनध्यवसायः ? (व)

कञ्चुकी। देवि। संस्तम्भयात्मानम्। अनुरुध्यस्व भगवतो वसिष्ठस्यादेशमिति विज्ञापयामि। (श)

(व) ननु—भो, कौशल्यामुद्दिश्य एतदामन्त्रणम्। स्वयम्—आत्मना, न तु प्रतिनिधिप्रेरणेनेत्यर्थः। उपेत्य—उपगम्य। वैदेहः,—विदेहराजो जनक इत्यर्थः। द्रष्टव्यः—साक्षात्कर्त्तव्यः। कुलगुरोः—वशिष्ठस्य। आदेशः,—आज्ञा। अत एव—स्वयं गत्वा साक्षात्कर्त्तव्यत्वादेव। अहम्—अरुन्धती, [स्ववाक्ये अस्मच्छब्दप्रयोगेण आज्ञायकस्य गुरुत्वं सूचितम्]। प्रेषिता—प्रेरिता युष्मत्कुलगुरुणेति शेषः, असहायाया कुलवध्वास्तव अन्यसाहचर्य्यमन्तरेण यत्र कुत्रापि गमनानौचित्यात् तत्साहचर्य्यसम्पादनार्थं भर्त्तृप्रेषिताऽहमागतेति भावः। ततः,—कुलगुरोरादेशस्य अनुपेक्षणीयत्वादित्यर्थः। पदे पदे—प्रतिपादविक्षेपम् [अत्र 'नित्यवीप्सयोः" (८।१।४ पा०) इति वीप्सायां द्विर्वचनम्]। महान्—अतिशयः, स्थेयानिति यावत्। अनध्यवसायः,—अनुद्यमः, वैवाहिकदर्शने महती अनभिमतिरिति यावत्, [अत्र "महानध्यवसायः" इति पाठे—अस्मासु स्थितास्वेव तत्कन्याया एव दशापरिणामात् कथं तस्य अग्रतः वर्त्तिष्ये इति पदे पदे एव अवस्थानोद्योग इत्यर्थः, यद्वा—'महानध्यवसायः" इत्येकं समस्तपदं वैदेहदर्शने अल्पानिश्चय इत्यर्थः]।

(श) आत्मानम्—मनः, हृदयमिति यावत्, ("आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि' इति मेदिनी)। संस्तम्भय—धैर्य्यावलम्बनेन स्थिरीकुरु। अनुरुध्यस्व—अनुसर, आत्मानं निगृह्य वसिष्ठस्य आदेशं प्रतिपालयेत्यर्थः, अभ्युपेत्य वैदेहं पश्यन्ती तत्र सम्भावयेति यावत्। दशरथान्तःपुरचारिणः वृद्धस्य [illegible] कञ्चुकिनः वचनमिदम्। कञ्चुकिलक्षणं यथा—"अन्तःपुरचरो वृद्धो विप्रो [illegible]। [illegible] कञ्चुकीत्यभिधीयते। जरावैक्लव्ययुक्तेन विशेद् [illegible] कञ्चुकी॥" इति।

कौशल्या। ईदिसे काले मिहिलाधिवो दट्टव्वो त्ति समं ज्जेव सव्वाइं दुक्खाइं समुब्भवन्ति। ण सक्कणोमि उव्वत्तमाणमूलबन्धणं हिअअं अवत्थावेदुं।* (प)

अरु। अत्र कः सन्देहः? (स)—

सन्तानवाहीन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि।
दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव सम्प्लवन्ते॥ ८॥

---

* ईदृशे काले मिथिलाधिपो द्रष्टव्य इति सममेव सर्वाणि दुःखानि समुद्भवन्ति। न शक्नोमि उद्वर्त्तमानमूलबन्धनं हृदयमवस्थापयितुम्।

(प) स्वस्था जीवन्त्यामेव तनुजायां सर्व्वजनसमक्षमेव सापवादनिवासनेन स्वां सापराधामिव मन्यमाना कौशल्या स्वगमने पदे पदे अनध्यवसायनिदानं स्वयं विवृणोति, ईदृश इति।—ईदृशे—रामारण्यवास पतिनाश स्नुषाविवासनादभिरति दारुणे। सममेव—दुःखकारणानां पौर्वापर्य्येऽपि युगपदेव। दुःखानि—रामारण्यवासादीनि कष्टानि। समुद्भवन्ति—उद्वेल्लन्ति, समुद्भूय मे मर्म्म पीडयन्तीति यावत्। उद्वर्त्तमानमित्यादि।—उद्वर्त्तमानम् उत्पाटितं मूलबन्धनं यथास्थानावस्थितिहेतुभूतं प्रधानबन्धनं यस्य तत् तथोक्तम्, दुःसहदुःखझटिकासवेगाच्छिन्नबन्धनमिति यावत्। हृदयं—मनः। अवस्थापयितुं—यथास्थं संस्थापयितुमित्यर्थः। न शक्नोमि—न प्रभवामि, न समर्थाऽस्मीत्यर्थः। [उद्वर्त्तमानेत्यत्र उद्वहमानेति पाठे—उद्वहते उद्वेल्लतीति उद्वहमानं उद्वल्लत् वेगादुच्चलितमित्यर्थः]।

(स) अत्र—अस्मिन्, प्रेयसि जने दृष्टे सकलक्लेशोद्भवरूपे विषये इत्यर्थः। कः सन्देहः,—का विप्रतिपत्तिः, त्वदुक्तं यथार्थमेव—"स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते" इति भावः।

सम्प्रति श्लोकेन निःसन्देहत्वमेव विवृणोति, सन्तानेति।—मानुषाणां मानवानां [मनोरपत्यानि इति मानुषाः, मनुशब्दात् "मनोर्जातावञ्यतौ षुक् च" (४।१।१६१ पा०) इति ढञ्प्रत्ययः षुगागमश्च, पक्षे मनुष्याः] सन्तानेन धारावदविच्छेदेन वहन्ति प्रवर्त्तन्ते इति सन्तानवाहीनि धारावाहीणि अविरतमन्तःकरणे प्रवहमाणानीति यावत्, सतः आदृतस्य परमप्रेमास्पदस्येति यावत्, [सन्निति शतृप्रत्ययान्तस्य अस् धातो रूपम्। बन्धौ सद्विशेषणदानेन असद्बन्धुवियोगे दुःखाभावः सूचितः। "सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सन्" इत्यमरः] बन्धोरात्मीयजनस्य पुत्रभ्रात्रादे

कौशल्या। कहं वच्छाए वहूए एव्व गदे तस्स राएसिणो मुहं दंसेह्मि ? ७ (ह)

७ कथं वत्साया वध्वा एवं गते तस्य राजर्षेः मुखं दर्शयामि ?

[सुयासौ अनुयोति सहस्र तस्येति विग्रहे 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' (२।१।६१ पा०) इति कर्म्मधारय समासः। बध्नाति मनः स्नेहादिनेति बन्ध्धातोः औणादिकेन उप्रत्ययेन बन्धुरितिपदं सिद्धम्] वियोगाद् विच्छेदाद् जायन्ते उत्पद्यन्ते यानि तथोक्तानि प्रियजनविप्रयोगजन्मानि दुःसहानि असह्यानि दुःखानि कृच्छ्राणि प्रेयसि प्रेमनिलये आत्मीये इत्यर्थः, [अयमनयोरतिशयेन प्रियः इति विग्रहे प्रिय-शब्दात् द्वयोरेकोत्कर्षे "द्विवचनविभज्योपपदे तरबीयसुनौ" (५।३।५७ पा०) इति ईयसुन्, ततश्च "प्रियस्थिरस्फिरोरुबहुल—" (६।४।१५७ पा०) इति प्रियस्य प्रादेशः, एकस्वरत्वात् अकारलोपाभावश्च] जने दृष्टे साक्षात्कृते सति स्रोतःसहस्रैरिव सहस्रधाराभिरिव सुप्लवन्ते उच्छलन्ति सीमानमतिक्रम्य ऊर्द्ध्वं चलन्तीत्यर्थः, हृदयनाच्छाद्य शोकस्य प्रादुर्भावो भवतीति भावः। अस्यानुरूपोक्तिर्यथा कुमारसम्भवे —"स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते" इति। [अत्र प्रकृते धारावाहिकदुःखावेगे प्रवाहसहस्रसम्प्लवसम्भावनात् उत्प्रेक्षा नाम अलङ्कारः, सा च इवशब्दोत्थापिततया वाच्या, तथा सम्प्लवात्मकक्रियारूपभावपदार्थसम्भावनात् भावाभिमानिनी चेति एवं 'सन्तानवाहिन्यपि' इत्यत्र अपिशब्देन उत्थापितः विरोधालङ्कारश्च तथाहि मुहुः सहनपि दुःखादिकं धारावाहिकरूपेण अनुभूयते चेत्, तदा कालेन तत् सुसहमेव जायते इति हि स्वभावः, अत्र तु दुःखानां सन्तानवाहित्वेऽपि दुःसहत्वकथनाद् विरोधः। स च चिरानुभूतदुःखस्य सुसहत्वेऽपि प्रियजनसमागमे पुनर्नवीनततया दुःसहत्वात् अपनेतुं शक्यते। एवञ्च—"अत्र समुच्चयरूपप्रयोजनस्य असत्त्वेऽपि अपिशब्दप्रयोगाद् वाचकपदत्वदोषः" इति प्रत्युक्तं, तस्मात् विरोधद्योतकतया सार्थकत्वादिति विभावनीयम्। इन्द्रवज्रा वृत्तम्॥ ८॥

(७) वत्साया,—स्निग्धाया इत्यर्थः। वध्वाः,—स्नुषायाः। एवम्—इत्थम्। गते—प्राप्ते, एवं भूतायाम् अतिदारुणायां दशायामुपस्थितायां सत्यामित्यर्थः। राजर्षेः,—मुनिव्रतावलम्बिनः नरपतेर्जनकस्य, [अत्र "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" (१।४।३२ पा०) इति चतुर्थ्याप्राप्तौ सम्बन्धमात्रविवक्षया षष्ठी]। कथं मुखं दर्शयामि,—आननं प्रकाशयामि ? निष्कारणसुहृदस्मिन्यो विवाहयतो रामस्य माता अहं तस्मा एव [illegible] आननं प्रकाशयितुं सम्प्रति नितरां लज्जे इति भावः।

अरु।—एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ॥ ९॥

कौशल्या। एसो सो महाराअस्स हिअआणन्दो वच्छाए .

क एष स महाराजस्य हृदयानन्दो वत्साया वध्वाः पिता राजर्षिः॥

कौशल्याकञ्चुकिभ्यामुपेता जनकसमीपमागच्छन्ती अरुन्धती तत्समुचितसमये जनकं दूरत साङ्गुलिनिर्देशं दर्शयन्ती आह, एष इति।—एष पुरोवर्त्ती वो युष्माकं श्लाघ्य अतिप्रशस्य सम्बन्धो यस्य वैवाहिकसम्बन्धवानित्यर्थः, [श्लाघ्यश्चासौ सम्बन्धी चेति श्लाघ्यसम्बन्धीति नीललोहितादिवत् विशेषणसमासः] जनकानां जनकवंशीयानां कुलस्य वंशस्य उद्वहः प्रवर्त्तकः, कुलश्रेष्ठ इत्यर्थः, तन्नाम्नैव वंशस्य प्रवर्त्तितत्वादिति भावः, वर्त्तते इति शेषः, [उत् ऊर्द्ध वहति प्रापयति इति व्युत्पत्त्या उद्वहस्य श्रेष्ठार्थत्वम्। पचादित्वाद् अच्प्रत्ययः] यस्मै अस्मै जनकाय यं जनकम् अभिप्रेत्य इत्यर्थः [अत्र "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" (१।४।३२ पा०) इति सम्प्रदाने चतुर्थी] याज्ञवल्क्यो याज्ञवल्क्य इति नाम्ना प्रसिद्धः संहिताकारः मुनिः "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते॥" इत्युक्तलक्षणः तपस्वी, परम् अयनं प्रतिपाद्यमिति परायणं, तदेव इति पारायणं [स्वार्थे अण्प्रत्ययः] ब्रह्म ईश्वर एव पारायणं प्रधानप्रतिपाद्यं यस्य शास्त्रस्य तत्, वेदमित्यर्थः, जगौ कथयामास, उपदिदेश इति यावत्, यद्वा—ब्रह्म वेदम् इति द्वितीयान्तं पदम्, पारे अयनं गमनं यस्मिन् कर्म्मणि तद् यथा स्यात् तथा समाप्तिपर्य्यन्तमित्यर्थः, जगौ कथयामास इत्यन्वयः। अथवा—पारं समाप्तिम् अयते अनेनेति पारायणं समस्ताश्च ब्रह्मणो वेदस्य पारायणं सकलं वेदमित्यर्थः, पूर्ववत् जगावित्यनेनान्वयः। जनकयाज्ञवल्क्यसंवादः यथा बृहदारण्यकोपनिषदः पञ्चमाध्यायस्य प्रथमत एव—"जनको वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव,कः स्विदेषां ब्राह्मणानामनूचानतम इति स ह गवां सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः। तान् होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति। ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाच एताः सोम्योदज सामश्रवा३ इति" इति। अनुष्टुप् वृत्तम्॥ ९॥

(क) महाराजस्य—स्वामिनो दशरथस्य। हृदयानन्दः,—चित्ताह्लादहेतुः, [हृदयमानन्दयति यः स हृदयानन्दः आनन्दयतेः पचाद्यच्]। वध्वाः,—स्नुषायाः

अह्मण पिदा राएसो ॥ हद्धी । हद्धी । सम्भाविद म्हि अणुवट्ठिद-महूसवे दिअहे । हा देव्व । सव्व ज्जेव त णत्थि । * (क)

जनक । [उपसृत्य]। भगवति अरुन्धति । वैदेहः सीर-ध्वजोऽभिवादयते । (ख)—

यया पूतम्मन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणा गुरुतमः।

हा धिक् । हा धिक् । सम्भाविता अस्मि अनुपस्थितमहोत्सवे दिवसे, हा देव । सर्वमेव तन्नास्ति ।

सीताया । अनुपस्थितमहोत्सवे—सीतापरित्यागेन अनुपस्थित' विलय गत, महोत्सवो यस्मिन् तादृशे काले । सम्भाविता—स्वयमुपस्थित्या साक्षात्करणात् सम्मानिता, सीताया पुत्रत्वात् परनुपस्थितमहोत्सवे दिवसे अनेनाहम् आगमनाऽऽदिना सम्भाविता भविष्यामीति विपुलाऽऽशया वञ्चिताऽह सम्प्रति शोकजनकव्यापारात् पर दु खमये दिवसे अतिविश्वेनैवामुना राजर्षिणा दर्शनादिना जनितगौरवाऽस्मीति भाव । सर्व्वमेव तन्नास्ति—आह्लादकर सर्व्वमेव मे सम्प्रति न वर्त्तते, यत स महाराजो दिवङ्गत, सीता सम्भावितपुत्राऽपि मे वधू नास्ति, रामादिरपि शोकसभिन्नहृदय नात्र वर्त्तते, तत् कुतो मे एवविधाया सम्भावन-नित्याशय ।

(ख) वैदेह —विदेहदेशाधिपति । सीरध्वज,—सीर लाङ्गल, ध्वजे यस्य स तथोक्त, लाङ्गललाञ्छितध्वजइत्यर्थ, ("सीरोऽर्कहलयो पुसि" इति मेदिनी)। अभिवादयते—नमस्करोति, त्वामिति शेष ।

[illegible] पातिव्रत्यादिधर्मयोगात सातिशयपूतस्वभावतया त्रिभुवनवन्दनीय-त्वम'वेदयति, ययेति ।—पवित्रस्य अतिविशुद्धस्य, त्रिलोकोपावनस्येत्यर्थ, महस' [illegible], [illegible] तप सिद्धेरिति यावत्, निधिरपि आस्पदमपि, तथा, [illegible] [illegible]नानाम्, आद्यानामिति यावत, गुरूणा श्रेष्ठाना, सप्तर्षीणामित्यभिप्राय, [illegible] प्रधानगुरुत्वेनाभिमत, (सप्तर्षिमण्डलेषु अस्यैव महर्षे [illegible] इति [illegible]) ते तव, पति स्वामी, वसिष्ठ इत्यर्थ, [illegible] नाम पूत मन्यते, ["आत्ममाने—" (३२८३ पा०) [illegible] "[illegible]—" (६२८७ पा०) इति मुनागमश्च] खलु नूनम्,

त्रिलोकीमङ्गल्यामवनितललोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ १० ॥

अरु। परं ज्योतिस्ते प्रकाशताम्, अथ स त्वा पुनातु देवः परोरजाः, य एष तपति। (ग)

समाप्तेषु प्रकरणस्य महार्णवमिवास्य पूतनमत्र त्वयैव सुसम्पन्नमिति भावः। त्रिलोकीति।—त्रयाणां लोकानां समाहारः त्रिलोकी, तस्याः मङ्गल्यां मङ्गलाय हितां, [मङ्गलात् हितार्थे यत्प्रत्ययः] त्रिभुवनमङ्गलकारिणीमित्यर्थः, जगद्वन्द्यां सर्व्वलोकपूज्याम्, विशेषणद्वयमेतदुषस्यपि योज्यम्। भगवतीं षडैश्वर्य्यशालिनीं, भवतीमिति शेषः, देवीम् उषसमिव प्रातःसन्ध्याऽधिष्ठात्रीं देवतामिव, [ननु उषःशब्दस्य नित्यक्लीबत्वं मेदिन्याममरे च दृश्यते, "उषः प्रत्युषसि क्लीवम्" इति मेदिनी, "प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि" इत्यमरः, तथा च कथमत्र स्त्रीत्वमिति चेदत्रोच्यते,—उषःशब्दस्य कालमात्रवाचित्वे तु क्लीबत्वं, प्रातरधिष्ठातृदेवतावाचित्वे तु स्त्रीत्वमिति, उषाः प्रातरधिष्ठात्री देवता इति टीकितं,—"प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः। "उषः प्रत्युषसि क्लीवं विदुःसन्ध्यायां योषिति" इत्यमरटीका च। वाचस्पत्येऽपि स्त्रीत्वमस्याऽऽम्नातमित्यवधेयम्] अवनितललोलेन—अवनेः भूमेः, तले पृष्ठे, लोलेन चञ्चलेन, लुठितेनेत्यर्थः, भूतलनिपतितेन इति यावत्, शिरसा मूर्द्ध्ना, वन्दे प्रणमामि। उषःपक्षे,—महसां निधिः सूर्य्य इति प्रत्येतव्यम्, अन्यत् समानम्। [उषोदेवीं यथा भूमितलस्पर्शिशिरसा सर्व्वेऽभिवादयन्ते, तथा जगद्वन्द्यां भगवतीमपीति देव्या उषसा सहारुन्धत्या अवैधर्म्यसाम्योपदेशात् श्लेषानुप्राणिता पूर्णोपमाऽलङ्कारः]। शिखरिणी वृत्तम् ॥ १० ॥

(ग) परं—प्रधानं, ज्योतिः,—ब्रह्माख्यं तेजः, परब्रह्मेत्यर्थः, ते—तव, प्रकाशताम्—आविर्भवतु, ब्रह्मज्योतिःसाक्षात्कारस्ते भूयादिति भावः। अथ—प्रत्यक्षीभूत इत्यर्थः, सः,—प्रसिद्धः, देवः,—सूर्य्य इति यावत्, परोरजाः,—रजसः,—रजोगुणात्, परः,—अतीतः। [राजदन्तादित्वात् परशब्दस्य पूर्व्वनिपातः, पारस्करादित्वात् सुट् च निपात्यते] रजोगुणेनास्पृष्टः, विशुद्धसत्त्वगुणसम्पन्न इति यावत्। त्वा—भवन्तं, पुनातु—पवित्रीकरोतु, [आशिषि लोट्]। यः एषः,—सर्व्वप्रत्यक्षगोचर इत्यभिप्रायः, तपति—तापनेन जगत् पवित्रीकरोति, अपूतस्य ब्रह्मज्ञानोदयासम्भवादित्यभिप्रायः। "य एवासौ तपति, तमुद्गीथमुपासीत" (छान्दो० १ अध्याय ३ खण्ड० १ मन्त्र) इति छान्दोग्ये उद्गीथरूपतया आदित्यस्यैवोपासना विहितेति ज्ञेयम्।

जनकः। आर्य्य गृष्टे! अपि कुशलमस्याः प्रजापालस्य मातुः? (घ)

कञ्चुकी। [स्वगतम्]। निर्विशेषमतिनिष्ठुरमुपालब्धाः स्म। [प्रकाशम्]। राजर्षे! अनेनैव मन्युना अचिरपरित्यक्त-रामभद्रमुखचन्द्रदर्शना नार्हसि त्वं दुःखयितुमतिदुःखिता देवीम्। रामभद्रस्यापि दैवदुर्नियोगः कोऽपि, यत् किल

(घ) आर्य्य!—माननीय!, एतच्च वर्षीयस्तया समादराऽतिशय्यप्रदर्शनार्थमेतत्। गृष्टे!—कञ्चुकिन्! गृष्टिरिति कञ्चुकिनो नामेति ज्ञेयम्। अपि—प्रश्ने। प्रजापालस्य—प्रजाः पालयति [इति पालयतेः "कर्मण्यण्"(३।२।१ पा०) इति कर्त्तरि अण्] तस्य रामस्येत्यर्थः, केवलं प्रजाः पालयति, न तु पत्नीमिति तु व्यङ्गार्थः। मातुः,—जनन्याः, कौशल्याया इत्यर्थः। कुशलम्?—शुभम्? ["चतुर्थी चाशिष्यायुष्य—" (२।३।७३पा०) इति आशिषि पाक्षिकी षष्ठी]। प्रजारञ्जनार्थमेव स्वदुहितुः सीतायाः रामेण परित्यागात् स्वश्लाघ्यसम्बन्धस्यापरिगणनेन हेतुना जनकेनैवमौदासीन्यविषया परिपृष्टमित्यवधेयम्। प्रोक्तवचसा जनकेन रामे कौशल्यायाञ्च महान् विरागो व्यक्तीकृत इति ज्ञेयम्।

(ङ) निर्विशेष—निः,—नास्ति, विशेषः,—भेदो यस्मात् तत्, अननुरूपमेवेत्यर्थः, अतिनिष्ठुर—निरतिशयकठोरम्, अतिपरुषाचरमिति यावत्। उपालब्धाः स्म,—तिरस्कृता भवाम। राजर्षे जनकस्य प्रोक्तवचसा वयं सर्वे समभेवाधिक्षिप्ताः, यतः "प्रियसखि! कुशलं ते" इति साक्षादसम्बुध्य मत्समीपे प्रोक्तसोल्लुण्ठनवचनमुदीरितमित्यभिप्रायः। राजर्षे!—जनक!, अनेनैव मन्युना—सीतानिर्वासनजनितेन शोकेन क्रोधेन वा। अचिरेति।—अचिरं त्वरितं, त्यागवार्त्ताश्रवणोत्तरक्षण एवेत्यर्थः, परित्यक्तं परिहृतं, रामभद्रस्य रघुनाथस्य, मुखचन्द्रस्य दर्शनम् अवलोकनं यया तादृशी, सीताविवासनेन भवानिव इयमपि नितरां निर्विण्णा जाता, तेनेयं स्वपुत्रमुखमपि एतावन्तं कालं नानुपश्यति इत्यभिप्रायः। अतिदुःखिता—सञ्जातप्रबलदुःखा, दुःखयितुं—सुदुःखितां कर्तुमित्यर्थः, ["तत्करोति—" (ग०) इति णिचि तुमुन्] दुःखितायाः पुनः दुःखोत्पादनं न कर्त्तव्यमेवेति भावः। नार्हसि—न युज्यसे, अतः क्रोधेनेदृशोल्लुण्ठवाक्यात् विरमेत्यभिप्रायः। अथ भगवतः रघुनाथस्यापि निर्दोषतां प्रतिपादयति, रामेत्यादिना।—दैवदुर्नियोगः,—जन्मान्तरोपार्जितदुर्दैवविलसितं,

समन्तात् प्रवृत्तबीभत्सकिंवदन्तीका पौरजानपदा नाग्निपरिशुद्धिमप्यल्पकाः प्रतियन्ति, इत्यतो दारुणमनुष्ठितम्। (ङ)

जनक। आः! कोऽयमग्निर्नाम अस्मत्प्रसूतिपरिशोधने।। कष्टम्! एववादिना जनेन रामपरिभूता अपि वयं पुनः परिभूयामहे। (च)

अरु। [निश्वस्य]। एवमेतत्, अग्निरिति वत्सां प्रति परिलघूनि अक्षराणि, सीतेत्येव पर्य्याप्तम्। हा वत्से। (छ)—

मित्यर्थ। यत्—यस्मात्, दुर्दैवनियोगादिति यावत्। समन्तात्—सर्व्वत्र। प्रवृत्तेति।—प्रवृत्ता प्रचरिता, बीभत्सा जुगुप्सिता, किंवदन्ती जनापवाद, कौलीनमिति यावत्, येभ्य ते। ["नद्युतश्च" (५।४।१५३ पा०) इति कप्प्रत्यय] सीताऽलीकापवादजल्पका इत्यर्थ। अल्पका,—नीचाऽऽशया, पौरजानपदा,—पुरवासिन अयोध्याप्रदेशवासिनश्च। अग्निपरिशुद्धिमपि—अग्निना विशोधनमपि, आग्निपरीक्षया प्रमाणितनिर्दोषतामपीति यावत्। न प्रतियन्ति—न विश्वसन्ति, सुदूरलङ्कापुरे एतस्यानुष्ठानादित्यभिप्राय। अत,—अनेनैव हेतुना, दारुण—भीषण, निर्वासनरूप मर्म्मभेदि कर्म्मेति यावत्, अनुष्ठितम्—आचरितं, रामभद्रेणेति शेष। अत दुर्दैवविलासं विभाव्य मन्युं परिहरतेति वाक्यार्थ।

(च) आः।—इति अमर्षसूचकमव्ययम्। ("आः स्यात् कोपप्रपीडयो" इत्यमर) कोऽय—न शक्तिमानित्यर्थ, पावनताविधाने अस्मत्प्रसूतिसमीपे सोऽतिलघुरिति भाव। एववादिना—"अग्नौ सीताया शुद्धि" इत्येव वाक्य वदतेत्यर्थ, जनेन—कञ्चुकिना, अयोध्यावासिना च नीचलोकेनेति यावत्। रामपरिभूता,—रामेण परिभूता, चारित्रदोषापवादेन सीताया निर्वासनात् अवमानिता इत्यर्थ। परिभूयामहे—परिभूता स्म। सीतायास्त्यागात् विशेषतस्तु सापवादत्यागादत्यन्तमवमानिता वय रामेण, सम्प्रति प्रसूतिपरिशोधनरूपमेवम् असह्य वाक्य वदता जनेन पुनरपि विशेषत लाञ्छिता भवाम, प्रति नु समुदिताश्च।

(छ) एवमेतत्—भवता यदुदीरित, तत् सर्व्वथैव सत्यमिति भाव। स्वयमपि प्रागुक्तवाक्यस्य सत्यता प्रमाणीकरोति, अग्निरित्यादिना।—वत्सां प्रति—वत्सायाः सीताया सम्बन्धे, तया सह तुलनयेति यावत्, अग्निरिति—अग्निनाम, परिलघूनि—अतिक्षुद्राणि, अक्षराणि—भावाभिव्यञ्जकवर्णा। अग्निरिति वर्णमात्रोच्चारणा

शिशुर्वा शिष्या वा यदसि मम तत् तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।

न्येव भवन्ति, न तु अथप्रकाशकानि भवन्ति, महातेजस समीपे अल्पतेजस इव तव अग्रेस्तेजो न स्फुरति, अत परिशुद्धिविषये सीतासमीपे आर्यारति नामापि न वक्तव्य, सीतायास्तस्य हीनत्वादिति भाव। सीतेत्येव पर्य्याप्त—तेन हि शुद्धिविषये सीतेति वर्णोच्चारणेनैव सम्यक्, एवञ्च सीता इति वर्णानामुच्चारणेनैव सर्वं पवित्र स्यात्, का तस्या सामान्यपावनान्तरेण शुद्धि? इति भाव.। हा वत्से।—हे सीते। (वक्ष्यमाणश्लोकेनान्वय)।

अथ जातिवयोगुणेषु गुणानामेव प्राधान्यमभिधाय सीताया शुद्धिसत्तमत्व प्रतिपादयति, शिशुर्वेति।—त्व शिशुवा अल्पवयस्का बालिका वा, मम शिष्या वा अन्तेवासिनी वा, उपदेष्टव्या वेत्यथ, असि भवसि, यत् यादृशी एव, भवसि इति शेष, तत् शिशुत्व शिष्यत्व वा, तथा तादृगेव, तिष्ठतु वर्त्तताम्, त्व मत्समीपे प्राक् यादृशी आसी, इदानीमपि तथैव तिष्ठ, नाहमधुना तव शिशुत्वविषये शिष्यत्वविषये वा कमपि विपर्य्यय साधयितुमिच्छामीति भाव, नन्वेवञ्च सति विशेषज्ञाना शिशौ शिशुत्वबुद्धे, शिष्ये च शिष्यत्वबुद्धे सदा सत्स्थापनमेवोचित, तत् कथमधुना सम्यगिति नाभिमन्यसे, इत्यपेक्षायामाह, विशुद्धेरिति।—विशुद्धे पवित्रताया, निर्द्दोषताया इति यावत, उत्कर्षस्तु अतिरेक एव, स्वत शुद्धिरूप इति यावत्, त्वयि भवत्या, मम मे, भक्तिम् अनुराग, द्रढयति सुदृढा करोति, वर्द्धयतीत्यथ, कनीयस्यां शिष्यायामपि पतिव्रताकुलशेखरभूताया त्वयि समधिका पवित्रता विलोक्य विह्वलीभूताया ज्यायस्या गुरुपत्न्या अपि मे अकपटा भक्ति समुदेतीति समुदितार्थ। न केवल मम, अपि तु युगपदेव सर्वेषा निरवद्या भक्ति त्वयि समजनि इत्याह, शिशुत्वमिति।—शिशुत्व शैशव, स्त्रैण वा स्त्रीत्व वा, भवतु अस्तु, तवेति शेष, एतावता न हि ते पूज्यत्वहानि भवितुमर्हतीति भाव, जगत विलोक्या, वन्द्याऽसि पूजनीयाऽसि, अतिविशुद्धियोगादिति भाव। ननु खलु, निश्चितमेवेत्यथ। स्त्री अपि शिशुरपि, कथ जगद्वन्द्याऽसि? इत्येतत् प्रदर्शयितुमर्थान्तर न्यस्यति, गुणा इति।—गुणा पातिव्रत्यशालीनत्वादिधर्म्मा, पूजास्थान पूजाया अर्हाया, सनादरस्येति यावत्, स्थानम् आस्पद, गुणा हि पूज्यत्वविधायका भवन्तीति भाव, गुणिषु तत्तद्गुणसमन्वितेषु, लिङ्ग स्त्रीत्वपुंस्त्वादिक चिह्न, न च न हि, वय, बाल्यकौमारादिकम्, अल्पवदल्प प्रवयस्त्व वेत्यथ, न च नैव, पूजास्थान

शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्याऽसि जगतो
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥ ११ ॥

कौशल्या। अम्मो ! उम्मीलन्ति वेअणाओ । * (ज)

[इति मूर्च्छति] (झ) ।

जनकः । हा कष्टं ! किमेतत् ? (ञ)

अरु। राजर्षे ! किमन्यत् ? (ट)—

* अहो ! उन्मीलन्ति वेदनाः ।

भवेदिति शेषः । पुंस्त्वजरापलितत्वादिभिरेव केवलं जना पूजा न लभन्ते, सर्व्वत्र गुणानामेव पूज्यत्वप्रयोजकतया, त्वं पातिव्रत्यादिगुणमहिमभिः सर्व्वैः प्रपूजनीया भवसीति भावः । [अत्र चकारद्वयेन नञ्द्वयेन च प्रत्येकं लिङ्गस्य वयसश्च समुदितयोश्च तयोः पूजास्थानत्वं प्रतिषिद्धमिति ज्ञेयम् । अत्र सामान्येन गुणानां पूज्यत्वविधायकेन वस्तुना, विशेषस्य सीतायाः जगद्वन्द्यत्वरूपवस्तुनः सोपपत्तीकरणात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः, अपि च लिङ्गवयसोः पूज्यताहेतुत्वनिरासात् शाब्दी परिसङ्ख्याऽलङ्कारः, एतयोः परस्परमङ्गाङ्गिभावतया संस्थितेः सङ्करः]। शिखरिणी वृत्तम् ॥ ११ ॥

(ज) अहो !—हा ! अतिक्लेशकरमित्यर्थः, वेदनाः,—शोकसमुद्भूतव्यथासमूहाः, उन्मीलन्ति—उद्गच्छन्ति, नवीभावमासाद्य मां नितरां व्यथयन्तीति यावत्, सीतायाः गुणग्राममाकर्ण्य संस्मृत्य च विवशां मां तद्विरहशोकः पुनः नितरां विह्वलीकरोतीति भावः ।

(झ) इति मुर्च्छति—एतावदुक्त्वा कौशल्या स्वमोहभावमभिनयतीत्यर्थः ।

(ञ) हा कष्टम् !—अहो ! निरतिशयं हृदयावदारकमिति यावत्, एतत्—कौशल्यायाः मूर्च्छितत्वं, किम् ?—कथमभूदिति भावः, किमर्थं हि इयं मूर्च्छिता भवति तत् न जाने इत्याशयः ।

(ट) किमन्यत् ?—अपरं किमप्यत्र मूर्च्छाऽऽगमे कारणं नास्तीति भावः, दारुणं शोकसङ्गमं सोढुमपारयन्ती कुसुममृदुला इयं कौशल्या सहसा मूर्च्छिता भूतेत्यभिप्रायः ।

स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम् ।
विपाके घोरेऽस्मिन्नथ खलु विमूढा तव सखी
पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥ १२ ॥

जनकः । कष्टं । सर्वथा नृशंसोऽस्मि, यच्चिरस्य दृष्टान् प्रिय-सुहृदः प्रियान् दारान् न स्निग्धं पश्यामि । (ठ)—

अथ मूर्च्छाऽऽगमहेतुं विशेषेण विवृणोति, स राजेति ।—सुहृदि प्रियसखे, त्वयि भवति, जनके इत्यर्थः, दृष्टे अवलोकिते सति, भवत्साक्षात्कारसम-कालमेवेत्यर्थः, स प्रसिद्धः, राजा दशरथः, तत् अनिर्वचनीयं, सौख्यं सुखसमूहः, स च प्रसिद्धः, शिशुजनः सीतारामचन्द्रादिबालकसमुदायः, ते च प्रसिद्धाः, महाऽऽनन्दपूर्णा इति यावत्, दिवसाः दिनानि, तदखिलम् एतत्सर्व्वमेव, दशरथादिसुखमयदिवसपर्यन्तं वस्तुजातमित्यर्थः, स्मृतौ स्मरणपथे, आविर्भूतम् आगतम् [आविर्भवतेः कर्त्तरि क्तप्रत्ययः]। अथ अनन्तरं, पूर्व्ववृत्तान्तजातस्मरणात् परमेवेत्यर्थः, अस्मिन् अनुभूयमाने, घोरे भीषणे, विपाके विपदि, दशाविपरिणामे इति यावत् सुप्ते सति इत्यर्थः, तस्य राज्ञः दशरथस्य मृतत्वेन, रामस्य प्रभुत्वात् सीतात्यागकर्तृत्वेन च हेतुना, तत्कालेन सह एतत्कालस्य सुमहत् वैषम्यमवलोक्येति भावः तव सखी स्निग्धनिवमृता कौशल्येत्यर्थः, विमूढा खलु विगतचेतना जातेति शेषः । एतदेवार्थान्तरन्यासेन विशदीकरोति, पुरन्ध्रीणामिति ।—हि यस्मात् कारणात्, पुरन्ध्रीणां कुलस्त्रीणां, चित्तं मानसं, कुसुमसुकुमारं पुष्पमिव कोमलं, स्वल्पेनैव सन्तापेन विम्लायमानमिति यावत्, भवति अस्ति, यतश्चैतासामतिकोमलं चेतः कियन्तमपि सन्तापमसहिष्णु भवति, तस्मादेवेयं कौशल्या सहसा विमूर्च्छिता जातेति वाक्यार्थः । [अत्र सामान्येन पुरन्ध्रीचित्तेन सार्द्धं विशेषस्य कौशल्याचेतसः कुसुम-सुकुमारतया सोपपत्तीकरणात्, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः, अपि च तद्राजस्मरणरूपैकेन कारणेन कौशल्याया विमूढीभवनस्य सम्पद्यमानत्वेऽपि तत्सौख्यरूपाणां कारणान्तराणां खलेकपोतिकान्यायात् तत्साधकत्वेन समावेशात् समुच्चयालङ्कारः, कुसुमेन साकं चित्तस्य समासेन अवैधर्म्यसाम्योपदेशाच्च लुप्तोपमा-लङ्कारः, एतेषान्तु परस्परसापेक्षतया सङ्करः]। शिखरिणी वृत्तम् ॥ १२ ॥

(ठ) कष्टम्—अतिदुःखप्रदमित्यर्थः, सर्व्वथा—सर्व्वप्रकारेण, निरतिशयमिति

स सम्बन्धी श्लाघ्यः, प्रियसुहृदसौ, तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।

यावत, नृशंस,—निर्दय, अस्मि—भवामि, यत्—यस्मात् कारणात्, चिरस्य दृष्टान् —बहुकालात् परम् अवलोकितान्, प्रियसुहृद,—अतिस्निग्धस्य सख्युः दशरथस्य, प्रियान्—प्रेमाऽऽस्पदीभूतान्, दारान्—स्त्रियं कौशल्यां, स्निग्धं—सस्नेहं, सप्रणयमिति यावत्, न पश्यामि—न अवलोकयामि, दुहितुः सीतायाः निर्वासनशोकेन इत्यमेवेदानीं खिन्नमानसः विकलश्च भवामि, यत् स्निग्धमित्रस्य राज्ञः दशरथस्य प्रियां भार्य्यां बहो कालात् परं दृष्टामपि नाहमिदानीं सप्रणयमवलोकयामि, अपि तु तां अद्भुतामिव मन्ये, अतो नास्ति मत्तः अधिकः कश्चित् क्रूर इति भावः।

अथ राजनि दशरथे प्राक्तनं स्वप्रेमाऽऽतिशय्यं स्फुटीकृत्य प्रतिपादयति, स सम्बन्धीति। —सः प्रसिद्धः, राजा दशरथः इत्यर्थः, श्लाघ्यः महाकुलसम्भूतत्वात् प्रशंसनीयः, सम्बन्धी स्वदुहित्रा सह रामस्य परिणयात् वैवाहिकसम्बन्धवान्, असौ दशरथः, प्रियसुहृत् प्रियः प्रीतिमान्, शोभनं हृदयं यस्य असौ सुहृत, ["सुहृद्दुर्हृदौ मित्रामित्रयोः" (५।४।१५० पा०) इति हृदयशब्दस्य हृदादेशः] सुहृद्वयवाय, स्निग्धसखः इत्यर्थः, तच्च हृदयं स हि दशरथः मे हृदयरूपः, असौ तु मम द्वितीयं हृदयमिव अभूदिति भावः, [अत्र तच्छब्दस्य विधेयप्राधान्यात् क्लीवत्वं ज्ञेयम्], स दशरथः, साक्षात् प्रत्यक्षः, आनन्दः हर्षः, ममेति शेषः, अपि च किञ्च, निखिलं समग्रं, जीवितफलं प्राणधारणप्रयोजनभूतम्, असौ इति शेषः, इह जन्मनि मज्जीवनस्य यद् यद्धि प्रार्थनीयम् आसीत्, तत् सर्व्वमेवासौ अभूदिति भावः। प्रोक्तजातेनापरितुष्यन् पुनः तस्य परमाऽऽत्मीयत्वं सख्यापयति, शरीरमिति।—तथा शरीरं देहभूतः, जीवो वा स्वप्राणस्वरूपो वा, तदधिकम् एतस्मात् जीवनादधिकं यदि वा किञ्चित् प्रीतिकरं वस्तु स्यात्, असौ तु मे तत्स्वरूप एवाऽऽसीदिति भावः, अतः अस्मात् कारणादेव, प्रियतमः निरतिशयमेव प्रीत्यास्पदीभूतः, महाराजः सम्राट्, श्रीमान् राजलक्ष्म्या आश्रयः, दशरथः, मम किमिव नाऽऽसीत्? [इवशब्दो वाक्यालङ्कारे]। इह जगति प्रीतिविषयेभ्यः अधिकं किं हि वस्तु विद्यते, यदसौ मम नाभूदिति भावः, तेनैव केवलं विरहितः अहं सर्व्वं शून्यमिव पश्यामि, नास्ति मे अधुना किञ्चिदपि इति विभावयामि इत्याशयः। अत्र आसीत् इति क्रियापदं पूर्व्ववाक्यषट्केऽपि योजनीयम्। [अत्र एकस्मिन्नेव दशरथे हृदयजीवितफलशरीरजीवत्वानां तादात्म्येनाभेदाध्यासादेव निरङ्गं मालारूपकमलङ्कारः, अपि च आनन्दस्य मूर्त्तत्वासम्बन्धेऽपि साक्षाच्छब्देन तथोक्तेः असम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः, अपि च शरीरात् हृदयात्

शरीर, जीवो वा, तदधिकमतो वा प्रियतमो
महाराज श्रीमान् किमिव मम नाऽऽसीद्दशरथः ? ॥१३॥

कष्टम्। इयमेव सा कौशल्या ॥—

यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूव दम्पत्योः पृथगहमुपालम्भविषयः।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत् स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥ १४ ॥

जीवनाद्यधिकप्रियवस्तुन अभावात् तदनन्वये,ऽपि तत्सम्बन्धोक्तेः तथैवातिशयोक्तिश्च, एव किमिव नाऽऽसीदिति वाक्यार्थं प्रति प्रागुपात्तवाक्यार्थानां हेतुभततयोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, आनन्दजनकस्य दशरथस्य आनन्दरूपतया अभिधानात् हेतो हेतुमता सह अभेदोक्तेः अभिधाहेतुरलङ्कारश्च,एषां परस्पर सापेक्षतया सङ्करः]। शिखरिणी वृत्तम् ॥ १३ ॥

अथैतयोः कौशल्यादशरथयोः स्वस्यातीवान्तरङ्गत्वं प्रदर्श्य, शोकस्य दुर्भरत्वं विवृणोति, यदस्या इति।—अस्याः कौशल्यायाः, पत्युः वा अस्याः स्वामिनः राज्ञः दशरथस्य वा, रहसि निर्जने, परमम् अत्यर्थं, यत् दूषितं प्रणयापराधः, अन्योऽन्यकृत प्रणयकलह इत्यर्थः, अभूत् आसीत्, कौशल्यादशरथौ पुरा रहसि यत् परस्परं कृतकप्रणयकोपनकुरुतामिति वाक्यार्थः, दम्पत्योः जायापत्योः कौशल्या-दशरथयोः, पृथक् विभिन्नं, जायायाः पत्युश्च परस्परनैरपेक्ष्येणेति यावत्, अहम् उपालम्भस्य तिरस्कारस्य, प्राक् प्रणयकोपावसरे राज्ञी कौशल्या मामित्यमुवाच, यत तव प्रियसख मयि एवमन्याय्यमाचरितवान्, भवदनुरोधादेवाह सर्वमसहिषि, नातः परं कदाऽपि तत् सहिष्ये इति, एवमेवाऽऽर्योऽपि सततमुवाचेत्येवंरूपस्य विषय आस्पदम्, अभूवम् आस, तव पुरेति शेषः, तदनु तत्पश्चात्, कृतकप्रणयकलहोत्पादनानन्तरमेवेत्यर्थः, प्रसादे उभयोः प्रसन्नतासम्पादनविषये, कोपे वा क्रोधोत्पादने वा, मदधीनः ममाऽऽयत्तः, विधिः व्यवस्था, अभूत् आसीत्, तौ च दम्पती प्रसादयितुं कोपयितुं वा, एकः अहमेव समर्थोऽभवमित्यर्थः, वा अथवा, तत् पूर्ववृत्तं, स्मृत्वा अलम्, ["अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा" (३।४।१८ पा०) इत्यस्ययोगात् क्त्वाप्रत्ययः] तथाविधपूर्ववृत्तानुस्मरणमधुना निष्प्रयोजनमित्यर्थः, यत् पूर्ववृत्तवृन्दं, हृदयं मानसम्, अवस्कन्द्य आक्रम्य, शोषयित्वेत्यर्थः, दहति भस्मीकरोति, तत्तद्वृत्तं संस्मृत्य इदानीं हृदयमेव केवलं शोकाऽऽकुलं भवति, तेन तदालोचना अधुना परिहरणीयेति भावः।

अरु। हा कष्टम्। अतिचिरनिरुद्धनिश्वासनिष्ठुरं हृदयमस्याः। (ड)

जनक। हा प्रियसखि। (ढ)

[इति कमण्डलूदकेन सिञ्चति]। (ण)

कञ्चुकी। सुहृदिव प्रकटय्य सुखप्रद
प्रथममेकरसामनुकूलताम्।

[अत्र दूषितत्वरूपकारणस्य दम्पत्योः स्थितत्वेन उपालम्भरूपकार्य्यस्य च जनकगतत्वेन कार्य्यकारणयोभिन्नदेशगतत्वात् असङ्गत्यलङ्कारः]। शिखरिणी वृत्तम् ॥ १४ ॥

(ड) अतिचिरेत्यादि।—अतिचिर—सुदीर्घं कालं व्याप्येत्यर्थः, निरुद्धः,—स्तम्भितः, यः निश्वासः,—श्वासमारुतः, तेन निष्ठुरं—कठोरं, श्वासनिरोधेन निश्चलमिति यावत्, ("कठोरं निष्ठुरं दृढम्" इत्यमरः), अस्याः,—कौशल्यायाः हृदयं—वक्षःस्थलम्, अनुभूयते इति शेषः, तथा च वक्षःस्थलमस्याः निस्पन्दमनुभूयते, तत् किमियं शोकाऽऽवेगं सोढुमपारयन्ती गतजीवनाऽभूदिति भावः।

(ढ) हा—खेदे, प्रियसखि।—कौशल्ये।, त्वमधुना कीदृशी दशां गताऽसीति शेषः।

(ण) कमण्डलूदकेन—कमण्डलुसलिलेन, सिञ्चति—उक्षति, सुशीतलीकरोति, इति यावत्, मोहापसारणार्थं कौशल्याया इति शेषः।

अथ कञ्चुकी राज्ञ्याः कौशल्याया ईदृशीं दशां विलोक्य, विधातुः कदाचित् प्रियसखवत् आनुकूल्यकारित्वं कदाचिच्छत्रुवत् आधिप्रदायकत्वं वाचा व्यक्तीकृत्य नितरामनुशोचति सुहृदिवेति।—विधिः विधाता, सुहृदिव मित्रमिव, प्रथमम् आदौ, बाल्यात्प्रभृति रामवनवास यावदित्याशयः, एकरसाम्—एकः एकविधः, रसान्तरण्याविमिश्र इति यावत्, रसः आस्वादः यस्याः तथाविधाम्, ("रसो गन्धे रसः स्वादे तिक्ताऽऽदौ विषरागयोः" इति मेदिनी) दुःखाविमिश्रानियतसुखप्रवाहिणीमिति यावत्, अनुकूलताम् आनुकूल्यं, हितैषितामित्यर्थः, अस्याः कौशल्यायाः इति शेषः, प्रकटय्य प्रकाश्य, दर्शयित्वेति यावत्, सुखप्रदः सन् सुखदायको भूत्वा, पुनः भूयः, पश्चादित्यर्थः, अकाण्डविवर्त्तनदारुणः,—अकाण्डे अनवसरे, सहसेति यावत्, विवर्त्तनेन परिवर्त्तनेन, प्रतिकूलताविधानेनेत्यर्थः, दारुणः भीषणः सन्, दुर्हृदिव शत्रुवत् दुर्विषहदुःखप्रदो भूत्वेति यावत्, अहो। अतिदुःखकरमेतदित्यर्थः, मनोरुजं मानसव्यथां विशिनष्टि प्रददाति, दारुणं दुःख

पुनरकाण्डविवर्त्तनदारुणो
विधिरहो ! विशिनष्टि मनोरुजम् ॥ १५ ॥

कौशल्या । [सज्ञा लभ्भा] । हा वच्छे जाणइ ! कहि सि ? सुमरामि दे बिश्राहलच्छीपरिग्गहेक्कमण्डण पप्फुरन्तसुद्ध-हसिदमुद्धमुहपुण्डरीश्र, श्राप्फुरन्तकोमुदचन्दचन्दिश्रासुन्द-रेहिं श्रङ्गेहि उल्लासेहि, जादे ! पुणोवि उल्लोएहि उच्छङ्ग, सव्वदा महाराश्रो भणादि, एसा रहुउलमहत्तराणं बहू, श्रम्हाण उण जणश्रसम्बन्धेण दुहिदिश्रा एव्व । * (त)

* हा वत्से जानकि ! क्वासि ? स्मरामि ते विवाहलक्ष्मीपरिग्रहैकमण्डन प्रस्फुरच्छुद्धहसितमुग्धमुखपुण्डरीकम्, आस्फुरत्कौमुदचन्द्रचन्द्रिकासुन्दरैरङ्गैरुल्लासय, जाते ! पुनरप्युद्योतयोत्सङ्ग, सर्वदा महाराजो भणति,—एषा रघुकुलमहत्तराणां वधू, अस्माकं पुनर्जनकसम्बन्धेन दुहिता एव ।

मुत्पाद्य नियत मानस प्रमथ्नातीत्यर्थ, प्राक् इयं महिषी कौशल्या कीदृशी आसीत्, अधुना दुर्दैवप्रभावात् कीदृशी जातेति पश्य, इत्यहो ! दैवगति दुर्व्वितर्क्यैवेत्याशय । [अत्र दैवेन विरूपयो सुखदुःखयो एकत्र सङ्घटना प्रदर्शितेति विषमालङ्कार, अपि चैकस्य विधे अनुकूलतया मनोरुजश्च जनकत्वेन एकस्यानेक गोचरतया पर्य्यायालङ्कार, सुहृदिवेत्युपमाऽलङ्कारश्च, एतेषां परस्परसापेक्षतया स्थित सङ्कर] । द्रुतविलम्बित वृत्तम् ॥ १५ ॥

(त) क्वासि ?—कुत्र वर्त्तसे ? ते—तव । विवाहेत्यादि ।—विवाहस्य—परिणयस्य, या लक्ष्मी,—शोभा, सीमन्तसिन्दूरादिधारणे विवाहकालसम्भूता या अनिर्व्वचनीया सुषमेति यावत्, तस्या परिग्रह,—स्वीकार एव, एकम्—अद्वितीय, मण्डन—भूषण यस्य तथाविधम्, आहार्य्यशोभा विनैव वैवाहिकशोभया अतिरमणीयमित्यर्थ । प्रस्फुरदिति ।—प्रस्फुरत—विलसत्, शुद्ध—निर्म्मल, हसित—स्मित यस्मिन् तथाविधम्, अत एव मुग्ध—मनोहर, मुख—वदन, पुण्डरीकमिव—कमलमिव, [इत्युपमितसमास], शुद्धहसितेन विकचकमलायिताभ्याजमिव मनोहरं तव मुखमिति भाव । स्मरामि—चिन्तयामि । आस्फुरदित्यादि ।—आ—सर्व्वतोभावेन, स्फुरन्ती—प्रकाशमाना, दिशो विदिशश्चान्तरालमपि समुद्भासयन्तीत्यर्थ, कौमुदस्य—कार्त्तिकमासस्य, शरत्कालस्येति यावत्, कालान्तरात् एतत्कालस्य सुधाधवलाभि, कौमुदीभि, समधिकसमुद्भासिततया

कञ्चुकी। यथाऽऽह देवी।—

पञ्चप्रसूतेरपि राज्ञ आसीत् प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि यथैव शान्ता प्रिया तनूजाऽस्य तथैव सीता॥१६॥

तथा व्यवहार इति ज्ञेयम्। चन्द्रस्य—शशधरस्य, या चन्द्रिका—जोत्स्ना, तद्वत् सुन्दरैः,—मनोरमैः, सुखस्पर्शैरिति यावत्, अङ्गैः,—अवयवैः, उल्लासय—आनन्दय, मच्छरीरं स्निग्धस्पर्शैः तवाङ्गकैः सुशीतलं कुरु इति समुदितार्थः। जाते।—हे वत्से। पुनरपि—भूयोऽपि, उत्सङ्ग—मदीयं क्रोडम्, उद्योतय—प्रकाशय, सुशोभितं कुरु उपवेशनेनेति यावत्, सर्व्वदा—सर्व्वस्मिन्नेव काले, महाराजः,—दशरथः, भणति—कथयति। [अत्र भणतीत्यपि लट्प्रयोगः तात्कालिकत्वाभिप्रायेण, महाकविप्रयुक्तत्वाद्वा अविरुद्ध एवेति ज्ञेयम्]। रघ्वित्यादि।—रघुकुलस्य—रघुवंशस्य, महत्तराणाम्—अतिमहतां, भगवन्मनुप्रभृतीनामतिमहिमशालिनामस्मत्पूर्व्वपुरुषाणामित्यर्थः, वधूः,—स्नुषा, पुनः,—किन्तु, जनकसम्बन्धेन—राजर्षिजनकेन सह मित्रत्वसम्बन्धात्, दुहिता एव—कन्यैव, जनकेन सह मैत्र्या तस्य या कन्या सा ममापीति भावः।

अथ तदुक्तिं यथार्थत्वेन समर्थयति कञ्चुकी, पञ्चेति।—पञ्च प्रसूतयः अपत्यानि यस्य, तथाविधस्यापि, एका कन्या शान्ता, चत्वारः पुत्राः रामादयः इति मिलित्वा दशरथस्य पञ्चापत्यानि इति ज्ञेयम्, राज्ञः दशरथस्य, सुबाहुशत्रुः,—सुबाहुर्नाम रावणानुचरो राक्षसविशेषः, तस्य शत्रुः निहन्ता, रामः इत्यर्थः, विशेषेण अन्येभ्य आधिक्येन, प्रियः प्रेमाऽऽस्पदीभूतः, आसीत् अभूत्, पञ्चभ्यश्चापत्येभ्यः राममेव महाराजः दशरथः निरतिशयं पिप्रायेति भावः, तनूजा कन्या, शान्ता महर्षेः ऋष्यशृङ्गस्य पत्नी, अस्य राज्ञः दशरथस्य यथैव यादृश्येव, प्रिया प्रीतिभाजनम्, आसीदिति शेषः, वधूचतुष्केऽपि—वधूनां सीतोर्म्मिलाश्रुतकीर्त्तिमाण्डवीनां, चतुष्केऽपि चतुष्टयेऽपि, चतसृषु सीताऽऽदिषु स्नुषासु इत्यर्थः, [निर्द्धारणे सप्तमी। यद्यपि सर्व्वत्र निर्द्धारणार्थे बहुत्वस्यैव व्यवस्था भूयस्तया दृश्यते इति विभाव्यते, तथाऽप्यत्र एकवचनानुसरणेऽपि बहुत्वस्यायत्तत्वेन सामञ्जस्यात् निरपवादमेवैतदिति ज्ञेयम्]। सीता जानकी, तथैव तादृशी एव, शान्तावदित्यर्थः, प्रिया प्रीतिकरी, आसीत् इति शेषः, सत्यमेतत्,—अपत्येषु राम इव वधूषु सीतायामेवासौ राजा सातिशयं प्रीतिमान् बभूवेति भावः। [अत्र सीतारामरूपयोः प्रस्तुतयोः पदार्थयोरेकत्रैव आसीदिति क्रियया अभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः, शान्तया सह सीतायाश्च अवैधर्म्यसाम्योपदेशादुपमा च, इत्येतयोः परस्परसापेक्षतया स्थितेः सङ्करः]। उपजातिः वृत्तम्॥१६॥

जनक। हा प्रियसख महाराज दशरथ! एवमसि सर्वप्रकारहृदयङ्गम कथं विस्मर्य्यसे? (घ)—

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि।
त्वं कालेन तथाविधोऽप्यपहृतः सम्बन्धबीजन्तु तद्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग्जीवितम् ॥१७॥

(घ) प्रियसख।—प्रियबन्धो। एवमसि—इत्थम्भूत एव भवसि। किम्भूतोऽसि एतदेवाऽऽह, सर्व्वेति।—सर्व्वप्रकारेण—सर्व्वथा, हृदयङ्गम,—हृदयं गच्छतीति ["गमेः सुप्युपसङ्ख्यानम्" (वा०) इति खच्प्रत्ययः] इष्ट, प्रणयास्पदमित्यर्थः, त्वमिति शेषः, त्वं हि सर्व्वाकारेण ममाऽऽनन्दजनक एव भवसीत्यर्थः, कथं—केन प्रकारेण, विस्मर्य्यसे?—मानसात् दूरीकर्तुं शक्यसे, त्वमेव हि मम परम मित्रभूत अभव, यत् बहुतिथे काले व्यतीतेऽपि त्वामधुनाऽपि नाहं विस्मर्तुं पारयामीति भावः।

अथ तादृशप्रियबन्धुवियोगात् स्वजीवने नितरामनास्थां प्रकटयति, कन्याया इति।—कन्यायाः तनयायाः, वधूभूताया इति यावत्, पितरः पितृपितामहाऽऽदयः, जामातुः वरस्य, परिणेतुरित्यर्थः, आप्तं जनम् आत्मीयं लोकं, पितृपितृव्यादिस्वजनसमुदायमिति यावत्, पूजयन्ति सवर्द्धयन्ति, सत्कारेण आद्रियन्ते इत्यर्थः। किल इति प्रसिद्धौ। सम्बन्धे पारिणाय्यसम्पर्के, सञ्जाते सतीति शेषः, रामाऽऽदिभिः सह सीताऽऽदीनां परिणयेन रघुकुलनिमिकुलयोः सम्बन्धने सम्पन्ने सतीति भावः, ते तव, मयि जनके, तत् लोकप्रसिद्धं, जामातृस्वजनेषु कन्यागुरुजनकर्तृकमित्यर्थः, आराधनं संवर्द्धनं, विपरीतमेव अन्यथाभूतमेव, सामाजिकरीत्यननुसरणविशेषमेव, अभूत् आसीत्, लोके हि कन्यागुरुजना जामातृस्वजनान् संवर्द्धयन्ति इति दृश्यते, परन्तु जामातॄणां रामाऽऽदीनां गुरुभूता अपि भवन्तः कन्याजनानां सीतोर्म्मिलाऽऽदीनां गुरुभूतान् अस्मान् जनकाऽऽदीन् सततमेव सौहार्दात् अपूपुजन्, इत्थमेव चाऽभिमानात् सौदार्य्याच्च भवन्तः स्वगौरवलाघवसूचकं व्यवहारमपि परामृष्टवन्त इति भावः, तथाविधोऽपि तादृशोऽपि, सौजन्यैकनिधिरपीत्यर्थः, त्वं अस्मात् कालेन कृतान्तेन, अपहृत साक्षात्कारं नीत, अस्मत्सकाशात् बलात् गृहीतः इत्यर्थः, अहो निर्दयत्वं कालस्येति भावः। यत् तथाविधं, सीतापतिनिति

कौशल्या। जादे जाणइ ! किं करेमि ? दढवज्जलेवघडिअ-बन्धणिच्चलं ज्जेव हदजोविदं मं मन्दभाइणी ण परिच्च-अइ। * (द)

* जाते जानकि ! किं करोमि ? दृढवज्रलेपघटितबन्धनिश्चलमेव हतजीवितं मां मन्दभागिनीं न परित्यजति।

यावत्, सम्बन्धस्य वैवाहिकसंसर्गस्य, बीजं तु निदानमपि, अपहृतनिर्निमित्तविपरिणामेनान्यथा, न केवलं निखिलगुणनिलयं प्रणयनिधिं भवन्तमपहृत्य कालोऽप्रीणात्, अपि तु तेन वैवाहिकसम्बन्धहेतुभूतां सीतामपि बलात् हृत्वा निःशेषमस्मत्सम्बन्धमुन्मुच्छिद्य सातिशयं स्वपैशुन्यं व्यक्तीकृतमित्यर्थः। कारुण्यलेशविवर्ज्जितत्वं कालस्येति तात्पर्य्यम्। घोरे भयङ्करे, सातिशयक्लेशसङ्कुले इत्यर्थः, अस्मिन् दृश्यमाने, जीवलोकनरके निरयभूते संसारे, पापस्य अपुण्यकृतः, दुराचारस्येत्यर्थः, ममजनकस्य, जीवितं प्राणान्, जीवनधारणमित्यर्थः, धिक् निन्दामि, निन्दनीयमेतदिति यावत्, भवादृशि सुहृदि विपन्ने, दुहितुश्च वैदेह्यामचिन्तिताया विषमायां दशायां समापतितायां, वृथैवाहमिदानीं जीवनमुद्वहामि, अधुना मरणमेव मे श्रेय इति भावः। [अत्र जीवलोके नरकस्याभेदाध्यासात् निरङ्ग रूपकमलङ्कारः]। शार्द्दूलविक्रीडितं वृत्तम् ॥ १२ ॥

(द) जाते !—वत्से !, जानकि !—सीते ! किं करोमि—किमनुतिष्ठामि, त्वद्वियोगे जीवनविसर्ज्जनमेव मे सर्वदुःखप्रतीकारोपायभूततया साधीयः, किन्तु तत् न सम्भवति, तर्हि किमनुतिष्ठेयमहमधुनेति भावः। दृढेत्यादि।—दृढेन—कठोरेण, सुदीर्घकालस्थायिनेत्यर्थः, वज्रलेपेन—कुलिशमयदुर्भेद्यपन्धनेन, घटितः,—योजितः, सम्पादित इति यावत्, बन्धः,—बन्धनं यस्य तथाविधम्, अत एव निश्चलं—स्थिरम्, एतद्देहं विहायान्यत्र गन्तुमसमर्थमिति भावः। हतजीवितं—दग्धप्राणाः, मन्दभागिनीं—हतभागधेयां, मां—कौशल्यां, न परित्यजति—न विजहाति, यद्यपि त्वद्वियोगशोकविधुराऽहं नियतमेव जीवनं विसृष्टुं यते, तथाऽपि दृढबद्धा मे प्राणा एतद्देहं परित्यज्य गन्तुं न शक्नुवन्ति, सर्व्वविधः मे प्राणपरित्यागप्रयासः सर्व्वथैव निष्फलतामेतीति भावः।

अरु। आश्वसिहि राजपुत्रि। बाष्पविश्रामोऽप्यन्तराले कर्त्तव्य एव, अन्यच्च—किं न स्मरसि—यदवोचदृष्यशृङ्गाऽऽश्रमे युष्माकं कुलगुरुः? तदुपजातमेव, किन्तु कल्याणोदर्कं भविष्यति। (ध)

कौशल्या। भअवदि! अदिक्कन्तो मणोरहो। * (न)

अरु। तत् किं मन्यसे राजपुत्रि। मृषोद्यं तदिति? नहीदं सुक्षत्रिये। अन्यथा मन्तव्यं, भवितव्यमेव तेन। (प)—

---

* भगवति! अतिक्रान्तो मनोरथः।

(ध) राजपुत्रि!—कौशल्ये! आश्वसिहि—समाश्वस्ता भव, त्वमिति शेषः, बाष्पाणाम्—अश्रूणां, विश्रामः,—परिहारः, अन्तराले—मध्यन्तरे, मन्तराऽन्तरेत्यर्थः, कर्त्तव्य एव—विधातव्य एव, इत्थं निर्भरमनियत शोकावेगात् मा रुदिहीति भावः। रोदनविरतौ हेतुं निर्दिशति, अन्यच्चेति।—अन्यच्च—अपरञ्च, दुःखकारणात् भिन्नञ्चेत्यर्थः सुखकारणमिति यावत्, किं न स्मरसि—किमधुना न चिन्तयसि, किमिति तदित्याह,यदिति।—युष्माकं—भवतीनां,कुलगुरुः,—कुलपुरोहितः, महर्षिः वशिष्ठ इत्यर्थः, ऋष्यशृङ्गस्य—जामातुः, आश्रमे—तपोवने, यदवोचत्—यदकथयत्, भद्रे! पुत्रपूर्णोत्सङ्गानेव वधूः इत्यस्तीति वचनं यदुदीरयदिति भावः। तदुपजातमेव—तादृशं वाक्यं सम्पन्नप्रायमेव, नात्र संशयलेशोऽस्तीति एवशब्दार्थः, ऋषिवचसामन्यथाभवितुमनर्हत्वादित्याशयः। कल्याणोदर्कं—कल्याणं—शुभमेव, उदर्कः,—भावि फलं यस्य तत्, शुभपरिणाननिश्चयः, भविष्यति—सम्पत्स्यते। अचिरादेव भवती सीतासुतौ कुशलवौ निरीक्षिष्यते, अतः महाऽऽनन्दकरे वस्तुनि समापत्स्यमाने शोकं विमुञ्च, अन्यथा रोदनस्याशुभकरत्वात् महानन्र्थाऽऽपातो भविष्यतीति भावः।

(न) मनोरथः—अभिलाषः, सीतासमागमविषयक इति यावत्, अतिक्रान्तः,—विलुप्तः, विनष्ट इत्यर्थः, श्वापदसङ्कुलेऽरण्ये जनस्थाने विवासितायाः सीतायाः जीवन्त्याः सर्व्वथैवासम्भवितत्वात्, तत्पुनर्दर्शनाऽऽशा सुतरामेव सुदूरं गतेति भावः।

(प) राजपुत्रि!—हे नृपसुते! कौशल्ये! तत्—तर्हि, किं मन्यसे—किमवगच्छसि? सम्भावयसीत्यर्थः, तत्—कुलगुरोः वशिष्ठस्य वचनं, मृषोद्यं—मिथ्याभूतम्, [मृषा मिथ्या, उद्यते कथ्यते इत्यर्थे मृषोपपदात् वदतेः "राजसूय

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयो भूत्।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति ॥ १८ ॥

[नेपथ्ये कलकलः । सर्वे आकर्णयन्ति]।

सूर्यमृषोद्य—" (३।१।११४ पा०) इति क्यप् निपातितः]। सुक्षत्रिये।—उत्तमक्षत्रवंशसम्भूते। [क्षतः विपदः त्रायते इति क्षत्रः, तस्यापत्यमित्यर्थे "क्षत्राद्घः" (४।१।१३८ पा०) इति घप्रत्यये क्षत्रियः, तज्जातीया स्त्री इत्यर्थे "अर्यक्षत्रियाभ्यां वा—" (वा०) इति सूत्रेण आनुगागमे ङीपि च क्षत्रियाणी, पक्षे क्षत्रिया च सिद्ध्यति। पुंयोगे तु क्षत्रिया इत्यपि ज्ञेयम्]। इदं—प्रोक्तं गुरुवचनम्। अन्यथा—अन्यप्रकारं, मिथ्याभूतमित्यर्थः, न हि—नैव, मन्तव्यम्—आशङ्कितव्यं, त्वयेति शेषः। तेन—गुरुवचनेन, भवितव्यमेव—अवश्यभाव्यमेव, युष्मद्गुरुवचसामन्यथतया त्वं नूनमचिरादेव पुत्रसुशोभितोत्सङ्गां वधूं जानकीं द्रक्ष्यसीति भावः।

अथ प्रज्ञाचक्षुषामृषीणां वचसामवितथतां प्रतिपादयति, आविर्भूतेति।—आविर्भूतं स्वयं प्रकाशितं, वुद्धितो प्रस्फुरितमिति यावत्, ज्योतिः तेजः, ब्रह्मतत्त्वरूपमित्यर्थः, येषां तेषां, कृतब्रह्मसाक्षात्काराणामिति भावः, ब्राह्मणानाम् ऋषीणां वसिष्ठप्रभृतीनां, ये व्याहाराः उक्तयः, तेषु व्याहारेषु, [अत्र बहुवचनं सर्वेषामेव वचसां सत्यताप्रतिपादनार्थमिति ज्ञेयम्] संशयः सन्देहः, मिथ्यात्वशङ्केत्यर्थः, मा भूत् न अस्तु, तवेति शेषः, हि यतः, एषाम् ऋषीणां, वाचि वचसि, भद्रा उत्तमा, ("भद्रो वाच्यवत्श्रेष्ठसाधुनो" इति विश्वः) अव्याहतेति यावत्, लक्ष्मीः सिद्धिः, अविचलार्थसम्पत्तिरित्यर्थः, निषक्ता सलग्ना, नित्यानुबद्धा इति यावत्, अस्तीति शेषः, तेन हि, एते ब्राह्मणाः, विप्लुतां मिथ्याभूतां, विफलामित्यर्थः, वाचं वाक्यं, न व्याहरन्ति न भाषन्ते, ब्रह्मविदां ब्राह्मणानां सत्यभाषितया नूनं तत् फलवत् भविष्यतीति भावः। [अत्र तथाविधब्राह्मणानां व्याहृतेषु अनुशयितत्वरूपकार्यस्य तद्वताविप्लुतत्वरूपकारणेन समर्थनात्, कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः]। शालिनी वृत्तम् ॥ १८ ॥

जनक। अद्य खलु शिष्टानध्याय इत्युद्धत खेलतां बटूनां कालकलः। (फ)

कौशल्या। सुलहसोक्ख दाव बालत्तणं होदि। [निरूप्य] अम्महे। एदाण मज्झे को एसो रामभद्दलच्छोपरिसोहिदेहिं सावट्टम्भसुहललिदेहिं अङ्गेहिं अह्माणं वि लोअणाइं सीदलावेदि ?* (ब)

* सुलभसौख्य तावद् बालत्व भवति। अहो। एतेषां मध्ये क एष रामभद्र लक्ष्मीपरिशोभितैः सावष्टम्भसुखललितैरङ्गैरस्माकमपि लोचनानि शीतलयति ?

(फ) अथ बटूनां कोलाहले हेतुमुपन्यस्यति, अद्येति।—अद्य खलु—आगमनदिने एव, शिष्टानां—सदाचारानुवर्त्तिनां, वेदविदां ब्राह्मणानामित्यर्थ, तथा चोक्तं वशिष्ठेन षष्ठाध्यायावसाने,—"पारम्पर्य्याऽऽगतो येषां वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेया श्रुतिप्रत्यक्षहेतवः ॥" इति। अनध्याय,—वेदाध्ययनवर्ज्जनम्, तथा च स्मृति,—"अनध्यायश्च कर्त्तव्य शिष्टे च गृहमागते" इति। जनकागमे अनध्यायमाह भगवान् मनुरपि—"अनध्यायो बयनाने समवाये जनस्य च" इति (चतुर्थाध्याये १०८ संख्याकश्लोकार्द्धे)। सदाचारानुपालकानां महतां वसिष्ठप्रभृतीनामागमनात् भगवता वाल्मीकिना तेषामुपचारकरणार्थं सम्माननाप्रदर्शनार्थञ्च बटूनां वेदाध्ययनाद्विराम प्रदत्त इति भाव। इति—अस्मात् हेतोः, अध्ययनात् विरामलाभादित्यर्थ, उद्धतम्—अनियन्त्रितम्, उच्छृङ्खलमिति यावत्, खेलतां—परिक्रीड़मानानां, बटूनां—ब्राह्मणबालकानां, कलकल,—कोलाहल, समुत्थित इति शेष।

(ब) बालत्व—शैशवम्। सुलभेति।—सुलभम्—अक्लेशलभ्य, सौख्यम्—आनन्द, सुखसन्तान इति यावत्, यस्मिन् तथाभूत, बाल्ये वयसि हि वैषयिकविविध चिन्तानामनुदयात् चित्तोद्वेजककारणविरहाच्च कोमलमतय शिशव येन केनापि च वस्तुना विमलं सुखमनुभवन्ति, सदा सुखेन कालं नयन्ति चेति भाव। निरूप्य—सादरमवलोक्य। रामभद्रेति।—रामभद्रस्य—रामचन्द्रस्य, या लक्ष्मी,—शरीरशोभा, तदनुरूपतया तदनुकरणेनेति यावत्, [अत एव निदर्शनाऽलङ्कार] तया परिशोभितै,—अलङ्कृतैः, अवष्टम्भेन—सौष्ठवेन सह वर्त्तमानानि, सावष्टम्भानि, तेषां सुघटिततया निर्दोषत्वाच्छोभन, ("सौष्ठवं सावष्टम्भ" इति हलायुध)

अरु। [अपवार्य्य सहर्षोत्कण्ठं स्वगतम्]। इदं नाम तद्भागीरथ्यो-निवेदितरहस्य कर्णामृत, न त्वेवं विद्म कतरोऽयमायुष्मतोः कुशलवयोरिति। (भ)

जनक। कुवलयदलश्यामस्निग्ध शिखण्डकमण्डनो
वटुपरिषद पुण्यश्लोकः श्रियेव सभाजयन्।
पुनरिव शिशुर्भूत्वा वत्स स मे रघुनन्दनो
झटिति कुरुते दृष्ट' कोऽय दृशोरमृताञ्जनम्? ॥१८॥

अत एव मुग्धानि—हृदयाकर्षकाणि, मनोहराणीति यावत् ललितानि—सुकुमाराणि, विन्यासमाधुर्य्यसमन्वितानि इति यावत, ते, तथा चोक्तम् उज्ज्वलनीलमणौ,—"विन्यासभङ्गिरङ्गाना भ्रूविलासमनोहरा। सुकुमारा भवेद्द यत्र ललित तदुदीरितम्॥" इति। अङ्गे,—अवयवे, अस्माकमपि—कौशल्यादीनां, शीर्षविकलेन्द्रियाणामित्यपिकारार्थ। लोचनानि—नयनानि, शीतलयति—प्रीणयति, रञ्जयतीत्यर्थ।

(भ) अपवार्य्य—कौशल्यादय प्रस्तुतरहस्य यथा न शृण्वन्ति तथा पराङ्मुखी भूय प्रकाश्येत्यर्थ, "तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते' इति दर्पणात्। हर्ष,—आनन्द, उत्कण्ठा—औत्सुक्यञ्च, ताभ्यां सह वर्त्तमान यथा तथा, स्वगतम्—आत्मगतम्, आहेति शेष। भागीरथ्या—गङ्गया, निवेदित—मां प्रति कथित, रहस्य—गोप्य, जन्मावस्थित्यादिकमित्यर्थ यस्य तत्, कर्णामृत—कर्णयो,—श्रवणयो, अमृत—सुधा, तदिव सुखकरमित्यर्थ। इदं नाम तत्—कर्णसुखजनकलवकुशाख्यसीतापुत्रद्वयरूपं वस्त्वित्यर्थ। पुरा भागीरथी श्रवणसन्तर्पण सीतासुतद्वयविषयक यद्वचनमस्मभ्यमुवाच, मन्ये तद्वाक्यविषयभूत सीतासुत कोऽप्यस्तु बालकेषु कश्चिद्द भविष्यति इति भाव। अनुमाय सामान्यत ज्ञातु शक्यत्वेऽपि विशिष्य ज्ञानासम्भवमाह, न त्वेवमिति।—तु—किन्तु', एवम्—इत्थ, न विद्म,—न जानीम, [अत्र बहुवचनप्रयोगस्तु परमसुखजनकरामभद्रतनयावलोकनेन स्वस्मिन् माहात्म्य द्योतयति इति विभाव्यम्]। आयुष्मतो,—दीर्घजीविनो। अयम् कतर,—कुशो लवो वेत्यर्थ।

अथ रामचन्द्रस्याङ्गसौष्ठवसाम्यात् वटुष्वेक सीतासुत प्रत्यभिज्ञाय सातिशय हर्षमनुभवति, कुवलयेति।—कुवलयस्य नीलोत्पलस्य, दलानीव पत्राणीव, श्याम मेचक, स्निग्ध मसृणश्च, इन्दीवरकुसुममिव श्यामलसौम्यमूर्त्तिरित्यर्थ, शिखण्डका

कञ्चुकी। नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये। (म)

जनक। एवमेव। तथा हि,—

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम्।

काकपक्षा एव, मण्डनं भूषणं यस्य सः, काकपक्षधरः इति यावत्, पुण्या पवित्रा, श्री शोभा,यस्य सः, ["श्रियादिभाषा" (५ ४।१५४ पा०) इति समासान्त वैभाषिक कप्रत्यय,] पवित्रश्लोक इत्यर्थः, बटूनां विप्रबालकानां, परिषदं समाजं, श्रिया शरीरशोभया, समाजयन् इव भूषयन्निव, ["सभाज प्रीतिदर्शनयो" इति (चु० उ० सक० से०) धातोर्णिचि शत्रन्तस्य रूपम्] स्थितः इति शेषः, सः वत्सः आयुष्मान्, रघुनन्दनः रामचन्द्रः, पुनः भूयः, शिशुः बालः, भूत्वा इव सम्भूयेव, बालरूपतामापन्न इवेत्यर्थः, दृष्टः अवलोकितः, शिशुरूपो भूत्वा मे नेत्रपथमापतित इति यावत्, अयं पुरतः स्थितः, कः शिशुः, झटिति सत्वरमेव, दृशोः मम नयनयोः, अमृताञ्जनम् अमृतस्य सुधायाः, अञ्जनम् अमृतद्रवाविष्टां वर्त्तिं विलेपनं, कुरुते विदधातीव, शिशुः रघुनन्दनसादृश्यात् बालकोऽयं तदपत्यताधियमेव समुत्पादयति इति भावः। [अत्र कुवलयदलेनावैधर्म्यसाम्योपदेशात् समासगता लुप्तोपमाऽलङ्कारः, समाजयन्निवेति शिशुर्भूत्वेवेति च वाच्या क्रियोत्प्रेक्षाद्वयम्। अमृताञ्जनं कुरुते इत्यत्र तु प्रतीयमाना क्रियोत्प्रेक्षाऽलङ्कारः, एतेषां परस्परनैरपेक्ष्येण स्थितेः संसृष्टिः]। हरिणी वृत्तम्॥ १९॥

(म) ब्रह्म—वेदं, चरति—अधीते यः सः, ब्रह्मचारी—उपनयनात् परं गुरुकुलमध्युष्य वेदमधीयानः बालकः, क्षत्रियश्चासौ ब्रह्मचारी चेति, जात्या क्षत्रियः वेदाध्येता इत्यर्थः, अयं—पुरतः दृश्यमानः इति यावत्, दारकः,—शिशुः, माणवकः इति यावत्, इति मन्ये—इत्थं सम्भावयामि, मौञ्जीवल्कलादिदर्शनेरिति भावः।

ब्रह्मचारिविहितविशेषलक्षणैः बालस्यास्य क्षत्रियत्वमेव प्रतिपादयति, चूडेति।— पृष्ठतः पृष्ठदेशेन, अभितः उभयतः, पृष्ठस्य उभयोः पार्श्वयोः इत्यर्थः, ["अभितःपरितः समया—" (वा०) इति द्वितीया, तसिल् सार्व्वविभक्तिकत्वेन द्वितीयाख्याने तसिल् प्रत्ययः इति बोध्यम्]। चूडाचुम्बितकङ्कपत्र—चूडाभिः शिखाभिः, चुम्बितानि संस्पृष्टानि, कङ्कस्य पक्षिविशेषस्य, "काङ्गिला" इति वङ्गभाषाप्रसिद्धस्य, पत्राणि वाणपुङ्खस्थिताः पक्षाः यस्य तथाविधं, तूणीद्वयम् इषुधियुगलं, खमनानां शरा उत्तरसायकाय वाणाधारयुगलमित्यर्थः, ("तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः।

मौर्व्वी मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठिकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्ड तथा पैप्पलम् ॥२०॥

तृणाम्" इत्यमर), तथा भस्मनां विभूतीना, स्तोकेन अल्पपरिमाणेन, स्वल्पभस्मनेत्यर्थ, यद्वा—स्तोक स्वल्प भस्म तेन, ["पोटायुवतिस्तोका—" (२।१।६५ पा०) इति समासात् स्तोकशब्दस्य परनिपात। "भस्मस्तोक—" इत्यत्र "भस्मस्तोम—" इति पाठे,—भस्मनां स्तोम समूह तेनेत्यर्थ,] पवित्र पूत, लाञ्छन चिह्न यस्य तत, मेध्यभूतिभूषितमित्यर्थ, उर वक्ष स्थलम्, अपि च रौरवीं रुरुमृगसम्बन्धीरा, त्वच चर्म्म, उत्तरीयमित्यर्थ, धत्ते धारयति, अय दारक इति शेष। अपि च मूर्व्वा लता विशेष, तस्या इय मौर्व्वी तया, मूर्व्वालतातन्तुनिर्म्मितयेत्यर्थ, मेखलया कटिसूत्रेण, नियन्त्रित सयमित, माञ्जिष्ठिक मञ्जिष्ठया तन्नाम्ना रञ्जकद्रव्येण रक्त, मञ्जिष्ठाराग रञ्जितमित्यर्थ, [माञ्जिष्ठिकम् इति "लाक्षारोचनाट्ठक्" (४।२।२ पा०) इत्यतिदेश-बलात् शैषिकेण वा ठक्। वस्तुतस्तु"माञ्जिष्ठकम्" इति पाठ समीचीन "तेन रक्त रागात्" (४।२।१ पा०) इत्यनेन अण्प्रत्यय, तत स्वार्थे कन्], अधोवासश्च परिधेयवसनञ्च, तथा तद्वत्, पाणौ हस्ते, कार्म्मुक शरासनम्, अक्षसूत्रवलय वलयाकारमक्षसूत्रं, जपमालामित्यर्थ, पिप्पल अश्वत्थ, तच्छाखानिर्म्मित पैप्पलं, दण्ड ललाटपरिमिता यष्टिं, धत्ते इ नुषङ्गेणान्वय। एतै क्षत्रियब्रह्मचारिलक्षणै नूनमेष क्षत्रियब्रह्मचारी भवतीति भाव। ब्रह्मचर्य्यविशा ब्रह्मचारिणा धारणीयद्रव्यनाह भगवान् मनुर्यथा,—"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिण। वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥ मौञ्जी त्रिवित् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला। क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी॥ कार्पासमुपवीतं स्याद्विप्रस्योर्द्धवृत त्रिवृत। शणसूत्रमय राज्ञो वैश्य-स्याविकसौत्रिकम्॥ ब्राह्मणो वैल्वपालाशौ क्षत्रियो वाटखादिरौ। पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मत॥" इति द्वितीयाध्याये ४१—४५ श्लोका। दण्ड प्रमाणमाह तत्रैव,—"केशान्तिको ब्राह्मणस्य दण्ड कार्य्य प्रमाणत। ललाटसम्मितो राज्ञ स्यात्तु नासान्तिको विश।" इति ४६ श्लोक। [अत्र त्वच प्रभृति दण्ड यावत् अनेकेषां प्रस्तुताना पदार्थानाम् एकया धत्ते इति क्रियया अभिसम्बन्धात् तुल्ययोगिता ऽलङ्कार, स च रौरवीत्व प्रभृतिभिर्विशिष्टैर्हेतुभि क्षत्रियब्रह्मचारित्वरूपसाध्य स्यानुमेयमानत्वेन जायमानानुमानालङ्कारसङ्कीर्ण। दण्डिमते तु,—"जातिक्रिया गुणद्रव्यवाचिनैकवर्त्तिना। सर्व्ववाक्योपकारश्चेत्तमाहुर्दीपक यथा॥" इति लक्षणात् क्रियादीपकालङ्कार]। शार्दूलविक्रीडित वृत्तम्॥ २०॥

भगवति अरुन्धति। किमुत्प्रेक्षसे कुतस्त्योऽयमिति ? (य)

अरु। अद्यैव वयमप्यागताः। (र)

जनक। आर्य्य गृष्टे। अतीव मे कौतुकं वर्त्तते। तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ, इमञ्च बालकं ब्रूहि, केऽप्येते प्रवयसस्त्वां दिदृक्षव इति। (ल)

कञ्चुकी। यदाज्ञापयसि। [इति निष्क्रान्तः]।

कौशल्या। किं भणाध ? एव्वं भणिदो आगमिस्सदित्ति ? * (व)

अरु। भिद्येत किं सद्वृत्तमीदृशस्य निर्माणस्य ? (श)

---

* किं भणथ ? एवं भणित आगमिष्यतीति ?

(य) अयम्—एष पुरतो दृश्यमानः बालकः, कुतस्त्यः,—कस्मात् भवः, कस्मात् पितुः मातुश्चाय प्रसूत इत्यर्थः, ["पञ्चम्यास्तसिल्" (५।३।७ पा०) इति तसिल् प्रत्यये, "कु तिहोः" (७।२।१०४ पा०) इति किमः कुरादेशः, "अव्ययात् त्यप्" (४।२।१०४ पा०) इति त्यप्प्रत्ययश्च]। इति—अत्र विषये, किमुत्प्रेक्षसे—किं मन्यसे, किमनुमिनोषि इत्यर्थः, तद् ब्रूहीति शेषः।

(र) वयमपि—यूयं यथा तथैव इत्यपिशब्दार्थः, आगताः,—अत्र समुपस्थिताः ; अतः सम्यक् न विद्म इति भावः।

(ल) आर्य्य।—मान्य।, गृष्टे—कञ्चुकिन् ? गृष्टिरिति कञ्चुकिनो नामैतदिति ज्ञेयम्। केऽपि एते—तवापरिचिता इमे जना इत्यर्थः, प्रवयसः,—प्रकृष्ट—सम धिकमित्यर्थः, वयः,—जीवनकालो येषां ते तथोक्ताः, अतिवृद्धा इत्यर्थः, दिदृक्षवः,—द्रष्टुमिच्छवः, सञ्जाताः इति शेषः। समागता वृद्धा अतिथयः त्वां द्रष्टुमिच्छन्ति, अतः तत्समीपं गत्वा तेषामाशां परिपूरय इति बालकं ब्रूहीति समुदितार्थः।

(व) किं भणथ ?—किं कथयथ ? एवम्—इत्थं, भणितः,—कथितः सन्, आगमिष्यति—आयास्यति, इति—एतत्। युष्माकमाह्वानश्रवणमात्रमेवासौ बालकः सप्रश्रयं सत्वरमेवाऽऽगमिष्यति, इति किं वदथेति भावः।

(श) ईदृशस्य—एवंविधस्य अलौकिकसौम्यगाम्भीर्य्यादिसम्पन्नस्येत्यर्थः, निर्म्माणस्य—निर्म्मितस्य वस्तुनः,—"कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात्, लोकोत्तरधीसम्पन्नस्यामुष्य बालकस्येति यावत्। सद्वृत्तं—साधुशीलं, सदाचरणमिति

कौशल्या। [निरूप्य]। कहं सविणअ णिसामिदगिट्ठिवअणो विमज्जिदइसिदारओ इदो अहिमुहं पसरिदो ज्जेव सो वच्छो। * (घ)

जनक। [चिर निर्वर्ण्य]। भोः किमप्येतत्?—

महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।

---

* कथं सविनयं निशामितगृष्टिवचनो विसर्जितर्षिदारक इतोऽभिमुखं प्रसृत एव स वत्सः।

यावत्, कि भियेत?—किं विलुप्येत? स्वयमेव किं नश्येत? इत्यर्थः। [कर्म्मकर्त्तरि चायं प्रयोगः,] "यत्राऽऽकृतिस्तत्र गुणा वसन्ति" इति न्यायात्, "न ह्याकृतिः सुसदृशं विजहाति वृत्तम्" इति भावः।

(घ) निरूप्य—सविशेषमवलोक्य। निशामितेत्यादि।—निशामित—श्रुतं, गृष्टे,—तदाख्यस्य कञ्चुकिनः, वचनं—वाक्यं येन तथोक्तः। विसर्ज्जितेत्यादि।—विसर्ज्जिताः,—परित्यक्ताः, ऋषीणां—मुनीनां, दारकाः,—बालकाः येन सः, इतः,—अस्मिन् देशे, अभिमुखम्—अस्माकं सम्मुखं, प्रसृतः एव—प्रस्थित एव, वत्सः,—बालकः, अस्मदीयगौरवात् असौ शिशुः कञ्चुकिवचनं श्रुत्वैव सर्व्वान् बालकान् परिहाय अस्मदभिमुखमितः एवाभिवर्त्तते इति दृश्यते इति भावः।

अथ शिशौ महिमाऽऽतिशय्यं दृष्टा आत्मनः विह्वलीभावं विवृणोति, महिम्नामिति।—एतस्मिन् पुरतः दृश्यमाने अस्मिन् शिशावित्यर्थः, अवस्थितः इति शेषः। विनयेत्यादि।—विनयेन नम्रतया, शिशुतया शैशवेन, तथा मौग्ध्येन सौन्दर्य्येण च, मसृणः कोमलः, महिम्नां महत्त्वानां, शौर्य्यगाम्भीर्य्याऽऽदिभूपिततेजसामिति यावत्, अतिशयः आधिक्यं, विदग्धैः सुधीभिः, निर्ग्राह्यः निःशेषेणैव ग्रहीतुं शक्यः, सुबोध्य इति यावत्, न पुनरविदग्धैः अपण्डितैः, निर्ग्राह्य इत्यनेनान्वयः। एतस्मिन् बालके भूयांस एव विनयशिशुतासौन्दर्य्यविमिश्रिता महिमनिचया विद्यन्ते, तान् तु सुधियः विना अन्ये केऽपि सहसा ज्ञातुं न शक्नुवन्तीति भावः।
मनो मे इति।—यद्वत् यथा, परिलघुः अत्यल्पोऽपि, अयस्कान्तस्य लौहाऽऽकर्षकमणिविशेषस्य, शकलं खण्डं, अयोधातुं लौहं, हरति आकर्षति, तद्वदिति शेषः, मे मम, भगवान् अतिप्रबलः, सम्मोहः मुग्धता, बालस्यास्यालोक-

मनो मे सम्मोहं स्थिरमपि हरत्येष भगवान्
अयाधातुर्यद्वत् परिलघुरयस्कान्तशकलः ॥२१॥

लव । [प्रविश्य सगतम्] । अज्ञातनामक्रमाभिजनान् पूज्यानपि न खलु कथमभिवादयिष्ये ? [विचिन्त्य] । अयं पुनरविरुद्ध प्रकार इति वृद्धेभ्यः श्रूयते । [सविनयमुपसृत्य] । एष वो लवस्य प्रणामपर्य्यायः । (स)

सामान्यं महिमानमवलोक्य विस्मयविवशतेति यावत्, स्थिरमपि निश्चलमपि, निर्व्विकारमपीत्यर्थः, मनः चेतः, हरत्येव आकर्षत्येव, सतत वेदान्तशास्त्रादि समालोचनेन तपःसमाध्यनुष्ठानेन च सुस्थिरमपि चेतः मे इदानीं धैर्य्यं धारयितुं न शक्नोतीति भावः । ["सम्मोहं" इत्यत्र "सम्मादं" इति पाठान्तरं दृश्यते, एतद्दर्शनजनित आनन्दातिशय इति तु तदर्थः]। साद्दशामपि चेतसामाकर्षणात् मन्ये, अयं कोऽपि महामहिमशाली बालको भविष्यति इत्याशयः । [अत्र महिमाऽऽतिशय्यसम्पादने विनयादिगुणसङ्घानां तत्कारत्वेन समावेशात् समुच्चयालङ्कारः, अपि च विदग्धानां नियामकत्वेन व्यवस्थापनात् तद्भिन्नानाञ्च निषेधात् परिसङ्ख्यालङ्कारः, एवमयस्कान्तशकलेन सह बालकस्यास्य वैधर्म्यसाम्योपदेशाच्च श्रौती उपमाऽलङ्कारः । एतेषामलङ्कारत्रयाणां परस्परनिरपेक्षतया स्थितेः संसृष्टिः]। शिखरिणी वृत्तम् ॥२१॥

(स) अज्ञातेत्यादि ।—नाम—नामधेयं, क्रमः,—यथायोग्यम् अभिवादनपौर्व्वापर्य्यम्, अभिजनः,—वंशश्च, ते अज्ञाताः,—अविदिताः येषां तथोक्तान्, अभ्यागतानामेतेषां वृद्धानां नाम जातिं वंशञ्चाहं किमपि नाभिजानामीति भावः । न,—अस्माकं, पूज्यान्—पूजनीयानपि, सत्कारार्हानपीत्यर्थः, खलु,—खलु, कथं—केन प्रकारेण, अभिवादयिष्ये ?—वन्दयिष्ये ? नमस्करिष्यामीत्यर्थः । विचिन्त्य—चक्षु विभाव्य । अयं पुनः,—एष एव हि, अधुना स्मृतिपथे समुदित इत्यर्थः, अविरुद्धः,—अविगीतः, लोकतः शास्त्रतः धर्म्मतश्च अनिन्दितः इति यावत्, प्रकारः,—विधिः, भवतीति शेषः, इति—एवं, वृद्धेभ्यः,—प्राचीनगुरुभ्यः, श्रूयते—आकर्ण्यते । किं तत् ? एतदेवाह, एष इति ।—एषः,—इदानीमनुष्ठीयमानः, वः,—युष्मभ्यं, लवस्य—मे, प्रणामानां—नमस्काराणां, पर्य्यायः,—क्रमः, प्रणामपरम्परेत्यर्थः, अहन्तु युगपत् सर्व्वानेवाभिवादये, तत्र भवतां नामजात्यादिविशेषविज्ञानाभावात्, तत्तु कृपया भवन्तः स्वयमेव पौर्व्वापर्य्यक्रमेण गृह्णन्तु इत्याशयः ।

अरुन्धतीजनक्यौ। कल्याणिन्! आयुष्मान् भूयाः। (ङ)

कौशल्या। जाद! मे चिरं जीअ। *

अरु। एहि वत्स! [इति उत्सङ्गे कृत्वा स्वगतम्]। दिष्ट्या न केवलमुत्सङ्गः, चिरात् मनोरथो मे सम्पूर्णः। (क)

कौशल्या। जाद! इदो वि दाव एहि। [उत्सङ्गे कृत्वा] अम्महे! ण केअलं दरविअसन्तणीलुप्पलसामलुज्जलेण देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसघोसघग्घरदीहरसरेण अ रामभद्दमणुहरदि, णं कठिणकमलगब्भपक्खलो सरीरप्फसोवि तादिसो ज्जेव वच्छस्स॥ जाद! पेक्खामि दाव दे मुहम्। [चिबुकमुन्नमय्य निरूप्य सबाष्पाऽऽकूतम्]। राएसि! किं ण पेक्खसि, णिउणं णिरूविज्जमाणं से मुहं वच्छाए वहूए मुहचन्द्रेण संवददि ज्जेव? † (ख)

* जात! मे चिरं जीव।

† जात! इतोऽपि तावदेहि। अहो! न केवलं दरविकसन्नीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुहरति, ननु कठिनकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य॥ जात! प्रेक्षे तावत् ते मुखम्। राजर्षे! किं न प्रेक्षसे, निपुणं निरूप्यमाणम् अस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदति एव?

(ङ) कल्याणिन्—शुभयुक्त! आयुष्मान्—दीर्घायुः, भूयाः,—स्थेयाः, सुदीर्घं जीवन वर्त्तेथा इत्यर्थः।

(क) वत्स!—स्नेहाऽऽस्पद! एहि—मत्समीपमागच्छ। उत्सङ्गे—क्रोड़े, कृत्वा—संस्थाप्य, स्वगतम्—आत्मगतम्, आहेति शेषः। दिष्ट्या—भाग्येन, उत्सङ्गः,—क्रोडदेशः, केवलम्—एकमात्रं, न सम्पूर्णः,—न परिपूर्णतां गतः, चिरात्—बहुकालात् परम्, अपि तु मनोरथः,—सीतायाः सुतं स्वक्रोडे धारयिष्यामीत्यभिलाषः, सम्पूर्णः इत्यन्वयः।

(ख) जात!—वत्स! इतोऽपि—अस्मिन् ममापि उत्सङ्गदेशे, एहि—आगच्छ, अरुन्धत्याः इव ममापि उत्सङ्गदेशमलङ्कुरु इत्यर्थः। दरेत्यादि।—दरम्—

जनक। पश्यामि सखि! पश्यामि।

कौशल्या। अम्मो! उम्मत्तीभूदं विअ मे हिअअं किम्पि चिन्तअन्तो बहु विप्पलवदि। ☞(ग)

☞ छाया। उन्मत्तीभूतमिव मे हृदयं किमपि चिन्तयत् बहु विप्रलपति।

फुल्लन, विकसन—प्रस्फुटन यत् नीलोत्पलम्—इन्दीवरं, तद्वत् श्यामम्,—श्यामवर्णं, सम्‌ज्ज्वलं इत्यर्थः, उन्नतं—मुदीर्घञ्च तेन, देहबन्धेन—शरीरसंस्थानेन। कबलितान्यपि —चर्वितानि,—भक्षितानि, ये अरविन्दानां—पद्मानां, केसराः,— किञ्जल्काः, ("किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः), तैः कषायः,—रक्तः, सुमधुर इत्यर्थः, कण्ठः — कण्ठस्वरः यस्य तादृशः, यः कलहंसः —राजहंसः, तस्य निनादः इव—ध्वनिरिव, दीर्घदीर्घः,—दीर्घप्रकारः इत्यर्थः [प्रकारे गुणवचनस्य (८।१।१२ पा०) इति द्विर्भावः], सुदीर्घः इति यावत्, तेन, स्वरेण च—ध्वनिना च, रामभद्रं—रामचन्द्रम्, अनुहरति—अनुकरोति, अस्य बालस्य देहः यथा रामचन्द्रसदृशः सुनीलः समुन्नतश्च, तथा अस्य कण्ठस्वरोऽपि इति निष्कर्षः। ["हरतेर्गतताच्छील्ये" (वा०) इत्यनेन अनुपूर्व्वकात् हरतेः गत्यनुकारे एव आत्मनेपदमनुशिष्टम्, अत्र तु स्वरानुकरणपरकत्वात् नाऽऽत्मनेपदमिति ज्ञेयम्]। अपि चास्य देहस्पर्शोऽपि रामचन्द्रस्पर्शवदतिसुखकर एवेत्यावेदयति, ननिति।—कठिनस्य—कठोरस्य, परिपूर्णावयवस्येत्यर्थः, कमलस्य—पद्मस्य, यो गर्भः,—अभ्यन्तरभागः तद्वत् पक्ष्मलः,—सुकुमारः, [पक्ष्मशब्दात् मत्वर्थीयो लच्प्रत्ययः], शरीरस्पर्शोऽपि—देहस्पर्शोऽपि, तादृश एव—रामभद्रस्पर्शानुरूप एव, वत्सस्य—अस्य बालकस्य। जात!—वत्स! प्रेक्षे—पश्यामि, ते मुखं—तव वदनम्। चिबुकम्—अधरनिम्नभागम्, उन्नमय्य—उत्तोल्य मुखनिरीक्षणायेति भावः, निरूप्य—सविशेषं दृष्ट्वा, सबाष्पाऽऽकूतं—बाष्प—दुःखजनितास्रं, आकूतम्—अभिप्रायश्च, ताभ्यां सह वर्त्तमानं यथा तथा, वदति भावः, सीतानुतोऽयमिति विभाव्य वक्ष्यमाणमेतद्वचनमाहेति भावः। राजर्षे!—जनक! किं न प्रेक्षसे?—न पश्यसि किम्? निपुणं—सावधानं, पुङ्खानुपुङ्खं इत्यर्थः, निरूप्यमाणम्—निरीक्ष्यमाणम्, अस्य मुखं—बालकस्य वदनं वत्साया वध्वाः —सुपायाः सीतायाः, मुखचन्द्रेण—वदनेन्दुना, संवदति एव—अनुकरोति एव, तत्स्य प्रकटयत्येव इत्यर्थः।

(ग) अम्मो!—आश्चर्यम्! उन्मत्तीभूतमिव—विभ्रान्तमिव, एतस्मिन् बालके सीतारामप्रतिकृतिं दृष्ट्वा विभ्रान्तीभूतमिवेत्यर्थः, मे—मम, हृदयं—मानसं, किमपि

जनकः । [निरूप्य] ।—

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
सम्पूर्णप्रतिबिम्बितेव निखिला सैवाऽऽकृतिः सा द्युतिः ।

आचिन्तितं यथा, चिन्तयन्—पुनिशं भावयन्, बहु—नानाविधं, विप्रलपति—परिदेवयति, किंविद् तत्कथित इत्यर्थः, सीतासुतोऽयमिति मनाशङ्का मद्धृदयं नितरां विवशमिव भवतीति भावः ।

अथ बालके चैतस्मिन् सीतारामयोः सर्वथा शरीरस्यावयवादीनां साम्यं प्रकटयति, वत्सायाश्चेति ।—अस्मिन् शिशौ कुमारे, वत्सायाः सीतायाः, रघूद्वहस्य रघूणामपत्यानि पुमांसः रघवः, ["जनपदशब्दात् क्षत्रियादञ्" (४।१।१६८ पा०) इत्यञ्, "तद्राजस्य बहुषु तेनैवास्त्रियाम्" (२।४।६२ पा०) इत्यञो लुक् बहुत्वञ्च], तेषामुद्वहः धुरन्धरः तस्य, रामस्य चेत्यर्थः, निखिला समग्रा, सैव तादृश्येव, आकृतिः अवयवसंस्थानं सा द्युतिः तथाभूतैव कान्तिः, [एव तच्छब्दस्य प्रसिद्धार्थकतया यच्छब्दस्यापेक्षा नास्तीति ज्ञेयम्], सम्पूर्णं समग्रं, अविकलं यथा तथेत्यर्थः, प्रतिबिम्बिता एव प्रतिफलिता एव, [प्रतिबिम्बमस्याः सञ्जातमित्यर्थे "तदस्य सञ्जातम्"—(५।२।३६ पा०) इति इतचि टाप् चेति ज्ञेयम्]। अभिव्यज्यते लक्ष्यते, सीतायाः रामस्य च शरीरलावण्ययोः सम्यगेव साम्यमेतस्मिन् बालके परिलक्ष्यते इति भावः । अपि च नैसर्गिका गुणा अपि दर्पणादौ छायापात इवास्मिन् शिशौ सङ्क्रान्ता इति प्रदर्शयति, सेति ।—सा वाणी तत्सदृशमेव वचनं, स एव विनयः तदनुरूप एव नम्रभावः, असावपि सहजः स्वाभाविकः, अकृत्रिम इति यावत्, पुण्यानुभावः पवित्रः प्रभावः, अभिव्यज्यते इत्यनेनान्वयः । अथवा दुराकाङ्क्षया प्रतारित एवाहमत्र तर्कयामि, इत्यनुशोचति, हा हेति ।—हा हा दैव ! अहो भागधेय ! पारिप्लवं चञ्चलं, सीतारामयोः आकृतिसाम्यमवलोक्य तयोरेवायं पुत्रो न वा इति निर्णेतुमसमर्थतया अतीव व्याकुलमिति यावत्, मम मनः चेतः, किं कथम्, उत्पथैः विपरीतमार्गैः, असम्भव-कल्पनापथैरित्यर्थः, [उत्क्रान्ताः पन्थानः इति विग्रहः "ऋक्पूरब्धूःपथामानक्षे" (५।४।७४ पा०) इति समासान्तः अप्रत्ययः], धावति ? द्रुतं गच्छति ? सीतायाः असत्त्वेन तदपत्योत्पत्तेरतीवासम्भावितत्वात् केवलं तदाकृतिसादृश्येन तत्सुत एवायमिति विभाव्य मानसं मे कथं किं नियतं पर्याकुलीभवतीति न जाने इति भावः । रघौ एतदनुरूपं श्लोकं दृश्यते, यथा,—

"रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्" ॥ इति ।

सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ,
हा हा देव! किमुत्पथैर्मम मनः पारिप्लव धावति? ॥ २२ ॥

कौशल्या। अत्थि दे मादा? सुमरसि वा तादं? * (घ)

लव। न हि न हि। (ङ)

कौशल्या। तदो कस्स तुमं? † (च)।

लव। भगवतो वाल्मीकेः। (छ)

कौशल्या। अइ जाद! कहिदव्वं कहेहि। ‡ (ज)

* अस्ति ते माता? स्मरसि वा तातम्?

† ततः कस्य त्वम्?

‡ अयि जात! कथयितव्यं कथय।

[अत्र वाक्कल्यादीनां तत्त्वतः भेदेऽपि तद्रूपत्वेनाभेदाध्यवसायात् भेदे अभेदरूपाऽति शयोक्तिरलङ्कारः। अभिव्यज्यते इत्येकयैव क्रियया सर्वेषां प्रस्तुतानामाकल्यादी नामभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः। अपि चोत्पथधावति इत्यनेन मद्या शङ्कितसातोऽभावरूपादस्य गम्यस्य वस्तुनः अभिधानात् पर्य्यायोक्तिरलङ्कारः, एतेषाञ्च परस्परनापेक्षतया स्थितेः सङ्करः]। शार्दूलविक्रीडितं वृत्तम् ॥ २२ ॥

(घ) तात—जनकं वा, स्मरसि?—जानासि? तव मातापित्रौ किं नाम धेयम्? इति भावः तयोर्नामाभिज्ञानेन त्वसन्देहानरामौ भविष्यति इत्यभिप्रायः।

(ङ) न हि न हि—मातरं पितरञ्चाहं नाभिजानामीत्यर्थः। ज्ञानाऽऽविर्भावात् प्रभृत्येव वाल्मीकेराश्रमे अवस्थानात् तावुभावपि विशेषतो विज्ञातुं नाप्नोमीति भावः।

(च) ततः,—तस्मात् कारणात्, मातापित्रोरसन्निधानादेवेति भावः। कस्य—कस्य जनस्य सत्त्वावधानेनेत्यर्थः, त्वं, वर्त्तसे इति शेषः।

(छ) भगवतः वाल्मीकेः,—भगवतो वाल्मीकेः यत्नादेवाहं सवर्द्धितः, संरक्षितश्च भवामीति भावः।

(ज) कथयितव्यं—कथनीयं, कथय—ब्रूहि, यदेवास्माभिस्त्वमभिपृच्छ्यसे, यदि जानासि, तर्हि तत् यथातथमेवाभिधेहि, मा तत् कपटवचनेन संगोपायेति भावः

लव। एतावदेव जानामि। (झ)

[नेपथ्ये]। भोः भोः सैनिकाः! एष खलु कुमारश्चन्द्रकेतु-राज्ञापयति, न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति। (ञ)

अरुन्धतीजनकौ। अये! मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुरद्य द्रष्टव्य इत्यहो! सुदिवस। (ट)

कौशल्या। वच्छलक्खणस्स पुत्तओ आणवेदित्ति अमिअ-बिन्दुसुन्दराइ अक्खराइ सुणीअन्ति। * (ठ)

लव। आर्य्ये! क एष चन्द्रकेतुर्नाम? (ड)

---

* वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते।

(झ) एतावदेव—एतत्पर्य्यन्तमेव, जानामि—वेद्मि, वाल्मीकेरन्यत् किमपि मातापित्रादिविषयकं वृत्तान्तजातं नाहमवगन्तुमाप्नोमीति भाव।

(ञ) सैनिका!—सेनासमवेता पुरुषा, सेनाभटा इत्यर्थः। चन्द्रकेतु,—लक्ष्मणाऽऽत्मज, आज्ञापयति—आदिशति। केनचित्—युष्मत्सु केनापि सैनिकेन, आश्रमाभ्यर्णभूमि,—आश्रमस्य—वाल्मीकितपोवनस्य, अभ्यर्णा—निकटवर्त्तिनी, [अभि पूर्व्वकादर्दते निष्ठायां रूपम्], या भूमि,—प्रदेश, तपोवनोपान्तभूभिभाग इत्यर्थ, न आक्रमितव्या—न निरोद्धव्या, आश्रमसमीपं गत्वा तरुलताऽऽदीनां छेदनेन तत्र काऽपि बाधा न जननीया, मुनीनां गौरवात् तत्र शान्तिश्च सर्व्वथा संरक्षणीयेति भाव।

(ट) मेध्येत्यादि।—मेध्यस्य—पवित्रस्य, अश्वमेधीयस्येत्यर्थ, अश्वस्य—वाजिन, रक्षा—संरक्षण, तस्य प्रसङ्गात्—अनुरोधात्, अश्वमेधीयाश्वसंरक्षितुमित्यर्थ, उपागत,—अत्र देशे समुपस्थित, वत्स,—आयुष्मान् चन्द्रकेतु,—लक्ष्मणाऽऽत्मज, द्रष्टव्य,—आलोकितव्य। अहो! सुदिवस —शोभनं दिनम्, आपतित इति शेष। सौभाग्योदयात् सुप्रभातमिदं समुदितमिति भाव।

(ठ) अमृतबिन्दुसुन्दराणि—अमृतस्य—पीयूषस्य, ये बिन्दव,—पृषता, ते इव सुन्दराणि—रम्याणि, श्रवणसन्तर्पणानीत्यर्थ, अक्षराणि—वर्णसमुदया, आज्ञापयतीत्यन्तवाक्यघटकवर्णसमष्टय इत्यर्थ, श्रूयन्ते—आकर्ण्यन्ते, पौत्राणां गौरवसूचकानि वचनानि पुत्रिभि नितरां सुमधुरतयैवाऽऽस्वाद्यन्ते इति भाव।

(ड) चन्द्रकेतुर्नाम—चन्द्रकेतुरित्याख्यया प्रसिद्ध, क एष?—कस्य सुत? को वेदं वाऽयमधिकरोतीति भाव।

जनक । जानासि रामलक्ष्मणौ दाशरथी ? (ढ)

लव । एतावेव रामायणकथापुरुषौ ? (ण)

जनक । अथ किम् । (त)

लव । तौ कथं न जानामि ? (थ)

जनक । तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः । (द)

लव । ऊर्मिलापुत्रः, तर्हि मैथिलस्य राजर्षेर्दौहित्रः ? (ध)

अरु । [विहस्य] । आविष्कृतं कथाप्रावीण्यं वत्सेन । (न)

जनक । [विचिन्त्य] । यदि त्वमीदृशः कथायामभिज्ञः, तद्ब्रूहि तावत्, पृच्छामः,—तेषां दशरथाऽऽत्मजानां किन्नामधेयानि अपत्यानि केषु केषु दारेषु प्रसूतानि ? (प)

(ढ) जानासि ?—वेत्सि ? दाशरथी—राज्ञः दशरथस्य तनयौ ।

(ण) रामायणकथापुरुषौ—महर्षिवाल्मीकिप्रणीतरामायणाऽऽख्यमहाकाव्यस्य प्रधानपात्रभूतौ, एतावेव—भवदुक्तौ वीरौ रामलक्ष्मणावेव, भवतः किम् ? इति शेषः ।

(त) अथ किं—यदेवोक्तं भवता, एतत्तु तदेवेत्यर्थः, एतावेव रामायणकथानायकौ इत्याशयः ।

(थ) तौ—रामायणकथापुरुषौ, कथं न जानामि ?—किं न वेद्मि ? अधीतरामायणस्य मे एतयोर्नामरूपविज्ञानं विशेषतश्चास्तीति भावः ।

(द) तस्य—रामायणकथाप्रसिद्धस्येत्यर्थः, लक्ष्मणस्य—सौमित्रेः, आत्मजः,—तनयः, चन्द्रकेतुः,—तदाख्यः कुमारः, भवतीति शेषः ।

(ध) तर्हि—तथात्वे, चन्द्रकेतोर्लक्ष्मणाऽऽत्मजत्वे इत्यर्थः, ऊर्मिलापुत्रः,—तन्नाम्न्याः लक्ष्मणपत्न्याः तनयः, मैथिलस्य—मिथिलाऽधिपस्य, राजर्षेः,—जनकस्य, दौहित्रः,—दुहितुः तनयः ।

(न) आविष्कृतं—प्रकटीकृतं, कथाप्रावीण्यं—रामायणकथायाम् आत्मनः अभिज्ञत्वं, चन्द्रकेतौ रामायणनिबद्धयोः मातृमातामहयोः नामसमुल्लेखादिति भावः ।

(प) कथायां—रामायणाऽऽख्याने, ईदृशः,—एवम्प्रकारः, अभिज्ञः,—विचक्षणः, तत्—तदा, ब्रूहि—कथय, पृच्छामः,—जिज्ञासामहे, तेषां—प्रसिद्धानां, दशरथाऽऽत्मजानां—रामादीनाम्, [अत्र शेषे षष्ठी, अपत्यानीत्यनेनाभिसम्बन्धात्],

लव । नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्वः । (फ)

जनक । किं न प्रणीत एव कविना ? (ब)

लव । प्रणीतः, न तु प्रकाशितः । तस्यैव खल्वपि कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः, तच्च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भरतस्य मुनेस्तौर्य्यत्रिकसूत्रकारस्य । (भ)

किन्नामधेयानि—किमाख्यानि, अपत्यानि—सुताः, रामादीनां के के पुत्रा इति तु तदर्थः, केषु केषु दारेषु—पत्नीषु, प्रसूतानि—सञ्जातानि, किमाख्यपत्नीगर्भसम्भूता नीत्यर्थः रामादीनां के के सुताः किमाख्यासु पत्नीषु समभूवन् इति स्पष्टार्थः । [सूतेः सकर्मकत्वेऽपि अकर्मकत्वविवक्षया कर्त्तरि निष्ठेति ज्ञेयम्]।

(फ) कथाप्रविभागः—भवत्पूर्वोक्तवृत्तस्य अंशविशेषः, अन्येन—मद्भिन्नेन केनापीत्यर्थः, श्रुतपूर्व्वः, [पूर्व्वं श्रुतः, "सुपा" (२।१।४ पा०) इति समासः पूर्व्वनिपातश्च], इतः प्रागाकर्णित इत्यर्थः, यदंशे भगवता वाल्मीकिना राघवादीनामपत्योत्पत्तिविवरणमुपनिबद्धं, तदंशोऽस्माभिरन्येन वा इदानीमपि न आकर्णित इति भावः ।

(ब) कविना—वाल्मीकिना, किं न प्रणीतः ?—न विरचितः ? अथ तन्निखिलाऽऽख्यानभागोऽपि भवान् यतस्तत् कथयितुं न शक्नोतीति भावः ।

(भ) प्रणीतः,—विरचितः, न तु प्रकाशितः,—किन्तु अस्माकं श्रुतिगोचरतां न नीतः । तस्यैव—दशरथसुतानामपत्यविवरणांशस्यैव, एकदेशः,—भागविशेषः, सन्दर्भान्तरेण—अन्येन केनचित् प्रबन्धेन, दृश्यकाव्यरूपेणेत्यर्थः, रसवान्—करुणविप्रलम्भाऽऽद्यरसयुक्तः, अभिनेयार्थः,—अभिनेयः,—अभिनयेन प्रयोज्यः, नटाद्यैरनुकरणादिना प्रकाश्य इत्यर्थः, अर्थः,—इतिवृत्तरूपं वस्तु यस्य तथाविधः,—"भवेदभिनयोऽवस्थाऽनुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा ॥" इति दर्पणः । कृतः,—रचितः, तद्भागमवलम्ब्य किमप्येकं दृश्यकाव्यं विरचितमिति भावः । तच्च—भागविशेषं, स्वहस्तलिखितं—स्वकरेणैवाङ्कितं, न तु शिष्याऽऽदीनामिति भावः, तत्तु नाटकस्यैतस्य समग्राऽङ्कवृत्तं वस्त्वेवेति ज्ञेयम् । मुनिः,—वाल्मीकिः । व्यसृजत्—प्रेषितवान्, अभिनेतुमित्यर्थः । भरतस्य मुनेः,—तदाख्यस्य ऋषेः, तौर्य्यत्रिकसूत्रकारस्य—नृत्यगीतवाद्यादित्रयात्मकस्य नाट्यशास्त्राख्यस्य ग्रन्थविशेषस्य रचयितुः, नाट्यशास्त्रनामधेयेन ग्रन्थविशेषेण नृत्यादीनां नियमसमुदायानां प्रवर्त्तयितुरित्यर्थः, ("तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम्" इत्यमरः) । ["तूर्य्यं—

जनक। किमर्थम्? (म)

लव। स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति। (य)

जनक। तत् ... आकामिदमाकूतकरम्। (र)

लव। महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था, केषाञ्चिदन्तेवासिनां हस्तेन तत् पुस्तकं भरताऽऽश्रमं प्रति प्रेषितम्। तेषामानुयात्रिकश्चापपाणिरप्रमादार्थमस्मद्भ्राता प्रेषित। (ल)

कौशल्या। जाद। भादा नि दे अत्थि?

* जात। भ्राताऽपि तेऽस्ति?

मुरजादि, तव भव तौर्य्यं, वय ... अस्येति त्रिक, तौर्य्योपलक्षित त्रिकमिति ' तौर्य्यत्रिकम्" इत्यमरटीकायां महेश्वर]।

(म) किमर्थं—कस्मै इदम् [इति नित्यसमास], कथं हि त सन्दर्भं भरतस्य व्यसृजत् मुनिरित्यर्थ।

(य) त—सन्दर्भम्, अप्सरोभि,—अभिनेत्रीभि उर्व्वशीप्रभृतिभि, [प्रयोज्य कर्त्तरि], प्रयोजयिष्यति—अभिनाययिष्यति।

(र) तदिद सर्व्वं—भवदुक्तं "प्रणीत, न तु प्रकाशित" इत्यादि "अप्सरोभि प्रयोजयिष्यतीति" इत्यन्त वृत्तान्तजातमित्यर्थ, आकूतकर—कौतूहलजनकमित्यर्थ; अत्र कस्यापि आश्चर्यजनकव्यापारस्य निगूढ विद्यमानत्वादित्याशय।

(ल) तस्मिन्—अभिनेयसन्दर्भे, आस्था—यत्न, आदरातिशय इत्यर्थ, अन्तेवासिनाम्—अन्ते—गुरुसमीपे, वसन्ति ये तेषा, शिष्याणामित्यर्थ, तत्पुस्तकम्—अभिनेतव्य वस्तु इति यावत्, प्रेषित—प्रेरितम्। तेषाम्—अन्तेवासिनाम्, आनुयात्रिक,—अनु पश्चात्, यात्रा प्रयाण, प्रयोजनमस्येति ['प्रयोजनम्" (५।१।१०९ पा०) इति ठञ्], अनुयायीत्यर्थ, चापपाणि,—कार्मुकहस्त, अप्रमादार्थम्—अप्रमाद,—प्रमादस्य—अनवधानताया, अभाव', [इत्यव्ययीभाव], सावधानतेत्यर्थ, तदर्थम्, अनवधानताजन्यविपत्ते निरासार्थमिति यावत्। प्रेषित,—प्रेरित, ... नेति शेष।

लव। अस्ति आर्य्यः कुशो नाम।

कौशल्या। जेट्ठो त्ति भणिदं होदि ? * (व)

लव। एवमेतत्, प्रसवक्रमेण स किल ज्यायान् इति। (श)

जनक। किं यमजावायुष्मन्तौ ? (ष)

लव। अथ किम्। (स)

---

* ज्येष्ठ इति भणित भवति ?

(व) ज्येष्ठ,—ज्यायान् भ्राता, भणित भवति—उक्त भवति, आर्य्य इति कथनेन भ्रातु ज्येष्ठत्वप्रतीतारिति भाव।

(श) एवमेतत्—भवत्या ज्येष्ठ इति यदुक्त, तत्सत्यमेवेत्यर्थ, प्रसवक्रमेण—सातत उत्पत्तिक्रमेण, ज्यायान्—ज्येष्ठ, [वृद्धशब्दात ईयसुनि "वृद्धस्य च" (५।३।६२ पा०) इति ज्याऽऽदेश। यमजया प्राक्प्रसूतत्वे एव ज्येष्ठत्वम्, तथा हि देवल,—

"वह्निर्वर्णेषु चारित्रात् यमयो पूर्व्वजन्मत।
यस्य जातस्य यमयो पश्यन्ति प्रथम मुखम्।
सन्तान पितरश्चैव तस्मिन् ज्येष्ठ्य प्रतिष्ठितम्॥" इति।

अपि च भगवान् मनु,—"यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता मता।" इति। "जन्मप्राथम्यादेव ज्येष्ठ्य यमजयो, न तु निषेकप्राथम्यात" इति तु व्याख्या।

(ष) आयुष्मन्तौ—कल्याणिनौ, युवामिति शेष, किं यमजौ ?—युग्मजातौ ? भवत इति शेष, यत प्रसवक्रमेण ज्येष्ठत्वम् अभिदधासि इति भाव।

(स) अथ किम्—एवमेतदित्यर्थ, इति तु स्वीकारार्थकमव्ययं ज्ञेयम्। कुशलवाविति नाम्न कारण यमजत्वञ्चोक्त रामायणे यथा,—

"यस्तयो पूर्वजो जात स कुशैर्मन्त्रसत्कृतै।
निर्मार्जनीयस्तु तदा कुश इत्यस्य नाम तत्॥
यश्चावरो भवेत्ताभ्या लवेन सुसमाहित।
निर्मार्जनीयो वृद्धाभिर्लवेति च स नामत॥
एवं कुशलवौ नाम्ना तावुभौ यमजातकौ।
मत्कृताभ्याञ्च नामभ्या ख्यातियुक्तौ भविष्यत॥"

इति (वा० रा० उ० का० ७८ सर्ग ७—९ श्लोका.)।

जनक। कथय, कथाप्रबन्धस्य कीदृशः पर्य्यन्तः ? (ङ)।

लव। अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां देवयजनसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति। (क)

कौशल्या। हा हा वच्छे मुद्धचन्दमुहि। की दाणिं दे कुसुमभूदस्स सरीरस्स देव्वदुव्विलासपरिणामो एआइणीए णिवडिदो॥ * (ख)

* हा हा वत्से मुग्धचन्द्रमुखि। क इदानीं ते कुसुमभूतस्य शरीरस्य दैवदुर्विलासपरिणाम एकाकिन्या निपतितः॥

(ङ) कथय—अभिधेहि, कथाप्रबन्धस्य—रामायणाऽऽख्यसन्दर्भविशेषस्य, कीदृशः,—किम्प्रकारः, पर्य्यन्तः,—शेषभागः, यदि रामायणकथायां अस्मै सीताविषयिका कथा किञ्चित्यपि महर्षिणा उपनिबद्धा भवेत्, तदा सा इदानीं कीदृशी वर्त्तते, तस्याः अपत्यं जातं न वा, जातञ्चेत् केन वा परिरक्षितम्, अयञ्च तत्सुतो न वा इत्याद्यवश्यज्ञातव्यविषयोऽस्माभिः साकल्येन परिगृहीतो भवेदिति तु प्रष्टुराशयः।

(क) अलीकेति।—अलीकः,—मिथ्याभूतः, यः पौराणां—पुरवासिनां, प्रवादः,—कौलीनं, चारित्र्यापवाद इति यावत्, तेन उद्विग्नः,—व्याकुलः तेन, अयथार्थपौरापवादेन किल विवेकशून्यमनसेत्यर्थः, राज्ञा—रामचन्द्रेण, निर्वासितां—परिवर्ज्जिताम्, देवयजनसम्भवां—देवाः इज्यन्ते अस्मिन्निति देवयजनं—यज्ञभूमिः, तस्मात् सम्भवः,—उत्पत्तिः यस्याः तां, यज्ञभूमिसमुत्थितामित्यर्थः, आसन्नप्रसववेदनाम्—आसन्ना—समीपवर्त्तिनी, प्रसवस्य—गर्भविमोचनस्य, वेदना—यातना यस्याः तां, पूर्णगर्भतया समधिककातरामिति यावत्, एकाकिनीम्—असहायां, सीतादेवीं—जानकीम्, अरण्ये—जनस्थानाऽऽख्ये वने, परित्यज्य—रथादवतार्य्य, निर्व्वास्येत्यर्थः, प्रतिनिवृत्तः,—प्रत्यायातः, अयोध्यामिति शेषः। इति—इत्यन्त एव कथाप्रविभाग इति भावः।

(ख) मुग्धचन्द्रमुखि।—मुग्धः,—मनोहरः, यः चन्द्रः,—शशधरः, स इव मुखं—वदनं यस्याः तस्याः सम्बोधने, हा राकाशशाङ्कसौम्याऽऽनने। इत्यर्थः। कुसुमभूतस्य—कुसुमे,—पुष्पे, भूतस्य—तुल्यस्य, अतिकोमलस्येत्यर्थः, ("युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु" इत्यमरः) शरीरस्य—देहस्य, कः,—अनिर्वचनीयः,

जनकः । हा वत्से !—

नूनं त्वया परिभवश्च नवश्च घोरः
तां च व्यथां प्रसवकालकृतामवाप्य ।
क्रव्याद्गणेषु परितः परिवारयत्सु
सन्त्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि ॥ २३ ॥

अतिभयाऽऽवहः इत्यर्थः, दैवदुर्विलासपरिणामः,—दैवस्य—भाग्यस्य, दुः,—दुष्टः, अशुभफलोत्पादनानुकूल इति यावत् यः विलासः,—व्यापारः, क्रीडेति यावत्, तस्य परिणामः,—परिपाकः, एकाकिन्याः,—असहायायाः, ते—तव निपतितः,—सञ्जातः, कुसुमसुकुमारशरीरायाः सहायशून्यायाश्च तव निर्जनारण्ये ईदृक् दुर्दैवविलासप्रसूतः असम्भावितः विषमः परिणामः नितरां दुर्विषह एवेति निष्कर्षः ।

अथ सहायहीनायाः सीतायाः तत्कालसम्भूतां तादृशीं घोरां विपत्तिं सम्भाव्यत्यय-मनुशोचति, नूनमिति ।—हा वत्से ! आयुष्मति सीते ! नूनं निश्चितं, त्वया भवत्या, नवश्च अननुभूतपूर्वश्च, इतः प्राक् ईदृग्याः दुर्गतेः कदाऽप्यननुभूतत्वादित्याशयः, घोरश्च दुर्विषहश्च, परिभवः तिरस्कारः, चारित्रदोषापवादेन अकारणनिर्वासनजनितां विमाननामित्यर्थः, स्त्रीणां चारित्रापवादात् अन्यत् भयङ्करं दूषणं किमपि नास्तीति ध्येयम् । प्रसवकालकृतां प्रसवक्षणसम्भूतां, तां तादृशीम्, उत्कटामित्यर्थः, व्यथां च वेदनां च, अवाप्य लब्ध्वा, क्रव्याद्गणेषु आममांसभोजिषु श्वापदजन्तुसमूहेषु इति यावत्, परितः समन्तात्, परिवारयत्सु परिवेष्टनानेषु सत्सु, सन्त्रस्तया अतिभयाऽऽर्त्तया, त्वया सीतया, शरणमिति रक्षिता रक्षितेत्युक्त्वा, "तात ! अशरणा रक्ष माम्" इति कृत्वा इति यावत्, असकृत् वारं वारं, स्मृतः आहूत इत्यर्थः, अस्मि भवामि, अहमिति शेषः । जनशून्ये वने समुत्कटां प्रसववेदनामनुभवन्ती त्वं श्वापदभयाऽऽकुला सती रक्षितारं मामनिशं सम्बोध्य नूनं भृशं क्रन्दितवत्यसि, इत्यहो ! धिक् ! मामधन्यं तादृशत्वद्दुःखनिराकरणापटीयांसमिति भावः । यद्यपि स्वाजनः प्रायशः विपत्तौ समुपस्थितायां पितरमिव मातरमप्यनुस्मरतीति प्रसिद्धिः, तथाऽप्येवं तु दुहितरि वात्सल्याऽऽधिक्यमस्त्यादेव जनकः स्वनामोत्कीर्त्तनपुरःसरमेवासौ नाम स्मरेदिति वितर्कितवानिति ध्येयम् । [अत्रावाप्येत्येकयैव क्रियया प्रस्तुतयोः व्यथापरिभवरूपयोः पदार्थयोरभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः, न तु "स्मृतोऽस्मि" इत्यनेन सम्भावितत्वेनाभीप्सितायाः स्मर्यमाणत्वरूपतयोत्कीर्त्तनात् प्रकृतसम्भावनाविरहादेव नूनमिति पदसत्त्वेऽपि उत्प्रेक्षाऽलङ्कारः, इति ध्येयम्] वसन्ततिलकं वृत्तम् ॥ २३ ॥

लव। [अरुन्धतीं प्रति]। आर्य्ये। कावेतौ? (ग)

अरु। इयं कौशल्या, अयं जनकः।

लव। [सबहुमानखेदकौतुकं पश्यति]। (घ)

जनक। अहो! दुर्मर्य्यादता दुरात्मनां पौराणाम्। अहो! रामस्य राज्ञः क्षिप्रकारिता।। (ङ)—

एतद्वैशसघोरवज्रपतनं शश्वन्ममोत्पश्यतः
क्रोधस्य ज्वलितुं धृगित्यवसरश्चापेन शापेन वा।—"(२४)

(ग) आर्य्ये!—पूज्ये! एतौ—मम पुरतः स्थितौ, सीताकृते निर्भरं विलपन्तौ, मयि च सातिशयं स्निह्यन्तावित्यर्थः, कौ—किन्नामधेयौ, भवत इति शेषः।

(घ) सबहुमानखेदकौतुकं—महापुरुषस्य रामस्य मातुः श्वशुरस्य च दर्शनात् देवं बहुमानं, तयोश्च शोकविवशभावमवलोक्य स्वस्य खेदः, प्राक् गुरुसकाशात् समधीतयोः रामायणकथाऽन्वितयोः तयोः साक्षाद्दर्शनादेव आत्मनः कौतुकं, तैः सह वर्त्तमानं यथा तथा, पश्यति—अवलोकयति, ताविति शेषः।

(ङ) दुरात्मनां—दुर्वृत्तानां, वृथाऽपवादकारितया पापदूषितचेतसामित्यर्थः, पौराणाम्—अयोध्यावासिजनानां, दुर्मर्य्यादता—दुष्टा मर्य्यादा येषां तेषां भावः, तत्ता, मर्य्यादाऽतिक्रम इत्यर्थः, सदाचारोल्लङ्घनात् न्याय्यपथविच्युतिरिति यावत्, यतो हि ते महात्मनां वाल्मीकिप्रभृतीनां वचांसि अविगणय्य निर्द्दोषायामपि सीतायाम् अलीकदोषमुद्भाव्यानर्थजातमेव समुत्पादितवन्तः इत्याशयः। रामस्य राज्ञः,—प्रजापालकस्य, जनोऽयं सापराधो निरपराधो वा इति विशेषं विमृश्यैव तत्र निहितदण्डस्येत्यर्थः क्षिप्रकारिता—क्षिप्र—सहसा, अविविच्येत्यर्थः, कर्त्तुं शीलं यस्य तस्य भावः तत्ता, अविमृश्यकारितेत्यर्थः, यदि हि नवीनो राजा रामचन्द्रः अग्निपरिशुद्धायाः सीतायाः अपवादस्यालीकतां जानन्नपि केवलं निखिलप्रजारञ्जनमनुरुध्य कतिपयानां दुर्जनानां वचांसि चाविगणय्य वृद्धैरमात्यवर्गैः सह परामृश्य कृत्वा कार्य्यमकरिष्यत्, तदा नूनमिदमनर्थजातं नोदपत्स्यतेति भावः।

अधुनाऽपि दुष्कृतां रामादीनां पौराणाञ्च तथाविधान्याय्याऽऽचरणस्य प्रतीकारं कर्त्तुमीहमानाह, एतदिति।—एतत् ज्ञातानिष्टावसानरूपं, वैशसघोरवज्रपतन—विशसनं हिंसा तत्र विशसं घातकं, तस्य यत् कर्म तत् वैशसं हिंसनमित्यर्थः, तदेव घोरं भीषणं, वज्रपतनम् अशनिनिपात इव तत्, तीक्ष्णकुलिशप्रपतनतुल्यमतीव

कौशल्या। भअवदि! परित्ताहि परित्ताहि, पसादेहि कुविदं राएसिं। * (च)

अरु। एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्।

राजन्! अपत्यं रामस्ते पाल्याश्च कृपणाः प्रजाः ॥२५॥

* भगवति! परित्रायस्व परित्रायस्व प्रसादय कुपितं राजर्षिम्।

भ्राऽऽवह सीतानिर्व्वासनरूपं क्रूरं कर्म्म इत्यर्थ, सीताविवासनं हि हत्याकाण्डवत् दारुणानुष्ठानमित्याशय, शश्वत् निरन्तरम्, उत्पश्यत आलोकयत, मुहुर्मुहु चिन्तयत इत्यर्थ, मम अतकस्य, क्रोधस्य कोपानलस्य, चापेन धनुषा, शापेन वा अभिसम्पातेन वा, धगिति धग् धग् इत्यव्यक्तानुकरणं शब्दं कृत्वा, ज्वलितुं दहनार्थं प्रज्वलीभवितुमित्यर्थ, अवसर समय, समुपस्थित इति शेष, ["कालसमयवेलासु तुमुन्" (३।३।१६७ पा०) इति तुमुन् प्रत्यय]। एतत् निर्व्वासनरूपं घोरं दौरात्म्यं पश्यत चच्चियस्य मम कोपानलः ज्वालामालाऽऽकुलः सन् प्रथमतः प्राक्परिशीलितेन चापेन, पश्चाच्च राजर्षे मे नियततपोऽनुष्ठानजनितप्रभावात् शापेन सरामानितान् पौरजनान् सहसा दग्धाकमुपस्थितोऽस्तीति भाव। [अत्र एतद्दैर्व्वसे वज्रनननलाभेदाऽऽरोपात् निरङ्गं रूपकमलङ्कार, क्रोधस्य ज्वलनासम्बन्धेऽपि तत्सम्बन्धत्वेनाक्कीर्त्तनादसम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारश्च। एतत् श्लोकस्य पूर्व्वार्द्धे, पराऽऽर्द्धार्थे द्रष्टव्यमिति ॥ २४ ॥

(च) भगवति।—ऐश्वर्य्यवति। अरुन्धति। इति शेष, परित्रायस्व—रक्ष, राजर्षे कोपानलात् सर्व्वान् प्रकृतिजनानिति शेष, [सम्भ्रमे द्विरुक्ति]। प्रसादय—परिसान्त्वय, कुपितं—क्रुद्ध, राजर्षिं—जनकम्, अन्यथा कुपितोऽयं राजर्षिं जनक, चापेन शापेन वा सर्व्वेषां नूनं सक्षयं करिष्यतीति भाव।

अथ प्राक् पापिनां दण्डविधानस्यौचित्यं कथञ्चित् समर्थ्य, पश्चात् अपत्यभूतेषु दीनेषु च जनेषु तस्य परीहारं प्रार्थयमाना अरुन्धती राजर्षे कोपमुपशमयितुं प्रयतते, एतद्धीति।—परिभूतानां तिरस्कृतानाम्, अन्यैरवमानितानामित्यर्थ, मनस्विनां प्रशस्तमनसाम्, उदारचेतसामित्यर्थं, हि निश्चितम्, एतत् चापग्रहणं शापदानं वा, चापशापादिभि दण्डविधाने वैरनिर्य्यातनमिति यावत्, प्रायश्चित्तं पापक्षयमात्रसाधनं, स्वावमाननाप्रतिकारसाधनमिति यावत्, भवतीति शेष। इत्थं हि मानिन भवादृशा पापप्रसरम् असहमाना दुर्वृत्तानां यथायोग्यं दण्ड

विधाय दुर्वृत्तिप्रवाहानुपशम नयन्ति, स्वयञ्च प्रसाद लभन्ते इति भाव। तत्पश्चेव तस्य स्खलविशेषे परीहारस्य न्याय्यत्व प्रतिपादयति, राजन्निति।—राजन्। हे राजर्षे जनक। राज्ञ ते अपत्य पुत्रभूत एव, मानाहत्वात् सुहृत्सुतत्वाच्चेति भाव, कृपया दीना सतत हि दयार्हा इत्यर्थ, प्रजा प्रकृतय, पाल्याय रक्षणीयाय, चेदाऽस्मदीयेतेषु वराकेषु च हि अपराधिष्वपि मनस्विन अपराधशतानि सहन्ते, अता ना। ते क्रोधस्यावसर परिहरणीय खल्वेत्याशाविल्याशय। यद्वा,—परिभूतानाम् अवमानितानां मनस्विनां मानधनानां चित्त मन, प्राय बाहुल्येन, एतत दुःखम् भवति मानिनो हि तिरस्कृता सन्त प्रायश्चित्य प्रतिविधान कर्तुं यतन्ते इति भाव अथवा—मनस्विना धीराणा परिभूतानाम् अवमानितानां, कथञ्चित् प्रमादेन अनन्यकार्यकरणात पर लोके निर्भर्त्सितानां सतानित्यर्थ, एतद्धि एतदेव, भवदुक्तप्रकारानन्तरमनमित्यर्थ, गुरुजनकृततिरस्कारवचनमिति यावत्, प्रायश्चित्त पापक्षयकारण —"प्रायो नाम तप प्रोक्त चित्त निश्चय उच्यते। तपो निश्चयसंयुक्त प्राय श्चित्तमिति स्मृतम्॥" इत्युक्तलक्षण निखिलतत्कृतदोषक्षयकारक विधिबोधित कर्म इति यावत, यद हि कश्चित् मनस्वी प्रमेण किञ्चित् पापमनुतिष्ठति, तत पर गुरुजना यदि त तत्क्षण तिरस्कुर्वन्ति, तदा तेनैव तिरस्कारेण तस्य सर्व्वपापक्षयो भवति अत राज्ञेण देशात सीतानिर्वासनरूप यत् अन्याय्यम् आचरित,तस्य भवत्कृते तन्निर्भर्त्सनेन समुचित दण्ड सञ्जात एव, अत अस्मात्पर किमपि न विधातव्यमिति भाव। अन्ये तु सुखदुःखानि जना स्वकृतप्राक्तनकर्म्मफलभूतान्येवानुभवन्ति इत्यभि प्राय व्याचक्षते, यथा,—हि यत, परिभूतानां परै पराभव गमितानां, मनस्विना धीराणा, दुःख स्वीयदुरदृष्टफलजनितमेवेति जानतामित्याशय, एतत् सीतानिर्वासन-प्रवृत्तवर्तनेन जनापवादादिना च मानसदुःखानुभवनमेव, प्रायश्चित्त प्राक्तनदुरदृष्ट निवर्तकम्, भवान् हि जन्मान्तरीयदुरदृष्टानां फलभूत सीतानिर्वासनजन्यदुःखम् भवत, रामस्तु प्रायश्चित्तदातृतया उपलक्षणभूत एव, तथा च, प्राक्तनदुरदृष्टफलभोक्ता एव भवान् निरपराधे कथ कारणमन्तरा राम त्वया कोप विजह्यात्, सर्व्वे मनस्विन इद दुःख स्वकृतकर्म्मफलमिति जानन्त अन्यस्मिन् कोप न कुर्वन्ति, एतद्विभाव्याऽऽत्मन [illegible] इति भाव। अन्यत्तु समानमेव। [प्रस्तुतात् मनःखेदमानान्यात [illegible] अप्रस्तुतप्रशंसाऽलङ्कार, अपि च [illegible] निरुक्त रूपकमलङ्कार, [illegible] पदार्थहेतुक काव्यलिङ्गमलङ्कारश्च, एषा परस्पर-[illegible] ॥ २५ ॥

जनकः।“—शान्तं वा रघुनन्दने तदुभयं तत्पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः॥ २६॥

बटवः। [प्रविश्य सम्भ्रान्ताः]। कुमार! अश्वोऽश्व इति पशुसमाम्नायिकः कोऽपि भूतविशेषो जनपदेषु श्रूयते, सोऽयमधुनाऽस्माभिः प्रत्यक्षीकृतः। (छ)

अथ पराङ्गेन जनकः स्वकोपकार्योपशमं पक्षान्तरेणाऽऽह, शान्तमिति।—वा पक्षान्तरे, तदुभयं चापधारणं शापदानञ्च, रघुनन्दने रामे, शान्तम् उपरतं निवृत्तमित्यर्थः, भवतु इति शेषः, रामे तदुभयोरेकोऽपि न प्रयोज्य इति भावः, हि यतः, तत् रघुनन्दनः इत्यर्थः, [विधेयप्राधान्यात् क्लीबत्वम्] मे मम, पुत्रभाण्डं पुत्ररूपमूलधनं, मूलधनरूपतया यत्नत एव रक्षणीयमिति भावः। (“स्याद्भाण्डमश्वाऽऽभरणेऽमत्रे मूलवणिग्धने” इत्यमरः)। पुत्रस्नेहभाजनं वा पुत्रः यथा अकृतकृत्येऽपि स्नेहपात्रं भवति, तथा रामोऽपि विधेय इति भावः। एवमत्र पौरादीनामप्युपरि कोपोपशमे हेतुं निर्दिशति, भूयिष्ठेति।—भूयिष्ठाः अतिबहवः, द्विजाः ब्राह्मणाः, बालाः शिशवः, वृद्धाः प्रवयसः, विकलाः हस्तपादाद्यवयवहीनाः, काणखञ्जादय इत्यर्थः, स्त्रैणानि स्त्रीजनसमुदायः यस्मिन् तथाभूतः पौरः जनः पुरवासिवर्गः, भवतीति शेषः, बालवृद्धादीनामवध्यत्वात् पौरजनस्य तद्बहुलतया सोऽपि अवध्य एव, तेनाहमधुना चापधारणात् शापदानाच्च विरतो भवामीति भावः। [अत्र चापादिग्रहणोपशमं प्रति पौरजनेषु द्विजादिभूयिष्ठत्वस्य हेतुत्वोत्कीर्तनात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः]। शार्दूलविक्रीडितं वृत्तम्॥ २६॥

(छ) सम्भ्रान्ताः—सत्वराः, व्यग्रा इत्यर्थः, बटवः,—विप्रकुमाराः, प्रविश्य—रङ्गभूमिमागत्य, आहुरिति शेषः। अश्वोऽश्व इति—घोटक इति ससम्भ्रमं प्राहुः, [वीप्सायां द्विरुक्तिः]। पशुसमाम्नायिकः—पशुसमाम्नाये पशुशास्त्रे पशुद्रव्यकयागप्रतिपादकवेदभागे वा विवक्षितः, लक्षणादिनिर्दिष्टरूपः तच्छास्त्रे समधिकतया उत्पादित इत्यर्थः, कोऽपि—अस्माभिरदृष्टपूर्वः, भूतविशेषः,—प्राणिविशेषः, जनपदेषु—देशेषु ग्रामनगराऽऽदिप्रदेशेषु इत्यर्थः, न तु वनेषु इत्यभिप्रायः, श्रूयते—आकर्ण्यते, यथा नाम ग्राम्याः कतिचन पशवः सन्तीति पठ्यते इत्यर्थः। अत्रायं ग्राम्यपशुत्वप्रतिपादकं पैठीनसिवचनं यथा,—“गौरविरजाऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः” इति। सोऽयम्—तादृशोऽश्व इत्यर्थः। प्रत्यक्षीकृतः,—नयनगोचरीकृतः, चक्षुषैवेति भावः।

लव । अश्वोऽश्व इति पशुसमाम्नाये साङ्ग्रामिके च पठ्यते, तद्ब्रूत कीदृशः ? (ज)

वटव । श्रूयताम् ।—

> पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
> दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।

(ज) पशुसमाम्नाये—आम्नायते अभ्यस्यते इति आम्नायः,—वेदः, ("श्रुतिः स्त्री वेद आम्नायः" इत्यमरः) पशूनां समाम्नायस्तस्मिन्, यद्वा,—आम्नायः,—उपदेशः ("आम्नायः कुल आगमे । उपदेशे च" इति हैमः) गुरुपरम्पराक्रमेण समुपदिष्टे पशूनामसंग्रहशास्त्रे इत्यर्थः । साङ्ग्रामिके च—सङ्ग्रामकौशलबोधकशास्त्रे च धनुर्वेदादौ युद्धशास्त्रे चेत्यर्थः पठ्यते—अधीयते, एतेनास्य युद्धशास्त्रे विशेषाभिज्ञत्वं प्रतीयते । कीदृशः —किम्प्रकारः ? अश्वोऽयमिति शेषः, यद्यपि वन्या वयं ग्राम्यान् पशून् तत्त्वतो न जानीमः, तथाऽपि वेदादिषु शास्त्रेषु तत्तत्स्वरूपनिरूपणदर्शनादेव तल्लक्षणाभिज्ञाः अपि तत्स्वरूपमिदानीं ज्ञातुमिच्छामः, अपश्यत चेत् वदत इति निष्कृष्टार्थः ।

अथ दर्शनानुसारतः अश्वलक्षणं यथासम्भवम् उत्कीर्तयति, पश्चादिति ।—पश्चात् शरीरादर्वाक् देहचरमभागे इत्यर्थः विपुलं प्रचुरं, स्थूलमिति यावत् पुच्छं लाङ्गूलं वहति धारयति तच्च पुच्छम् अजस्रं निरन्तरं धूनोति कम्पयति, स अश्वः, दीर्घग्रीवः दीर्घा आयता, ग्रीवा गलदेशः यस्य तथाविधः, आयतकण्ठ इत्यर्थः, भवति, तस्य अश्वस्य खुराः शफाः, चत्वार एव चतुःसङ्ख्यका एव, नातोऽधिका इत्यर्थः, न हि गवादिवत् द्विधा विभिन्नतया चतुःसङ्ख्यातोऽधिका इति भावः, शष्पाणि बालतृणानि, ("शष्पं बालतृणम्" इत्यमरः) अत्ति भक्षयति, आम्रमात्रान् चूतफलपरिमितान्, शकृत्पिण्डकान् पुरीषखण्डान्, प्रकिरति त्यजति, वा अथवा व्याख्यानैः स्वरूपकथनैः, तदाकारवर्णनाभिरित्यर्थः, किम् अलम् ? अधुना तत्स्वरूपवर्णनं निष्प्रयोजनमिति भावः । [अत्र वारणार्थकत्वेऽपि किंशब्दयोगात् तृतीया ज्ञेया]। एह्येहि आगच्छ आगच्छ । [सम्भ्रमे द्विवचनम्]। यामः गच्छामः, तं द्रष्टुं वयमिति शेषः, पुनः किन्तु, स अश्वः दूरं विप्रकृष्टदेशं व्रजति गच्छति, तस्य द्रुतगतित्वात् अस्माकं त्वरितगमनाभावे तद्दर्शनं न भवेदित्याशयः । [अत्राश्वरूपैककारकेण सह वहतिप्रभृतीनामनेकासां क्रियाणामभिसम्बन्धात् दीपकालङ्कारः, अपि चाऽऽम्रफलेन साकं शकृत्पिण्डानां साम्यस्य प्रतिपादनात् उपमालङ्कारः, यथारूपाश्वस्वरूपवर्णनाच्च

शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं वाऽऽख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥ २७ ॥

[इति उपसृत्याजिने हस्तयोश्चाऽऽकर्षन्ति]। (झ)

लवः। [सकौतुकोपरोधविनयम्]। आर्याः। पश्यत पश्यत, एभिर्नीतोऽस्मि। [इति त्वरितं परिक्रामति]। (ञ)

अरुन्धतीजनकौ। पूरयतु कुतूहलं वत्सः। (ट)

कौशल्या। भअवदि! जाणामि, एदं अणालोअअन्ती ण जीआमि विअ, अदो अण्णदो भविअ पेक्खम्ह दाव गच्छमाणं दीहाउं। * (ठ)

---

* भगवति! जानामि, एतमनालोकयन्ती न जीवामीव, अतोऽन्यतो भूत्वा पश्यामस्तावद्गच्छन्तं दीर्घायुषम्।

स्वभावोक्तिरलङ्कारः, इत्येषां परस्परमापेक्षतया स्थितेः सङ्करः। [अत्र तच्छब्दोपात्त-कर्तरि लट्प्रयोगदर्शनात् "खरान्तस्य चत्वार एव" इत्यत्र तु तदन्यथाकरणात् प्रक्रमभङ्गदोष इति ज्ञेयम्]। मन्दाक्रान्ता वृत्तम् ॥ २७ ॥

(झ) इति—इत्थमुक्त्वेत्यर्थः, उपसृत्य—लवसमीपं गत्वा, अजिने—उत्तरीयभूत-कृष्णसारमृगत्वचि, हस्तयोश्च—करयोश्च, ग्रहणपूर्वकमिति शेषः, आकर्षन्ति, लवं बटव इति शेषः।

(ञ) कौतुकम्—अश्वदर्शनकौतूहलम्, उपरोधः,—वटुस्थानानत्याग्रहः, विनयः,—नम्रता, तैः सह वर्त्तमानं यथा तथेत्यर्थः। आर्याः!—भो मान्याः!, जनकादयः पूज्यजना इत्यर्थः। पश्यत पश्यत—अवलोकयत, [सम्भ्रमे द्विरुक्तिः]। युष्माभिरिति शेषः। एभिः,—वटुभिः, नीतः,—स्थानान्तरं प्रापितः, अस्मि—भवामि, अहमिति शेषः। युष्मान् विहाय नाहं गन्तुमिच्छामि, किन्तु एते बलात् मां नयन्ति, अत्र किं करवाणीति भावः। त्वरितं—सत्वरं, परिक्रामति—भ्राम्यति, दर्शनोत्कण्ठा-वशादिति भावः।

(ट) कुतूहलं—कौतुकम् अश्वावलोकनाभिलाषमित्यर्थः, पूरयतु—समापयतु, यदि अश्वं द्रष्टुमिच्छसि, तदा एभिः सह गच्छेति भावः।

(ठ) एतम्—इमं बालकम्, अनालोकयन्ती—अपश्यन्ती, न जीवामीव—

भरत। अतिजवेन दूरमतिक्रान्तः स चपलः, कथं दृश्यते ? (ड)

कञ्चुकी। [प्रविश्य]। भगवान् वाल्मीकिराह,—"ज्ञातव्यमेतदवसरे भवद्भिः" इति। (ढ)

जनक। अतिगम्भीरमेतत् किमपि भविष्यति। भगवति अरुन्धति। सखि कौशल्ये। आर्य्ये गृष्टे। स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्याम। (ण)

[इति निष्क्रान्तो वृद्धवर्गः]।

प्राणान् न धारयानीव जानामि—मन्ये, ग्रहमिति शेष। अत,—अस्मात् कारणात्, अन्यत,—अन्यस्मिन् स्थाने, भूत्वा—अवस्थायेत्यर्थ, अन्यत्र गता सतीति भाव, गच्छन्त—वटुभि सार्द्धं यान्त, दीर्घायुषम्—आयुष्मन्त, लवमित्यर्थ, पश्यान,—अवलोकयान।

(ड) अतिजवेन—अतिवेगेन, दूर—विप्रकृष्ट देशम, अतिक्रान्त,—गत, चपल,—चञ्चलमति, स,—बालक लव, बालत्वात् स्वत एव चञ्चलप्रकृतिरसौ सुदूर स्थान प्रस्थित इति भाव। कथ—केन प्रकारेण, दृश्यते ?—अवलोक्यते, चक्षुर्विषयातिक्रमात न खल्वसौ द्रष्टु शक्यते त्वयेति भाव।

(ढ) एतत—युष्माभि जिज्ञासित वृत्त, बालकस्यास्य इतिवृत्तमिति यावत, अवसरे—यथासमये, भवद्भि —युष्माभि, ज्ञातव्य—वेदितव्यम्। कालान्तरे यूय नूनमेव विवरण मत्त श्रोष्यथ, इदानीं न वक्ष्यामीति भाव।

(ण) एतत—अस्माभिर्जिज्ञासित बालस्यास्य विवरणमित्यर्थ किमपि—अनिर्वचनीयमेव, अत एव अतिगम्भीर—दुरवगाहम्, अतिगोपनीयमित्यर्थ अलौकिकघटनापूर्णतया मादृशजने सहसा भेत्तुमशक्यमिति यावत। भविष्यति—सम्पत्स्यते। भगवति अरुन्धति।—पूजनीये वशिष्ठपत्नि। एतस्या गौरवप्रदर्शनार्थं भगवतीत्युक्तम्। सखि कौशल्ये।—सहचरि प्रियदशरथगृहिणि। परमात्मीयत्वद्योतनाय सखीति सम्बोधनम्। आर्य्य गृष्टे।—माननीय कञ्चुकिन्। अस्य प्रज्ञास्थानत्वात्तु आर्य्यत्वमिति बोध्यम्। स्वयमेव—आत्मनैव, न तु प्रतिनिधिना, इदेव श्रेय, यतो हि प्रतिनिधिद्वारेण न तादृशीति भाव। प्राचेतस—वाल्मीकि, पश्याम,—अवलोकयाम। नो चेदत्र तर्हि एतद् मनाग् अपि न जानीम इति भाव।

बटवः । पश्यतु हि कुमारस्तदाश्चर्य्यम् । (त)

लवः । दृष्टमवगतञ्च, नूनमाश्वमेधिकोऽयमश्व इति । (थ)

बटवः । कथं ज्ञायते ? (द)

लवः । ननु मूर्खाः ! पठितमेव युष्माभिस्तत्काण्डे, किं न पश्यथ, प्रत्येकं शतसङ्ख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः, तत्प्रायमेवेदमपि दृश्यते ? यदि इह न प्रत्ययः, तद्गत्वा पृच्छत । (ध)

(त) पश्यतु हि—अवलोकयत्वेव, हिशब्दोऽवधारणार्थकः । कुमारः,—लवः तत्—अश्वरूपं वस्तु, आश्चर्य्यम्—विस्मयकरम्, बटुभिरदृष्टपूर्व्वत्वेन अश्वोऽत्र विस्मयकरवस्तुविधया उल्लिखितः, इति ज्ञेयम् ।

(थ) दृष्टं—प्रत्यक्षीकृतम्, अवगतञ्च—अवबुद्धञ्च, दृष्टेव कोऽयं भवतीति सम्यक् निर्णीतमित्यर्थः, नूनं—निश्चितम्, आश्वमेधिकः,—अश्वमेधयज्ञीयः, [अश्वमेधः प्रयोजनमस्येत्यर्थे अश्वमेधशब्दात् ठञ् प्रत्ययः] अयमश्वः,—पुरो दृश्यमानः वाजी, भवतीति शेषः ।

(द) कथं—केन लक्षणेनेत्यर्थः, ज्ञायते ?—अवधार्य्यते ? अश्वमेधयज्ञस्यायमश्वो भवतीति केन प्रमाणेन स्थिरीक्रियते इति भावः ।

(ध) ननु—भो !, मूर्खाः,—अज्ञाः, बटवः इति शेषः, पठितमेव—अधीतमेव, तत्काण्डे—अश्वमेधाध्याये रामायणस्येत्यर्थः, अश्वमेधसक्रान्तप्रकरणे इति यावत्, किं न पश्यथ ?—अश्वमेधप्रकरणोक्तं वस्तुजातमेव यथायथं सम्वदतीति किं न यूयमवलोकयत ? इत्यर्थः । किं परिदृश्यते ? तदेवाह, प्रत्येकमिति ।—प्रत्येकम्—[एकम् एकं प्रतीत्यव्ययीभावः] सर्व्वस्मिन्नेव भागे इत्यर्थः, शतसङ्ख्याः,—शतं सङ्ख्या येषां तथोक्ताः, प्रत्येकं सङ्ख्याशतसमन्विता इत्यर्थः, कवचिनः—कवचवन्तः, वर्म्मधारिण इत्यर्थः, दण्डिनः,—दण्डायुधाः, यष्टिधारिण इति यावत्, निषङ्गिणश्च—तूणीरवन्तश्च, रक्षितारः,—अश्वरक्षकाः सैनिकाः, तत्प्रायं—तेषां—कवचिप्रभृतीनां सेनानां, प्रायः,—बाहुल्यं यस्मिन् तथाविधं शतशतकवचिदण्डिनिषङ्गिसैनिकसुरक्षितमित्यर्थः । इदमपि—अश्वरूपवस्तु अपि, दृश्यते—अवलोक्यते, यस्य रक्षितुमेव शतं शतं कवचिनः अन्ये च योद्धारः परिक्राम्यन्तीति दृश्यते, यदि—चेत्, इह—मदीयवचसि, प्रत्ययः,—विश्वासः, न, क्रियतेति शेषः । तत्—तर्हि,

वटव । भो भो । किम्प्रयोजनोऽयमश्वः परिवृतः पर्य्यटति ? (न)

लव । [सस्पृहमात्मगतम्] । अये । अश्वमेध इति विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रियपरिभावो महान् उत्कर्ष-निकषः । (प)

[नेपथ्ये] । अयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २८ ॥

गत्वा—रक्षिजनानां समीपमागत्येत्यर्थः, पृच्छत—जिज्ञासध्वम्, अश्वरक्षिणां वचसैव यूयं इदमेषीयोऽयमश्व इति ज्ञास्यथेति भावः ।

(न) भो भो ', केनिका इति शेषः । किम्प्रयोजनः—किं प्रयोजनम्—उद्देश्यं यस्य सः, किन्निमित्तक इत्यर्थः अयमश्वः, परिवृतः—परिवेष्टितः रक्षिभिरिति शेषः, पर्य्यटति—विहरति, कस्मै कार्य्याय इमे सैनिका अस्याश्वस्य समन्तात् धृतायुधाः सन्तः सञ्चरन्तीति भावः ।

(प) सस्पृहं—साग्रहम्, आत्मगतं—स्वगतम्, आहेति शेषः, अश्वमेध इति—अश्वमेधनामकः यज्ञः हि, विश्वविजयिनां— विश्वं—जगत्, विजेतुं—प्रभावेण न्यक्कर्तुं शीलं येषां तेषां, त्रिलोकीपरिभाविणामित्यर्थः क्षत्रियाणां—राजन्यवृन्दानां, ऊर्जस्वलः,—ऊर्ज्जं,—बलमस्यास्तीति ["ज्योत्स्नातमिस्रा—" (५।२।११४ पा०) इति मत्वर्थे निपातः] बलवान्, सातिशयो इति यावत्, सर्वक्षत्रियपरिभावी—सर्वान् क्षत्रियान् परिभवितुं शीलं यस्य तादृशः, राजवृन्दतिरस्कारकारकः इत्यर्थः, महान्—गुरुतरः, उत्कर्षनिकषः,—उत्कर्षस्य—सर्वप्राधान्यस्य, गौरवस्येत्यर्थः, निकषः,—स्वर्णादिधातूनां सारत्वनिर्णायकः प्रस्तरविशेषः, प्रकृते तु तद्वत् सारत्वादेः परीक्षास्थानमित्यर्थः, अश्वमेधयज्ञस्य केवलं सम्राड्भिरेवानुष्ठीयमानतया आभिजात्यगौरवाधायकत्वमितस्य निष्पादनाख्यस्य क्षत्रियाणामिति विनेयम् । अत एवैतस्य यज्ञेन सातिशयं आदरं एतस्मिन्नकारात्याप द्रष्टव्यम्, "राजा साम्भोनी ऽश्वमेधेन यजेत, नाप्यनाप्नोति ।" इत्यापस्तम्बे ।

अथ नेपथ्यमास्थितेन रक्षिणा" अश्वस्यास्याश्वमेधोचितं भगवतो रामस्य विजयगौरवञ्च व्यापादितुं निगदतीति, अयमश्व इति ।—सप्तलोकैकवीरस्य सप्तसु भूप्रभृतिषु लोकेषु, "भूर्भुवः स्वर्महश्चैव जनश्च तप एव च । सत्यलोकश्च सप्तैते लोकास्तु

लव । [सव्यथमिव]। अहो ! सन्दीपनानि अक्षराणि । (फ)

बटव । किम् उच्यते ? प्राज्ञ खलु कुमार । (ब)

परिकीर्त्तिता ॥" इत्याद्युपरागम । एक अद्वितीय, वीर शूर तस्य दशकण्ठस्य रावणस्य, कुलं वंश, ईष्टे यस्तस्य रावणकुलान्तकस्य रामस्येत्यर्थ अयमश्व एष दृश्यमान अश्वमेधीय ध्वज, अथवा किंवा इव पताका वैजयन्ती, वीरघोषणा वीरत्वप्रख्यापणं जगदेकवीरत्वख्यातिं प्रतिज्ञापयितुमिव इत्यर्थ , इयञ्च विजयपताका अयञ्च अश्वमेधाश्व एतौ द्वावेव महाराजस्य रामस्य सार्वभौमराजत्वकीर्त्ति प्रचारार्थमेव उत्सृष्टौ इत्यभिप्रायकं नेपथ्यभाषणं "भो भो ! किमयोजनोऽयमश्व" इत्यादि बटूक्तीनामुत्तरार्थमेवोपन्यस्तमित्यवधेयम् । [सप्तेत्यादिविशेषणद्वयस्य साभिप्रायकत्वेनोपन्यस्तत्वात् परिकरालङ्कार, तथा अश्वेन पताकया च साकं वीरघोषणाया अभेदारोपात् निरङ्गरूपकमलङ्कार, एतयोरन्योन्यनैरपेक्ष्येण स्थिते संसृष्टिरिति]। पथ्यावक्त्रं वृत्तम् ॥ २८ ॥

(फ) सव्यथमिव—व्यथया—परोत्कर्षश्रवणजनितया पीडया सह वर्त्तमानं यथा तथैव, ससन्तापमिवेत्यर्थ, आहेति शेष । अहो—इत्यसूयासूचकमव्ययम्, ("अहो धिगर्थे शोके च करुणार्थविषादयो । सम्बोधने प्रशंसाया विस्मये पदपूरणे ॥ असूयायां वितर्के स्यात्" इति मेदिनी) सन्दीपनानि—समुत्तेजकानि, क्रोधोत्साहसंवर्द्धकानीति यावत्, अक्षराणि—वर्णराजय, श्लोकस्यैतस्य उद्धतभावगर्भतया नितरां दुःश्रवत्वमेवेति भाव ।

(ब) किमुच्यते ?—किमभिधीयते, एभि रक्षिपुरुषैरिति शेष , नेपथ्यभाषितेन इमे रक्षिण किमूचु, तेषां याथार्थ्यं वयं सम्यक्तया अवबोद्धुं न शक्ता इति भाव । यद्वा,—किमेतान्यस्माभिर्वक्तव्यं, तन्न सहसा स्थिरीकर्त्तुं शक्यते इति भाव । प्राज्ञ खलु कुमार,—कुमार,—लव, खलु—निश्चितमेव, प्राज्ञ —प्रतिभासम्पन्न, अतो नूनममी रक्षिवचसां तात्पर्य्यं सर्व्वथा अधिगन्तुं शक्नोतीति भाव । अतापराधाय,—प्राक् वयमिममश्वमवलोक्य किमप्यवधारयितुं नाशक्नुम, कुमार लवस्तु दर्शनमात्रेणैव आश्वमेधिकोऽयमश्व इति निरणैषीत्, तेन हि सयाने "अयमश्व —" इत्यादिकं नेपथ्यभाषणमप्यसौ झटित्येवावभोत्स्यते इति यद्यपि अस्माभिरा वचसैतद्वचसां तात्पर्य्यग्रहणे तथाऽप्यस्मासु विशेषाभिज्ञ लव एव सम्यगवबुध्य समुचितमेवावाभिर्वाप्यति इति वा भाव ।

लव । भो भोः । तत् किमक्षत्रिया पृथ्वी ।।—यदेवमुद्धतमुद्घोष्यते ? (भ)

[नेपथ्ये] । अरे । महाराजं प्रति कुतः क्षत्त्रियाः ? (म)

लव । धिग् जाल्मान । (य)—

यदि ते सन्ति सन्त्वेव, केयमद्य विभीषिका ।
किमुक्तै, शरसम्बाधा पताका वी हराम्यहम् ॥ २९ ॥

(भ) भो भो !, रक्षिण इति शेष, तत—तर्हि रामस्य एकवीरत्वे इति भाव । पृथ्वी—इय भूमि, किम अक्षत्रिया ?—क्षत्रियजातिशून्या, एतस्या भूमौ किमु एकोऽपि क्षत्रियो नास्ति, य खलु वीरपदभाक् भवेत् ? इत्यथ , यत—यत, एवम्—इत्थम्, उद्धत—सगर्व्वम्, उद्घोष्यते—उत्कोत्र्यते, युष्माभि रामस्य वीरत्वख्यातिरिति शेष । अधुना हि पृथिवी निर्वीरा न जाता, येन यूयं रामानुचरा एव रामस्य वीरत्वगाथा गायथ, तेन हि एवमुद्धतभाषणात् विरमध्वमिति भाव ।

(म) अरे—इति नावनसम्बोधने । महाराज—रामचन्द्र, प्रति—उन्दीकृत्येत्यथ, रामचन्द्रसमीपे इति यावत्, क्षत्रिया,—राजन्यवर्गा, कुत ?—कुत्र वर्त्तन्ते ? इत्यथ , सम्राज राघवस्य दशाननरिपोरन्तिके अन्ये क्षत्रिया वाय्यविषये किमु स्थातु शक्नुवन्ति ? इति भाव । तथा च रावणनिर्ज्जितानां क्षत्रियाणां क्षत्रियत्वाभिमान रावणविद्विष पुरत अतिलज्जाकरमेवेति तात्पर्यम् ।

(य) जाल्मान—अविवेकान्, पामरानित्यथ, ("जाल्म स्यात् पामरे क्रूरेऽसमीक्ष्यकारिणि त्रिषु" इति मेदिनी)। युष्मान् इति शेष, धिक्—निन्दामि, यतो यूयमीदृशघोषणया वीरवत्या भूमेः वीरत्वगौरव निहन्तुमुद्यता, अत एव तान युष्मान सतत जल्पमानि इति भाव ।

अथ राघवगौरवकारिण रक्षिगणान् अधिक्षिपन्नाह, यदीति ।—ते रावणादिनिग्रहकारिणि रावणविजयिन रामचन्द्रा इत्यथ, [गौरवात् बहुवचन] यदि सन्ति, सन्ति विद्यन्ते, तदुक्तप्रकारा भवन्तीत्यथ, सन्त्वेव तर्हि तथैव तिष्ठन्तु तावत, तथा स्थितौ स्थितौ वा का न क्षति उपक्रान्तवा ? इति भाव । किन्तु अद्य अधुना "महाराज प्रति" इत्यादिरूपेत्यथ, केय विभीषिका ? भयप्रदर्शनम्, इदम् इति शेष, रामस्य वीरत्वगौरव पुरत प्रख्याप्य अस्मद्भीतिप्रदर्शने। किमपि फल न भविष्यतीति भाव । उक्तै, वाग्विन्यासै, किम् ?

लवः। (सव्यथमिव)। अहो! सन्दीपनान्यक्षराणि। (फ)

बटुः। किमुच्यते? प्राज्ञः खलु कुमारः। (ब)

परिकीर्तिता ॥" इत्यागमप्रामाण्यात्। अत्र भणितौ। [illegible] रावणस्य [illegible] [illegible], यथा [illegible] पताका [illegible], [illegible] [illegible] इत्यभिप्रायः। नेपथ्यभाषणम् 'भो भोः! [illegible]' इत्यादि बटूनामुत्तरार्थमेतावदुपन्यस्तं वचनम्। [अत्र ज्यादर्शनात् अश्वस्य साभिप्रायकत्वेनोपन्यस्तत्वात् परिकराऽलङ्कारः, तथा अनेन पताकया च सा, वीरघोषणायाः अभेदारोपात् निरङ्ग रूपकमलङ्कारः, एतयोरपि अन्योन्यनैरपेक्ष्येण स्थितेः संसृष्टिरिति]। पथ्यावक्त्रं वृत्तम् ॥ २८ ॥

(फ) सव्यथमिव—व्यथया—परोक्तपरुषवचनजनितया पीडया सह वर्तमानं यथा तथैव, सन्तापमित्यर्थः, आहेति शेषः। अहो—इत्यसूयासूचकमव्ययम्, ("अहो धिगर्थे शोके च करुणार्थविषादयोः। सम्बोधने प्रशंसायां विस्मये पदपूरणे॥ असूयायां वितर्के स्यात्' इति मेदिनी) सन्दीपनानि—समुत्तेजकानि, क्रोधोत्साहसंवर्द्धकानीति यावत्, अक्षराणि—वर्णराजयः, श्लोकस्यैतस्य उद्धतभावगर्भतया नितरां दुःश्रवत्वमेवेति भावः।

(ब) किमुच्यते?—किमभिधीयते, एभिः रथिपुरुषैरिति शेषः, नेपथ्यभाषितेन इमे रथिनः किमूचुः, तेषां याथार्थ्यं वयं सम्यक्तया अवबोद्धुं न शक्नुम इति भावः। यद्वा,—किमेतास्माभिरुक्तम्, तत्र सहसा स्थिरीकर्तुं शक्यते इति भावः। प्राज्ञः खलु कुमारः,—कुमारः,—लवः, खलु—निश्चितमेव, प्राज्ञः—प्रतिभासम्पन्नः, अतो नूनममी रथिवचसां तात्पर्यं सर्वथा अधिगन्तुं शक्ष्यतीति भावः। अत्राभिप्रायः,—प्राक् वयमिममश्वमवलोक्य किमप्यवधारयितुं नाशक्नुम, कुमारः लवस्तु दर्शनमात्रेणैव आश्वमेधिकोऽयमश्व इति निरणैषीत्, तेन हि मन्यामहे "अयमश्व—" इत्यादिकं नेपथ्यभाषणमप्यसौ झटित्येवावभोत्स्यते इति। यद्यपि अनभिज्ञा वयमेतद्वचसां तात्पर्यग्रहणे, तथाप्यस्मासु विशेषाभिज्ञः स एव सम्यगवबुध्य समुचितमेवाभिधास्यति इति वा भावः।

लव । भो भोः । तत् किमक्षत्रिया पृथ्वी ।—यदेवमुद्धतमुद्घोष्यते ? (म)

[नेपथ्ये]। अरे । महाराजं प्रति कुतः क्षत्रियाः ? (न)

लव । धिग् जाल्मान । (य)—

यदि ते सन्ति सन्त्वेव, केयमन्या विभीषिका ।
किमुक्तैः, शरसम्बाधा पताका वो हरास्यहम् ॥ २९ ॥

(म) भो भो !, रक्षिण इति शेष, तत्—तर्हि रामस्य एकवीरत्वे इति भाव । पृथ्वी—इयं भूमि, किम् अक्षत्रिया ?—क्षत्रियजातिशून्या, एतस्यां अस्यां किमु एकोऽपि क्षत्रियो नास्ति, य खलु वीरपदभाक् भवेत् ? इत्यर्थ, यत—यत, एवम्—इत्थम, उद्धत—सगर्वम, उद्घोष्यते—उत्कीर्त्यते, युष्माभि रामस्य वीरत्वख्यातिरिति शेष । अधुना हि पृथिवी निर्वीरा न जाता, येन यूयं रामानुचरा एव रामस्य वीरत्वगाथा गायथ, तेन हि एवमुद्धतभाषणात् विरमध्वमिति भाव ।

(न) अरे—इति नीचसम्बोधने । महाराज—रामचन्द्र, प्रति—लक्षीकृत्येत्यर्थ, रामचन्द्रमुद्दिश्यापि इति यावत्, क्षत्रिया,—राजन्यवर्गा, कुत ?—कुत्र वसन्ते ? इत्यर्थ, उच्चाज राघवस्य दशाननारिपौरन्तिके अन्ये क्षत्रिया वीर्यविषये किमु स्थातुं शक्नुवन्ति ? इति भाव । तथा च रावणनिर्जितानां क्षत्रियाणां क्षत्रियत्वाभिमान रावणविद्विष पुरत अतिलज्जाकरमेवेति तात्पर्यम् ।

(य) जाल्मान—अविवेकान, पामरानित्यर्थ, ("जाल्म स्यात् पामरे क्रूरेऽसमीक्ष्यकारिणि त्रिषु" इति मेदिनी)। युष्मान् इति शेष, धिक्—निन्दामि, यतो दूरनोद्घोषणया वीरत्वा भूमे वीरत्वगौरव निह्नुमुद्यता, अत एतान् युष्मान् सतत जुगुप्सामि इति भाव ।

अथ राघवगौरवकारिण भवत्स्वामिन रावणविजयिन रक्षिगणान् अधिक्षिपन्नाह, यदीति ।—ते भवन्ति विद्यन्ते, तद्गुणप्रकारा भवन्तीत्यर्थ, [गौरवात् बहुवचन] यदि तावत्, तेषामवस्थितौ स्थितौ वा का न क्षति उपजातवा ? इति भाव । किन्तु केचन अपरा, "महाराज प्रति" इत्यादिरूपेत्यर्थ, केयं विभीषिका ? भयप्रदर्शन, किमर्थम् इति शेष, रामस्य वीरत्वगौरव पुरत प्रख्याप्य अमात्रेति प्रदर्शनेन किमपि फल न भविष्यतीति भाव । उक्तै, वाग्विन्यासै, किम् ?

भो भो वटव ! परिवृत्य लोष्टैरभिघ्नन्तो नयत एनमश्वम्, एष रोहितानां मध्ये वराकश्चरतु । (र)

पुरुषः । [सक्रोधदर्पं प्रविश्य] । धिक् चापलम् ॥ किमुक्तवानसि ? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि न दृप्तां वाचमनुसहन्ते, राजपुत्रश्चन्द्रकेतुश्चाकृष्टशरासनः. सोऽप्यपरिपन्थिदर्शनकात् हेलाऽऽचितहृदयो न परापतति अद्यापि, तत् त्वरितमपसर्पतानेन तरुगहनेन । (ल)

श्याम, यथा आगाऽत्मक नयनोऽग्निः । पर्श्वत भाः । अत्र नन, न युष्माकं, पताका वैजयन्ती चारत्वचोपणामेतामित्यर्थः शरनवाधा गर्व पतिम, सत्याध नमानधादन यस्या ता, कार्मुकनिाचतशरमङ्गना लब्ध्येत्यर्थ, इगमि बलात नयामि, चन नृप समथा भवत ताव्‌ पतत्प्रतिकार कुरुतेति भाव । यद्वा —शरैव तृणविशेषेण आगेन वा नम्राया मिलन यस्या ता शरावरतास, अतितुच्छामित्यर्थ । अथवा नमानम् । "शरनम्या नाम" इत्यत्र 'नम्रिपर्णो ।" इति पाठो बहुषु पुस्तकेषु दृश्यते तदयन्तु नम्रिपर्णैव वगेन धावत्येव, न तु किञ्चित विवेच्यैवेत्यर्थ । [अत्र नमुदितवाक्यार्थो यदि युष्माक शक्ति स्यात्, तदा रक्षतमां पताकामित्या।दरूपायान्तरागमदर्शनात् अर्थापत्तिरलङ्कार] ॥ २९ ॥

(र) भो भो वटव !—ऋषिकुमारा ! परिवृत्य—वेष्टयित्वा, लोष्टै —मृत्पिण्ड, शिलाशकलैर्वा, अभिघ्नन्त,—ताडयन्त, एनमश्वम्—अनुनयश्वमिम वाजिन, नयत—प्रापयत, आश्रमानिति शेष । एष वराक,—दयार्द्र, दीनोऽयमश्व इत्यर्थ, रोहितानां—मृगविशेषाणाम्, आश्रमस्थानामित्यर्थ, ("रोहित कुङ्कुमे रक्ते ऋजुशक्रशरासने । पुंसि स्यान्मो मृगभिद रोहितवृक्षे ॥" इति मेदिनी) । मध्ये—अभ्यन्तरे, चरतु—भ्राम्यतु आश्रममृग इव अत्रैव तिष्ठत्वित्यर्थ ।

(ल) सक्रोधदर्प,—क्रोधेन कोपेन, दर्पेण—अहङ्कारेण च सह वर्तमान,, कुपित गर्वितश्चेत्यर्थ, पुरुष,—कश्चित दूतविशेष इति यावत्, प्रविश्य—वटुसमाजमागत्य, प्राहेति शेष । चापल—बालस्वभावसुलभा चपलताम, अविमृश्यकारित्वामिति यावत्, धिक्—निन्दामि, यूय मा एव चपला भवतेत्यर्थ, किमुक्तवानसि ?—"यदि ते सन्ति' इत्यादिक किमनन्वद्य वचनमभिहितवानसीत्यर्थ, नैव कदापि पुनर्वाच्यमित्याशय । वयाकरणे दोषमुक्त्वाद्यापुना वनौकोनुपाव-

वटव । कुमार । कृतमनेनास्त्रेण, तर्जयन्ति विस्फारितशस्त्रा-

कुमारमायुधीयश्रेण्यः, दूरं चाऽऽश्रमपदमितः, तदेहि, हरिण-
प्लुतैः पलायामहे । (ब)

सुपश्यति, तीक्ष्णेति ।—तीक्ष्णनीरसा,—तीक्ष्णा,—प्रचण्डा, स्वल्पेनाप्यपराधेन मन्युपन्ना इत्यर्थः, तथा नीरसा —निष्प्रेमाणश्च, अतिनिर्दयाश्चेत्यर्थः [इति विशेषणकर्मधारयः]। आयुधीयश्रेण्यः,—आयुधेन चरन्ति ये ते आयुधीया,—["आयुधाच्छ च (४।४।१४पा०) इति छप्रत्ययः] योद्धारः, तेषां श्रेण्यः,—समूहा, अतिनीलनिष्कृपशस्त्रधारिणः इत्यर्थः शिशोरपि—बालकस्यापि, का कथा अन्येषां महतामिति भावः, दृप्ताः—गर्विता, मदोद्धतामित्यर्थः, वाचः—वचनं, नानुरुन्धन्ते—न धरन्ते, तव ईदृशी समुद्धता वाच श्रुत्वा नूनं गर्विताः रुचिरं प्रकुप्य वनायास्यन्त्येव, सुतरां तद्भ्रान्त बालकानामपि युष्माकं कथमपि सुखेन भविष्यतीति भावः। राजपुत्र,—नृपकुमार, चन्द्रकेतु,—तदाख्यः श्रीनिवितनयः, आकृष्टशरासन —आकृष्ट—गृहीत, शरासनं—धनुर्येन तथोक्त, अधिज्यधन्वा इत्यर्थः, सोऽपि—चन्द्रकेतुरपि, न केवलमसौ राजकुमार अस्माकं सनाभौ एकाकी समायाति, अपि तु चतुरङ्गा सैनिकाश्च तत्पृष्ठतः समायान्ति इत्यपिशब्दार्थः, अपूर्वारण्यदर्शनकौतूहलाक्षिप्तहृदयः,—अपूर्वस्य—अदृष्टपूर्वस्य, अनिर्वचनीयस्येति यावत् अरण्यस्य—तपोवनश्रियः, यद्दर्शनम्—अवलोकनं, तस्य यत् कौतूहलम्—औत्सुक्यं, परमानन्द इति यावत्, तेन आक्षिप्त—समाकृष्टं, हृदय—मानसं यस्य तथोक्त, रम्या नैसर्गिकी तपोवनलक्ष्मी समवलोक्य निर्भरानन्दोदयात् आतप्रफुल्लमानस इत्यर्थः, अद्यापि—इदानीमपि, स्वभावसुन्दरवनस्थलीशोभासन्दर्शनेन विवशभावोदयादिति भावः। न परापतति—न समागच्छति, तदर्शनमध्यास्तेऽनेति भावः। तत—तस्मात्, तदागमनात् प्रागेवेत्यर्थः, त्वरितं—द्रुतं, अपकृपत—प्रयात, पलायध्वमित्यर्थः, अनेन—पुरोवर्तिना, तरुगहनेन—निविडवनमार्गेण, यावदस्माकं सेनानी समागत्य युष्माकं दुर्व्यवहारं न पश्यति, तावत् अनेन वनमार्गेण सत्वरं गम्यतां, नो चेत् महाननर्थ सम्पद्येतेति भावः।

(ब) कुमार।—वत्स !, कृतम्—अलम्, अनेनाऽस्त्रेण—अश्वमेधीयवाजिना, नाऽस्माकं प्रयोजनं नास्तीति भावः। कथमित्याह, तर्जेति।—तर्जयन्ति—भर्त्सयन्ति, नानाविधैर्वचनैरित्यर्थः, विस्फारितशस्त्राः,—विस्फारितानि—निष्कोषितानि अत एव उत्तरोत्तरं निशिततया समधिकमुज्ज्वलानि इति भाव,

लव। [स्मितं कृत्वा]। किं नाम। विस्फुरन्ति शस्त्राणि ? (ग) [धनुरारोपयन्]। (घ)—

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारिघोरघनघर्घरघोषमेतत्।

शस्त्राणि—आयुधानि येषां तथोक्ताः, [illegible] —[illegible]—[illegible] वीरपुरुषाणां [illegible] —[illegible]। [illegible]—[illegible] स्यात्, [illegible]—[illegible] च आश्रमपदं—तपोवनमिति, यस्मादाश्रमादितः [illegible] समायाता इत्यर्थः। तत— तस्मात्, आश्रमपरिसरस्थितत्वादित्यर्थः, पा०—[illegible], [illegible] हरिणद्रुतं,—मृगाः [illegible], वीतभयाः मृगाः यथा उत्प्लुताः द्रुतं धावन्ति, तद्वदिति भावः। पाठान्तरम्—[illegible], स्थानमेतत् [illegible] धावति, वयमिति शेषः, एतस्मिन् स्थाने [illegible] इत्याशयः।

(ग) स्मितम्—ईषद्धास्यं, कृत्वा—विधाय, मृदु हसित्वेत्यर्थः। शस्त्राणि—सैनिकानामायुधानि, किंनामेति—प्रश्ने, नामेति—कोपे, विस्फुरन्ति ?—चलन्ति, रणोन्मत्ताः सेनासमूहाः बलादस्मान् आक्रमितुं वा युद्धे उद्यता भवन्ति किमु ? तर्हि न भेतव्यं, तृणमिव मया तत्प्रतिविधानं क्रियते इत्याशयः।

(घ) धनुरारोपयन्—शरासने मौर्वीं समारोपयन्, युद्धाय कृतमतिः सज्यं कार्मुकं कुर्वन्नित्यर्थः, आहेति शेषः।

अथ लवः अश्वरक्षिसैनिकान् धृतनिशितायुधान् युद्धाय सत्वरान् समवलोक्य, तान् तृणाय विगणय्य स्वकीयशरासनं चापाग्रकोटिभ्यां प्रकटीकृत्य इत्थं वर्णनं करोति, ज्याजिह्वयेति।—ज्या मौर्वी, जिह्वा रसना इव ['उपमितं व्याघ्रादिभिः,—' (२।१।५६ पा०) इत्युपमितसमासः] तया, जिह्वाकारया ज्ययेत्यर्थः, वलयितेत्यादि।—वलयिते वक्राकारं प्रापिते, उत्कटे उग्रे, भीषणे इति यावत्, कोटी अटन्यौ, अग्रे इत्यर्थः, दंष्ट्रे विकटौ दन्तौ इव यस्य तत्, कल्पान्ते जगद्ग्रासलोलुपस्य कालस्य सुदीर्घा रसना। यथा विशालौ दन्तौ स्पृशति, तथा अस्मिन् चापस्य ज्यापि कोटिद्वयं सततं स्पृशतु इति भावः, उद्गारीत्यादि।— उद्गारः उद्गमनम्, घोरः भयङ्करः, घनस्य मेघस्य, घर्घरः तथाविधाऽव्यक्तः, घोषः ध्वनिः यस्य तथाभूतम्, अथवा, घोरं भयावहं, घनवत् सततादिमेघवत्, घर्घरघोषं घर्घरशब्दम्, उद्गारि उद्गारयितृ, कल्पान्तमेघ इव निरन्तरं सत्त्वप्राणिजगद् घोरं निनादं करिष्यदित्यर्थः, अत्र पक्षे ['अकेनोर्भविष्य—' (२।३।७० पा०)

ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम्॥ ३०॥

[इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे]।

इति कौशल्याजनकयोगो नाम चतुर्थोऽङ्कः।

इति कर्मणि षष्ठीप्रतिषेधः]। एतत् चापं मदीयं धनुः, ("अथास्त्रियौ। धनुश्चापौ।" इत्यमरः। अस्त्रियावित्युक्तेः पुंसि प्रयोगस्य बाहुल्येन सर्वैरादृतत्वेऽप्यत्र "भग्नावनतहरस्य चापाभरणाङ्कनम्" इति नपुंसकप्रयोगे चापशब्दस्य क्लीबत्वं प्रयुक्तमिति ज्ञेयम्)। ग्रासेत्यादि।—ग्रासाय जगतः कवलीकरणाय, प्रसक्तस्य, हसन् भक्षणाह्लादेन विकटहास्यं कुर्वन्, यत् अन्तकस्य कृतान्तस्य, वक्त्रयन्त्रं यन्त्राकारं वक्त्रं, तस्य या जृम्भा व्यादानं, तद्विडम्बि तदनुकारि, अत एव विकटं विशालम्, उदरम् अभ्यन्तरं यस्य तादृशम्, अस्तु भवतु। लोकक्षयं कर्तुं प्रवृत्तस्य कृतान्तस्य वदनं यथा प्रलयसमये प्रचुरभक्ष्यलाभानन्देन साट्टहासं व्यात्तं भवति, तथैव मम चापं विकटां जृम्भां विधाय निखिलरिपुसैन्यं सपदि निहन्त्वित्यर्थः। [अत्र जिह्वया सह ज्यायाः, दंष्ट्रया सह कोट्याः, घनेन सह चापघोषस्य, यन्त्रेण सह वक्त्रस्य, जृम्भया सह चापविजृम्भणस्य अवैधर्म्य साम्यानानुपदेशात् पञ्चोपमा अलङ्काराः, तेषाञ्च परस्परसापेक्षत्वात् सजातीयसङ्करः अपि चान्तकवक्त्रस्य जगद्ग्रासकालिकहास्यस्यासम्बन्धेऽपि तत्सम्बन्धोक्तेः अतिशयोक्तिरलङ्कारः, एतेन सह श्रौतोपमानां नैरपेक्ष्येण स्थितेः संसृष्टिः, अहञ्च एक एवाहं युष्माकं सर्वेषां रविसैनिकानां सपदि संहारं करिष्यामि इति च वस्तु व्यज्यते, इत्यलङ्कारेण वस्तुध्वनिः। शब्दालङ्काराः छेकानुप्रासवृत्त्यनुप्रासाद्याः यथायोगं ज्ञेयाः। संयुक्तादिवर्णानां श्रुतिदुःखदायकत्वेन दुःश्रवत्वदोषाशङ्कनीयत्वेऽपि अत्र वीररसानुकूलत्वेन पुनर्गुणत्वमेवेति ज्ञेयम्,—"वक्तरि क्रोधसंयुक्ते वाच्येऽप्युद्धते तथा। रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत्॥" इति दर्पणात्। अत्र वीरो रसः, ओजोगुणः गौडी च रीतिर्ज्ञेया]। वसन्ततिलकं वृत्तम्॥ ३०॥

चतुर्थाङ्कस्य संक्षेपः।

अथाऽऽश्रमे प्रथमतः [illegible] सौधातकिभाण्डायननामधेयौ परस्परमालपन्तौ [illegible] समागतानामतिथिसत्कारारम्भमेवाथ तपोवन[illegible]म् [illegible] जनसम्भार सौरभ[illegible] सौधातकिः [illegible] सम्भावनया परा प्रीतिरभिव्यक्ता [illegible]। तेन चैव पृष्टो [illegible], भाण्डायनः [illegible]कारण[illegible]अपत्, अपि च [illegible]। सौधातकिरपि सहचरमुखात् तस्य वशिष्ठेति नामाकर्ण्य [illegible] इत्यादिना सम्भावयन् पुनरप्युपाहसत्।

अथ श्रुतिप्रमाणेन मधुपर्कस्य समांसत्वं प्रतिपादयन् भाण्डायनः सौधातकिना पुनरपि विदेहनाथस्य [illegible] तदभिचारनापृच्छमानः निवृत्तानिवृत्तमांसभेदेन तत व्यवस्थापयन्नपि, पुनरपि सहचरेण तेन विदेहपतेर्निवृत्तमांसत्वं कथामत्यपृच्छत। [illegible] सुतायाः सीतायाः निष्कारणनिर्वासनदुर्विपाक[illegible] वैखानसव्रतमवलम्बनमेव तत्कारणमचीकथत्, [illegible] कारमेव आगमनकारणम्। अथ कौशल्यादीनामस्य साक्षात्कारः [illegible] वेति सौधातकिना पृष्टो भाण्डायनः [illegible] साक्षात्कारार्थं कौशल्यामानीतं तत्समीपं वशिष्ठेनारुन्धत्या प्रेषणवृत्तान्तमकथयत। ततः [illegible] सौधातकिरपि सहचरं सम्भाष्य क्रीडया [illegible]। भाण्डायनोऽपि प्राचेतसाश्रम[illegible] तन्मूलमाधावत् [illegible] सह सहचरेण अन्तर्दधे। इति विष्कम्भसंक्षेपः।

अथ चिन्ताविनोदनाय विदेहनाथः [illegible] निखिलवासनाविदारिणा शोकाग्निना दह्यमानमानसः, [illegible] सह मर्माविदारकं शोकावेगम् [illegible], [illegible] दारुणे हृदयस्यापि [illegible] पाताभावं, विभावयन् आत्मघातस्य चिराय घोरनरकोत्पादकत्वं, विलपन् तामेव निष्कारणनिर्वासितां स्वसुतां सीतामुद्दिश्य वारंवारं, [illegible] स्मितोद्भासित [illegible] तदीयसमल मुखकमले

विरमाय वशिष्ठारुन्धतीगङ्गावल्मीकिप्रभृतिभिः सर्वैः स्वयं च विदितविशुद्धभावां स्वमनसमैवमतिविषमां दशां गमितां सीतामालोक्यापि तदानीमप्रतिकूलवती दारुणप्रकृति तत्प्रभृति भगवती वसुमती विस्तरेणामी तिरश्चकार ।

अथ नेपथ्यादुत्थितम् "इत इतो भगवतीमहादेव्यौ" इति कञ्चुकिवाक्यमाकर्ण्य दूरप्रसारितदृष्टिशुष्कप्रदर्शितमार्गां केवलामरुन्धतीमागच्छन्तीमालोक्य, पर्यालोच्य च घन महादेवीशब्दप्रतिपाद्यां प्रबलविषादजातविकृतिं चोत्कटीनमलिनाकृतिम् अन्तर्विरूढशोकशल्यां कौशल्यामिति कथमपि निश्चिन्वन् तदालोकनसमुद्बोधितखिन्नपूर्वस्मृति मूर्तिमदानन्दरूपाया अपि तस्याः साम्प्रतमीदृशमतिभीषणमाकृतिपरिणाममालोकयन् अतिकातरं तामेव उद्दिश्य भृशं विललाप ।

कौशल्याऽपि स्वानपराधवतीं मत्वा त्रपापरवशा सहसा वैवाहिकसमीपयातमनीदृनाना स्वयं कृतानुशयं हृदयं विकृतावस्थमपि स्वस्थं विधाय, कञ्चुक्यरुन्धतीभ्यां सस्मारितनिजकर्तव्या कथमपि शनैरनुसर्तुमारेभे । तद्दुःखाधिकहृदया वसिष्ठजायाऽपि एवमतिनिविष्णां तां सान्त्वयन्ती दूरत एव विपुलविटपिमूलनिषण्णमतिविषण्णं मिथिलानायकं जनकं दर्शयामास । दूराद्दृष्टा चेममतिविषमसुताशोकक्षोभमलिनं राजानमसौ स्वकीयपूर्वकृतदुष्कृतसमवायस्पष्टमतिनिकृष्टमदृष्टमिव शुशोच ।

जनकोऽपि कञ्चुकिकौशल्योपेतामरुन्धतीमागच्छन्तीमालोक्य, स्वयमुपसृत्य प्रथमविलोकनीकवन्द्याम् अवनितललोलितेन शिरसा समभिवन्द्य, समधिगम्य च सकलकल्याणनिदानमाशीर्वचनं तस्याः, पुरःस्थितं कञ्चुकिनमामन्त्र्य, प्रजापालमात्रत्वेन कौशल्यामभ्यावपत्, अपृच्छच्च तमेव तस्याः कुशलवार्त्ताम् । कौशल्यापरिचये प्रजापालमात्रत्वकथनात् अन्तर्निगूढार्थं जनककृतमधिक्षेपमनुचिन्तयन् दुःखितान्तःकरण हृदयोऽपि, निष्करुणे सीताविवासने कौशल्यायाः सर्वथा निर्दोषत्वं प्रतिपादयन् समर्थयमानश्च रामकृतस्यापि दारुणात्युग्रकर्मणः अपरिहार्यमियतिनिमित्तकत्वं, सीताशोकक्लिष्टानपि तामधिक्षिपन्न राजानमनुनीय ततो न्यवर्तयत ।

न गर्भिणीदुःखशल्या कौशल्याऽपि इत्थं दुःसहशोकसन्तापतप्तहृदयविदारणजनकवचनं पतत् वज्रमिवातिदुःसहं मन्यमाना मुमोह । अरुन्धत्या चैव प्रतिबोधिता विदेहनाथोऽपि सततं सीताशोकनातिदुःखितामपि तां दारुणवचनैः पुनरपि दुःखयन्ननुशुशोच, विललाप चानुस्मृतातिशयपूर्ववृत्तान्तं तमेवातिप्रियं द्वितीयमिव देवं सुहृदं दशरथमनुस्मरन्नतितराम् । ततो मोहविलुप्तचेतना कौशल्या निश्वासनिरोधात् विपन्नप्राणेवाभवत्, जनकेन च गुरूदकेनाभिषिच्य प्रत्यबोधयत् ।

एवं प्रतिबोधितो रामः सततमानन्दितायाः सीतायाः स्मितांशुमिश्रितमनिन्द्य-वदनारविन्दमनुस्मरन् निःसारणनिर्वासितामतिप्रियां तामुद्गतमनाः कथमपि प्राणैरवियुक्तो भृशं विललाप। तस्मिंश्च विलपति सीताऽपि समधिकशोकवती कृपा-परवती अरुन्धती तपस्विजनागमे कुलगुरुपत्न्याऽऽशिषं सत्यं तथ्यमनुस्मारयन्ती कथमपि तां सान्त्वनामाश्वासयामास।

अथाश्रमसमीपे सहसा शिशूनां समुपनीतच्छन्दानिनादं कोलाहलनादमाकर्ण्य सर्वेऽपि कथमथ, कुतस्त्यो वेति निपुणं निरूपयन्तः जनकः शिष्टानध्यायात् क्रीडतां बटूनाम् अयं कोलाहल इत्यकथयत्। अथ कौशल्या दूरादेव तेषु बटुषु कञ्चिदति-मधुरतराकारं सर्वथाऽनुकृताभिरामरामभद्राकृतिं लोचनलोभनीयं बालकमालोक्य सातिशयं विस्मयमुपागमत्। ततश्चारुन्धत्याऽपि तथैव समर्थितोऽसौ बालकः कञ्चुकिना लक्षिताखिललक्षणेन क्षत्रियब्रह्मचारीति निरणायि। ततो जनकेनास्य परिचयं पृष्ट्वा अरुन्धत्याऽपि कुतस्त्योऽयमिति निर्णेतुं नाशक्यत। जनकस्तु अतीवकौतूहलाऽऽक्षिप्तहृदयः शिशुमिममाह्वातुं, अस्य परिचयञ्च विज्ञातुं तमेव कञ्चुकिनं वाल्मीक्याश्रमं प्रेषयामास। कञ्चुकिना समाहूतोऽपि नायं क्रीडामपहाय अत्राऽऽगमिष्यतीति प्रतर्कयन्ती कौशल्या सविनयं गृहीतगुरुवचनं बालकमचिरादेव समीपमुपागतमालोक्य विसिष्मिये। मिथिलाधिपोऽपि शिशोरस्य सन्दर्शनमात्र-मत्याकृष्टचित्तः कमप्यमन्दमानन्दसन्दोहमवाप।

विदितव्यवहारपटुर्वटुरपि सविनयमुपसृत्य, नमस्कृत्य चातिविनीतं सर्वान् अर्चनीयान् पर्यायक्रमेण, समधिगम्य च तेभ्यः अवितथान् शुभाशीराशीन्, अरुन्धत्या उत्सङ्गे गृहीतः पुनः कौशल्योत्सङ्गमलञ्चकार। कौशल्याऽपि तमुत्सङ्गे कृत्वा चिराभ्यस्तरामस्पर्शानुरूपमतिकान्तस्पर्शमनुभूय, निरूप्य च निपुणं न केवलं रामभद्रस्य, अपि तु सीतायाश्च प्रकृत्याकृत्योः चावयवयोः सौसादृश्यमस्मिन्निति विस्मिता तदेव वैवाहिकमदृश्यत्। विदेहाधिपतिनाऽपि सर्वं सुतनपुण्यमालोक्य सविषादं तथैवेति समर्थितम्। अथाकृतिगतसौसादृश्यसन्दर्शनेन प्रबलाशाक्षिप्त-हृदया मनसा सीतासुतत्वेन बालकममुमाशङ्कमाना, कुतस्त्यस्त्वमिति तन्मुखादेव आकर्णयितुमिच्छुरस्य जननी जनकश्चास्ति न वेति समपृच्छत, अवागच्छच्च तं बालकम् अविज्ञातपितृपरिचयं केवलमाशैशवं वाल्मीकिस्वामिकमिति।

परस्परमेवमालपत्सु ते सर्वे सहसा नेपथ्योत्थिता चन्द्रकेतोरादेशघोषणा समश्रावि, निरणायि च तच्छ्रवणात् जनकारुन्धतीभ्यां रामाश्वमेधाश्वपरिरक्षणाय आगतश्चन्द्रकेतुरिति। शिशुरसौ कोऽयं चन्द्रकेतुरिति विज्ञातुमशक्तो जनकमपृच्छत्,

समदर्शनश्च चित्रदर्शनप्रसङ्गात् तत्कथायाः अज्ञत्वेन तस्य परिचयं विधाय स्वस्य रामायणकथायाश्च विस्तरात्। जनकोऽपि तं तथा कथाऽभिज्ञं विज्ञाय, दशरथात्मजाना कति सुता केषु केषु च दारेषु प्रजायन्तेत्यपृच्छत्। तेनैव पृष्टोऽसौ बालकोऽपि कविना प्रणीतस्यापि तत्कथांशस्य सर्वथाऽप्रकाशितत्वेन तस्मिन् स्वस्यानभिज्ञत्वमविज्ञापयत, व्यजिज्ञपच्च ज्यायसा कुशेन परिरक्षितस्य तद्भागस्य अभिनयाय भरताश्रमप्रेरणत्वात्तम्। एतावताऽप्यपरितुष्टेन शिथिलेन प्रकाशित भागस्य अवधिमात्रं पुनः पृष्टोऽसौ बालकः आसन्नप्रसवायाः निर्वासितायाः सीतायाः लक्ष्मणेन कृतं निर्जने वने परित्यागमेव प्रकाशितभागस्य अवधिमकथयत्।

तदाकर्ण्य तानातः सीतामुद्दिश्य सर्वेषु भृशं विलपत्सु, अदृष्टपूर्व्वाश्वसन्दर्शनोत्फुल्लहृदया केचन मुनिबालका झटिति प्रविश्य तत्स्वरूपवर्णनपुरःसरं तदृदृष्टुमाश्रमात् लवमध्याचकर्षुः। लवोऽपि स्वां सहचरकृतामवस्था विज्ञाप्य तैः ह कथमपि अनुमत त्वरं तत्रोपस्थाय, समवलोक्य च तमश्वमतिनिपुणम, आश्वमेधिकोऽयमिति निरणयत्। सहचरास्तु तदवधि अपरिचिता अश्वपालानाहूय "किमर्थोऽयमश्व" इति पृच्छन्तः "अयमश्व पताकेयम्"इत्यादिकमातशायैतदुत्तरमशौष। लवोऽपि तदाकर्ण्य साटोपम् अश्वपालानाहूय सावज्ञमधिचिक्षेप। तत्र चातिक्रु॰ कामन्दपरिषदः समागत्य लवमतिमात्रमभ्यपयत्। अथ कोपप्रस्फुरिताधरम् अतिभीषणाकारं तं सैनिकमालोक्य भीतभीतैर्बटुभिः तस्मात् युध्यकलहात् निवारितः मुहुर्मुहुः क्रुद्धयातिमात्र साटोपसैनिकवचसा, विमलेत सिंह शावक इवातिदृप्तो लवः रणगरासमाकर्षणेन निजवचनानुरूपं शौर्य्यातिशयं प्रदर्शयन् स्वयामापितान् सहचराणाश्वासयामासेति।

इत्यशेषशास्त्राटवीपञ्चाननकुलपतिकल्प 'वि, ए' इत्युपनामक
श्रीजीवानन्दविद्यासागर भट्टाचार्यविरचितायां, तदात्मजाभ्यां
श्रीमदाशुबोधविद्याभूषण श्रीनित्यबोधविद्यारत्नाभ्यां
परिवर्त्तित परिवर्द्धितायां सुखबोधनीसमा
ख्यायाम् उत्तररामचरितव्याख्यायां
चतुर्थोऽङ्कः ॥ ४ ॥

अथ पञ्चमोऽङ्कः।

[नेपथ्ये]। भो भोः सैनिकाः! जातं जातमवलम्बनमस्माकम्। (क)—

नन्वेष त्वरितसुमन्त्रनुद्यमान-
व्यावल्गत्प्रजवनवाजिना रथेन।
उत्खातप्रचलितकोविदारकेतुः
श्रुत्वा वः प्रधनमुपैति चन्द्रकेतुः ॥ १ ॥

(क) भो भोः सैनिकाः,—योद्धारः, अस्माकं—सैनिकानाम्, अवलम्बनम्—आश्रयः, सहाय इति यावत्, जातं—सम्पन्नम्, अभवदित्यर्थः। लवेन निहन्यमानानाम् अस्माकं सैनिकसमूहानां रक्षणाय सेनानीः चन्द्रकेतुः त्वरितमेव समायाति, ततो न युष्माभिः भेतव्यमिति भावः।

अथ तान् सैनिकान् आश्वासयन् चन्द्रकेतोः त्वरितमेव युद्धस्थानमागमनप्रकारमाह, नन्वेष इति।—ननु भोः सैनिकाः!, एषः पुरतः एव दृश्यमान इत्यर्थः, चन्द्रकेतुः तन्नाम्ना अस्माकमधिनायकः सौमित्रितनयः, वः युष्माकं, प्रधनं युद्धं, समाकर्ण्य श्रुत्वा ऋषिकुमारेण सह तत्र तुमुलं युद्धमुपस्थितमिति, त्वरितेति।—त्वरितेन त्वरान्वितेन, अत्युत्कण्ठितेनेत्यर्थः, सुमन्त्रेण तन्नाम्ना सारथिप्रवरेण, नुद्यमानाः प्रेर्यमाणाः, सञ्चाल्यमाना इत्यर्थः, व्यावल्गन्तः प्रधावन्तः, प्रजवनाः अतिवेगशालिनः, वाजिनः अश्वाः यस्य तथाविधेन, रथेन स्यन्दनेन करणेन, तादृशं रथमारूढ इत्यर्थः, उत्खातेति।—उत्खातेन वन्धुरस्थानेषु प्रतिघातेन, उन्नतावनतभूमिषु वेगेन सञ्चालनात् प्रतिहतिं प्रापितेन हेतुनेत्यर्थः, प्रचलितः ईषत् विकम्पितः, कोविदारकेतुः कुद्दालध्वजः, काञ्चनारकाष्ठनिर्मितध्वजदण्ड इत्यर्थः, यस्य तथाविधः, ('कोविदारे चमरिकः कुद्दालो युगपत्रकः' इत्यमरः) उपैति आगच्छति, अस्माकं युद्धवार्तामुपश्रुत्य सत्वरं रणभूमिमेवागच्छति, ततः चास्माकमिदानीमवलम्बनं जातमिति भावः। [अत्र प्रजवनत्वं प्रति व्यावल्गत्त्वस्य हेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथोत्तरार्द्धे केतुः केतुरित्यत्रानुप्रासालङ्कारश्चेत्यनयोः नेर

[ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुतहर्षसम्भ्रमश्चन्द्रकेतुः] ।

चन्द्र । आर्य्य सुमन्त्र ! पश्य ।—

मुनिजनशिशुरेकः सर्वतः सैन्यकाये
नव इव रघुवंशस्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थिटङ्कारघोर-
ज्वलितशरसहस्रः कौतुकं मे करोति ॥ २ ॥

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-
रनवरतनिगुञ्जत्कोटिना कार्मुकेण ।

दित्येण स्थित इत्याह]। प्रहर्षिणी वृत्तम्,—"त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्" इति लक्षणात् ॥ १ ॥

अथ चन्द्रकेतुः लवस्य शौर्यातिशयं शरीरसंस्थानञ्च समवलोक्य विस्मयपरवशतां व्यातनोति, मुनिजनेति ।—नवः नूतनः, अचिरोद्गत इत्यर्थः, रघुवंशस्य रघुकुलस्य, अप्रसिद्धः अभिनवोदयात् सम्यक् परिचयाभावेन सर्व्वैरप्रत्यभिज्ञात इत्यर्थः प्ररोह इव अङ्कुर इव, एकः एकाकी, असहाय इत्यर्थः, मुनिजनशिशुः मुनिदारकः, प्रच्छन्नः रघुवंशीयः तेजः विभ्रत् कश्चिदन्योऽपि कुमार इत्यर्थः एतादृशालौकिकतेजसो रघुकुलादृते कुत्राप्यदर्शनादिति भावः, सर्व्वतः सर्व्वस्मिन्, सैन्यकाये सैन्यव्यूहे, हस्त्यश्वरथपादातरूपसेनासमुदाये इत्यर्थः, दलितेत्यादि ।—दलितानां निर्म्मथितानां, करिकपोलानां हस्तिगण्डस्थलानां, ये ग्रन्थयः सन्धिभागाः तेषां टङ्कारेण शराघातजनितेन टमित्याकारकभीषणशब्देन, घोरं भयानकं यथा तथा ज्वलितानि प्रदीपितानि, पाषाणसमकठोरकरिकुम्भेषु पतनात् अग्निज्वालाङ्कितानीति यावत्, शराणामायुधानां, सहस्राणि यस्य तथाविधः सन्, निशितशरसहस्राणि विसृज्य नभिकोटिनागान् विपाटयन् योद्धृवर्गाय तथाविधशरजालं ?? इत्यर्थः, मे मम, कौतुकं कुतूहलं, करोति जनयति। रघुकुल ?? कोऽयं ?? मुनिबालकः ?? अलौकिकशौर्यातिशयं प्रकटीकृत्य ?? करिकुलानि ?? व्याकुलीकुर्व्वन् मम विपुलां प्रीतिं जनयतीति समुदितार्थः । [चन्द्रकेतुरपि सार्द्धं मुनिजनशिशोः ?? ?? शादुपमाऽलङ्कारः]। मालिनी वृत्तम् ॥ २ ॥

?? ?? शौर्यातिशयं प्रकटीकरोति, किरतीति ।—कलितेन

समरशिरसि चञ्चत्पञ्चचूडश्चमूनाम्

उपरि शरतुषारं कोऽप्ययं वीरपोतः॥ ३॥

आश्चर्यमाश्चर्यम्॥

सुमन्त्रः। आयुष्मन्!—

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरूपम्।

कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि॥ ४॥

समुद्धतेन, किञ्चित्कोपेन दूरत्कोपेन, रजसा रक्ततामागतौ, लोहितायमानाविति यावत्, सुषमा वर्णशोभा यस्य तथोक्तः, अतितरामलतया अत्यन्ता वीरत्वख्यातिमनोहरणी तस्य कोपोदयात् मुखमण्डलस्य रक्तिमरागं नेतः। अपि च, चञ्चन्त्यः रणकर्माणि मनस्वात् ललितमन्दोलनेन इतस्ततः चलन्त्यः, पञ्चचूडाः पञ्चसंख्यकाः शिखाः यस्य तथोक्तः, सततकम्पनात् चलित काकपक्ष इत्यर्थः। (अत्र "एकशिखाश्चानाम पञ्चशिखा वा" इति नीयायन-स्मरणात् क्षत्रियचूडाकर्मणि रघुकुलमर्यादानां पञ्चशिखाधारणं कुलाचार आसीदित्यनुमीयत इति ज्ञेयम्), कोऽपि अनिर्वचनीयः इत्यद्भुतः अयं वीरपोतः वीर शिशुः, समरशिरसि रणमूर्द्धनि, युद्धैकक्षेत्रे अवस्थितः सन्निधौ, अनवरतमिति।— अनवरतं निरन्तरं यथा तथा, निकृन्तन्तौ शब्दायमाने कोटी द्वे अन्तौ यस्य तथा-विधेन कार्मुकेण धनुषा, चमूनां सेनानाम्, उपरि सैन्यसमूहस्योपरि, शर-तुषारं बाणवृष्टिम्, किरति वर्षति, अतिनिपुणतया अजस्रबाणवर्षणात् कुमारेणाञ्चितशरजालं करकावर्षणमिव अत्यद्भुतं चन्द्रकेतुसैनिकैरिति भावः। [अत्र तुषारे शर इत्यपि शराणां तुषारत्वारोपात् रूपकालङ्कारः, छेकानुप्रासवृत्त्यनुप्रासौ शब्दालङ्कारौ यथायोगं द्रष्टव्यौ। शराणामतिक्षिप्रत्वप्रतिपत्तये तुषारत्वमत्र प्रदर्शितं, तेन न परिमाणगतन्यूनत्वादनुचितार्थतादोषशङ्का कार्येति]। मालिनी वृत्तम्॥ ३॥

अथ सुमन्त्रः कुमारं लवं शौर्येण शरीरावयवेन च मत्वा रामचन्द्रस्य विनिश्चित्य, अतिशयितेति।— आयुष्मन्। दीर्घायुः। चन्द्रकेतो!, "आयुष्मन् रथिनं सूतः" इत्यलङ्कारिकवचनात्। अतिशयितं अतिक्रान्तं, सुराणां देवानाम्, असुराणां दितिसुतानाञ्च, प्रभावं वीर्य्यं येन तथाभूतं, तथैव भवत एव तुल्यरूपं समानाकारम् आकारेण भवत्सदृशसौन्दर्यशालिनमित्यर्थः, शिशुम् एनं बालकम्, अवलोक्य दृष्ट्वा, कुशिकसुतस्य कुशिकनन्दनस्य विश्वामित्रस्य, मखद्विषां यज्ञविघात-

चन्द्र। इमन्त्वेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते। (ख)—

अयं हि शिशुरेकक' समरभारभूरिस्फुरत्-
करालकरकन्दलीकलितशस्त्रजालैर्बलै' ।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदवारिदैरावृत: ॥ ५ ॥

काना राक्षसाना, प्रमाथे संहारे, कौशिकक्रतुहन्तॄन् मारीचादिनिशाचर समूहान् निहन्तुमिच्छन् धृतधनुष कार्मुकधारिण, रघुनन्दन रामभद्रं, स्मरामि चिन्तयामि, रणकर्मणि अस्य बालस्यालौकिक विक्रम निरुपम लावण्यञ्च समवलोक्याहं विस्मयविवशो मन्ये, पुन बालरूपीभवन् भगवान् रघुनाथ विश्वामित्रसवे क्रतुविघातिन राक्षसान् निहन्तु समुद्यत किमु ? इति भाव । आकारेण पराक्रमेण चाय बालक रामसदृश एव प्रतिभाति इत्याशय । [पुरा किल विश्वामित्रप्रार्थनया रामचन्द्र सलक्ष्मण राज्ञ दशरथस्यादेशात तदीय सत्र गत्वा यज्ञदुह राक्षसानवधीदिति रामायणी वार्त्ता। अत्र सदृशवस्त्वनुभवात रघुनन्दनस्मृतेरुदयात स्मरणालङ्कार, तथा शिशो सुरासुरप्रभावातिशायित्वस्या-सम्बन्धेऽपि तत्सम्बन्धोक्ते असम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कार, अपि च तत्रैव तृत्यरूपनित्युत्प्रेक्षा च, एषामन्योन्यमापेक्षतया स्थिते सङ्कर]। पुष्पिताग्रा वृत्तम् ॥ ४ ॥

(ख) तु—किन्तु, एकम—असहायम्, इम—बालकम्, उद्दिश्य—अभिलक्ष्य, भूयसा—बहूनामस्मत्सैनिकानाम्, आरम्भ,—युद्धोपक्रम, अभूदिति शेष, इति—अस्माद्धेतो, हृदय—मानसम्, अपत्रपते—लज्जते, एकेनानेन शिशुना सह सर्वेषामस्माक रणोद्यम सैन्यसमवायानाम् अशक्तिसूचकतया अतीव लज्जाजनक इति भाव ।

अथ तस्य शौर्यातिशय्य विवृणोति, अयमिति ।—अय पुरत दृश्यमान, एकक एकाकी, शिशु हि बाल एव, समरेति ।—समरस्य युद्धस्य भारे अतिशये, तुमुले एतस्मिन् सयाने इत्यर्थ, भूरि प्रभूत यथा स्यात्तथा, स्फुरन्ति दीप्यमानानि, करालानि भीषणानि, करा हस्ता, कन्दल्य इव गुल्मभेदा इव, [इत्युपमितसमास] तानि, गुल्मविशेषसदृशसुविशाले सुदृढैश्च करैरित्यर्थ,

सुमन्त्रः। वत्स! एभिः समस्तैरपि किमस्य? किं पुनर्व्यस्तैः? (ग)

"कदली कन्दली चीनः चमूरुप्रियकावपि। समूरुश्चेति हरिणा अमी अजिनयोनयः॥" इति तथाविधं व्याख्यानं न मनोरमम्, कोपादौ परीक्षार्थं कन्दलीशब्दस्य प्रयोगादर्शनात्, तथाहि,—('कन्दलं तु कपालेऽप्युपरागे नवाङ्कुरे। कलध्वनौ कन्दली तु मृगभेदमधभेदयोः॥' इति मेदिनी)। कलितानि परिगृहीतानि, शस्त्राण्येव कन्दलानि नवाङ्कुराणि यैः तथाविधैः, अपि च, क्वणन्तीभिः शब्दायमानाभिः कनकस्य सुवर्णस्य, किङ्किणीभिः क्षुद्रघण्टिकाभिः, झणझणायिताः अझणझणाः झणझणाः भूताः, झणझणेत्यव्यक्तशब्दं कुर्वन्त इत्यर्थः, ["अव्यक्तानुकरणात्—" (५।४।५७पा०) इति डाचि, "डाचि विवक्षिते—" (वा०) इति द्वित्वे च निष्पन्नात् झणझणाशब्दात् 'लोहितादिडाज्भ्यः—" (३।१।१३पा०) इति क्यषि क्ते निष्पन्नं झणझणायितेति नामधातोः कर्त्तरि निष्ठायां रूपमेतदिति बोध्यम्)। स्यन्दनाः रथाः येषां तैः, रथकिङ्किणीशब्दानां झणझणेत्याकारकाव्यक्तनिनादेन सर्वाः दिशः बधिरीकुर्वद्भिः इत्यर्थः, अमन्दः प्रभूतः, मदः दानवारिभिः, दुर्दिनानीव मेघाच्छन्नानि अहानीव, रणोन्मत्ततया अनिरतमेव मदजलक्षरणात् मेघाच्छन्नदिवसवत् प्रतीयमाना इत्यर्थः, ये द्विरदाः हस्तिनः त एव वारिदाः मेघाः येषु तैः, वर्षासु मेघाच्छन्नेषु अहःसु नवजलधराः यथा निरन्तरमेव जलानि वर्षन्ति, तथैवामी द्विरदा हि दानवारिभिः भूमितलमभिषिञ्चन्तीति समुदितार्थः। अमन्दः अनल्पः, मदः मदस्रावः, दुर्दिनं वर्षमिव यषां तादृशाः, द्विरदाः गजाः, वारिदाः मेघाः इव येषु तथोक्तैः इति वा विग्रहः। बलैः अस्मत्सैन्यैः, आवृतः आच्छादितः, अभूदिति शेषः, एकः हि बालकः पराभवितुं प्रभूतानामस्मत्सैनिकानामुपरोधः निरतिशयां मे लज्जां जनयतीति भावः। (अत्र करैः सह कन्दलीनां तथा दुर्दिनैः सह द्विरदानाञ्च साम्योपदर्शनात् लुप्तोपमा, एवं द्विरदेषु मेघानामभेदाध्यानात् निरङ्गरूपकमलङ्कारः, एतयोस्तु नैरपेक्ष्येण साम्यतः संसृष्टिः]। पृथ्वी वृत्तम्॥ ५॥

(ग) समस्तैरपि—निखिलैरपि, सम्मिलिततया स्थितैरपीत्यर्थः, एभिः,—सैनिकैः, अस्य—शिशोः लवस्य, किम्—फलम्, एते सेनासमुदायाः सम्मिलिताः सन्तः युध्यमानाः अपि एकाकिनः अस्य शिशोः किमपि कर्त्तुं न शक्नुवन्तीति भावः। व्यस्तैः,—विसृष्टैः, किं पुनः?—विभज्य स्थितानां कथा दूरत एवास्तामिति भावः।

चन्द्र। आर्य्य। त्वर्य्यताम् अनेन हि महानाश्रितजन-प्रमाथोऽस्माकमारम्भः। (घ) तथाहि,—

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्।
वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुवं
तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव ॥ ६ ॥

(घ) आर्य्य।—पूज्य सुमन्त्र!, त्वर्य्यताम्—त्वरा क्रियताम्, त्वयेति शेषः, सत्वरं रथः चाल्यतामिति भावः। अनेन—एतेन अमुना, महान्—अतिशयः, आश्रितजनानाम्—उपजीविसैनादिसमूहानाम्, प्रमाथः—ध्वंसः, आरम्भः—अनुष्ठितः, परोन्मुखानामस्मत्सैनिकानां संरक्षणाय मया सत्वरं युद्धस्थलं गन्तव्यम्, अतो भवता तूर्णं सवेगं रथः नीयतामित्याशयः।

अथ बालकस्यालौकिकयुद्धपाटवं व्याचष्टे, आगुञ्जदिति।—आगुञ्जन्त्यः ज्यानिर्घोषश्रवणेन प्राणभयात् अतीव गभीरं हृंहितध्वनिं कुर्व्वन्त्यः, गिरीणां पर्व्वतानां, ये कुञ्जाः लतागृहाः, तेषु या कुञ्जराणां हस्तिनां, घटा घटना, समुदायाः इत्यर्थः, ("करिणां घटना घटा" इत्यमरः) तासां विस्तीर्णः भूयस्तया उत्पादितः, कर्णानां श्रवणानां, ज्वरः पीडेति यावत्, येन तथाविधं, मौर्व्वीटङ्कारमुपश्रुत्य प्राणभयात् समन्तात् हृंहितं कुर्व्वतां गिरिवराणां नागानामपि श्रवणेन्द्रियपीडां जनयन्तमित्यर्थः, आगुञ्जतां सम्यक्‌रवं गर्ज्जताम्, गिरिकुञ्जकुञ्जराणां पर्व्वतनिकुञ्जचराणां हस्तिनां, घटाभ्यः समूहेभ्यः, विस्तीर्णः प्रदत्तः, कर्णज्वरः कर्णव्यथा येन तयोक्तम् इति वा विग्रहः, निभृतस्थाननिवेभ्यः वन्यगजेभ्योऽपि दुःश्रवरवेण श्रवणपीडां जनयन्तमित्यर्थः, अमन्दैः अनल्पैः, गभीरैरित्यर्थः, दुन्दुभीनां रणवाद्यविशेषाणां, रवैः शब्दैः, आध्मातं परिपूर्णं, प्रवर्द्धितमिति यावत् ज्यानिर्घोषं मौर्व्वीनिनादम्, उज्जृम्भयन् आविष्कुर्व्वन् उत्पादयन्निति यावत् वीरः शूरः लवः, वेल्लद्भैरवेति।—वेल्लतां विचेष्टमानानां, समन्तात् चलतामित्यर्थः, भैरवाणां भीषणानां, रुण्डानां कबन्धानाम्, अनुष्ठितक्रियायुक्तकलेवराणामित्यर्थः ("कबन्धं रुण्डं कलेवरः" इति हलायुधः) ये मुण्डनिकराः शिरःसमूहाः, आयुःशेषे निर्गता [illegible] प्रदेशात् [illegible] मस्तकनिकराः इत्यर्थः, तैः [illegible] क्रिया युक्तकलेवराणामिव [illegible] इति शङ्कत,

सुमन्त्रः। [स्वगतम्]। कथमीदृशेन सह वत्सस्य चन्द्रकेतो-र्द्वन्द्वसम्प्रहारमनुजानीयाम्? [विचिन्त्य।] अथवा इक्ष्वाकुगृहवृद्धाः खलु वयं, प्रत्युपस्थिते च का गतिः? (ङ)

तथाऽपि तेषां शीकरशीकराणां ... किञ्च मुण्डैः कबन्धभावो जनितः, तथा च मस्तकेहानां पिशाचीपरिक्षिप्तानामि। अधुना कबन्धभावमापन्नत्वात् तेषां प्राक्तनमुण्डभागमभिप्रेत्य "कण्डमुण्डनिकरः" इत्युक्तमिति ज्ञेयम्) भुवं रणभूमिं, त्वग्दिति।—त्वग्दतः प्रभृतसन्तमनणीम वृत्तिमापन्नस्य, कालस्य कृतान्तस्य, यत् करालं भीषणं, वक्त्रं मुखं, तस्य विवरं मुखावकाशे, ("अन्तरं विवरं रन्ध्रेऽपि भाजनगर्तयोः" इत्यमरः) व्याकीर्यमाणा इव समाच्छाद्यमाना इव, व्याप्यमाना इवेत्यर्थः, विधत्ते करोति। जगद्ग्रासनतत्परस्य कृतान्तस्य यथेच्छमुपभोगात् पारवश्यतया भङ्गुरात् तदाननविवरात् विगलितैः अस्मत्सैन्यानां शिरोभिः रणभूमिरियं समाच्छन्नेव प्रतीयत इति भावः। अहो! सुमहानस्मत्सैन्यक्षयः क्रियते वीरेणानेन, तत् त्वरितमेव मया यातव्यम् एतेनास्मत्सैनिकानां संरक्षणायेति तात्पर्यम्। [अत्र कुञ्जरघटानां कर्णज्वरानन्दनेऽपि तत्सम्बन्धोक्तेरसम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः, तथा भुवः व्याकीर्यमाणत्वस्य सम्भावनोत्कीर्तनादुत्कटैककोटिकसंशयसमुदयेन वाच्या क्रियोत्प्रेक्षाऽलङ्कारः, एतयोश्च नैरपेक्ष्येण स्थितेः संसृष्टिः। गुञ्जत इत्यत्र कर्तृकतया प्रसिद्धे कुञ्जरध्वनौ तथा प्रसिद्धेरभावात् तत्र तत्प्रयोगकृतः ख्यातिविरुद्धतादोषः 'चागुञ्जद्भिरि" इत्यत्र "चाबृंहद्भिरि" इति पाठेन समाधेयः, "बृहि शब्दे च" इति भौवादिकबृंहिधातोः सिद्धेः, "बृंहितं करिगर्जितम्" इत्यमरोक्तेश्चेति ज्ञेयम्]। शार्दूलविक्रीडितं वृत्तम्॥ ६॥

(ङ) कथम्—केन प्रकारेण, ईदृशेन—अद्भुतशौर्यशालिना अमुना लवेन इत्यर्थः, वत्सस्य—आयुष्मतः, द्वन्द्वसम्प्रहारम्—द्वन्द्वस्य—एतयोः द्वयोरित्यर्थः, सम्प्रहारं,—युद्धं, द्वन्द्वयुद्धमिति यावत्, अनुजानीयाम्?—अनुमोदयामि? अनुमन्येयेत्यर्थः, अमितपराक्रमशालिनाऽनेन सह युद्धे यदि काऽपि चन्द्रकेतौ क्षतिः स्यात् तर्हि महाननर्थ उत्पद्येतेति भावः। इक्ष्वाकुगृहवृद्धाः,—इक्ष्वाकूणाम्—इक्ष्वाकुवंशीयानां, गृहे—भवने, वृद्धाः,—वृद्धत्वं गताः, अत्र स्थित्वा वर्षीयांसः सम्भूताः इत्यर्थः, प्रत्युपस्थिते—सम्मुखमापतिते अस्मिन् व्यापारे इति यावत्, का

चन्द्र । [सविस्मयलज्जासम्भ्रमम्] । धिक्, प्रतिनिवृत्तानि सर्वत सैन्यानि मम ॥ (च)

सुमन्त्र । [रथवेगमभिनीय] । आयुष्मन् । स एष वाग्विषयीभूतस्ते प्रवीर । (छ)

चन्द्र । [विस्मृतिमभिनीय] । आर्य्य । किं तन्नामधेयमाख्यातमाख्यायके ? (ज)

गति ?—क अभ्यपाज ? युद्धकरणात् कथमन् निवारयाम ? यत निखिल सैन्यसंहारकारिणा अनेन बालेन सह युद्धोपदेश विना कोऽप्यन्य विधिरेव न दृश्यत इत्यर्थ, वयमाशैशवात इक्ष्वाकूणा भवने स्थित्वा सदैव सङ्ग्रामानिवर्त्तनरूप तदा कुलधर्म पश्याम एवञ्च यद्यपि तद्भवतु एव, तत्सदाचारानुगतये अवश्यमेव कुलधर्म विजानता मया चन्द्रकेतवे समरकरणोपदेश प्रदातव्य इति भाव ।

(च) सविस्मयलज्जासम्भ्रम—लवस्यासामान्य युद्धकौशल दृष्ट्वा विस्मय, एकाकिना लवेन सह युद्ध कर्त्तुमसमर्थाना स्वसैनिकाना विमुखीभाव दृष्ट्वा लज्जा अपिच स्वयमुपस्थाय युद्धे तेषा साहाय्य कर्त्तु सम्भ्रम —त्वरा, तं सह वर्त्तमान यथा तथेत्यर्थ आहेति शेष । सर्वत —सर्वाभ्य दिग्भ्य, सर्वतोभावेनेत्यर्थो वा, प्रतिनिवृत्तानि—विमुखीभूतानि सर्वासु दिक्षु पलाय्य गतानीत्यर्थो वा, सैन्यानि—धनानि धिक्—निन्दामीत्यर्थ, एकाकिना अमुना वीरेण पराजितान् रणभूमेय पलायितान अस्मद्वीरपुरुषान् शतश तिरस्करोमीति भाव, युद्धभूमौ शराविघाणा दृष्टप्रदर्शनस्य घृणाकरत्वादित्याशय ।

(छ) रथवेग—स्वकीयतस्यन्दनस्य जवम्, अभिनीय—नाटयित्वा, आहेति शेष । आयुष्मन् !—चिरञ्जीविन् ! स एष,—पुरतोऽत्र दृश्यमान इत्यर्थ, एतावत्कालं यद्विषयिणी कथामात्रा कथ्यते इति यावत प्रवीर —महायोद्धा लव वाग्विषयीभूत —वाचा—सलापाना, विषयीभूत,—गोचरीभूत, तव अधुना दृष्टिगोचरवर्ती वीरोऽयमिदानीं सञ्जात, अतोऽमुना सहाधुना त्व युद्धमानन्दित शक्नोषीति भाव ।

(ज) विस्मृति—लवस्यालौकिक युद्धकौशल विलोक्य तत्परिचयविस्मरणम्, अभिनीय—नाटयित्वा, आहेति शेष । आर्य—पूज्य !, सुमन्त्र ! इति यावत्, तन्नाम धेयम—एतस्य वीरस्य नाम, किम् आख्यात—कथितम् ? आख्यायके,—सन्देश-

सुमन्त्रः। वत्स! लव इति। (झ)

चन्द्रः। भो भो लव! महाबाहो! किमेभिस्तव सैनिकैः?।

एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥ ७ ॥

सुमन्त्रः। कुमार! पश्य पश्य।—

व्यपवर्त्तत एष बालवीरः पृतनानिर्मथनात् त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः ॥ ८ ॥

चारिणि, दूरतरस्थे, घोरे यज्ञारम्भसमये एतस्मात् तस्य निःगमनाभिहितं तत् अद्य विस्मरसि, स्मरसि चेत् तत् कथयेति भावः। एतेन धर्म्मगृहमसमये हूता स्वपरपर्य्यायाणां नोऽभुपृष्टवा॥ परिधत्ते सम्मदृदृरिति प्राचीना प्रथा आसीदित्यनुमीयते।

(झ) वत्स!—आयुष्मन्!, लव इति—लव इत्याकारकः, लवेत्यानुपूर्व्यवच्छिन्नमित्यर्थः, अस्य बालकस्य नामधेयमिति शेषः।

अथादौ लवं ससम्मानं सम्बोध्य सवज्ञं च तेन सह वीरजनानुरूपं युद्धं कर्त्तुं प्रार्थयते, भो भो लवेति।—भो भो महाबाहो! लव! आजानुलम्बितभुज! लव!, तव एभिः सैनिकैः मदीयैः सेनासमूहैः, किम्? अलम्, एभिः सामान्यसैनिकपुरुषैः सह महावीरस्य तव युद्धं न शोभते इत्यर्थः, सामान्यसैनिकावमर्दनात् विरमतु इत्याशयः। एषोऽहम् अहमेव तव समकक्षः प्रतियोद्धेत्यर्थः, मामेव एहि मामेव आगच्छ, मया सह युध्यस्वेत्यर्थः। अथ फलितमाह, तेज इति।—तेजः त्वदीयं शौर्य्यं, तेजसि मदीये अग्निनि चाग्नि प्रभावे, शाम्यतु निर्व्वाणं अधिगच्छतु, यथा अकिञ्चित्करं बालज्योतिः महति तपनतेजसि शाम्यतीति, तथैव ते तेजः मदीये महति तेजसि विलीयतामिति भावः। एतेन स्वस्याधिकबलत्वं व्यञ्जितमिति ध्येयम्। [अत्र तेजःपदार्थस्य श्लिष्टतया वह्न्यर्थकत्वात् वह्नि-पराक्रमयोर्भेदेऽपि अभेदाध्यवसायमूलोऽतिशयोक्तिरलङ्कारः]। पथ्यावक्त्रं वृत्तम् ॥७॥

अथ युद्धाद्विरम्य लवः वाक्यानुसारतः स्वेषामन्तिकमागच्छतीत्याह, व्यपवर्त्तत इति।—एषः अयं पुरतः स्थितः बालवीरः असीमपराक्रमसम्पन्नः शिशुः, लव इत्यर्थः, त्वया उपहूतः पूर्वोक्तप्रकारेण आकारितः सन्, दृप्तसिंहशावः मदोद्धतः केशरिशिशुः, स्तनयित्नुरवात् मेघगर्ज्जनात्, मेघध्वनिमाकर्ण्येत्यर्थः, ["ल्यब्लोपे कर्म्मण्यधिकरणे च" (वा०) इति पञ्चमी] इभावलीनां हस्ति

[ततः प्रविशति त्वरिताऽतक्रमो (ञ) लवः]।

लवः । साधु राजपुत्र ! साधु, सत्यमैक्ष्वाकः खल्वसि । तदयं परागत एवास्मि । (ट)

[नेपथ्ये महान् कलकलः]।

लवः । [सावेगं परावृत्य]। कथम् !! इदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणं पर्य्यवष्टभ्य निघ्नन्ति मां चमूपतयः !!! धिग् जाल्मान् । (ठ)—

यूथानाम्, भवनद्धादिव हननादेव, पृतनानिर्म्मथनात् पृतनानां सैन्यानां, निर्म्मथनात् नाशात्, सैन्यसङ्घविनाशादित्यर्थः, व्यपवर्त्तते विरमति, सैन्यनाशं परित्यज्य इत एवागच्छतीत्यर्थः, यथा गर्जत् सिंहशिशुः घनध्वनिमुपश्रुत्य गजकुलमर्दनोद्योगं परित्यज्य ततोऽप्यधिकबलं मत्वा मेघं समाक्रमितुकाम क्रममनु बध्नाति तथैवायं शौर्य्योद्दीप्तः वीरपोतः भवतः प्रतिहन्त समाह्वानमाकर्ण्य इत एवाभिवर्त्तते इति समुदितार्थः । [अत्र हस्तिसिंहशावेन सह बालवीरस्याविधर्म्यसाम्योपदर्शनात् उपमाऽलङ्कारः]। मालभारिणी वृत्तम्,—"विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीयम् ।" इति लक्षणात् । औपच्छन्दसकन्तु अस्यैव वृत्तस्य नामान्तरमिति ज्ञेयम् ॥ ८ ॥

(ञ) त्वरितोऽतक्रमः,—त्वरितः—सत्वरः, उद्धतः,—गर्व्वितः, क्रमः,—पदविक्षेपः यस्य तथाभूतः सन्, अत्र सनकचवीरलाभजनितौत्सुक्यात् त्वरा, स्वशौर्य्यातिशय्याय औद्धत्यं क्रमस्येति ज्ञेयम् ।

(ट) राजपुत्र !—राजकुमार !, चन्द्रकेतो !, साधु साधु—समीचीनम्, अभिहितं भवतेति शेषः, यदनवलेनैव वीरेण योद्धव्यमित्यभिधाय यद्‌क्तं तत् नुमोमहनमिति भावः, [हर्षे द्विर्वचनम्]। सत्यं—यथार्थम्, ऐक्ष्वाकः,—इक्ष्वाकुकुलोद्भूतः, खलु—निश्चितम्, असि—भवसि, इक्ष्वाकुवंशीयानां वीराणामनुरूपं वाक्यमिदं वाचा व्याहरणादिति भावः । तत्—तस्मात्, इक्ष्वाकुवंशोद्भवस्य प्रतिपक्षत्वेन भवतः लाभादित्यर्थः, अयम्—एषोऽहमित्यर्थः, परागतः,—प्रतिनिवृत्तः, भवत्सकाशमुपस्थित इति यावत्, अस्मि—भवामि, अतो मया सह यथेप्सितं युध्यस्वेत्याशयः ।

(ठ) सावेगं—सौत्कण्ठ, परावृत्य—पराङ्मुखोभूय, भूयः सैन्यानामभिमुख

> अथ शैलाघातक्षुभितबडवावक्त्रहुतभुक्-
> प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।
> समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
> पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ९ ॥

[इति परिक्रामति]।

मित्यर्थः, आह्वयति नः। कथम्—किम्? इदानीम्—अधुना, मया अपि—मया निवारिताः सन्तः युद्धभूमेः पराङ्मुखाः अपि, चमूपतयः—सेनान्यः प्रतिनिवृत्य—पुनः युद्धस्थलमुपागम्य, मम युद्धविरतिं दृष्ट्वा पुनः प्रत्यागताः सन्तः इत्यर्थः, युद्धाभिसारिणः,—समराभिलाषिणः, मया योद्धुमभीप्सवः इति यावत्, पर्यवष्टभ्य—वेष्टयित्वा परिवार्येत्यर्थः, मम समन्तात् सदर्पमवस्थायेति भावः, मां निघ्नन्ति—प्रहरन्ति, मामभिलक्ष्य बाणान् विकिरन्ति इति यावत्। जाल्मान्—मूर्खान्, अतिनीचान् सेनान्य इति भावः। धिक्—निन्दामि, पराङ्मुखान् परानपि पुनः योद्धुमभिमनसः असमीक्ष्यकारिणः निर्लज्जान् वीरापसदानेतान् अतश्च निन्दामीति भावः।

अथ सेनासमूहानां दुर्व्यवहारमभिसमीक्ष्य तत्सहचरीभीषः सकोपमाह, अथेति।—समन्तात् परितः, सर्वा दिशः अभिव्याप्येत्यर्थः, उत्सर्पन् उद्गच्छन्, भयं ग्नुमाण इत्यर्थः, घनेति।—घनः निविडः, तुमुलः सरवः, भयावह इत्यर्थः, सेनाकलकलः सैन्यानां कोलाहलः, प्रलयेति।—प्रलय पवनेन कल्पान्तवायुना, प्रलयकालीयसंहारपवनेनेत्यर्थः, आस्फालितः आलोडितः, उद्वेलित इत्यर्थः, पयोराशेः समुद्रस्य ओघः इव प्रवाह इव, मे मम, शैलेति।—शैलानां पर्वतानां, समुद्रान्तर्वर्त्तिनामिति यावत्, आघातेन सङ्घर्षेण, जल मग्नशैलसङ्घप्रतिघातेनेत्यर्थः, क्षुभितः उद्दीपितः, यः बडवावक्त्रहुतभुक् अश्वावदन विनिर्गतवह्निः, वाडवाग्निरिति यावत्, तद्वत् प्रचण्डः भयावहः, यः क्रोधार्चि र्निचयः कोपानलशिखासमूहः, तस्य कवलत्वं ग्रासत्वं, व्रजतु प्राप्नोतु, समुद्रगर्भस्थशैलै प्रतिघातं प्राप्य प्रवर्धितः वाडवाग्निः यथा प्रलयकालोदितसंहारवायुसञ्चालिततरङ्ग वीचिमालाकुलं पयोधिसलिलराशिं विशोषयति, तथैव मदीयः क्रोधः क्षणेनैव प्रोद्धतानामसौ सैनिकानां समन्तात् श्रूयमाणमेतं कलकलनादं समूलमेवापशमयतु इति भावः। एतेन सर्वानेवैतान् नीचान् सैनिकानचिरादेव हनिष्यामीत्ययं स्फुटीकृत इति ज्ञेयम्। [पुरा किल मौर्वस्य महर्षेः समुद्भूतः वह्निः सर्वाणि जगन्ति दग्धुं प्रववृते,

चन्द्र । भो भो. कुमार ।—

अत्यद्भुतादसि गुणातिशयात् प्रियो मे,
तस्मात् सखा त्वमसि, यन्मम तत्तवैव ।
तत् किं निजे परिजने कदनं करोषि ?
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

तद्दृष्ट्वा भगवान् ब्रह्मा तं वडवामुखे संस्थाप्य तस्य समुद्रसलिलभक्ष्यत्वं प्रकल्पितवान्, तदवध्यसौ पारावारान्तरवस्थाय प्रवर्द्धितजलराशिं विशोषयतीति पौराणिकी वार्त्ता, तथा च मत्स्यपुराणे,—"वडवामुखेऽस्य वसति समुद्रे वै भविष्यति । काले तु सलिलाशी मया कृतः ॥" इत्याद्यनुसन्धेयम् । एषोऽग्निरन्त- सेनाकलस्यावैधव्यसाम्योपदेशादुपमाऽलङ्कारः, तथा हुतभुजा सह अत्र पयोराशिरोधेन सह साम्यात् लुप्तोपमा च, इत्यनयोः निरपेक्षतया स्थितेः प्रचण्डक्रोधाग्निना संसृष्टिः]। शिखरिणी वृत्तम् ॥ ९ ॥

अथास्यालौकिकं शौर्य्यं विलोक्य परितुष्यन् चन्द्रकेतुः सानवाटेन तथौजत्यभूयिष्ठ व्यवहारं परिहर्त्तुमनं प्रणोदयति, अत्यद्भुतादिति ।—अत्यद्भुतात् अतिविस्मयकरात्, एकाकिना बालेन असङ्ख्यातानां योद्धृपुरुषाणां पराभवजननादिति भावः, गुणातिशयात् शौर्य्यातिरेकात्, मे मम, प्रियः अतिवल्लभः, असि भवसि, तस्मात् प्रियत्वादेव, त्वं सखा मितम्, असि भवसि, यद्यपि भवानस्मत्पक्षीयसैन्यानां तथा सख्यकरणात् शत्रुभूत एव भवति, तथाऽपि मया वीरेण वीरत्वगौरवरिरचिषुणा, ते शौर्य्यातिशयस्य पक्षता परिगृहीतेन सता, भवान् प्रियवयस्य इत्यभिमन्यते इति भावः । अत एव यत् वस्तु, मम मत्सम्बद्धं तत् वस्तु, तवैव भवत्सम्बद्धमेव, सखित्वावस्य संस्थापनात् त्वां मां तरां कियतोऽपि पार्थक्यस्याभावादिति भावः । तत तस्मात्, मम त्वदीयत्वेन हेतुनेत्यर्थः, किं कथं, निजे स्वीये, परिजने परिवारे, पदातिवान्तरङ्गजने इत्यर्थः, कदनं विमर्द्दनं, हननमित्यर्थं, करोषि विदधासि, स्वपक्षानेव निहंसि च, स्वाश्रितपरिजनानां निघ्नन् भवादृशानां ... नैवानुचितमिति भावः । प्रागतिविनीतव्यवहारेण कथञ्चित् परिते... ... प्रदर्शयन्नाह नन्वेष इति ।—ननु भो लव!, एष चन्द्र... ... तव भवतः दर्पनिकषः दर्पस्य वीरत्वगर्व्वस्य निकषः ... ... निकषप्रस्तरे यथा स्वर्णे सुवर्णस्य साराऽसारत्वस्य परीक्षा क्रियते, तथा मदर्शनेन तव वीरत्वातिशयस्य सारता सम्यगेव परीक्षिष्यते,

अथ शैलाघातक्षुभितबडवावक्त्रहुतभुक्-
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनाऽऽस्फालित इव ॥ ९ ॥

[इति परिक्रामति]।

भूत्वेत्यर्थः, आर्द्धति शेषः। कथं—किम्? इदानीम्—अधुना, मया अपि—मया निर्जिताः सन्तः युद्धभूमेः पलायनपरा अपि, चमूपतयः,—सेनान्यः प्रतिनिवृत्य—पुनः युद्धस्थलमुपागम्य, मम युद्धविरतिं दृष्ट्वा पुनः प्रत्यावर्त्तनं कृत्वेत्यर्थः, युद्धाभिसारिणः,—समराभिलाषिणः, भूयः योद्धुमभीप्सव इति यावत्, पर्य्यवष्टभ्य—वेष्टयित्वा परिवार्य्येत्यर्थः, मम समन्तात् सदर्पमवस्थायेति भावः, मां निघ्नन्ति—प्रहरन्ति, मामभिलक्ष्य बाणान् विकिरन्ति इति यावत्। जाल्मान्—मूर्खान्, अतिनीचान् सेनान्य इति भावः। धिक्—निन्दामि, पराजयात् परमपि पुनः योद्धुमभिमनसः असमीक्ष्यकारिणः निर्लज्जान् वीरापसदानेतान् शतशो निन्दामीति भावः।

अथ सेनासमूहानां दुर्व्वहाहङ्कारमभिसमीक्ष्य तत्सञ्चराभीप्सुः सकोपमाह, अथेति।—समन्तात् परितः, सर्वा दिशः अभिव्याप्येत्यर्थः, उत्सर्पन् उल्लङ्घन्, अग्रे घूर्णमान इत्यर्थः, घनेति।—घनः निबिडः, तुमुलः सङ्कुलः, भयावह इत्यर्थः, सेनाकलकलः सैन्यानां कोलाहलः, प्रलयेति।—प्रलयपवनेन कल्पान्तवायुना, युगकालात्ययसंहारपवनेनेत्यर्थः, आस्फालितः आन्दोलितः, उद्वेलित इत्यर्थः, पयोराशेः समुद्रस्य, ओघः इव प्रवाह इव, मे मम, शैलेति।—शैलानां पर्व्वतानां, समुद्रान्तर्वर्त्तिनामिति यावत्, आघातेन सङ्घर्षेण, जलसङ्घर्षेणसहप्रतिघातेनेत्यर्थः, क्षुभितः उद्दीपितः, यः बडवावक्त्रहुतभुक् अश्वावदनविनिर्गतवह्निः, वाडवाग्निरिति यावत्, तद्वत् प्रचण्डः भयावहः, यः क्रोधार्चिर्निचयः कोपानलशिखासमूहः, तस्य कवलत्वं ग्रासत्वं, व्रजतु प्राप्नोतु, समुद्रगर्भस्थशैलैः प्रतिघातं प्राप्य प्रवर्द्धितः वाडवाग्निः यथा प्रलयकालोद्गतमहारवायुसञ्चालिततया वीचिमालाकुलं पयोधिसलिलराशिं विशोषयति, तथैव मदीयः क्रोधः क्षणेनैव प्रोद्धतानाममीषां सैनिकानां समन्तात् श्रूयमाणमेनं कलकलनादं समूलमेवापगमयतु इति भावः। एतेन सर्वानेवैतान् योधान् सैनिकानचिरादेव हनिष्यामीत्यर्थः स्फुटीकृत इति बोध्यम्। [पुरा किल भौर्व्वस्य महर्षेः समुद्भूतः वह्निः सर्वाणि जगन्ति दग्धुं प्रवृत्ते,

चन्द्र। भो भोः कुमार!—

अत्यद्भुतादसि गुणातिशयात् प्रियो मे,
तस्मात् सखा त्वमसि, यन्मम तत्तवैव।
तत् किं निजे परिजने कदनं करोषि?
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः॥ १०॥

तद्दृष्ट्वा भगवान् ब्रह्मा तं वडवामुखे संस्थाप्य तस्य समुद्रसलिलभक्ष्यत्वं प्रकल्पितवान्, तदवध्यसौ पारावारान्तरवस्थाय प्रवर्द्धितजलराशिं विशोषयतीति पौराणिकी वार्त्ता, तथाच मत्स्यपुराणे,—"वडवामुखेऽस्य वसति समुद्रे वै भविष्यति। एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः॥" इत्याद्यनुसन्धेयम्। अत्र पयोराशिरोषेण सह सैनाकलस्य वैधर्म्यसाम्योपदेशादुपमाऽलङ्कारः, तथा हुतभुजा सह प्रचण्डक्रोधाग्निना साम्यात् लुप्तोपमा च, इत्यनयोः निरपेक्षतया स्थितेः संसृष्टिः]। शिखरिणी वृत्तम्॥ ९॥

अथास्यालौकिकं शौर्यं विलोक्य परितुष्यन् चन्द्रकेतुः सानुवादेन तयोरत्यभूयिष्ठं व्यवहारं परिहर्त्तुमनाः प्रणोदयति, अत्यद्भुतादिति।—अत्यद्भुतात् अतिविस्मयकरात्, एकाकिना बालेन असङ्ख्यातानां योद्धृपुरुषाणां पराभवजननादिति भावः, गुणातिशयात् शौर्यातिरेकात्, मे मम, प्रियः अतिवल्लभः, असि भवसि, तस्मात् प्रियत्वादेव, त्वं सखा मित्रम्, असि भवसि, यद्यपि भवानस्मत्पक्षीयसैन्यानां वधसम्पादनात् शत्रुभूत एव भवति, तथाऽपि मया वीरेण वीरत्वगौरवं परिरिक्षिषुणा, ते वीर्यातिशयञ्च पश्यता परितुष्टेन सता, भवान् प्रियसख इत्यभिनन्द्यते इति भावः। अत एव यत् वस्तु, मम मत्सम्बद्धं तत् वस्तु, तवैव भवत्सम्बद्धमेव सन्निधानादेव सम्पादनात् त्वां मां चान्तरा कियतोऽपि पार्थक्यस्याभावादिति भावः। तत् तस्मात् हेतोः, मम त्वदीयत्वेन हेतुनेत्यर्थः, किं कथं, निजे स्वीये, परिजने परिवारे, अस्मदीयानुचरजने इत्यर्थः, कदनं विमर्द्दनं, हननमित्यर्थः, करोषि विदधासि, स्वपक्षानिव निहनोऽर्थः, स्वाश्रितपरिजनानां निहिंसनं भवादृशानां महात्मनां [illegible]मैवानुचितमिति भावः। प्रागतिविनीतव्यवहारेण कथञ्चित् परितोषितानां [illegible] प्रदर्शयन्नाह, नन्वेष इति।—ननु भो लव!, एष चन्द्रकेतुः चन्द्रकेतुनामाहं तव भवतः, दर्पनिकषः दर्पस्य वीरत्वगर्वस्य निकषः परीक्षास्थानमित्यर्थः, निकषप्रस्तरे यथा सुवर्णस्य सारासारवत्त्वस्य परीक्षा क्रियते, तथा मयैव तव वीरत्वातिशयस्य सारता सम्यक् परीक्षिष्यते,

लव। [सहर्षसम्भ्रमं परावृत्य]। अहो! महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्त्तनकुलकुमारस्य। तत् किमेभिः? एनमेव तावत् सम्भावयामि। (ड)

[पुनर्नेपथ्ये कलकलः]।

लव। [सक्रोधनिर्वेदम्]। आः॥ कदर्थितोऽहमेभिर्वारं वारं वीरसंवादविघ्नकारिभिः। [इत्यभिमुखं परिक्रामति]। (ढ)

तर्हि, निष्फलमस्मच्चापमिति अस्य मया सह युद्धम्, अथवा तं रणकण्डूरा निर्वापिता भविष्यतीति भावः। [अत्र चन्द्रकेतौ दर्पनिर्वापकत्वस्याभिदारोपात् निरङ्ग रूपकमलङ्कारः]। वसन्ततिलकं वृत्तम्॥ १०॥

(ड) प्रतिपक्षवीरस्य लाभात् हर्षः, तदीयानुरागात् सम्भ्रमः—त्वरा, ताभ्यां सह वर्त्तमानं यथा तथा, परावृत्य—चन्द्रकेतोरभिमुखीभूय, आहेति शेषः। अहो—इति विस्मये, महानुभावस्य—महान्—विपुलः अनुभावः—महत्त्वं यस्य तथाविधस्य, महानुभावशालिन इत्यर्थः। विकर्त्तनकुलस्य—सूर्यवंशस्य कुमारस्य—सन्तानस्य, चन्द्रकेतोरित्यर्थः। प्रसन्नकर्कशा—प्रसन्ना—निर्मला, धारालग्ना इत्यर्थः, कर्कशा—परुषा च, महावंशप्रसूततया अस्य वचनानां स्वतःसिद्धमेव कोमलत्वं, शौर्यभूयिष्ठभवितव्यतया स्वाभाविकमेव परुषत्वमप्यस्तीति भावः। वीरवचनप्रयुक्तिः,—वीरस्य—शूरस्य, यानि वचनानि—वाक्यानि, तेषां प्रयुक्तिः,—प्रयोगः, वीरा हि यथा सदा वीरत्वव्यञ्जकानि वचांसि समुदीरयन्ति, तथैवायं चन्द्रकेतुरपि वाचं व्याचष्टे इति भावः। तत्—तस्मात्, समरसौष्ठवलाभादित्यर्थः, एभिः,—नीचैः सैनिकैः किम्?—अलम्, एतेषां हननेन न किञ्चन फलमिति भावः। एनमेव—एनं वीरं तावदेव, सम्भावयामि—सम्मानयामि, तावदिति—वाक्यालङ्कारे। बाणेन सह वीरोचितं युद्धं वीरगौरवरक्षां करोमि, रणपिपासाञ्च प्रशमय्य निवर्त्तयामि इति भावः।

(ढ) क्रोधेन—कोपेन, निर्वेदेन—स्वावमाननया च सह वर्त्तमानं यथा तथेत्यर्थः, आहेति शेषः, पुनः पुनः निर्जितानामपि सैनिकानां युद्धप्रवृत्तिदर्शनात् क्रोधः तेषां वराकाणामत्यन्तनिराकरणेऽपि ततस्तानान्यसैनिकागतस्वनिपातन प्रयासदर्शनात् आत्मनि कथञ्चित् घृणाया उदयात् निर्वेद इति बोध्यम्। आः,—इति कोपसूचकमव्ययम्, ('आस्तु स्यात् कोपपीडयोः" इत्यमरः)। वीरसंवादविघ्नकारिभिः,—वीरेण शूरेण चन्द्रकेतुना सह, यः संवादः,—युद्धसमकालोचित

चन्द्र। आर्य। दृश्यतामितद्द्रष्टव्यम्। (ग)—

दर्पेण कौतुकवता मयि बद्धलक्ष्य'
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा।
द्वेधासमुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम्॥ ११॥

कलाप इत्यथ, तस्य विघ्न—प्रतिबन्ध कुर्व्वन्ति ये ते, तथा युद्धकोलाहल कृत्वा वीरेण चन्द्रकेतुना सह मयाने मम निरन्तर बाधामुत्पादयद्भिरिति भाव। एभि —सैनिकै, वीरादसदेरित्यथ। कदर्थित,—उत्पीडित, [कु कुत्सित, अथ प्रयोजनमिति "को कत्तत्पुरुषेऽचि" (६।३।१०१ पा०) इति कुशब्दस्य कदादेश, कदथ कृत इति "तत्करोति—" (ग०) इति णिचि निष्ठाया रूपम्] लाञ्छित इति यावत्, अस्मीति शेष, एते पामरा सेनासमूहा मम वीरत्वप्रकाशने निरन्तरमन्तरायमुत्पादयन्त मामत्यर्थ- मेवोद्विजयन्ति, अत एतान् समूलघात हनिष्यामीति भाव। तदभिमुख—तेषा क्षुद्राणामन्तरायकारिणा सैन्याना सम्मुख, परिक्रामति—धावति।

(ग) आर्य।—पूज्य सुमन्त्र।, दृश्यताम्—अवलोक्यताम्, एतत्—परोवर्त्ति, द्रष्टव्य—दर्शनयोग्य वस्तु एतस्याश्चर्य्यलौकिकवचवायै समन्तात् लेशरिसुतवदभिधावन- मित्यर्थ।

अथ रणभूमिषु प्रकटीकृता लवस्य तामेव विस्मयावहां चेष्टा विशदीकृत्य व्याचष्टे, दर्पेणेति।—कौतुकवता अतिशिक्षयकरेण, दर्पेण गर्वेण, मयि ममोपरि, बद्धलक्ष्य बद्ध निविष्ट लक्ष्य दृष्टिविक्षेप येन तथाविध, अतिविस्मयावहदर्पेण सा[?] मे[?] निहितदृष्टि सन् मदभिमुखमभिधावित इत्यथ, यद्वा —चन्द्रकेतो [?] भोजनमिति गत् यत् कौतुक स्वकीय कौतूहल तदस्यास्तीति तेन, दर्पेण वीरत्वगर्व्वेण हेतुना, अपरेषा वीक्षणार्थ यत् कौतुक तत्सहितस्य [?]धानानाल्वीरत्वदर्पस्य सत्त्वादित्यथ, बद्धलक्ष्य कृतदृष्टिपात, मद्वीरत्व- दर्शनौत्सुक्यात् सदर्प मयि कटाक्ष विनिक्षिपन्नित्यथ, पश्चात् पृष्ठत, बलै सैन्यै [?], अनुसृत अनुधावित, उदीर्णम् उद्धृत, शरनिक्षेपाय उत्तोलितमिति यावत्, धनु कार्मुक येन तथाविध, मदीयतामानसरसैनिकाना सञ्चराय दराहने मर समागेदननिबध, सद वीर लव, द्वेधा द्विप्रकारेण, पुरत

सुमन्त्र । कुमार एवैनं द्रष्टुमपि जानाति, वयन्तु केवलं परवन्तो विस्मयेन । (त)

चन्द्र । भो भो राजानः ।—

सङ्ख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वत्रैकस्मिन् कवचनिचितैर्मध्यचर्मोत्तरीये ।

पश्चाच्चेत्यर्थं, समुद्धतेन प्रचण्डं प्रवहता, कदाचित् पुरतः कदाचित् पश्चाच्चेत्येवं पर्याकुलं चलतेत्यर्थः, मरुता वायुना, तरलस्य चपलस्य, चालितस्येत्यर्थः, वात्यया उभयतो नीयमानस्येति भावः, माघवतचापधरस्य माघवतस्य ऐन्द्रस्य, चापस्य धनुषः, धरस्य धारकस्य, मेघस्य वारिवाहस्य, लक्ष्मीं शोभां, धत्ते धारयति, इन्द्रधनुष्मत् बलाहकः यथा प्रतिकूलवायुना कदाचित् पुरतः कदाचित् पश्चाच्चाभिताड़ितः रम्यां शोभां विधत्ते, तथैवायं जलदश्यामवपुः बालकः मारुतसमैरस्मत्सैन्यैः विताड़ितः ऐन्द्रशरासनवल्लोपेण कार्मुकं वहन् सदर्पं मयि निहितकटाक्षः सन् क्षणं तानेवाक्रमितुकामः पुरतः परिक्रामन् क्षणञ्च नियातनैषिणः मत्सैनिकान् तर्ज्जयित् पश्चादभिधावन् परितः प्रसृतामनिर्व्वचनीयां नैसर्गिकीं श्रियं बिभर्त्तीति तात्पर्य्यम् । [अत्र एकस्य लक्ष्मीनपर कथं बहतोऽसम्भवतो वस्तुसम्बन्धस्य बिम्बानुबिम्बभावेन तत्सदृशलक्ष्म्याः धारणेन सामञ्जस्यात् निदर्शनाऽलङ्कारः, मेघमाघेति छेकानुप्रास श्चेत्यनयोः संसृष्टिः]। वसन्ततिलकं वृत्तम् ॥ ११ ॥

(त) कुमार एव—भवानेव, नापरे इत्येवशब्दार्थः, एनं—त्वां, द्रष्टुमपि—सम्यक् समीक्ष्यावधारयितुमपि, का कथा यथोचितरूपादिपरीक्षाप्रयासाना-मित्यपिकाराथः, वीरा एव हि वीरान् परीक्षितुं शक्नुवन्ति, नान्ये इत्याशयः । तु—किन्तु, वयम्—अस्मादृशा उदासीना जना इत्यर्थः, विस्मयेन—आश्चर्य्येण, अस्य बालस्याद्भुतरणकर्म्मदर्शनेनेत्यर्थः, परवन्तः—पराधीनाः, सञ्जाता इति शेषः, एकश्चन्द्रकेतुरेवैतस्य वीरत्वादिकं विनिर्णेतुं शक्नोति, वयन्तु केवलमस्याभूतपूर्वं विक्रमं विलोक्य विस्मयविवशाः सञ्जाता इति भावः ।

अथ पदातिनम् एकं बालं पराभवितुं भूयसा आयासेन सम्प्रवर्त्तमानान् अगणितान् सामन्तनृपतीनवलोक्य घृणया शतशः एतान् धिक्करोति, सङ्ख्यातीतैरिति ।—सङ्ख्या परिमाणम्, अतीतैः अतिक्रान्तैः, ["द्वितीयाश्रितातीत—' (२।१।२४ पा०) इति द्वितीयासमासः] अगणनैरित्यर्थः, द्विरदेत्यादि ।—द्विरदेषु हस्तिषु,

कालज्येष्ठैरचरमवय.काम्यकाये भवद्भि-
र्योऽयं बद्धो युधि परिकरस्तेन वो धिग् धिगस्मान् ॥ १२ ॥

लव । [सक्षोभम] । कथम, अनुकम्पते नाम ? [विचिन्त्य] । भवतु, कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि सस्तम्भयामि । [इति ध्यानं नाटयति] । (ष)

तुरगेषु वाजिषु तथा स्यन्दनेषु रथेषु च तिष्ठन्ति ये ते, निषादिभि अश्वारोहिभि रथचारिभिश्चेत्यर्थ, अपि च कवचै वर्मभि, निचितै आवृतै, सुदृढवारबाणदरचितशरीरैरिति यावत्, कालज्येष्ठै कालेन वयसा, ज्येष्ठै वृद्धतमै, अतिवर्षीयोभिरित्यर्थ, भवद्भि युष्माभि, पदातौ पादचारिणि, पदातिक इत्यर्थ, एकस्मिन् असहाये, मेध्य पवित्र, चर्म अजिनम्, उत्तरीयम् उत्तरासङ्ग यस्य तस्मिन्, कोमलमृगत्वगाच्छादितगात्रे इत्यर्थ, सम्पूर्णतया असंरचितकलेवरे इति भाव , अचरमेण अभिनवेन, नूतनेन इत्यथ, ("अचरम" इत्यत्र "अभिनव" इति पाठान्तरम्), वयसा बाल्येन, काम्य रमणीय, काय कलेवर यस्य तथाविधे अत अस्मिन् कुमारे लवे, युधि समरे, योऽय परिकर कटिबन्ध, रणव्यापारे अध्यवसाय इत्यर्थ, बद्ध धृत, तेन हेतुना, व युष्मान्, धिक् निन्दामि, अस्मान् अपीति शेष, धिक् निन्दामि चेत्यर्थ, एवविधमस्मदीयसेनाना जुगुप्सत सग्रामकर्म विलोक्य एताश नेदृत्वेन कृता वयमपि अत्यधिक विलज्जिता जाता इति भाव । पदातिना सह अश्वारोहिणाम्, असहृताङ्गेन सह कवचिना, तथा बालेन सह प्रवयसा सग्रामक्रिया अतीव घृणाकरोति तात्पर्यम् । [अत्र विरूपाणामिव वस्तूनामेकत्र सङ्घटनात विषमालङ्कार] । मन्दाक्रान्ता वृत्तम् ॥ १२ ॥

(ष) क्षोभेण—चित्तचाञ्चल्येन, मानसव्यथयेति यावत, सह वर्तमान यथा तथा, आहेति शेष । चन्द्रकेतो प्राक्तनादरार्द्रवचसा श्रवणात चित्तक्षोभ ज्ञेय । कथ—किम, अनुकम्पते—दयते, नाम—कोपे, ना किमु असमर्थ विभाव्य चन्द्रकेतु इदृश सदयभाव प्रदर्शयति ? तन्नु न सहस इति भाव । विचिन्त्य—क्षण विभाव्य, पुनराहेति शेष । भवतु—एवमस्तु इत्यथ । कालहरणप्रतिषेधाय—कालस्य—समयस्य, यत् हरण—क्षेपण, तस्य प्रतिषेधाय—निराकरणाय, वृथा कालक्षपणनिवृत्तये इत्यथ , अन्यथोच्च एभि सैनिकै सह युद्धेन वृथा कालक्षेपस्य सम्भावना इति भाव । जृम्भकास्त्रेण—जृम्भकाख्यास्त्रविशेषस्य प्रयोगेणेत्यर्थ, सैन्यानि—

सुमन्त्र। तत्किम्? अकस्मात् अस्मत्सैन्यघोषः प्रशाम्यति? (द)

लव। पश्याम्येनमधुना सप्रगल्भम्। (ध)

सुमन्त्र। [ससम्भ्रमम्]। वत्स! मन्ये, कुमारेणानेन जृम्भकास्त्रमामन्त्रितम्। (न)

चन्द्र। अत्र कः सन्देहः?—

व्यतिकर इव भीमस्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।

सत्त्वानि बलानि, स्तम्भयन्ति—सम्मोहयन्ति, निश्चेतनानि कुर्वन्तीत्यर्थः। ध्यान—मन्त्रैः जृम्भकास्त्रप्रयोगचिन्तनं, नाटयति—अभिनयति।

(द) तत् किम्?—किमेतत्? इत्यर्थः, अकस्मात्—सहसा, अस्मत्सैन्यघोषः,—मदीयसैन्यानां कलकलध्वनिः, प्रशाम्यति?—निवर्त्तते?, आश्चर्यम्! सहसा सेनाकलकलः कथं निवृत्तः? कश्चित् अभिनवः अन्तरायः सैन्येषु समुदितः किंनु? इति भावः।

(ध) एनं—चन्द्रकेतुं, सप्रगल्भं—प्रगल्भं,—प्रगल्भता, अत्र लक्षणया धर्म्मपरत्वादिति ज्ञेयं, तया सह इत्यर्थः, तेन सह वर्त्तमानं तम्, स्फूर्त्तिमन्तमित्यर्थः, (यद्यपि "प्रगल्भः प्रतिभान्वितः" इत्यमरोक्तेः प्रगल्भशब्दस्य विशेषणत्वात् तेन सह बहुव्रीहिर्नोपपद्यते इति मन्यते, तथाऽप्यस्य लक्षणया प्रगल्भत्वरूपधर्म्मपरत्वमङ्गीकृत्य प्रोक्तसमासः सङ्गमनीय इति ज्ञेयम्। अत एव क्वचित् 'सुप्रगल्भम्' "प्रगल्भम्" इति च पाठान्तरं दृश्यते, अस्तु तत्पक्षे सुगम एवेत्यवधेयम्)। पश्यामि—अवलोकयामि, स्वप्रभावातिशयप्रतिपादकानां प्रागुक्तवचसां प्रयोगेण अनुमतिमाश्रित्य मन्ये, तदिदानीमस्य गर्व्वमपनोदयामि इति भावः।

(न) ससम्भ्रमं—सत्वरं, सौत्कण्ठमित्यर्थः, आहेति शेषः, अनेन कुमारेण—एतेन मुनिबालकेन, जृम्भकास्त्रं—जृम्भकनामधेयं कृशाश्वतनयभूतं मन्त्रकमायुधम्, आमन्त्रितं—मन्त्रोच्चारणपूर्व्वकं समाहूतं, प्रयुक्तमित्यर्थः, मन्ये—सम्भावयामि, नो चेदेवं तर्हि कथमकस्मात् सेनाकलकलध्वनिनिवृत्तिरित्याशयः।

अथ चन्द्रकेतुः स्वयमपि सैन्यसङ्कुलानामवस्थावर्णनमुखेन जृम्भकास्त्राणां प्रयोगं समर्थयन् तत्प्रभावं विशिष्य व्याचष्टे, व्यतिकर इति।—तामसः तमःसम्बन्धी, वैद्युतश्च विद्युत्सम्बन्धी च, भीमः भयङ्करः, व्यतिकरः सम्पर्कः, विद्युतां तमसाञ्च सर्व्वप्राणि

अथ लिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतममितवीर्यं जृम्भते जृम्भकास्त्रम् ॥ १२ ॥

आश्चर्यमाश्चर्यम् ॥—

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।

भयङ्कर युगपत समवाय इत्यर्थ, पिण्डीभूता सौदामनीतमःसन्तति इति यावत्, इह अस्मिन् सैन्यसमुदाये, प्रणिहितमपि समाधिधान समीचित नियोजितमपि, विनिपातितमपीति भाव, चक्षु मदीय नयन, यत्सुक्त तम सम्बन्धेन आदौ यत विद्युत्सम्बन्धेन च पश्चात मुक्त परित्यक्तम्, प्रथमत. प्रगाढतमोभि समावृत पश्चात् विद्युज्ज्योतिभि विमुक्तीकृतमित्यर्थ, प्रागन्धीकृत्य पश्चात् दर्शनशक्तिसमुद्भासित कृत्वेति भाव, छिनत्ति निपीडयति, शक्तिहीन करोतीत्यर्थ । अथ अनन्तर, किञ्चेत्यर्थ, ("अथाथो मङ्गले स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकात्स्न्या-रम्भसमुच्चये ॥" इति मेदिनी)। एतत्सैन्यम् अस्मद्बलसमुदाय, लिखितमिव चित्रितमिव, चित्रपटार्पितमिवेत्यर्थ, अस्पन्द स्पन्दरहित, निश्चेष्ट सदित्यर्थ, आस्ते वर्तते, अत एव नियत निश्चितम्, अमितवीर्यम् अपरिमितसामर्थ्यम्, अपौरुषेय शक्तिकमित्यर्थ, जृम्भकास्त्र जृम्भकाख्य कृशाश्वतनयमन्त्र समस्तप्रयोगसंहारम् आयुध, जृम्भत स्फुरति, समुदेतीत्यर्थ, मन्ये नूनं जृम्भकास्त्राणि प्रादुरभूवन्निति, अन्यथा कथमस्मत्सैन्य चपला समनुपरोध, कियत्कालात्पर प्रकाशश्च समजनि? सैनिकवृन्द चित्रार्पितमिवावतिष्ठत? इति भाव । [अत्र सैन्याना लिखित-वदवस्थानस्य सम्भावनया उत्कटैककोटिकसंशयसमुदायात् उत्प्रेक्षाऽलङ्कार, अपिच सैन्याना समन्ततु जृम्भकास्त्रवर्तनस्पन्दीभावात् नत्वान्यत तदस्त्रजविकारादे-र्मतत्वात् तथा विच्छित्तिवशात् साधनीभूतसैन्यगतावाक्रियानि साध्यीभूतस्य जृम्भकास्त्रप्रादुर्भावस्य ज्ञानाच्च अनुमानालङ्कार, एतयोरङ्गाङ्गिभावेन स्थिते, सङ्कर]। मालिनी वृत्तम् ॥ १२ ॥

अथ तदस्त्राणा प्रभाव प्रभावेन विशदीकृत्य प्रतिपादयति, पातालो-दरेति ।—पाताल इत्य अधोभुवनं, सार्वजनिकचन्दनान्धकारसमाहतस्पन्द, उदरे

कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्यते
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १४ ॥

अभ्यन्तरे मध्यदेशे इत्यर्थः ये कुञ्जाः लताप्रतानावृतस्थानानि, लतागृहा इत्यर्थः, तेषु पुञ्जितानि पुञ्जीभूय सञ्चितानि घनीभूतानीत्यर्थः यानि तमांसि अन्धकाराः, तैरिव श्यामैः मलिनवर्णैः, अन्धकाराणामतितीव्रत्वप्रतिपादनाय पातालोदरकुञ्जेत्युपादानं बोध्यम्, अपिच, उत्तप्तं दृढतरवह्निसंयोगात् पावकसमवर्णतां सम्प्राप्तमित्यर्थः, अत एव स्फुरत् दीप्यमानं, प्रभातरलं ज्योतिर्मयमिति यावत्, यत् आरकूटं पित्तलम्, ("रीतिः स्त्रियामारकूटम्" इत्यमरः) तस्य यानि कपिलानि पिङ्गलवर्णानि, ज्योतींषि प्रभाः, तद्वत् स्वतन्त्र दैदीप्यमाना, दीप्रा प्रभा येषां तथाविधैः अनलतापेन द्रवीभूतपित्तलानां तरलप्रभाभास्वरैरित्यर्थः, एतत्तु विद्युद्विलासप्रकटीकरणार्थमिति बोध्यम्, कल्पेत्यादि।—कल्पस्य ब्रह्मणो दिवसस्य, ("कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने" इति मेदिनी) उपलक्षितत्वात्, आक्षेप इव, अवसानमिति यावत्, यस्मिन् तथाभूते काले, युगान्तसमये इत्यर्थः, कल्पावसाने इति यावत्, ये कठोराः दारुणाः, दुर्निवारा इत्यर्थः, भैरवाः भयङ्कराः मरुतः सम्वर्त्तोदिताः प्रलयकालीन वायवः, तैः व्यस्तैः विक्षिप्तैः, विन्ध्याद्रिगात्रात् उत्पाट्य स्थानान्तरं नीतैरित्यर्थः, मीलन्तः सततमेव सङ्गताः, मेघाः पयोवाहा येषु तथाविधाः, अत एव तडिद्भिः तदीयविद्युद्भिः, कडाराणि पिङ्गलवर्णानि, ("कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ" इत्यमरः) कुहराणि गुहा येषां ते, ततः मीलन्मेघाश्च ते तडित्कडारकुहराश्चेति [विशेषणकर्मधारयः] तैः तादृशैः, विन्ध्याद्रिकूटैरिव विन्ध्यगिरिशिखरैरिव, जृम्भकैः जृम्भकाख्यास्त्रविशेषैः, नभः गगनम्, अवाकीर्यते व्याप्यते, सर्व्वतः समाच्छन्नं क्रियते इत्यर्थः, निविडान्धतमसाच्छन्ने महाप्रलयसमये समुदितैः सम्वर्त्तकादिभिः प्रचण्डपवनैः निहत्य समाहृतानि विच्छिन्नमूलानि विन्ध्यगिरिशिखराणि सकलान् समुड्डीय यथा प्रचण्ड तथाविधमेघाघातं सम्प्राप्य विद्युन्मालाः परितः परिक्रमन्ति सन्ति जाज्वल्यमाना समन्तमावरन्ति, तथैव किं नामूनि जृम्भकास्त्राणि अस्मद्बलसमुदायेषु समुत्थितानीति भावः। [एवं प्रलयपवनेन छिन्नतया समुत्क्षिप्त विन्ध्याद्रिकूटैः सह जृम्भकास्त्राणां साधर्म्य मात्रोपदर्शनात् उपमालङ्कार एव, नोत्प्रेक्षा, प्रलयसमये दृष्टविशेषस्य शास्त्र सिद्धत्वेन वास्तविकतया, विन्ध्याद्रिकूटानामपि शालिरूपतया वर्णनायाश्च सुसङ्गततया

सुमन्त्र। कुतः पुनरस्य जृम्भकाणामागमः स्यात्? (प)

चन्द्र। भगवतः प्राचेतसादिति मन्यामहे। (फ)

सुमन्त्र। नास्य व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु। (ब)

यतः,—

कृशाश्वतनया ह्येते कृशाश्वात् कौशिकं गताः।
अथ तत्सम्प्रदायेन रामभद्रे स्थिता इति॥ १५॥

नुचितत्वात् चकाल्पानकत्वाच्च कथञ्चिदप्यत्र विषये सम्भावनाया अभावादिति ज्ञेयम्। शार्दूलविक्रीडितं वृत्तम्॥ १४॥

(प) कुतः,—कस्मात् पुरुषात्, अस्य—लवस्य, ["शेषे विभाषा" (वा०) इति कर्त्तरि षष्ठी वैकल्पिकी, "केचिदविशेषेण विभाषामिच्छन्ति" इति दीक्षितवचनात्]। जृम्भकाणाम्—एतेषां दैवानामायुधानाम्, ["उभयप्राप्तौ कर्म्मणि" (२।३।६६ पा०) इति कर्म्मणि षष्ठी]। आगमः,—लाभः, प्राप्तिरित्यर्थः, स्यात्?—भवेत्?, भगवान् रामस्तु महर्षेः विश्वामित्रात् इमानि अधिगतवान्, अयन्तु कुतः? इति भावः।

(फ) प्राचेतसात्—वाल्मीकेः, आगमः इति शेषः। इति—एवं, मन्यामहे—अनुमिनुमः, अस्यैव महर्षेः शिष्यत्वादित्याशयः।

(ब) अस्य—महर्षेः वाल्मीकेः, अस्त्रेषु—आयुधेषु, व्यवहारः,—स्वेनैव प्रयोगः, शिष्येभ्यो वा उपदेशः इति यावत्, न—नासीत्यर्थः, यद्यपि महर्षिः सर्व्वज्ञः तया निखिलं वेत्ति, तथाऽप्ययं केषाञ्चिदप्यस्त्राणां स्वयं सम्प्रयोगं न करोति, शिष्येभ्यश्च वा एतत् नोपदिशति इति भावः, विशेषतः,—विशेषेण, जृम्भकेषु—कृशाश्वतनयेष्वनेषु अस्त्रेषु व्यवहारः इति शेषः, सामान्यतः अस्त्रव्यवहाराणामदर्शनात् जृम्भकास्त्राणान्तु कथैव नास्तीति भावः।

अद्यतया जृम्भकास्त्राणां सम्प्रदायं विवृणोति, कृशाश्वेति।—एते जृम्भकाख्याः अस्त्रविशेषाः, हि इति सम्भावनार्थकमव्ययम्, महौजसः प्रजापतेः कृशाश्वस्य तनयत्वात् एव जृम्भकाणामादरातिशयप्रकटनायैव हिशब्दप्रयोगः बोध्यः। ("हि पादपूरणे हेतौ विशेषेऽप्यवधारणे। प्रश्ने हेत्वपदेशे च सम्भ्रमासूययोरपि॥" इति मेदिनी) कृशाश्वतनयाः कृशाश्वेन प्रजापतिना सृष्टाः इत्यर्थः, कृशाश्वेन [illegible] तपसा तेजोऽस्य सम्भूता इति यावत्, कृशाश्वात् तस्मादेव महापुरुषात्, तस्यैव तपस्तेजा[illegible] समुत्पन्नेति भावः, कौशिकं महर्षिं विश्वामित्रं [illegible], [illegible] कौशिके महर्षिमुपाश्रिता इति भावः, अथ

चन्द्र । अपरेऽपि परमोपचीयमानसत्त्वप्रकाशाः स्वयं हि मन्त्रदृशः पश्यन्ति । (भ)

सुमन्त्र । वत्स ! सावधानो भव, परागतः प्रवीरः । (म)

कुमारौ । [अन्योऽन्यं प्रति] । अहो ! प्रियदर्शनः कुमारः !! ।

[सस्नेहानुरागं निर्वर्ण्य] । (य)—

अनन्तरं, तत्सम्प्रदायेन तेषामस्त्राणां गुरुपारम्पर्यक्रमात्उपदेशेनेत्यर्थः, कौशिकोपदेशेनेति यावत्, रामभद्रे श्रीरामचन्द्रे, स्थिता सङ्क्रान्ता, रामभद्रमुपाश्रिता इत्यर्थः, इतीति वाक्यसमाप्तौ, ("व्यवस्थिता" इति पाठान्तरम्)। इत्थं हि एतेषामस्त्राणां गुरुपरम्परानुस्थिति सुप्रसिद्धा, एतभ्योऽन्यत्र नास्त्येतेषां सम्भविगति, अतो वाल्मीकौ महर्षौ तस्य उपसङ्क्रम न हि सम्भवतीति तात्पर्य्यम् । [अत्र जृम्भकास्त्राणामनेकेषु सङ्क्रमणात् पर्य्यायाद्वारं, तथा तच्छब्देनैव कृशाश्वस्य उपस्थितिसम्भवे पुनः कृशाश्वपदोपादानात् कथितपदत्वदोषः, स च "कृशाश्वात" इत्यत्र "तस्माच्च" इति पाठे समाधेय इति] ॥ १५ ॥

(भ) अपरेऽपि—कृशाश्वादिभ्यः अन्येऽपि, परमोपचीयमानसत्त्वप्रकाशाः—परमम्—अत्यर्थम्, उपचीयमानः,—परिवर्द्धमानः, सत्त्वस्य—सत्त्वगुणस्य, प्रकाशः,—आविर्भावः येषु ते, विगतरजस्तमोगुणोद्रेकात् समुद्भासिततेजस इत्यर्थः, यद्वा,—परमं—सातिशयम्, उपचीयमानः,—परिवर्द्धमानः, सत्त्वस्य—बलस्य, आयस्य तेजस इति यावत् प्रकाशः,—उदयः येषां ते, मन्त्रदृशः,—मन्त्रसाक्षात्कर्त्तारः ऋषयः, उग्रेण तपसा श्रुतीनां प्रत्यक्षीकर्त्तार इत्यर्थः, स्वयं हि—अन्योपदेशं विनैवेत्यर्थः, पश्यन्ति—जृम्भकादीन् जानन्ति इत्यर्थः, ज्ञानचक्षुषा सर्वं विभाव्य दिव्यास्त्राणि लभन्ते अनुभवन्ति इति यावत्, अतः सम्भवे कृशाश्वादिव्यतिरिक्तेभ्यः प्राचेतसादिभ्यः महर्षिभ्योऽपि एतादृशास्त्राणां लवेन लाभः सम्भवेदिति भावः ।

(म) सावधानो भव—आत्मरक्षणाय अप्रमत्तो भव, अवस्थाक्रमेण प्रति मनः सन्निधेहीत्यर्थः, प्रवीरः,—प्रकृष्टः वीरः, लवः इत्यर्थः, परागतः,—समुपस्थितः, यतोऽयं शूरः आक्रमितुकामः इत एव सत्वरं समायाति, अतस्त्वया इदानीमनलसेन सता स्थातव्यमिति भावः ।

(य) अन्योऽन्यं प्रति—परस्परमवलोक्य प्राहतुरिति शेषः । अहो !—इति विस्मयाश्चर्य्यम्, प्रियदर्शनः,—प्रियं—मनोज्ञं, दर्शनम्—अवलोकनं यस्य सः, सौम्यमूर्त्तिरित्यर्थः, कुमारः,—लवः चन्द्रकेतुः । सस्नेहानुरागं—स्नेहेन—प्रेम्णा,

यदृच्छासंवादः किमु ? किमु गुणानामतिशयः ?
पुराणो वा जन्मान्तरनिविडबन्धः परिचयः ? ।
निजो वा सम्बन्धः किमु विधिवशात् कोऽप्यविदितः ?
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

अनुरागेण—अत्यन्तासक्त्या च सह वर्त्तमानं यथा तथा निर्वर्ण्य—दृष्ट्वा, आहतुरिति शेषः उभयोः प्रियदर्शनत्वादेव अन्योऽन्यं प्रति स्नेहः, समवयस्कत्वेन सखित्वादेव चानुराग इति ध्येयम् ।

अथान्योन्यं प्रति स्निह्यन्तौ अनुरज्यन्तौ च कुमारौ विविधं तत्कारणमनुसन्दधाते, यदृच्छेति ।—यदृच्छया हेतुं विनाऽपि, अकस्मादित्यर्थः, संवादः समागमः, किमु ? किम्, दैववशादेव आवयोः य एष समागमः सञ्जातः, स एव किमेतस्मिन् हृदयावधानरचनायां हेतुः, तत्र किमपि अन्यत् कारणं नास्ति किम् ? इति भावः, गुणानां शौर्यगाम्भीर्यसौजन्यादिगुणसमूहानाम्, अतिशयः आधिक्यम्, उत्कर्ष इत्यर्थः, किमु ? किम्, ईदृगसाधारणगुणनिचयानां प्रभावस्यैव सत्त्वादेव तद्दर्शनात् एवं स्निह्यमनोऽनुरज्यतीति भावः, गुणाधिके स्वत एव प्रीतिः समुत्पद्यते इत्याशयः, वा अथवा, जन्मान्तरे अन्यस्मिन् जन्मनि, निविडः दृढः, बन्धः स्नेहमयं बन्धनं यस्य तादृशः, पूर्वस्मिन् जन्मनि सुदृढस्नेहमयपाशेन संयमिततया संस्थित इत्यर्थः, पुराणः प्राक्तनः परिचयः भ्रातृत्वबन्धुत्वादिरूपः सम्बन्धः, किमु ? इति शेषः, जन्मान्तरीयसुदृढमैत्र्यादिबन्धनं किमु एतस्मिन् जन्मनि एवं जनयति ? इति भावः, वा अथवा विधिवशात् भाग्यवशात्, अदृष्टविवर्त्तनादित्यर्थः, अविदितः अविज्ञातः, कोऽपि अनिर्वचनीयः, निजः स्वीयः, सम्बन्धः भ्रातृत्वादिरूपः सम्पर्कः, किमु ? किम्, अस्मिन् मे भ्रातृत्वादिरूपात् कस्माच्चित् सम्बन्धादेव ईदृशं किमु स्वाभाविकं प्रीतिभावं समुदितः ? यो हि सम्बन्धः दुर्दैवप्रभावादेव इदानीं अस्माकं नाव-बुध्यत इति भावः, दृष्टे अवलोकिते, एतस्मिन् प्रियदर्शने कुमारे, मम हृदयं मानसम् अवधानम् ऐकाग्र्यम्, प्रीतिप्रवणतामित्यर्थः, रचयति गमयति, प्रणयविह्वलतामासादयतीत्यर्थः, नूनमनेन बालकेन सह मे कश्चित् जन्मान्तरीयः स्वजन-सम्बन्धः आसीत् तत्प्रभावादेव मम चेतः सहसा ईदृक् विकलं सञ्जातमिति भावः । [अत्र यदृच्छासंवादोत्थानात् परं ह्यस्य हृदयावधानं प्रति प्रतिभाविधेन विवि-धानां हेतूनामनुसन्धानानां तुल्यबलतया एकतरविनिश्चयाभावात् गूढः सन्देहा-लङ्कारः, अपि च, यदृच्छादिसंवादादीनां प्रति पादविवक्षायां हेतुत्वेनोपचारात्

भगत्व। भूयसा जीविधर्म एष, यद्रसमयी कस्यचित् क्वचित् प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं वा चक्षूराग इति, तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति। (र)—

वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, एतयोरङ्गाङ्गिभावतया स्थितेः सङ्करः]। शिखरिणी वृत्तम्॥ १६॥

(र) भूयसा—बाहुल्येन, प्रायश इत्यर्थः, एषः,—वक्ष्यमाणप्रकारः इत्यर्थः, जीविधर्मः,—जीविनां—प्राणिनां, धर्मः,—स्वभावः, किं तदिति प्रश्ने आह, यदिति।—यत् कस्यचित्—जनस्य, क्वचित्—कुत्रचित् जनविशेषे, रसमयी—अनुरागात्मिका, प्रीतिः,—स्नेहः, जायते इति शेषः कश्चित् जनः दृष्टैव नैसर्गिक-प्रीतेरुदयात् कस्यचिज्जनस्य चित्तं यत् समाकृष्टं भवतीति दृश्यते, स एव जीविधर्म इति भावः। कथमेतज्जायते तत्र लौकिकोक्तिमाह, यत्रेति।—यत्र—यस्यां प्रीतौ, लौकिकानां—लोकाचाराभिज्ञानां जनानाम्, उपचारः,—व्यवहारः, मानवसमूहाः तद्विषये एवं हि व्याहरन्तीत्यर्थः, ("उपचार" इत्यत्र 'व्याहार" इति पाठान्तरम्)। तारामैत्रकं—ताराणाम्—अक्षिकनीनिकानां, मैत्रकं—मित्रत्वम्, अक्षितारिकयोरपरस्परमेव परस्परतारकातेजःसम्पर्कजनितम् अक्लिष्टं सख्यं हि भवति इत्यर्थः, नयनरागभराडेव अहेतुकं केषाञ्चित् सुदृढं प्रणयः इह जगति दृश्यते इति भावः, यद्वा,—ताराणाम्—उभयोः द्रष्टॄणां जन्मतारकादीनां, मैत्रमेव मैत्रकम्, [स्वार्थे कप्रत्ययः]। परस्परेषां जन्मताराणां गणने यत्र मित्रामित्रतार-कादिकं भवति, स एव प्रमाप्रेमादिहेतुरिति भावः, वा—पक्षान्तरे, चक्षूरागः,—चक्षुषोः—नयनानां रागः,—अनुरागः, विशुद्धं हि प्रेम किमपि निमित्तान्तरमनपेक्ष्यैव समदीयं अन्योऽन्यावलोकनमात्रं दर्शीरेव मानसमावर्जयति स्नेहप्रवणञ्च करोतीति भावः, एवं हि वङ्गभाषया "चखेर देखा" इत्याम्नायते, इदृशानुरागस्य केवलं ताराचक्षुभिरेव प्राधान्येन निष्पाद्यतया, तारामैत्रकरूपतया चक्षूरागरूपतया वाऽत्र निर्दिश्यते लोकैरिति शेषम्, तं—तादृशम् इह लोके तारामैत्रकादिनाम्ना उपचरितमित्यर्थः, प्रेमाणं—प्रणयं, सखिभावमिति यावत्, ("प्रेमा ना वासवे वाते प्रेमास्त्री स्नेहनर्मणोः" इति मेदिनी)। अप्रतिसंख्येयं—प्रतिसंख्यातुम्—इयत्तया अवधारयितुमशक्यम्, अतिगभीरतया अप्रतिमेयस्वरूपमित्यर्थः, अनिबन्धनं—नास्ति निबन्धनं—किमपि कारणं यस्य तथोक्तम्, अहेतुकमित्यर्थः, आमनन्ति—कथयन्ति, भवता ईदृशाकस्मिकप्रीतिभावस्य प्राक् यानि यानि कारणानि आशङ्कितानि, तेभ्यः

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ १७ ॥

कुमारौ। (अन्योऽन्यं प्रति)।—

एतस्मिन् मदकलमल्लिकाक्षपक्ष-
-मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे।

विनाऽपि लोके केवलम् ईश्वरेच्छयैव निर्निमित्तस्य एतादृशप्रणयस्य दृश्यते तत्त्वदर्शिभिः परीक्षकैः इति भावः।

एतेषान्तु निर्हेतुकानां प्रेम्णां स्वरूपं फलञ्च विशदीकृत्य विवृणोति, अहेतुरिति।— अहेतुः निर्निमित्तः, प्रागुक्तभ्रातृत्वादिसम्बन्धविशेषविनिर्मुक्त इत्यर्थः, कमपि कारणविशेषमनपेक्ष्य एव जायमान इति यावत्, यः पक्षपातः पक्षे पातः, परस्परं प्रति आसक्तिविशेष इति यावत्, तस्य प्रतिक्रिया प्रतीकारः, निवृत्तिकारकः कोऽप्यभ्युपायः इत्यर्थः, नास्ति न वर्त्तते, तस्य स्वाभाविकतया अकृत्रिमत्वादित्याशयः, उपकारादिरूपकारणजन्यस्य तु कृत्रिमतया तद्रूपकारणाद्यैरवसानदर्शनात्तु स्थायित्वाऽदर्शनात्, अकृत्रिमस्य तु प्रणयस्य सर्वास्मिन् काले समभावेनैव सत्त्वम्, इत्येतावानेवानयोर्भेद इति ध्येयम्। स्वरूपमुपवर्ण्य तत्फलनिदानीं विवृणोति स हीति।— हि यस्मात्, सः तादृशः सहजपक्षपातरूपः अतिविशुद्धप्रणय इत्यर्थः, स्नेहात्मकः स्नेह एव आत्मा स्वरूपं यस्य तादृशः, स्नेहमयः इत्यर्थः, तन्तुः सूत्रं, प्रणयसूत्रमिति यावत्, अन्तर्मर्माणि हृदयादिमर्म्मस्थानानि उभयोरेव अन्तःकरणानीत्यर्थः, सीव्यति—गृथ्नाति, सुदृढं बध्नातीत्यर्थः, लौकिकं वस्त्रादि सूत्रेण यथा सीव्यति, तथा कोऽप्यविज्ञातपूर्वः कारणविशेषः मृदुनाऽन्तःकरणद्वयं स्नेहप्रणयतन्तुना ग्रथित्वा एकीकरोतीति भावः। [अत्र कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, अपिच, स्नेहे तन्तोरभेदारोपात् रूपकमलङ्कारः, एतयोरङ्गाङ्गिभावेन सङ्करः] ॥ १७ ॥

अथ परस्परं प्रत्यनुरक्तौ कुमारौ स्वस्वहृदयभावं प्रकटयन्तौ पठतः। (अन्योऽन्यं प्रति)।—मदकलेति ["तत्करोति—" (ग०) इति णिच् णिजन्तात् कर्मणि क्तः] मसृणितः स्निग्धीकृतः, या राजपट्टः कान्तपाषाणविशेषः, परस्परानुरागसूचकमपि, यद्वा,—पट्टेषु वस्त्रेषु राजा राजपट्टः [राजदन्तादिवत् पूर्वनिपातः] विशिष्टः रम्यः वस्त्रं, तद्वत् कान्ते मनोहरे तस्मिन्, एतस्मिन् इदम्, एतस्मिन् पुरोवर्त्तिनि, शरीरे देहे, केनापि येन वा प्रकारेण,

यत्प्राप्तौ मम परिरम्भणाभिलाषात्
उन्मीलत्पुलककदम्बमङ्गमास्ते ॥ १८ ॥
किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना ?
शस्त्रेणापि हि तेन किं, न विषयो जायेत यस्येदृशः ? ।

सायका बाणा, नाद्यापि ? अद्यापि, प्रहाराय निर्गतवन्तः इत्यर्थः, सन्तीति शेषः, एतस्मिन् मृदुनि कमनीये च शरीरे कठोरा शराः केनापि प्रकारेण मया हननाय निक्षेप्तुं न शक्यन्ते इति भावः, यत्प्राप्तौ यस्य शरीरस्य, प्राप्तौ लाभे सति, परिरम्भणाभिलाषात् परिरम्भणस्य समालिङ्गनस्य, अभिलाषात् स्पृहावशात्, आलिङ्गितुम् अत्यधिकवाञ्छोदयेन हेतुनेत्यर्थः, मम अङ्गम् अवयवम्, उन्मीलत् उद्गच्छत्, पुलकानां रोमाञ्चानां, कदम्बः समूहः यस्मिन् तथाविधं, यद्वा,—उन्मीलन्त उद्यन्तः, पुलका रोमाञ्चा, कदम्बानि इव कदम्बकुसुमानीव यस्मिन् तथाविधम्, आस्ते वर्त्तते, यतः एतच्छरीरस्य परिष्वङ्गाय मदीयशरीरं पुलकाञ्चितं भवति, अतः कथमेतस्मिन् मृतोत्पादनं शरान् निपातयेयम् इति भावः, तथा च एतदतिकमनीयं वपुः शरनिक्षेपस्य नितरामेवानर्हम् इति फलितम्। [अत्र पूर्वार्द्धगतवाक्यार्थस्य शरीरे सायकाविमोचनं प्रति परार्द्धगतवाक्यार्थस्य पुलकोद्गमजनितालिङ्गनाभिलाषस्य हेतुतया उपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथा पक्षान्तरव्याख्याने पुलकैः सह कदम्बकुसुमानां साम्योपदेशाच्च लुप्तोपमाऽलङ्कारः, एतयोरङ्गाङ्गिभावेन सङ्करः]। प्रहर्षिणी वृत्तम् ॥ १८ ॥

अथ निरतिशयप्रमोदोदयात् कुमारं प्रति निक्षिप्तौ कुमारौ परस्परकमनीयाङ्गेषु शरनिक्षेपस्य नितान्तानर्हतां प्रतिपादयन्नपि वीरजनजनाचारवशात् सायकप्रयोगस्यापरिहार्य्यतां ख्यापयन्नाह, किन्त्विति।—किन्त्विति पक्षान्तरे, परन्त्वित्यर्थः, यद्यपि एतस्मिन् कमनीये वपुषि शरान् मन्तुं किञ्चिदपि इच्छा न विद्यते, तथाऽपीति भावः, आक्रान्तकठोरतेजसि आक्रान्तं प्रतिपन्नं, कठोरम् उग्रम्, अति दुःसहमित्यर्थः, तेजः शौर्य्यं येन तस्मिन् एवञ्च हयनिरोधाद्यवगहणात् प्रतिपक्षभूते, अपरतः च समरभूमौ समक्षं नानायमाने इति भावः, लवे चन्द्रकेतौ चेत्याशयः, शस्त्रं विना आयुधप्रयोगादृते, समरक्रियामन्तरेणेति यावत्, का नाम गतिः ? को हि उपायः सम्भवति ?, उपायान्तरं नास्तीति सम्भाव्यते इति भावः। प्रकार सौभाग्यं परीक्ष्य शस्त्रक्रियाकरणे शस्त्रशिक्षावैफल्यमेवेत्याह, शस्त्रेणेति।—यस्य शस्त्रस्य, ईदृशः एवंविधः सद्भावयः वीरः, विषयः प्रयोगगोचरः, परीक्षास्थानं

किं वक्ष्यत्यग्रमेवमद्य विमुखं मामुद्यतेऽप्यायुधे ?
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ १९ ॥

सुमन्त्र । [लव निवर्त्य सायकनाममागतम्]। हृदय ! किमन्यथा परिकल्पसे ? (ल)—

मित्यर्थः, न जायेत न भवेत्, तेन शस्त्रेणापि आयुधेनापि, हि नूनं, किम् ? किं फलम् ? लभ्यते इति शेषः, यदि ईदृशलोकातिशायिवीर्यशालिना वीरेण सार्कं न युध्ये, तर्हि मम एतादृशास्त्रशिक्षाकौशलं विफलमेव सञ्जातमिति भावः। अथ युद्धात् विरम्य चापसम्प्रयोगे दोषमुद्भावयति, किमिति।—आयुधे शस्त्रे, उद्यतेऽपि नामेवाभिहन्तुं समुत्थितेऽपि, न केवलं युद्धाय कृतक्रमे, अपि तु शौर्यं परीक्षितुं प्रवृत्तकामेऽपि, इत्यपेरर्थः, युद्धविमुखं रणकर्माणि निवर्त्तमानं, सङ्ग्राम-पराङ्मुखमित्यर्थः स्नेहप्रवणमपि इत्याशयः, माम् अग्रमेव एष सम्प्रतिपक्षभूतः वीरपोतः चन्द्रकेतुरित्यर्थः, का कथा अन्येषामिति भावः, किं वक्ष्यति ? किं कथयिष्यति ?, दुर्बलत्वेन कापुरुषत्वेन वा भयात् सङ्ग्रामविरतिं कृतमाय मम युद्धापाटवमेवाभिधास्यति इति भावः। अतः प्रेमप्रदर्शनस्य नायमवसर इति समाधत्ते, वीराणा-मिति।—दारुणरसः दारुणः निष्ठुरः, भयङ्कर इत्यर्थः, रसः क्रौर्यरूपम् आस्वाद्य-मानं वस्तु यस्य तथाविधः, अतिकठोर इत्यर्थः, वीराणां शूराणां, समयः आचारः ("समयाः शपथाचारकालसिद्धान्तसंविदः।" इत्यमरः) वीररसः इत्यर्थः परस्परनिदारुणरणकर्मरूपः व्यवहार इति यावत्, स्नेहक्रमं स्नेहप्रसरं, प्रणयानुष्ठानमिति यावत्, बाधते हि रुणद्धि खलु, युद्धे समुद्यते वीरे स्नेह-प्रकाशावसरो न युज्यते इति भावः। [अत्र सामान्येन वीराणां समयरूपेण वस्तुना विशेषस्य स्नेहोपेक्षणाचाररूपस्य वस्तुनः समर्थनात्, सामान्येन विशेष-समर्थनरूपोऽर्थान्तरन्यासालङ्कारः, किञ्च प्रथमे यच्छब्दस्यान्ते प्रयोगात् विधेयाविमर्श-दोषः, तथा हिशब्दस्य पादपूरणमात्रार्थकत्वात् निरर्थकत्वदोषश्च इति केषाञ्चिन्मतं, तत्तु [illegible] यत्,—यच्छब्दो नित्यसम्बन्धात् प्राक् निर्दिष्टेन दूरान्वितेनापि [illegible] पश्चादुपात्तस्यापि यच्छब्दस्याकाङ्क्षा सहजत एव विनिवृत्ते, [illegible] विधेयाविमर्शाकरणात्, नात्र यच्छब्दस्य [illegible], एवं हिशब्दस्यापि निश्चितार्थकतया न तदुपादानकृत-निरर्थकत्व[illegible] इति [illegible]]। शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥

(ल) [illegible]—[illegible], [illegible] [illegible], सायकम्—शरम्—[illegible]

मनोरथस्य यद्बीजं तद्दैवेनाऽऽदितो हृतम्।
लतायां पूर्वलूनायां प्रसूनस्याऽऽगमः कुतः ?॥ २०॥

चन्द्र। अवतरामि अहमार्य्य सुमन्त्र! स्यन्दनात्। (व)

सह वर्त्तमानं यथा तथा, अश्रूणि विमुच्येत्यर्थः, ("असं कोणं कचं पत्रिं क्लीवमश्रुणि शोणिते।" इति मेदिनी) आत्मगतं—स्वगतम्, आहेति शेषः। हृदय!—चेतः, किं—कथम्, अन्यथा—अन्यविधं, नागराजकुमारं, परं रामचन्द्रस्यैव इत्येवरूपमित्यर्थः, परिकल्पसे ?—वितर्कयसि, चिन्तयसीत्यर्थः, एतस्मिन् ऋषिकुमारे रामचन्द्रस्य भूयः साधर्म्यं विलोक्य रघुमणिसुतत्वेनास्य कथं विभावयसि? असम्भवात् ईदृशी परिकल्पना त्वया न कार्य्येति भावः।

रामभद्रस्य प्रत्यवयवसाम्यमेतस्मिन् कुमारे विलोक्य तत्सुतोऽयं किमु ? इति प्राक् समाशङ्क्य पश्चात् तथाविधाशङ्काया अमूलकत्वमाह मनोरथस्येति।— मनोरथस्य अयं वीरपोतः सीतागर्भसम्भूतः भगवतो रामचन्द्रस्यैव तनयः एवंविधाभिलाषस्येत्यर्थः, यत् बीजं मूलं कारणं, सीतारूपं निदानमित्यर्थः, तत् सीतारूपं बीजमिति यावत्, दैवेन प्रतिकूलादृष्टेन, आदितः प्रथमत एव, हृतं विनाशितम्, एकाकिन्या गर्भभारमन्थराया वैदेह्या श्वापदसङ्कुले सत्त्वप्राणिभयङ्करे जनस्थाने निवासनात् परं क्षणमपि तस्या जीवनस्थित्यसम्भवात् दुरदृष्टेन तथाविधाऽऽशा समूलमेवोत्पाटिता इति भावः। एतदेव व्यतिरेकदृष्टान्तेन विशदीकरोति, लतायामिति।— लतायां व्रतत्यां, पूर्वलूनायां पूर्वं प्राक्, प्रथमत एवेत्यर्थः, लूनायां छिन्नायां सत्यां, प्रसूनस्य कुसुमस्य, आगमः समुत्पत्तिः, कुतः? कस्मादिव हेतोः भवेत्? नैव कथमप्येतत् सम्भवतीत्यर्थः, विलूनाया वल्ल्या यथा कुसुमानि कदाऽपि न उत्पद्यन्ते, एवमेव निवासनात्परं दण्डकारण्ये श्वापदभक्षितायां सीतायां सुतोत्पत्तिपरिकल्पना सुदूरपराहतैवेति भावः। [अत्र गर्भभारालसाया सीताया विनाशात् परमपि, तस्या एवायं तनयः अवयवसाम्यात् प्रतिभाति, इत्थं हि परिकल्पनं, छिन्नमूलायां लतायां कुसुमोत्पत्तिः यथा न सम्भवति, तथैवासम्भवमेवेति व्यतिरेकेण बीजभूतया सीतया सह लूनलतायाः, मनोरथेन च सह प्रसूनस्य बिम्बप्रतिबिम्बभावावबोधात् वैधर्म्येण दृष्टान्तालङ्कारः]॥ २०॥

(व) आर्य्य!—पूज्य!, सुमन्त्र!—भोः सुमन्त्राख्यसारथे!, स्यन्दनात्—रथात्, अवतरामि—अवरोहामि। सुमन्त्राभिमतयुद्धाणमुक्तिरियं चन्द्रकेतोः।

सुमन्त्र। तत्कस्य हेतोः ? (अ)

चन्द्र। यतस्तावदयं वीरपुरुषः पूजितो भवति। अपिच खलु आर्य्य। क्षात्त्रधर्मः परिपालितो भवति। न रथिनः पादचारमायोधयन्तीति शास्त्रविदः परिभाषन्ते। (ब)

सुमन्त्र। [स्वगतम्]। कष्टं वतानुप्रपन्नोऽस्मि। (स)—

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ?।
कथं वाऽप्यनुजानातु साहसैकरसां क्रियाम् ? ॥ २१॥

(अ) तत्—अवतरणं, कस्य हेतोः ?—किमर्थम् ?, तुमुले एतस्मिन् सङ्ग्रामे कस्मै कार्य्याय त्वं पदातिः भवितुमिच्छसीति भावः। [अत्र "सर्व्वनाम्नस्तृतीया च" (२।३।२७पा०) इति सूत्रेण पाक्षिकी षष्ठी विज्ञेया]।

(ब) यतः,—यस्मात् कारणात्, भूमाववरोहणरूपादित्यर्थः, अयम्—पुरो वर्त्तमानः, पादचारीत्यर्थः, वीरपुरुषः,—अलौकिकवीर्य्यविभूषितः कुमारो लवः, पूजितो भवति—सत्कृतो भवति, यतोऽयं पादचारी अतः पदातिनैव सता मया अनेन सह योद्धव्यं, तेन हि मे विनयः प्रकटीकृतः भवेत्, अयञ्च महावीरः यथायोग्यं सत्कृतोऽपि स्यादिति भावः। कारणान्तरमाह, अपिचेति।—अपिच—अन्यच्च, खलु—निश्चितं क्षात्त्रधर्म्मः—क्षत्त्राणामयं क्षात्त्रः, स चासौ धर्म्मश्चेति, क्षत्त्रियजातिनियम इत्यर्थः, युद्धनीतिरिति यावत्, परिपालितः,—सुरक्षितः, विधिवदनुष्ठित इति यावत् भवति—सम्पद्यते, रथावतरणेन सुक्षत्त्रियाणां सदाचारोऽपि यथायोग्यं समादृतः भवेदिति भावः। अत्र शास्त्राभिमतमाह, नेति।—रथिनः,—रथचारिणः, स्यन्दनारूढा योधा इत्यर्थः, पादचारं—पादेन चारः—भ्रमणं यस्य तं पदातिं, न आयोधयन्ति—न अभियुञ्जते, न सङ्ग्रामयन्तीत्यर्थः, इति—एवं, शास्त्रविदः,—शास्त्राभिज्ञाः, क्षत्त्रधर्म्मानुशासितारः मन्वादय इत्यर्थः, परिभाषन्ते—ब्रुवन्ति, आमनन्तीत्यर्थः। "न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।" इति मनुः, "स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्यात्" इति च तद्व्याख्याने कुल्लूकभट्टः। अत्र नुस्मरणीयं चतुर्णां वचनमपि, यथा—"रथी च रथिना सार्द्धं पदातिश्च पदातिना। कुञ्जरस्थो गजस्थेन योद्धव्यो भृगुनन्दन।॥" इति।

(स) वत—खेदे, अव्ययमिदम्। कष्टं—कृच्छ्रम् अनुप्रपन्नः—प्राप्तः, अस्मि—भवामि, इदानीं कर्त्तव्यं निर्णेतुमपारयन् अतिव्याकुलः सम्पन्नोऽस्मीति भावः।

अथ कष्टं तु विनिर्दिशति, कथमिति।—मादृशः युद्धनीतितत्त्वज्ञः रघुकुल·

चन्द्र। यदा तातमिश्रा अपि पितुः प्रियसख धर्मार्थसंशयेषु आर्य्यमेव पृच्छन्ति, तत्किमार्य्यो विमृशति ?। (छ)

सुमन्त्र। आयुष्मन्। एवं यथाधर्ममभिमन्यसे। (क)—

स्थित्यभिज्ञ यातिवृद्धो जन इत्यर्थः, न्याय्य न्यायादनपेतं, शास्त्रविहितमिति यावत्, अनुष्ठानम् आचरणं, रथावतरणरूपं युद्धावसरोचितं व्यवहारमिति यावत्, कथं केन प्रकारेण, प्रतिषेधतु ? निवारयतु, मद्विधजनानां शास्त्रविरुद्धकार्य्यानुष्ठानोपदेशनम् अतीव विगर्हितमिति भावः। पक्षान्तरमाह, कथमिति।—कथं वाऽपि केन प्रकारेण च, कया युक्त्या वेत्यर्थः, साहसैकरसां साहसम् अविमृश्यकारित्वं, वीरेणानेन सह पादचारी भूत्वा युद्धकरणरूपमिति यावत्, एकः केवलः, रसः रागः, युद्धप्रवर्त्तको रागविशेष इति यावत्, यत्र तादृशीं क्रियां कर्म, पादचारयुद्धमिति यावत्, अनुजानातु ? अनुमोदयतु ? अनुमन्तुं शक्नुयादित्यर्थः, रथादवतीर्य्यानेन वीरबालकेन सहास्मिन् युद्धे चन्द्रकेतौ भाविनी महतीं विपदं समाशङ्कमानोऽप्यहं रघुकुलस्थितिपरम्परां चिराचारञ्चाभिजानन् कथमु स्वकुलाचारपालनाभिलाषिणं कुमारं धर्मयुद्धात् निवर्त्तयितुमुपदिशामि इति भृशं चिन्ताकुलं विषमायां दशायां समापतितोऽस्मीति भावः ॥ २१ ॥

(छ) यदा—यतः, तातमिश्रा अपि—पूज्यपादाः पितरः रामचन्द्रादयोऽपीत्यर्थः, अतीव नयविदः विचक्षणाः महान्तोऽपि इत्यपिशब्दार्थः, धर्मार्थसंशयेषु—धर्मश्च अर्थश्च तौ धर्मार्थौ, तयोः संशयेषु—"अत्र धर्मशास्त्रानुशिष्टः पन्थाः कीदृशः ?" "किमु चात्र सन्दिग्धे वस्तुनि कर्त्तव्यम् ? कथं वा अत्र प्रवर्त्तितव्यम् ?" इतीदृशेषु धर्मसन्देहेषु कर्त्तव्यविषयसंशयेषु च समुपस्थितेषु इत्यर्थः, पितुः प्रियसख—तेषां जनकस्य दशरथस्य परम मित्रम्, आर्य्यमेव—पूज्यतमं भवन्तमेव, पृच्छन्ति—जिज्ञासन्ते, कर्त्तव्यावधारणाय भवतोऽभिमतिं प्रार्थयन्ते इत्यर्थः, सर्व्वत्र, विशेषतः सांशयिकविषयेषु तत्रभवतो निरतिशयप्रावीण्यादिति भावः, तत्—ततः, पित्रादीनामपि संशयापनोदकत्वेन भवतः अतिविचक्षणत्वादित्यर्थः, किं—कथम्, आर्य्यः,—तत्रभवान् भवानित्यर्थः विमृशति ?—विचिन्तयति।

(क) आयुष्मन्।—दीर्घायो!, एवम्—इत्थं रथादवतीर्य्य क्रियमाणमायोधनमित्यर्थः, यथाधर्मं—यथाशास्त्रं, धर्मशास्त्रानुमोदितमिति यावत्, अभिमन्यसे—मनुष्यसे, रथादवतीर्य्यैव युद्धमुचितमिति यदिच्छसि तत्समीचीनमेवेति भावः।

एष साङ्ग्रामिको न्याय एष धर्मः सनातनः।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः॥ २२॥

चन्द्र। प्रतिरूपं वचनमार्य्यस्य। (ख)—

इतिहासं पुराणञ्च धर्मप्रवचनानि च।
भवन्त एव जानन्ति रघूणाञ्च कुलस्थितिम्॥ २३॥

भवदभीप्सितं जन्यं हि धर्मशास्त्रानुमतमेव, एवं हि रघुभिरेतत् सुचिरमनुपाल्यते इत्युक्त्वा समर्थयति, एष इति।—एष भवतोऽभीप्सितः पदातिर्भूत्वा पदातिना सह सङ्ग्राम इत्यर्थः साङ्ग्रामिकः सङ्ग्रामे भवः, युद्धशास्त्रसम्मत इत्यर्थः, न्यायः नियमः, एष सनातनः चिरन्तनः, धार्म्मिकैः महावीरैः सुचिरमनुपालित इत्यर्थः, धर्मः आचारः, अयं देवासङ्कुचितचेतसा अनुसृतः पन्था इति यावत्। न केवलमन्ये योधा एवमनुसरन्ति, परन्तु भवतः पूर्व्वपुरुषा अपि सततमेवमनुसृतवन्त इत्याह, इयमिति।—इयं हि निश्चितं, रघुसिंहानां [रघवः सिंहा इवेत्युपमितसमासात्] रघुश्रेष्ठा इत्यर्थः तेषां, रघुसत्तमानां राज्ञामिति यावत्, वीरचारित्रस्य वीरोचिताचारस्य पद्धतिः पन्थाः, ईदृगेव सदाचारपथेन रघुपुङ्गवा अनिशं समचरन्, इयमेव तेषामनुमता आसीदिति भावः॥ २२॥

(ख) आर्य्यस्य—पूज्यस्य भवतः, वचनं—पूर्वोक्तं वाक्यं, प्रतिरूपम्—अनुरूपं विधिसङ्गतमित्यर्थः, भवादृशा धार्म्मिका धर्मशास्त्रसङ्गतमेव वचनमेतदभिभाषन्ते इति भावः।

अथ स्वकुलक्रमागताचारे ननन्दस्य न्यायवचनप्रयोगे हेतुं प्रतिपादयति, इतिहासमिति।—भवन्त एव भवादृशा विज्ञा एव, नान्ये साधारणपुमांस इति भावः, इतिहासं पुरावृत्तं, "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पुरावृत्त-कथायुक्तमितिहासं प्रचक्षते॥" इत्युक्तलक्षणं पारम्पर्य्योपदेशेन अतीतघटनावली-प्रकाशकं ग्रन्थविशेषमिति यावत्, पुराणञ्च पञ्चलक्षणान्वितं शास्त्रविशेषञ्च, "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्॥" [illegible] अन्यविशेषमित्यर्थः, धर्म्मप्रवचनानि च धर्माचरणानां [illegible] मन्वादिधर्म्मशास्त्राणि च, तथा, रघूणां रघुकुलजन्मनानां, [illegible] चिरानुपालितसदाचारपद्धतिमित्यर्थः, जानन्ति विदन्ति, [illegible] भवादृशा विज्ञतमा अतिनिपुणा एवेति भावः। [अत्र प्रस्तुताप्रस्तुत-[illegible] अभिमतप्रभाद् दीपकालङ्कारः, उपात्तत्वान्य

सुमन्त्र। [सस्नेहास्रं परिष्वज्य]। (ग)—

जातस्य ते पितुरपीन्द्रजितो निहन्तु
र्वत्सस्य वत्स! कति नाम दिनान्यमूनि।
तस्याप्यपत्यमनुगच्छति वीरवृत्तं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम्॥ २४॥

जानन्तीति क्रियया परिसमाप्तावपि रघूणामित्यनेन पुनरुपात्तत्वात् समाप्तपुनरात्तता ऽऽख्यो दोषः "कुलस्थिति रघूणाञ्च भवन्त एव जानते" इत्यनेन समाधातव्यः ॥ २३ ॥

(ग) स्नेहेन—वात्सल्येन, अस्रेण—आनन्दाश्रुणा च सह वर्त्तमानं यथा स्यात्तथेत्यर्थः, परिष्वज्य—आलिङ्ग्य, आहेति शेषः।

अथ चन्द्रकेतो वीरोचितां प्रवृत्तिं विलोक्य प्रीतः सुमन्त्रः तं सस्नेहप्रीतिवचसा परितोषयति, जातस्येति।—वत्स! आयुष्मन् चन्द्रकेतो!, इन्द्रजितः सङ्ग्रामे देवराजस्यापि विजयिनः मेघनादनाम्नः रावणपुत्रस्य, निहन्तुः निसूदनस्य, ("निहन्तुः" इत्यत्र "विजेतुः" इति पाठान्तरम्) वत्सस्य निरतिशयस्नेहास्पदस्य, ते पितुरपि तव जनकस्य लक्ष्मणस्यापि, जातस्य समुत्पन्नस्य सतः, अमूनि एतानि, जन्मत आरभ्य अद्य पर्यन्तानीत्यर्थः, कति नाम कियन्ति एव, नातीति सम्भावनायां, दिनानि दिवसाः, गतानीति शेषः, लक्ष्मणस्य सौमित्रेः जन्मतः प्रभृति अत्यल्पसंख्यकान्येव दिनानि समतीतानीत्यर्थः एतस्य तु वयः एतावदेव अल्पतरं, तदस्माभिः इत किञ्चित्पश्यन्निव तत परिदृष्टाभ्यनुमोदन, सोऽपि [illegible] वीरप्रकाण्ड [illegible] इति भावः, तस्यापि एतादृश [illegible], [illegible] तनयः, [illegible] भवान् चन्द्रकेतुरित्यर्थः, वीरवृत्तं वीरपुरुषाचारं, अनुगच्छति अनुसरति, परिपालयतीत्यर्थः, दिष्ट्या भाग्येन, [illegible] ("दिष्ट्या हर्षे भाग्ये च" इति मेदिनी) दशरथस्य कुलं वंशः, प्रतिष्ठां स्थितिं, गतं प्राप्तं, [illegible] इत्यर्थः, अहो! [illegible], [illegible] स्थिति, [illegible] तथा [illegible], [illegible] स्यादिति [illegible] भाव। [illegible] ॥ २४ ॥

चन्द्र। [सकरुणम्]।—

अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे॥ २५॥

सुमन्त्र। अहह। हृदयमर्मदारणानि एतानि चन्द्रकेतोर्वचनानि। (घ)

लव। हन्त। मिश्रीकृतो रसक्रमो वर्त्तते। (ङ)—

अथ रघुकुललक्ष्म्या सीताया पूर्णगर्भाया निर्वासनात् परमत्वयमनतसानां स्वपितृणा दुःखायमानं मानसमनुभवन् नितरा निर्विष्ण चन्द्रकेतु तदभावादेव स्वकुलस्थिरेरकिञ्चित्करतामाह, अप्रतिष्ठे इति।—रघुज्येष्ठे रघुकुलश्रेष्ठे, रामचन्द्रे इत्यर्थ, अप्रतिष्ठे प्रतिष्ठामनधिगतवति सति, अपत्याभावे तद्वंशरक्षाया अभावात् कुलस्थितिमलभमाने सतीत्यर्थ, न अस्माक, कुलस्य वंशस्य, प्रतिष्ठा स्थिति, का? कीदृशी भवेदिति शेष, सर्व्वगुणविभूषिते ज्येष्ठे रामचन्द्रे सन्ततिविरहिते अस्मद्रूपाणा सन्तानाना सतामपि असद्रूपत्वमेवेति भाव, इति अस्मादेतो, अनेनैवेत्यर्थ, दुःखेन शोकेन न अस्माकम्, अपरे अन्ये, रामचन्द्रभिन्ना इत्यर्थ, त्रय पितर तिसृव्यका पितृपादा, भरतलक्ष्मणशत्रुघ्ना इत्यर्थ, तप्यन्ते दह्यन्ते, न[illegible]यातनमनुभवन्तीत्यर्थ। [अत्र करुणो रस रामविषयकरतिभावस्याङ्गमिति रसव[illegible] दलङ्कार]॥२५॥

(घ) अहह—इति खेदसूचकमव्ययम्। एतानि—इत प्रागेवोक्तानि इत्यर्थ, चन्द्रकेतो वचनानि—[illegible] वाक्यानि, हृदयमर्मदारणानि—हृदयस्य—[illegible] करणस्य मर्म[illegible]—जीवस्थानानाञ्च, यद्यपि "अभीतर मर्मगतमायुर्वेदविदो [illegible] वस्ति[illegible] प्रधानमर्माणि" इति वैद्यकोक्त्या मर्मशब्देनैव [illegible] लभ्यते, तथाऽपि मर्मान्तरापेक्षया विशेषेण दारुणद्योतनार्थं तस्य पृथगुपा[illegible] यद्वा—हृदयम्—अन्त करणमेव, मर्म तस्य, यद्वा,—हृदयस्य मर्म्मणा—[illegible]स्थानानां, दारणानि—[illegible]—विदार्यन्ते एभिरिति तथोक्तानि, भवन्तीति [illegible] चन्द्रकेतो वचनानि अस्माक मर्माणि विदारयन्तीत्यर्थ।

(ङ) हन्त—इति हर्षे, ("हन्त हर्षेऽनुकम्पायाम्" इत्यमर) मिश्रीकृत,—[illegible]—रसान्तरे[illegible]मिश्रीकृत, स्वविरुद्धे रसे एकीभावमापादित [illegible] रसक्रम,—रस[illegible],—[illegible] शृङ्गारवीरयो वा, क्रम,—पर्याय,

यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनी
तथैवास्मिन् दृष्टिर्मम, कलहकामः पुनरयम्।
झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्वणरसः॥ २६॥

परम्पराबकङ्करसङ्ग्यामति यावत, वत्तते—विग्तन, मम वीरमवलोक्य मम यथा हि स्नेहाधिक्यात् वात्सल्यरसातिरेकं सञ्जायते, तथैव अमुष्य वीरस्य मया सह युद्धे अत्यधिकोत्साहदर्शनात् वीररससमुद्रेकश्च भवतीति दृश्यते इति भाव।

अथ रत्युत्साहस्थायिभावयो शृङ्गारवीररसयो एकत्र समये स्वस्मिन कथं हि सम्मिश्रणभाव समुदित, तदेव विशदीकृत्य विवृणोति, यथेति।—इन्दौ चन्द्रे, समुपोढे समुदिते सति, कुमुदिनी कैरविणी, यथा यद्वत, आनन्दं हर्षं, विकाशमित्यर्थ, व्रजति प्राप्नोति, अस्मिन् पुरोवर्त्तिनि, कुमारे चन्द्रकेतौ इति यावत्, मम दृष्टि नेत्र, तथैव तादृगेव, आनन्द व्रजति इत्यन्वय, प्रीति-प्रफुल्लता यातीत्यर्थ, कुमारमिममवलोक्य हर्षातिशय्योदयात सन्तोषे नयने अनिर्वचनीयमानन्दमनुभवत इति भाव। इत्थं शृङ्गाररसाविर्भावमुपवर्ण्य वीर रसोद्रेकमाह, कलहेति।—पुन किन्तु, कलहकाम कलहम् अनेन चन्द्र केतुना सह सङ्ग्राम, कामयते अभिलषति यस्तथोक्त, समराभिलाषुक इत्यर्थ, अयं बाहु एष मदीय भुज, झणदिति।—झणत्कारेण झणझणेत्याकार कात्यक्तध्वनिना, क्रूरम् अतिकर्कश यथा स्यात्तथा, क्वणित शब्दित, यो गुण मौर्वी, यद्वा,—झणत्कार झणत्काररूप, झणझणेत्याकारकमव्यक्तमित्यर्थ, क्रूरम अतिकठोर, क्वणित निनाद यस्य तथाविध यो गुण ज्या, तेन गुञ्जत् शब्दायमान, गुरु महत, धनु कार्मुक तस्मिन धृत बद्ध प्रेम प्रणय, तद्ग्रहणाभिलाष इति यावत, येन तथोक्त सन, कोपणनिनादेन शरासनस्य ज्या निरन्तरमास्फालयितुमभिलाषुक सन्नित्यर्थ, विकचविकरालोल्वणरस विकच स्फुटक विकराल अतिभीषण, अतिभयावह इति यावत, ("करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत।" इति मेदिनी) उल्वणरस उद्धतरस, वीररस इति यावत यस्मिन् तथाविध, सञ्जात इति शेष, यद्यपि इस सौम्यदर्शन कुमारमवलोक्य सपदि मे नेत्रद्वय प्रीतिविकसित भवति, तथापि पुनः महावीरमेतमाक्रम्य गौरुमना मदीयो बाहु धनुषा टङ्कारेण दिश विदिशश्चापूर्य शरान् निक्षेपयितुमभिलषतीत्यर्थ।

चन्द्र । [अवतरण रूपयन्]। आर्य्य । सावित्रश्चन्द्रकेतुः
अभिवादयते । (च)
सुमन्त्र । अजित पुण्यमोजस्वि काकुत्स्थस्येव ते महः ।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् ॥ २७ ॥

विरुद्धा इवारेत्र रसयोरेकत्र विचित्रसमावेश इति पर विस्मितोऽस्मीति भाव । [अत्र परस्पर विरुद्धयो स्नेहवैरयोरेकत्र सङ्घटनात विषमालङ्कार, तथा कुमुदिन्या सह अवैधर्म्यसाम्योपदेशाच्च श्रौतोपमाऽलङ्कार, इत्यनयोरङ्गाङ्गिभावेन सङ्कर । किञ्च एतस्मिन् रसस्य स्वशब्देनैवाभिधानात् स्वशब्दोक्तिनिबन्धनो दोष, "रसस्योक्ति स्वशब्देन स्थायिसञ्चारिणोरपि' इति दर्पणोक्ते । एवमेव गुञ्जनस्य भ्रमररुते एव प्रसिद्धत्वात् तदन्यत्र धनुर्निस्वनादौ तथाप्रसिद्धिविरहेण ख्यातिविरुद्धतादोषश्च "गुञ्जत्" इत्यत्र "गर्जत" इत्यादि शब्दप्रयोगेण परीहार' करणीय इति । श्लोकस्यास्य पूर्व्वार्द्धे रतिस्थायिभावक शृङ्गारो रस, प्रसादो गुण, कैशिकी रीतिश्च, उत्तरार्द्धे तु उत्साहस्थायिभावको वीरो रस, ओजो गुण, आरभटी च रीति, इत्युभयो रसयोरेकत्र समावेशात सन्निश्रणमिति ध्येयम्]। शिखरिणी वृत्तम ॥ २६ ॥

(च) आर्य्य ।—पूज्य सुमन्त्र !, सावित्र,—सवितु,—सूर्य्यस्यापत्य पुमान्, सवितृकुलसम्भूत इत्यर्थ, चन्द्रकेतु,—तदाख्य लक्ष्मणात्मज, अभिवादयते—प्रणमति, भवन्तमिति शेष, "नामगाहमभिवादयेत्" इत्यादिस्मृते स्वनामग्रहण-पूर्व्वकाभिवादन कृतमिति ध्येयम् ।

अथ कुलक्रमागतसारथि सुमन्त्र अभिवाद्यमान कुमार समुचितेन आशिषा सम्वर्द्धयति, अजितमिति ।—शाश्वत नित्य, उत्पत्तिविनाशरहित इत्यर्थ, देव द्योतमान, भगवानित्यर्थ, वराह शूकररूपेणावतीर्ण, स्वीकृतवराहशरीर भगवा नारायण इत्यर्थ काकुत्स्थस्येव काकुत्स्थगोत्रसम्भूतस्य जगत्पते रामभद्रस्येवेत्यर्थ, ते तव अजित परैरनभिभूत, पुण्य पवित्रम्, ओजस्वि अतिप्रबल सर्व्वत्राप्रतिहत मित्यर्थ, मह तेज श्रेयसे कुमार विजयलक्ष्म्यायेति यावत, परिकल्पतां सम्पादयत, उन्नतीभावेन विदधात इत्यर्थ । ['क्लृपि सम्पद्यमाने च" (वा०) इति सूत्रेण चतुर्थी, किंवा "तादर्थ्ये चतुर्थी वाच्या" (वा०) इति सूत्रेण चतुर्थी-मन्तव्येति । पुरा लोकपञ्चमूल आदिदैत्यस्य हिरण्याक्षस्य निहन्तृ आदिवराह-रूपधरस्य भगवतो नारायणस्य अलौकिकविक्रमभाव संस्मृत्य सुमन्त्र कुमारस्य उपस्थित सङ्ग्रामे तथाविध भगवता विजयाशिष सम्प्रादितवानिति ध्येयम् । पुरा हि त्रेतायां

अपिच,—

देवस्त्वा सविता धिनोतु समरे गोत्रस्य यस्ते पिता
त्वां मैत्रावरुणोऽपि नन्दतु गुरुर्यस्ते गुरूणामपि ।
ऐन्द्रं वैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥ २८ ॥

देवासुरयुद्धे भगवतो नारायणस्य तेजसा आप्यायितः पुरञ्जयो नाम सूर्यवंशीयः कश्चित्पराक्रान्तः नरपतिः इन्द्रादिभिः देवमुख्यैः भृशमभिप्रार्थितः वृषभरूपधारिणः इन्द्रस्य ककुदमास्थाय सर्व्वमेवासुरबलं निजघान, तेन चासौ ककुत्स्थनामवापेति ककुत्स्थशब्दप्रवृत्तिनिमित्तभूता पौराणिकी कथा अत्रानुसन्धेयेति] ॥ २७ ॥

मङ्गलान्तरेण विजयाशिषा कुमारं पुनः संवर्द्धयति, देवस्त्वामिति।—देवः द्योतमानः, सविता भगवान् सूर्यः, समरे सङ्ग्रामे, त्वां भवन्तं, धिनोतु प्रीणयतु, असामान्यं तेजः सम्प्रदाय त्वां संवर्द्धयत्वित्यर्थः, ["धिवि प्रीणने" इति धातोः लोटि रूपम्]। यः भगवान् सविता, ते तव, गोत्रस्य वंशस्य, पिता जनयिता, प्रवर्त्तक इत्यर्थः, आदिपुरुष इति यावत्, मैत्रावरुणोऽपि वशिष्ठोऽपि, [मित्रश्च वरुणश्चेति द्वन्द्वे मित्रावरुणाविति पदात् "देवताद्वन्द्वे च" (६।३।२६ पा०) इत्यानङादेशविधानात्, ततः तयोरपत्यं पुमानित्यर्थे शैषिकः अण्प्रत्ययः, "शिवादिभ्योऽण्" (४।१।११२ पा०) इति वा अण्प्रत्ययः, शिवादेराकृतिगणत्वादिति ज्ञेयम्। अत्र "अत इञ्" (४।१।९५ पा०) इति इञ्प्रत्ययस्य विधानात् "मैत्रावरुणिः" इत्येव भवितुं युक्तमित्यवधेयम्]। एकस्मिन् कल्पे मित्रस्य कल्पान्तरे च वरुणस्य पुत्रत्वेनास्य दृष्टत्वात् सञ्ज्ञा सम्भवतीति ज्ञेयम्। त्वां भवन्तं, नन्दतु विजयाशिषा प्रीणयतु, यः मैत्रावरुणः, ते तव गुरूणामपि पित्रादीनामपि, गुरुः पूजनीयः, भवतीति शेषः, ऐन्द्रम् इन्द्रस्येदम्, इन्द्रसम्बन्धीत्यर्थः, वैष्णवं विष्णोरिदं, विष्णुसम्बन्धीत्यर्थः, आग्निमारुतम् अग्निमरुतोरिदम्, आग्निसम्बन्धि मरुत्सम्बन्धि चेत्यर्थः, वह्नेः वायोश्चेति यावत्, ["देवताद्वन्द्वे च" (७।३।२१ पा०) इति पूर्वोत्तरपदवृद्धिः। "इद्वृद्धौ" (६।३।२८ पा०) इति अग्नेरिदादेशः]। अथो अपि च, ("अथाथो संशये स्यातामधिकारे च मङ्गले। विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये ॥" इति मेदिनी) सौपर्णं सुपर्णस्य गरुडस्येदं, गरुडसम्बन्धीत्यर्थः, ओजः तेजः, ते तव, अस्तु भवतु, [illegible] देवानां मङ्गलं भवतु तेन भवत्वित्यर्थः, रामेति।—

लव । कुमार ! अति हि नाम शोभसे रथस्थ एव, कृतं कृतमत्यादरेण । (छ)

चन्द्र । तर्हि महाभागोऽप्यन्य रथमलङ्करोतु । (ज)

लव । [सुमन्त्रं प्रति]। आर्य्य । प्रत्यारोपय रथोपरि राजपुत्रम् । (झ)

राजलक्ष्मणो राघवसौनवी, धनुष शरासनस्य, या ज्या मौर्वी, तस्या घोष टङ्कारध्वनि, स एव मन्त्र ब्रह्मास्त्रप्रयोगार्थम् आम्नायसमुदाय इत्यथ, अय सङ्ग्रामेऽस्मिन् विजयलक्ष्मीलाभ यावत दैयादेव च दृष्टात्वेव, अमितविक्रमो राजलक्ष्मणौ यथा सङ्ग्राम भीषणकार्मुकस्य ज्याशब्देनैव सर्व्वान् रिपून् समूलमुन्मूल्य विजयलक्ष्मी नियत गृहीतात, एवमेव भवानेतस्मिन् सङ्ग्रामे जयश्रिय लभतामिति भाव । [भवान्यथा तेज कथमन्यो वहत्विति वस्तुतत्त्वस्य सर्व्वथा असम्भवत्वेऽपि विम्बप्रतिविम्बभावेन इन्द्रादीना तेज वहत्येव तजोऽस्त्वित्येवमेवावगमप्रतीत्यता ऽसम्भवद्वस्तुसम्बन्धरूपो निदर्शनाऽलङ्कार । इह पूर्व्वार्द्धस्थितयच्छब्दयो तच्छब्दनाऽऽकाङ्क्षाविरहादन न विधेयाविमर्शो दोष इत्यवधेयम् । दैयादेवेत्यत एवकारस्य व्यर्थोपस्थितयेकाङ्क्षतया नियमेन निरस्तसम्बन्धस्यैवावबोधनात् न प्रानयत निरुक्तस्तेऽपि इत्यवधेयम्]। शार्दूलविक्रीडित वृत्तम् ॥ २८ ॥

(छ) रथस्थ एव—स्यन्दनाधिरूढ एवेत्यथ, अति हि—अत्यर्थमेव, नूनमिति यावत, शोभसे—राजसे शोभान्वितो भवसीत्यथ, नाम—सम्भावनायाम्, इत्यथ सम्भावनीत्यथ कृत अत्यादरेण—रथावतरणरूपबहुमानप्रदर्शनेनेति यावत् अलम्—अलमलम्, [अमुना विवचनम्] अधुना रथादवतीर्य त्वया सम्मानप्रदर्शन न कर्त्तव्यमिति भाव ।

(ज) तर्हि—तदा, त्वयि रथस्थे सतीत्यथ, महाभागोऽपि—महान्—अदभुत, भाग,—भाग्य वारलक्ष्मीभाग्यमिति यावत् यस्य तथाविध, भवानपीत्यथ अन्य रथम्—अपर स्यन्दनम् अलङ्करोतु—भूषयतु, आरोहणेनेति शेष भवता महावीर पादचारिणि मम रथारोहण न युज्यत इति भाव ।

(झ) आर्य्य—आर्य्य सुमन्त्र !, चन्द्रकेतो नैवाभ्युपपनात तदूचन पुनश्चेवमानि विज्ञाय स्वयमपि तादृशमत्यादर प्रदर्शितवानिति बोध्यम् । रथोपरि—रथस्य—स्यन्दनस्य, उपरि—ऊर्द्ध्वम्, स्यन्दने इत्यथ, राजपुत्र—कुमार चन्द्रकेतुम्, प्रत्यारोपय—आरोहय ।

सुमन्त्र। त्वमप्यनुरुध्यस्व चन्द्रकेतोर्वचनम्। (ञ)

लव। को विचारः स्वेषु उपकरणेषु? किन्तु अरण्यसदो वयमनभ्यस्तरथचर्याः। (ट)

सुमन्त्र। जानासि वत्स! दर्पसौजन्ययोर्यथोचितमीरयितुम्, यदि पुनरादृशं त्वामैक्ष्वाको रामभद्रः पश्येत्, तदा अस्य स्नेहेन हृदयमभिष्यन्देत। (ठ)

(ञ) त्वमपि—भवानपि, चन्द्रकेतोः,—कुमारस्य, वचनं—वाक्यं त्वयि रथारोहणप्रार्थनामित्यर्थः, अनुरुध्यस्व—अनुपालय, रथारोहणेन एतन्मनोरथं प्रपूरयेति भावः।

(ट) को विचारः?—कः विवेकः, को वितर्क इति यावत्, स्वेषु—स्वकीयेषु, आत्मभूतेष्विति यावत्, एतस्मिन् कुमारे मैत्रीसंस्थापनात् अमुष्य सर्वं द्रव्यं मदीयमेव सञ्जातम्, अतः स्वद्रव्यमिव एतद्द्रव्यमपि यथेच्छमेव मया ग्रहणीयं, न हि केनचित् [illegible] स्वद्रव्यव्यवहारे क्रियते इति भावः, यद्वा,—स्वेषु—निजप्रयोजनीयेषु, उपकरणेषु—उपकारसाधनाभूतवस्तुषु, सङ्ग्रामोपयोगिरथादिषु इति यावत्, किन्तु—परन्तु, अरण्यसदः,—अरण्ये—वने, सीदन्ति—निवसन्ति ये तथोक्ताः, वनवासिन इत्यर्थः, वयम्—अहमित्यर्थः, [अस्मदः एकत्वे बहुत्वप्रयोगादिति] अनभ्यस्तरथचर्याः,—नाभ्यस्ता—न शिक्षिता, रथेन—स्यन्दनेन, चर्या—सञ्चरणं येषां तथोक्ताः, अविज्ञातरथारोहणादिव्यवहारा इत्यर्थः, भवाम इति शेषः, अहं हि आरण्यकः, तेन इतः प्राक् कदापि रथं नारोहम्, अतोऽधुना रथमारोढुं नाभिलषामि इति भावः।

(ठ) जानासि—वेत्सि, वत्स!—आयुष्मन् लव!, दर्पसौजन्ययोः,—अहङ्कारविनययोः, यथोचितम्—उचितमनतिक्रम्य [इत्यव्ययीभावः] यथायथमित्यर्थः, अविरुद्धापरिहारपूर्वकमिति यावत्, ईरयितुम्—अभिनेतुं, प्रकटयितुमित्यर्थः, [illegible] वा सज्जनेन ओजस्विता सुजनता च व्यक्तीकर्त्तव्या, तादृशी चातुरी [illegible] भावः, [illegible] [illegible] [illegible] [illegible] [illegible] "[illegible]" [illegible] सत्यादिति

लव। मान्य। सुजनः स राजर्षिः श्रूयते। (ङ)

[सलज्जमिव]। (ढ)—

वयमपि न खल्वेवम्प्राया: क्रतुप्रविघातिन:
क इह च गुणैस्तं राजान न वा बहु मन्यते ?।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणा
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत् ॥ २९ ॥

विनयित्वञ्च सम्यक्तया स्फुटीभूतसमूर्दित्यवधयम्। यदि पुन,—चेद्, ईदृश—शौर्यशौर्यगाम्भीर्यादिगुणगणविभूषितमित्यर्थ, ऐक्ष्वाक —इक्ष्वाकुवंशसम्भूत, सर्वगुणाकरमिति यावत्, त्वा—भवन्तम्, इक्ष्वाकुकुलालङ्कार इत्यर्थ, रामभद्र,—रामचन्द्र, पश्येत—अवलोकयेत, तदा—तर्हि, अवलोकनसमकालमेवेति यावत्, अस्य—रामभद्रस्य, स्नेहेन—प्रेम्णा, वात्सल्येनेत्यर्थ, हृदय—मानसम्, अभिष्यन्देत—द्रवीभूत भवेत, गुणग्राही भगवान् रघुमणि सर्वगुणविभूषित त्वा विलोक्य नूनम् अभूतपूर्वां प्रीतिमापद्यतेति भाव।

(ङ) मान्य।—पूज्य सुमन्त्र!, सुजन,—सज्जन, साधुरित्यर्थ, विनयित्वादिगुणशतविभूषितत्वादिति भाव, स राजर्षि,—राजश्रेष्ठ, राजा चासौ ऋषिश्चेति विग्रहेण, निखिलराजगुणविभूषितोऽप्यसौ रघुमणि राम दमनियमाद्युपयोगात् ऋषिकल्प एव भवतीति भाव, श्रूयते—आकर्ण्यते।

(ढ) सलज्जमिव—लज्जया सह वर्त्तमान यथा स्यात्तथैव, ईषल्लज्जित इवेत्यर्थ, आहेति शेष।

ननु सुजनश्चेत् तत्रभवान् रामचन्द्र भवतामभिमत, तर्हि कथ तत्क्रतुविघाताय यत्नोऽयमपक्रमस्य इत्यनयौचित्यमनुतिष्ठसि ? इत्याशङ्कामपनेतुमाह, वयमपीति।—वयमपि अस्मादृशा जना अपि, अहमपि इत्यर्थो वा, [अविशेषणयुष्मदस्मदो एकत्वेऽपि बहुत्वे प्रयोगदर्शनात्] एवम्प्राया प्रायेण बाहुल्येन एवम् [इति विग्रहे "अर्हे सुपा" (२।१।४ पा०) इति समास] ईदृशा इत्यर्थ, क्रतुप्रविघातिन क्रतु यज्ञ प्रविघ्नन्ति प्रतिघ्नन्ति ये तथोक्ता, यज्ञहन्तार इत्यर्थ, न खलु नैव यथा स राजर्षि सुजन तथा वयमपि, न हि मिथ्याऽऽपहरणादिकर्मसु दुर्जना मञ्जुविघ्नकराश्चप्राया वय भवाम इति भाव। तर्हि कथ रामचन्द्राभिमतयज्ञविघ्नकरणाय चेष्टसे, वय ब्रह्मचारिणो नि:स्पृहा इत्यर्थ? तदपि इदं रामचन्द्रकीर्तितयज्ञविघ्नात् विद्विषमात् तन्मयत्राश्च यज्ञाङ्कुरोऽतिनिष्कृति? तदपि स्ववचनं, ना इहात।—इह च जगति, जगात पुन, प को गन, गुणै

चन्द्र। [सस्मितम्]। किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ? (ग)

लव। अस्त्वमर्षः, मा भूद्वा, एतत्तु पृच्छामि, दान्तं हि राघवं राजानं शृणुमः, स किल नाऽऽत्मना दृप्यति, नाप्यस्य

शौर्यौदार्यसौजन्यादिभिः हेतुभिः, अशेषगुणविभूषितत्वादिति भावः, तं राजानं सम्राजमसु रामचन्द्रं, न बहु मन्यन्ते वा ? नाद्रियते वा ? न सत्करोति वेत्यर्थः, अपि तु सर्व एव विपुलगुणविशोभितं रामं तद्गुणाकृष्टहृदयाः सन्तः नियतं प्रशंसन्ति, वयमपि तथैव भवामः, क्रतुविघातका रामविद्वेषिणश्च न इति भावः। युष्माकं सदाचारवत्त्वे सम्राजः रामस्य च बहुसम्मानास्पदीभूतत्वे कथमीदृशः विरोधः सञ्जातः ? इत्याशङ्कामपनयति, तदपीति।—तदपि तथाऽपि, तस्मिन् बहुमान सत्त्वेऽपीत्यर्थः, खलु नूनं, तुरङ्गमरक्षिणाम् अश्वमेधीयाश्वरक्षकाणां, सः व्याहारः तादृशी उक्तिः, "अयमश्वः पताकेयम्" इत्यादि रामानुमोदित सगर्वमभिधानमित्यर्थः। अखिलेति।—अखिलानां सर्वेषां, क्षत्राणां राजन्यानाम्, आक्षेपेण तिरस्कारेण, वीरत्वापह्नवरूपावमाननेनेति यावत्, प्रचण्डतया अत्युग्रतया, अतिदुःसहत्वेन हेतुनेति यावत्, मे मम, रावबान्ताता स्ववपा वीराणां तादृशीनवज्ञा सोढुमपारयत इत्यर्थः विक्रतिः विकारः, क्रोधमित्यर्थः अश्वधारणप्रवृत्तिरूपं चेतसोऽन्यथाभावमिति यावत् अकरोत उत्पादयामास, निखिलवीराणां निन्दाकर राजजनानां वचनं निशम्य क्रोधेनाहमश्वमिममवरुद्धवान्, न विजयप्रेप्सया, न वा दौर्जन्येनेति मन्तव्यमित्याशयः। [अत्राप्रस्तुतेन "कः" इति पदोपस्थाप्यसामान्यार्थेन प्रस्तुतस्य विशेषस्य वक्तुः लवस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः]। हरिणी वृत्तम् ॥ २९ ॥

(ग) सस्मितम्—ईषद्धास्यसहितम्, आहेति शेषः। भवतः,—तव, तात प्रतापोत्कर्षेऽपि—तातस्य—पितृस्थानीयस्य रामचन्द्रस्य, प्रतापः,—प्रभावः, कोप दण्डज तेजः इत्यर्थः तस्य य उत्कर्षः,—अतिशयः, अतिरेकः इति यावत तस्मिन्नपि, अमर्षः,—असहनम्, असहिष्णुतेति यावत्, किन्नु,—किमु कारणं, यद्यपि महावीरस्य भवतः नानाविधजनानां वितथा सगर्वोक्तिः सम्यगेव निरुक्तेति,तथाऽपि पितृवत्पूज्यस्य तत्रभवतः महावीरस्य रघुपतेः रामचन्द्रस्य हिंसनस्य दृष्ट्वा तात्त्विकीं शौर्यादि गुणावलिं गुरुजनानुमतस्य भवादृशस्य चेतः प्रसन्नतां नोपैति। अतीव हास्यकर निरर्थकमविमृश्यजनकमेतदित्याशयः।

(घ) अमर्षः —असहनम्, परगुणासहिष्णुत्वम्, अस्तु—भवतु, मा भूद्वा—न भवतु वा, [illegible] नास्ति किञ्चिदपि न कथञ्चन भवत। [illegible]

प्रजा ईदृश्यो जायन्ते, तत् किमस्य मनुष्या राक्षसीं वाचं वदन्ति ? (त)—

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनि सर्ववैराणा सा हि लोकस्य निर्ऋतिः॥ ३०॥

प्रश्नावतरणमिदानीं न युज्यते इति भावः, तु—किन्तु एतत्—इदं, वक्ष्यमाणविषयजातमित्यर्थः पृच्छामि—जिज्ञासे, भवन्तमिति शेषः, किमिति तदेवाह, दान्तमित्यादि।— दान्तं—दमादिसम्पन्नं, जितेन्द्रियमित्यर्थः, अनुद्धतभाषिणमिति यावत्, हि—निश्चितं, राघवं—रामं, राजानं—निखिलप्रजापालकं, शृणुमः,—आकर्णयामः, सर्वे हि जना सततं रघुमणिं निरहङ्कारं वशिनञ्चामनन्तीति अभीक्ष्णमनुश्रूयते इति भावः, सः,—राघवः, किल—इति वार्त्तायां, ("वार्त्तासम्भाव्ययोः किल" इत्यमरः) आत्मना—स्वयं, न दृप्यति—नाहङ्करोति अस्य—राजस्य, प्रजा अपि—प्रकृतयोऽपि, ईदृश्यः,—एवंविधाः, गर्व्विता इत्यर्थः न जायन्ते—न भवन्ति, किन्तु राज्ञः अतिविनीतत्वात् विनेयानां प्रजानां विनीतत्वन्तु सुतरां नैव सम्पन्नमिति भावः, तत्—तस्मात्, राज्ञः प्रजानाञ्चाहृप्तत्वादित्यर्थः, सर्व्वेषां नैव सौशील्यगुणादिति भावः, यदा,—तत्—तर्हि, स्वयं राज्ञः प्रजानाञ्च दर्पाभावे सत्यपीत्यर्थः, किं—कथम्, अस्य—राज्ञः रामस्य, मनुष्याः—अधिकृतपुरुषाः, सैनिकजना इत्यर्थः, राक्षसीं—राक्षससम्बन्धिनीं, दर्पोद्धतामित्यर्थः, वाचं—वाक्यं वदन्ति ?—भाषन्ते, सुविचक्षणस्यातिविनयिनः नरपतेः अधिकृतजनानामीदृशं भाषणमतीव लज्जाव्यञ्जकमिति भावः।

का खलु राक्षसी वाक्, किञ्च तस्याः अपकारित्वम् इति विवृणोति, ऋषयः इति।—ऋषयः मन्वादयः धर्म्मशास्त्रकाराः उन्मत्तदृप्तयोः उन्मत्तस्य उन्मादरोगग्रस्तस्य, आसवादिपानेन विभ्रान्तचित्तस्य वेत्यर्थः, दृप्तस्य गर्व्वितस्य च, आत्मश्लाघानिरतस्येत्यर्थः, वाचं वचनं, राक्षसीं राक्षसजनोचितामतिक्रूरामित्यर्थः, परुषापरनामावहतया अतिहीनसत्त्वामिति यावत्, आहुः ब्रुवन्ति। तदीयना एव वदन्तीति वदन्ति नाम, तन्नाम्नाऽपि का अति?, इत्याक्षेपे तस्याः अनिष्टोत्पादकतामाह, सेति।—सा वाक्, सर्व्वेषां सर्व्वप्रकाराणां, वैराणां विरोधानां, शत्रुभावानामिति यावत्, योनिः कारणं उत्पादहेतुरित्यर्थः, सा हि तादृशी वागेवेत्यर्थः, लोकस्य जनस्य, तादृशवादिनां वक्तॄणां श्रोतुरित्यर्थः, निर्ऋतिः निर्गता ऋतिः कल्याणं यस्याः सा, ("ऋतिः कल्याणमङ्गले" इति मेदिनी) अलक्ष्मी इत्यर्थः,

इतिह स्म तां निन्दन्ति, अथेतरामभिष्टुवन्ति। (थ)—

कामान् दुग्धे, विप्रकर्षत्यलक्ष्मीं,
कीर्त्तिं सूते, दुष्कृतं या हिनस्ति।
ताञ्चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥ ३१ ॥

("स्यादलक्ष्मीस्तु निरृतिः" इत्यमरः) अलक्ष्मीर्यथा दुरदृष्टवतः पुरुषस्य विविधानि अशुभानि उत्पादयति, एवमेव क्रुद्धानां जनानां गर्व्विता वाक् अनिष्टमेवागमं प्रसूते इति भावः। [अत्र निरृतौ राक्षस्या वाचः अभेदारोपात् निरङ्ग रूपकमलङ्कारः] ॥ ३० ॥

(थ) इतिह—पारम्पर्य्योपदेशः, ("पारम्पर्य्योपदेशे स्यादैतिह्यमितिहाव्ययम्।" इत्यमरः) लोकपरम्परयैतदनुश्रूयते इति भावः। किमिति? एतदेवाह, तां निन्दन्ति स्मेति।—तां—पूर्व्वोक्तां राक्षसीं वाचं, निन्दन्ति स्म—तिरस्कुर्व्वन्ति स्म, अथ—अपिच, वाक्यान्तरारम्भार्थकोऽव्ययशब्दः, इतराम्—अपरां, सौजन्यविनयादिगुणभूषितां वाचमित्यर्थः, अभिष्टुवन्ति स्म—प्रशंसन्ति स्म, ऋषय इति शेषः, जनान् प्राचीना महाजनास्तन्वा वाचं विहाय सदा साध्वीं वाचं समुदीरयत इत्यादिशन्ति स्म इत्यस्माकं पारम्पर्य्योपदेश इति भावः।

इत्थं राक्षसीं वाचं विनिन्द्येदानीं सूनृतां वाचमभिष्टौति, कामानिति।—या सूनृता वाक्, कामान् मनोऽभिलषितानर्थान्, दुग्धे प्रपूरयति, आनीय ददातीत्यर्थः, या सूनृतां वाचमुपश्रुत्य हि परितुष्टाः महान्तः श्रोतारः प्रवक्त्रे यथेष्टमभिलषितानि वस्तूनि प्रददतीति भावः, अलक्ष्मीं निरृतिम्, अशुभाधिष्ठात्रीं देवीमित्यर्थः, विप्रकर्षति निरस्यति, दूरीकरोतीत्यर्थः, या च मनोरिता सती अमङ्गलं सर्व्वथा निवारयतीति भावः, कीर्त्तिं यशः, सूते जनयति, सन्तो हि तादृशीं वाचं सदैव प्रशंसन्ति, तेन च तद्वाक्यप्रयोक्तुः कीर्त्तिः सर्व्वत्र सुप्रथिता भवतीति भावः, दुष्कृतं पापं हिनस्ति नाशयति, निरन्तरमभिधीयमाना सा हि अतिपावनी वाक् प्रवक्तृणां प्राक्तनं पापं समूलमेव उन्मूलयतीति भावः। तां निखिलकल्याणप्रसवनमूलनिदानं, अत एव मङ्गलानां शुभानां, मातरं प्रसवित्रीं, मङ्गलनिदानभूतामित्यर्थः, एतां प्रकृतां प्रस्तूयमानामित्यर्थः, सूनृतां सत्यां प्रियाञ्चेत्यर्थः, ("सूनृतं प्रिये। सत्ये" इत्यमरः, "सूनृतं मङ्गलेऽपि स्यात् प्रियसत्ये वचस्यपि।" इत्यजयोऽपि) वाचं वाणीं, धीराः विद्वांसः, पण्डिता इत्यर्थः, धेनुमपि कामधेनुमहर्म्यामपि, काम-

सुमन्त्र । परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी वदति अभिसम्पन्नमार्षेण संस्कारेण । (द)

लवः । यत् पुनश्चन्द्रकेतो ! वदसि, "किन्न भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः" इति, तत् पृच्छामि, किं व्यवस्थितविषयाः क्षत्रधर्मा इति ? । (ध)

दुग्धामित्यर्थः, मनोऽभीष्टपूरयतीति यावत्, आहुः ब्रुवन्ति, चकारोऽत्र समुच्चयार्थकः तथाच उन्मत्तदमनी वचनं राक्षसीमाहुः सूनृता वाचञ्च धेनुमप्याहुरित्यर्थः, कामदेनुरिव सूनृता वाणी अभिधातृभ्यः वाञ्छितफलानि प्रयच्छतीति भावः । [अत्र "दुग्धे" इत्यादिक्रियापदानामेकेनैव कर्तृपदेनान्वयात् दीपकमलङ्कारः, तथा धेन्वा सह वाचः अभेदारोपात् निरङ्गं रूपकञ्चेत्यनयोरङ्गाङ्गिभावेन सङ्करः]। शालिनी वृत्तम् ॥ ३१ ॥

(द) परिपूतस्वभावः,—परिपूतः,—अतिपवित्रः, स्वभावः,—प्रकृतिः यस्य तथाभूतः, अतिपवित्रचरित्र इत्यर्थः, प्राचेतसान्तेवासी—प्राचेतसस्य—वाल्मीकेः, अन्ते वासी—शिष्यः अयं कुमारः,—एष लवः, आर्षेण—ऋषीणामयमित्यार्षः तादृशेन, ऋषिजनोचितेनेत्यर्थः, संस्कारेण—ज्ञानेन, अभिसम्पन्नम्—अभिसम्बद्धम्, अनुगतं यथा तथेत्यर्थः, वदति—भाषते, ऋषयः खलु यथा अलौकिकज्ञानालोकसमुद्भासिता वाचमुदीरयन्ति एवमेवासौ कुमारः सुशिक्षिततया सुसंस्कृतं स्वरादिदोषशून्यं यथा तथा कथितवानित्यर्थः ।

(ध) हे चन्द्रकेतो !—भो कुमार !, पुनः,—किन्तु, यत् वदसि—उक्तवानसि, किमिति ? तदेवाह, किन्निति !—किन्नु—किमु भो प्रश्नार्थकमव्ययम्, भवतः—तव तातप्रतापोत्कर्षे—तातस्य—पितृस्थानीयस्य, पितृवत् पूजनीयस्य रामचन्द्रस्य, प्रतापः—प्रभावः, कोषदण्डजं तेजः इत्यर्थः, तस्य उत्कर्षेऽपि—आधिक्येऽपि पितृकल्पस्य रामस्य जगत्प्रसिद्धप्रभावप्रख्यापकेऽप्यश्वे, अमर्षः ?—क्रोधः, समुत्पन्नमिदम्, इति यत् वदसि इत्यनेनान्वयः, तत्—तदेतदर्थे, तद्विषये इति भावः पृच्छामि—जिज्ञासे, भवन्तमिति शेषः, किं ?—किमु, प्रश्नार्थकमव्ययम्, व्यवस्थितविषयाः,—व्यवस्थितः,—निर्दिष्टः, नियमितः इत्यर्थः, विषयः—आश्रयः, येषां ते तादृशाः, नियमितेति यावत्, दैवात् ते, निर्धारिताश्रया इत्यर्थः केवलं रामचन्द्रनियतक्षत्रियस्वरूपाः, क्षत्रधर्माः—क्षत्रस्य—क्षत्रियस्य, क्षत्रियजातेरित्यर्थः, धर्माः,—शौर्यादि गुणाः, इति ? एतत्कथनेन किञ्चिज्ज्ञाता ? केवलं किं क्षत्रियकुले महावीरे रामचन्द्रे

सुमन्त्र । नैव खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि, तद्विरम्यतामतिप्रसङ्गात् । (न)—

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया ।
जामदग्न्यस्य दमने नैव निर्बन्धुमर्हसि ॥ २२ ॥

एव पर्य्याप्ता मत्त आगता, नान्येषु केषुचिदपि महावीरेषु ? इत्याशयः, एवं न हि कदाचिदपि सम्भवति यत् गुणानां प्रतिनियतपुरुषवृत्तित्वमिति तात्पर्य्यम् ।

(न) ऐक्ष्वाकम्—इक्ष्वाकुवंशतिलकं, देवं—महाराजं, तं—रामचन्द्रं, नैव खलु जानासि—निश्चितमेव न वेत्सि, यत्—यस्मात् कारणात्, एवम्—इत्थं, प्रागुक्तप्रकारमित्यर्थः, वदसि—कथयसि, ततः—तस्मात्, रघुमणेरलौकिकशौर्य्यवीर्य्यादिविषये तव निरतिशयानभिज्ञत्वादित्यर्थः, विरम्यतां—निवर्त्त्यताम्, ("विरम विरम" इति पाठे—विरम—निवर्त्तस्व, सम्भ्रमे द्विवचनम्) अतिप्रसङ्गात्—अवाच्यपरिभाषणात्, रघुपतेरवमाननासूचकसमुद्धतवाक्प्रयोगादित्यर्थः, यदि त्वमपूर्व्वशौर्य्यसौजन्यादिगुणग्रामविभूषितं रघुमणिं कदाऽपि प्राक् प्रत्यक्षीकुर्य्याः, तर्हि एवं सगर्व्वमभिवादं नोत्सहेथाः, अतो महाजनत्वादवमूचकं सम्भाषणं सर्व्वथैव परिहर इति भावः, लोकोत्तरगुणशालिनि तादृशि महावीरे रामचन्द्रे एवं सावलेपवचनं न शोभते, अतः तूष्णीमस्मात् निवर्त्त्यतामिति समुदिताशयः ।

रामचन्द्रवीर्य्यविक्रमवैषम्यप्रदर्शनेन लवप्रदर्शितदर्पोद्धततायाः अज्ञानविजृम्भितत्वमेव समर्थयमान आह, सैनिकानामिति ।—त्वया भवता, लवेनेत्यर्थः, सैनिकानाम् अस्मत्सेनानिवेशितवीराणामित्यर्थः, प्रमाथेन विमर्द्दनेन, विद्रावीकरणेनेत्यर्थः, पराभवेनेति यावत्, सत्यं यथार्थमेवेत्यर्थः, वस्तुत एवेति यावत्, ओजायितम् ओजस्विवदाचरितमित्यर्थः, विक्रमविशेषप्रदर्शनेन स्वस्य वीरत्वं प्रमाणीकृतमिति यावत्, [ओजायितमिति ओजस्वी इव आचरितमिति विग्रहे ओजशब्दस्य "ओजशब्दो ओजस्विपरो वर्त्तते" इति कौमुदीवचनात् ओजस्विवाचकतया ओजस्विवदाचरितमित्यर्थो लभ्यते, तथाच तदाचारार्थे तस्मात् आचारे 'कर्त्तुः क्यङ् सलोपश्च' (३।१।११पा०) इति क्यङि "ओजसोऽप्सरसो नित्यमितरेषां विभाषया" (वा०) इति नित्यं सलोपे ओजायमानमित्यादौ निष्ठायाम् ओजायितमिति सिद्धम्] आत्मगौरवप्रदर्शनेनैव त्वया अनावार्य्य [illegible] विक्रमं [illegible] वीरत्वं [illegible] यदि जामदग्न्य [illegible] विद्राव [illegible], [illegible] तस्मिन् [illegible] कोऽपि [illegible] इति भाव [illegible] समायित ।

लव। [सहासम्]। आर्य्य। जामदग्न्यस्यापि दमनः स राजा इति कोऽयमुच्चैर्वादः। । । (प)—

सिद्धं ह्येतद्वाचि वीर्य्यं द्विजानां
बाह्वोर्वीर्य्यं यत्तु तत् क्षत्रियाणाम।

इत्याह, जामदग्न्यस्येति।—किन्तु जामदग्न्यस्य जमदग्निपुत्रस्य परशुरामस्येत्यर्थं, [जमदग्नेरपत्य पुमानिति विग्रहे जमदग्निशब्दात "गर्गादिभ्यो यञ्" (४।१।१०५ पा०) इति यञ्] दमने दर्पहारिणि पराभवितरि राज्ञे इत्यर्थ, [दमयतीति दमन दमयते "नन्दिग्रहिपचादि—" (३।१।१३४पा०) इति कर्त्तरि ल्यु] इदम इत्य वीरत्वादिवचनस्मा कि राम एव व्यवस्थिता ? इत्येवमौद्धत्याभिव्यञ्जकवचनमित्यर्थ, निवक्त निश्चयेन कथयितुमित्यर्थ, नार्हसि न प्रभवसीत्यर्थ, त्वया एकाकिनैव [illegible]वीराणा हेलया विद्रावणेन स्वकीय वीरत्वगौरवमद्य मनवतेव [illegible], तथाऽपि त्रिभुवनैकवीरस्य परशुरामस्यापि पराभवितु रघुपते सर्वातिशायिविक्रमेऽपि तव समर्थं कदाऽपि न शोभन इति निष्कृष्टार्थ। [तव शोभायितमिति क्यङ्प्रत्ययेन लवस्य [illegible]पूर्वेण वादनैषम्यसाम्यप्रतिपादनादुदनाऽलङ्कार]। पथ्यावक्त्र वृत्तम् ॥३२॥

(प) [illegible]—[illegible]स्य समुन्नतत्वभीषादुच्चैर्हाससहित यथा तथेत्यर्थ, [illegible] रामचन्द्रस्य विक्रमाधिक्ये प्रदर्शिता या युक्तिर्वादवत्त्वीयकीर्त [illegible] सा मया नैव युक्तिमत्त्वे परिगण्यते इति हासहेतुर्बोध्य। न,—[illegible] मर्तुरित्यर्थ, राजा—नृपतीरामचन्द्र इत्यर्थ जामदग्न्यस्यापि—जमदग्निपुत्रस्य परशुरामस्यापि का कथा अन्येषामिति अपिकारार्थ, दमन—पराभवता, इत्ययम्—एवम्प्रकार एव इत्यर्थ, क उच्चैर्वाद।—किम् [illegible]वीरत्वमाहात्म्यवाचक वचनमित्यर्थ अपि न किमपीति भाव। वीरत्वख्यापनार्थं परशुरामस्य विजयित्वोत्कीर्तनेन यत रामस्य त्रिभुवनैकवीरत्व [illegible], तदसङ्गतमिति [illegible] परिगणितमित्युक्तम इदानी तत्र हेत प्रदर्शयन्नाह, [illegible], [illegible] ब्राह्मणक्षत्रियचोवीर्य्यव्यवस्थानिरूपणमित्यर्थ [illegible], एत द्विजाना ब्राह्मणानामित्यर्थं, [द्विजायते [illegible] [illegible]। [illegible] नतु "जनुमना जायते शूद्र संस्काराद्द्विज उच्यते' [illegible] [illegible] ब्राह्मणादिवर्णत्रयसाधारणतया

शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन् दान्ते का स्तुतिस्तस्य राज्ञः? ॥ ३२ ॥

कथं द्विजपदेनात्र ब्राह्मणमात्रपरिग्रह इति चेन्न, अनुपदमेव द्विजविशेषाणां क्षत्रियाणां वीर्यस्य अन्यथा व्याख्यानेन, अत्र सामान्यशब्दस्य विशेषपरत्वन्यायेन सामान्यवाचिनोऽपि द्विजशब्दस्य द्विजविशेषब्राह्मणवाचकत्वात् न कश्चिद्दोषावकाश इत्यवधेयम्] वीर्यं पराक्रमः, परपरिभवसामर्थ्यमिति यावत्, वाचि हि वाक्ये एवेत्यर्थः, प्रतिष्ठितमिति शेषः, [अत्र हिशब्द अन्ययोगव्यवच्छेदरूपएवकारार्थे प्रयुक्तः, तेन ब्राह्मणानां वाचि एव वीर्यं, न तु क्षत्रियाणामिव बाह्वोरित्यर्थो लभ्यते। ब्राह्मणानां वाक्ये एव वीर्यस्थितौ प्रमाणं यथा ताण्ड्यब्राह्मणे,—"तस्माद्ब्राह्मणो मुखेन वीर्यं करोति मुखतो हि सृष्टः—" इति] तु किन्तु, बाह्वोः भुजयोः, यत् वीर्यं पराक्रमः, सामर्थ्यमित्यर्थः, तत् क्षत्रियाणां ब्रह्मभुजोत्पन्नानां राजन्यानामेवेत्यर्थः। भवतु तावदेवं, तत् प्रकृते कस्मावदुपयोगः? इत्यत आह, शस्त्रग्राहीति।—ब्राह्मणः ब्रह्ममुखोत्पन्नः द्विज इत्यर्थः, [एतेनास्य निसर्गदौर्बल्यं सूचितम्] जामदग्न्यः जमदग्निमुनेस्तनयः परशुरामः, शस्त्रग्राही तपःक्लेशादिदुर्बलेन हस्तेन शस्त्रधारीत्यर्थः, न हि तपस्वी ब्राह्मणः तपोदुर्बलाभ्यां भुजाभ्यां शस्त्रमग्रहीष्यदिति कुतस्तस्मात् यस्य कस्यचिदपि क्षत्रियस्य पराजयसम्भावनेति भावः, तस्मिन् परशुरामे इत्यर्थः, दान्ते रामेण विजिते सतीत्यर्थः, तस्य विजेतुरित्यर्थः, राज्ञः नृपतेः, रामस्येति यावत्, का स्तुतिः? कः प्रशंसावादः?, न कोऽपीत्यर्थः, ब्राह्मणा हि नियततपःक्लेशेन अनशनक्लेशेन च कार्यतकलेवराः अत एव दैहिकसामर्थ्यपरिहीनाः केवलं कठोरतपःप्रभावेण वाङ्मात्रफलमविगच्छन्त शापवर्त्मनैव द्वेष्यानभिभवन्तीति ब्रह्ममुखसमुत्पन्नानां ब्राह्मणानां मुखे एव सामर्थ्यं, तद्भुजयुगलसमुत्थानां क्षत्रियाणान्तु भुजयोः, इति भुजवीर्यावसरे रामस्य ब्राह्मणपरशुरामपराजयकथोपन्यासेन वीरत्वनाहात्म्यख्यापनं न कथमपि सङ्गच्छत इति भावः, निजभुजबलपराक्रान्तबलदृप्तं क्षत्रवीरं यदि रामः कदाचित् पराजयेत्, तदैवासौ वीरत्वेन प्रशंसाभाजनमभविष्यदिति हृदयम्। [अत्र क्षत्रियाणामेव बाहुवीर्यशालित्वकथनेन "ब्राह्मणानां न" इत्यस्य अर्थवत्त्वात्, कथितात् वस्तुनः क्षत्रियात् तादृशान्यस्य ब्राह्मणस्य व्यावर्तनात् आर्थी परिसंख्याऽलङ्कारः, सा च परशुरामदमनेनापि रामस्य प्रशंसानुपपत्तेः ब्राह्मणोऽयमिति जामदग्न्यविशेषणपदहेतुकत्वोपन्यासात् काव्यलिङ्गेन सङ्कीर्णा]। शालिनी वृत्तम् ॥ ३२ ॥

चन्द्र । [सोन्माथमिव] । आर्य्य । आर्य्य । क्षतमुत्तरोत्तरेण । (फ)—

कोऽप्येष सम्प्रति नवः पुरुषावतारो
वीरो न यस्य भगवान् भृगुनन्दनोऽपि ।
पर्य्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद ॥ ३४ ॥

(फ) सोन्माथमिव—उन्माथेन—अत्यन्तमर्म्मयातनया सह वर्त्तमान यथा स्यात तथेत्यर्थ, सक्षोभमिति यावत, [त्रिलोकपूज्यस्य तातस्य रामस्यापि अवज्ञासूचकवचनस्य स्वकर्णेन श्रवणेनैव एव मर्म्मवेदनाहेतुरिह बोध्य]। ("उन्माथ कूटयन्त्रे स्यात मारणे घातके पुमान्" इति मेदिनी)। आर्य्य ।—मान्य । [इति सुमन्त्रस्यामन्त्रणपदम् । अत सुमन्त्रस्य लवोक्तिप्रत्युत्तरप्रदानप्रतिबन्धकताऽऽचरणार्थं सम्भ्रमे द्विरुक्तिर्बोध्या] उत्तरोत्तरेण—उत्तरस्य—वाक्यस्य, उत्तरेण—प्रत्युत्तरेण इत्यर्थ । क्षतम्—अलम् अनौचित्यादीदृशवाक्यस्य उत्तरदान न विधेयमिति भाव ।

रामस्य जामदग्न्यविजयित्वेन सर्व्ववादिसम्मतमपि त्रिभुवनैकवीरत्वमस्वीकुर्व्वत सुतरामविवेकिनो लवस्योक्तौ प्रत्युत्तरदानस्यापि अनौचित्यमुपपादयितु सर्व्वथा तस्याबाचीनत्व प्रमापयन्नाह, कोऽपीति ।—सम्प्रति इदानीं, कोऽपि अविज्ञात-
५ माहात्म्य इत्यर्थ, अदृष्टाश्रुतपूर्व्वतया अनिवचनीय इति यावत, नव नूतन, अपूर्व्व इत्यर्थ एष अय, लवरूप इत्यर्थ, पुरुषावतार नररूपेणाय पृथिव्यामाविर्भूत इत्यर्थ, जात इति शेष, [नररूपस्यावतार, पुरुषरूपेण वा अवतार इति पुरुषावतार । अवतार इति अवपूर्व्वात् तरतेर्भावे "अवे तृस्त्रोर्घञ्" (३।३।१२० पा०) इति घञ् यद्यप्यस्य सूत्रस्य सज्ञाया तथा करणाधिकरणयोरेव वाच्ययोर्विषय, तथाऽपि "प्रायानुवृत्तेरसज्ञायामपि भवति" इति काशिकावचनात् अत्रापि विषयत्वोपपत्तिर्बोध्या]। नन्वस्य अभिनवत्वे कि बीजम ? इत्यत्राह, वीर इति ।—भगवान् ऐश्वर्य्यादिषड्गुणसम्पन्नतया अलौकिकज्ञानप्रभावशालीत्यर्थ, भृगुनन्दन जामदग्न्यपि क्षत्रियकुलान्तकत्वात् जगतीपतीना निहन्ता परशुरामोऽपीत्यर्थ, का कथा अपरेषामिति भाव, यस्य अपूर्व्वपुरुषावतारस्य सम्बन्धे इत्यर्थ, न वीर न शूर, वीरपदवाच्यतया न गणनीय इत्यर्थ, ("वीर" इत्यत्र "श्लाघ्य" इत्यपि क्वचित् पाठ) यश्च पर्य्याप्ता सम्यक्, सप्तानां भुवनानाम् पूर्ण इत्यर्थ, सप्ताना भूरादिसप्तलोकाना, [भूरादि

लव। को हि रघुपतेश्चरितं महिमानञ्च न जानाति? यदि नाम किञ्चिद्वक्तव्यमस्ति, अथवा शान्तम्। (व)—

सप्तलोका यथा—"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च। सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः॥" इति] भुवनानां लोकानाम्, अभयस्य राक्षसादिविघ्नव्यूहावनाशात् अभयदानस्येत्यर्थः, दक्षिणा प्रतिष्ठा येभ्य तानि, [दक्षिणाया कर्म्मप्रतिष्ठापकतया अत्र प्रतिष्ठा एव दक्षिणाशब्दार्थो बोध्यः] यद्वा,—पर्य्याप्ते प्रभूते, सप्तानां भुवनानाम् अभये रक्षाकर्म्मणि दक्षिणानि अनुकूलानीत्यर्थः, अथवा,—पर्य्याप्ता सम्पूर्णा, सप्तभुवनस्य अभयमेव दक्षिणा दानं येषु तानि, [यज्ञादिवैदिककर्म्मसाङ्गतार्थं याजकेभ्यो दीयमानस्य धनरत्नादिकस्यैव दक्षिणाशब्दवाच्यतया अत्र दानरूपोऽर्थः लक्षणया बोध्यः। सप्तभुवनमिति सप्तानां भुवनानां समाहार इति विग्रहे समाहारद्विगौ भुवनशब्दस्य पात्राद्यन्तर्गतत्वात् न स्त्रियां ङीप्] पुण्यानि दोषरहितानि, अति विशुद्धानीत्यर्थः, तातस्य पूज्यस्य, ज्येष्ठतातस्य रामचन्द्रस्येत्यर्थः, चरितानि अनुष्ठानानि, कतिपयाणीति यावत्, न वेद न वेत्ति, नावगच्छतीत्यर्थः, येन हि अनन्यसहायेन निजभुजबलेनैव त्रिसप्तवारान् भुवनगतानशेषानपि क्षत्रवीरानुन्मूल्य यता जगदिदं निःक्षत्रियमकारि, त्रिलोकविदितालौकिककीर्त्तिः सोऽपि वीरतया यस्य गणनापदवीं नारोढुमर्हति, तथा स्वबलेन वशीकृतदेवासुरनरस्य त्रिलोकातिरिक्तोऽतिशक्तिमतो राक्षसराजस्यापि वंशं समूलमुन्मूलयतो जगदेकवीरस्य रघुपतेस्तस्यापि चरितं च यस्य न तु[illegible], सोऽयमलौकिकविक्रमोपेतः अपूर्व्वकोऽपि पदार्थः कस्माच्चिदज्ञातदेशात् पुरुषरूपेण अवतीर्णः, नो चेत् नूनमेतयोः कीर्त्तिकलापमवगणय्यादात् निःकृष्टाय। [अत्र यद्यपि द्वितीयचतुर्थपादयोश्छन्दस [illegible] "आत्मा जानाति यत् पापम्" इत्यादिवत् [illegible] तथापि चतुर्थपादे [illegible] "य" इति [illegible] "द्वितीय य [illegible]" इत्यादिवत् [illegible] [illegible] स च चतुर्थपादे "पुण्यानि तातचरितानि न वेद यः" इति [illegible] [illegible] तथा [illegible] [illegible]]। वसन्ततिलकं वृत्तम्॥२३॥

(व) [illegible] इति [illegible]

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते ?
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।

सोल्लुण्ठनवचनमाकर्ण्यातिक्षुब्ध लव तथापि स्वाभिमतप्रदर्शनपूर्व्वकं प्रश्नान्तरमाह क इति।—को हि क एव वेत्यर्थ । रघुपते,—रघुवंशावतंसस्य रामचन्द्रस्येत्यर्थ । चरितम् अनुष्ठितं, कार्य्यमित्यर्थ । महिमानं—माहात्म्यम्। न जानाति ?—न वेत्ति ?, अपि तु सर्व्व एव जानातीत्यर्थ , अलौकिकरामचरितस्य सर्व्वज्ञानविषयत्वात् मयाऽपि तत् सम्यगेव ज्ञातमिति न तच्चरितानभिज्ञतया तथोक्तमिति भाव । ननु जानासि चेत् तदा कथमेवं प्रलपसि ? इत्याशङ्क्याह, यदीति।—यदि—इति पक्षान्तरे अव्ययम्। ("पक्षान्तरे चेद् यदि च" इत्यमर) नाम—इति कुत्सायाम्। ("नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च। सम्भाव्यकुत्साप्राकाश्यविकल्पेऽपि च दृश्यते ॥" इति मेदिनी) किञ्चित्—किमपि। वक्तव्य—कथनीयं, पर्य्यालोचयितव्यमित्यर्थ , यथाऽस्य चरिते एकत माहात्म्यख्यापिका दृश्यते भूयसी घटनावली, तथैव कुत्सापक्षेऽप्यस्य कार्य्यपरम्परा नैव दुर्लभेति समुदिततात्पर्य्यम्। कुत्सापक्षीयवक्तव्यं वक्तुमुपक्रममाण एव परनिन्दाया अवाच्यत्वबुद्ध्या पुन पक्षान्तरमाह अथवेति।—आस्तां—विरमतु अस्तु तदिति शेष तत्कीर्त्तनेनालमित्यर्थ । [अत्र वक्तुमिष्टस्य रामनिन्दारूपस्य वस्तुन अतिगुरुत्वरूपविशेषप्रतिपत्त्यर्थं निषेधस्य आभासनादाक्षेपो नाम अलङ्कार ,—"वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये। निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥" इति दर्पणकृदुक्तलक्षणात्]।

नन्वस्ति चेत् अतिविशुद्धे सर्व्ववादिसम्मतेऽपि रामचरिते किञ्चिदालोचनीयं, तदा तदाख्यायतामेव, किमुपरमेण ? इत्याशङ्क्याह, वृद्धा इति।—वृद्धा वर्षीयांस वयोज्येष्ठा इत्यर्थ, ते प्रसिद्धा रामादय इत्यर्थ , विचारणीयचरिता विचारणीयं युक्तं अयुक्तं वेति विवेचनीयं, चरितम् आचरणम्, अनुष्ठितं कर्म्मेत्यर्थ, येषां तथोक्ता समालोचनीयकर्म्माण इत्यर्थ , न, भवन्तीति शेष , केनापि वयसा गौरवास्पदानां तेषामनुष्ठितेषु गुणदोषविचारो बालकैरस्माभिर्न विधेय इति भाव , तत तिष्ठन्तु अविचारितचरिता एव वर्त्तन्तामित्यर्थ । कुत एतत् इत्याह, किमिति।—किं वर्ण्यते ? व्याख्यातव्यं किमस्ति ? इत्यर्थ , वर्ण्यमाने सति दोषवक्तव्यत्वात् तच्चरितस्य दोषोद्घाटनमेव भविष्यतीति ततो विरतिरेव श्रेयसीति भाव । तदेव हि तच्चरितेषु ज्ञापयति, सुन्देति।—सुन्दस्य तन्नामकस्य, तदाख्यासुरविशेषस्य इत्यर्थ, स्त्रिया पत्न्या, ताडकाया इत्यर्थ, स्वभावदुष्टाया, स्त्रिय-

यानि त्रीण्यपराङ्मुखान्यपि पदान्यासन् खराऽऽयोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ ३५ ॥

नाश्यहन्त्याया अपि कस्याश्चित् अबलाया इति यावत्, दमनेऽपि विनाशे अनुष्ठितेऽपि इत्यर्थः, स्त्रीवधनिमित्तके महापातके कृते सत्यपीति यावत्, अखण्डम् अक्षुण्णं परिपूर्णमित्यर्थः, यशः कीर्तिः, माहात्म्यख्यातिरित्यर्थः, येषां ते तथोक्ताः, अक्षुण्णमहिमान इत्यर्थः, ("अखण्डयशस" इत्यत्र "अकुण्ठयशस" इति पाठोऽपि न दुष्यः) ते रामाः, [अत्र गौरवे बहुत्वमवगन्तव्यम्] लोके भुवने, ('लोकस्तु भुवने जने" इत्यमरः) महान्तो हि महानुभावा एव, सर्वजनपूज्या एवेत्यर्थः, स्वभावदुर्जनाया अबलाया ताडकाया वधसाधनेन शास्त्रन्यायविरुद्धमतिविगर्हितं लोकगर्हितं पापं कर्म समाचरतोऽपि रघुपतेः त्रिलोकविश्रुतं यशो नाशितोऽपि [illegible], परन्तो वि [illegible] लोके माहात्म्यवत्त्वेन सम्पूज्यत एवेति सोल्लासोक्तिरियम् । [स्त्रीहत्याया पापजनकतामाह याज्ञवल्क्यः,—"शरणागतबालस्त्रीहिंसकान् [illegible] तु । चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥" इति । तथा [illegible] —"[illegible] प्रातिलोम्ययोनिगतस्यापि ।" इति । वस्तुतस्तु राज [illegible] रामस्य ताडकावधेऽपि न पातकमिति रामायणे तत्प्रकरणे [illegible],—"नहि ते स्त्रीवधकृते घृणा कार्या नरोत्तम । चातुर्वर्ण्य-हितार्थं हि कर्तव्यं राजसूनुना ॥ नृशंसमनृशंसं वा प्रजारक्षणकारणात् । पातकं वा सदोषं वा कर्तव्यं रक्षता सदा ॥ राज्यभारनियुक्तानामेष धर्मः सनातनः । अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते ॥" इति । [illegible] —"[illegible] न तु तां [illegible] । [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।" इति] । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

शक्तिरोषव्याकुलतया दुःखादया त त सामयिकचेष्टाव्यापारा इत्यर्थः, युध्यमान-
खरो हि रामस्य धनुःस्फोट कवचपातन सर्व्वाङ्गवेधनपूर्व्वकरुधिरपातन कृतवान
इति त्रीणि पदानि लक्ष्यीकृत्य एवमुक्ति इति। आसन अभवन, ('अपराङ्-
मुखानि इत्यत्र "अकुतोभयानि" इति पाठे—नास्ति कुत कस्मादपि, भय भीत-
प्रकाशो येषु तानि कथमप्यप्रकाशितभीतिसूचकभावानीत्यर्थः, न हि पलायितस्य कुत-
श्चिदपि भयसम्भावनाऽस्तीति भाव। खराङ्के रामस्य पृष्ठत पादत्रयापसर्पणकथा
यथा रामायणे त्रिंशसर्गे,—"विकल स क्षतो बाणै खरो रामेण संयुगे। मत्तो
रुधिरगन्धेन तमेवाभ्यद्रवत द्रुतम्॥ तमापतन्त संक्रुद्ध कृतास्त्रो रुधिराप्लुतम्।
अपासर्पत द्वित्रिपद किञ्चित्त्वरितविक्रम॥ रामेण धनुरानम्य खरस्यो-
रसि चापतत्॥ स पपात खरो भूमौ दह्यमान शराग्निना। रुद्रेणेव विनिर्दग्ध
श्वेतारण्ये यथाऽन्तक॥' इत्यादि। प्रतिद्वन्द्विनि अतिप्रत्यासन्ने अन्तरवकाशाभावात्
धनुषि शरसंयोगोऽप्यशक्य इति वेगेन स्वाभिमुखमापतन्त खरमालोक्य राम-
पुरत किञ्चिदवकाशसम्पत्तये द्वित्राणि पदानि अपससार, लवेन तु तदेव अपसरण
भीत्या आत्मरक्षार्थ नत्वनेनेन एव कटाक्ष कृतो वाच्य। युद्धे क्षत्रियकृतपृष्ठ-
प्रदर्शनस्य अधर्म्महेतुत्वमाह नन्तु,—"समोत्तमाधमै राजा त्वाहूत
पालयन् प्रजा। न निवर्त्तेत सङ्ग्रामात् क्षात्र धर्म्ममनुस्मरन्॥" इति)।
अपराङ्मुखानीति सोपहासोक्तिर्बोध्या। वा अथवा, इन्द्रसूनोरिन्द्रपुत्रस्य
वालिन इत्यर्थ, निधने वधे यत् कौशल युद्धकार्यदक्षता, आसीदिति शेष,
सुग्रीव सह युध्यमान वालिन प्रति प्रच्छन्नभावेन बाणक्षेपात् युद्धनीतिविरुद्धम्
अतएव यत् अशक्तिप्रकटनमिति निष्कृष्टार्थ, तदपि तस्मिन्नपि, अपिशब्दात्
तत्र सर्व्वोऽप्यत्र, जन त्रिभुवनगत सर्व्वो लोक, अभिज्ञ ज्ञानवान, सर्वे एव
तत्र सर्वे जानन्तीत्यर्थ, जाड्यशालिनो जना रघुपतेश्चरितमाहात्म्य न केवल
दशाननहननात् अलौकिककर्म्मविचित्र जानन्ति, अपि तु नारीवधरूपेण बीभत्स-
कर्मणा, प्रतिनष्टलताकरणात् रणे पृष्ठप्रदर्शनेन, तथा कपटयुद्धेन वालिवधाच्च
कुत्सितमपि जानन्तीति भाव। [वालिन कपटवधकान्ती
यथा रामायणे किष्किन्धाकाण्डे त्रयोदशादिसर्गे,—"ततस्तु रामानुजराम-
वानरा मदस्य प्रत्यागुर्दमितपनजन। पुरी सुरेशात्मजवीर्य्यपालिता वधाय
तो पुनरागतास्त्विह॥ सर्वे ते त्वरित गत्वा किष्किन्धा वालिन पुरीम्।
वृक्षैरात्मानमावृत्य व्यतिष्ठन् गहने वने॥ घोषमाणमथापश्यत् सुग्रीव
वानरैर्वृतम्। विनाद हि सैव राघव व सुस्मुः॥ ततो रामो महात्मा

चन्द्रकेतुः। आः तातप्रवादमिन्नमर्य्याद। अति हि नाम प्रगल्भसे। (भ)

भ्रातरं दृष्ट्वा हरीश्वरम्। सुग्रीवं चोदयामास वीरो वालिनो वधकाङ्क्षया॥ ततो धनुषि सन्धाय शरमाशीविषोपमम्। पूरयामास तच्चापं कालचक्रमिवान्तकः॥ मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः। राघवेण महाबाणो वालिवक्षसि पातितः॥ ततः शरेणाभिहतो रामेण रणकर्कशः। पपात सहसा वाली निकृत्त इव पादपः॥" इत्यादि]। (क्वचित् पुस्तके च प्रथमचरणस्य "किं वर्ण्यते" इत्यत्र "हु वर्तते" इति पाठो दृश्यते, तत्र हुमिति स्मरणार्थकमव्ययम्, तत्र तेषाम् एतादृशमहापुरुषचरितं वर्तते इत्येवार्थं स्मारणेन दर्शयति—वृद्धेत्यादि। [अत्र लवेन गर्व्वातिरेकजनितसम्भ्रमात् पूजनीयस्यापि रामस्य दोषसमालोचनेन प्रदर्शितः पूज्यपूजाव्यतिक्रमरूपो द्रवो नाम विमर्शसन्ध्यङ्गं वेदितव्यम्, तथाच दर्पणकृता,—"द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा" इति। तथा वक्तुरिष्टस्य रामचरितमाहात्म्यापकर्षस्य गुरुत्वरूपाविशेषप्रतिपत्त्यर्थं "किं वर्ण्यते" इत्यनेन निषेधस्य आपाततः प्रतीयमानत्वात् प्रथमभेदात्मक आक्षेपो नाम अलङ्कारः, स च रामादीनामविचारणीयचरितत्वे "वृद्धाः" इति विशेषणपदस्य हेतुविधया उपन्यासात् काव्यलिङ्गालङ्कारेणाङ्गाङ्गिभावरूपेण तया सङ्कीर्यते इति द्रष्टव्यम्] शार्दूलविक्रीडितं वृत्तम्॥ ३५॥

(भ) आः—इति कोपसूचकम् अव्ययम्। ("आस्तु स्यात् कोपपीडयोः" इत्यमरः) [illegible] पितृव्यस्य दोषापकर्षणं [illegible] तातप्रवादभिन्नमर्य्याद!—तातस्य—ज्येष्ठतातस्य, रामस्येत्यर्थः, प्रवादेन—निन्दया, तिरस्कारेणेत्यर्थः, भिन्ना—भग्ना, [illegible], मर्य्यादा—[illegible], तत्सम्बोधनम्, [तातप्रवादभिन्नमर्य्याद!" इत्यत्र "तातप्रवादेन भिन्नमर्य्याद!" इति [illegible] पाठो [illegible] [illegible] अति हि नाम—[illegible] [illegible] [illegible] इति [illegible]। [illegible] नाम—[illegible]। ([illegible])।

लव । अये । मय्येव भ्रुकुटीधरः संवृत्तः । (म)

सुमन्त्र । स्फुरितमनयोः क्रोधेन । (य) तथाहि ।—

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः

किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः ।

(म) अये—इति क्रोधव्यञ्जकम्, अनादृतामन्त्रणार्थकं वा अव्ययम्। ("अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च।" इति मेदिनी। "अये' इत्यत्र "आः !! कथम्" इत्यपि पाठान्तरं दृश्यते) मयि एव—अनतिचिरमेव एतत्समक्षम- स्त्रहीनकविद्रावणेन प्रदर्शितपराक्रमे एवेत्यर्थः। भ्रुकुटीधरः,—समुत्- पादितभ्रूभङ्गः, चन्द्रकेतुकृताधिक्षेपजकोपेन सभ्रूभङ्गोपेतवदन इत्यर्थः। [भ्रुवो कुटी इति भ्रुकुटी, "अभ्रुकुंसादीनाम्" (वा०) इति ह्रस्वस्य वैकल्पिकविधानात् भृकुटीति पदान्तरम्। "अकारोऽनेन विधीयते इति व्याख्यान्तरम्" इति दीक्षित- वचनात् भ्रकुटीत्यपि स्यात्। धरतीति धरः, धृधातोः कर्त्तरि "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४ पा०) इति पचादित्वादच्, ततश्च भ्रुकुट्या धरः इति षष्ठीसमासः, द्वितीयान्तोपपदसमासे "कर्मण्यण्" (३।२।१ पा०) इत्यस्य बाधाभावात् "प्रायोऽण्विषये च" (वा०) इति अच्प्रत्ययान्तेनोपपदसमासः इति पद्मनाभः]। संवृत्तः,—सञ्जातः, वीर्यादिना रामस्य मदपेक्षया अल्पत्वसूचनात् मयि कोपप्रकटनमनुचितमिति भावः।

(य) अनयोः,—एतयोः, चन्द्रकेतोर्लवस्य चेत्यर्थः। क्रोधेन—कोपेन, पर- स्परस्पर्द्धासम्भूतेन रोषेणेति यावत्। [स्फुरितमिति क्रियापदस्य कर्तृपदमिदम्]। स्फुरितम्—आविर्भूतम्, कुमारयोः क्रोधः सञ्जातः इति समुदितार्थः। [स्फुरितमिति स्फुरतेर्भावे निष्ठा]।

अन्योन्यस्पर्द्धया समुपजातरोषयोः कुमारयोः तदानीन्तनावस्थावर्णनमुखेन कोपोत्पत्तिमुपपादयन्नाह, चूडेति।—आकूतं प्रतिद्वन्द्विपराभवविषयकोऽभिप्रायः, ("आकूतं स्यादभिप्रायः' इति हलायुधः) तस्मात् जायते यः तथोक्तः, परस्पर- दमनेच्छाजनितक्रोधसमुत्थ इत्यर्थः, [आकूतोपपदात् जने कर्त्तरि डः] वेपथुः कम्पः, [वेपधातोर्भावे अथुच्] चूडामण्डलस्य शिखासमूहस्य, [रघुवंशीयानां क्षत्रियाणां पञ्च चूडतया चूडाया मण्डलत्वोक्तिः सङ्गच्छते] बन्धनं संयमनं, संयतकेशपाशसमूह- मित्यर्थः, तरलयति विधूनयति, किञ्चित् शिथिलयतीति वा, प्रबलकोपोद्रेकेण शिरःकम्पात् संयतोऽपि कुन्तलभारः समन्ततो विस्रंसते इत्यर्थः, [तरलं करोतीति

धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥ ३६ ॥

तरलयति तरलशब्दात् तत्करोतीत्यर्थे "तत्करोति तदाचष्टे" (ग०) इति णिच्, ततः तरलीति नामधातोः कर्त्तरि लट्। क्वचित् प्रथमपादे "क्रोधेनोद्धतधूतकुन्तलभरं सर्वाङ्गजो वेपथुः" इत्येव पठितो दृश्यते, तत्र सुगम एवार्थः] स्वयम् आत्मना, स्वभावत एवेत्यर्थः [अत्र स्वयमिति तृतीयान्तमव्ययं, "प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) इति तृतीया] कोकनदच्छदस्य रक्तकमलदलस्य, [अत्र सदृशशब्दयोगात् "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् (२।३।७२ पा०) इति वैकल्पिकी षष्ठी। "—अथ रक्तसरोरुहे रक्तोत्पलं कोकनदम्" इत्यमरः। कोकान् चक्रवाकान् नदति अन्तर्भूतण्यर्थतया नादयतीत्यर्थः यः सः कोकनदः इति कोकोपपदात् नदते कर्त्तरि अच्] किञ्चित् ईषत्, सदृशे समाने, प्रकृत्येव ईषल्लोहितायमाने इत्यर्थः, नेत्रे नयने रज्यतः लोहितीभवतः, इदानीं क्रोधोद्रेकात् सम्पूर्णरूपेण रक्तवर्णतामापन्ने इत्यर्थः, यद्वा,—कोकनदच्छदस्य किञ्चित् सदृशे नेत्रे स्वयं रज्यतः इत्यन्वयः, [रज्यतः इति "रञ्ज रागे" इति दैवादिकरञ्जधातोर्लटि रूपम्, "अनिदितां हल उपधायाः क्ङिति" (६।४।२४ पा०) इति नलोपः] तथा वक्त्रं अनयोर्नेत्रमुखयोः, कर्त्तृ । [अत्र कुमारगोहिलेऽपि 'नेत्रे" इत्यत्र "मुखम्" इत्यत्र च यथाक्रमं द्विवचनैकवचनयोः साधुत्वं ज्ञात्वैव व्याख्यानम्, तथाच चक्षुःश्रवणादीनां जातिविवक्षितया "नेत्रे" इत्यत्र द्विवचनेनैव अनयोर्नेत्रचतुष्टयस्य बोधः, तथा "वक्त्रम्" इत्यत्र एकवचनेनैव उभयोर्वदनद्वयस्य बोधो बोध्यः। उच्यते अनेनेति व्युत्पत्त्या वचधातोः करणे त्रप्रत्ययेन वक्त्रमिति सिद्धम्] अकाण्डे अनवसरे, अकस्मा-दित्यर्थः, ताण्डवितयोः नृत्यन्त्या, पुनः पुनरूर्ध्वं प्रचलितयोरिति यावत्, [ताण्ड-वितयोः इति, तण्डुना तन्नाममुनिविशेषेण प्रोक्तमनुष्ठानमिति व्युत्पत्त्या तण्डुशब्दा-त्[illegible] अण्प्रत्ययेन सिद्धात् ताण्डवशब्दात् तत् सञ्जातमनयोरित्यर्थे तदस्य सञ्जातं तारकादिभ्य इतच्" (५।२।३६ पा०) इति इतच्। 'पञ्च ताण्डवं प्रोक्तं [illegible]' इति वचनात् भ्रुवोः कम्पने ताण्डवशब्दप्रयोग इत्यत्र [illegible]] भ्रुवोः [illegible], [illegible] [illegible], [illegible] [illegible], [illegible] [illegible] [illegible] [illegible]

कुमारौ। तदितो विमर्दक्षमां भूमिमवतरावः। (र)

[इति निष्क्रान्ताः सर्वे]।

इति कुमारविक्रमो नाम पञ्चमोऽङ्कः। (ल)

यावत्, धत्ते धारयति, परिपूर्णचन्द्रस्फुरितारविन्दयोरनुरूपयोस्तदनयोराननद्वय सततमिथ्यक्रोधलक्षणतया भीषणभ्रूभङ्गेन सुधांशुसङ्गतकलङ्कस्य प्रफुल्लकमलोत्पतद्द्विरेफस्य च श्रियमनुकरोतीति पर्यवसितार्थः, एभिः शिरःकम्पनेत्रलौहित्यभीषणभ्रूभङ्गादिभिर्लिङ्गैरेतयोरन्योन्यक्रोधाविर्भावानुमानात् मन्ये अनतिविलम्बेनैवानयोः समरसमारम्भः सम्भवतीति भावः। [अत्र वदने तादृशचन्द्रकमलयोः शोभासम्बन्धस्य असम्भवत्वेऽपि तत्सम्बन्धकथनेन तच्छोभासदृशशोभां धत्ते इति बिम्बप्रतिबिम्बभावेन उपमायां पर्यवसानात् निदर्शनानाम अलङ्कारः, तदुत्थितवैचित्र्यवशेन शिरःकम्पनेत्रलौहित्यादिभिर्लिङ्गैः कोपस्यानुमानात् अनुमानालङ्कारः व्यज्यते इति अलङ्कारेणालङ्कारध्वनिः]। शार्दूलविक्रीडितं वृत्तम्॥ ३६॥

(र) तत्—तस्मात्, ईदृशौद्धत्यस्य नितान्तमसहनीयत्वादित्यर्थः। इतः,—अस्मात् स्थानात्। विमर्दक्षमां—विमर्दस्य—युद्धव्यापारस्य, क्षमां—योग्याम्, युद्धव्यापारोपयोगिनीमित्यर्थः। भूमिं—भुवम्। अवतरावः,—गच्छावः।

(ल) इति—समाप्त्यव्ययम्। ("इति हेतुप्रकरणप्रकाशादिसमाप्तिषु" इत्यमरः) कुमारविक्रमो नाम—कुमारविक्रम इति नाम्ना प्रसिद्धः। [कुमारयोर्विक्रमो यत्रेति बहुव्रीहिः]। पञ्चमः,—पञ्चसंख्यापूरणीभूतः। अङ्कः,—नाटकीयपरिच्छेदः।

पञ्चमाङ्कस्य सङ्क्षेपः।

अथ नेपथ्ये, विपन्नानामस्माकं साहाय्यकार्थं द्रुतं कुमारश्चन्द्रकेतुः सुमन्त्रेण सारथिना नीयमाने प्रजविभिर्वाजिभिर्वाहितेन रथेन प्रधनस्थलं समुपैतीति समुद्घोषाद्रवात्तथा स्वावलम्बननाशात् सदर्पं विनेदुः।

कुमारचन्द्रकेतुः समरभूमौ वीरबालकस्यालौकिकं रणकौशलं विलोक्य परं मुमुदे, रक्तकुशाङ्कुरैरिवानुना शरनिकरेण निक्षिप्तानि कुमारकुन्तकपोलस्थलीषु स्फुटेषु परिवृत्य ज्वालाशाकुलानि शरसङ्घातान्यपि विलोक्य परं कौतुकमवाप च।

सुमन्त्रस्तु मौक्तिकशोभाशालिनमिमं बालं, कोऽयमनेन निशाचरनिकरहननो यत साक्षाद्रघुमणिरिवाहं मन्ये इत्याह।

चन्द्रकेतुस्तु तदा वीरशिशुमेकं पराभवितुं भूयसां शस्त्रजालकरालकराणां रथिनां सादिसन्निभद्विरदारोहिणाञ्च स्वसेनानां युगपत्प्रयासं समवलोक्य नितरामत्रपत। सुमन्त्रोऽपि, समवेता अपि एते सैनिका किमप्यस्य कर्तुं न शक्ताः, किं पुनर्विभज्य स्थिता ? इत्यमन्यत।

चन्द्रकेतुराह, आर्य! लक्ष्यतां लक्ष्यताम्, अयं वीरः ज्यानिर्घोषेण पलायितगिरिकुञ्जमस्थलीनानां कुञ्जराणामपि कर्णव्यथां जनयन् तुमुलं युध्यते, रणे निहतानां सटोपवीनानां कालकवलनात् भुक्तोद्गारैरिव मुण्डैः कबन्धैश्च रणभूमिं समाच्छादयति च।

तदाकर्ण्य सुमन्त्रः कथमहममुना वीरेण सह चन्द्रकेतुं योद्धुमुपदिशामि इत्येवं क्षणं चिन्तयन्नास्त, सपदि स्थिरीचकार च इक्ष्वाकुकुलाचारः खलु ईदृशः सङ्ग्रामः, तदधुना अमुना वीरेण सह सङ्ग्रामं विना नान्यं कमपि पन्थानं पश्यामीति।

तदा चन्द्रकेतुः रणात् प्रतिनिवृत्तानि स्वसैन्यानि शतशः धिक्कृतवान्, स्वयञ्च नितरां लज्जितो, विस्मयाविष्टश्च बभूव। सुमन्त्रस्तु तदभिमुखं रथं चानयत्, एवं स्थितौ ते पुनः परस्परमभिमुखौ इति चन्द्रकेतुरभ्यधात्।

विस्मृत इव चन्द्रकेतुः पप्रच्छ सुमन्त्रम्, आर्य्य! आरण्यकाः किं नामैवमस्त्राणि शिक्षन्ते ? इति। सुमन्त्रः नेत्युवाच। ततः चन्द्रकेतुः कुमारं सम्भाष्याह, भो वीर! अनिर्वाणवैरेण सह युद्धं किम् ? मया सह युध्यस्व, तेन तेजस्वी मान्यो भवति। सुमन्त्रस्तु तदा कुमारमाह, एवं भवतोऽवतारः तत्रासमाकुलं सैन्यं ससर्ज। अनेन परेषां पराक्रमः अवलोकनीयः। अनेनावतारेण रघुवंशीयाः इत्थं पराभवन्ति इति। अत्रान्तरे ताभ्यां एतदवलोकितं च प्रविश्य कुमारलवः, भो राजपुत्र! सम्प्रति वाक्कलहेन किं, अवलम्ब्यतां धनुः।

कदन विफलमेव, अहमेव ते वीरदर्पस्य परीक्षास्थलमिति। लवस्तु सहर्षसम्भ्रम प्रत्यावृत्य स्वगतमाह, अहो। दिवाकरकुलकुमारस्य सुमधुरापि वीरगाम्भीर्यपूर्णा वाक्प्रयोगचातुरी, तदेतान् परित्यज्येममेव वीर सम्भावयामीति। पुनरपि कलरव समजनि। लवस्तु पापैरेभि महीयोविघ्नकारिभि सैनिकै मम कदर्थित एवास्मीति सक्रोधनिर्वेदमुक्त्वा तदभिमुखमेव पर्यक्रामत्। चन्द्रकेतुस्तु तदा सुमन्त्रमाह, आर्य। द्रष्टव्यमेतदवलोकय, दर्पात् कौतुकाक्षेप वीर कार्मुकमुद्धृत्य परित परिक्रामन् मदीयसैन्यैरनुधावित सन् प्रतिकूलवायुना पर्याकुल इन्द्रधनु सुशोभित नवनीरद इव कीदृशी रम्या शोभां बिभर्तीति। तदाकर्ण्य सुमन्त्र कुमार एवैन वीर द्रष्टु जानाति, वयन्तु केवल विस्मयविवशा सहसा इत्याह।

अथ चन्द्रकेतु सामन्तान् सम्बुध्याह, भो भो राजान। वस्मभूतोऽसह्येया वर्षीयास यूय तुरगेषु द्विरदेषु रथेषु च समारूढा सन्त पादचारिणैकेन सम्मोत्तरीयभृता बालकेन सह सङ्ग्रामे बद्धपरिकरा सहसा॥ धिग युष्मानस्माश्चेति। तत चन्द्रकेतोरेवविध वचनमाकर्ण्य लव सक्षोभमाह, कि मामेषोऽनुकम्पते नामेति। तत क्षण विचिन्त्य स्वगतमाह, भवतु तावत्, तथा कालक्षय वारयितु जृम्भकास्त्रप्रयोगेण सैन्यान्येतानि संस्तम्भयामीति। अथासौ जृम्भकास्त्राणि निध्यातुमारभत, अकस्माच्च सैन्यसङ्घोप प्रशान्तोऽभूत्। समये चैतस्मिन् सुमन्त्र ससम्भ्रम कुमारमाह, वत्स। वीरपोतेनामुना जृम्भकास्त्रमभिप्रयुक्तमिति। चन्द्रकेतुस्तु, सत्यमेवैतत्, यत ममापि चक्षु वैद्युताग्निनाभिभूयते घोरेऽन्धतमसे निपतितमिव शक्तिविहीन क्षत क्षण विकार्यतामिति, सैन्यसमूहश्च चित्रलिखितारम्भ इव निस्पन्दमास्ते, नूनमविवीर्यं जृम्भकास्त्र जृम्भते एव, आश्चर्यमिद, पातालगर्भस्थितेषु निकुञ्जेषु प्रवर्तते तमोनिरव ज्ञानायनानैरपि पावकोत्तापविगलितपित्तलद्रवद्भास्वरज्योतिषि जृम्भकास्त्रे कल्पान्तकाले उद्दामोनपक्षाश्रत्यवनविच्छिन्ने पुञ्जीभूत जलदजाले विद्युत्पुञ्जप्रोद्दीपितकन्दरै विन्ध्यगिरिशिखरैरिव परिदृश्यमानै समन्तात् विमानतल समाच्छाद्यते इत्याह। कुत खलु जृम्भकास्त्रमधिगतवान् लव? इति सुमन्त्रे पृष्टे प्रत्याह चन्द्रकेतु, भगवत प्राचेतसादेवेति मन्यामहे इति। न ह्यथ महर्षि शिष्येभ्योऽस्त्रविद्यामुपदिशति, विशेषतस्तु जृम्भकास्त्राणि, यतश्चैतानि क्रमागत प्रादुर्भूत कौशिकं हि महर्षिमुपसङ्क्रम्य तत्सम्प्रदायपरम्परया रामभद्रमेव समधिगतानि इत्याह सुमन्त्र। अपरोऽपि महर्षय प्राचेतससदृशा तपस्तेजसा जृम्भकास्त्राणि लब्धु प्रभवन्तीति विभावयामीत्याह चन्द्रकेतु। अथ सुमन्त्र आह, वत्स। सावधानो भव, वीरश्चैष समागच्छतीति। तथालोकनमात्रमेव

कुमारावन्योऽन्यं प्रति स्नेहप्रदर्शनं कर्त्तुमारेभाते, कथं हि अनु दृष्टं हृदयं मे सपदि विगलितं भवति, कश्चिदविज्ञातः सम्बन्धः किमु एतस्मिन्नस्ति इत्यादिकं बहुधा समालोचयामासतुश्च। तदाकर्ण्य सुमन्त्र आह, जीवानामेष हि धर्म्मः, यत् कस्यचित् कुत्रचित् या प्रीतिरन्योऽन्यमनुरागभरात् सहसैव सञ्जायते, परस्पर-नयनपातसमकालमेव तस्याः सम्पद्यमानत्वात् तारामैत्रकः चक्षूरागो वा इति संज्ञया तामुपचरन्ति लोकाः, ईदृशं हि प्रेमाणमहेतुकमेवामनन्ति च। यो हि अहेतुकः आसक्तिविशेषः, तस्य कोऽपि निवर्त्तको न दृश्यते, यदसावुभयोरेवात्ममर्म्माणि स्यूत्वा किल तिष्ठतीति। अथ कुमारावपि परस्परमनुदध्यतुः, कथं हि सुचिक्कणराजपट्टसन्निभे एतस्मिन् शरीरे शरान् विमोचयामीति, क्षणं निध्याय च, वीराचारवशात् निदारुणस्य मे स्नेहप्रवृत्तिः कुतः? शस्त्रशिक्षाया वा किं फलं लभे? यद्यनेन सह न युध्ये, रणपराङ्मुखं मामसौ भयादेव विनिवृत्तं वा मंस्यते इति बहुधा विकल्पयामासतुश्च।

सुमन्त्रस्तु तदा एवमवलोक्य मनसि स्वगतमेवेत्थं बहुधा विललाप, हृदय! कथं विविधं पर्य्यालोचयसि? नासौ रघुमणितनयः, तस्य तु मूलं कारणं वैदेही दुर्दैववशादेवाऽस्माकं विनष्टा। छिन्नाया हि लतायाः किमु प्रसूनोत्पत्तिः सम्भवतीति। ततश्चन्द्रकेतुः सुमन्त्रमपृच्छत, आर्य्य! रथादधुनाऽवतरामीति। कस्य हेतोरिति तं सुमन्त्रः समाह। तदनु चन्द्रकेतुराह, वीरोऽयं पदातिर्भूत्वैव युध्यते, पादचारिणा पदातिना सहैव युध्येतेति धर्म्मशास्त्रविदः आमनन्ति, तेनैवाहमवतरितुमिच्छामीति। सुमन्त्रस्तु तदाकर्ण्य, कथमहमेवं धर्म्यं कर्म्म कर्त्तुं प्रतिषेधामि, कथं वाऽमुना वीरेण सह पादचारिणं कुमारं योद्धुमुपदिशामीति मनसा व्यचिन्तयत्। आर्य्य! धर्म्मार्थ-[illegible] गुरवोऽपि समाधानाय सततं भवन्तमेवापृच्छन्त तत् कथं भवा-न्निदानीं [illegible] चन्द्रकेतुः। तदाकर्ण्य सुमन्त्र आह, आयुष्मन्! [illegible] [illegible] एव हि [illegible], [illegible] चिरन्तन [illegible]। चन्द्रकेतुरब्रवीत्, [illegible] रघुवंशीयानां [illegible] [illegible]। सुमन्त्रस्तु तदा कुमारं [illegible] प्रति [illegible], [illegible]। कुमार [illegible] भवान् [illegible], [illegible] प्रतिज्ञा [illegible]। तदाकर्ण्य चन्द्रकेतुः [illegible], [illegible] प्रतिज्ञा [illegible], [illegible] [illegible]। [illegible]। तदाकर्ण्य सुमन्त्र [illegible] [illegible] भवन्ति।

लवस्तु तदा, कुमुदबान्धवे कुमुदिनीव मे हृष्टि कथं हि एतस्मिन् नितरामासज्जति ? कथं वा मदीयोऽयं नाद्य कलहकाम भवतीति विविधं विकल्पितवान् । चन्द्रकेतुः रथादवतीर्य सुमन्त्रं ससम्भ्रममाह, आर्य्य । त्वामहमभिवन्दे इति । सुमन्त्रस्तु भगवान् वराहरूपो ते श्रेयः विदधातु, भवद्गुरुः इव भवान् सर्व्वेषु विजयलक्ष्मीं लभतामित्याशिषो प्रददौ । रथस्थ एव भवानतीव शोभते, अतः अन्यादरप्रदर्शनमा कृतमिति लवेनोक्ते, तर्हि भवानितरपि रथमन्यमलङ्करोतु इति चन्द्रकेतुरभिदधे । तदा लवः सुमन्त्रमाह, आर्य्य । रथे राजपुत्र समारोहयेति । त्वमपि कुमारवचनमनुपालयेति सुमन्त्रोऽपि लवमभिहितवान् । स हि द्रव्यं यथेच्छमेवोपभुज्यते जनैरिति लेशा रथानामारोहणे नास्ति दोषः यद्यपि, तथापि वयं रथारोहणे सम्यगनभ्यस्ततया सपदि स्वीकर्त्तुमेतत् नाभिलषाम' । तद्वचनं श्रुत्वा सुमन्त्र आह, दर्पसौजन्ययो यथायथमभिधातु भवान् जानाति, भगवान् रघुनाथ त्वामेवंविधं पश्येद् यदि, तदा तस्य हृदयं नूनं द्रवीभूतं स्यादिति । तच्छ्रुत्वा लव आह, स हि राजर्षि अतीव सुजन श्रूयते, वयमपि यज्ञविघातका न भवाम, गुणवन्तं तं राजानं वयं समाद्रियामहे एव, परन्तु तुरङ्गरक्षिणां निखिलराजन्याक्षेपसूचिका सुदुःसहा प्रोद्धता वाचनाकर्ण्यैव हि विकृतिमधिगता इति । तदाकर्ण्य सविस्मयमाह चन्द्रकेतुः, गुरुजनानां प्रतापोत्कर्षमनुपश्यन्त्यपि भवन्तः किमु दुःखायमानमानसास्ता सहन्ता ? इति । लव सेऽन्यः अस्ति, नास्ति वेति तादृशप्रश्नस्य नायमवसर, परन्त्वेतत् पृच्छामि यत्, स हि राजर्षि तदीयाः प्रकृतयश्च अतीव दान्ता इति श्रूयते, तर्हि कथमेते मनुष्या राक्षसीं वाचमभिदधति ? यतो हि तादृशी वाक् सर्व्ववैराणां प्रसूतिः, अलक्ष्म्याश्च निदानम्, प्रियसत्या हि वाचं सर्व्वे एवाभिष्टुवन्ति, कीर्त्तिं चैषा जनयति, अलक्ष्मीञ्च हिनस्ति, तेन हि इमां कामदुघेति मनीषिणः आमनन्तीति लवोऽब्रवीत् । सुमन्त्रस्तु तदाकर्ण्याह, विशुद्धसंस्कारसम्पन्ना वाचनयमुदीरयतीति ।

अथ तत्र "किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष ?" इति प्रागुक्तस्य चन्द्रकेतोर्वचनस्य, अमर्षणा न हि व्यक्तिविशेषे पर्य्याप्ता इति कृत्वा प्रत्युत्तरमभिदधे । तच्छ्रुत्वा सुमन्त्र आह, भवान् दैवमैश्वाकं नाभिजानाति, तेन चेत्यं तन्मर्य्यादाविघातकरं वचनमभिदधाति, अश्वसैनिकान् प्रमथ्य तु भवान् स्वविक्रमं प्रदर्शितवान्, परन्तु जामदग्न्यदमने भगवति रामभद्रे इत्थमभिधातुं कदापि नार्हतीति । तदाकर्ण्य लव उद्धासमाह, असौ राजा जामदग्न्यदमन इति प्रशंसावाद न युक्ते सङ्कीर्त्तयितुं, इह द्विजानां वीर्य्यं वाचि एव स्थितं, न बाहौ, तत्र तु क्षत्रियाणा-

नव मिथ्यति, यद्यप्यसौ ब्राह्मण जामदग्न्य शस्त्रग्राही आसीत, तथाऽपि ब्राह्मणतया प्रकृत्या दान्तस्य तस्य दमने का हि भवता राम प्रगल्भता नासीति। तदाकर्ण्य चन्द्रकेतु मन्थर सुमन्त्रमाह, आर्य्य। किमवोत्तरप्रत्युत्तरेण? सोऽप्र भवति नव वीरावतार, येन भगवान् भार्गवोऽपि वीरत्वेन न गण्यते, ये च तातपादा सतभुवनायाभयदक्षिणा प्रददु, तेऽपि न ज्ञायन्ते एवानेनेति। एतदाकर्ण्य लव आह, रघुपते महिमान को हि नाम न जानाति? वृद्धाना तेषा चरितमविचार णीयमेव, परन्तु स्त्रिय ताडका निहत्य तेन सुमहत्त स्व यश प्रकटीकृतम्, अपिच खरेण सह समरे त्रीणि पदानि पराहत्यासौ युद्धकौशलमसौ व्यतानीत। वानरराजेन वालिना सह रणे तु सुतरामिवेति। तदाकर्ण्य चन्द्रकेतुराह, आ ॥ गुरुजनमर्य्यादा विनाशिन्। इति। लवस्तु तदा प्रत्युवाच, अरे। मय्येव कोपकषायितनेत्रो भव तासि। तत उभावेव कुमारौ क्रोधेन कोकनदसच्छायनयनौ समद्भूतारविन्दाय मानमुखौ च भूत्वा युयुत्सया युद्धानकूला भूमिमधिशिश्रियतुरिति।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन कुलपतिकल्प "वि, प" इत्युपनामक श्रीमज्जीवानन्दविद्यासागर भट्टाचार्य्यविरचितायां, तदात्मजाभ्या श्रीमदाशुतोषविद्याभूषण श्रीमन्नित्यबोधविद्यारत्नाभ्या परिवर्तित परिवर्द्धिताया सुखबोधिनीसमा- ख्यायाम् उत्तररामचरितव्याख्याया

पञ्चमोऽङ्क ॥ ५ ॥

अथ षष्ठोऽङ्कः ।

[ततः प्रविशति विमानेनोज्ज्वलेन विद्याधरमिथुनम्] । (क)

विद्याधर । अहो खलु अनयोर्विकर्त्तनकुलकुमारयोः अकाण्डकलहप्रचण्डयोः उद्योतितचात्त्रलक्ष्मीकयोः अद्भुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि ॥ । तथाहि प्रिये । पश्य पश्य । (ख)—

(क) दर्पणोक्तनाटकीयाङ्कलक्षणे "दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः" इत्यादिना युद्धस्य वर्जनीयमध्ये परिगणनात् तत् विष्कम्भकान्तर्वर्त्तितया वर्णयितुमुपक्रममाण आह, तत इति ।—उज्ज्वलेन—भास्वरेण, नानाऽलङ्कारपरिशोभिततया देदीप्यमानेनेत्यर्थः । विमानेन—व्योमयानेन । ("विमानं व्योमयाने च सार्वभौमगृहेऽपि च" इति मेदिनी । "विमानेनोज्ज्वलेन" इत्यत्र "विमानोज्ज्वलम्" इति "विमानेनोज्ज्वलम्" इति च पाठद्वयं दृश्यते) विद्याधरमिथुनं—देवयोनिविशेषदम्पती । [विद्याधरी च विद्याधरश्च इति विद्याधरौ "पुमान् स्त्रिया" (१।२।६७ पा०) इति स्त्रिया पुंसो द्वन्द्वे पुंलिङ्गैकशेषः] प्रविशति—आगच्छति, रङ्गस्थलमिति शेषः ।

(ख) कुमारयोरलौकिकसमरकौशलसन्दर्शनविस्मितो विद्याधरः स्वीयां प्रेयसीं तत् सन्दर्शयन्नाह, अहो इति ।—अहो—इति विस्मयव्यञ्जकमव्ययम् । खलु—वाक्यानुप्रायाम् । अकाण्डकलहप्रचण्डयोः,—अकाण्डे—अनवसरे, अकस्मादित्यर्थः, यः कलहः,—विरोधः, समर इति यावत्, तेन प्रचण्डयोः,—उग्रयोः, आकस्मिकविवादभीषणयोरित्यर्थः । (अत्र "अकाण्डप्रचण्डकलहयोः" इति विद्यासागरधृतपाठे—अकाण्डः,—आकस्मिकः, प्रचण्डः,—भीषणः, कलहः ययोः तादृशयोरित्यर्थः) उद्योतितचात्त्रलक्ष्मीकयोः,—उद्योतिता—प्रकटीकृता उद्दीपिता वा, क्षात्त्रलक्ष्मीः,—दक्षिणश्रीः, [क्षत्राणामियमिति क्षात्त्री, सा चासौ लक्ष्मीरिति क्षात्त्रलक्ष्मीः, "पुंवत् कर्मधारयजातीयदेशीयेषु" (६।३।४२ पा०) इति पुंवद्भावः] याभ्यां तयोः, प्रकाशितराजन्योचितशौर्य्ययोरित्यर्थः । ["नद्यृतश्च" (५।४।१५३ पा०) इति समासान्तः कप् । अत्र 'उद्योतितक्षात्त्रलक्ष्मीकाणि" इति पाठे—विक्रान्त

झणज्झणितकङ्कणक्वणितकिङ्किणीकं धनु-
र्ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम्।
वितत्य किरतोः शरानविरतस्फुरच्चूडयो-
र्विचित्रमभिवर्द्धते भुवनभीममायोधनम् ॥ १ ॥

चरितानीत्यस्य विशेषणतया व्याख्येयम्] अनयोः,—पुरतः परिदृश्यमानयो-रित्यर्थः। विकर्त्तनकुलकुमारयोः,—विकर्त्तनस्य—सूर्यस्य, ("विकर्त्तनार्कमार्तण्डमिहिरारुणपूषणः।" इति सूर्यपर्याये अमरः) यत् कुलम्—अन्वयः, तस्य कुमारौ—तत्सम्भूतौ बालकावित्यर्थः, तयोः लवचन्द्रकेत्वोरित्यर्थः। अद्भुतोद्भ्रान्तदेवासुराणि—अद्भुतेन—आश्चर्येण, विस्मयरसेनेत्यर्थः, उद्भ्रान्ताः,—विमूढाः, न्यूनाधिकत्वनिर्णयाक्षमा इत्यर्थः, देवासुराः,—सुरदानवा यैः तानि, विस्मयविह्वलीकृतसुरासुराणीति यावत्। विक्रान्तचरितानि—विक्रमविलसितानि, विक्रमसूचकानि समरकर्म्माणि वा, अलौकिकविहारिणो देवदानवा अपि प्रकटितालौकिकशस्त्रास्त्रभुजवीर्ययो-रनयोः समरकौशलमालोक्य बलवद्विस्मयपारवश्यमधिगच्छन्तीति [illegible] दृश्यताम्। तथाहि—तदेव विस्मयकरं समरव्यापारमवगच्छेत्यर्थः। [पश्य पश्येति विस्मये द्विर्वचनम्]।

विस्तरविक्रमेण युद्धमारभमाणयोः कुमारयोः समरकौशलस्य विस्मयकरत्वमेव प्रदर्शयन्नाह, झणदिति।—झणज्झणितानि झणज्झणम् इत्येवं शब्दं कुर्वन्ति, [झणज्झणं शब्दं जातं येषामिति विग्रहे झणज्झणशब्दात् "तदस्य सञ्जातं तारकादिभ्य इतच्" (५।२।३६ पा०) इति इतच्] यानि कङ्कणानि करभूषणविशेषा-स्तैरेव क्वणिता शब्दायमाना, किङ्किणी क्षुद्रघण्टिका यत्र तत्, ["शेषाद्" (५।४।१५४ पा०) इति समासान्तः कप्प्रत्ययः। "[illegible]" इति [illegible] "क्षुद्रघण्टिका" इति चामरः] यद्वा—झणज्झणितानि यानि कङ्कणानि, तैरिव क्वणित [illegible] ता किङ्किणी [illegible], [illegible] [illegible] इति [illegible] ("झणज्झ [illegible]—" इत्यत्र "झणज्झणितकङ्कण—" इति पाठे—झणज्झणित [illegible] [illegible], [illegible] [illegible] तत्र [illegible] तादृश [illegible]) । [illegible] ("[illegible]" (५।४।८ पा०) इति [illegible] [illegible] [illegible], [illegible]

विजृम्भितञ्च दिव्यस्य मङ्गलाय द्वयोरपि।
स्तनयित्नोरिवाऽऽसन्द्र दुन्दुभेर्दुन्दुमायितम् ॥ २ ॥

कोटिभ्या, धनुष प्रान्तभागाभ्यामित्यर्थ, ("कोटिरस्याटनी" इत्यमर) कृत सम्पादित, कराल भीषण, अतिमहानित्यर्थ, कोलाहल शब्दविशेष यस्य तादृशम्, अत एव ध्वनत शब्दायमान, गुरु अन्यदुर्वहं, [धनुरित्यस्य विशेषणम्] अथवा—ध्वनता टङ्कुर्वता, गुरुणा दृढेन, गुणेन शिञ्जिन्या, अटनीभ्या कोटिभ्याञ्च कृत जनित, कराल विकट, कोलाहल कलकल यस्य तत्, मौर्व्याकर्षणोत्थविकटटङ्कारमुखरितप्रान्तभागद्वयमित्यर्थ, यद्वा,—ध्वनन् आकर्षणेन टङ्कारशब्द कुर्वन्, गुरु कठिन, गुणो मौर्वी ययो एवम्भूते, ये अटन्यौ अग्रभागौ, ताभ्या कृत जनित, करालो भीषण, कोलाहलो गभीरशब्दो येन तादृशं, धनुः शरासन, वितत्य विस्फार्य, प्रसार्येत्यर्थ, [विपूर्वात् तनोते ल्यपि "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति (६।४।३७ पा०) इत्यनुनासिकलोपे "ह्रस्वस्य पिति कृति तुक्" (६।१।७१ पा०) इति तुका सिद्धम्] शरान् बाणान्, किरतो निरन्तर प्रक्षिपतो, वर्षतो इत्यर्थ, अविरतम् अविश्रान्त, निरन्तर यथा स्यात् तथेत्यर्थ, स्फुरन्त्य इतस्तत शरीरसञ्चालनात् प्रचलन्त्य, चूडाशिखा ययो तयोस्तयो, धनुरास्फालनकृतशरीरसञ्चालनात् निरन्तरप्रचलच्छिखयो रित्यर्थ, एतयो कुमारयोरिति शेष, भुवनाना लोकाना, जगत्त्रयस्येत्यर्थ, भीमदानक, त्रिभुवनभीतिविधायकमित्यर्थ, विचित्र विस्मयावहम्, अभिनवकौशलवत्त्वा अत्याश्चर्यजनकमिति यावत्, आयोधन युद्ध, [आयुध्यते अस्मिन्निति आयुधेरधिकरणे ल्युट्] अभिवर्तते प्रवर्तति, उत्तरोत्तरमुपचित भवतीत्यर्थ, ("अभिवर्तते" इत्यत्र "अभिवर्तन" इति पाठान्तरे सुगमोऽर्थ) समरमुनावर्ततौपावितौ विकर्षणकुशलनन्दनौ कन्य महदपि शरासनम् अनायासेनैव आस्फालयन् अत्यद्भुतरणकौशलेन त्रिलोकीलोक विस्मापयत इति भाव। [अत्र प्रथमपादे कङ्कणकलितत्वात् समासे ओदस्यात्वादिनो लोपात् लुप्तोपमा, तथा अनयो कुमारयो कविनानुभवैश्चरुटाभ्रदपने यथावद्वर्णनात् स्वभावोक्तिरलङ्कार, एतयोश्च परस्परनिरपेक्षत्वात् संसृष्टि]। पृथ्वी वृत्त, तल्लक्षण यथा,—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरु" इति ॥ १ ॥

कुमारयोरनयोरलौकिकरणकौशलनालोकयता देवानामपि दुन्दुभिध्वाने नाहादिष्टर्नगरा, त्रिदशैनेति।—द्वयोरपि उभयोरपि, लवचन्द्रकेत्वोरित्यर्थ,

तत् प्रवर्त्यताम् अनयोः शौरयोः अनवरतम् अविरल-ललितविकचकनककमलकमनीयसंहति अमरतरुतरुणमणि-मुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः। (ग)

मङ्गलाय कल्याणाय, तनरोमाञ्चवर्द्धनायेत्यर्थः, स्तनयित्नोः स्तनतो जलदस्येत्यर्थः, [स्तनयतीति विग्रहे स्तनयतेः कर्त्तरि इत्नुः] इव, आमन्द्रं निरतिशयगुरुगम्भीरमित्यर्थः, ("मन्द्रस्तु गम्भीरे" इत्यमरः) दिव्यस्य स्वर्गीयस्य, [दिवि भव इति विग्रहे दिव्शब्दात् "तत्र भवः" (४।३।५३ पा०) इति यता दिव्यमिति] दुन्दुभेः भेर्य्याः, तन्नामवाद्यविशेषस्येत्यर्थः, ("भेरी स्त्री दुन्दुभिः पुमान्" इत्यमरः। दुम् दुम् इति शब्देन भाति इति दुन्दुभिरित्यमरव्याख्याने महेश्वरः) दुन्दुमायितं दुन्दुमित्याकारक्वणितं, [दुन्दुमायितमिति दुमित्यव्यक्तानुकरणशब्दात् "अव्यक्तानुकरणाद्व्यजवरार्द्धादनितौ डाच्" (५।४।५७ पा०) इति डाच्, ततः "डाचि विवक्षिते द्वे बहुलम्" (वा०) इति द्वित्वे दुन्दुमा इत्यस्मात् "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति क्यषि दुन्दुमाय इति नामधातोर्भावे सिद्धम्] विजृम्भितं च सर्वासु दिक्षु व्याप्तं चेत्यर्थः, [चकारः समुच्चयार्थः, पूर्वश्लोकस्थे "अभिवर्त्तत" इति क्रियापदेनैव सम्बन्धार्थ इति बोध्यम्] अतो निरन्तरकणितरणनैः प्राणानालोक्य परितुष्यद्भिर्दिविषद्भिरिति ज्ञेयं, अत्र गम्भीरभेरीनिनादः कुमारयोरनयोः समरानुरागं सम्यक् विवर्द्धयतीति मन्तव्यम्। ["विजृम्भितश्च दिव्यस्य" इत्यत्र "विजृम्भितं च दिव्यानाम्" इति पाठान्तरं क्वचिद्दृश्यते, तत्रायमर्थः,—द्वयोरपि कुमारयोः दिव्यानां स्वर्गीयानां, विजृम्भितं [illegible], परस्परप्रहितेनास्त्रेण युद्धेन परिव्याप्तमित्यर्थः। एवं द्वयोरपि मङ्गलाय स्तनयित्नोरिव आमन्द्रं दुन्दुभेः दुन्दुमायितं विजृम्भितम् [illegible]। उक्तोऽत्र पाठः [illegible]]। पथ्यावक्त्रं वृत्तम्॥२॥

(ग) तत्—तस्मात्, भेरीवादनादिना अनयोरपि [illegible]। [illegible]

[illegible]

विद्याधरी। ता किं त्ति उण अआण्डविप्फुरिदतडिच्छडाकडारं विअ अवरं झत्ति संवुत्तं ? ।*(घ)

* तत् किमिति पुनरकाण्डविस्फुरिततडिच्छटाकडारमिव अम्बरं झटिति संवृत्तम् ?।

नयनललकननीयनन्ति " इति पाठे,—अविरल—निरन्तरं यथा तथा, ललितानां—चलितानां पतितानामिति यावत्, विकचकनकनयकनलानां—प्रस्फुटितस्वर्णमयपद्मानां, कमनीया—मनोहरा, नन्दति—विलसति यस्मिन् स तथोक्त इत्यर्थः)

अमरेत्यादि।—अमरतरूणां—कल्पपारिजातप्रभृतिदेवपादपानां, तरुणानि—नवोद्गतानि नवसमुत्पन्नानीति यावत् यानि नवपत्राणि—स्वामिकानि, मुकुलानि—विकाशोन्मुखकुड्मलानि, तेषां निकरस्य—सन्तते, मकरन्दैः,—मधुभिः, प्राणतर्पणैरिति भावः, सुन्दरः,—मनोरमः, सुरभिरिति यावत्। पुष्पनिपातः,—कुसुमवृष्टिरित्यर्थः। प्रवर्त्तताम्—समारभ्यताम्, आवाभ्यामिति शेषः। [प्रकृतेर्णिजन्तात् कर्मणि लोट्। अत्र "प्रवर्त्ततान्" इति पाठे—भवतु इत्यर्थः, पुष्पनिपात इति तु अस्मिन् पक्षे कर्त्तृपदं बोध्यम्]। सर्वे हि व्यवहारानुरूपमेव शोभते, न तु वहिरङ्गमिति इत्यस्याः कस्याचिद् उत्तरवचनप्रतिवचनात्मकवाक्ये सुदर्शनसमागमनिबन्धस्य अभिनये अत्यन्तप्रतिकूलतया कविदोषावहत्वेनैव प्रतिभातीति बोध्यम्।

(घ) इह वक्तृनामोल्लेखावसरे विद्येति नामैकदेशग्रहणे स्त्रीपुरुषयोर्विशेषदर्शी न स्यादिति स्पष्टतया विद्याधरीति उक्तम्। तत्किमिति—प्रश्नाद्यकमेवमव्ययम्। झटिति—सहसा। अम्बरम्—आकाशं, गगनतलमिति यावत्। अकाण्डेति।—अकाण्डे—अनवसरे, अकस्मादित्यर्थः, विस्फुरितानां—प्रस्फुरितानां, विलसितानामित्यर्थः, तडितां—विद्युतां, छटाभिः,—दीप्तिभिः, तडित्परम्परया इत्यर्थः, कडारः—पिङ्गलवर्णविशिष्टमिव। (अत्र "अआण्डतण्डविट्टुद्दण्डतरलिदतडिच्छडाकडारं" इति पाठान्तरम्—'अकाण्डताण्डवितोद्दण्डतरलिततडिच्छटाकडारम्" इति संस्कृतानुवादे अर्थः, तदाहि—अकाण्डे ताण्डविता—अकस्मात् विस्फुरिता, तथा उद्दण्डम्—उद्धतं यथा तथा, तरलिता—तरङ्गायिता, या तडिच्छटा तया कडारं—पिङ्गमिति। अस्मिन् पाठे तु उत्प्रेक्षाद्योतकेवशब्दो नास्तीति बोध्यम्)। संवृत्त—सञ्जातम्। तत्,—तत—इति प्रश्नार्थे, किमिति—इति प्रश्नार्थे अव्ययम्, तथाच, तत्—तावत्त्वत्कृतिमिदं संवृत्तम्, अम्बरं किमिति—पुनः, अकाण्डविस्फुरिततडिच्छटाकडारमिव संवृत्तमित्यन्वयः।

विद्याधर। तत्किन्नु खलु अद्य। (ङ)—

त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः।
पुटभेदो ललाटस्थनीललोहितचक्षुषः॥ ॥ २ ॥

(ङ) अथवा अकस्मात् गगनपिशङ्गताकारणं पृष्टः विद्याधरोऽपि यथार्थं विनिश्चेतुमशक्नुवन् वितर्कयति तदिति।—तत्—इति प्रसिद्धार्थद्योतकम् अव्ययम्। किन्नु—इति वितर्के। खलु—वाक्यालङ्कारे। अद्य—अस्मिन्नहनि, इदानीमित्यर्थः। एतेषाञ्च पदानां वक्ष्यमाणश्लोकेनान्वयो बोध्यः।

आकस्मिकगगनपिशङ्गतादर्शनेन विस्मितः विद्याधरः तदिदानीं वितर्कयन्नाह, त्वाष्ट्रेति।—त्वाष्ट्रस्य विश्वकर्मसम्बन्धिनः इत्यर्थः, [त्वक्षतीति त्वष्टा, "त्वक्षू तनूकरणे" इति धातोः कर्त्तरि तृच्, त्वष्टुरिदमिति त्वाष्ट्रं त्वष्टृशब्दात् "तस्येदम्" (४।३।१२० पा०) इत्यण्] यन्त्रस्य शाणभेदस्येत्यर्थः, असिमार्जनपदार्थविशेषस्येति यावत्, भ्रमिभिः आवर्तनैः भ्रान्तस्य आवर्तितस्य, मुहुर्घूर्णितस्येत्यर्थः, मार्तण्डस्य सूर्यस्य, यत् ज्योतिः पुनःपुनरावर्तनात् तडिच्छटावत् परितः प्रसृतं तेज इत्यर्थः, तदिव उज्ज्वलः दीप्यमानः, ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमानवाचकज्योतिःपदेन सामान्यधर्मवाचकोज्ज्वलशब्दस्य समासः। इह विग्रहवाक्ये उपमानपदस्य तत्सदृशे लाक्षणिकत्वज्ञापनार्थम् इवादिशब्दः प्रयुज्यते] ललाटस्थस्य भालगतस्य, [ललाटे तिष्ठति यदिति ललाटोपपदात्तिष्ठतेः "सुपि स्थः" (३।२।४ पा०) इति कः] नीललोहितस्य महादेवस्य, [नीलश्चासौ लोहितश्चेति विग्रहे नीललोहितः इति विशेषणसमासः। कण्ठावच्छेदेन नीलतया, जटावच्छेदेन लोहिततया च अस्य नीललोहितेति सञ्ज्ञा। स्कन्दपुराणे तु अस्य तन्नामधेयत्वे प्रकारान्तरमुक्तं, यथा,—"नील [illegible] लोहित [illegible]। नीललोहित इत्येव ततोऽहं परिकीर्तितः ॥" इति] यत् चक्षुः [illegible] तस्य पुटभेदः [illegible], किन्नु अद्य जातः? इति शेषः। [illegible]

[illegible]

[विचिन्त्य]। (च) आ ज्ञातं, वत्सेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निच्छटासम्पातः। सम्प्रति हि, (छ)—

ब्रह्मणो वाक्य यदि ते देव । रोचते ॥ रूप निवर्त्तयाम्येतत् तव कान्ते दिवस्पते ।" ॥ इति विश्वकर्म्मणि उक्ते मार्कण्डेय उवाच,—"यतो हि भास्वतो रूप प्रागासीत् परिमण्डलम्। ततस्तथेति त प्राह त्वष्टार भगवान् रवि ॥ विश्वकर्म्मा त्वनुज्ञात शाकद्वीपे विवस्वता । भ्रमिमारोप्य तत्तेज शातनायोपचक्रमे ॥" इत्यादि। सूर्य्यस्य मार्त्तण्डनाम कारणमुक्त मार्कण्डेयपुराणे—"ततस्ता कश्यप प्राह किञ्चित्कोपप्लुताधरम्। किं मारयसि गर्भाण्डमिति नित्योपवासिनी ? ॥ सा च त प्राह गर्भाण्डमेतत् पश्यसि कोपन ।। न मारित विपक्षाणा मृत्यवे तद्भविष्यति ॥ •अथान्तरीक्षादाभाष्य कश्यप मुनिसत्तमम्। सतोयमेघगम्भीरवाग्वाचाशरीरिणी ॥ मारित ते यत प्रोक्तमेतदण्ड त्वया मुने ।। तस्मान्मुने। सुतस्तेऽय मार्त्तण्डाख्यो भविष्यति ॥" इति। (अत्र प्रथमार्द्धे "ललाटयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलम्" इति पाठे,—एतत् उज्ज्वल ललाटयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योति किम् ? उत ललाटस्थनीललोहितचक्षुष पुटभेदो नु ? इति पृथग्वाक्यद्वयरूपेण अन्वय कार्य्य)। [इह प्रकृतस्य दिव्यास्त्रतेजस नीललोहिततृतीयनेत्रपुटभेदसम्भवत्वेन स्वशयात् शुद्ध सन्देहोऽलङ्कार, स च पूर्वार्द्धगतया लुप्तोपमया सङ्कीर्ण]। पथ्यावक्त्र वृत्तम् ॥ २ ॥

(च) विचिन्त्य—विमृश्य, सप्रणिधानमवधार्य्येत्यर्थ, आहेति शेष ।

(छ) आम्—इति निश्चयार्थकमव्ययम्। ("आमेवम्" इत्यमर । "द्वे निश्चये" इति तट्टीकाया महेश्वर । "आ ज्ञानविनिश्चये" इति गोपालितश्च) ज्ञात—बुद्ध, निर्णीतमित्यर्थ , यथाऽवस्थित वस्त्विति शेष , किमेतत् सम्भूत, तत् मया सम्यक् अवबुध्यमिति भाव । तदेव दर्शयति, वत्सेनेति।—वत्सेन—पुत्रकेण, अतीव स्नेहास्पदेनेत्यर्थ, (वत्स पुत्रादिवर्षयो । तर्णके नोरसि क्लीवम्" इति मेदिनी) चन्द्रकेतुना—लक्ष्मणतनयेन। प्रयुक्त—विसृष्ट, विमुक्तमित्यर्थ । आग्नेयम—अग्निदेवताकम्, ["आग्नेकलिभ्या ढक्च" (वा०) इति ढक्)। समन्तादिसारिवह्निशिखमित्यर्थ । अस्त्रम्—आयुधम्। यस्य—अस्त्रस्य। अय—परिदृश्यमान इत्यर्थ । अग्नीति।—अग्नीनाम्—अनलाना, छटाना—प्रभाणा, सम्पात,—उद्गम, वह्निप्रभाप्रसर इत्यर्थ, परित परिदृश्यत इति शेष । हि—यत, यत एवेत्यर्थ.। सम्प्रति—इदानीं, वक्ष्यमाणश्लोकेनास्यान्वय ।

अवदग्धकर्बुरितकेतुचामरै-
रपयातमेव हि विमानमण्डलैः ।
दधति ध्वजांशुकपटाञ्चलेष्विमाः
त्वगाकुङ्कुमच्छुरणविभ्रम शिखा ॥ ४ ॥

युद्धे वीरेण चन्द्रकेतुना प्रयुक्तानामाग्नेयास्त्राणां विलास एवायमिति विनिश्चिन्वन् तत्प्रयुक्तां विभीषिकां तेषां विशेषतो विस्मयप्रकारमाह, अवदग्धेति ।—अवदग्धा प्रायेण प्लुष्टा, अस्त्रानलशिखासंयोगात् प्राप्तदाहा इत्यर्थः, अत एव कर्बुरिता शबलिता, सञ्जातचित्रवर्णा इत्यर्थः अग्निप्रभया रक्तत्वात् धूमेन कृष्णत्वात् स्वभावतः श्वेतत्वाच्चास्य चित्रवर्णत्वं ज्ञेयम्, [कर्बुरा एषां सञ्जाता इत्यर्थे "तदस्य सञ्जातं तारकादिभ्य इतच्" (५।२।३६ पा०) इति इतच्प्रत्ययः] यद्वा,—कर्बुराः कृता इत्यर्थे ["तत्करोति तदाचष्टे" (ग०) इति णिचि कर्मणि क्तः] केतवः ध्वजाः, चामराणि च येषां ते, अस्त्रानलशिखासंयोगात् प्रायशः दग्धीभूततया विचित्रध्वजचामरैरपि [illegible] विमानमण्डलैः व्योमयाननिकरैः, हि इति सम्भ्रमार्थकमव्ययम्, तथाच, ससम्भ्रमं यथा स्यात्तथेत्यर्थः, ("हि पादपूरणे हेतौ विशेषेऽप्यवधारणे । प्रश्ने हेत्वपदेशे च सम्भ्रमासूययोरपि ॥" इति मेदिनी) अपयातमिव पलायितमेव, [अपपूर्वकात् यातेः "नपुंसके भावे क्तः" (३।३।११४ पा०) इति भावे क्तः] मनुष्यदेवात्मकानां देवानां विमानानि अग्नेर्भयात् दूरं गतानीति भावः, ध्वजानां केतुदण्डानामित्यर्थः, [illegible] इमाः शिखाः [illegible] "वह्निज्वाली [illegible]" इति [illegible]) [illegible] पटाञ्चलेषु [illegible], ('वस्त्राञ्चलो [illegible]' [illegible]) [illegible] ध्वजदण्डानामिति [illegible] । ([illegible]

[illegible]

आश्चर्य्यम्॥ प्रवृत्त एवायम् उच्चण्डवज्रखण्डावस्फोटपटुः उत्सर्पिस्फुलिङ्गगुरुः उत्काललतुमुललेलिहानज्वालासम्भारभैरवः भगवान् उषर्बुधः। प्रचण्डश्चास्य सर्वतः सन्तापः, तत् प्रियामङ्गेनाच्छाद्य दूरमपसरामि। (ज) [तथा करोति]।

विभान्ति इति भावः। [अत्र एकस्य कुसुमस्य विभ्रमस्य अपराभिः ध्वजपटसदृक्षशिखाभिः धारणं निरतिशयमसम्भवदपि कुसुमसदृशविभ्रमधारणेन सामञ्जस्यादसम्भवद्वस्तुसम्बन्धरूपो निदर्शनाऽलङ्कारः, अपि च पलायनपराणां प्रायश उदग्रत्वेन सामान्यतः दाहसम्बन्धरहितानामपि केतुचामराणां साकल्येन दाहसम्बन्धकथनात् जायमानेन असम्बन्धे सम्बन्धरूपातिशयोक्त्यलङ्कारेणासौ सङ्कीर्य्यते। इह हिशब्दस्य समुच्चयार्थे प्रयुज्यमानतया पलायने त्वराऽतिशयद्योतनात् न कैश्चिदाशङ्कितस्य निरर्थकत्वदूषणस्यावकाशः]। मञ्जुभाषिणी वृत्तम्, "सजसा जगौ च यदि मञ्जुभाषिणी" इति लक्षणात्॥ ४॥

(ज) आश्चर्य्यम्॥—अतीव विस्मयकरमेतदित्यर्थः। उच्चण्डेति।—उच्चण्डानाम्—अतिभीषणानाम्, अत्युज्ज्वलानां वा, वज्रखण्डानाम्—अशनिशकलानां, हीरकच्छदानां वा, यः अवस्फोटः,—आविर्भावः, विदारणं वा, तद्वत् पटुः,—अमन्दः, प्रबल इत्यर्थः, तीक्ष्णो वा, अशनिसम्पातवदतीव भयानकः, हीरकखण्डादपि वा अधिकद्युतिमानिति भावः। ("दक्षामन्दागदेषु तु। पटुः" इत्यमरः। "पटुस्तीक्ष्णे स्फुटे दक्षे निष्ठुरे निर्दयेऽपि च।" इति रुद्रः) उत्सर्पिभिः,—उद्गच्छद्भिः, समन्तात् विसर्पद्भिरित्यर्थः, स्फुलिङ्गैः,—वह्निकणैः, गुरुः,—महान्, स्वयं लघुरपि सर्वतो-विसारिवह्निकणैः महीयस्तया प्रतीयमान इत्यर्थः। उत्तालेन—अत्युन्नतेन, तुमुलेन—अतिसङ्कुलेन, सर्वत्र व्याप्नुवतेत्यर्थः, लेलिहानेन—जगत् ग्रसितुमुद्यता, समन्तात् प्रसरतेत्यर्थः, [लिहेः आदादिकस्य यङि शानचि पृषोदरादित्वात् यङ्लोपे रूपम्] ज्वालानां—शिखानां, सम्भारेण—समूहेन, भैरवः,—भीषणः, सर्वतोव्याप्तैरतीव भयावहैः जगल्लेहनलोलुपैः जिह्वाकल्पशिखासन्तानैः निरतिशयभीषणविग्रह इत्यर्थः। भगवान्—षडैश्वर्य्यशाली। उषर्बुधः,—अग्निः, ("शोचिष्केश उषर्बुधः" इत्यग्निपर्याये अमरः) उषसि—सन्ध्यायाम्, ("उषः प्रभाते सन्ध्यायाम्" इति विश्वः) बुध्यते—प्रकाशते, यतः एतस्मिन् हि अग्निमुपासि प्रादुष्कुर्वन्ति, इति व्युत्पत्त्या, [उष उपपदात् बुध्यतेः कः, "इगुपध—" (३।१।१३५ पा०) इति कर्त्तरि कः, "अहरादीनां पत्यादिषु वा रेफः" (वा०) इति रेफश्च] अस्य—अग्नेः। सर्वतः,—

विद्याधरी। दिट्ठिआ एदेण विमलमोत्तिअफलसीदलसिणिद्धमसिणमोआणमंसलेण णाहदेहप्फंसेण आणंदमउलिदघुम्मन्तलोअणाए मे अंदरिदो ज्जेव संदावो। * (झ)

विद्याधरः। अयि! किमत्र मया कृतम्? (ञ) अथवा—

---

* दिष्ट्या एतेन विमलमौक्तिकफलशीतलस्निग्धमसृणसोपानमांसलेन नाथदेहस्पर्शेन आनन्दमन्दमुकुलितघूर्णल्लोचनाया मे अन्तरित एव सन्तापः।

समन्तात्। प्रचण्ड,—भीषण, सुदुःसह इत्यर्थः। सन्ताप,—दाहकारक उष्मराशिः, प्रसरतीति शेषः। तत्—तस्मात्, दाहकारकत्वादित्यर्थः, दग्धीभवन् मरामीति भावः। प्रिया—पत्नीं विद्याधरीम्। अङ्गेन—स्वदेहेन। आच्छाद्य—आवृत्य, गोपायित्वेति यावत्। दूरं—विप्रकृष्टप्रदेशं, सन्तापविरहितं स्थानमिति यावत्। अपसरामि—यामि, यथाऽयं प्रबलः तापः प्रियायाः कोमलं गात्रं स्प्रष्टुं न शक्नोति तथा करोमि इति भावः, तूर्णं पलाय्य स्थानान्तरं यास्यामीत्याशयः।

(झ) दिष्ट्येति।—[मौक्तिकं—मुक्ता एवेत्यर्थे स्वार्थे ठक्, तच्च फलमिवेति उपमितसमासः] विमलं—विशुद्धं, यत् मौक्तिकफलं—मुक्ताफलं तद्वत् शीतलः,—शैत्यजनकः स्निग्धः,—स्नेहपूर्णः, सुमसृण इत्यर्थः, मसृणः,—श्लक्ष्णः, निर्मल इत्यर्थः, सोपानमांसलः—सोपानम्—आरोहणसाधनं, तद्वत् मांसलः,—बलवान्, दृढ इत्यर्थः, ("बलवान् मांसलोंऽसलः" इत्यमरः) प्रसारितसमसोपानवद्दृढ इत्यर्थः, तेन, तद्वदुन्नतमानेनेति भावः। ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमानसमासः] नाथस्य—प्रियतमस्य, देहस्य—शरीरस्य, स्पर्शेन—सम्पर्कविशेषेणेति यावत्। आनन्देन—हर्षेण, मन्दम्—ईषत् यथा स्यात्तथा मुकुलिते—मुद्रिते घूर्णती—परिभ्राम्यन्ती, समन्तात् प्रवर्तिते इत्यर्थः, लोचने—नयने यस्याः तथाविधायाः, मम विद्याधर्याः। [illegible] इत्यर्थः, सन्तापः,—आतपजः खेद इत्यर्थः, अन्तरितः,—दूरीकृतः।

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ ५ ॥

विद्याधरी। कहं अविरलविलोलघुम्मन्तविज्जुल्लदाविलासमण्डिदेहिं मत्तमोरकण्ठसामलेहिं ओत्थरीअदि णहत्थलं जलहरेहिं ? । ७ (ट)

विद्याधरः। हन्त! हन्त! कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयम्। कथमविरलप्रवृत्तवारिधारासहस्रसम्पातैः प्रशान्तं पावकास्त्रम् ॥ (ठ)

---

७ कथमविरलविलोलघूर्णद्विद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैराच्छाद्यते नभस्तलं जलधरैः ?

अकिञ्चिदिति।—द्वितीयेऽङ्के १६३ पृष्ठायां श्लोकोऽयं व्याख्यातः ॥ ५ ॥

(ट) अविरलेति।—अविरलं—सततं, विलोलानां—चञ्चलानां, घूर्णन्तीनां—कुत्रचित् स्थैर्यमलभमानानां, विद्युल्लतानां—तडिद्रेखाणां, विलासेन—विकासेन, मण्डितैः,—भूषितैः, सततं स्फुरितैश्चपलैः विद्युद्दामभिरुपशोभितैरित्यर्थः। मत्तानां—मदोन्मादितानां, ग्रीष्मान्तेऽसावित्यर्थः, मयूराणां—बर्हिणां, कण्ठा इव—ग्रीवाभागा इव, श्यामलाः,—मेचकाः, नीलवर्णा इत्यर्थः, तैः। जलधरैः,—मेघपटलैः, विद्युद्विकाशयुक्तनीलनिविडवारिदसमूहैरिति समुदितार्थः। नभस्तलं—गगनम्। आस्तीर्यते—आच्छाद्यते। कथं हि अकाले समुदयमानाः विद्युद्दामभिर्दीप्यमानाः नीरदा विराजन्तीति समुदितवाक्यार्थः।

(ठ) हन्त—हर्षाद्भुतसूचकम्, [आनन्दाऽतिशयद्योतनाय द्विरावृत्तम्]। कुमारेति।—कुमारेण—बालेन, लवेन, प्रयुक्तस्य—मुक्तस्य, चन्द्रकेतुप्रयुक्तस्य आग्नेयास्त्रस्य शमनायेति भावः, वारुणास्त्रस्य—वरुणदेवताकस्य आयुधविशेषस्य प्रभावः,—सामर्थ्यं, प्रसर इत्यर्थः, अयं हि नवजलधरपटलप्रतीकाशानां जलवाहानां विकाशः परिलक्ष्यते इति भावः। अविरलेति।—अविरलम्—अनारतं, प्रवृत्तानाम्—उत्पन्नानामित्यर्थः, वारिधारासहस्राणां—सहस्रातु समूहानां वर्षप्रवाहाणां, सम्पातैः—प्रपतनैः, मोक्षणैरित्यर्थः, असङ्ख्यैर्महाम्बुभिरिति भावः। पावकास्त्रम्—आग्नेयमस्त्रं, चन्द्रकेतोरिति भावः। प्रशान्तं—निवारितम्, वारुणास्त्रसम्भूतवारिधाराभिर्वर्षद्भिः तत् निर्वापितमिति भावः।

विद्याधरी। प्रिअ मे प्रिअ मे। * (ड)

विद्याधरः। हन्त! हन्त! भो भोः! सर्वमतिमात्रं दोषाय, यत् प्रबलवातावलिक्षोभगम्भीरगुलगुलायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धम् एकवारविश्वग्रसनविकटविकरालकालकण्ठमुखकन्दरविवर्त्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते। साधु वत्स चन्द्रकेतो! साधु, स्थाने वायव्यास्त्रमीरितम्। (ढ) यतः,—

* प्रियं मे प्रियं मे।

(ड) प्रियम्—प्रीतिकरम्, निखिलजगत्सन्तापनिवारकतया ममापि च दाहजक्लेशोपशमकतया निरतिशयहर्षविधायकम् एतत् पावकास्त्रमिति भावः। [आनन्दातिशयद्योतनाय द्विभावः]।

(ढ) अथ वारुणास्त्रेण पावकप्रसरोपरोधेऽपि तत्प्रयोगकृतकल्पान्तजलाडम्बराऽविभावकालिकभीषणान्धतमसोदयेन जगज्जनोपपीडनमाशङ्क्य नितरां व्यथितचेताः तात्कालिकीं जागतिकीं समवस्थां विद्याधरोऽपवर्णयति, हन्तेति।—हन्त—इति खेदे अव्ययम्, [भीतिजनितसम्भ्रमातिशयद्योतनाय द्विरुक्तिः]। अतिमात्रम्—अतिशयितम्, [अतिक्रान्तो मात्रामिति विग्रहः, "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" (वा०) इति द्वितीयासमासः] सर्वं हि प्रमाणाधिकं वस्तु दोषाय सम्पद्यते इति भावः, "सर्वमत्यन्तगर्हितम्" इत्यादिवचनादित्याशयः। तदेवोपवर्णयति, यदिति।—यत्—यतः। प्रबलानाम—उद्धुराणां प्रचण्डानां, अजातवृद्धानामित्यर्थः, वातावलीनाम्—वात्यानां, मारुतसमूहानामिति यावत्, क्षोभेण—अभिघातेन, समन्तात् सञ्चालनेनेति यावत्, गम्भीरम्—मन्द्रं यथा स्यात्तथा, गुलगुलायमानानाम्,—गुलगुल इति अव्यक्तं घोषं निनादं कुर्वताम्, ["अव्यक्तानुकरणात्" (५।४।५७ पा०) इति गुलगुलशब्दात् डाचि, "डाचि विवक्षिते द्वे" (वा०) इति द्वित्वम्, अगुलगुलं गुलगुलं कुर्वन्ति इत्यर्थे, गुलगुला इति स्थितात् "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति क्यषन्तात् ततः शानचि गुलगुलायमाना इति नामधातोः [illegible] मेघानाम्—जलदानां, मेदुरः—स्निग्धः, निबिडः इत्यर्थः, अन्धकारः—ध्वान्तं, तेन नीरन्ध्रम्—निरवकाशं यथा स्यात्तथा, निबद्धम्—निरुद्धम्, [illegible] एकवारम्—एकदैव, [illegible] विश्वम्—जगत्, [illegible] ग्रसनम्—ग्रासः, [illegible]

विद्याकल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्त्तानां क्वापि विप्रलयः कृतः ॥ ६ ॥

तस्मिन् वा विकट,—तदर्थं विस्फारित इत्यर्थं, ("विकच" इति पाठान्तरम्) विकराल,—भयङ्कर, कालकण्ठस्य—नीलकण्ठस्य, जगत्संहर्त्तुमुद्यतस्य महेश्वरस्येत्यर्थं, य मुखकन्दर,—मुखगह्वर, ('मुख" इत्यत्र 'कण्ठ" इति पाठान्तरम्) तस्मिन् विवर्त्तमानमिव—विचेष्टमानमिव, निविशमानमिवेत्यर्थ, जगत्संजिहीर्षो र्व्यात्तवदनस्य शङ्करस्य मुखविवरमधिशयानमिवानुभूयमानम् इति भाव । अपिचोत्प्रेक्ष्यते, युगान्तेति ।—युगान्ते—कल्पक्षये, प्रलये इत्यर्थ, य योग,—चित्तैकाग्रता, स निद्रा इव मनस विषयान्तरव्यावृत्तिरूप स्वाप इव, [इत्युपमितसमास] तदानीं बहिरिन्द्रियप्रवृत्तेरवरोधादित्याशय, तया निरुद्धानि—निगृहीतानि, सर्वाणि द्वाराणि —विषयग्रहणोपायभूतानि इन्द्रियाणि येन तादृशस्य, नारायणस्य—भगवत विष्णो, उदरे—कुक्षौ, निविष्टमिव—प्रविष्टमिव, महाप्रलये योगनिद्राभिभूते भगवति हरौ तच्छरीरे यथा हि जीवजात निविशमानमास्ते, तथाऽधुनाऽपि सम्भूतमिवेति भाव । भूतजात—प्राणिसमूहम् । प्रवेपते—कम्पते, वारुणास्त्रेण ब्रह्माण्डावनाशीत्यनदर्शनमिवेति भाव । वातावचुम्बितघनमेदुरमम्बरमवलोक्य भूतजात हि किं नु शङ्कर पुन जगत्संहर्त्तुमुद्यत, उत भगवत नारायणस्य योगनिद्रासमयोऽय समुपस्थित इति विभावयत नितरामुद्विजते इति समुदितवाक्यार्थ । अथेदानीं वायव्यास्त्रसम्प्रयोगदर्शनेन समरकुशलिन चन्द्रकेतु प्रशंसति, साध्विति ।—साधु—समीचीनमनुष्ठित मिति भाव । [हर्षातिशये द्विवचनम्] । स्थाने—युक्तम् । ("युक्ते द्वे साम्प्रत स्थाने' इत्यमर) । वायव्यास्त्र—वायुदेवतमायुधम् । ईरित—प्रयुक्तम्, जगत्त्रासुदतस्य सर्वजन्तुत्रासकारणस्य निरसनायेनेति भाव ।

जाद्याधान-नेतुमभ्युद्यतस्य चन्द्रकेतो वायव्यास्त्रप्रयोगकौशलमुपवर्णयति, विद्येति ।—विद्याकल्पेन ब्रह्मज्ञानसदृशेन, "विद्ययाऽमृतमश्नुते" (ईशोपनिषत् ११ श्लो०) मरुता चन्द्रकेतुप्रयुक्तवायव्यास्त्रेणेत्यर्थ, अत्र मरुत्पद सामान्येन प्रयुक्तमपि लक्षणया विशेषपरत्वमवसेयम्, वायव्यास्त्रप्रवर्त्तितवायुना वा, भूयसामपि बहुतराणामपि, कल्पविरामादपार्थं मेघानां वारुणास्त्रेण प्रयोगात समुदितजलधराणां, विवर्त्तानां द्रव्यमात विलक्षणाकारेण मायाकार्याणां प्रपञ्चानां, घनभूतानां जगतामित्यर्थ, "कारणात् विषमसत्ताकतया उत्पद्यमानं कार्य्यं हि विवर्त्त" इति वेदान्तिका, "सत्तान् मधि विवर्त्तोऽयं ब्रह्मणः सकलं जगत् । अविवर्त्तितमानन्दमास्थिता कृतिन

विद्याधरी । णाह ! का दाणि एसा ससम्भमुक्खित्तकरब्भमिदपट्टञ्चलो दूरदो ज्जेव महुरवअणपडिसिद्धजुज्झवावारो एदाणं कुमाराणं अन्तरम्मि विमाणवरं ओदरावेदि ? * (ग)

---

* नाथ ! क इदानीमेष ससम्भ्रमोत्क्षिप्तकरभ्रमितपट्टाञ्चलो दूरत एव मधुरवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोरन्तरे विमानवरमवतारयति ?

न्दा ॥" इति । (वेदान्तसिद्धान्तमुक्तावली २२२ पृ०) ब्रह्मणि इव अद्वितीये चिन्मये परमात्मनि इव, "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्म" इति श्रुतेः, क्वापि कदापि, अनिर्दिष्टदेशे इत्यर्थः, अकस्मात् सम्भूततया कि [illegible] अनन्यगामित्वादिति भावः, विप्रलब्ध [illegible], कृत सम्पादितं, अचिरादेव तथा नाम [illegible], यथा [illegible] सत्य [illegible] मध्यमसत्यमित्याकारक [illegible] उपनिषच्छास्त्राध्ययनेन समुदितं सत् सपदि एव घटपटादिनिखिलप्रपञ्चान् ब्रह्मणि विलापयति, ब्रह्मविद्या ब्रह्मणस्य जगत्प्रपञ्चज्ञानस्य [illegible] निराकरणात् [illegible] ब्रह्ममात्रज्ञानस्यैवोदयात् "तमेव विदित्वा" 'विद्ययाऽमृतमश्नुते' इत्यादिश्रुतिभि ज्ञानस्यैवोपदेशात् [illegible] [illegible] भावः । [illegible]] ॥ २ ॥

(ग) [illegible] ।—[illegible], उत्क्षिप्त,—[illegible], [illegible],—[illegible] तेन [illegible],—विघूर्णित, [illegible] [illegible], पट्टाञ्चल—[illegible] [illegible] [illegible] अतिदूरदेशात् [illegible] [illegible]

[illegible]

[illegible]

विद्याधर । [हृष्टः] ।

रघुपतिः । (त)— एष शम्बूकवधात् प्रतिनिवृत्तो

शब्दं महापुरुषसंविहितं निशम्य
तद्गौरवात् समुपसंहृतसम्प्रहारः ।
शान्तो लवः, प्रणत एव च चन्द्रकेतुः
कल्याणमस्तु सुतसङ्गमनेन राज्ञः ॥ ७ ॥

[इति निष्क्रान्तौ । विष्कम्भकः] । (थ)

(त) शम्बूकेति ।—शम्बूकस्य—तदाख्यस्य जनस्थाने तपस्यतः शूद्रस्य, वधात्—विनाशात्, तदनन्तरमित्यर्थः । ["ल्यब्लोपे कर्मण्यधिकरणे च" (वा०) इति पञ्चमी] प्रतिनिवृत्तः,—प्रत्यागतः । रघुपतिः एषः,—रघुश्रेष्ठः रामभद्रः समागतः ।

यदेदानीं पूज्येष्वनुरागात् प्रवृत्तयोः कुमारयोः युद्धविरतिमुपवर्णयन् शुभाशंसनपुरःसरं स्वकथानुपसंहरति, शब्दमिति ।—महता गुणग्रामविभूषितेनेत्यर्थः, पुरुषेण पुंसा, रामेणेत्यर्थः, संविहितं प्रयुक्तं, समुच्चरितमित्यर्थः, [संविदधाते प्रयोगात् प्रस्तावान्तकरणेऽत्वम्, स्वकरणे च प्रत्यवायमुचितमावेदितमिति ज्ञेयम्] शब्दं रणात् युवां विरमतमित्येवं निषेधकं वचनं, निशम्य समाकर्ण्य, तद्गौरवात् तस्मिन् गुरौ रामे समधिकादरात्, रामवाक्ये समधिकश्रद्धावशात् इत्यर्थः, समुपसंहृतः सम्यक् त्यक्तः परित्यक्तः, सम्प्रहारः समरव्यापारः येन तथाविधः, युद्धव्यवसायाद्विनिवृत्त इत्यर्थः, लवः शान्तः प्रशमान्वितः, चन्द्रकेतुश्च प्रणत एव प्रणामक्रियायां प्रवृत्त एव, सम्प्रति, सुतसङ्गमनेन सुतयोः कुशलवयोः समागमेन, ताभ्यां सह सम्मेलनेनेत्यर्थः, राज्ञः रामस्य, कल्याणं शुभम् अस्तु भवतु । [अत्र लवचन्द्रकेत्वोः युद्धविरतिकीर्तनपूर्वकं रामस्य शुभाशंसनात् ...दिश्यात् समाहितालङ्कारः] । वसन्ततिलकं वृत्तम् ॥ ७ ॥

(थ) नन्दनाख्यां पावकाख्यां विद्याधरप्रजापतीभ्यां सम्प्रयोजितत्वेनास्य विष्कम्भकत्वं बोध्यम्, इतानां समरव्यापाराणां, वार्त्तावनाणानाञ्च सुतसमागमरूपाणां कथांशानां विष्कम्भकादेव निर्दिष्टत्वात् अस्य तल्लक्षणाक्रान्तत्वम् इति, तदुक्तं दर्पणे—"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः । सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः । मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः । शुद्धः स्यात्—" इति ।

[ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च]।

राम। [पुष्पकादवतरन्]।—

दिनकरकुलचन्द्र! चन्द्रकेतो!
सरभसमेहि दृढं परिष्वजस्व।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः॥ ८॥

अथ वात्सल्यनिधिः भगवान् रामभद्रः पुष्पकविमानादवतीर्य्यैव पुत्रप्रतिमस्य चन्द्रकेतोः समाश्लेषेण सुचिरसीताविरहनिर्दग्धं स्वमानसं सुस्निग्धीकर्तुमभिप्रेत्य आह, दिनकरेति।—दिनकरस्य सूर्य्यस्य, कुलं वंशः, तस्य चन्द्र इव चन्द्रसदृश आह्लादकर इत्यर्थः, तत्सम्बोधने, हिमांशुः यथा सुधामयैः किरणैः प्रचण्डतापसन्तप्तानि जगन्ति सुस्निग्धानि करोति, तथा त्वमपि सुचिरादधिसन्तप्तस्य वनस्पतकुलस्य सन्तापहर्त्ता असीति भावः, सूर्य्यवंशानन्दवर्द्धन! इति फलितम्, चन्द्रकेतो! सरभसं रभसेन वेगेन सह वर्त्तमानं यथा तथा, सत्वरमिति यावत्, ("रभसो वेगहर्षयोः" इति विश्वः) एहि आगच्छ, दृढं कठोरं, निर्द्दयमिति यावत्, परिष्वजस्व समालिङ्ग मामिति शेषः, तुहिनस्य तुषारस्य यानि शकलानि खण्डानि, तद्वत् शीतलानि स्निग्धानि सन्तापहारकाणीत्यर्थः तैः, तवाङ्गैः तव शरीरैः, चन्द्रमाश्च [illegible] तदीय [illegible] इति चेदम्, पृथिवी हि तथैव [illegible], ममापि चित्तदाहः चित्तस्य [illegible], दाहः [illegible], सुदीर्घसीताविरहजः इति भावः, शमं शान्तिम्, उपयातु प्राप्नोतु, [illegible] सीताविरहजदाहस्य कदापि शान्तिर्न स्यात्, [illegible] इत्यपि [illegible], [illegible] इति, अपि तु [illegible], तथाहि, [illegible] सीताविरहजनितस्य [illegible] [illegible]—अपि [illegible], [illegible] [illegible] [illegible] चन्द्रकेतौ [illegible]

चन्द्रकेतु। अभिवादये।

राम। [उत्थाप्य सस्नेहास्रं परिष्वज्य]। अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य ? (द)

चन्द्रकेतु। कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्य लाभाभ्युदयेन। तद्विज्ञापयामि, मामिव अविशेषेण मत्तः शिवतरेण चक्षुषा पश्यतु अमुं महावीरप्रकाण्डं तातः। (ध)

हेतुकस्य तव तत्सम्बन्धस्योत्कीर्त्तनात् विभावनाऽलङ्कार प्रोक्तव्यतिरेकेणाङ्गाङ्गिभाव तया सस्थिते उड्डीयते, किञ्च, "चन्द्र चन्द्र" इत्यत्र मुख्यतरस्य प्रातिपदिकाश्रयोत्यधर्म्मिरूपस्य चन्द्रस्य अभिन्नार्थत्वात् लाटानुप्रासालङ्कार प्रोक्ताभ्यामर्थालङ्काराभ्या निरपेक्षतया संस्थिते उद्गृज्यते]। पुष्पिताग्रा वृत्तम् ॥ ८ ॥

(द) उत्थाप्य—प्रणत चन्द्रकेतुमुत्तोल्येत्यर्थ। सस्नेहास्र—स्नेहजनित—वात्सल्यातिरेकात् समुद्भूत यत् अस्रम्—अश्रु, नेत्रसलिलमित्यर्थ, तेन सह वर्त्तमान यथा स्यात् तथा, यद्वा—स्नेहेन सह वर्त्तमान यत् तत् सस्नेह, तथाभूतम् अस्रं यस्मिन् कर्म्मणि तद्यथा स्यात्तथा, वात्सल्यातिभावविवशहृदयतया अनियतधाराभि आनन्दाश्रुविनिर्मोक्षपुर सरमित्यर्थ। परिष्वज्य—सुदृढ समालिङ्ग्य। अपि—प्रश्ने। नाम—सम्भावनायाम्। दिव्येति।—धरतीति धर, [पचाद्यच्] दिव्यानि यानि अस्त्राणि, तेषा धर,—धारक, देह यस्य तथोक्तस्य, अलौकिकास्त्रपञ्जोपशोभिशरीरस्येत्यर्थ.। तव कुशलम् ?—शुभ ते ? इत्याशीर्व्वचनम्। ["चतुर्थी चाशिष्य—" (२।३।७३ पा०) इति पाक्षिकी षष्ठी]।

(ध) अत्यद्भुता—अलौकिकी, क्रिया—युद्धव्यापार यस्य तस्य, एकेन बालकेन अनेकै वीरै सह युगपत युद्धकरणात् अतिविस्मयावहसङ्ग्रामव्यापारस्येत्यर्थ। प्रिय—प्रीतिकर, दर्शन—वीक्षण यस्य तस्य, निसर्गसौम्यमूर्त्तेरित्यर्थ। लाभ एव—प्राप्तिरेव एतेन सह समागम एवेत्यर्थ, अभ्युदय —सम्पत् तेन। कुशल वर्त्तते ममेति शेष, सौभाग्यवशात अस्य मित्रतया सम्प्राप्य अहमात्मान कुशलिन मन्ये इति भाव। तत—अत एव। विज्ञापयामि—प्रार्थये। मत्त अविशेषेण—मत्तः अदृश्यया, मदनधिकतया इत्यर्थो वा। [मत्त इति पञ्चम्यामस्मिन् "पञ्चमी विभक्ते" (२।३।४२ पा०) इति पञ्चमी। अविशेषेणेति "प्रकृत्यादिभ्य उपसङ्ख्यानम्" (वा०) इति तृतीया]। शिवतरेण—निरतिशयशुभेन, स्नेहप्रचुरेणेत्यर्थ.।

राम। [लवं निरूप्य]। दिष्ट्या अतिकल्याणाकृतिरयं वयस्यो वत्सस्य। (न)—

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मको(षो)षस्य गुप्त्यै।

चक्षुषा वीक्षणेन, दृष्टिपातेनेत्यर्थः। ("मामिव अविशेषेण मत्त शिवतरेण चक्षुषा" इत्यत्र "मामिव विशेषेण या मत शिवेन चक्षुषा" इति पाठान्तरम्)। महावीरप्रकाण्डः—महान्तः ये वीराः तेषु प्रकाण्डः—प्रधानः, महावीरशिरःशेखरायमाणमित्यर्थः। [निर्धारणे सप्तमीसमासः। यद्वा—प्रशस्तो महावीर इत्यर्थके विग्रहे महावीरप्रकाण्डः "प्रशंसावचनैश्च" (२।१।६६ पा०) इति नित्यसमासः। ननु प्रकाण्डशब्दस्य अमरमते नित्यनपुंसकत्वेन "प्रकाण्ड" इति विशेषणस्य "प्रकाण्ड" इत्येवमेव भवितं युक्तम्, एवञ्चास्यानुशासनहीनतया अत्र च्युतसंस्कारताऽऽख्यदोष इति, तथाहि अमरः—"मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ" इति, अत एव अन्येन लिङ्गेन सामानाधिकरण्येऽपि माघेनास्य स्वलिङ्गता न परित्यक्ता, तथाहि—"एनिष्ट निषादनगप्रकाण्डम्" इति चेन्न मेदिनीकरेण तु अस्य पुंस्त्वस्यापि उद्घोषितत्वात् तथाहि—"प्रकाण्डो न स्त्री विटपे मूलशाखान्तरे तरोः। शस्ते" इति। एवं रभसेनापि "अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयोः।" इति। शाश्वतम् केवलं पुंस्त्वमेवास्याभिहितवान् तथाहि—"प्रकाण्डो विटपे शस्ते मूलशाखान्तरे तरोः।" इति। अत एव भट्टिना 'विरराज प्रकाण्डकौ' इत्युक्तमिति दिक्। अन्ये तु अमरमतेऽपि अमुमिति पदं विशेष्यतया स्वीकृत्य महावीरप्रकाण्डं विशेषणतया परिगृह्य प्रीत्यर्थोऽद्वारः इति वदन्ति, तथापि विशेषणस्य सन्निधाने विशेष्यपदस्याविवाने विशेष्यनिश्चयः भाष्य निताल्तनवास इत्यनिदि नचामहे।]

(न) अतीति।—अतिशयं कल्याणी—अतीवशुभावहा, आकृतिः,—मूर्तिः यस्य सः [illegible] निर्वृतिकरी [illegible]।

[illegible] नवं नवनूतनत्वं [illegible] विशिष्टमुपपादयति, त्रातुमिति।—लोकान् जगन्ति, त्रातुं रक्षितुं, [illegible] परिणतः [illegible] [illegible] लोकान् [illegible] [illegible] [illegible], तथा [illegible] [illegible] [illegible] [illegible] वैदिकधर्मरक्षार्थं, [illegible]

सामर्थ्यानामिव समुदयः सञ्चयो वा गुणानाम्
आविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥ ९ ॥

लव । अहो ! पुण्यानुभावदर्शनोऽयं (प) महापुरुषः ।—
आश्वासस्नेहभक्तीनामेकमालम्बनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिमन्तरः ॥ १० ॥

रत्नभाण्डाररक्षणाय वा, तनुः शरीरं श्रितः आश्रितः, अङ्गीकृत इत्यर्थः, क्षात्रः क्षत्रियजातिसम्बन्धी धर्म इव शौर्यादिगुणगण इव, वेदरूपरत्नभाण्डाराणां ब्राह्मणानां स्नातकानां वा तदपघातकपापरजनेभ्यः रक्षार्थे एव गृहीतविग्रहा क्षत्रियत्वजातिरेवायमित्युत्प्रेक्षा तथा सामर्थ्यानां वीरधर्माणां विक्रमाणां, समुदयः इव राशिरिव गुणानां दयादाक्षिण्यादीनां, सञ्चयो वा समवाय इव वाशब्दश्चात्र इवार्थे ("इववत् वायथाशब्दौ" इत्युक्तेः) तथा आविर्भूय मूर्त्तिमाश्रित्य स्थितः विद्यमानः, मूर्त्तिमानित्यर्थः, जगतां त्रिलोक्याः पुण्यानां विधिवदनुष्ठितशुभावह-कर्मफलभूतानां धर्माणां निर्माणानि रूपाणि तेषाम्, अस्य भावप्रधाननिर्देशात् निर्मितपुण्यानामित्यर्थः, कृदभिहितो भावः द्रव्यवत् प्रकाशते इति न्यायात्, राशिरिव सङ्घात इव, "स्थितः" इति पूर्वकस्थेनान्वयः, जगज्जनैः अनुष्ठितानां शुभावह-कर्मणां यानि पुण्यफलानि तान्येवैकत्र सङ्घीभूय समुदितः इवेत्युत्प्रेक्षा प्रागुप-मीत्प्रेक्षात्रयेणास्य निरतिशयवीर्यशालित्वम् अप्रधृष्यत्वञ्च अन्तिमोत्प्रेक्षाद्वयेन च गुणगणविभूषितत्वं धार्मिकत्वञ्च प्रतिपादितमिति ज्ञेयम्। [अत्रोपमेयभूतस्य सर्वंकस्यैकस्य प्रतिपाद्यस्य तत्त्वस्य उपमानभूतास्त्वेते क्षात्रधर्म्मसामर्थ्यसमुदय गुण-सञ्चय पुण्यनिर्माणराशिरूपत्वेन सम्भावनात् पञ्चोत्प्रेक्षाऽलङ्कारः, सजातीयानामेतेषां परस्परसापेक्षतया संस्थितेः सङ्करः]। मन्दाक्रान्ता वृत्तम् ॥ ९ ॥

(प) पुण्येति।—पुण्यः—पवित्रः, अनुभावः,—तेजोविशेषः दर्शनम्—अव-लोकनं यस्य सः, पवित्रतेजःपुञ्जधरस्यास्य महापुरुषस्य दर्शनेन सर्वेषामेव पुण्यो-त्पादने इति भावः।

पुण्यानुभितत्वेन विशिष्य उपपादयति आश्वासेति।—आश्वासः समाश्वासनं, विश्वासः अभयदानमिति यावत् स्नेहः वात्सल्यं भक्तिः पूज्येषु अनुरागः, तासाम् एकम् अद्वितीयम्, अप्रतिममिति यावत्, महत् सर्वतोऽधिकम्, आलम्बनम् आश्रय इव, पात्रमित्यर्थः, अयं महापुरुष इति पूर्वेणान्वयः, अस्मिन् महापुरुषे ... गुणनिचया पूर्णतया विद्यन्ते इति भावः, निखिल

आश्चर्य्यम् ॥—

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रह्वयति माम्।
झटित्यस्मिन् दृष्टे किमपि परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥११॥

सौम्येनाकारेण महापुरुषोऽयं दृश्यमानो मनांसि प्रीत्याद्रीणि भक्तिविनम्राणि च कुर्वन् आश्वस्तानि करोति, विपन्नानामाश्रयप्रदः, आश्रितानाञ्च परिरक्षकः, गुरुजनसेवकश्चायमिति निसर्गसौम्यमूर्त्तिरेवास्य सूचयतीति वा तात्पर्य्यम्। अतः, प्रकृष्टस्य सर्वोत्तमस्य, धर्मस्य पुण्यस्य, मूर्त्त्या शरीरेण, सञ्चरते भ्रमति यः तादृशः, मूर्त्तिमानिति भावः, प्रसाद इव प्रसन्नभाव इव, अनुग्रह इव इत्युत्प्रेक्षा, स्थित इति शेषः, शरीरी प्रसन्नः प्रकृष्टः धर्म इवायमिति भावः, विशुद्धधर्मफलं वा शरीरसौभाग्येनाव समुदितमिवेति तात्पर्य्यम्। [अत्र अमुष्य महापुरुषस्य प्रकृतस्य धर्मप्रसादरूपतया सम्भावनात् उत्प्रेक्षाऽलङ्कारः]॥ १० ॥

अथ प्रीतोऽभिप्रेतार्थे विनिगमना प्रदर्शयितुं तत्फलं विशिष्य विवृणोति, विरोध इति।—अस्मिन् महापुरुषे, दृष्टे नयनपथमापतिते सति, झटिति सहसा, विरोधः वैरं, विद्वेष इति यावत्, विश्रान्तः निवृत्तः, दूरीभूतः अभूदित्यर्थः, प्रत्युत निर्वृत्या आनन्देन, घनः सान्द्रः, प्रतिपूर्ण इति यावत्, रसः अनुरागः, प्रसरति आविर्भवति, तत् तथाविधम् औद्धत्यं गर्व्वावमर्जनितं चापलं च, क्वापि कुत्रापि, व्रजति गच्छति, प्रलीयत इत्यर्थः, विनयः प्रश्रयः, विनीतत्वमित्यर्थः, गुरुजनसन्निधौ स्वापकर्षविधायिका नम्रतेति यावत्, मां प्रह्वयति अवनमयति, मां सात्विकनम्रमूर्त्तिं करोतीति भावः, तेन हि, किमपि कुतोऽपि कारणात्, अनिर्वचनीयात् [illegible] वा, परवान् पराधीनः, अस्मि भवामि, महात्मानमेनं दृष्ट्वा अनिर्दिष्टकारणेनाहमिदानीं नात्मनि [illegible] इति भावः, यदि वा अथवा, तीर्थानामिव पुण्यतोयानामिव, महतां महानुभावानां, कोऽपि अनिर्वचनीयः, [illegible] [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

राम । तत् किमेकपद एव दुःखविश्रामं ददाति उपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम्, अथवा स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् । (फ)—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः
न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।

मुपादानात् समुच्चयालङ्कारः तथा महत्सु च तीर्थानामवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः, किञ्च महापुरुषनहिमातिशयरूपेण सामान्येनार्थेन विरोधोपशमादिरूपस्य विशेषार्थस्य सोपपत्तिकत्वकरणादर्थान्तरन्यासालङ्कारश्च, एतेषाञ्च त्रयाणामन्योऽन्याङ्गाङ्गिभावतया सङ्कर]। शिखरिणी वृत्तम् ॥ ११ ॥

(फ) तदिति ।—तत्—एतदित्यर्थः । किं—कथम् ? एकपद एव—सद्य एव, दर्शनसमकालमेवेति यावत् । ("तत्क्षणैकपदे तूर्णं सद्यः सपदि च स्मृते ।" इति हलायुधः) दुःखानां—सीताविरहजनितानां शोकसन्ततीनां, विश्रामम्—उपशमम् । ददाति—अर्पयति मह्यमिति शेषः, उपर्येष मम साकल्येन दुःखोपघातं विदधातीति भावः । तथा, कुतोऽपि अविज्ञातात्, निर्वक्तुमशक्यादित्यर्थः । निमित्तात्—कारणात् । अन्तरात्मानम्—अन्तःकरणं, कामपीत्यर्थः, ममेति शेषः । उपस्नेहयति—आर्द्रं करोति, वात्सल्यवशं विदधातीत्यर्थः, बालोऽयमिति शेषः । अत्र यत् इति पदमध्याहार्य्यम्, तेन च, दुःखविश्रामं ददाति, अन्तरात्मानमुपस्नेहयति च इति यत् तदेतत् कथमित्यर्थः । अथ स्नेहः अविज्ञातकारणादपि जायते इति पक्षान्तरमाह, अथवेति ।—अथवा—पक्षान्तरे । स्नेहश्च—प्रणयः अपि, चकारः समुच्चये । व्यपेक्षया—अपेक्षया, सम्बन्धेनेति यावत्, सह वर्त्तते यः स सव्यपेक्षः, —ससम्बन्धः, निमित्तेन—कारणेन, सव्यपेक्षः,—ससम्बन्धः, कारणसापेक्ष इत्यर्थः, न तु कारणनिरपेक्ष इति यावत्, कुतश्चित् कारणादेव कस्यचित् कस्मिंश्चित् स्नेहः सञ्जायते इति भावः । इति—एतद्वचनम् । विप्रतिषिद्धं—विरुद्धम्, अप्रामाणिकमिति यावत्, कस्यचित् जनस्य कस्मिंश्चित् जने स्नेहप्रवृत्तिरहेतुकैव इदानीं मां प्रति तव किमपि बाह्यं निमित्तान्तरं नापेक्षते इत्याशयः ।

स्नेहस्य बाह्यकारणानपेक्षित्वम् अर्थान्तरन्यासेन सोपपत्तिकं करोति, व्यतिषजतीति ।—आन्तरः अन्तर्वर्त्ती, कोऽपि अविज्ञातः, अनिर्वाच्य इत्यर्थः हेतुः कारणं किमपि स्वरूपं निमित्तान्तरं, पदार्थान् वस्तूनि, व्यतिषजति स्नेहसूत्रेण

आश्चर्य्यम् ॥—

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रह्वयति माम्।
झटित्यस्मिन् दृष्टे किमपि परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥११॥

सौम्येनाकारेण महापुरुषोऽयं दर्शकानां मनांसि प्रोत्साहयन् भक्तिविनम्राणि च कुर्वन् आश्चर्य्याणि करोति, विपन्नानामाश्रयप्रदः, आश्रितानाञ्च परिरक्षकः, गुरुजनसेवकश्चायमिति निसर्गसौम्यमूर्त्तिरेवास्य सूचयतीति वा तात्पर्य्यम्। अत, प्रकृष्टस्य सर्व्वोत्तमस्य, धर्मस्य पुण्यस्य, मूर्त्त्या शरीरेण, सञ्चरते भवति य तादृश, मूर्त्तिमानिति भाव, प्रसाद इव प्रसन्नभाव इव, अनुग्रह इव इत्युत्प्रेक्षा, स्थित इति शेष, शरीरी प्रसन्न प्रकृष्ट धर्म इवायमिति भाव, विग्रहधर्मफलं वा शरीरस्वीकृत्यैवात्र समुदितमिवेति तात्पर्य्यम्। [अत्र अमुष्य महापुरुषस्य प्रकृतधर्मप्रसादरूपतया सम्भावनात् उत्प्रेक्षाऽलङ्कार] ॥ १० ॥

अथ प्रीत्युत्प्रेक्षितार्थे विनिगमना प्रदर्शयितु तत्फलं विशिष्य विवृणोति, विरोध इति।—अस्मिन् महापुरुषे, दृष्टे नयनपथमापतिते सति, झटिति सहसा, विरोध वैरं, विद्वेष इति यावत्, विश्रान्त निवृत्त, दूरीभूत अभूदित्यर्थ, प्रत्युत निर्वृत्या आनन्देन, घन सान्द्र, प्रीतिपूर्ण इति यावत्, रस अनुराग, प्रसरति आविर्भवति, तत् तथाविधम्, औद्धत्य गर्व्वाविर्भावजनित चापल्यं क्वापि कुत्रापि, व्रजति गच्छति, प्रलीयते इत्यर्थ, विनय प्रश्रय, विनीतत्वमित्यर्थ, गुरुजनसन्निधौ स्वापकर्षविधायिका नम्रतेति यावत्, मां प्रह्वयति अवनमयति, मां भक्तिविनम्रं करोतीति भाव, तेन हि, किमपि कुतोऽपि कारणात्, अनिर्वचनीय इति वा परवान् पराधीन, अस्मि भवामि, महात्मानमनु दृष्ट्वा अनिर्देश्यकारणेनाहमिदानीं नात्मनि प्रभवामि इति भाव, यदि वा अथवा, तीर्थानामिव पुण्यक्षेत्राणामिव, महतां महानुभावानां, कोऽपि अनिर्वचनीयस्वरूप, महार्घ बहुमूल्य, साधारणजनैरुपलब्धुमशक्य इत्यर्थ, महनीय इति यावत्, अतिशय उत्कर्ष, महिमातिरेक इति यावत्, हि खलु, अलौकिकमहिम्ना महीयसां महत्त्वातिरेक नाहृशान् अनिर्वचनीय एव, यस्मात् विरोधिनामपि विरोधभावं प्रशमं प्रणयति, प्रत्युत तानन्तरा च प्रीत्यानन्दनाह प्रवर्त्तते इति भाव। [अत्र महापुरुषस्य रामस्य महत्त्वप्रतिपादने प्रत्यक्षेऽस्मिन् विरोधाभासोऽपि वाच्ये अपि निर्वृतिरसप्रसारादीनां इत्यतराणा

राम। तत् किमेकपद एव दुःखविश्रामं ददाति उपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम्, अथवा स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्। (फ)—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः
न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।

मुपादानात् समुच्चयालङ्कारः, तथा महत्सु च तोयानामवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः, किञ्च महापुरुषमहिमातिशयरूपेण सामान्येनार्थेन विरोधोपशमादिरूपस्य विशेषार्थस्य सोपपत्तिकत्वकरणादर्थान्तरन्यासालङ्कारश्च, एतेषाञ्च त्रयाणामन्योऽन्याङ्गाङ्गिभावतया सङ्कर]। शिखरिणी वृत्तम्॥ ११॥

(फ) तदिति।—तत्—एतदित्यर्थः। किं—कथम्? एकपद एव—सद्य एव, दर्शनसमकालमेवेति यावत्। ("तत्क्षणैकपदे तूर्णे सद्यः सपदि च स्मृते।" इति हलायुधः) दुःखानां—सीताविरहजनितानां शोकसन्ततीनां, विश्रामम्—उपशमम्। ददाति—अर्पयति मह्यमिति शेषः, सपद्येव मम साकल्येन दुःखोपघातं विदधातीति भावः। तथा, कुतोऽपि अविज्ञातात्, निर्व्वक्तुमशक्यादित्यर्थः। निमित्तात्—कारणात्। अन्तरात्मानम्—अन्तःकरणं, मानसमित्यर्थः, ममेति शेषः। उपस्नेहयति—आर्द्रं करोति, वात्सल्यवशं विदधातीत्यर्थः, बालोऽयमिति शेषः। अत्र यत् इति पदमध्याहार्य्यम्, तेन च, दुःखविश्रामं ददाति, अन्तरात्मानमुपस्नेहयति च इति यत् तदेतत् कथमित्यर्थः। अथ स्नेहः अविज्ञातकारणादपि जायते इति पक्षान्तरमाह, अथवेति।—अथवा—पक्षान्तरे। स्नेहश्च—प्रणयः अपि, चकारः समुच्चये। व्यपेक्षया—अपेक्षया, सम्बन्धेनेति यावत्, सह वर्त्तते यः स सव्यपेक्षः, —ससम्बन्धः, निमित्तेन—कारणेन, सव्यपेक्षः,—ससम्बन्धः, कारणसापेक्ष इत्यर्थः, न ह्ययं कारणनिरपेक्ष इति यावत्, कुतश्चित् कारणादेव कस्यचित् कस्मिंश्चित् स्नेहः सञ्जायते इति भावः। इति—एतद्वचनम्। विप्रतिषिद्धं—विरुद्धम्, अप्रामाणिकमिति यावत्, कस्यचित् जनस्य कस्मिंश्चित् जने स्नेहप्रवृत्तिरहेतुकेव दृश्यते, सा हि तत्र किमपि बाह्यं निमित्तान्तरं नापेक्षते इत्याशयः।

स्नेहस्य बाह्यकारणानपेक्षित्वम् अर्थान्तरन्यासेन सोपपत्तिकं करोति, व्यतिषजतीति।—आन्तरः अन्तर्वर्त्ती, कोऽपि अविज्ञातः, अनिर्वाच्य इत्यर्थः, हेतुः कारणं किमपि अवाच्यं निमित्तमित्यर्थः, पदार्थान् वस्तूनि, व्यतिषजति स्नेहसूत्रेण

विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

लव। चन्द्रकेतो। क एते? (व)

चन्द्रकेतु। प्रियवयस्य। ननु तातपादा एते। (भ)

लव। ममापि तर्हि धर्मतस्तथैव, यतः प्रियवयस्य इत्यात्थ, किन्तु चत्वारः खलु भवतामेवव्यपदेशभागिनः तत्रभवन्तो रामायणकथापुरुषाः, तद्विशेष ब्रूहि। (म)

परस्पर निबध्नाति, प्रीतय स्नेहा, बहिरुपाधीन् बाह्यधर्मान्, जन्यजनकभावदान्यत्यादीन् सम्बन्धानित्यर्थ, न खलु नैव हि, संश्रयन्ते अवलम्बन्ते, बाह्यधर्मानाश्रित्य नैव प्रवर्त्तन्ते स्नेहा इति भाव। एतदेव समर्थयते विकसतीति।—हि यत, पुण्डरीकं पद्म, पतङ्गस्य सूर्यस्य ("पतङ्गौ पक्षिसूर्य्यौ च" इत्यमर) उदये आविर्भावे, प्रकाशमतीत्यर्थ, विकसति प्रस्फुटति, चन्द्रकान्तश्च तदाख्यमणिविशेषोऽपि, हिमरश्मौ तुहिनकिरणे, चन्द्रे इत्यर्थ, उद्गते उदिते सति, द्रवति निष्यन्दते, जललव विमुञ्चतीत्यर्थ, यथा हि निखिलजगत्तापकत्तपनोदयसमकालमेव परमकोमलवपूंषि अपि पद्मानि हसन्ति, चन्द्रोदयमात्रत एव अतिकठिनश्चन्द्रकान्तमणि अपि द्रवीभवति, तत्र किमपि बाह्य कारणं नावलोक्यते, आन्तरञ्च किञ्चिदस्तीति अनुमीयते, तथा ममापि बहि सम्पर्के असत्त्वेऽपि कुमारलवावलोकनमातत चित्तद्रवीभवने किमपि अव्यक्तमान्तर निमित्तमस्तीति सन्देहि इति भाव। [अत्र पद्मविकाश चन्द्रकान्तद्रवीभावरूपविशेषार्थद्वयेन आन्तरपदार्थव्यतिषङ्गभावरूपसामान्यार्थस्य सोपपत्तिकत्वकरणात् अर्थान्तरन्यासोऽलङ्कारो, तयोरन्योऽन्यसापेक्षतया संस्थिते संजातीय सङ्कर]। मालिनी वृत्तम् ॥ १२ ॥

(व) क एते—किमाख्योऽयं महापुरुष इत्यर्थ। [गौरवात् बहुत्वम्]।

(भ) तातपादा —पूज्यतमा ज्येष्ठपितर इत्यर्थ, पादशब्द पूज्यतमत्वातिशयव्यञ्जक। [अत्रापि बहुत्व गौरवात्]।

(म) तर्हि—तदा, तव पितृव्यत्वेनोक्तत्वे इत्यर्थ। ममापि—न केवल तव ... । धर्मत,—धर्मेण, लोकाचारानुसारेणेत्यर्थ। ("धर्मा पुण्ययमन्यायस्वभावाचारसोमपा।" इत्यमर। "प्रकृत्यादिभ्य उपसंख्यानम्" (वा०) ... । तथैव—तातपादा एव। यत,—यस्मात्

चन्द्रकेतु'। ननु ज्येष्ठतातपादा इति अवेहि। (य)

लव। [सोल्लासम]। कथ रघुनाथ एषः॥ दिष्ट्या सुप्रभातमद्य, यदय देवो दृष्टः। [सविनयकौतुक निवर्ण्य]। तात! प्राचेतसान्तेवासी लवोऽभिवादयते। (र)

राम। [सस्नेहम्]। आयुष्मन्! एह्येहि। [सस्नेह परिष्वज्य]। अयि वत्स! कृत कृतमतिविनयेन, अनेकवार-मपरिस्लथ परिष्वजस्व। (ल)—

कारणात्। प्रियवयस्य इति—प्रियसख इत्येवम्। भाख्य—ब्रवीषि, मामिति शेष, भवता सह सौहार्द्दात भवत्सम्बन्धोया सर्वे एवेदानी मत्सम्बन्धा सञ्जाता इति भाव। भवता—युष्माकम्। एवम्—इत्थ, व्यपदेश—समाख्या, तातपादरूपमित्यर्थ, भजन्ते—भाग्यन्ति ये तथोक्ता, [भजत "सम्पृचानु—" (३।२।१४२ पा०) इति घिनुण्] तातपादपदवाच्या इत्यर्थ। तत्रभवन्त,—पूज्या। ("त्रिषु तत्रभवानत्रभवान् पूज्यश्च तादृश।" इति कोष) रामायणस्य कथा—इतिवृत्तभाग, तस्या पुरुषा,—नायका। तत—तस्मात, तेषा चतुष्टयत्वादित्यर्थ। विशेषम्—इतरव्यावर्त्तक, नामधेयमित्यर्थ। ब्रूहि—कथय, रामायणकथासु चत्वार एव भवता तातपादा, महापुरुषा श्रूयन्ते, तेन हि तेषु कतमोऽयं भवतीति सविशेष कथयेति भाव।

(य) ननु—भो लव।। ज्येष्ठतातपादा,—ज्येष्ठपितर, भगवान् रामभद्र. इत्यर्थ। इति—इदम्। अवेहि—जानीहि।

(र) सोल्लास—सहर्षम्, आहेति शेष। सुप्रभात—शोभन दिनमुखं, समुदितमिति शेष। यत्—यस्मात, सौभाग्येन पुण्यादिवसमुदयादिति यावत्। देव,—भगवान् रघुपति। दृष्ट,—नयनपथमायात। सविनयकौतुक—सप्रश्रय सकौतूहलञ्चेत्यर्थ। निवर्ण्य—निरीक्ष्य। प्राचेतसान्तेवासी—वाल्मीकिशिष्य। अभिवादयते—प्रणमति, भवन्तमिति शेष।

(ल) सस्नेह—सवात्सल्यम, आहेति शेष। आयुष्मन्।—दीर्घजीविन्।। एहि—आगच्छ। [आदरातिरेके द्विभाव] परिष्वज्य—गाढमाश्लिष्य। अयि—कोमलसम्बोधने। वत्स।—निरतिशयकल्याणास्पद।। अतिविनयेन—अत्यधिकप्रश्रयप्रदर्शनेन। कृतम्—अलम् ("कृत युगेऽप्यनर्थेऽपि विहिते हिंसिते त्रिषु।" इति मेदिनी) अतिविनयेन साध्य नास्तीत्यर्थ.। [गम्यमानक्रियायोगात् करणे तृतीया, अन्ये तु वारणार्थकृतशब्द

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः।
नन्दयति चन्द्रचन्दननिष्यन्दजडस्तव स्पर्शः ॥ १२ ॥

लव। [स्वगतम्]। ईदृशोऽस्मादृशान् प्रति अमीषामकारणस्नेहः, मया पुनरेभ्य एव अभिद्रुग्धमज्ञेन, यदायुधपरिग्रहं यावत् अत्यारूढो दुर्योगः। [प्रकाशम्]। मृष्यन्तु इदानीं लवस्य बालिशता तातपादाः। (व)

योगात् तृतीया इत्याहुः। सम्भ्रमे द्विर्वचनम्]। अनेकवारं—भूयः, पुनः पुनरित्यर्थः। अपरिश्लथं—सुदृढम्, अशिथिलमिति यावत्। परिष्वजस्व—आलिङ्ग, सीताविरहजतापोपगमाय ते सुकोमलाङ्गैः मां निर्दयमाश्लिष्य इति भावः।

सुकुमाराङ्गसम्लेषस्य निरतिशयसन्तापहरत्वं प्रतिपादयति, परिणतेति।—परिणतं सुविकसितं, कठोरं प्राप्तपूर्णावस्थं, सर्वाङ्गसम्पूर्णमिति यावत्, यत् पुष्करं पद्मं, तस्य गर्भच्छद इव अभ्यन्तरगतं दलमिव, पीनः स्थूलः, कोमल इत्यर्थः, मसृणः श्लक्ष्णः, सुकुमारः अभिनवः, प्रफुल्लकमलप्रसूनान्तर्गतपलाशसदृशसुकोमल इत्यर्थः, ["उपमानानि सामान्यवचनैः" (२।१।५५ पा०) इति उपमानसमासः] चन्द्रः हिमकरः, चन्दनस्य च निष्यन्द इव इत्यर्थः, यद्वा—चन्द्रः कर्पूरः, चन्दनस्य च रसः, तद्वत् जडः शीतलः, तव स्पर्शः त्वच्छरीरस्पर्शः, त्वदङ्गसम्लेषजं सुखमिति यावत्, नन्दयति प्रीणयति, मामिति शेषः, मम विरहतापोपशान्तये हि तव निरवद्यं कोमलमेतदङ्गं सत्यमेव प्रभवति, तेन निर्भरं मामालिङ्गेति प्रार्थये इत्याशयः। [अत्र समासगतलिङ्ग आर्थी उपमाऽलङ्कारः]। आर्या जातिः ॥ १२ ॥

(व) ईदृशः—एतादृशः, अनिर्वचनीय इत्यर्थः। अस्मादृशान् प्रति—मां प्रति इति यावत्। अमीषां—रघुपतिप्रमुखाणामेषाम्। अकारणस्नेहः,—अहैतुकं वात्सल्यम्, सम्बन्धविरहितेऽपि मयि एते महापकृपा निरतिशयं स्निह्यन्ति, अहो! महानुभावत्वमेतेषामिति भावः। अज्ञेन—अतिमूढेन। एभ्य एव—एतादृशेभ्यः दयावात्सल्यनिधिभ्य एवेति यावत्। ["क्रुधद्रुहोरुपसृष्टयोः कर्म" (१।४।३८ पा०) इत्यनुशासनेन सोपसर्गयोः क्रुधद्रुहोः यं प्रति कोपस्तत्कारकस्य कर्मसंज्ञत्वविधानात्, अत्र तदभावेन चतुर्थ्या भवितव्यमिति तात्पर्यम्॥ तदङ्गीकारेण चतुर्थ्यप्रसक्तेः इत्यादीपः। यदि हि अभेरत्र उपसर्गत्वं नाङ्गीक्रियते, "अभिरभागे—लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः" इति अभि प्रति पर्यनुं वा निर्जित, कर्मोपसर्गत्वाभावात् न यत्नम्" इति दीक्षितोक्तिवत्, तदा दुरुक्तदृष्टत्वाभावेन 'क्रुधद्रुहेर्ष्या—' (१।४।३७ पा०) इति

राम। किमपराद्धं वत्सेन ?

चन्द्रकेतु। अश्वानुयात्रिकेभ्यः तातप्रतापाविष्करणमुपश्रुत्य वीरायितम् अनेन। (ग)

राम। ननु अयमलङ्कारः क्षत्त्रस्य। (घ)—

चतुर्थी स्यात्। तथाच न प्रोक्तदोषावसर इति ध्येयम्। अन्ये तु "क्रिया—" (२।३।१४ पा०) इति चतुर्थीमाहुः, तत्तु न सम्यक्, प्रोक्तकर्मत्वविधानस्यापवादविषयत्वेन बलीयस्त्वादिति]। अभिद्रुग्धं—वैरायितं, जिघांसितमित्यर्थः, स्नेहप्रवणेषु महानुभवेष्वेतेषु निरर्थकं विरोधित्वमनुष्ठितमिति भावः। [अभिपूर्वकात् द्रुह्यतेः भावे क्तः]। यत्—यतः। आयुधस्य—अस्त्रस्य, परिग्रहः,—स्वीकारः, ग्रहणमित्यर्थः, तं, यावत्—अस्त्रग्रहणमारभ्येत्यर्थः। [अत्र यावच्छब्दयोगात् द्वितीया। "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे।" इत्यमरः] अत्यारूढः,—प्रकर्षं गतः, प्रबलीभूत इत्यर्थः, दुर्योगः,—विवादः, द्रोहः इति यावत्। मृष्यन्तु—क्षाम्यन्तु। बालिशतां—मूर्खताम्, अविमृश्यकारितामिति यावत्। तातपादाः,—पितरः, पूज्यतमा भवन्त इत्यर्थः, पितृस्थानीयेषु पितृषु वा भवत्सु मोहात् मया जिघांसुना यदतीव विगर्हितं वैरमनुष्ठितं, तत् भवद्भिः महानुभवैः स्वकारुण्यगुणेन क्षन्तव्यमिति भावः।

(ग) अश्वा०।—अश्वस्य—अश्वमेधीयस्य वाजिनः, अनुयात्रिकाः,—अनुचराः, रक्षका इत्यर्थः, तेभ्यः। [अनु पश्चात्, यात्रा यानं, प्रयोजनमेषामित्यर्थे, "प्रयोजनम्" (५।१।१०९ पा०) इति ठञ्। अपादाने पञ्चमी। अपरे तु—"आख्यातोपयोगे" इति पञ्चमीं इत्याहुः] तातस्य—पितृस्थानीयस्य भवतः, प्रतापस्य—प्रभावस्य, आविष्करणं—प्रख्यापनं सर्वतोऽत्युत्कर्षवर्णनमिति यावत्। उपश्रुत्य—आकर्ण्य। वीरायितं—वीर इवाचरितम्, वीरा यथा परगुणप्रकर्षं विसोढमशक्नुवन्तः स्वस्य ततोऽधिकगुणवत्तामभिदर्शयितुं तदुत्कर्षोपघातका भवन्ति, तथैवासावपि भवतो वीरत्वख्यातिमसहमानः स्वकीयविक्रमप्रकाशनाय तथाचरितवान् इति भावः। [वीरशब्दादाचारार्थे "कर्त्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति क्यङि भावे क्तः]।

(घ) ननु—अवधारणे। अयमलङ्कारः,—इदं वीरत्वप्रकटनं भूषणमेव, न तु दूषणमिति भावः। क्षत्त्रस्य—क्षत्त्रियजातेरित्यर्थः, पौरुषाविष्करणं हि क्षत्त्रियजातेर्न दोषावहमिति भावः। ब्रह्मचारिणि लवे मौर्व्वीमेखलादिदर्शनात् क्षत्त्रियत्वमवधार्यैवमुक्तमिति ध्येयम्।

न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति? ॥१४॥

तेजस्विनामन्यतेजोऽसहमानत्वं प्रगमय्य तस्य स्वाभाविकत्वमेवैतदित्युपपादयति, नेति।—तेजस्वी वीरः, अपरेषाम् अन्येषां, प्रसृतं समन्ताद्अभिव्याप्तं, प्रदीप्तमित्यर्थः, सर्वतोविचारितया सर्वेषामेवाभिभवितृ इति यावत्, तेजः प्रभावं, न प्रसहते न मर्षयति, न क्षमते इत्यर्थः, प्रत्युत तदभिभवितुमेव उद्युङ्क्ते इत्याशयः। किं तर्हि स अन्यविद्वेष्टा? तन्नेत्याह, स इति।—सः असहनमित्यर्थः, [विधेय प्राधान्यात् पुंस्त्वम्] तस्य तेजस्विनः, प्रकृतिनियतत्वात् स्वभावेन नियन्त्रितत्वात्, निसर्गसिद्धत्वादिति यावत्, स्वभावबलादेव उत्पद्यमानत्वादिति भावः, अकृतकः अकृत्रिमः, अविकृत इति यावत्, स्वः स्वकीयः, भावः धर्मः, न त्वन्यगीर्ष्यया असूयया वा परेषां तेजसामुपरोधेऽति भावः। एतदेव सयुक्तिकं सोपपत्तीकरोति, मयूखै रिति।—देवः द्युतिमान्, दिनकरः दिवाकरः, सूर्य इत्यर्थः, यदि चेत्, मयूखैः किरणैः, अश्रान्तम् अविश्रमम्, अविरतमिति यावत्, तपति सन्तापं ददाति, जगत्ताप करान् किरणान् समन्तात् विकिरति इत्यर्थः, तर्हीति शेषः, आग्नेयग्रावा वह्न्युत्पादकः शिलाविशेषः, सूर्यकान्तमणिरिति यावत्, निकृतः इव परिभूत इव, जगत्तापकर त्वात्सूर्ये आग्नेयग्राव्णामपि सन्तापकत्वादित्याशयः, तेजांसि अग्नीन्, किं कथं, वमति? उद्गिरति?, विसृजतीत्यर्थः, न खलु सूर्यकान्तमणिः सूर्यतेजोऽनभिभवमानः एव वाऽग्निज्वालान् विसृजति, किन्तु स्वभावादेव तस्मात् वह्निराविर्भवति इति भावः, सूर्यसम्पर्केण वह्निवमनं सूर्यकान्तमणेः प्रसिद्धमेव। अचेतनः मणिरपि यदि सूर्यतापमसहमानः तेन पराभूत इव तस्मात् वह्निशिखां समन्तात् विसारयति, तदा का कथा अभिमानधनानां सचेतनानां तेजस्विनाम्? इति विशदाशयः। [अत्र सामान्यनाऽभिहितस्य तेजस्विनः परतेजःसहनाभावस्य विशेषेणाभिहितेन तेजोवमनेन भौतिकोपचारात् विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, आपत ... इति स्वभावोक्त्यादिनात् सापेक्षतया ... ... सहितेति ... ... न ... वीर, तथा च ... —"निर्गुणीभूतवस्तुनि ... ... सर्वत्रपि ... ... निगद्यते ॥" इति] ॥१४॥

चन्द्रकेतुः। तात! अमर्षोऽप्यस्य शोभते वीरस्य, पश्यतु हि तातः प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्वतः सैन्यानि। (स)

रामः। [विलोक्य]। वत्स लव! संह्रियन्तामस्त्राणि। त्वमपि चन्द्रकेतो! निर्व्यापारविलक्षितानि सान्त्वय बलानि। (ह)

लवः। यथा आज्ञापयति तातः।

[इति प्रणिधानं नाटयति]। (क)

चन्द्रकेतुः। यथाऽऽदिष्टम्। [इति निष्क्रान्तः]।

लवः। प्रशान्तमस्त्रम्।

(स) तातेति।—तात!—पितः!, पितृस्थानीय! इत्यर्थः, पूज्यतम इति यावत्। अस्य वीरस्य—अमुष्य शूरस्य लवस्य। अमर्षोऽपि—असहनाऽपि, परोत्कर्षासहिष्णुत्वमपीति यावत्। शोभते—भाति युज्यते इत्यर्थः। प्रियवयस्येन—प्रियसुहृदा लवेन, विनियुक्तं—निर्दिष्टं, प्रेरितमिति यावत्, यत् जृम्भकास्त्रं—तदाख्यं ब्रह्मादीनां तपःप्रभावसम्भृतमायुधं, तेन निष्कम्पं—निश्चलं यथा तथा स्तम्भितानि—जडीकृतानि, स्तम्भवन्निर्व्यापारीकृतानि इत्यर्थः। सर्वतः,—समन्तात्। सैन्यानि—बलानि, महाप्रभावस्यास्य लवस्य जृम्भकास्त्रप्रभावेण सम्मोहितानि अस्मद्बलानि समन्तात् चित्रार्पितानीवावतिष्ठन्ते, अतो निरतिशयवीर्यस्यास्यामर्षोऽपि स्थाने एवेति भावः।

(ह) संह्रियन्तां—शम्यन्ताम्, उपसंह्रियन्तामित्यर्थः, प्रयुक्तान्येतानि जृम्भकास्त्राणि समन्तात् सपदि समाक्रियन्तामिति यावत्। निर्व्यापारविलक्षितानि—व्यापारस्याभावः निर्व्यापारम् (इत्यव्ययीभावः) तेन हेतुना विलक्षितानि—विस्मयान्वितानि, ("विलक्षो विस्मयान्वितः" इत्यमरः) निश्चेष्टमवस्थिततया समधिकं विलक्षितानीत्यर्थः, बालस्यैकस्य सकाशे तदुपकरणानाम् असङ्ख्येयानां स्वपक्षीयवीराणां अभिभवदर्शनस्य अतीव लज्जाजनकत्वादिति भावः। सान्त्वय—मधुरवाग्भिराश्वासय।

(क) प्रणिधानं—चित्तैकाग्रताम्, उपसंहारकारकेण रहस्येन जृम्भकास्त्राणामनुसन्धानमिति भावः। नाटयति—अभिनयेन प्रदर्शयति।

राम। वत्स! सरहस्यप्रयोगसंहरणानि अस्त्राणि आम्नायवन्ति। (ख)—

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्राः शरदस्तपांसि।
एतान्यपश्यन् गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ १५ ॥

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः परःसहस्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, स तु भगवान् मह्यमित्येष तु पूर्वानुक्रमः। कुमारस्य पुनः कुतः सम्प्रदाय इति पृच्छामि। (ग)

(ख) सरहस्यप्रयोगसंहरणानि—सरहस्ये—समन्त्रके, प्रयोगसंहरणे—निक्षेपप्रशमने येषां तानि, येषां हि अस्त्राणां त्रिलोकीसंहारस्य [illegible] मन्त्रेणैव साध्यते, तानि इति भावः। अस्त्राणि—जृम्भकादीनि आयुधानि। आम्नायवन्ति—सम्प्रदायागतानि, गुरुपरम्परोपदेशमात्रप्राप्याणि इत्यर्थः, भवन्तीति शेषः, सम्प्रदायसिद्धतया गुरूपदेशं विना दुर्ज्ञानानीति भावः। ("आम्नायः सम्प्रदाये" इत्यमरः)।

अथैतेषां जृम्भकास्त्राणां गुरुपरम्परया समधिगमं तद्विषयमनुवर्णयितुं प्राक् तेषां ब्रह्मादिब्रह्मर्षिगणतपस्तेजोमयत्वमाह, ब्रह्मेति।—श्लोकोऽयं प्रथमाङ्के ४२ पृष्ठे व्याख्यातः ॥ १५ ॥

(ग) कौतुकी हि एतेषां जृम्भकाणां गुरुपरम्परासम्प्राप्तिरासीत्, तदेवेदानीं विवृणोति, अथेत्यादिना।—एतेषां मन्त्राणां—जृम्भकास्त्रप्रयोगसंहारमन्त्राणामित्यर्थः, पारायणं—[illegible], [illegible]—[illegible]। [illegible], तद्रूपा या उपनिषत्—गुह्यं येषां तां, जृम्भकास्त्रप्रयोगसंहारक्रमतत्त्वविद्यामिति यावत्। कृशाश्वः,—कौशिकपितामहः। परःसहस्रेति।—सहस्रात् परः इति परःसहस्राः ["[illegible]—" (६।[illegible] पा०) इति [illegible] निपात्यते] [illegible], [illegible],—[illegible], तान् व्याप्य अन्तेवासिने [illegible] "[illegible]" (२।[illegible] पा०) इति [illegible]। [illegible]

लव । स्वतःप्रकाशानि (घ) आवयोरस्त्राणि ।

राम । [विचिन्त्य] । प्रकृष्टपुण्यपरिपाकोपादानः कोऽपि महिमा स्यात्, द्विवचनन्तु कथम् ? (ङ)

लव । भ्रातरौ आवां यमजौ । (च)

राम । स तर्हि द्वितीयः क्व ? (छ)

धिकमपि वत्सरान् व्याप्य गुरुशुश्रूषारतायेति भाव । कौशिकाय—कुशिकनन्दनाय । प्रोवाच—उपदिदेश, उपदेशेन ददौ इत्यर्थ । पूर्वेषां,—पूर्व्वतनानाम्, आदिनानामुपाध्यायानामित्यर्थ, अनुक्रम,—पर्य्याय, अस्तीति शेष, एवं हि एतदस्त्रोपदेशक गुरुपरम्परास्थिति इति भाव । कुमारस्य—शिशोस्तवेति यावत् । कुत,—कस्मात् आचार्य्यादित्यर्थ । सम्प्रदाय,—पारम्पर्य्योपदेश, आयात इति शेष, कीदृशी हि भवता जृम्भकास्त्रोपदेशकगुरुकुलस्थितिरिति भाव । इति पृच्छामि—एतत्तु जिज्ञासे, मत्त भवता किञ्चित् गुरुकुलवैषम्यमस्ति न वेति तत्त्वत ज्ञातुमिच्छामि इति विशदार्थ ।

(घ) स्वत प्रकाशानि—स्वत,—स्वेनैव, उपदेशमन्तरेणैवेति यावत, प्रकाश,—आविर्भाव येषां तानि, निसर्गसिद्धानीति भाव ।

(ङ) प्रकृष्टेति ।—प्रकृष्ट—प्रकर्षं गत, सर्व्वातिशायीत्यर्थ, यत् पुण्य—शुभादृष्ट, तस्य य परिपाक,—परिणाम, स एव उपादान—निमित्त यस्य स, पुण्यप्रचयप्रकर्षवशादेव समुत्पद्यमान इत्यर्थ । कोऽपि—अनिर्व्वचनीय एवेति भाव । महिमा—माहात्म्यम् । स्यात्—भवेत्, अपरिज्ञातपुण्यातिरेकप्रभाववशेन एत ज्जृम्भकास्त्रलाभरूपाभ्युदयोऽपि भवितुमर्हतीति भाव । द्विवचनम्—"आवयो" इति द्विवचनप्रयोग इति यावत् । कथ ?—केन हेतुना कृतमित्यर्थं, एकस्मिन्नेव परिदृश्यमाने त्वयि कथ द्विवचनमनुप्रयुज्यते इति भाव, तर्हि भवतोऽपि अन्य कश्चिदेतादृश अस्ति किन्तु ? इत्याशङ्कितोऽर्थ ।

(च) यमजौ—यमौ भूत्वा जातौ, युगपदेव मातु द्वौ सम्भूतावित्यर्थं, एतेन ममापर एक सहोदर अस्तीति विज्ञापितमित्यवधेयम् ।

(छ) तर्हि—तदा । द्वितीय,—अपर, भवत अन्य इत्यर्थं । क्व ?—कुत्र ? आस्ते इति शेष, यदि भवन्तौ द्वौ भ्रातरौ, तदा अपरश्चेदानीं कुत्र वर्त्तते ? इति पृष्टव्यात्पर्य्यम् ।

[नेपथ्ये]। भाण्डायन! भाण्डायन! (ज)—

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ सखे! तथेति।
अद्यास्तमेतु भुवनेष्वधिराजशब्दः
क्षत्त्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥ १६ ॥

(ज) भाण्डायन!—भगवत्प्राचेतसशिष्यस्य कस्यचित् मुनिकुमारविशेषस्य आमन्त्रणमिदम्। [सम्भ्रमे द्विर्भावः] वसन्ततिलकेन श्लोकेन सहास्यान्वयः।

भगवद्भरताश्रमं रामायणकथाभागं नीत्वा ततः प्रत्यावर्त्तमानः कुमारः कुशः पथि लवकृतरघुकुलविरोधमाकर्णयन् स्वस्य वीर्य्यातिशयवत्तया परेषां वीर्य्यातिरेकम् असहिष्णुः स्वकीयां शौर्यक्षात्त्रकुलोपचारचेष्टां व्यक्तीकरोति, आयुष्मत इति।—आयुष्मतः दीर्घजीविनः, अस्य कनीयस्तया वात्सल्येन तथोक्तिरिति ध्येयम्, लवस्य तदाख्यस्य स्वानुजस्य, नरेन्द्रसैन्यैः नरपतेः रामस्य सैनिकैः सहेत्यर्थः, आयोधनं युद्धं, प्रवृत्तमिति शेषः, किल इति वार्त्तायाम्, तथाच—नरपतिसैन्यैः सह दीर्घायुषो लवस्य युद्धवार्त्तां यां परम्परया शृणोमि, तत् तथ्यं किम्? इति भाण्डायनं प्रति नेपथ्ये कुशस्य प्रश्नः, ननु! भोः! सखे! मित्र!, भाण्डायन! इति यावत् किमात्थ? किं ब्रवीषि? तथेति? यत्त्वया श्रुतं, तत् सत्यमेव, इति ब्रवीषि किम्? इत्यर्थः, "तथा" इति नेपथ्यस्थितेन भाण्डायनेनोक्तस्य कुशकृतप्रश्नोत्तरवचनस्य प्रतिध्वनिरूपेण कुशस्यैव पुनरुक्तिरियमिति बोध्यम्, यद्वा—तथा किल तद्वदेव हि, सत्यमेवेत्यर्थः, किलेति निश्चये, इति बोध्यम्, एवम्प्रकारमिति यावत्, किमात्थ? ब्रवीषि किम्? यदि सत्यं हि जन्यं स्यात्, तदा किं भवेदित्याशङ्कायां तत्फलमाह, अद्येति।—अद्य इदानीं, भुवनेषु जगत्सु, अधिको राजा इति अधिराजः ['राजाहःसखिभ्यष्टच्" (५।४।९१ पा०) इति टच्] स एव शब्दः सङ्केतः, समाख्येत्यर्थः, अस्तं विलयम् एतु गच्छतु, न केवलमधिराजशब्दलाञ्छितपुरुषान् विनाशयामि, अपितु तच्छब्दमेव जगतः विलोपयामीत्याशयः, सर्वथैव राजपदानां विलयकरणेन वाच्याभावात् वाचकशब्दस्यापि विलोपसाधनमिति भावः, अपि च अद्य क्षत्त्रस्य क्षत्त्रियजातेः, शस्त्रशिखिनः शस्त्राणि एव शिखिनः अग्नयः, शस्त्रानला इत्यर्थः, शमं निर्वाणं, यान्तु गच्छन्तु, भार्गवो रघुकुलमिवेति शेषः, इदानीमिक्ष्वाकुरघुकुल संहारेण केवलमेव क्षत्त्राणां विलोपो भविष्यति, का कथा केवलमधिराजशब्द

राम।— अथ कोऽयमिन्द्रमणिमेचकच्छवि-
ध्वनिनैव दत्तपुलकं करोति माम्।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम्? ॥ १७ ॥

स्येति भाव। [अत्र समासेन शस्त्रेषु शिखिनामभेदारोपात् समासगत निरङ्ग रूपकमलङ्कार]। वसन्ततिलक वृत्तम् ॥ १६ ॥

अथ श्रावद्गातपुत्रसमागमेनापि समुदितवात्सल्यविवशचेता रघुमणि हर्षाति रेकात् उद्गतपुलका स्वीया शारीरिकीमवस्थामनुपवर्णयति, अथेति।—अथ प्रश्ने ("मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ।" इत्यमर) इन्द्रमणि इन्द्रनीलमणि, तस्य मेचका असिता, ("कृष्णे नीलासितश्यामकालश्यामलमेचका।" इत्यमर) छविरिव छवि कान्ति यस्य स, इन्द्रनीलमणिश्यामलरुचिरकलेवर इत्यर्थ, तदुक्त मणिपरीक्षाया—"क्षीरमध्ये क्षिपेन्नील क्षीरञ्चेत नीलता व्रजेत्। इन्द्रनीलमिति प्रोक्तम्—" इति, कोऽय कुमार, ध्वनिनैव मेघगर्जनगम्भीरेण केवल कण्ठस्वरेणैव, न त्वालिङ्गनादिभिरिति भाव, दत्त समर्पित, पुलक रोमाञ्च, हर्षातिशयावेश जनित इति भाव, यस्मै तथाविधम्, यद्वा,—दत्त उत्पादित इत्यर्थ, पुलको यस्य तथाविध, माम्, नवेति।—नवाना नूतनाना, नीलाना श्यामलाना, नीरधराणा जलधराणा, धीरगर्जितस्य क्षणे काले, वर्षाकाले इत्यर्थ, क्षण मुहूर्त्तमभि-व्याप्येत्यर्थो वा, बद्धा उद्भूता, विकसिता इत्यर्थ, मेघगर्जनोदयसमकालमेव विकसिता इत्यर्थो वा, यद्यपि वर्षासु प्रायश कदम्बा मुकुलिता भवन्तीति दृश्यते, तथाप्यत्र कुमारकुशशब्दसमाकर्णनानन्तरमेव भगवद्रामभद्रस्य सर्वेषु गात्रेषु कदम्बकोरकसमपुलकोद्गमदर्शनात् मेघध्वनिसमुत्पत्त्यनन्तरमेव कदम्ब मुकुलोद्गमवर्णनेन साम्य मुनयश्चितमिति ज्ञेयम्, यद्वा—नवनीलनीरधराणा धीरेण गम्भीरेण, गर्जितेन निनादेन, य क्षण उत्सव, तेन बद्धा धृता, उद्भिन्ना इत्यर्थ, कुड्मला कोरका यस्य तथाविध, य कदम्ब नीपतरु, तस्य डम्बर समारम्भ, सादृश्य वा यस्मिन् तथोक्त प्रावृडुद्भिन्नकोरककदम्बवृक्षकान्तिमित्यर्थ, करोति विदधाति? कोऽय हि केवल मधुरवाग्भिरेव हर्षातिशय्य विदधत् कदम्ब वृक्षवत्पुलककलेवर मामकस्मादेव करोति? इति समुदितार्थ। [अत्र कुशशरीरे इन्द्रनीलमणिदर्शनच्छायोपदेशात् समासगता, एव रामशरीरेण च सह कदम्बकुड्मल साम्योत्प्रेक्षणात् वाच्या उपमालङ्कार, तयोमिथ नैरपेक्ष्येण संस्थिता, संसृष्टि, ,

लव। अयमसौ मम ज्यायान् आर्य्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्त। (झ)

राम। [सकौतुकम्]। वत्स! इत एव आह्वयैनमप्यायुष्मन्तम्। (ञ)

लव। एवम्। [इति परिक्रामति]।

[ततः प्रविशति कुशः]।

कुश। [साद्भुतहर्षधैर्य्यं धनुरास्फालयन्]। (ट)—

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो-
र्दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः।

नकाररकारयोरभेदात् साम्यात् वृत्त्यनुप्रासेन च ते संसृज्येते]। मञ्जुभाषिणी वृत्तम् ॥ १७ ॥

(झ) ज्यायान्—वर्षीयान्, अग्रज इत्यर्थः। [वृद्धशब्दादीयसुनि "ज्यायादीयसः" (६।४।१६० पा०) इति ईयसुन आकारादेशः "वृद्धस्य च" (५।३।६२ पा०) इति वृद्धस्य ज्याऽऽदेशः] भरतस्य—भगवतः नाट्यशास्त्रकृतः मुनिविशेषस्य, आश्रमात्—आवासात्। प्रतिनिवृत्तः,—प्रत्यागतः।

(ञ) सकौतुकं—कुमारस्य कुशस्य दर्शनाभिलाषजनितं यदौत्सुक्यं, तेन सह वर्तमानं यथा तदा। आयुष्मन्तं—प्रभूतायुषं, चिरजीविनमिति यावत्। [आयुःशब्दात् "भूमनिन्दाप्रशंसासु—" (वा०) इति मत्वर्थे मतुप्प्रत्ययः]।

(ट) अद्भुतं—विस्मयः, हर्षः,—आह्लादः, धैर्यं—धीरता, तैः सह वर्तमानं यथा तथा, अत्र [illegible]व्यापारदर्शने। विस्मयस्य, सूर्यवंशीयप्रतिपक्षवीरलाभेन हर्षस्य, तथा युद्धावसरे वीरजनानुगामिनो धैर्यस्य च समुद्भवोऽभूदिति ज्ञेयम्। धनुः,—कार्मुकम्। आस्फालयन्—समाकर्षन्, प्राहेति शेषः।

अथेदानीं स्वप्रतिपक्षवीरलाभेन स्वस्य क्षात्रविद्यायाः साफल्यमभिव्यञ्जयति, दत्तेन्द्रेत्यादि।—भगवतः षडैश्वर्यशालिनः, विवस्वतः सूर्यस्य अपत्यं पुमान् वैवस्वतः तस्मात्, सूर्यवंशप्रतिष्ठापकादित्यर्थः, असौ हि सूर्यवंशीयानां राज्ञां प्रथमः मन्वन्तरेऽस्य [illegible] मनुः आसीत्, मनोः जननात् मन्वन्तराधिपतेः आ वैवस्वत मनुनामकेभ्य, ["आङ् मर्यादावचने" (१।४।८९ पा०) इति कर्मप्रवचनीयत्वेन, तत्र तु कर्मप्रवचनीययोगविधायक "पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति

आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत् ततो
दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥१८॥

[विकटं परिक्रामति]।

राम। कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः।। (ठ)—

शाङ्गयोगात् पञ्चमो]। दत्ता समर्पिता, इन्द्राय देवराजाय अभयदक्षिणा असुरोपद्रवरूपविपत्प्रतीकारात्मकम् अभयदानं च तथाविधे, इन्द्रस्य वैरिणां दनुजानां मदमज्जितानां, दुर्वृत्तानामिति यावत्, दहनाय भस्मीकरणाय, समूलमुत्पाटनायेति यावत् धनसमाधानानुकूलनार्थमिति भावः, दीपितः प्रज्वालितः, निजस्त्रैः, क्षात्रतापः क्षत्रतेजः, क्षात्रप्रभाव इत्यर्थः, एव अग्निः अनलः यैस्तथाभूतैः, हिंसकानां विनाशायैव सततं प्रकटितपराक्रमैरिति भावः, आदित्यैः आदित्यस्यापत्यानि पुमांसः ते, सूर्यवंशीयैरित्यर्थः, नृपतिभिः राजभिः सह, यदि चेत्, विग्रहः विवादः, स्यादिति शेषः, ततः तदा, महाबलैः गुणवीर्यपरीक्षकैः सह विवादे सतीत्यर्थः [तच्छब्दात् सप्तम्या तसिल्] दीप्तानां भास्वराणां, ज्वाल्यमानानामित्यर्थः, अस्त्राणां प्रहरणानां, स्फुरन्तीभिः, विलसन्तीभिः, उद्दीप्यमानाभिरित्यर्थः, उग्राभिः भयावहाभिः, भीषणाभिरित्यर्थः, दीधितिशिखाभिः नराचिज्वालाभिः मयूखरूपदीप्तिततिभिरिति यावत्, नीराजिता आरात्रिकरूपमाङ्गलिकक्रियाभिः सत्कृता, [निपूर्वकात् राजतेः णिचि कर्मणि क्तः] ज्या मौर्वी यस्य तत्, यथा हि दीपादिभिः माङ्गलिकोपचारैः देवतादयः समभ्यर्च्य समुल्लाद्यन्ते, तथैव दीप्तास्त्रशिखाभिः तस्य धनुषः ज्या तदानीम् अलंकरिष्यतीति भावः, मम एतत् धनुः कार्मुकं, धन्यं श्लाघ्यं, प्रशस्यमित्यर्थः, भवेदिति शेषः, सन्नन्तरायणैस्त्ररायनाथे असुरावलीदर्पैः परन्तपैः गुणपक्षपातिभिः महावीरैः धानुष्कैः राजभिः यदि विग्रहः स्यात्, तदा मे सत्प्रतिपक्षस्य विविधनिगीतास्त्रप्रयोगशिक्षाकौशलं फलवत् भवेदिति भावः, गुणवद्भिः विवादोऽपि श्रेयसे भवतीति हृदयम्। [अत्र क्षत्रप्रतापे वह्नेरभेदारोपात् निरङ्गरूपकमलङ्कारः, नीराजितशब्दशक्त्या ज्यायां देवतात्वारोपोऽपि व्यज्यत इति रूपकालङ्कारध्वनिः]। शार्दूलविक्रीडितं वृत्तम् ॥१८॥

(ठ) कोऽपि—अनिर्वचनीयः, अनन्यसाधारण इत्यर्थः। अस्मिन्—पुरतः दृश्यमाने। क्षत्रियपोतके—क्षत्रियशिशौ, कुमारे इति यावत्। पौरुषस्य,—प्रभावस्य,

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमित्युत दर्प एव ॥ ॥ १९ ॥

तेजसः इत्यर्थः, अतिरेकः अतिशयः, आधिक्यमिति यावत्, अयं हि क्षत्त्रियशिशुः निरतिशयं पौरुषं बिभर्त्तीति दृश्यत इति भावः ।

बालस्यास्य असामान्यवीर्य्ययोगात् पौरुषविशेषशोभिनीमाकृतिं गतिञ्च विशदीकृत्य व्यनक्ति, दृष्टिरिति।—दृष्टिः विलोकनम्, अस्य क्षत्त्रियपोतकस्येति शेषः, तृणीकृतः अतृणं तृणं यथा सम्पद्यते तथा कृतः, तृणवद्गणित इत्यर्थः, जगत्त्रयस्य त्रिभुवनस्य सत्त्वसारः बलोत्कर्षः यया तथाभूता, भवतीति शेषः, अयं हि तेन पूर्णदृष्टिविक्षेपे प्राणिमात्राणां तेजांसि परिभवन् त्रिलोकीमपि तृणाय मन्यते इत्यनुमीयते इति भावः, तथा धीरा गाम्भीर्य्यवती, अचञ्चलेत्यर्थः, अपि च उद्धता दृप्ता, शौर्य्यभूयिष्ठेत्यर्थः, गतिः पदक्षेपः, धरित्रीं पृथिवीं, नमयतीव अधः प्रेरयतीव, अस्यातिगुरून् पादन्यासान् विसोढुमशक्नुवाना पृथिवी अपि अधोगता भवतीवेति विभाव्यते, कौमारकेऽपि अतिबाल्येऽपि, का कथा यौवनस्येत्यपिशब्दार्थः, गिरिवत् गिरितुल्यं ["तेन तुल्यं क्रिया चेद्वतिः" (५।१।११५पा०) इति तुल्यार्थे वतिप्रत्ययः] गुरुतां गौरवं, भारवत्त्वमित्यर्थः, अप्रतिहतभावमिति यावत्, दधानः धारयन्, ["ताच्छील्यवयोवचनशक्तिषु चानश्" (३।२।१२९ पा०) इति शक्तौ वयसि वा चानश्]। गिरयो हि उत्पत्तिकालमारभ्यैव गुरुत्वभाजः भवन्तीति विभाव्यम्, अयं कुमारः, वीरो रसः किम्? साक्षात् वीरो रसः किम्? मूर्त्तिमान् वीररसस्य स्थायिभावः उत्साहः किमित्यर्थः, उत अथवा, दर्प एव अस्य सारभूतः अहङ्कार एव, विग्रहवान् वीरत्वगर्व एवेत्यर्थः, तन्मूर्त्तिमत्त्वेनैवेति भावः, एति॥ आगच्छति, शैशवेऽपि अतिशौर्य्यविसर्पितोऽयं किम् वीररसस्य दर्पस्य वा दर्पं परिगृह्य विचरति? ("एति" इति पाठान्तरम्) नायं शिशुः क्षत्त्रियपोतः अपितु मूर्त्तिमान् वीररसः दर्पो वा अस्तीति भावः। [अत्र गत्या [illegible] अननितत्वरूपे नानितत्वोक्तिः उत्कटैककोटिकसंशयोत्प्रेक्षा वाच्या [illegible] अलङ्कारः, तथा प्रथमपादे दृष्ट्या सत्त्वसारस्यातृणीकृतत्वेऽपि तृणीकृतत्वोक्तेः तथैव [illegible] प्रतीयमानक्रियोत्प्रेक्षाऽलङ्कारः अपि [illegible] कुमारे [illegible] वीररसदर्पयोः [illegible] गुरुत्व[illegible]अलङ्कारः,

लव। [उपसृत्य]। जयति आर्य्यः।

कुश। नन्वायुष्मन्। किमियं वार्त्ता युद्ध युद्धमिति ? (ड)

लव। यत्किञ्चिदेतत्। उद्दृप्तभावमुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्तताम्। (ढ)

कुश। किमर्थम् ?

लव। अत्र देवो रघुपतिस्तिष्ठति, स च स्निह्यति आवयोः उत्कण्ठते च युष्मत्सन्निकर्षस्य। (ण)

कुमारे गिरि हास्योत्कीर्त्तनादुपमाऽलङ्कारः, एतेषाञ्चतुर्णां मिथः नैरपेक्ष्येण संस्थितेः संसृष्टिः। अत्र हि वीरो रसः, तथाहि, भगवान् रघुमणिरेव आलम्बनविभावः, तस्य तु जगद्वरविश्रुत सत्त्वसार एवात्र उद्दीपनविभावः, कुमारस्य लवस्यान्वेषण-मेवात्रानुभावः, कुमारस्य कुशस्य धीरोद्धतगतौ अभिव्यक्तौ धृतिगर्व्वौ अत्र सञ्चारिभावौ एतैरभिव्यक्त उत्साहरूपस्थायिभाव एवात्र वीररसरूपतामिति इति ज्ञेयम्। श्लोकेऽस्मिन् वीररसस्य तथा तत्सञ्चारिभावस्य दर्पस्य स्वशब्देनोल्लेखात् रसदोष इति ज्ञेयः,—"रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि।" इति दर्पण-लक्षणात्]। वसन्ततिलकं वृत्तम्॥ १९॥

(ड) आयुष्मन्।—चिरजीविन्। युद्ध युद्धमिति—युद्ध युद्धमित्याकारिका, [वीप्सायां द्वित्वम्] इयं वार्त्ता—ईदृशी कथा। किम् ?—कथम् ? अनुश्रूयते इति शेषः, किमर्थं हि युद्ध युद्धमिति वार्त्ता निरन्तरमाकर्ण्यतेऽस्माभिरिति भावः, केन सह कुत्र कथं सङ्घटितमिति पृच्छामि इति तु हृदयम्।

(ढ) यत्किञ्चिदेतत्—युद्ध युद्धमिति यदनुश्रूयते, तत् न किमपीत्यर्थः, तत् तुच्छं वस्तु अतितुच्छमिति बुद्ध्या भवद्भिः परिहातव्यमिति भावः। उद्दृप्तभावं—महागर्व्वितभावम्, अतीवोद्धतमिति यावत्। ("उद्दृप्तभावम्" इत्यत्र "दृप्त भावम्" इत्येव पाठो बहुपुस्तकेषु दृश्यते) उत्सृज्य—विहाय। आर्य्यः—तत्र-भवान् भवान्। अस्मिन्—भगवति रघुमणौ रामभद्रे। विनयेन—प्रह्वतया, अनौद्धत्येन इत्थं भक्तिनम्रतयेति यावत्। वर्त्तताम्—तिष्ठतु, इदानीं वीरभावं विहाय पुरोवर्त्तिनि अस्मिन् भगवति रघुमणौ प्रश्रयविनम्रमूर्त्तिभाक् भवतु भवानिति भावः।

(ण) अत्र—अस्मिन् स्थाने, युद्धभूमावित्यर्थः। देवः,—महाराजः। रघुपतिः,—

कुश। [सतर्कम्]। स रामायणकथानायको ब्रह्मघोषस्य गोपायिता? (त)

लव। अथ किम्?

कुश। आगमनीयपुण्यदर्शनः स महात्मा, किन्तु कथमस्माभिरुपगन्तव्य इति न सम्प्रधारयामि। (थ)

रघुकुलनायक भगवान् रामभद्र। तिष्ठति वर्त्तते। स च—रघुनाथश्च। आवयो—त्वयि मयि चेत्यर्थ। स्निह्यति—निरतिशयं वात्सल्यं बिभर्त्ति। युष्मत्सन्निकर्षस्य—भवत्सन्निधानस्य, तव सामीप्यस्येति यावत्। उत्कण्ठते—औत्सुक्येन स्मरति, आकाङ्क्षते इत्यर्थ, अत्युत्कण्ठित सन् भवद्दर्शनमभिवाञ्छतीति यावत्, उभयोरप्यावयो सातिशयां प्रीतिं प्रकाशयति, भवतश्चेदानीमप्यप्राप्तत्वात् तत्राभाव नितरामुत्सुकायत इति भाव। ["युष्मत्सन्निकर्षस्य" इत्यत्र "षष्ठी शेषे" (२।३।५० पा०) इति सम्बन्धमात्रविवक्षायां षष्ठी, "मातुः स्मरति" इतिवत् इति ध्येयम्। उत्पूर्वकस्य भौवादिकस्य कठिधातो रूपम्]।

(त) सतर्कम्—तर्केण—अयं रामायणकथानायको न वेत्याकारकसंशयेन सह वर्त्तमानं यथा तथा सन्दिह्यानेति यावत्। रामायणकथानायक—रामायणमहाकाव्यस्याश्रयभूत महापुरुष इत्यर्थ। ब्रह्म घुष्यते—श्रूयते अस्मिन्निति [कर्मणि घञ्] ब्रह्मघोष—वेद तस्य। ('ब्रह्मकोषस्य" इति पाठान्तरम्) गोपायिता—रक्षक। [गोपायते गोपायतेः तृच्] राज्ञ वर्णाश्रमधर्मरक्षकतया वेदानामपि तन्मूलकतया परम्परया तद्रक्षकत्वं ज्ञेयम्, अथवा प्रलयपयोधिनिमग्नेषु वेदेषु पुरा भगवान् मीनरूपमास्थाय तानुद्दधार इति पौराणिका आमनन्ति, अस्यापि भगवतः वेदविद्विषां रावणादीनां निहन्तुः तदंशसम्भूततया तथाभूतत्वमित्यपि मन्तव्यम्।

(थ) आगमनीयेति।—आगमनीय—प्राप्तव्यम्, सततमाकाङ्क्षणीयमिति यावत्, पुण्य—पवित्रं निरतिशयपावनमित्यर्थ, दर्शनम्—अवलोकनं यस्य स। स महात्मा—महाशय रघुनाथ इत्यर्थ। कथं—केन प्रकारेण, कीदृशोपचारेणेति यावत्। उपगन्तव्य,—उपसर्पितव्य, उपेतव्य इत्यर्थ। सम्प्रधारयामि—निश्चिनोमि, कीदृशोपचारेण असौ महापुरुष अस्माभिरुपसर्पणीय इतीदानीं न निश्चेतुं शक्नोमि इति भाव।

लव। यथा गुरुस्तथोपचारेण। (द)

कुश। अपि कथं नामैतत्?

लव। अत्युदात्तः सुजनश्चन्द्रकेतुः और्म्मिलेयः प्रियवयस्य इति सख्येन मामुपतिष्ठते, तेन तत्सम्बन्धेन च धर्म्मतात एवायं राजर्षिरिति। (ध)

कुश। सम्प्रति करणीयो राजन्येऽपि प्रश्रयः। (न)

(द) यथा—यादृशेनोपचारेण। गुरुः,—पित्रादिरूपः महागुरुजनः इत्यर्थः, उपसेव्यते इति शेषः। तथोपचारेण—तादृशेनैव सत्कारेण, तस्मादविशेषेणैव उपचारेण पितृस्थानीयः महापुरुषोऽसौ अस्माभिः समभ्यर्चनीयः इति भावः, प्रश्रयविनयमूर्त्तिरद्य भवान् तत्समीपमुपगच्छतात् तात्पर्य्येण।

(ध) अत्युदात्तः,—अत्युदारचेताः, महात्मा इत्यर्थः। सुजनः,—निरतिशयसौजन्याधारः। और्म्मिलेयः,—ऊर्म्मिलायाः अपत्यं पुमानित्यर्थे [ऊर्म्मिलायाः "स्त्रीभ्यो ढक्" (४।१।१२० पा०) इति ढक्] ऊर्म्मिलानन्दन इत्यर्थः। (अतिस्नेहवत्ताद्योतनार्थं मातृनामोल्लेखः) प्रियवयस्य इति—प्रियबन्धुरिति सम्भाषणेनेति यावत्। सख्येन—मैत्र्या, सौहार्द्देनेति यावत्। मामुपतिष्ठते—मां समभ्युपैति, मया सह दृढां मैत्रीं करोतीति भावः। ["उपाद्देवपूजामैत्रीकरण—" (वा०) इत्यात्मनेपदम्]। तेन तस्मात्, अमुना सह मैत्रीविधानादिति भावः। तत्सम्बन्धेन—तस्य—चन्द्रकेतोः सम्बन्धेन—ज्येष्ठपितृत्वरूपसम्पर्केण, यतोऽयं चन्द्रकेतोः ज्येष्ठतातः तेन हेतुनेति भावः। अयं राजर्षिः—राजा भूत्वाऽपि क्षमादिगुणशालित्वात् ऋषिसन्निभः अयं रघुनाथः। [राजा चासौ ऋषिश्चेति कर्म्मधारयः]। धर्म्मतातः,—धर्म्मेण—लोकाचारानुसारेणेति यावत् तातः,—पिता, पितृस्थानीय इति भावः, तेन हि पितृवदेवासौ सबहुमानमस्माभिरुपसेवनीय इति निगूढाशयः।

(न) सम्प्रति—अधुना, धर्म्मतातत्वसम्पर्कात् सम्प्रहारदशायामपीति यावत्। राजन्येऽपि—क्षत्रियेऽपि, जात्या आवयोः समे एतस्मिन् महापुरुषे रघुमणौ ननोऽप्य धर्म्मपितृत्वसम्बन्धयोगादित्यपिकाराशयः। प्रश्रयः,—प्रणयः, विनय इति यावत्, स्नेहोद्भवोपचार इति भावः। ("प्रश्रयप्रणयौ समौ" इत्यमरः) करणीयः—विधेयः, धनुष्मतापि न अतोऽस्माभिः पूज्यतमे क्षत्रिये पितृस्थानीये विनयित्वप्रदर्शन

लव । पश्यतु एनम् आकारानुभावगाम्भीर्य्यसम्भाव्यमान-विविधलोकोत्तरचरितातिशयसार्व्वी महापुरुषम् । (प)

कुश । [निरूप्य] ।—

अहो । प्रासादिकं रूपमनुभावश्च पावनः ।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत् ॥ २० ॥

समुचितमेवेति भावः । ("करणीय" इत्यत्र "श्रवचनीय" इति पाठान्तरं दृश्यते, तत्र अवचनीयः,—अनिन्दनीयः इत्यर्थः, वाच्यत्वसाम्येऽपि गौरववत्त्वात् विनीतत्व प्रदर्शनं मे न दोषायेति भावः)।

(प) आकारेति ।—आकारेण—सौम्यमूर्त्त्या, अनुभावेन—प्रभावेण, तथा गाम्भीर्य्येण—अनभिज्ञैरविज्ञायमानातिनिगूढहृद्गतभावेन च, सम्भाव्यमानः,—अनुमीयमानः, विविधः,—अनेकविधः प्रभूत इत्यर्थः, लोकोत्तरः,—अलौकिकः, सर्वातिशायी इति यावत् चरितातिशयः—चारित्रोत्कर्षः, हरधनुर्भङ्गाहल्यामुक्तिसेतुबन्धरावणवधादिरूपः इत्यर्थः, यस्य तं, महापुरुषं—प्रधानं पुरुषम्, निसर्गसौम्येन आकारेण सर्व्वतोऽभिभाविना प्रभावेण चायं महापुरुषः हरधनुर्भङ्गप्रभृति लोकोत्तरं कार्य्यजातं सम्पादयितुमेव भूलोकमवतीर्ण इति सुस्फुटमेव प्रतीयत इति भावः, "यत्राकृतिस्तत्र गुणा वसन्ति" इति सामुद्रिकवचनादित्याशयः ।

अथ रघुनन्दनो मर्त्त्यलोकविस्मयकरं रूपं प्रसमीक्ष्य महामुनेः प्राचेतसस्य यथार्थतत्प्रभाववर्णनानुगुणानां वाचां प्राक् तेन निबद्धानां सत्यतां निरपवादत्वञ्च विभाव्य प्रतिपादयति अहो इत्यादिना ।—अहो !—अतीव विस्मयकरम्, प्राक् कदाऽपि एवंविधस्य रूपस्य नयनपथम् अपरिगतत्वादिति भावः, प्रासादिकं निरतिशयहृदयनिर्वापकं, रूपं लावण्यम्, यस्मिन् नीरन्ध्रे रूपे नयनपथे समापतित एव कृतार्थत्वं दृष्टान्तं भवतात् अननुभूतपूर्व्वस्य अनुतापमानं आनन्दसन्दोहसौख्यानि दृग्भ्याम् अनन्तेऽपि मानसपथे समुदेतीति भावः । ("प्रासादिकम्" इत्यत्र "प्रासादिकम्" इति पाठान्तरं दृश्यते, प्रसादगुणपरिचयं जनयतीति तदर्थः, प्रसादो हि विशदः स्वच्छः अनुग्रहात्मकता वा, तथा च एतादृशस्य रूपस्य दर्शनात् ननु निरतिशयचित्तप्रसत्तिः स्यादेव तथा च दृष्टान्तरूपोत्कर्षं दर्शितं तात्पर्य्यम्)। अपिच पावनः पवित्रः, अनुभावः प्रभावः, आत्मीयापर सम्बन्धिनां परिगतः जन्मनिवहापि सततं काल्यपरिपोषकत्वात्, तत्तदविघ्नस्थापकप्रशिक्षणमनिवार्यं तत्कालिकं निरतिशयपावनत्वम् अवश्यं भवतीति भावः, अतः वाल्मीकिः रामायणमहाकाव्यस्य रचयिता महर्षिः

[उपसृत्य]। तात! प्राचेतसान्तेवासी कुशोऽभिवादयते। (फ)

राम। एहि आयुष्मन्!—

अमृताध्मातजीमूतस्निग्धसंहननस्य ते।
परिष्वङ्गाय वात्सल्यादयमुत्कण्ठते जनः॥ २१॥

भगवान् प्राचेतसः, स्थाने योग्यपात्रे, यस्य हि वाचा यथा पावनत्वं, तथैव स्वप्रतिपाद्यवस्तुन समधिकपवित्रत्वादित्याशयः, यद्वा—स्थाने सम्यक्, युक्तमेवेत्यर्थः, समीचीनस्य विषयस्योपवर्णनात् सुयोग्यविषयोपवर्णनेन स्वकाव्यप्रणयनप्रयासस्य साफल्योदयादिति भावः, देवीं वाचं वाग्देवीं, स्वस्य निर्गतां भारतीमिति यावत्; व्यवीवृधत—विवृतवान् व्यवर्णयदित्यर्थः, कृतिना महामुने वाग्विजृम्भणं धीरोदात्तनायकरूपविशुद्धविषयलाभात् सातिशयं हृद्यमभूदिति भावः। [इत्योत तानादिकात् धातो णिचि लुङि रूपं, "व्यवीवर्णत" इत्यप्यत्रास्य पदान्तरं भवतीति विभाव्यम्। अत्र तु "व्यवीवृतत्" इति पाठान्तरं दृश्यते, तत्रापि स एवार्थः। अत्र भगवतो रघुमणे प्रभाववर्णने एकस्मिन् प्रामोदिकरूपकारणे सत्यपि पावनानुभावरूपस्य हेत्वन्तरस्योपादानात् समुच्चयोऽलङ्कारः, अपि च पराङ्गं प्रति पुनार्थस्य हेतुतयोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, एतयोः सापेक्षतया संस्थितेः सङ्करः]। पथ्यावक्त्रं वृत्तम्॥ २०॥

(फ) उपसृत्य—उपगम्य रामस्यान्तिकमागम्येत्यर्थः। तात!—पितः, अविज्ञातसम्बन्धस्य कुशस्यैतत् सम्बोधनं चन्द्रकेतुना सह भ्रातुर्लवस्य मैत्रीसंस्थापनकृतमिति ज्ञेयम्। प्राचेतसस्य—वाल्मीकेः, अन्तेवासी—शिष्यः। अभिवादयते—नमस्यति। [अभिपूर्वकाद्वदधातोः णिचि नमस्कारे वर्तते, फलवत्कर्तरि आत्मनेपदम्]।

अथेदानीं रघुमणिरप्रज्ञातसम्बन्धोऽपि स्वपुत्रे कुशे नैसर्गिकवात्सल्योदयात् तदङ्गसङ्गेन सुखमनुभवितुमौत्सुक्यमाविष्करोति, अमृतेति।—अयं जनः रामरूपोऽहम् इत्यर्थः, वात्सल्यात् स्नेहात्, त्वां दृष्ट्वा अकस्मात्समुद्भूतस्नेहविवशकारात् सन्निमित्तात्, अमृतेन जलेन ("अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते।" इति मेदिनी) आध्मातः परिपूर्णः, सजलनवजलधरस्यातीव स्निग्धकरत्वादित्याशयः, यद्वा—अमृतं पादपमर्दनिर्घोषं, आध्मातः शब्दितः, ध्वनितिरिति यावत्, यस्य तथाभूतः, ("आध्मातः शब्दिते दग्धे वातरोगेऽदमुतः।" इति मेदिनी) स्निग्धगम्भीरनिर्घोष इति भावः, यः जीमूतः मेघः, [जीवनं जलं तत् मूतं बद्धमनेनेति विग्रहे पृषोदरादित्वात् साधुः, यद्वा—जिनातीति जीः, जयतेः क्विप्, तं मूतः बद्धः अयत् अत्री इति व्युत्पत्त्या,

[परिष्वज्य स्वगतम्]। तत् किमपत्यमयं दारकः? (व)—

अङ्गादङ्गात् सृत इव निजः स्नेहजो देहसारः
प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेव।

जिनाति कर्त्तरि क्तिप्, सबत चौरादिकस्य कर्म्मणि निष्ठाया रूपम् इति जीमूत-शब्दसिद्धि, अथवा—जीवस्य मूत पटबन्ध इव इति विग्रह]। तद्वत् स्निग्ध मसृण, सुखस्पर्शमिति यावत् ["उपमानानि सामान्यवचनै" (२।१।५५ पा०) इति उपमितसमास]। संहननं वपु यस्य तथाभूतस्य, ("गात्रं वपु संहननम्" इत्यमर) नवजलधरसुशीतलकोमलकलेवरस्येति भाव , ते तव, [कृद्योगात्कर्म्मणि षष्ठी] परिष्वङ्गस्य समालिङ्गनस्य, ["षष्ठी शेषे" (२।३ ५० पा०) इति सम्बन्धमात्र विवक्षाया षष्ठी। "परिष्वङ्गाय" इति पाठे तु—परिष्वङ्गाय समाश्लेषाय, त्वां परिष्वङ्क्तुमित्यर्थ, "तुमर्थाच्च भाववचनात्" (२।३।१५ पा०) इति चतुर्थी] उत्कण्ठते समुत्सुको भवति, व्याकुलीभवतीत्यर्थ, "सर्व्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते। तत्प्राप्तीच्छा ससङ्कल्पामुत्कण्ठां कवयो विदु ॥" इत्युत्कण्ठालक्षणात्। तथा चैवमभिलाषुको भवतीति वा भाव । [अत्र समासेन जीमूतेन सह संहननस्यावैवर्ण्यसाम्योपदेशात्समासगतोपमाऽलङ्कार]। पथ्यावक्त्रं वृत्तम् ॥ २१ ॥

(व) तत्—तर्हि। अयं दारक,—बालक, कुश इत्यर्थ। किमपत्यम्?—मम औरस तनय किम्?, नो चेदेवं, तदा अस्य समालिङ्गने एतादृशानिर्व्वचनीयसुखस्योदयासम्भवादिति भाव ।

अथ स्वस्य अपत्यसमालिङ्गनसदृशानिर्व्वचनीयसुखसमनुभूतिप्रकारमाह, अङ्गादिति।—निज स्वकीय, मदीय इति यावत्, स्नेहज वात्सल्यातिरेकात्समुद्भूत, देहसार देहस्य शरीरस्य, सार स्थिरांश, यद्वा—देहे मांसपिण्डमये निरुपमरूपाधारे अस्मिन् शरीरे, य सार लावण्यराशि इत्यर्थ, अङ्गात् अङ्गात् प्रत्यवयवात्, सर्व्वस्मात् अङ्गात् इत्यर्थ, सृत इव चरित इव, निष्यन्दमानस्य , मम शरीरस्य सर्व्वत्र प्रत्यङ्गम् आन्तर सारसमुदाय विगलितो भवन् झटिति अभ्यन्तर प्रदेशात् बहिर्निसृत पिण्डीभूत दारकरूपेण संस्थित इवेति मन्ये इति भाव , अनुपमानन्दजनकत्वात्। हि मम शरीरोपादानक सारसमुदाय पुञ्जीभूय बहिर्निर्गतो भवतीति मन्ये तदेवं शरीरस्य सर्व्वत्र विगलनादुदयात् इति चेयम्,
अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि ...इत्यादिश्रुतौ पुत्रस्य स्वशरीरादभिन्नत्वोक्तेर्ना-

देहाद्भेदं चेतनाधातुरिति विभाव्यम्, चेतना चेतय, ज्ञानमित्यर्थ, स एव धातु शरीर

सान्द्रानन्दक्षुभितहृदयप्रस्रवेणेव सृष्टो
गात्रं स्नेहे यदमृतरसस्रोतसा सिञ्चतीव ॥ २२ ॥

लव । तात ! ललाटन्तपो घर्मदीधितिः, तदत्र सालच्छाये मुहूर्त्तमासनपरिग्रहं करोतु तातः । (भ)

धारकज्ञात पश्चादिदस्तुनिश्चय, तमहमन्तर्निगूढानन्दविश्रान्तिभाजिन तथायामेव चैतन्यस्य सत्त्वात तत्र तदनेगारोप इत्यवधेयम्, स एव प्राटमूर्य आविर्भूत, शरीराभ्यन्तरात् निःसृत्य बाह्ये बहिर्देशे स्थित इव वर्त्तमान इव अयं दारक इत्यन्वय, अय मूर्त्तिमान् मे चैतन्यपदार्थ इव प्रतिभाति अन्यथा कथं हि समालिङ्गनसमये तदद्भुत-सुखोपभोगजनकाले चैतन्यलोपः सञ्जायते इत्यवधेयम्, यत यत, सान्द्रं प्रगाढ, य आनन्द इव तेन क्षुभितम् आलोडित, यत् हृदयम् अन्तःकरण, स एव प्रस्रव-प्रस्रवण, निर्झर इत्यर्थ तेन, निविडानन्दोदयात् स्वत उच्छुसेन हृदयोद्वेगेनेति भाव, सृष्ट इव निर्मित इव, अयं दारक इति प्रागुक्तेनान्वय, अन्त उच्छुस्य-मानस्य निर्झरस्य बहिः प्रकटीभाववत् तत्समये सहसा चञ्चलीभूतस्य हृदयस्यापि अभ्यन्तरदेशात् दारकरूपतया बहिः प्रकटनमुत्प्रेक्षितमिति वेदितव्यम् । अपि एतस्य समालिङ्गनावसरे, गात्रं मदीयं सकलमेवाङ्गम्, अमृतरसस्रोतसा अतिप्रभूतेन पीयूषरसप्रवाहेण सिञ्चतीव अभिवर्षतीव, प्रतिप्रतीकमेवासामान्यसुखोदयादिति भाव अस्य दारकस्य परिष्वङ्गसमये एव हि मे अननुभूतपूर्वेण हर्षातिशयेन समुद्भूतं, यदसौ दारको मे शरीरसार बहिर्विगलितमिव कृत्स्नं चेतनामपि सञ्चदेव विनोपयन् अकस्मात् निमग्नानन्दसन्दोह प्रस्रवणरूपेण बहिः समुद्गाविर्भावयंश्च मोहविवशानि मदङ्गानि सुधारसधारासु निमज्जयतीवेति मन्ये इति समुदित-तात्पर्यम् । [अत्र दारकस्य सुतस्नेहसाररूपत्वेन तथा धातुरूपत्वेन चोत्कीर्त्तनात् द्वयोरभेदाऽलङ्कार, अपि च अमृतरसस्रोतसा सेचनाभावेऽपि सेचनोत्कीर्त्तनात् विशेषोक्त्याऽलङ्कार, चेतनाया धातोरभेदाध्यानाच्च रूपकमलङ्कार, एतेषां चतुर्णां परस्परनापेक्षतया सङ्कर इति बोध्यम् । "स्नेहो देहसार" इत्यत्र "देहज स्नेहसार" इति पाठान्तरं दृश्यते तथापि नास्ति कश्चित् अर्थगतो विशेष इति बोध्यम्] । मन्दाक्रान्ता वृत्तम् ॥ २२ ॥

(भ) ललाटन्तप,—भालदेशसन्तापकर, अतिप्रदीप्त इत्यर्थ । [ललाटं तपतीति व्युत्पत्त्या "असूर्यललाटयोर्दृशितपो" (३।२।३६ पा०) इति खश्प्रत्यय] । घर्मा,—उष्मा, दीधितय,—किरणा यस्येति घर्मदीधिति,—सूर्य । सालस—

राम। यदभिरुचितं वत्साय। (म)

सर्वे। [परिक्रम्य उपविशन्ति]।

राम। [स्वगतम्]।—

अहो। प्रश्रययोगेऽपि गतिस्थित्यासनादयः।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च॥ २२॥
वपुरविहितसिद्धा एव लक्ष्मीविलासाः
प्रतिजनकमनीयं कान्तिमत् केतयन्ति।

वृक्षविशेषस्य, छाया इति सालच्छायं तस्मिन् ["विभाषा सेनासुरा—" (२।४।२५ पा०) इति पाक्षिकं क्लीवत्वम्] सालतरुतले। मुहूर्त्तं—कियन्तं कालमित्यर्थः। ["कालाध्वनो—" (२।३।५ पा०) इति व्याप्त्यर्थे द्वितीया]। आसनस्य परिग्रहः,—स्वीकारः तम् उपवेशनमित्यर्थः। करोतु—विदधातु।

(म) यत्—यादृशं कर्मेत्यर्थः। अभिरुचितं—रुचेः विषयकं, रोचते इत्यर्थः। वत्साय—स्नेहास्पदाय, आयुष्मते तुभ्यं यदेवाभिरोचते, तदेव क्रियते मयेत्यर्थः। ["रुच्यर्थानां प्रीयमाणः" (१।४।३३ पा०) इति चतुर्थी। वत्सस्य प्रीयमाणत्वात् सम्प्रदानत्वम्]।

अथ कुमारयोः विनयमूर्त्तिधरयोः चक्रवर्त्तिलक्षणयोगं समालोक्य तत्र साश्चर्यं मौनपदभाक् वितर्कयति, अहो इति।—प्रश्रयस्य विनयस्य, योगेऽपि सम्बन्धेऽपि, यद्यप्येतौ मुनिवत् प्रशान्तचेतसौ दृश्येते तथाऽपीत्यर्थः, कुशस्य च लवस्य च तदाख्ययोरेतयोः बालयोः, गतिः गमनं, पादविक्षेपादिकमित्यर्थः, तथा स्थितिः अवस्थानं, निर्व्यापारतया अवस्थितिरित्यर्थः, अपिच आसनम् उपवेशनं, तानि एव आदयः येषां ते तथाभूताः, आदिशब्दात् आपणवीक्षणादि परिग्रहः, भावाः अवस्थाः, शरीरव्यापारक्रियासमूहा इति भावः, साम्राज्यशंसिनः राज्यलक्षणानाम् सूचकाः, भवन्तीति शेषः तथाहि सामुद्रिके—"चक्रध्वजाङ्कितौ हस्तौ पादावथापि कोमलौ। यस्य पल्लवितौ रक्तौ तस्य राज्यं विनिर्दिशेत्॥" इति। यद्यप्येतौ मुनिबालकाविव तपोवननिवासानुरूपं गमनमुपवेशनादिकञ्च विदधतः, तथाऽप्येतौ न हि साधारणौ ऋषिबालकौ। यदिमेऽत्र एतयोः वपुः तेजोविशेषविभावित राजलक्षणानि अविसंवादकानि चिह्नानि दृश्यन्ते, अतः राजवंशसम्भूतौ एतौ इति तर्कयामि इति नु मनुदिताय। २२।

अपिच एतयोरेव आकृतिविशेषावलोकनपूर्वकान् भावविशेषान् विवृणोति,

अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा
विकसितमिव पद्मं बिन्दवो माकरन्दाः ॥ २४ ॥

भूयिष्ठाञ्च रघुकुलकुमारच्छायामनयोः पश्यामि। (य)—

कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धसबन्धुरांशकम्।

वपुरित्यादि।—त प्रसिद्धा मनोज्ञा हृदयग्राहिण्, रश्मय दीधितय, अमलिन समुज्ज्वल, रत्नमिव भास्वरमणिविशेषमिव, मकरन्द पुष्परस, तस्य इमे माकरन्दा' पुष्परससम्बन्धिन इत्यर्थ [मकरन्दशब्दात् तत्सम्बन्धार्थे अण्] बिन्दव कणा, विकसित प्रस्फुटितं, पद्ममिव कमलमिव, यथाहि मनोहररश्मिराजय सुविशुद्ध- रत्न समधिक विभूषयन्ति यथा वा पुष्परसलवा प्रफुल्लपद्मप्रसून सातिशय समल- ङ्कुर्व्वन्ति, तथैवेत्यर्थ, अविहितसिद्धा नास्ति विहित विधान, प्रयत्न इति यावत, यस्मिन् कर्म्मणि तद्यथा स्यात्तथा, सिद्धा स्वयमुत्पन्ना, कमपि प्रयत्न विनैव समुद्भूता इति यावत् लक्ष्म्या सौन्दर्य्यस्य, विलासा विलसितानि, स्फुरणानि इति यावत् लक्ष्मीविलासा एव सौन्दर्य्यस्फुरणानि एव, लावण्यसम्पत्तय एव इति यावत्, प्रतिजनकमनीय सर्व्वजनमनोहर, कान्तिमत सौन्दर्य्यपूर्णं, वपु शरीर, कुश लवयोरिति शेष, केतयन्ति अलङ्कुर्व्वन्ति, निरुपमस्वाभाविकरूपराशय मनोहर मेतच्छरीर सुशोभयन्ति इत्यर्थ, अनायासलब्धलावण्यपरिस्फूर्त्ति स्वाभाविकसौन्दर्य्या- कर बालयोरेतयोरेतत्कलेवर न हि विजहाति, प्रत्युत रश्मय रत्नमिव मकरन्द- बिन्दव पद्ममिव च एतयो शरीर नितरा सुशोभयति निसर्गसौन्दर्य्यस्य कदाऽप्यन पायात् इति भाव, तथाच ननमेतौ साम्राज्यलक्ष्मीभाजौ अचिरादेव भविष्यत इति विभाव्यते इत्याशय। [धातूनामनेकार्थत्वात चौरादिकस्यामन्त्रणार्थकस्यापि केतधातो भूषणार्थे वृत्ति रूपम्। अत्र लक्ष्मीविलासाना रश्मिभि मकरन्दबिन्दुभिश्च सार्द्धमवैधर्म्य- नाम्योपदेशादुपमेऽलङ्कारौ निरपेक्षतया स्थितत्वेन ससृष्टौ]। मालिनी वृत्तम् ॥ २४ ॥

(य) भूयिष्ठा—बहुलाम्। [बहुशब्दात इष्ठनि "इष्ठस्य यिट् च" (६।४।१५९ पा०) इति बहोर्भूरादेश इष्ठस्य लोप यिडागमश्च]। रघुकुलस्य—रघुवंशस्य, य कुमार,—बालक, तस्य छाया—प्रतिबिम्ब, सादृश्यमित्यर्थ। ("छाया सूर्य्यप्रिया कान्तिप्रतिबिम्बमनातप।" इत्यमर) रघुवंशकुमारा या शरीरशोभा बिभ्रति, सैवाविसंवादिनी शोभा एतयो बालयो परिदृश्यते इति भाव।

अथेदानीं तत्सादृश्य स्फुटीकर्त्तुमुपपादयति, कठोरेति।—वपु शरीरम्, एतयोः

प्रसन्नस्निग्धस्तिमितञ्च वीक्षितं
ध्वनिश्च माङ्गल्यमृदङ्गमांसलः ॥ २५ ॥

बालयोरिति शेषः कठोरः परिपुष्टाङ्गः, तरुण इति यावत्, यः पारावतः कपोतः, तस्य कण्ठ इव गलदेश इव, मेचकः श्यामलः, पूर्णावयवपारावतकण्ठदेशकल्पः श्याम भास्वर इत्यर्थः, अपिच वृषभस्य स्कन्ध इव स्कन्धौ भुजशिरसी यस्मिन् तत् तथोक्तं, स्थूलस्कन्धमित्यर्थः, तथा बन्धुराः अनुन्नतानताः, समा इत्यर्थः, नातिनता इति यावत्, अङ्गाः अवयवाः यस्य तत्, सर्वावयवानवद्यमित्यर्थः, ["शेषाद्विभाषा" (५।४।१५४ पा०) इति बहुव्रीहौ कप्] दृश्यते इति शेषः, ("बन्धुराङ्गकम्" इति पाठे—बन्धुरौ अंसौ भुजोपरिभागौ यत्र तादृशम्, अस्मिन् पक्षे वृषस्कन्धम्" इत्यत्र स्कन्धशब्देन भुजशिरस उपरिभागो योवैककुद्भागो बोध्यः) अपिच वीक्षितम् अवलोकनं, प्रसन्नञ्च तत् स्निग्धवत् स्तिमितञ्च इति प्रसन्नस्निग्धस्तिमितं [विशेषणकर्मधारयः] प्रसन्नं निर्मलं, प्रसादगुणभूयिष्ठत्वादनुद्वेजकमित्यर्थः, तथा स्निग्धवत् स्तिमितञ्च निश्चलञ्च, स्निग्धस्य दृष्टिः यथा प्रशान्ता निर्भयगाम्भीर्यव्यञ्जिका च दृश्यते, तथा एतयोरपीति भावः, तथा ध्वनिश्च निनादश्च कण्ठस्वरश्चेत्यर्थः माङ्गल्यस्य मङ्गलसूचकस्य, अनुद्धतविरावस्य इत्यर्थः, मृदङ्गस्येव वाद्यभेदस्येव, मांसलः सान्द्रः कर्णसुखदश्चेत्यर्थः, स्निग्धगम्भीर इति भावः, [मांसशब्दात् मत्वर्थे लच्प्रत्ययः] अनुभूयते इति शेषः। [अत्र स्निग्धस्येव स्तिमितं, मृदङ्गस्येव च मांसलम् इति विग्रहेण प्रोक्तस्थलद्वये "उपमानानि सामान्य—" (२।१।५५ पा०) इति उपमानसमासः उपमेयभूतयोः बालयोः उप मानतया उपमानादिति ध्येयम्, यतो हि रघुकुलनन्दनानामिव एतयोः बालकयोः शरीरं नवजलधरश्यामरुचिरं मांसलं स्थूलं बलिष्ठञ्च दृश्यते, वीक्षणमपि धीरगम्भीरम् उद्वेगकं तथा कण्ठस्वरोऽपि गम्भीरं मधुरञ्च श्रूयते, तत् नूनमेतौ रघुकुलाङ्कुरौ भवतः इति मन्ये इति भावः। [अत्र मेचकत्वेन पारावतकण्ठेन सह वपुषः, वृषस्कन्धेन सह स्कन्धयोः, स्निग्धेक्षणेन सह वीक्षणस्य तथा मृदङ्गध्वनिना सह कण्ठध्वनेः एकैकधर्मसाम्यप्रकाशनात् समानधर्मा लुप्ता भवतः उपमा अलङ्काराः तासां निरपेक्षत्वेन स्थितेः संसृष्टिरिति ज्ञेयम्। अत्र स्निग्धस्य स्तिमितविशेषणतया वीक्षितं तथा मृदङ्गस्येवेतयो ध्वनिः मांसलः इति उपमानलक्षणाश्रयणात्, उपमानोपमेयभावनादि... [illegible]

[सूक्ष्मं निरूप्य] । अये ! न केवलमस्मदङ्गसंवादिनी आकृतिः । (२)—

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥ २६ ॥

निर्जितत्वाद्यकलमङ्गीकृत्य अर्थाक्षिप्ता हि लक्षणा स्वीकृता, तथैव दृष्टिप्रयोजन-विनाकृतत्वस्याप्रकाशमनपनेयापार्थत्वदोषं नाशङ्कनीयं इत्यवधेयम्]। वंशस्थविलं वृत्तम् ॥ २५ ॥

(२) सूक्ष्मं निरूप्य—सविशेषमवलोक्य, निपुणतरं विभाव्येत्यर्थः । अस्मदङ्ग—मदीयावयवं, संवदति—अनुकरोति या तथाविधा अस्मदङ्गसंवादिनी—मदङ्गानु-रूपा अनयोराकृतिर्न केवलं मदाकृतिसौसादृश्यशालिनीत्यर्थः ।

अथ बालकद्वये न केवलं मदवयवसाम्यम्, अपि तु वैदेह्याः सौसादृश्यं दृश्यते इत्याह, अपीति । इह अत्र, शिशुयुग्मे बालकद्वये, नैपुणेन निपुणतया, उन्नेयं ज्ञायमानं, प्रणिधानगम्यमित्यर्थः, तच्च तच्च प्रसिद्धं, मया प्राक् सततमेव परिलक्षितमित्यर्थः, जनकसुतायाः अपि वैदेह्याः अपि, मत्प्राणसमायाः सीतायाः अपीत्यर्थः, अनुरूपं सौसादृश्यं, [रूपस्य योग्यम् इत्यानुरूप्येऽव्ययीभावः] स्फुटं सुव्यक्तम्, अस्ति विद्यते, न केवलं मम, अपि तु सीतायाः अङ्गलावण्यं वाङ्माधुर्यं दृष्टि-विक्षेपादिकञ्च सर्वमेतयोरविकलभावेनैवास्तीति दृश्यते इति भावः । एतदेव प्रमाणयितुं सीतायाः पुनः प्रत्यक्षायमाणतामाह, नन्विति ।—ननु वितर्के, तत् प्राक् दृष्टौ दृष्टमित्यर्थः, अभिनवं नव प्रस्फुटितं, यत् शतपत्रं पद्मं, तदिव श्रीमत् रमणीयं प्रियायाः प्राणसमायाः सीतायाः, आस्यं वदनं, पुनः भूयः, मे अक्ष्णो-र्नयनयोः, गोचरीभूतमिव विषयीभूतमिव, नयनपथमापतितमिवेत्यर्थः, ध्रुवम्, इदानीमेवाहं तत् मे प्रियामुखं पुनः पश्यामीति भावः । [अत्राक्ष्णोर्गोचरी-भावेऽपि तदास्ये तद्योगाभावस्योत्प्रेक्षणेन उत्कटैककोटिकसंशयोदयात् उत्प्रेक्षा-ऽलङ्कारः, समासेन शतपत्रश्रिया सर्वधर्मसाम्योक्त्यैवोपमा समासगता, सादृश्य-दर्शनेन सीतानुस्मरणोदयाच्च स्मरणालङ्कारः, एतेषाञ्चान्योऽन्यसापेक्षतया स्थितेः सङ्करः]। मालिनी वृत्तम् ॥ २६ ॥

मुक्ताच्छदन्तच्छविदन्तुरेयं
सैवौष्ठमुद्रा स च कर्णपाशः।
नेत्रे पुनर्यद्यपि रक्तनीले
तथाऽपि सौभाग्यगुणः स एव ॥ २७ ॥

सीताया सौसादृश्य पुनरपि विशदीकृत्य प्रदर्शयति, मुक्तेति।—मुक्ता इव मौक्तिकानीव, अच्छा विशदा, ये दन्ता दशना, तेषां या छवि कान्ति, तया दन्तुरा उन्नतानता, आलापसमये मुक्ताफलधवलदन्तकान्तीनां समन्तात् विसरणशीलतया सर्व्वत्र समभावेन अपरिपतनात् बन्धुरवत् प्रतीयमानेति भाव, धवलदन्तकिरणमनोहारिणीत्याशय, ("दन्तुरस्तून्नतरदे नतोन्नतानते त्रिषु।" इति मेदिनी। "मुक्ताच्छदन्तच्छविसुन्दरी" इति तु कुत्रचित् पाठ, तदर्थस्तु स्फुट एव)। इयं प्रत्यक्ष दृश्यमाना, शिशुयुग्मसम्बन्धिनी इत्यर्थ, ओष्ठमुद्रा ओष्ठयो मुद्रा आवरणम्, ओष्ठाधराविति यावत्, सैव सीताऽनुरूपा एव, एतयो दशनवाससो सर्व्वथा सीतारदनच्छदसाम्यं बिभृत एवेति भाव, स च सीतासम्बन्धी एव, कर्णपाश शोभनकर्ण, (पाशशब्दस्य केशोत्तरवर्त्तित्वे समूहवाचकत्वं, कर्णोत्तरवर्त्तित्वे तु शोभनार्थकत्वमेव, तथा च मेदिनी "पाशः केशादिपूर्व्वः स्यात् तत्सङ्घे कर्ण-पूर्व्वकः। सुकर्णे च" इत्यादि। "प्रशंसावचनैश्च" (२।१।६६ पा०) इति समास)। पुन किन्तु, यद्यपि, नेत्रे नयने, एतयोर्बालयोरिति शेष, रक्तनीले प्रान्ते लोहिते तारकायाञ्च श्यामे, नीललोहिते इति यावत्, पितृविलोचनानुकारित्वादित्याशय, ["वर्णो वर्णेन" (२।१।६९ पा०) इति समास]। तथाऽपि एव सीतानयनवैषम्ये विद्यमानेऽपीति भाव, स एव सीता-ऽनुरूप एव, सौभाग्यगुण सौन्दर्यमनोज्ञविलास, पक्ष्मयोगात् रक्तिमाया सम्यक् तत्साम्याभावेऽपि नीलिमायां सौसादृश्यमस्त्येवेति भाव, यत सीतानेत्रसाम्यमेव नातिशयं विधत्ते यदि एतत् तस्या एवापत्ययुगलमिति शङ्का न हि सपदि मानस पथात् सान्त्वेनापसरतीति हृदयम्। पक्ष्मप्रान्ते नेत्रयो रक्तिमा नीलिमा च [illegible], स्याणोस्तु न तथा, इति सामुद्रिका आमनन्ति। [अत्र हि [illegible] वाग्वैदित बिम्बानुबिम्बभावमुद्रया तद्दन्तच्छविसादृश्य-[illegible] [illegible], समासेन मुक्तानां दन्त-[illegible] [illegible] [illegible], सीतायाश्चाभ्यां बालकाभ्यां

तदेतत् प्राचेतसाध्युषितमरण्यं, यत्र किल देवी परित्यक्ता। इयञ्च अनयोराकृतिर्वपुश्च। यदपि स्वतःप्रकाशानि अस्त्राणीति, तत्र विमृशामि, अपि खलु तच्चित्रदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमुद्भूतं स्यात्? न हि असाम्प्रदायिकानि अस्त्राणीति पूर्वेषामपि अनुशुश्रुम। अयञ्च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विस्रम्भयते। भूयिष्ठञ्च मया द्विधा प्रतिपन्नो देव्या गर्भभार आसीत्। (ल) [ध्यात्वा]।—

नैवरक्तिनाशे न्यूनत्वप्रतीते व्यतिरेकालङ्कारश्च व्यज्यते, इत्यलङ्कारध्वनि]। वृत्तमुपजाति ॥ २७ ॥

(ल) एतत्—पुरो दृश्यमानमित्यर्थः। प्राचेतसेन—वाल्मीकिना, अध्युषितम्—अधिष्ठितम्। तत् अरण्यं—वनं, जनस्थानमिति यावत्, वाल्मीकेराश्रमपदमिति भावः। यत्र किल—यस्मिन्नेवारण्ये। देवी—जानकी। परित्यक्ता—निर्वासिता, कुमारलक्ष्मणेनेति शेषः। इयञ्च—सीतासदृशी इत्यर्थः। अनयोः,—बालयोः। आकृतिः,—शरीरसङ्घटनपद्धतिः। वपुश्च—शरीरञ्च। यदपि—यच्च, उक्तं प्राक् लवेनेति शेषः। स्वतः,—स्वेनैव, गुरूपदेशमन्तरेणेत्यर्थः, प्रकाशः,—आविर्भावो येषां तानि। अस्त्राणि—जृम्भकाऽऽस्त्राणि। तत्र—जृम्भकास्त्राणां स्वतःप्रकाशे, तेषामाजन्मसंसिद्धाविति भावः। विमृशामि—अवधारयामि। अपि खलु—किमु एतदित्यर्थः। चित्रदर्शनप्रासङ्गिकं—सीतायै चित्रपटप्रदर्शनावसरे मया प्रस्तावक्रमेणोक्तम्। अस्त्राभ्यनुज्ञानं—जृम्भकास्त्राणां मया स्वतःप्रकाशानुमोदनम्, आलेख्यप्रदर्शनसमये "सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति" इति मया अनुमोदितमित्यर्थः। उद्भूतं—फलवज्जातमित्यर्थः। स्यात्?—भवेत्, तदभ्यनुज्ञावशेनैवैतेषामेव समुदयं जनयतीति भावः। कुत एव तर्क्यते, तदेव द्योपपत्तीकरोति, न हीति।—सम्प्रदायः,—गुरुपरम्परा, तं विना अनुद्भूतानि असाम्प्रदायिकानि—गुरुपारम्पर्योपदेशादृते अनधिगमनीयानीत्यर्थः। पूर्वेषां—पूर्वतनानां, ब्रह्मकृशाश्वादीनामित्यर्थः। अस्त्राणि—आयुधानि, जृम्भकास्त्राणीत्यर्थः। न हि अनुशुश्रुम—नैव आकर्णितवन्तः, पूर्वैरपि कैश्चित् गुरूपदेशादिना एतादृशानि अस्त्राणि लब्धानीति कदाचिदप्यस्माभिनाकर्णितमिति भावः। [प्रयोगे लिटि रूपं, केचित्तु लिटि उत्तमपुरुषप्रयोगस्य कुत्रचिदप्य-

पुराऽऽरूढे स्नेहे परिचयविकासादुपचिते
रहो विस्रब्धाया अपि सहजलज्जाजडदृशः।
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥ २८ ॥

दर्शनात् असमीचीनतामाहुः, सत्यप्येवमेकत्वप्रयोगस्य प्रथमप्रकृष्टैकत्वाभिन्नतया तथात्वेऽपि अत्र बहुत्वे प्रयोगस्य तु तथाभूतत्वाभावात् तथात्वोक्तिरिति ज्ञेयम्]। अयञ्च मे हृदयस्य सुखातिशयः,—आनन्दातिरेकः, कुशलवयोरवलोकननियन्धनसुखमत्वात् इत्यर्थः। सम्प्लवमानः—निमज्जत्तम्, आनन्दप्रवाहे इति भावः। आत्मानं विस्रम्भते—प्रत्याययति, "तवैव एतौ तनुजौ" इति प्रतीतिमुत्पाद्य आश्वासयतीत्यर्थः, अन्यथा बालयोरेतयोर्दर्शनानन्तरमेव कथमियान् मे सुखातिरेकः इति भावः। [अत्र "आत्मा विस्रम्भते" इति अणिकर्तुरात्मनः चित्तवत्कर्तृत्वाभावात्, "अणावकर्मकात्—"(१।३।८८ पा०) इत्यनुशासनेन परस्मैपदत्वं नाशङ्कनीयम्]। मूर्च्छश्च—वहत्यर्थः। द्विधा प्रतिपन्नः,—द्वितयत्वेनाभिमातः, सूणद्वयमस्मिन् गर्भे विद्यते इत्यनुमित इत्यर्थः। देव्या,—सीतायाः। गर्भभारः,—भारभूतमुदरस्थानमिति यावत्। आसीत्—अभूत्, सीतायाः जठराभ्यन्तरे यमौ एव बालौ विराजेते इत्यसङ्गदेवाहं प्राक् दृष्टेन सवाहनायवमरेऽन्वभवमिति भावः।

एतौ यमौ एव बालौ सीतागर्भसम्भूताविति प्रत्याययित प्रोक्तमेवार्थं स्वय विशदीकृत्य स्मरति, पुरेति।—पुरा पूर्वम्, नवाशात परमिति भावः, आरूढे समुत्पन्ने, प्रथमसद्भावस्यानावसरे उत्पन्नकुलिते इति यावत्, स्नेहे प्रणये, परिचयस्य दीर्घकालव्याप्य सहचर्यस्य, विकासात् प्रभावात्, उपचिते विवर्द्धिते सति, यदा हि तदाऽयं प्रेम निरतिशयं विवर्द्धितमासीत् तदेति भावः रहः निर्जने, विस्रब्धाया विश्वस्तायाः, अपि, अन्यसत्त्व दृष्टेऽपि कैरपि न बोधिता भवेयमिति अनवधीतायाः अपि इति भावः, सहजया स्वाभाविक्या, लज्जया त्रपया, जडे निश्चारे, निमीलिते इत्यर्थः, दृशौ चक्षुषी यस्याः तस्याः, तस्याः मुग्धवधूत्वादिति भावः, गर्भग्रन्थिः गर्भोन्मुखमपिण्डः, जठराभ्यन्तरे गर्भस्य सन्निवेशविधिरिति यावत्, मयैव न तु तयेति भावः, (अन्ययोगव्यवच्छेदकोऽयमेवकारः) आदौ प्राक्, तस्याः अपि अभिज्ञानात् पूर्वमिति भावः, करतलेन पाणितलेन, यः परामर्शः स्पर्शनक्रिया, तस्य कलया कल्पनया, विधानेनेत्यर्थः, चातुर्येणेति यावत्, द्विधा द्वैधं ... इति भावः, यथा—परामर्श एव कला ... मिलत्वमेव

[रुदित्वा] । तत्किमेतौ पृच्छामि केनापि उपायेन ? (व)

लव । तात ! किमेतत् ?—

वाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥ २९ ॥

विशेष इति यावत्, ("कला स्यात् मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः ॥" इति मेदिनी) अधिकतया कौशलावशेषव्यतिरिक्ततया वा परानशने कृते चतिशालीना जानकी हस्तमपसारयतीति तथ्यनिणय अशक्य स्यात् इति कलाशब्दप्रयोगोऽत्र बोध्य, द्विधा द्वितयत्वेन, द्विधाविभक्तत्वेनेति यावत्, ज्ञात विदित तदनु तत्पश्चात्, मदभिज्ञानात परमिति भाव, कैरपि दिवसै कैश्चिद्वासरैरपि, (करणे) तया सीतया, ज्ञात इति पूर्वेणान्वय, मद्दर्शनात पर हि सुस्फुटे गर्भे सञ्जाते वनरूपोऽयमिति स्वयमपि समवेदि इति भाव, तथा चैतौ बालौ नून सीतासुतौ भविष्यत इत्याशङ्किताथ । [अत्र प्रस्तुतयोरेव कर्वो सीतारामयो एकज्ञातत्वरूपक्रियाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कार]। शिखरिणी वृत्तम् ॥ २८ ॥

(व) रुदित्वा—सीतानिर्वासनमनुस्मृत्य शोकवेग विनोदुमशक्नुवन् सुचिर बाष्प विमुच्येत्यर्थ । तत्—तर्हि, एतयो सीतासुतत्वसशये इत्यर्थ । एतौ—कुमारौ । केनापि उपायेन—कमपि व्याजमवलम्ब्येत्यर्थ । किं पृच्छामि ?—किमिनाचे, "भवतो को, कस्य सुतौ च ?" इत्यादिकमिति भाव ।

रोदनकारणं किमिति पृच्छति, वाष्पेति ।—जगन्मङ्गल विलोकं शुभकर, विलोकित सत जगता निरतिशयशुभाधायकमित्यर्थ, व युष्माकम, आनन मुख, वाष्पवर्षेण अविरलधारमश्रुविमोचनेन, अवश्यायेन नीहारेण ('अवश्यायस्तु नीहारस्तुषार स्तुहिन हिमम् ।" इत्यमर) अवसिक्तस्य आर्द्रीकृतस्य, अभ्युचितस्येत्यर्थ, पुण्डरीकस्य पद्मस्य, चारुतां रमणीयता, नीत प्रापितम्, एतत् किम् ? इति पूर्वश्लोकवाक्येनान्वय, तव प्रफुल्लपुण्डरीकसन्निभे मुखे कथ हि नियत नीहारराशिप्रतीकाश वाष्पासारविमोक्ष दृश्यते इति भाव, इन्दीवरकान्त भगवतो राघवस्य आनन तदानीं विरहविपाण्डुरतया पाण्डरीकोपममभूदिति ध्येयम् । [अत्र एकस्य चारुतामपर कथ हि प्राप्नु शक्नुयात् इति वस्तुसम्बन्धे असम्भवत्यपि बिम्बप्रतिबिम्बभावमुद्रया तच्चारुतासदृशचारुताबोधस्य आनननेनोपपादनात् असम्भवद्वस्तुसम्बन्धो निदर्शनालङ्कार]। पथ्यावक्त्र वृत्तम् ॥ २९ ॥

कुश । अयि वत्स !—

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः ?
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमित्येवं पृच्छस्यनधिगतरामायण इव ? ॥ ३० ॥

दुःखस्य सीताविप्रयोगसमुत्थ एवैष बाष्पनिर्मोक इत्युक्त्वा रामायणतत्त्वानभिज्ञत्वेन लवं सधिक्कारमाह, विनेति ।—सीतादेव्या देवीस्वरूपया वैदेह्या, विना ऋते, तद्विप्रयुक्तस्येति भावः, रघुपतेः रघुनायकस्य रामचन्द्रस्य, किमिव हि त्रिलोक्यामिति किमपि वस्तु हि, न दुःखं न दुःखकरम्? इह जगति निखिलसुखसाधकं राजैश्वर्यादिकं वस्तुजातं समासाद्याप्यसौ रघुमणिः केवलं सीताविरहितः सततमेव दुःखायत इति भावः, अतः सीताविरह एव ईदृशस्य बाष्पविसर्गस्य हेतुरित्याशयः । एतदेव सामान्याकारेणोपपादयति, प्रियेति ।—प्रियायाः प्रियतमायाः पत्न्याः, नाशे वियोगे सति, यद्वा—प्रियाणां प्रेमास्पदीभूतानां विषयाणाम्, आ समन्तात्, नाशे अदर्शने, निधने सतीत्यर्थः, मनसाऽभीष्टवस्तूनां कस्येयां अप्राप्तौ सत्यामिति यावत्, कृत्स्नं किल समग्रमेव, न तु भागविशेष इति भावः, जगत् निखिलप्राणिपूर्णमेतत् भूमण्डलम्, अरण्यं वनकल्पं भवति हि सम्प्रत्यत एव, प्रियाविप्रयोगे हि सर्वं दृश्यजातपूर्णमपि जगदरण्यप्रायं शून्यमेव प्रायशो विरहिभिरनुभूयते इति भावः । दुःखिनः जगति बहवः सन्ति, न हि भवन्ति ते एव विरहा इति यद्यानयनेतम् अस्य तु तदसामान्यम् इत्येतदेव विशदीकृत्य विवृणोति, स चेति ।—स च तादृशः, अन्यत्र कुत्राप्यदृष्ट इत्यर्थः, तावान् तत्परिमितः अपरिमेय इत्यर्थः, स्नेहः प्रणयः, दाम्पत्यप्रीतिरिति शेषः, अयमपि इदानीमनुभूयमानश्च, निरवधिः असीमः, आजीवनं स्थायितया अपार इति यावत्, वियोगः विरहः, यत्र हि प्राक् निरतिशया सुखसम्पत्तिः [illegible], तत्र चेदिदानीमनन्तो विरहः [illegible] । [illegible], तदा असौ नितरां [illegible] एव भवतीति भावः, प्राक् सीतासविधे तया सार्धं सततं विमल[illegible] रघुमणेः इदानीं जनापवादेन कथञ्चिदपि [illegible] तद्विरहे न हि भवति [illegible] तदीये मुखे तुषारपातप्रतिमः [illegible] इति तु मन्तव्यम् । [illegible] विरहः [illegible], तत् [illegible] ।

राम। [स्वगतम्]। अये! तटस्थित आलाप, कृत प्रश्नेन। दग्धहृदय! कोऽयमाकस्मिकस्ते स्नेहपरिप्लवो विकार? एवञ्च निर्भिन्नहृदयावेग शिशुजनेनाप्यनुकम्पितोऽस्मि, भवतु तावत, अन्तरयामि। [प्रकाशम्]। वत्सौ! रामायणमिति श्रूयते भगवतो वाल्मीके सरस्वतीनिष्यन्द प्रशस्तिरादित्यवंशस्य, तत्र कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि। (श)

तेन हि त्वत्र विफल एवेत्याह, किमिति।—अनधिगतम् अपठित, रामायण येन तादृश इव रामायणतत्त्वानभिज्ञ जन इवेत्यर्थ, किमिति कथं हि, एवम् इत्थ, "किमेतत" इत्यादिकमिति यावत, पृच्छसि? जिज्ञाससे? महामुने वाल्मीके समीपे सवत्र रामायणमधीतवत तव नैष प्रश्न युज्यते इति भाव। [अत्र पूर्वार्द्धे दिवानाशजनितजगदरण्यानुभवरूपसामान्यार्थेन सीताविरहकृततदुःखोपभोगरूपविशेषार्थस्य समर्थनात सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासालङ्कार, अपिच जगति अरण्यस्य तादात्म्याध्यासात निरङ्ग रूपकश्चालङ्कार, तृतीयपादेन च एकत्र विरुद्धयो तादृशस्नेहवियोगयो सङ्घटनात् विरूपसङ्घटनारूपो विषमालङ्कार, चतुर्थपादेन तु अनधिगतरामायणेन पुरुषेण साहं लवस्यावैधर्म्यसाम्योत्कीर्त्तनादुपमालङ्कारश्च एवा चतुर्णा परस्परसापेक्षतया स्थिते सङ्कर इति ज्ञेयम्]। शिखरिणी वृत्तम् ॥ २० ॥

(श) तटे—समीपे, स्थित,—समासीन, सीतासम्बन्धकथाया मध्यमप्रविश्येव तदुपान्ते वर्त्तमान इत्यर्थ, उदासीनपुरुषाभ्यामिव प्रवर्त्तित इति यावत। आलाप,—अनयो आत्मनो मातृत्वसम्बन्धोल्लेखरहित मिथ भाषणम्, संलापेनैतेन स्फुट परिज्ञायते, यदेतौ सीतासुतौ इति, तथात्वे कथं हि कुश 'सीतादेव्या' इत्यत्र "जनन्या" इत्यादिकं नाभिदध्यादिति हृदयम्। प्रश्नेन—सीतारामौ किं युवयो मातापितरौ इत्येव परिपृच्छयेति यावत। कृतम्—अलम्। दग्धहृदय!—हतचेत, सीतासुतावेवैतौ इति प्राक् कृताऽऽशाया सम्प्रत्येदानीं वैफल्योदयेन निर्दग्धीभूतस्यास्य नाशशायत्वनाशस्यात्मस्वैवैषा सम्बुद्धि कृतेति ज्ञेयम्। आकस्मिक,—अकस्मादुद्भूत, अहेतुक इति यावत। स्नेहपरिप्लव,—स्नेहेन—वात्सल्येन, परिप्लव,—चञ्चल, वात्सल्यविवशतया समधिकमस्थिर इति यावत। विकार,—अन्यथाभाव, पेशाभिरवीरामस् निरतिशयचाञ्चल्यमिति यावत्। एवञ्च—इत्थञ्च, अश्रुप्रवाह-

कुश। स कृत्स्न एव सन्दर्भोऽस्माभिरावृत्तः, स्मृत्युपस्थितौ तावदिमौ बालचरितस्यान्त्येऽध्याये द्वौ श्लोकौ। (घ)

राम। उदीरयतु वत्स। (ङ)

कुश।—

प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः।
प्रियभावः स तु तया स्वगुणैरेव वर्द्धितः॥ ३१॥

व्यथापादित इति भावः। निर्भिन्नः—प्रकटीभूतः, हृदयस्य—चेतसः, आवेगः,—चाञ्चल्यं, दुःखसंक्षोभ इति यावत्, यस्य तथाभूतः, अहमिति शेषः। प्रियजनेन—बालकजनेन। अनुकम्पितः,—अनुगृहीतः, कृपादावाक्रान्त इत्यर्थः। अस्मि—भवामि, स्वभावधीरस्य मे एतादृशमधैर्य्यं सर्वथैवानुपपन्नमिति भावः। भवतु तावत्—अस्त्वेवमित्यर्थः। किं तत्? तदेवाह, अन्तरेति।—अन्तरयामि—आपतितशोकावेगं विषयान्तरसञ्चारणेन अपनयामि, [अन्तरं करोतीत्यर्थे 'तत्करोति—' (ग०) इति णिचि लटि रूपम्] सरस्वत्याः,—वाचः, ("गीर्वाग्वाणी सरस्वती" इत्यमरः) निष्यन्दः,—प्रवाहः, विरचनमित्यर्थः, वाक्यजातम् इति यावत्। तत्र—आद्यवयस्य—नूतनवयस्य। प्रशस्तिः,—प्रशंसा, चरितकीर्त्तनमित्यर्थः। यत्किञ्चित्—[illegible] प्रश्नौ। कौतूहलेन—औत्सुक्येन, तच्छ्रवणे तथातिरिक्तौत्सुक्येनेत्यर्थः। कविदप्यविमर्शमिति यावत्। श्रोतुमिच्छामि—आकर्णयितुमभिलषामि।

(घ) कृत्स्न एव—समग्र एव। सन्दर्भः,—रामायणग्रन्थः। आवृत्तः,—अधीतः। स्मृत्युपस्थितौ—स्मरणपथमापतितौ। बालचरितस्य—पूर्वचरितस्य, प्रथमस्य बालकाण्डस्य [illegible]। अन्त्ये—चरमे। अध्याये—परिच्छेदे। द्वौ श्लोकौ—द्वे पद्ये, [illegible] श्लोकौ [illegible] अपि [illegible] इति भावः।

(ङ) उदीरयतु—पठतु। वत्स,—प्रतिस्नेहास्पद [illegible]। [illegible] महात्मनः [illegible] प्रिया [illegible] प्रकृत्यैव स्वभावेनैव, न तु [illegible] इति भावः [illegible] राघव [illegible] इति भावः। [illegible] तया सीतया, स तु [illegible] प्रियभाव इति।—[illegible]

तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥३२॥ इति।

राम। कष्टम् ॥ अतिदारुणो हृदयमर्मोपघातः। हा देवि। एवं किल तदाऽऽसीत्। अहो। निरन्वयविपर्य्यास-विरसवृत्तयो विप्रलम्भपर्य्यवसायिनस्तापयन्ति संसार-वृत्तान्ताः। (४)—

-नीत, महात्मा रघुवरः सीतायाः केवलमनुपमं लावण्यमभिसमीक्ष्य न तस्यामति-प्रणयी अभूत्, न वा कृपाम्बुधिः रघुमणिः महौदार्य्येण तस्या वात्सल्यवानासीत्, यत् तत्प्रियभावे कविजनता आशङ्केत, अपि तु तया स्वकीयविनयाऽऽर्जवादिगुणगरिम्णैवोपा-र्जितः, तेन हि महात्मनोरितयोरतिविशुद्धं सुधाऽवदातं तादृशं प्रियभावम् अन्यत्र दुर्लभ एवेति भावः, एतादृशः प्रियभावः निर्वासनावसरे कथं हि ततः सपदि विलुप्तोऽभूत्, तदतीव विस्मयकरमिति तु हृदयम्। पथ्यावक्त्रं वृत्तम् ॥ ३१ ॥

सीतायाः अपि अकपटं तथैव प्रियभावं रघुमणौ आसीदित्यावेदयति, तथैवेति। —तथैव सीता यथा रामस्य आसीत् तद्वदेवेत्यर्थः, सीतायाः वैदेह्याः, रामः रघूद्वहः, प्राणेभ्योऽपि स्वजीवनादपि, प्रियः प्रीत्यास्पदम्, अभवत् आसीत्, रामवत् सीता अपि न हि रामे कृत्रिमप्रणयवती बभूवेति भावः। कीदृशं तत्? इति प्रश्ने तस्यानुपमत्व-माह, हृदयमिति।—हृदयमेव तयोरुभयोः मानसमेव, परस्परम् अन्योऽन्यगतं, प्रीतियोगन्तु प्रणयसम्बन्धं पुनः, इतरेतरगतम् अतिविशुद्धं हार्दमिति यावत् जानाति वेत्ति, तयोरुभयोः परस्परहृदयं विना अन्यस्य कस्यापि तत् तादृशं प्रीतियोगं नाभि-जानाति, अन्यत्र तादृशप्रेमादर्शनात् दृष्टान्तस्य सौलभ्यविरहादिति भावः। एतादृशे परस्परसुदृढप्रणये सति कथं हि तयोरिमं अरुन्तुदं वियोगं उदपादि, तद्विषयक-विस्मयस्य भगवति रामभद्रे समुत्पादनार्थं श्लोकयोरितयोरवतारणा इत्यवधेयम्। [श्लोकाविमौ अस्मद्देशीये वाल्मीकीये रामायणे बालकाण्डान्तिमाध्याये न दृश्येते, एतदनुरूपौ हि अवलोक्येते, तेन तत्प्रतिच्छायामवलम्ब्य कविना अभिनवावेवैतौ श्लोकौ विरचिताविति विभावयाम। तच्छ्लोकौ यथा —"प्रिया तु सीता रामस्य दाराः पितृकृता इति। गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो विवर्धते ॥ तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते। अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा ॥" इति]। पथ्यावक्त्रं वृत्तम् ॥ ३२ ॥

(४) कष्टम्—अतीव क्लेशकरम्, अतिदुःखप्रदमित्यर्थः। अतिदारुण,—अति-

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः ?
क्व तेऽन्योन्य यत्नाः ? क्व च नु गहनाः कौतुकरसाः ?
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययोः ?
तथाऽप्येष प्राणः स्फुरति न तु पापो विरमति । ॥ ३२ ॥

भयङ्कर, कथमपि सोढुमशक्य इत्यर्थ । हृदयमर्म्मोपघात,—हृदयस्य—अन्तःकरणस्य, मर्माणि—शिरास्नायुस्थिसन्धिप्रभृतीनां सन्निपातस्थानानि, तेषामुपघात,—ताड़न, सङ्क्षोभ इति यावत, यद्वा—हृदयमर्म्मण,—अन्तःकरणरूपमर्मस्थलस्य, उपघात,—विदारणम्, बालस्यैतत् भाषण समुद्बुद्धपूर्व्वस्मृतेर्मे हृदय सर्व्वथा निक्रन्ततीति भाव । ("उद्घात" इति पाठान्तरम्) अथ स्मृतेरभ्युदयेन अतिविषम तथाविध शोक सोढुमपारयन् अधीरतया विलपति, हा देवीति।—तदा—बाल्ये वयसि। एवं किल—इत्थमेव। आसीत्—अवतिष्ट, आवयो प्रीतियोग आयुष्मता कुशेन मदर्पितविवर्णित यथा उक्त, स तथैव सत्वत आसीदिति भाव । निरन्वयेति।—नि,—नास्ति, अन्वय,—सम्बन्ध हेतुर्वा यस्मिन् तथाभूत, आकस्मिक इति यावत, य विपर्य्यास,—विपरिणाम, पूर्व्वावस्थाया अन्यथाभाव इत्यर्थ, तेन विरसा,—अहृद्या, व्यतय,—व्यापारा येषां तथाभूता, अहेतुकदशाविपर्य्ययात् पादकतया सुतरा मर्म्मपीडका इति भाव । विप्रेति।—विप्रलम्भे—वियोगोद्भूते शोके, पर्य्यवस्यन्ति—परिणमन्ति ये तथाभूता, सन्तापोदर्का इति भाव । समारस्य—सृष्टे, एतज्जगत इति यावत, वृत्तान्ता,—वृत्तवस्तूनि, कर्म्मनिचया इत्यर्थ । सन्तापयन्ति—व्यथयन्ति, वियोगबहुले इह जगति मर्म्मविपीडका व्यापारनिवहा सतत हि संसारिणा मानसानि व्याकुलीकुर्व्वन्ति, नास्ति कियानपि इह सुखलेश इति भाव ।

शोक हि सासारिकं विपर्य्यासमिदानी स्वस्मिन्नेव विशदीकृत्य विवृणोति, क्वेति।—निः नास्ति, अतिशय आतिशय्य यस्मात् तथाभूत, लोकोत्तर इत्यर्थ, य विस्रम्भ विश्वास, प्रीतिप्रवणतेति यावत्, तेन बहुल घन, असीमप्रणयपरिपूर्ण इति भाव, तावान् तत्परिमित, आनन्द हर्ष, क्व कुत्र ? अधुना प्रागनुभूता तादृशी प्रेमगर्भ सुखसन्ततिर्धारा कुत्र विलुप्तेति भाव, अन्योऽन्यम् इतरेतरम्, अचिन्तिता इति शेष, न तथाविधा, अकपटा इति यावत्, यत्ना मुग्धाधायका चेष्टाविशेषा, क्व कुत्र ? विलुप्ता इति शेष, न हि इदानी तानभूत् लेशमपि, गहना निबिड़ा, निरन्तर इत्यर्थ, कौतुकं कौतूहलोत्पादकं विषयेषु इति यावत्, नानाहासादिरूपे

भोः। कष्टम्।—

प्रियागुणसहस्राणामेकोन्मीलनपेशलः।
य एव दुःस्मरः कालस्तमेव स्मारिता वयम्॥ ३४॥

वा, रसा रागा, क च नु? कुत्र हि अपसृत्य गता इत्यर्थः, प्रागिव वयमिदानीं कौतुकोद्दीपकविषयव्यापृता न भवेम इति भावः, सुखे वा आनन्दे वा, दुःखे वा विषादे वा, तत् प्रागवस्थितं, तथाविधमित्यर्थः, हृदययोः सीतायाः, मम च मानसयोः, ऐक्यम् एकीभावः, सुखदुःखयोरभिन्नानुभूतिरिति यावत्, क नु खलु? कुत्र हि विलयं सत् गतमित्यर्थः, पुरा हि पतिव्रता सीता यथा मम सुखे सुखिनी दुःखे च दुःखिनी आसीत्, तथैवाऽहमपि आसम्, उभौ हि आवां समसुखदुःखौ आस्व, इदानीन्तु तादृशभावः कथं हि सपदि अदृश्यतां गतः, इत्यहो विचित्रा संसारगतय इति भावः, तथाऽपि पूर्व्वमेवम्भूते अकपटे प्रणये उपभुक्ते अधुना तु दुर्व्विपाके तस्या विरहे समुदिते अपीत्यर्थः, एष मदीय इति भावः, पापः दारुणदुःखदायकतया दुरदृष्टफलभूत इत्यर्थः, दग्ध इति यावत्, प्राणः हृदयस्थवायुविशेषः, प्राणवायुरिति यावत्, ("प्राणी हृन्मारुते बोले काव्यजीवेऽनले बले।" इति मेदिनी। अत्र प्राणस्य आन्तरवायुविशेषार्थकतया एकत्वमवधेयम्), स्फुरति स्पन्दते, इदानीमपि निश्वसिमि इति यावत्, न तु विरमति न श्वसनकर्म्मणो निवर्त्तते, नाहं म्रिये इत्यर्थः, सम्प्रति प्राणविहानमेव मे वरमित्याशयः। ["व्याङ्परिभ्यो रमः" (१।३।८३ पा०) इति परस्मैपदम्। अत्र प्राणनाशकरकठोरदुःखकारणसत्त्वेऽपि प्राणवियोगरूपफलोदयस्याभावात् विशेषोक्तिरलङ्कारः]। शिखरिणी वृत्तम्॥ ३३॥

अथ स्वेषां प्रौढवसमयस्य कुशलं महर्षिभारत्या स्मृतिपथमापादितस्य सातिशयदुःखदायकत्वमाह, प्रियेति।—प्रियायाः सीतायाः, गुणसहस्राणाम् असंख्यानां सारल्यपातिव्रत्यादिगुणानाम्, एकेन असाधारणेन, उन्मीलनेन उदयेन, पेशलः मनोरमः, वैदेह्या ये ये हि श्रेष्ठा गुणसङ्घा मया यस्मिन् यस्मिन् काले प्रागनुभूताः, तेषां तेषां हि विभिन्नकालिकानां सर्वेषाम् एव गुणानां युगपत् एतस्मिन्नेव काले भूतिपथे समुदयात् अतीव रमणीयतम इति भावः, यद्वा—प्रियागुणसहस्राणाम् एकोन्मीलने असाधारणोन्मेषे, सम्पूर्णतया स्मृतिविषयीभूतसम्पादने इत्यर्थः, पेशलः दक्षः, निपुण इत्यर्थः, ("चारौ दक्षे च पेशलः" इत्यमरः) प्रियायाः असंख्येयगुणावलीनामतिशयेन स्मारक इति समुदितार्थः, य एव यो हि, कालः पूर्व्वतनः सुखकरः समयः, दुःस्मरः सर्व्वथा दुःखदायकतया अधुना स्मर्त्तुमशक्यः, इदानीन्तन॰

तदा किञ्चित् किञ्चित् कृतपदमहोभिः कतिपयै-
स्तदीषद्विस्तारि स्तनयुगलमासीन्मृगदृशः ।
वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि ॥ ३५ ॥

वियोगसमयस्य सुखकरकालोत्तरवात्ततया अत एव दुर्विषहत्वेन प्रागनुभूतसुखसमयः स्मृतिपथमापतितः सुतरामेवासहनीयो भवतीति भावः, तमेव तादृशं कालमेव, वयं स्मारिताः स्मृतिपथमापादिताः, सीतागुणसम्पृक्तस्य पूर्वतनसुखसमयस्य अधुना स्मरणात् शोकः, नितरामेव मर्म्माणि पीडयतीति भावः । [वयमित्यस्य "गतिबुद्धि—" (१।४।५२ पा०) इत्यादिना अणिकर्त्तुः कर्म्मत्वेन उक्ते कर्म्मणि प्रथमा ज्ञेया । अत्र "स्मारिताः" इत्यस्य ज्ञानसामान्यार्थपरत्वेन व्याख्याने स्मृतिरूपज्ञानविशेषार्थकतया च अव्याख्याने प्रदर्शितसूत्रस्य ज्ञानसामान्यार्थकत्वेन विषयतया प्रोक्तारसङ्गतिरित्यव-धेयम् । तथा च "दृशेश्च" इति वार्त्तिकसूत्रे दीक्षिताः,—"सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते, तेन स्मरति जिघ्रतीत्यादीनां न, स्मारयति घ्रापयति वा देवदत्तेन" इति । अन्ये तु दर्शनरूपज्ञानविशेषार्थकदृशि-धातोरेवाणिकर्त्तुः कर्मत्वस्य वैकल्पिकत्वं ज्ञानसामान्यार्थकानान्तु नित्यत्वं विदधति, तथा च तन्मते न कश्चिद्दोषः, इत्यलमनल्पजल्पनेन इति] । पथ्यावक्त्रं वृत्तम् ॥ ३४ ॥

तादृशरमणीयतरः कालः कथम्भूत एवासीत्, यो हि इदानीं सर्वथा दुःस्मरणीय उच्यते, तमेवाभिधत्ते, तदेति ।—तदा बाल्ये वयसि, विवाहात् परत एवेत्यर्थः, प्रागेव स्तनोद्भेदकालात् उपयमनविधेः प्राशस्त्यादित्याशयः, मृगदृशः कुरङ्ग-नयनायाः, प्रियायाः सीतायाः इत्यर्थः, स्तनयुगलं कुचयुग्मं, किञ्चित् किञ्चित् ईष-दीषत्, कृतपदं लब्धस्थानं, क्रमेण मुकुलमिव किञ्चित् अभ्युदयं प्राप्तमित्यर्थः, कतिपयैः कतिभिः, अहोभिः दिवसैः, कियद्दिनाभ्यन्तरे एवेत्यर्थः, [अपवर्गे तृतीया] तत् स्तनयुगलम्, ईषद्विस्तारि ईषद्विकासि, स्वल्पविस्तृतमिति यावत्, आसीत् अभूत्, यौवनोद्गमात् क्रमशः तत्कालोचितं स्थौल्यमधिगन्तुमारेभे इति भावः, यत्र यस्याम् अवस्थायां, वयसः यौवनस्य, स्नेहस्य प्रणयस्य, आकूतस्य अभिप्रायस्य च, व्यतिकरेण सम्पर्केण, घनः निबिडः, मिलित इव परिदृष्ट इति यावत्, मदनः कामः, हृदि मानसे, प्रगल्भः प्रौढः, व्यापारः क्रिया यस्य सः, सम्यगुद्बुद्धः सन् इत्यर्थः, स्फुरति विजृम्भते, वपुषि शरीरे, बहिराकारे इति यावत्, मुग्धः मूढः, स्वभावात् नाति प्रकटः इत्यर्थः, [illegible] सन्, स्फुरति इत्यन्वयः, तथा च तदानीं कामः वयसा प्रेम्णा

कृत । अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवी-मुद्दिश्य रघुपतेः श्लोकः । (क)—

त्वदर्थमिव विन्यस्त शिलापट्टोऽयमग्रतः ।
यस्यायमभित पुष्पैः प्रहृष्ट इव केशरः ॥ ३६ ॥

अभिप्रायविशेषेण च नितरा प्रवृद्धित सन् हृदये समुत्कट, शरीरे सौम्यदर्शन जनयति इति भाव । [अत्र एकस्यैव मदनस्य हृदयदेहरूपस्थलद्वयगोचरत्वेन पर्य्यायालङ्कार, अपि च प्रगल्भत्वमुग्धत्वयोर्विरुद्धयो एकत्र तदीयवपुषि अविरुद्धतया समावेशन विरोधाभासोऽलङ्कार, इत्युभयोरङ्गाङ्गिभावेन सङ्कर]। शिखरिणी वृत्तम् ॥ ३५ ॥

(क) मन्दाकिनी—चित्रकूटोपान्तचारिणी काचित् गिरिणदी, गङ्गा इति केचित्, तथा च रघौ कालिदास,—"मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमे ।" इति, चित्रकूटस्य—तदाख्य पर्व्वतविशेष, तत्र यानि वनानि—अरण्यानि, तेषु विहार,—क्रीडा तस्मिन्, तत्र तत्र विहारावसरे इत्यथ । सीतादेवी—वैदेहीम्। उद्दिश्य—सम्बोध्य। रघुपते श्लोक,—रघुपतिना एष वक्ष्यमाण श्लोक अभ्यधायि इत्यर्थ ।

अथ विहारकालिक तमेव श्लोकमिदानीमभिधत्ते, त्वदर्थमिवेति ।—अग्रत पुरत, अत्र परिदृश्यमान, शिलापट्ट शिलाखण्डरूपमासन, त्वदर्थमिव तवोपवेशनार्थमिव, विन्यस्त स्थापित, यस्य शिलापट्टस्य, अभित सर्व्वत, अय केशर वकुलपादप, पुष्प कुसुमै, प्रहृष्ट इव वर्षणकर्म्मनिरत इव, वकुलपादप स्वकुसुमानि शिलातलेषु मन्यच्य तव सुखशय्या विरचयितु प्रवृत्त इव प्रतीयते इति भाव । [अत्र "यस्य" इत्यत्र अभित शब्दयोगात द्वितीयाप्रसक्ते "अभित परित —" (वा०) इत्याद्यनुशासनोल्लङ्घनेन षष्ठीप्रयोगात् च्युतसंस्कारताऽऽख्य दोष । श्लोकश्चैष रामायणे न दृश्यत इति कविकल्पितोऽयमिति विभावयाम । अत्र स्वाभाविकशिलाविन्यास दृश्यत्वदपया सीतामङ्गलत्वाफलाभावेऽपि तदर्थत्वेनाभिधानेन उत्कटैक-कोटिकसम्भावनसमुदयात् क्रियोत्प्रेक्षे अलङ्कारौ, तयोश्चान्योऽन्यसापेक्षत्वात् सजातीय-सङ्कर एतेन सुरतकरविहारस्थानमेतदिति च गम्यते इत्यलङ्कारेण वस्तुध्वनि]। पथ्यावक्त्रं वृत्तम् ॥ ३६ ॥

राम। [सलज्जितस्नेहकरुणम्]। अतिनामाय मुग्ध शिशुजन',
विशेषतस्त्वरण्यचरः। हा देवि। स्मरसि वा तस्य प्रदेशस्य तत्-
समयविस्रम्भातिशयप्रसङ्गसाक्षिणः? कष्टं भो। कष्टम्। (ख)—

अमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनी-
मरुत्तरलितालकाकुलललाटचन्द्रद्युति।

(ख) लज्जित—लज्जा, प्रियासङ्गतस्य गोप्यविषयस्य बहिः प्रकाशनादिति ज्ञेयम्, स्नेह,—सीतागत प्रणय, पुत्रत्वबोधाद्वा तत्र शिशुजने वात्सल्य, करुणय—सीताविरहकृत शोकश्च, तैः सह वर्त्तमान यथा तथा, आहेति शेष। अतिनाम—अत्यर्थमेव। अय शिशुजन,—बाल कुश इत्यर्थ। मुग्ध,—सरलभावसम्पन्न। विशेषत,—विशेषेण। अरण्यचर,—आरण्यक, बालजन स्वभावत एव चातुर्य्यलेशरहित भवति, वनवासिबालस्तु सुतरामेवेति भाव। अथ तत्प्रदेशस्य स्मृत्युदयात् विलपति, हेति।—देवि।—सीते।। स्मरसि?—स्मृतिविषयता नयसि? इत्यर्थ। तस्य प्रदेशस्य—शिलापट्टादिसनाथ त देशमित्यर्थ। ["अधीगर्थदयेशाम्—" (२।३।५२ पा०) इति स्मृत्यर्थयोगात् कर्म्मणि षष्ठी] तत्समये—वनविहारकाले, य विस्रम्भातिशय,—विश्वासबाहुल्यम्, तत्तद्देशाना निरुपद्रवत्वात् तत्र मिथ सम्भाषणादेरनायासेनैव जायमानत्वादित्याशय', तस्य प्रसङ्ग,—व्यापार, अनुष्ठानमिति यावत, तस्य साक्षी—द्रष्टा तस्य, आवयो विस्रब्धालापविहरणादिक्रियाणा परिदर्शकस्येत्यर्थ, यत्र हि आवा सुखेन प्रागवसाव, त देशमिति भाव। कष्ट भो कष्ट—दुर्विषहस्य दुःखस्य जनकमेतदिति भाव।

अथ तत्तद्देशाना स्मृत्या सपदि सीतामुखप्रत्याभिज्ञानोदयात् तस्य तस्य वस्तुन नितरा रुचिरतामाह, श्रमेति।—श्रमाम्बुभि श्रमजनितै जलै, घर्म्मोदबिन्दुभिरिति यावत्, सर्व्वत्र वनोद्देशे पादाभ्या विहरणादिति भाव, शिशिरीभवत् शीतला भावनापद्यमानम्, अपि च प्रसृता उच्चलितेन, मन्देन मृदुना, मन्दाकिनीगतेन मन्दाकिनीसलिलसम्पृक्तवायुना, तरलितै चञ्चलतामापादितै, अलकै चूर्णकुन्तलै, आकुला तिरोहिता, ललाटचन्द्रस्य भालरूपशशधरस्य, द्युति दीप्ति, शोभेति यावत्, यस्मिन् तत, [कर्म्मधारये कृते "चन्द्र द्युति" पश्चात् बहुव्रीहि इति कश्चित्] कुङ्कुमेन चर्च्चितौ लिप्तौ, रञ्जितौ इति यावत्, कुङ्कुमचर्च्चितौ, ("[illegible] [illegible]" इत्यमर) न कुङ्कुमचर्च्चितौ [illegible] इति यावत्, तथाऽपि उज्ज्वलौ दीप्यमानौ,

अकुङ्कमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं मुखम् ॥ ३७ ॥

[स्तम्भित इव स्थित्वा सकरुणम्]। अहो नु खलु भोः। (ग)—

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः।

स्वत एव मनोहरावित्यर्थः, कपोलौ गण्डौ यस्मिन् तथाविधम्, अपि च निराभरणौ अनलङ्कृतौ तथाऽपि सुन्दरौ रमणीयौ, यौ श्रवणपाशौ प्रशस्तौ कर्णौ, निसर्गरमणीयौ कर्णावित्यर्थः, ("पाशः केशादिपूर्वः स्यात् तत्सङ्घे कर्णपूर्वकः। सुकर्णे च" इति मेदिनी) ताभ्यां सौम्यं रुचिरं, रमणीयमिति यावत्, मुखं सीतावदनम्, उत्प्रेक्ष्यते दृश्यते, सततमनुध्यानेन तव तादृशं मुखं चिरमदर्शनमपि इदानीं दृग्विषयतामासाद्यते इवेत्यर्थः, अहो! पुरा वनविहारजनितघर्मबिन्दुभिः शोभितं मृदुशीतलमारुतान्दोलित कुन्तलराजिरञ्जितभालशोभासुन्दरं कपोलरागरुचिरं सुमनोहरकर्णयुगलविराजितं ते मुखं कियद्दिनं द्रष्टुमिदानीं कथमपि शक्नोमीति भावः। [अत्र तथाविधसीतामुखस्यानुत्प्रेक्षितत्वेऽपि सम्भावनया तथात्वेनोत्प्रेक्षणात्, वाचकेवादिशब्दस्य च गम्यमानत्वात् प्रतीयमानक्रियोत्प्रेक्षाऽलङ्कारः, चन्द्रेण सह ललाटस्य च अभेदाध्यासात् निरङ्गरूपकमलङ्कारः, अपि च कुङ्कुमरूपप्रसाधनाद्यभावेऽपि तथा श्रवणप्रसाधनाद्यभावेऽपि च अहेतुकसौन्दर्योदयदर्शनात् विनाहेतुककार्योत्पत्तिरूपविभावनाऽलङ्कारश्च, इत्येतेषामन्योऽन्यसापेक्षतया स्थिते सङ्करः]। पृथ्वी वृत्तम्—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति लक्षणात् ॥ ३७ ॥

(ग) स्तम्भित इव—शोकावेगेन नितरां जडीभूत इव, पिशाचोपहत इव निर्व्यापारतया संस्थित इवेत्यर्थः। सकरुणं—सखेदम्। अहो नु खलु भोः।—अहो! अतः निरतिशयशोकसङ्कुलमितदित्यर्थः।

तदेव शोककारणं विशेषेण विवृणोति, चिरमिति।—चिरं सुदीर्घकालं, ध्यात्वा ध्यात्वा अभीक्ष्णं चिन्तयित्वा, [वीप्सायां द्विः] नियतं तद्रूपानुध्यानेनेत्यर्थः निर्माय रचयित्वा, पुरतः अग्रतः, निहित इव स्थापित इव, सततचिन्तनमहिम्ना काल्पनिकचित्रमयी पुरतः आनीय संस्थापित इवेति भावः, प्रियजनः प्रीत्यास्पदीभूतो जनः, प्रवासेऽपि देशान्तरेऽपि, दीर्घविप्रयोगावसरेऽपि इति यावत्, आश्वासं सान्त्वनाम्, विरहिणां तद्विरहदग्धहृदयस्येति भावः, न खलु करोति नैव विदधाति, इति न,

जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ ३८ ॥

[नेपथ्ये]।—वशिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।

अपि तु करोत्येवेत्यर्थः, विकल्पस्य तादृशानुध्यानस्य, व्युपरमे निवृत्तौ, (सति) जगत् भूमण्डलं, जीर्णारण्यं पुरातनतया पत्रपुष्पादिपरिशून्यशुष्कशाखापादपादिप्रतिभयं वनमिव सर्वथा अशोभनं, केवलं शोकदुःखादिसङ्कुलमिति यावत्, भवति हि सम्पद्यते एव, सर्वं सुशोभनमपि सर्वथा अशोभनमिव प्रतिभाति इति यावत्, "तदा रम्याण्यरम्याणि प्रिया शल्यं तदाऽसवः । तदेकाकी सबन्धुः सन् इष्टेन रहितो यदा ॥" इति भावः, तदनु तत्पश्चादित्यर्थः, हृदयं चेतः, विरहिजनस्येति शेषः, कुकूलानां तुषाग्नीनां, ("कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।" इत्यमरः) राशौ प्रचये पच्यते इव दह्यते इव, आदौ चेतः उदासीनं कृत्वा पश्चात् नितरां तेनाऽऽविना अभ्यौक्रियते इवेति भावः, निरन्तरानुचिन्तनवशात् यद्यपि प्रियजनप्रतिकृतिः मानसपटे समुदेत्य कथञ्चित् मानसिकं सन्तापमपनयति, तथाऽप्यसौ क्षणात् परमेव याथार्थ्यमनुभाव्य विलुप्तीभूय मानसं नितरां दन्दह्यते इत्यही । प्रियजनविप्रयोगस्य दुर्विषहतेति सचेपः । [अत्र प्रियजनप्रतिकृतेः पुरतः अनिहितत्वेऽपि सम्भावनया तथात्वोत्कीर्तनात्, अपि च हृदयस्य पचनाद्यभावेऽपि सम्भावनया तथात्वोपदेशात् क्रियोत्प्रेक्षेऽलङ्कारौ, एवमेव जगतः जीर्णारण्यरूपत्वाभावेऽपि तथात्वेन सम्भावनात् द्योतकेवाद्यभावत्वात् प्रतीयमानोत्प्रेक्षाऽलङ्कारः, अपि च जगति जीर्णारण्यतादात्म्याध्यारोपाच्च निरङ्गं रूपकमलङ्कारः, इत्येतेषां चतुर्णां परस्परनैरपेक्ष्येण संस्थितेः संसृष्टिः]। शिखरिणी वृत्तम् ॥ ३८ ॥

अथ एतद्दृष्टे विशेषतो विकृतस्य रामभद्रस्यापारशोकस्य सपदि प्रस्तावान्तरोपक्षेपणेन विपर्ययमुपपादयितुमिदानीं नेपथ्यभाषणेन लवचन्द्रकेत्वोर्युद्धवार्ता श्रवणात् समागतानां भगवदादीनां कौशल्यादीनां युद्धस्थानागमनमुपन्यस्यति, वशिष्ठ इति ।—वशिष्ठः तदाख्यः रघुकुलगुरुः, वाल्मीकिः भगवान् प्राचेतसः, दशरथस्य महिष्यः कृताभिषेकाः पत्न्यः कौशल्याद्याः, [एकत्वेऽपि गौरवात् बहुवचनम् । केचित्तु "महिष्यः" इति बहुवचनदर्शनात् सर्वासामेव दशरथपत्नीनामागमनमाहुः, तत्र, नः तासां एकस्या एवागतत्वात्, उपरिष्टात् रामवचनेन निर्णेष्यतीति

जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः॥ ३९॥

राम। कथं भगवन्तौ अरुन्धतीवशिष्ठौ अम्बा जनकश्च अत्रैव खलु एते द्रष्टव्याः? [सकरुणं विलोक्य]। अहह! तातजनकस्तु दैवादत्रैवायात इति वज्रेणेव ताडितोऽस्मि मन्दभाग्यः। (घ)—

मेयम्] अथ जनकः विदेहराजोऽपि, एते सर्वे इति भावः, अथशब्दोऽत्र अनुक्तवाचकः, अरुन्धत्या वशिष्ठपत्न्या, सहैव साङ्गमेव, शिष्यौ लवचन्द्रकेतौ कलह सङ्ग्रामम् आकर्ण्य श्रुत्वा, उभयोः कलहायमानयोः स्वनामसम्बन्धयो बालयोः अनिष्टापातनाशङ्का विवक्षा, सञ्जाता इति शेषः, अथ अनन्तरं, विदूरः अति-दूरवर्त्ती, असन्निकृष्ट इति यावत्, आश्रमः येषां तेषां भावः, तत्ता तया, तेषामाश्रमस्य अतीव दूरवर्त्तित्वादिति भावः, श्रमेण पथिभ्रमणक्लान्त्या, जडाः कातराः सन्तः, श्रयामता भूत्वा इति यावत्, त्वरितं त्वरायुक्तं, सोत्कण्ठमित्यर्थः, मनः येषां तथाभूताः सन्तोऽपि जरया वार्द्धकेन, ग्रस्तैः आयत्तीकृतैः वार्द्धकोदयात् सामर्थ्य-हीनैरिति यावत्, गात्रैः देहैः उपलक्षिताः, ["प्रकृत्यादिभ्यः" (वा०) इति तृतीया] चिरेण विलम्बेन, आगच्छन्ति खलु आयान्ति खलु, खलुशब्दोऽत्र वाक्यालङ्कारे सान्त्वनायां वा, ("खलु स्यात् वाक्यभूषायां जिज्ञासायाञ्च सान्त्वने"। इति मेदिनी) लवचन्द्रकेत्वोः समरदर्शनेन तयोरनिष्टाशङ्कया नितराम् उत्कण्ठितानामाश्रमवासिनां केषाञ्चित् परिसान्त्वनार्थं कस्यचिन्मुनेरुक्तिरियमिति बोध्यम्, रघुकुल-हितैषिणः भगवन्तः वशिष्ठादयः बालयोः सङ्ग्राममाकर्ण्य सत्वरं युद्धस्थलागमनात् वारयितुमेतौ अभिलषन्तोऽपि आश्रमस्यातीव सुदूरस्थितत्वात् स्वेषाञ्च जराजीर्णगात्रतया त्वरान्वितमनसोऽपि पथिश्रमाभिभततया क्लाम्यन्तः अत्वरितपदविक्षेपेनागच्छन्तीति भावः। [अत्र चिरेणागमनं प्रति जराग्रस्तगात्रत्वस्य श्रमजडत्वस्य च हेतुगर्भत्वेनोपपादनात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः]। शिखरिणी वृत्तम्॥ ३९॥

(घ) भगवन्तौ—माहात्म्यवन्तौ। अरुन्धतीवशिष्ठौ—गुरुपत्नी गुरुश्च एतौ द्वावपि। अम्बा—माता कौशल्या। जनकश्च—विदेहराजः श्वशुरश्च। एते—सर्वे। अत्रैव खलु—अस्मिन् सीतानिर्वासनस्थाने जनस्थाने एवेत्यर्थः, उपस्थिता इति शेषः। कथं—केन प्रकारेण, द्रष्टव्याः,—अवलोकयितव्याः, एतेषां पुरतः मूढवत् दुर्दैव

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वशिष्ठादिभिः
दृष्ट्वाऽपत्यविवाहमङ्गलमहे तत् तातयोः सङ्गतम्।
पश्यन्नीदृशमीदृशे पितृसखं वृत्ते महावैशसे
दीर्य्ये किं न सहस्रधाऽहमथवा रामेण किं दुष्करम्?॥४०॥

विवशचेताया इह कथमपि स्वमुखं दर्शयितुं न शक्नोमीति भावः। विशेषतो जनकदर्शनस्य दुःसहदुःखदायकत्वमाह, अहहेति।—अहह।—हा कष्टमेतदित्यर्थः। तातजनकस्तु—पितृतुल्यविदेहराजोऽपि। दैवात्—मम दुर्दैवविलसनात् हेतोः। अत्रैव—अस्मिन् सीतानिर्वासनस्थाने एव। आगतः,—उपस्थितः। इति—अस्मात् हेतोः। वज्रेणेव—अतिकठोरकुलिशेनेव। ताडितः,—अभिहतः। अस्मि—भवामि। मन्दभाग्यः,—हतदैवः, सीताया निर्वासनात् अतिशयं मां प्रति कुपितस्य च तत्जनकस्य जनकस्य साक्षात्करणं वज्रहननवत् मे नितरां पीडाजननमिति भावः।

अथेदानीं राजर्षेः जनकस्य सन्दर्शनेन पुनर्नवीभूतस्य शोकस्य तीव्रताया हेतुं प्रदर्शयति, सम्बन्धेति।—सम्बन्धस्य वैवाहिकसम्पर्कस्य, विदेहवंशीयैः सह रघुवंशीयानामिति भावः, स्पृहणीयतया वाञ्छनीयतया, श्लाघनीयतयेत्यर्थः, प्रमुदितैः प्रहर्षपुलकितैः, वशिष्ठादिभिः वशिष्ठप्रभृतिभिः रघुकुलहितैषिभिः मुनिभिः, जुष्टे सेविते, स्वोपस्थित्या पूर्णतां प्रापिते इत्यर्थः, अपत्यानां सीतारामादीनां, विवाहः परिणयः, स एव मङ्गलं माङ्गलिकं, शुभकरं इत्यर्थः, महः उत्सवः तस्मिन्, ("मह उद्धव उत्सवः" इत्यमरः) तातयोः पित्रोः दशरथस्य विदेहराजस्य च, तत् तथाविधम्, अतीव आनन्दविधायकमित्यर्थः, सङ्गतं पुरातनं समागमं, दृष्ट्वा प्राक् अवलोक्य, अधुना ईदृशे एवंविधे, दुर्विषहे इति यावत्, महावैशसे निर्वासनेन सीतावधादपि अतिक्रूरे कर्मणि, वृत्ते सङ्घटिते, सम्पादिते सति इत्यर्थः, ईदृशं शोकसन्निविष्टं, पितृसखं दशरथस्य सखायं परमप्रियं, राजर्षिं जनकमित्यर्थः, ["राजाहःसखिभ्यष्टच्" (पा०) इति समासान्तष्टच्प्रत्ययः], पश्यन् अवलोकयन्, अहं, किं कथं, सहस्रधा सहस्रप्रकारं, सहस्रखण्डेनेति यावत्, न दीर्य्ये न विदीर्णो भवामि? शोकातिशयेन यत् सा० दुःसहतया विदीर्णो भवामीति भावः, इदानीं मे निधनमेवोचितमित्याशयः। [दीर्य्ये इति देवादिकस्य आत्मनेपदिनो रूपम्, अथवा कर्मकर्त्तरि ...] रामेण किं दुष्करम्, अथवा रामेण किं दुष्करं? ... न किञ्चिदपि दुष्करं, रामेण कृतौ

[नेपथ्ये]। कष्टं भोः । कष्टम् ।—

अनुभावमात्रसमुपस्थितश्रियं
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रमूढजनकप्रबोधनाद्
विधुराः प्रमोहमुपयान्ति मातरः ॥ ४१ ॥

रामः । हा तात ! हा मातरः ! हा जनक !—

धन्येन मया इत्यर्थः , स्वनामग्रहणेन स्वस्याविमृश्यकारित्वं निस्नेहत्वञ्च व्यक्तीकृतमिति ज्ञेयम् । किं दुष्करम् ? किमिह दुःसाध्यमस्ति ? सर्व्वमप्येतेन मनेन कर्त्तुं योग्यं सहनीयञ्चेत्यर्थः , येन निरपराधा पतिव्रता सीता परित्यक्ता तस्य किमप्यकार्य्यं नासीति भावः । [अत्र रामस्य सर्व्वकार्य्यकरणसमर्थत्वरूपकारणेन, दारुणशोकसमयेऽपि अविदारणरूपकार्य्यस्य समर्थनात् कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः]। शार्द्दूलविक्रीडितं वृत्तम् ॥ ४० ॥

अथेदानीं सीताशोकविकलेन्द्रियस्य रघुमणेः तथाभूतं शोकोच्छ्वासं प्रस्तावान्तरावेशेणोपसंहर्त्तुं शोर्णदेहं रामभद्रमवलोक्य शोकात् विमूर्च्छितानां गुरुजनानां प्रमोहं नेपथ्यभाषणेनावतारयति, अनुभावेति ।—अनुभावमात्रेण केवलेन नैसर्गिकशारीरिकतेजोविशेषेण, समुपस्थिता विद्यमाना, श्रीः कान्तिः यस्य तथोक्तं, लावण्यमात्रावशेषं न तु पूर्व्ववत् दैहिकपीनत्वादियुक्तमित्यर्थः , ईदृशम् एवंविधं, सीतावियोगेन नितरां शीर्णकायमिति यावत्, रघुनाथं रामं, सहसैव अकस्मादेव, वीक्ष्य अवलोक्य, प्रथमं प्रागेव, प्रमूढस्य विलुप्तचैतन्यस्य, जनकस्य विदेहराजस्य प्रबोधनात् चैतन्यलाभात्, अनन्तरमिति शेषः, विधुराः विवशाः, मातरः रामजनन्यः, कौशल्येत्यर्थः , विलापावसरे राघवेण केवलं कौशल्याया एव नामग्रहणेन तस्या एवात्रागमनस्य सूचितत्वात्, [अत्र गौरवात् बहुत्वं ज्ञेयम्] , प्रमोहं मूर्च्छाम् उपयान्ति गच्छन्ति , तत्तत्स्थाने तावत्कालं पर्य्यटतः श्रीरामचन्द्रस्य सीतायाः कृते दुर्विषहशोकसमुत्थात् छायामात्रावशेषं शरीरकार्श्यं समजनि दूरादेव तद्दृष्ट्वा प्राक् राजर्षिर्जनकः मोहमुपागतः, कथञ्चिच्च तस्मिन् संज्ञामुपगते राममाता कौशल्याऽपि विमूर्च्छिताऽभवदिति तु समुदितवाक्यार्थः । [अत्र अनुभावमात्रेत्याद्युक्त्या न्यायस्य सीताशोकविधुरस्य रामचन्द्रस्य शोकाधिक्यस्य सम्यक् प्रतिपादनात् पर्य्यायोक्तमलङ्कारः]। मञ्जुभाषिणी वृत्तम् ॥ ४१ ॥

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम्।
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि ॥ ४२ ॥

यावत् सम्भावयामि। (ङ) [इति उत्तिष्ठति]।

कुशलवौ। इत इतस्तात। (च)

[सकरुणं परिक्रम्य निष्क्रान्ताः सर्व्वे]। (छ)

इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः ॥ ६ ॥

अथ वृथाऽपवादभयात् रघुकुलनन्दिनीभूतायां सीतायामन्याय्यमनाचरितरि अतीवाधन्ये स्वस्मिन् कृपापात्रत्वाभावमुपदर्शयति, जनकानामिति।—जनकानां जनकवंशीयानां, रघूणाञ्च रघुवंशीयानाञ्च, यत् सीतारूपं वस्तु, कृत्स्नं समग्रं, गोत्रयोः वंशयोः रघुजनककुलयोरित्यर्थः मङ्गलं शुभं यथैव हि तदा जनकाः रघवश्च मङ्गलवन्तः अभवन् इत्यर्थः तस्मिन् रघुजनककुलयोः सर्व्वमङ्गलनिदाने सीतारूपे वस्तुनि, अकरुणे निष्ठुरे, अतिनृशंसकर्म्मचारिणि इति यावत् पूर्णगर्भावस्थायां विनापराधं तस्याः हिंस्रकसङ्कुले वने निर्व्वासनादिति भावः, अत एव पापे पापकारिणि, दुष्टे इत्यर्थः, मयि रामे वः युष्माकं, करुणा दया वृथा निष्फला, दुष्टकरकर्म्मविधायिनो न हि भवति भवतामनुकम्पाभाजनमिति भावः। [यतो हि अहम् अकरुणः पापश्च अतो मयि वः करुणा वृथा इति करुणाभावं प्रति अकरुणत्वस्य पापत्वस्य च हेतुभततया उपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः अपि च यत्पदोपस्थाप्ये सीतारूपे वस्तुनि गोत्रमङ्गलत्वस्य अभेदाध्यासात् निरङ्गरूपकमित्यनयोः तिलतण्डुलवत् संसृष्टिः]। पथ्यावक्त्रं वृत्तम् ॥ ४२ ॥

(ङ) यावत्—वाक्यालङ्कारे। सम्भावयामि—स्वयं गत्वा समागतान् गुरुजनान् प्रणिपातादिना सम्वर्द्धयामि, शोकविमूर्च्छितान् सान्त्वयन्तान् प्राणयामीति वा भावः। [अत्र भविष्यदर्थे 'यावत्पुरा—" (३।३।४ पा०) इति लट्]।

(च) तात —पितृवत् पूजनीय भवानित्यर्थः। ('पुत्रे पितरि पूज्ये च तातशब्दः प्रयुज्यते" इति नियमात्) इत इतः,—अस्मिन्नेव पथि, पथाऽनेनेत्यर्थः, आगम्यतामिति शेषः।

(छ) सकरुणम्—सशोकम्। परिक्रम्य—परिभ्रम्य, नियतमुद्रापादविक्षेपं कृत्वेत्यर्थः। निष्क्रान्ताः,—गताः, रङ्गात् प्रचलिताः इत्यर्थः।

अथ षष्ठाङ्कस्य सङ्क्षेपः।

विष्कम्भके विद्याधरमिथुन दिव्य विमानमधिरुह्य रङ्गमाजगाम। विद्याधरस्तु स्वा प्रिया रणप्रचण्डयो कुमारयो भीषणमायोधन प्रदर्शयितुमारेभे। दिवि च देवा कुमारयोस्तयो श्रेयसे दुन्दुभि विनेदु। निपेतुश्च तदा तयो शिरसि अनवरतमेव मकरन्दरम्याणि कुसुमानि। अथ विद्याधरी प्राह, कथ हि सहसा अम्बरतल तडित्प्रभापिङ्गलमाभाति ? इति। विद्याधरस्तु प्रत्याह, समारोपित किमु अन्य त्वष्ट्रा शाणयन्त्रे मार्त्तण्ड। उत वा समुन्मीलयति जगत्संहारार्थं तृतीय लोचन भगवान् नीललोहित। येन हि अलौकिक तेजसा राशि नभोमण्डल समुल्लासयतीति। अथ विचिन्त्य पुनराह, आ ज्ञात, वत्सेन चन्द्रकेतुना आग्नेयास्त्रमभिप्रयुक्त, तस्मादेवैषा पावकप्रभा समाविर्भवतीति, यतो हि तदस्त्रप्रभाभि कर्बुरितकाये वैमानिकाना विमानमण्डले दाहभयात् द्रुत पलायितमेव, अहमपि प्रचण्डाग्निज्वालात स्वप्रियामात्मानञ्च रक्षितु सुदूरमपसरामीति उक्त्वा तथा अकरोत्। तदा पत्यु सुशीतलाङ्ग-सम्पर्शेन प्रशमितानलसन्तापा विद्याधरी प्राह, कथ हि विद्युद्विलासपरिशोभिते श्यामले नवजलधरे नभस्तल सहसा समाच्छाद्यते ? इति। तदाकर्ण्य विद्याधर आह, अहो। कुमारलवेन वारुणास्त्र सम्प्रयुज्य पावकास्त्र प्रशमितमिति। पुनश्चाह, हन्त भो। प्रगाढान्धकारनिमग्नमिव भूतजातमिदानी प्रवेपते यतो हि कुमारचन्द्रकेतुना वायव्यास्त्रमीरित, तेन च मरुता ब्रह्मविद्यया ब्रह्मणि विवर्त्तानामिव, भयसा मेघाना सहसा विलय सञ्जनित इति। अत्रान्तरे अपृच्छत् विद्याधरी को हि महापुरुष इदानी दूरत एव युद्धव्यापारविरतिमुपदिशन् कुमारावन्तरा विमानमवतारयति ? इति। तद्दृष्ट्वा विद्याधर आह भगवान् रघुपति शम्बूकवधादिदानी प्रतिनिवृत्त, तेन हि तद्गौरवात कुमारौ युद्धकर्माण त्वरितमेव व्यरंसिष्टाम्। अधुना सुतसङ्गमेन राज्ञ रामभद्रस्य शुभ भूयादित्युक्त्वा शुभमनुध्यायन् विद्याधर पत्न्या सह रङ्गान्निरक्रामीति।

अथ पुष्पकविमानादवतीर्य्य राम चन्द्रकेतुमाह वत्स। द्रुतमागत्य मा सुदृढ परिष्वजस्व, तव सुशीतलाङ्गाना सस्पर्शेन मम चित्तदाह प्रशममुपगच्छत्विति। तत, आर्य्य। अभिवादये इत्यभिधाय राममभिववन्दे चन्द्रकेतु। अपि कुशल दिव्यास्त्र-धारिण तव देहस्य ? इति पृच्छति राज्ञि, अत्यद्भुतकर्म्मण लवस्य लाभादेव मे कुशल,

तेन हि मामिवेम वीरमपि भवान् सस्नेहं पश्यत्विति चन्द्रकेतुराह। कुमार लवमवलोक्य राम आह अहो। जगत् रक्षितुमेवावतीर्णो मूर्तिमानस्त्रवेद इव, वेदनिधि रक्षार्थं धृतकाय क्षात्रधर्म इव सामर्थ्यसमुदाय इव, गुणनिचय इव, पुण्यराशिरिव चाय वीरपोत इति। अथ लव आह, पुण्यदर्शनोऽयं महापुरुष, स्नेहभक्तीनामेकाधारभूत मूर्त्तिमान् धर्मप्रकर्ष इवेति। आश्चर्यम्॥ इदानीं विरोध कुत्रापसृत, निर्वृतिपुनरस्य प्रसरति, औद्धत्यञ्च सदूरपराहतमेव, अवनमयति च मां विनयनस्वभाव महापुरुषमिमञ्च दृष्ट्वा आत्मनि नाहं प्रभवामि, अहो। पुण्यश्रेयाणामिव महतामलौकिकं माहात्म्यमिति। अथ राम आह, कथं मे सहसा सर्वाण्येव दुःखानि विस्मृतानि? स्नेहश्च मेऽन्तरात्मानं विद्रावयति? एवं हि कारणान्तरजन्य इति लोकोक्ति अलीकेवेति, यत सूर्य्योदये कमलमेव विकाशमेति, चन्द्रोदये च चन्द्रकान्तमणिर्विगलति, केनापि तु आन्तरेण हेतुना इमे पदार्था परस्परं स्नेहपाशमयता भवन्ति, किञ्चिदपि कारणं तेषां नाभिज्ञायते, यत हि स्नेहा बाह्यानि कारणानि न मनाययन्तीति।

लवस्तु चन्द्रकेतोर्वचनात् ज्येष्ठतातपादा इमे इति विदित्वा, अहो। सुप्रभातमद्य, यत देवो रघुमणि दृष्ट इति कथयित्वा सविनयं पुनराह, तात। लवो भवन्तमभिवादयत इति। तत राम सस्नेहमाह, आयुष्मन्। एह्येहि, मां सुदृढं परिष्वजस्व, चन्दनसारसकुमारस्तेऽङ्गस्पर्शः मां नितरां नन्दयतु। तदाकर्ण्य लव पुनरभिदधे, अश्वरक्षिणां मुखात् तत्रभवता वीरत्वगाथामुदयत्य स्ववीरत्वप्रदर्शनजनिता मे वाचिगता मर्षयन्त्विति। नन्वयमलङ्कार एव क्षत्रस्य, यथा सूर्य्यकान्तमणि दिनकरकिरणै समुतापित तेजांसि वमति, तथैव महान्त तेजस्विन स्वभावादेव परेषां तेज न विषहन्ते इत्यभिप्राय, जृम्भकास्त्रप्रभावेण चित्रलिखितानीवावस्थितानि स्वसैन्यानि विलोक्य राम तदस्त्रजातमुपसंहर्त्तु लवमादिदेश। स तु तथैवाकरोत्।

अथ राम जृम्भकास्त्राणां स्वसम्प्रदायमुत्तरं लव तत्सम्प्रदायमपृच्छत्, तन्नुत्वात तदस्त्राणां स्वत एव प्रकाशमभिमन्यासीनां पूर्वपुण्यप्रभावादेव एतेषां सम्यगोऽपि भवेत मन्त्रुपादिति किल्वा ननन्दयो। तत प्रसङ्गवशेन तौ तु यमलौ विदित्वा, कौ हि [illegible] द्वितीयो भवतीति अभिजानत। अपि च नैदयो कुशस्य सान्द्रायन इति च [illegible] समाकर्ण्य आह कौ हि नामाय वाल्मीकि [illegible] मे [illegible] समुत्पादयति? इति। तत चन्द्रकेतुना [illegible] बालक कुश भरताश्रमात् प्रतिनिवृत्तमाकर्ण्य पुनराह, [illegible]।

अत्रान्तरे कुशः महनीयकीर्त्तिभिरादित्यवंशीयैः नृपतिभिः विग्रहं स्वगौरवसूचकमभिमन्य धनुरास्फालयितुमारेभे। रामस्तु धीरोद्धतगतिसमलङ्कृतं तदीयमसामान्यवीर्य्यं विलोक्य परं मुमुदे। तदा लवस्तु कुशस्य समीपमागत्य रघुपतेः तद्दर्शनेच्छां तं विज्ञापितवान्। कुशस्तु रामायणकथापुरुषं वेदगोपायितारं दण्डदर्शनं रघुभाषणमवलोक्य परं विप्राय, चन्द्रकेतौ भ्रात्रा सखिभावस्थापनात् तत्सम्पर्केण अस्मत्तातं वदन् राघवं सवन्दितवान्। रामस्तु तं निर्भरं परिष्वज्य पूर्वसमालिङ्गनवत् परां निर्वृतिमधिजगाम। ततश्च सर्वे कियत्कालं प्रच्छायासुले शालतले समुपविश्य गोष्ठीसुखमनुबभूवुरिति।

अथ रामः राजलक्ष्मीविलाससुशोभितं कुशलवयोः निसर्गकान्तं कलेवरं वीक्ष्य, रघुकुलकुमारवदेतयोः प्रसन्नस्निग्धस्तिमितवीक्षणं मङ्गलमृदङ्गगम्भीरध्वनिश्च भवतीति विभाव्य, स्वशरीरसंवादिनीमाकृतिं जनकसुतानुरूपामङ्गसङ्घटनाञ्च समवलोक्य, तदा सीतायाः श्रीमदङ्गलावण्यं पुनः प्रत्यक्षीकृतवानिवेत्यमन्यत, किञ्च एतद्धि सीतानिर्वासनस्थानं स्वतःप्रकाशानि चैतयोः जृम्भकास्त्राणि, प्राक् स्वयं समीक्षितं द्विधाप्रतिपन्नं सीतायाः गर्भभारमित्यादिकं तदा मनसा समालोच्य विह्वलः सन् भृशं रुरोद च। तदा लवः रामस्य नेत्रावश्यायसिक्तं पुण्डरीकमिवाश्रुसलिलाप्लुतमाननमवलोक्य विस्मयान्वितो बभूव, तात! किमेतदित्यपृच्छच्च। तदाकर्ण्य कुशः आह, वत्स! रामायणं सम्यगधीत्यापि कथमेवमनभिज्ञ इव जिज्ञाससे? देवीं सीतां विना रघुपतेः किमपीह सुखकरं नास्ति, तादृशप्रणयात् परमसु दुर्विषहः एतादृक् वियोगो जगत् जीर्णारण्यप्रायमनुभावयतीति।

अथ रघुपतिः वाल्मीकिसरस्वतीनिस्यन्दभूतां रामायणकथां श्रोतुमभिललाष। ततः कुशमुखात् बालचरितस्यान्तिमौ द्वौ श्लोकौ समाकर्ण्यात्यधिकां मर्मव्यथामापत्। हा वैदेहि। तदा किल त्वमेवमेवासीरित्युक्त्वा समधिकं विलपितवान्। कुशस्तु तदा पुनः मन्दाकिनीचित्रकूटवनविहारावसरे देवीं सीतां प्रति रघुपतेः श्लोकान्तरमपठत्। मुग्धस्यारण्यचरस्य शिशोर्मुखात् तदाकर्ण्य रामः सीतां संस्मृत्य विललाप, सवाष्पगद्गदम् उवाच च, हा देवि! स्मरसि किन्तु तस्य दिवसस्य? यत्र तु मन्दाकिनीमरुता तव स्तनांशुकानि निःशेषमेव विशोषमुपगतानि, अलककलापकानि च कुङ्कुमरागबिन्दुगौरस्ये त्वन्मुखचन्द्रे परिपत्य क्षणं तदीयां प्रभां पर्याकुलामकरोदिति। अपि चाह अहो! सुचिरमनुध्यानात् प्रवासेऽपि प्रियजनेन कल्पनाप्रसूतेन सता पुरतः स्थितं इवेत्यभिमन्यते विरहिजनः, विकल्पे विनिवृत्ते च तेन पुनः जगत् जीर्णारण्यमिवानुभूयते, हृदयञ्च तस्य तुषानलेन विदह्यत इवेति।

अथ नेपथ्ये वशिष्ठादय महर्षय इत्या कौशल्यया अरुन्धत्या च सह ।भयकलह समाकर्ण्य त्वरितमागन्तुमभिलषन्तोऽपि जराग्रस्ततया सुचिरेणैव कालेनाव समायान्तीति कलरवमाकर्ण्य राघव प्राह, कष्ट भो । कष्ट, गुरुजना विगपतन्तु तातजनकोऽपि सीताविवासनदृश समसेव द्रष्टव्य इति मृग वज्रणाभताडितोऽस्मि मन्दभाग्य । इत्यमभिदधदेवासौ पुन , अहो । प्राक् वैवाहिकसम्बन्धप्रमुदितानां वशिष्ठादीना जनकादीनाञ्च विवाहमङ्गलमहोत्सवे समागम पश्यन्निदानीं पितृसखस्य जनकस्यातिनिर्विषस्य सीताविवासनस्थले दुष्टयों शोचनीयामवस्थामवलोकयन्नह धृतदेव कथ सहस्रधा न विदीर्यें ? इत्युक्त्वा बहुधा व्यलपत । अथ सीताविरोगपरि क्षतस्य रघुपतरीदृशीमनभावमावेकगम्या शरीरस्थिय विलोक्य विधुरा मातर गुरु जनाश्च सपाद प्रमोहमुपगता इति नेपथ्यनापितमाकर्ण्य राम, हा तात । हा मातर । हा जनक । एतस्मिन् पापे जनकरघुकुलवक्षोपरिहारक मयि भवता करुणा वृथैवेति समाश्वासनार्थं तदन्तिकमगात ।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चानन कुलपतिकल्प-"वि, प" इत्युपनामक
श्रीमज्जीवानन्दविद्यासागर भट्टाचार्य्यविरचितायां, तदात्मजाभ्या
श्रीमदाशुबोधविद्याभूषण श्रीमन्नित्यबोधविद्यारत्नाभ्या
परिवर्त्तित परिवर्द्धितायां सुखबोधिनीसमा
ख्यायाम् उत्तररामचरितव्याख्यायां
षष्ठोऽङ्क ॥ ६ ॥

अथ सप्तमोऽङ्कः।

लक्ष्मणः। भो भोः! भगवता खलु वाल्मीकिना सब्रह्मक्षत्र-पौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुर-तिर्य्यगुरगनायकनिकायो जङ्गमः स्थावरश्च भूतग्रामः स्वप्रभावेण सन्निधापितः। आदिष्टश्चाहमार्य्येण,—"वत्स लक्ष्मण! भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः, तद्गङ्गातीरमातोद्यस्थानमुपगम्य क्रियतां समाजसन्निवेशः" इति। कृतश्च मर्त्त्यामर्त्त्यस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं मया। (क) अयन्तु,—

(क) अथ वियोगान्तनाटकोपवर्णनस्य आलङ्कारिकजनाचारविरुद्धतया तत्रभवान् भवभूतिः तन्मतं सर्व्वथाऽनवर्त्तमानः वास्तविकवियोगान्तमपि रामचरितं काल्पनिकवृत्तोपन्यासेन मिलनान्तरूपतया समापयितुं विष्कम्भकरूपलक्षणवाक्यमूलेन सीतोपस्थितिवृत्तमवतारयति, भो भो इति।—भो! भो!—इति स्वानुचराणां सम्बोधकमव्ययम्। सब्रह्मेति।—ब्रह्मभिः,—ब्राह्मणैः, ("ब्रह्मा तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदोर्विप्रे" इति मेदिनी) क्षत्रैः,—क्षत्रियैः, पौरैः,—नागरिकैः, जानपदैः,—जनपदवासिभिश्च सह वर्त्तमाना या ताः, प्रजाः—प्रकृतिपुञ्जान्। अस्माभिः,—मादृशैः राजपरिजनैरित्यर्थः। सह—सार्द्धम्। आहूय—आमन्त्र्य। कृत्स्न एव—समग्र एव। सदेवेति।—देवाः,—अमराः, असुराः,—दितिसुताः, तथा तिर्य्यञ्चः,—पशवः पक्षिणश्च, उरगाः,—सर्पाश्च तेषां तेषु वा ये ये नायकाः,—मुख्याः, ("नायको नेतरि श्रेष्ठे हारमध्यमणावपि।" इति वैजयन्ती) तथा निकायः,—समूहः, ("सङ्घे चानौत्तराधर्य्ये" (३।३।४२ पा०) इति घञन्तस्य चिनोतेः समूहार्थे कादेशः। "निकायस्तु पुमान् लक्ष्ये सधर्म्मप्राणिसंहतौ। समुच्चये संहतानां निलये परमात्मनि॥" इति मेदिनी) तेन सह वर्त्तमानः। जङ्गमः,—गमनशीलः, मनुष्यादिरित्यर्थः। स्थावरश्च—स्थितिशीलश्च, पर्व्वतादिरित्यर्थः। (एवम्भूत) भूतग्रामः,—भूतानां—जङ्गमस्थावरात्मकजीवाजीवानां, ग्रामः,—समूहः।

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ।
वाल्मीकिगौरवादार्य्य इत एवाभिवर्त्तते ॥ १ ॥

स्वप्रभावेण—स्वकीयतपोमहिम्ना । सन्निधापित,—संस्थापित, एकत्र सन्निवेशित इत्यर्थ, स्थावराणां सन्निधानन्तु तत्तदधिष्ठातॄणां सन्निधानेनेति ज्ञेयम् । आदित्य—आत्मजः । आर्य्येण—पूज्येन, रामचन्द्रेणेत्यर्थः । स्वकृति—स्वस्य—आत्मनः, कृति—रचना, दृश्यकाव्यविशेषरूपामित्यर्थः । अप्सरोभिः प्रयुज्यमानाम्—उर्व्वशीप्रभृतिभिः रभिनीयमानाम् । उपनिमन्त्रिताः स्म,—आहूताः भवाम, वयमिति शेषः, भगवता वाल्मीकिना इत्यन्वयः । तत—तस्मात् । गङ्गातीरं—सुरधुनीतटम् । आतोद्यस्थान—चतुर्व्विधवाद्यविशेषस्थानं, रङ्गमित्यर्थः । ("ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम् ॥ चतुर्व्विधमिदं वाद्यं वादित्रातोद्यनामकम् ॥" इत्यमरः) । उपगम्य—प्राप्य । क्रियतां—विधीयताम् । समाजसन्निवेश,—समाजस्य—सदसः, सन्निवेश,—संस्थापनम्, अभिनयं द्रष्टुं समागतानां देवासुरादिसामाजिकसङ्घानां सुखोपवेशनयोग्यं रमणीयं रङ्गविरचनमित्यर्थः । मर्त्त्यामर्त्त्यस्य—मर्त्त्यस्य—मरणधर्म्मवतः मनुष्यादेः, तथा अमर्त्त्यस्य—अमरस्य । भूतग्रामस्य—प्राणिनिचयस्य । समुचितस्थानेषु—यथायोग्यप्रदेशेषु, गुणसम्माननाद्यनुरूपस्थलेषु इति यावत् । समुपवेशन—संस्थापनम्, इक्ष्वाकुवंशीयानां गुणग्रामविशेषगुम्फितां प्राचेतसकृतिं द्रष्टुं समागताः सर्व्वे एव प्रेक्षकाः यथा यथायोग्यस्थानेषु गुणगणानुसारतः सन्निवेशिताः इति भावः ।

अथेदानीं भगवतो रघुमणेः स्ववंशप्रशस्तिं वाल्मीकिविरचितां श्रोतुं तत्स्थलसमागमनाह, राज्याश्रमेति ।—राज्यं प्रजापालनरूपं राजकर्म्म, स एव आश्रमः गार्हस्थ्याश्रम इत्यर्थः, राज्यरूपः अतिविशालगृहस्थजनाश्रम इति भावः, तत्र च निवासः अवस्थानं तस्मिन्नपि, गृहमेधिजनैः यथाविध्यनुतिष्ठतः भगवतः रघुमणेः राजत्वात् तदनुपालितस्वजनस्य तदाश्रमत्वेऽपि [illegible] इति ज्ञेयम्, गृहस्थजनोचिते स्थाने निवासमतवर्त्तीति भावः, प्राप्तकष्टमुनिव्रतः प्राप्तः स्वीकृतः, कष्टः क्लेशकरः, मुनिव्रतः दारापरित्यागादिनियतत्वे । मुनीनामिव व्रतं [illegible] नियमविशेषः येन तथाविधः, गृहमध्यवर्त्त्यपि स्वान्तःपरित्यक्तभार्य्या [illegible] यमनियमाद्यवलम्बनपूर्व्वकं निर्व्विकारतया स्थित्वा [illegible] आहारविहारादिविषयभोगसाधनसामग्रीत [illegible] विनिवृत्ततया अवस्थित इति भावः, आर्य्यः रामः, वाल्मीकिगौरवात् वाल्मीकौ [illegible] सम्मानं, तत्कृते मुनिवरे [illegible] आत्ममहत्त्वादिधि

[ततः प्रविशति रामः]।

रामः । वत्स लक्ष्मण । अपि स्थिता रङ्गप्रेक्षकाः ? (ख)

लक्ष्मणः । अथ किम् ?

रामः । इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशीं स्थान-प्रतिपत्तिं लम्भयितव्यौ । (ग)

लक्ष्मणः । प्रभुस्नेहप्रत्ययात् तथैव कृतम् । इदन्तु आस्तीर्णं राजासनमुपविशतु आर्य्यः । (घ)

भावः, इत एव आश्रमैव स्थले, गङ्गातीरविरचितरङ्गस्थाने इति यावत् अभिवसत आगच्छति, सर्वविषयविरक्तोऽपि केवलं भगवति वाल्मीकौ बहुमानात् अत्र रङ्गं समायाति, न तु अभिनयदर्शनकौतुकोपभोगायमिति भावः । [अत्र गृहिणा मुनिजनोचिताश्रमानुपालनस्य असम्भावितत्वात् विरोधः, श्रीरामचन्द्रस्य अलौकिकमहिम-वत्वेन तत्परिहारात् विरोधाभासोऽलङ्कारः]। पथ्यावक्त्रं वृत्तम् ॥ १ ॥

(ख) अपि—प्रश्ने । [रज्यते अस्मिन्नित्यर्थे रञ्जतेः अधिकरणे घञ्] रङ्गः,—नाट्यभूमिः, तस्य प्रेक्षकाः,—दर्शकाः, सामाजिकजना इत्यर्थः । स्थिताः ?—यथा-योग्यस्थलेषु सुसुखमवस्थिताः किम् ? इत्यर्थः ।

(ग) चन्द्रकेतुसदृशीं—चन्द्रकेतुसमानाम् । स्थानप्रतिपत्तिं—स्थानस्य—समुप-वेशनयोग्यस्य आसनस्य, प्रतिपत्तिं—समादरं, यथायोग्यासनप्रदानेन गौरवमित्यर्थः । लम्भयितव्यौ—प्रापयितव्यौ, यादृशे आसने चन्द्रकेतुरुपविशति, तादृशे आसने इमौ बालकौ कुशलवौ अपि समुपवेशनीयावित्यर्थः । [लभतेः णिचि "लभेश्च (७।१।६४ पा०) इति नुमागमे कर्मणि तव्यप्रत्ययः, "लभेर्गत्यर्थत्वात् णिचि अणौ कर्त्तुः कर्म्मत्वाकर्म्मत्वे" (५ अधि० २ अ० ८ सू०) इति वामनोक्तौ प्राप्त्युपसर्जनगत्यर्थत्वे तु अणिकर्त्तुः कर्म्मत्वमेवेति व्याख्यानरहस्यात् अत्र प्राप्त्युपसर्जनगत्यर्थत्वात् अणकर्त्तृ-भूतयोः कुशलवयोः कर्म्मत्वं कर्म्माण चोक्तत्वेन प्रथमा ज्ञेया]।

(घ) प्रभ्विति ।—प्रभौ,—जगत्पतेः भवतः, यः स्नेहः,—कुशे लवे च वात्सल्यं, तस्मिन् प्रत्ययः,—विश्वासः तस्मात्, कुशलवयोः भवतः तादृशः स्नेहः विलोक्येत्यर्थः । तथैव कृतं—भवत्कथनानुरूपम् अभिप्रायाभिज्ञेन मया प्रागेवानुष्ठितमित्यर्थः, चन्द्र-केतुसदृशमेव आसनम् एताभ्यां प्रदत्तमिति भावः । आस्तीर्णम्—उपस्थापितम्, उपकल्पितमित्यर्थः । राजासनं—सिंहासनम् । उपविशतु—उपवेशनेनालङ्करोत्वित्यर्थः ।

राम। [उपविशति। सर्वे चोपविशन्ति]।

राम। प्रस्तूयतां भोः। (ङ)

सूत्रधार। [प्रविश्य]। भो भोः। भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति,—"यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनकरुणाद्भुतरसं किञ्चिदुपनिबद्धं, तत्र कार्य्यगौरवादवधातव्यम्" इति। (च)

(ङ) प्रस्तूयतां—प्रारभ्यतां, नाटकीयं वस्तु अभिनीयतामित्यर्थः।

(च) सूत्रधार,—सूत्रं—नाट्योपकरणादिकं, सप्तनाङ्कोदरप्रविष्टस्य गर्भाङ्कस्य इति शेषः, धारयति—प्रवर्त्तयति यस्तथोक्तः, "नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते॥" इत्युक्तेः आमुखादिमतः गर्भाङ्करूपाभिनवनाटकीयवस्तुनः प्रवर्त्तकः नटविशेष इति यावत्, "अङ्कोदरप्रविष्टो यो रङ्गद्वाराऽऽमुखादिमान्। अङ्कोऽपरः स गर्भाङ्कः सवीजः फलवानपि॥" इति दर्पणात्। भो भो।—इति सामाजिकजनसम्बोधनं, हे प्रेक्षकमण्डली इत्यर्थः। भूतेति।—भूतम्—ऋतं, सत्यमित्यर्थः, ("युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु" इत्यमरः) अर्थं—वस्तु वदितुं—कथयितुं शीलमस्येति तथोक्तः, यथार्थभाषी इत्यर्थः। प्राचेतसः,—वाल्मीकिः। सेति।—जङ्गमैः,—गतिमद्भिः मनुष्यादिभिः, स्थावरैः—स्थितिशीलैः वृक्षलतादिभिश्च सह वर्त्तमानं यथा तथेत्यर्थः, अचेतनेषु स्थावरेषु भगवतो वाल्मीकेः आज्ञापनं तत्तदधिष्ठातृषु ज्ञेयम्, अतो न विरोधः, जगत्—चराचरं विश्वम्। आज्ञापयति—आदिशति। किं तत्? एतदेवाह, यदिति।—यत्—यस्मात् कारणात्। अस्माभिः,—मयेत्यर्थः। [अविशेषणत्वेनात्मनि बहुत्वम्] आर्षेण—ऋषिसम्बन्धिना, अतीन्द्रियेण इत्यर्थः, भूतं भविष्यत् वर्त्तमानञ्च विषयजातं करमिव प्रत्यक्षीकृत्वेति भावः। चक्षुषा—नेत्रेण, योगजसन्निकर्षेण [illegible] ज्ञानमयेन वीक्षणेनेति भावः। समुद्वीक्ष्य—सम्यगवलोक्य, [illegible] तत् [illegible] पूतं [illegible] । पावनेति।—पावनं,—अतिपवित्रं, [illegible] पवित्रताविधायकं इत्यर्थः, करुणाद्भुतरसं,—करुणं,—शोकस्थायिभावकं, [illegible] इत्यर्थः, अद्भुतं,—विस्मयस्थायिभावकं, रसं,—[illegible] वस्तु [illegible], [illegible] । ("पावनं करुणाद्भुतरसं" [illegible]

राम। एतदुक्तं भवति। साक्षात्कृतधर्म्माण ऋषयः, तेषामसृतसाराणि भगवता परोरजांसि प्रज्ञानानि न क्वचिद् व्याहन्यन्ते इत्यनभिशङ्कनीयानीति। (छ)

पाठान्तरम्) किञ्चित—रूपकमित्यर्थः। उपनिबद्ध—विरचितम्। तत्र—रूपके। कार्य्यगौरवात्—कार्य्यस्य—विवक्षितवस्तुनः, गौरवात्—बहुमानात्, तस्य अतीवादरणीयत्वादित्यर्थः। अवधातव्य—मनः विषयान्तरात् विनिवर्त्त्य मायथ सन्निवेशयितव्यमित्यर्थः। इति—एवम्, आज्ञापयतीत्यनेनान्वयः। अस्य तात्त्विकोपनिबद्धतया एतादृशी प्रार्थना न दोषावहेति ज्ञेयम्।

(छ) एतत्—एवमित्यर्थः। उक्तं भवति—कथितं भवति सूत्रधारेणेति शेषः, सूत्रधारेण भगवतो महर्षेः आशय इत्थमेव व्यक्तीकृत इति भावः। तस्य स्वयमेव निष्कृष्टार्थमभिदधाति, साक्षादिति।—साक्षात्कृतः,—प्रत्यक्षीकृतः, धर्मः,—अलौकिकश्रेयःसाधनरूपः यैः तथाभूताः योगजसन्निकर्षेण सर्व्वार्थदर्शिन इत्यर्थः, यद्वा—साक्षात्कृत —आर्षेण चक्षुषा प्रत्यक्षवत् परिज्ञातः धर्मः,—वस्तुतत्त्वं यैः ते तथोक्ताः। ["धर्म्मादनिच् केवलात्" (५।४।१२४ पा०) इति बहुव्रीहौ धर्म्मशब्दात् समासान्तः अनिच्प्रत्ययः]। अमृतसाराणि—अमृतस्येव—पीयूषरसस्येव, सारः,—उत्कर्षः येषां तानि, पीयूषरसवद्विमलानि इत्यर्थः, यद्वा—अमृतस्य—मोक्षस्य सारः,—स्थिरांशः येषु तानि मोक्षलाभोपायभूतानि इति भावः, "ज्ञानान्मुक्तिः" इति साङ्ख्यसिद्धान्तः। परोरजांसि—परम्—अतीतः, रजः,—रजोगुणः येभ्यः तानि, रजोगुणासम्पृक्तानि, रजसः पराणि इति वा अर्थः। रज इति तमसोऽप्युपलक्षणम्, तेन सत्त्वगुणप्रधानानि इति यावत्। [राजदन्तादिवत् परनिपातः। "पारस्करप्रभृतीनि च संज्ञायाम्" (६।१।१५७ पा०) इति परशब्दात् सुट् निपात्यते]। तेषां भगवताम् —वाल्मीकिप्रभृतीनाम्। प्रज्ञानानि—प्रकृष्टतत्त्वज्ञानानि। क्वचित्—कुत्रापि, विष्वपि कालेष्वित्यर्थः। न व्याहन्यन्ते—न प्रतिहतानि भवन्ति। इति—अस्मात् हेतोः एतेषां विशुद्धसत्त्वमयत्वादिति भावः। अनभिशङ्कनीयानि—न सशयितव्यानि महर्षिभिः विज्ञाननयेन चक्षुषा यानि यानि हि प्रत्यक्षीकृतानि तानि हि तत्त्वानि कुत्रापि अयथार्थभूतानि भवितुं नार्हन्ति, अतः महर्षिणा वाल्मीकिना यदि उपनिबद्धं, तत् सर्वं निःसन्दिग्धचेतसा ग्रहीतव्यं, कुत्रापि संशयः क्रियतामपि न चाम, इति भावः।

[नेपथ्ये]। हा अज्जउत्त। हा कुमारलक्खण। एआइणीं मदभाइणीं असरणं अरणे आसणपसववेअणा हदास सावदा म अहिलसंति, साह दाणिं मदभाइणी भाइरहीए अत्ताणं निक्खिवेमि। * (ञ)

लक्ष्मण। [आत्मगतम्]। कष्टं वतान्यदेव किमपि। (झ)

---

* हा आर्य्यपुत्र। हा कुमारलक्ष्मण। एकाकिनीं मन्दभागिनीम् अशरणा अरण्ये आसन्नप्रसववेदना हताशा श्वापदा मामभिलषन्ति, साऽहमिदानीं मन्दभागिनी भागीरथ्यामात्मान निक्षिपामि।

(ञ) कुमारलक्ष्मणेन विजने वने वैदेह्या निर्वासनानन्तर तस्या किं वृत्त, तदेव अभिनवभाविनीपवर्णयितुमिदानीं नेपथ्यभाषितमवतारयति, इति।—हा आर्य्यपुत्र।—हा प्राणसमरते रघुमणे।। हा कुमारलक्ष्मण।—हा स्नेहास्पद सौमित्रे। एकाकिना—द्वितीयरहिता, सहायहीनामित्यर्थ। मन्दभागिनी—हतभाग्याम्। अशरणा—नास्ति शरण—रक्षिता यस्या ता, रक्षकहीनामित्यर्थ। आसन्ना—समुपस्थिता प्रसवस्य—गर्भमोचनस्य, वेदना—व्यथा यस्या ताम् आसन्नप्रसववेदना—प्राप्तप्रसवलक्षणामित्यर्थ। हताशा—हता—विनष्टा, आशा—जीवनाद्याकाङ्क्षा यस्या ता, जीवनप्रत्याशारहितामित्यर्थ। मा—वैदेहीमित्यर्थ। श्वापदा,—शुन पदानि इव पदानि येषा ते, हिंस्रजन्तव इत्यर्थ। अभिलषन्ति—भक्षयितुमिच्छन्ति। साऽहम्—इत्थं निरुपाया अहम्। इदानीम्—अधुना, ईदृश विपत्काले समये इत्यर्थ। भागीरथ्या—गङ्गायाम्। आत्मान—स्वदेहम्। निक्षिपामि—परित्यजामि, अधुना जीवनरक्षायै आशाया अभावात् हिंस्रजन्तुदंष्ट्रे स्वशरीरमनर्पयित्वा मातु भागीरथ्या जले आत्मान विसर्जयामीति भाव।

(झ) कष्टम्—अनिष्ट [illegible] इत्यर्थ। वत—खेदे, यदनन्तरमिद नेपथ्यभाषण [illegible] इति भाव। अन्यदेव—एतस्मात् निर्वासनविषयात् भिन्नमेव। किमपि—अनिर्वच[illegible], एतद् [illegible] इति [illegible] आशाकल्पितम्, एतत् तत न भवतो [illegible], [illegible] न शक्यते, परन्तु [illegible] [illegible] इति भाव।

सूत्रधार।—विश्वम्भराऽऽत्मजा देवी राज्ञा त्यक्ता महावने।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति॥ २॥

[इति सूत्रधारो निष्क्रान्तः]।

राम। देवि। क्षणमपेक्षस्व। (ञ)

लक्ष्मण। आर्य्य। नाटकमिदं नाटकमिदम्। (ट)

नेपथ्यभाषितार्थं सूत्रधारः स्वयमेव विशदीकृत्य नाटकीयाऽऽमुखमुपसंहरति, विश्वेति।—राज्ञा नृपेण, रामेणेत्यर्थः, महावने भीषणे दण्डकारण्ये, त्यक्ता विसृष्टा, निर्वासितेत्यर्थः, विश्वम्भराऽऽत्मजा विश्वं निखिलं जगत्, बिभर्त्ति धारयति या सा विश्वम्भरा पृथिवी, ["संज्ञायां भृतॄवृजि—" (३।२।४६ पा०) इति खच्प्रत्ययः]। तस्या आत्मजा दुहिता, देवी सीता, प्राप्तप्रसवं प्राप्तः उपस्थितः, प्रसवः गर्भावमोचनकालः यस्य तथाविधम्, आसन्नप्रसवकालम्, उपस्थितप्रसववेदनं वेत्यर्थः, आत्मानं स्वदेहम्, ("आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि।" इति विश्वः) गङ्गादेव्यां भागीरथीप्रवाहे, विमुञ्चति त्यजति, हिंस्रकादिभ्यः आपमृत्युविनिहत्तये मातृसमाया जाह्नव्याः शरणमाश्रीता तेन आत्महत्यादिकृतः दोषः नाशङ्कनीयः इति भावः। इदन्तु आमुखं प्रयोगातिशयरूपं ज्ञेयम्। पथ्यावक्त्रं वृत्तम्॥ २॥

(ञ) देवि।—जानकि। क्षण—कियत्कालम्। ["कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति द्वितीया] अपेक्षस्व—विलम्बस्व, मां विहाय त्वमेकाकिनी कुत्रापि कदाऽपि नैव गता, अतः अधुनाऽपि त्वमेकाकिनी एव न गन्तुमर्हसि, यावत् अहमपि तवानुवर्त्ती भवामि, तावदपेक्षस्व इति भावः, मयि जीवति इदानीं न हि त्वमशरणा सती जाह्नवीजले आत्मानं विनिक्षेप्तुमर्हसि, अहमेव ते शरणं सर्वथा भविष्यामीति वा भावः। नेपथ्यभाषणश्रवणात् परं रामेणाप्येतत् व्यक्तीकृतं यदसौ प्राप्तवना जानकी ननु न हि निर्वासितवानिति, तेन हि आनिशं तच्चिन्तया तादृशाभिनयदर्शनेन च इत्थं प्रलपितमित्यवधेयम्।

(ट) आर्य्य।—पूज्य रघुनन्दन। इदं नाटकं—महर्षिवाल्मीकिविरचितं दृश्यकाव्यमेतत्, न हि तात्त्विकतया वैदेही इदानीं गङ्गायाम् आत्मानं निक्षिपति प्राक् यादृ नूनं तद्वेदीयनिबद्धं वस्तु इदानीम् अभिनीयते, अतस्तदर्थं विलापः तदुद्धरणप्रयासो वा ऋणु नोचित इति भावः। [अवधारणे द्विरुक्तिः]।

राम। हा देवि! दण्डकारण्यवासप्रियसखि! एष ते रामाद्दैवदुर्विपाकः। (ठ)

लक्ष्मण। आर्य्य! दृश्यतां तावत् प्रबन्धार्थः। (ड)

राम। एष सज्जोऽस्मि वज्रमयः। (ढ)

[ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता]। (ण)

राम। वत्स लक्ष्मण! असंविज्ञातमनिबन्धनं तम इव प्रविशामि, धारय माम्। (त)

(ठ) दण्डकारण्यवासप्रियसखि।—दण्डकारण्ये—जनस्थानान्तर्गते जनशून्ये तदाख्ये वने, यो वासः,—वसतिः, तत्र प्रियसखि!—अनुकूलसहचरि!, एकमात्रसहायभूते इत्यर्थः। ते—तव। एषः,—गङ्गायामात्मविसर्जनरूप इत्यर्थः। दैवदुर्विपाकः,—दैवस्य—दुरदृष्टस्य, दुर्विपाकः,—विषमयः परिणामः। रामात्—अधन्यात् मत्त एवेत्यर्थः, समजनि इति शेषः, या त्वं सदा मत्समसुखदुःखा आसीः, अहमेव तथाभूतायाः ते सख्याः विपत्तेः मूलम्, अतो मत्समो नास्ति अन्यः कृतघ्न इति भावः।

(ड) दृश्यताम्—अवलोक्यताम्। प्रबन्धार्थः,—प्रबन्धस्य—उपनिबद्धवस्तुनः, अर्थः,—विषयः, इदानीं त्वयाशोक विजहीहि, यदि कृतं वस्तु, तदेव अधुना अभिनीयते, अतस्तत्सर्वं धैर्यमवलम्ब्य पर्यवलोकय इति भावः।

(ढ) वज्रमयः,—कुलिशसमकठिनहृदयः, अतिनिष्कृप इत्यर्थः। एषः,—अयम्, अहमिति शेषः। सज्जः अस्मि—श्रोतुमेव व्यापारितः भवामि, यद्यहं वज्रसमकठिनकायः न स्याम्, तदा कथमेतादृशकठोरव्यापारश्रवणात् परमेव न शतधा विचूर्णितकायः भवेयम्? तत् नूनं मत्समः नृशंसः नास्तीह कुत्रापीति भावः।

(ण) उत्सङ्गितेति।—उत्सङ्गितः—क्रोडदेशे स्थापितः, एकैकः,—प्रत्येकमेकमात्र एवेत्यर्थः, दारकः,—बालकः याभ्यां ताभ्याम्, एकैकदारक स्ववाम सव्यापसव्य। पृथ्वीगङ्गाभ्याम्—वसुन्धराभागीरथीभ्याम्। अवलम्बिता—धृता। सीता [illegible]।

(त) असंविज्ञातम्—अननुभूतपूर्वम्। अनिबन्धनम्—अहेतुकम्, आकस्मिकमिति यावत्। तम इव—अन्धकारमिव। प्रविशामि—निमज्जामि, तस्मात् अतः

गङ्गा ।—समाश्वसिहि कल्याणि ! दिष्ट्या वैदेहि ! वर्द्धसे ।
अन्तर्जलं प्रसूताऽसि रघुवंशधरौ सुतौ ॥ ३ ॥

सीता । [समाश्वस्य] । दिट्ठिआ दारए पसूदम्हि, हा अज्ज-उत्त ! * (थ) [इति मूर्च्छति] ।

लक्ष्मणः । [पादयोर्निपत्य] । आर्ये ! आर्ये ! दिष्ट्या वर्द्धामहे, कल्याणप्ररोहो रघुवंशः । [विलोक्य] । हा ! हा ! कथं क्षुभित-वाष्पोत्पीडनिर्भरं प्रसुप्त एव आर्यः । (द) [इति वीजयति] ।

---

* दिष्ट्या दारकौ प्रसूताऽस्मि, हा आर्यपुत्र !

यासि इत्यर्थः, अभिनवदर्शनेन एवमेव मोहमुपागतः यत्, निविडान्धकारमध्ये निमज्जित इवाहमस्मि इति मन्ये इति भावः । मां धारय—हस्ताभ्यां मच्छरीरम् अवलम्बस्वेत्यर्थः । ["तम" इत्यत्र "अन्धतमसम्" इति पाठे—अन्धयतीति अन्धं, तदाविधं तमः अन्धतमसं—गाढं ध्वान्तमित्यर्थः । "अवसमन्धेभ्यस्तमसः" (५।४।७९ पा०) इति समासान्तः अच्प्रत्ययः] ।

अथ वियोगविधुरायाः सीतायाः भागीरथीकृतं समाश्वासनप्रकारमाह, समाश्वसिहीति ।—हे कल्याणि ! मङ्गलालये !, हे वैदेहि ! सीते !, समाश्वसिहि समाश्वस्ता भव, दैन्यं विजहिहि धैर्यञ्च धेहि इत्यर्थः, दिष्ट्या भाग्येन, वर्द्धसे वृद्धिं गताऽसि, सौभाग्यवशेन पुत्रलाभाभ्युदयात् अधुना त्वं श्रेयस्विनी भवसीत्यर्थः, रघुवंशधरौ रघुकुलाङ्कुरावित्यर्थः, सुतौ पुत्रौ, अन्तर्जलं गङ्गाप्रवाहमध्ये इति यावत्, [जलस्यान्तः इति विभक्त्यर्थेऽव्ययीभावः, "तृतीयासप्तम्योर्बहुलम्" (२।४।८४ पा०) इति सप्तम्या पाक्षिकः अमभावः ज्ञेयः] प्रसूताऽसि उत्पादितवती भवसि, पुत्रौ त्वया प्रसूतौ इत्यर्थः, यतस्त्वं पुत्रद्वयं प्रसूतवती, अतोऽतीव सौभाग्यवती भवसीति भावः । [अत्र आदिकर्म्मणि कर्त्तरि क्तप्रत्ययः] । पथ्यावक्त्रं वृत्तम् ॥ ३ ॥

(थ) दिष्ट्या—भाग्येन । दारकौ—पुत्रौ । प्रसूताऽस्मि—उत्पादितवती भवामि, पुत्रोत्पत्तिस्वरूपजननकालेनैव यथा मम अनिर्वचनीयहर्षस्य समुदयोऽभवत् इति दिष्ट्येत्युक्तं, ततश्च यदि हि पुत्रद्वयप्रसवसमये पतिः समीपे वर्त्तेत, तदा कियान् आनन्दोऽस्माकं स्यादिति निरन्तरभावनया प्रियपतिविरहं संस्मृत्य तादृशपतिसमागमाभावजनित-शोकेन मूर्च्छागमोऽभूदिति ज्ञेयम् ।

(द) वर्द्धामहे—वयमधुना सर्वे सौभाग्ययुक्ता भवाम इत्यर्थः । कल्याणप्ररोहः,—

पृथ्वी। वत्से! समाश्वसिहि समाश्वसिहि।

सीता। [आश्वस्य]। भअवदि! का तुमं इअं अ? । * (ध)

पृथ्वी। इयन्ते श्वशुरकुलदेवता भागीरथी। (न)

सीता। भअवदि! णमो दे णमो दे। †

भागी। चारित्रोपचिता कल्याणसम्पदमनुगच्छ। (प)

---

* भगवति! का त्वमियञ्च?

† भगवति! नमस्ते नमस्ते।

कल्याण,—शुभकर, प्ररोह,—अङ्कुरो यस्य स, मङ्गलप्रदाङ्कुरसमन्वित इत्यर्थ। रघुवंश,—रघो, वंश इव—वेणुविशेष इव, वंश,—अन्वयाय, रघुकुलरचाकर माङ्गलिक अङ्कुर सञ्जात इत्यर्थ, सीताया तनयोत्पत्त्या रघुवंश इदानीं प्रतिष्ठां गत इति भाव। [अत्र कल्याणे स्वाभेदारोपकप्ररोहशब्दसाहचर्यात् वंशशब्दस्य श्लिष्टतया श्लिष्टपरम्परितरूपकालङ्कार]। क्षुभितेति।—क्षुभितेन—अत्यर्थम् उद्वेलितेन, बाष्पाणाम्—अश्रूणाम्, उत्पीडेन—पूरेण, निर्भर,—प्रगाढ, प्रगाढतरा आकुल इत्यर्थ, अजस्रं बाष्पायमाणनयन इति यावत्। प्रमुग्ध एव—मूर्च्छित एव। आर्य,—राम, अकारणसीतानिर्वासनजनितस्वदोषं सस्मृत्य नियतम् अश्रूणि विमुञ्चन्नेव रघुमणि स्ववंशरचाकर सीताया दारकद्वयं प्रसूतमाकर्ण्य सहसा हर्षोद्रेकात् धैर्यं धारयितुमपारयन् सपदि मोहमुपागत इति भाव।

(ध) का त्वम्?—अत्रभवती किन्नामधेया भवसि? इयञ्च—एषा अपरा भवत्सङ्गिनी च, का इत्यन्वय, किं हि नाम भवत्या अस्याश्च इति विज्ञातुमिच्छामीति भाव, भागीरथ्या देहविमज्जनसमये ते द्वे देव्यौ तदीयतपप्रभावात् सहसा आविर्भूता, तत्तत्रैव रोदितवत्यौ, तस्मिन् प्रसवकाले मूर्च्छिता सा किमपि नाजानात्, अत नविज्ञपरिचानाम परिचाययति इति ज्ञेयम्।

(न) श्वशुरेति।—श्वशुरस्य—दशरथस्य, यत् कुलं—वंश तस्य देवता—अधिष्ठात्री देवी, महर्षिकपिलशापनिर्दग्ध [illegible] सगरसन्ततीनां समुद्धारकारिणी भागीरथी [illegible] रघुकुलानामधिदेवतात्वेन विशेषत उपास्या आसीदिति ज्ञेयम्।

(प) चारित्रेति।—चारित्रेण—पातिव्रत्यमर्यादापालनचरितवता, उपचिता—[illegible]। कल्याणसम्पद—मङ्गलसम्पत्ति, [illegible]। अनुगच्छ—लभस्व [illegible] पातिव्रत्यचारित्रवती भवती तदनुरूपश्रेयोभाजनं भवतीति भाव। ([illegible] पाठान्तरम्)।

लक्ष्मण । अनुगृहीताः स्मः । (फ)

भागी । इयन्तु जननी ते वसुन्धरा ।

सीता । हा अम्ब । ईदिसी अहं तुए दिट्ठा । (ब) *

पृथ्वी । एहि वत्से । एहि पुत्रि ।

[इति सीतामालिङ्ग्य मूर्च्छति]।

लक्ष्मण । [सहर्षम्]। दिष्ट्या पृथ्वीगङ्गाभ्यामभ्युपपन्ना आर्य्या । (भ)

राम । [अवलोक्य]। करुणतरं खलु एतद्वर्त्तते । (म)

भागी । विश्वम्भराऽपि नाम व्ययत इति जितमपत्यस्नेहेन ; यद्वा सर्वसाधारणो ह्येष मोहग्रन्थिरन्तश्चरश्चेतनावतामनुपप्लवः संसारतन्तुः । वत्से वैदेहि । देवि भूतधात्रि । समाश्वसिहि समाश्वसिहि । (य)

---

* हा अम्ब । ईदृशी अहं त्वया दृष्टा ।

(फ) अनुगृहीताः स्म,—अनुकम्पिता भवाम , भागीरथ्या रघुकुललक्ष्मीभूताया सीताया शुभाशीर्व्वचसा वयं सर्वे एव मङ्गलभाजः भवाम इति भाव ।

(ब) हा अम्ब ।—भो मातः वसुन्धरे । । ईदृशी—एवंविधा, विपन्ना इत्यर्थ , अलोकापवादभयात् स्वभर्त्रा निर्वासितेति यावत । त्वया—भवभवत्या । दृष्टा—आलोकिता , सर्व्वलोकसाक्षिभूताया भवत्या भगवत्या विद्यमानाया निरागस तद्दुहितुर्मे एव वृथाऽपवादेन अयथानिकार उदपादि, न हि त्वया तत्प्रतिकार कथमपि कर्त्तुं शक्त इति भाव , चारित्रापरिभूताया दुहितु जनन्यादिगुरुजनदर्शनं निरतिशयलज्जाकरमिति वा भाव । मातृपरिचयश्रवणात् सखेदोक्तिरियमिति ज्ञेयम् ।

(भ) अभ्युपपन्ना—अनुगृहीता । आर्य्या,—सीता , अशरणा सीता शरणं प्राप्तवती इति तु इत्यकारणं ज्ञेयम् ।

(म) करुणतरम्—अतिशोकोद्दीपकम् । एतत्—पृथ्वीगङ्गाभ्यां सीताया समाश्रयदानमित्यर्थ , मयि निखिलप्रजापालके समासि जीवति सत्यपि अन्यकृतरक्षणम् अतीव दु खाकरमिति भाव ।

(य) विश्व—निखिलं जगदित्यर्थ , बिभर्त्ति या सा विश्वम्भराऽपि—

पृथ्वी।—देवि! सीता प्रसूय कथमाश्वसिमि? (२)—
एकश्चिर राक्षसमध्यवासः
साङ्गो द्वितीयश्च सुदुःश्चवोऽस्याः।

पृथिवी देवी अपि। व्यथते—दुःखित् सीताया शोकेन दुःखमनुभवति। इति—अस्मात् हेता। अपत्यस्नेहेन—सन्ततिवात्सल्येन। जित—सर्वोत्कर्षेण प्रवृत्तमित्यर्थ, यतो हि अपत्यस्नेह स्थिरा धीरा सर्वंसहामपि विह्वलयति अतोऽयं सर्वपरिभावी, अन्येभ्यश्च स्नेहभ्य गरीयानिति भाव। सर्वसाधारण,—सर्वेषां प्राणिना समान, कुत्रापि न वैषम्येण वर्त्तमान इति भाव। एष—अत्र परिदृश्यमान इत्यर्थ, मोहग्रन्थि,—मोह,—अपत्यस्नेहादिरूपा माया, ग्रन्थि यस्य तथोक्त, यतो हि ग्रन्थिबहुल जालरूप तन्तु मीनादीनामिव सर्वेषां नितरां दुरुच्छेदो भवतीति भाव। चेतनावता—प्राणिना सर्वेषामेव। अन्तश्चर,—अन्त —अन्त करणे चरति यस्तथोक्त, अन्त करणवर्त्तीत्यर्थ। अनुपप्लव,—नास्ति उपप्लव,—उच्छेद विनाशो वा यस्य तथोक्त, उच्छेदरहित इत्यर्थ। संसार एव तन्तु,—जालम, अनादिसृष्टिपरम्परेत्यर्थ, यद्वा,—एष,—अयम-परिच्छेद्यरूप इत्यर्थ, मोहग्रन्थि,—मोहरूपग्रन्थि, ममेत्याकारकज्ञानजनित बन्धनविशेष इत्यर्थ, सर्वसाधारण चेतनावतामन्तश्चर अनुपप्लव संसारतन्तु,—संसारस्य—सृष्टिप्रवाहरूपस्य, तन्तु,—सूत्र, योजकसूत्रमित्यर्थ, संसारघटक इति यावत, अनेनैव स्नेहात्मकेन आकर्षकसूत्रेण दृढाकृष्टा प्राणिन आत्मान्तरं नोति भाव। अस्मिन् विनश्वरे चराचरे सर्वे एव जीवा अपत्यादिनाशापाय नियन्त्रिता निरन्तर विविध क्लेशमनुभवन्ति, न हि क्लेशविनिर्मुक्तास्तत्र इह भाव कोऽपि विद्यते इति तात्पर्यम्। भूतधात्रि!—भूताना—प्राणिना, धात्री—धारणकर्त्री पोषयित्री चेत्यर्थ, तथा सम्बुद्धौ, हे वसुन्धरे इति यावत्। नन्वाश्वसिहि—समाश्वस्ता भव। (सम्बुद्धि विवेचनम्)।

(२) देवि!—भगवति भागीरथि! सीता—जानकीम। प्रसूय—जनयित्वा। कथ—केन प्रकारेण। आश्वसिमि?—आश्वस्ता भवामि? यस्या जन्मत एव चिर दुःखमनुभवति तस्या ... कथ हि अनाश्वस्ता भवामीति भाव।

अथ देवि ... विपरीत, एकश्चिरमिति।—अस्या सीताया एक प्रथम चिर ... व्याप्येत्यर्थ राक्षसाना ... निशाचराणा, मध्ये

भागी।—को नाम पाकाभिमुखस्य जन्तु-
  र्द्वाराणि दैवस्य पिधातुमीष्टे ? ॥ ४ ॥

पृथ्वी। भागीरथि। सदृशमुक्तम्। युक्तमेतद्वा रामभद्रस्य ? (ल)—

अभ्यन्तरे, वास वसति, प्रतिक्षणमावस्थानमिति यावत्, साङ्क अङ्कन अनौचित्येन पातिव्रत्यभङ्गरूपापवादेन स्वामिकृतपरित्यागस्य निदानभूतेनापवादेन अङ्क वर्तमाना, न केवलं तया राक्षसमध्ये सुचिरं वासकृतं दुःखमनुभूतम् अपि तु इदानीमपि चिरमुपभुज्यते इति भावः, यद्वा—साङ्क अङ्के अवान्तरे दृष्याकलङ्कोऽपि चिरमुपभुज्यते इति भावः, यद्वा—साङ्क अङ्के अवान्तरे बहुभिः क्लेशकरैः विषयैः मायामृगरामनिधनवार्तादिरूपे अवयवे अङ्क वर्तमाना, सा हि तत्र लङ्कायां स्थित्वा इयत विविधान् क्लेशान् उपभुक्तवतीत्येवमेव प्रथमदुःखहेतुरिति भावः, द्वितीयस्य अपरस्य, अनौचित्यारोपेण भर्तृकृतपरित्यागरूपस्य अनिष्टापातस्येत्यर्थः, दुःखस्य न कथमपि प्रवादारोपेण भर्तृकृतपरित्यागरूप अनिष्टापातस्येत्यर्थः, दुःखस्य न कथमपि स्यात् शक्यं, पतिप्राणाया अपाङ्गनातिलकभूताया एतस्या ईदृश अपवाद केनापि सह योतुं न शक्यते, इत्येष एव द्वितीयदुःखहेतुः पूर्वदुःखहेतोरपि गरीयानित्याशयः। ("सोढश्चिरं राक्षसमध्यवास त्यागो द्वितीयश्च सुदुःसहोऽस्याः" इति पाठान्तरम्) अथ तदाकर्ण्य भागीरथी दैवस्य नियतिकृत्वमुपवर्ण्य वसुन्धरां कथञ्चित् समाश्वासयितुमारभते, को नामेति।

—नाम सम्भावनायां को नाम जन्तुः को हि जीव इत्यर्थः, पाकाभिमुखस्य पाके परिणामे, अभिमुखस्य प्रवृत्तस्य, फलं प्रसोतुमुद्यतस्य इत्यर्थः, फलोन्मुखस्य निरतस्येति यावत्, दैवस्य नियतेः, सुकृतदुष्कृतात्मकभाग्यस्येत्यर्थः, द्वाराणि प्रसरणमार्गान्, फलप्रकाशकोपायानिति यावत्, पिधातुम् आवरितुं, निराकर्तुमित्यर्थः, ["वष्टि भागुरिरल्लोपम्—" (का०) इत्यादिवचनात् पाक्षिकः अपेरकारस्य लोपः] ईष्टे ? प्रभवति ? अपि तु न कोऽपीत्याशयः, सर्वेषां हि जीवानां सुखदुःखादि परम्परा नियतिकृता इति विभाव्य सीताया ईदृशे दुर्विपाकदुःखापाते विलापो न कार्यः दैवनियमितस्य दुर्वारत्वादिति भावः। [अत्र दैवविलासरूपसामान्येन वस्तुना राक्षसमध्यवासादिरूपविशेषवस्तुनः उपपत्तीकरणात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः]। इन्द्रवज्रा वृत्तम् ॥ ४ ॥

(ल) सदृशम्—उचितं, समीचीनमित्यर्थः। उक्तम्—कथितम्, दैवस्य दुर्दान्तकृतया दुरतिक्रमणादेव सीताया ईदृशी गतिः जाता इति स्वीकरोतीति

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ।
नाहं न जनको नाग्निर्नानुवृत्तिर्न सन्ततिः ॥ ५ ॥

भावः । यद्यपि तव वचनम् अतीव साधीय, तथाऽपि रामभद्रेण सुष्ठु नाचरितमिति पदान्तरमाह, युक्तमिति।—रामभद्रस्य—रामचन्द्रस्य, एतत्—सीतायाः सत्यैव मिथ्याभूतायाः दुश्चरितायाः विश्वासमंस्थापनं निर्वासनञ्च। युक्तं वा ?—उचितं किम् ? वाशब्दः पक्षान्तरे। ("वा स्याद्विकल्पोपमयोरिवार्थे च समुच्चये।" इति विश्वप्रकाशः)।

सीतानिर्वासनस्य अयुक्ततायां प्रमाणमुपन्यस्यति, नेति।—बाल्ये बालभावे, शैशवे इत्यर्थः, बालेन कुमारेण रामेण, पीडितः दारकर्मणि परिगृहीतः, पाणिः सीतायाः करः, न प्रमाणीकृतः युक्तायुक्तविचारे प्रमाणत्वेन न अवेक्षितः, यथाशास्त्रं परिणीतायाः पत्न्याः केवलदुर्जनकृतापवादात् सहसा परित्यागः लोकशास्त्रविगर्हिततया नितान्तमन्याय्य इति भावः, अहं पृथिवी, न प्रमाणीकृतेति लिङ्गविपरिणामेन अन्वयः, अहमपि विश्वासत्वेन न स्वीकृतेत्यर्थः, मदुहिता कथं हि सतीत्वस्मात् विच्युता भविष्यति इत्यपि तेन न गणितः, तथा च एतेन मां प्रत्यपि तस्य अविश्वासः सूचितो भवतीति भावः, जनकः राजर्षिः विदेहाधिपोऽपि, न, प्रमाणीकृतः इत्यन्वयः, यस्याः पिता जीवन्मुक्तः, तत्कन्या कथं चारित्र्यहीना भविष्यति इत्यपि तेन न पर्यवेक्षितः, तथा च व्यवहारेणानेन सुप्रशस्तचरित्रः जनकोऽपि तेनावज्ञातः इति भावः, अग्निः, प्रमाणीकृतः इत्यन्वयः, सर्वलोकपावनः अग्निः विशोधनेन सीतायाः विशुद्धतापरिचायकः [illegible], सोऽपि विश्वासत्वेन न गणितः इति भावः, अनुवृत्तिः अनुवर्त्तनं, [illegible] पत्न्याः सत्ववानुसरणं, छन्दोऽनुवर्त्तनं वा, न, प्रमाणीकृता विश्वासास्पदं नानुष्ठितेत्यर्थः, या हि [illegible] भवति, सा नु कदाऽपि [illegible] न अवेक्षितमिति भावः तथा, न सन्ततिः [illegible], प्रमाणीकृता इति शेषः, गर्भस्था तस्याः निर्वासनेन [illegible] [illegible], [illegible] तते। [illegible] एतत, अत [illegible] निर्वासनमतीवान्याय्य, तथा [illegible] महापाप- [illegible], अत [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तेषाम्। [illegible]

सीता। अज्जउत्त सुमराविदह्मि। * (ब)

पृथ्वी। आः॥ कस्तवार्य्यपुत्त्रः? (श)

सीता। [सलज्जास्रम्]। जहा वा अम्बा भणादि। † (ष)

राम। अम्ब पृथिवि। ईदृशोऽस्मि। (स)

* आर्य्यपुत्र स्मारिताऽस्मि।

† यथा वा अम्बा भणति।

इति क्रियया प्रस्तुताना सर्वेषां पाणिग्रहणादिरूपकर्म्मणामनिमग्नत्वात् नष्ट्योनिता-ऽलङ्कारः, तथा सीतानिर्वासनं प्रति बहूनां कारणानां तत्कार्य्यकरत्वेन समावेशात् समुच्चयोऽलङ्कारः, इत्यनयोः परस्परसापेक्षतया सङ्करः]। पथ्यावक्त्रं वृत्तम्॥ ५४॥

(ब) आर्य्यपुत्र—रामम्। स्मारिता—स्मृतिपथमापादिता। अस्मि—भवामि, अहं जनन्येति शेषः, सुचिरकालवियोगेन तं विस्मरन्ती अहमिदानीं जनन्या तन्नामोच्चारणात् स्मारिता सती पुनर्नवीभूतेन तद्वियोगशोकेन नितरां विव्यथितहृदया भवामीति भावः।

(श) आः॥—इति विरक्तौ, खेदे वा। तव—भवत्याः। आर्य्यपुत्रः,—पतिः। कः?—न कोऽप्यस्तीति भावः, जगत्पतिः रामभद्रः यदि तव पतिः स्यात्, तदा कथं तव ईदृशी दुर्गतिः भवेत्, पतिस्ते कोऽपि नास्तीति मन्ये, न हि ते वयम् आर्य्यपुत्र इति ब्रूयात्रादं श्रोतुमिच्छाम इति विरक्तिगर्भं वचनमेतदिति ध्येयम्।

(ष) सलज्जास्रमिति।—पतिनिन्दां श्रुत्वा लज्जया पतिव्रता सीता वाष्पमनुचदिति भावः। वा—अथवा। यथा—यादृक्। अम्बा—जननी। भणति—कथयति, तत् तथैवेति भावः, इदानीं पतिपरित्यक्तया मया आर्य्यपुत्र इति कृत्वा विरुद्धं विलपनं कर्त्तुं नोचितमित्याशयः, अथवा—मज्जननी शोकात् यदेव वदितुमिच्छति तदेव वदतु, अहन्तु एतदैवा कर्त्तव्यपरायणमार्य्यपुत्रं विनिन्दितुं न प्रभवामीति भावः।

(स) ईदृशः,—भवदुक्तप्रकारः। अस्मि—भवामि, भवद्दुहितुः आर्य्यपुत्र-पदवाच्यः न भवितुमर्हामीति भावः, यद्यहमस्याः पतिः स्याम्, तदा कथमेव नृशंसी चितनकार्य्यं कृत्वा आत्मानं पातकिनं कुर्य्याम्? अतः भवत्या यदुक्तं, तत्सर्वं वचनमेवेति रामस्य सकरुणमात्मदोषस्वीकारं वचनमेतदिति ध्येयम्।

भागो। भगवति वसुन्धरे। शरीरमसि संसारस्य, तत् किमसंविदानेव जामात्रे कुप्यसि? (ङ)—

घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु?।

(ङ) ("भगवति वसुन्धरे।" इत्यत्र "प्रसीद भगवति वसुन्धरे।" इत्यधिकः पाठः पुस्तकान्तरेषु दृश्यते)। शरीरमसि—देहभूता त्वं भवसि, सर्वेषां प्राणिनां वक्षसि धारणात् स्वदेहरसेन च परिपोषणात् सर्वाणि तव शरीरमयाणि भवन्ति, कस्याश्चिदपि वस्तुनः ते पृथग्भावो नास्तीति भावः। संसारस्य—प्राणिपूर्णजगतः। तत्—तस्मात्, अधिष्ठानरूपतया तव सर्वेषां अन्तरङ्गरूपत्वादित्यर्थः। किं—कथम्। असंविदाना इव—तत्त्वार्थमविजानती इव, अविदितवृत्तान्तेवेत्यर्थः। [वेत्तेः "विदिप्रच्छिस्वरतीनामुपसंख्यानम्" (वा०) इति अकर्मकत्वादात्मनेपदं, तेन च शानच्] जामात्रे—राघवाय। कुप्यसि?—क्रुध्यसि? किमर्थं राघवेण प्राणसमाऽपि सीता विवासिता, अकीर्तिवृत्तान्तः श्रौतः तन्निमित्तं सर्वेषां शरीरभूता त्वं तत सर्वं जानासि एव, प्रजारञ्जनस्य रघुकुलधर्मतया तदनुल्लङ्घनीयत्वात् तदनुरोधेनैव भगवता रामचन्द्रेण सीता परित्यक्ता, तयोश्च अपराधलेशोऽपि नास्ति, इति सीताविवासनविशेषज्ञाऽपि त्वं किमर्थं सीतापतये निरपराधाय रामाय वृथा कुप्यसि? एतत्तु न नोचितम् इति भावः। ["जामात्रे" इति "क्रुधद्रुह—" (१।४।३७ पा०) इति सम्प्रदानत्वेन चतुर्थी]। पृथिव्याः सर्ववृत्तान्ताभिज्ञत्वे प्रमाणं यथा—"आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्॥" इति।

स्वकुलधर्मानुपालकेन रामेण कथमिदमसीतापरित्यागमनुष्ठितं, तत्र बीजं प्रदर्शयितुमाह, घोरमिति।—लोके भुवने, घोरं भयङ्करत्वात् आतङ्कदायकम्, अयशः निन्दा, सीतायाः चारित्र्यदूषणरूपमित्यर्थः, विततं विस्तारं व्याप्तमिति यावत्। ननु ताद्दृशनिन्दापरिहारार्थमेव सीतायाः अग्नौ परीक्षा कृता, तत्कथं निन्दायाः प्रसर इति? इत्याशङ्क्याह, या चेति।—[वितता व्याप्ता एव तत् व्यापकम्, अस्य अविद्यमानत्वात् अपतितार्थं ज्ञेयम्। "सम्पृच्छ्य पयासानवे" (५।४।७४ पा०) इति समासान्तः, "अनयपतनव्याऽपि कृत" (६।२।१७० पा०) इति स्वरादयः]। वह्नौ अग्नौ एव जौ ... विशुद्धिः, सा तु लङ्काद्वीपे सम्पादिता

इक्ष्वाकूणां कुलधनमिदं यत् समाराधनीयः

कृत्स्नो लोकस्तदतिगहनं किं मया वत्स करोतु ? ॥ ६ ॥

लक्ष्मण । अव्याहतान्तःप्रकाशा हि देवता भूतेषु, विशेषेण गङ्गा, तदयमञ्जलिस्ते । (क)

प्रदेशे, वत्सो धनले या च विशाद् मिन्धितपर्वीना म जाया चान ति र अधिस्मिन् वीथ्यामदेशे, तत्र अतीव दुःख दृशा इति भावः ... विशुद्धिं कथमिव कर्म वा प्रकारेण, अदृधातु ? ... क्रियमाणोऽपि अन्यकुलतया लोके न सहसा ... साधारणजनानां श्रद्धा स्यात् ? इति भावः । ... प्रकृतीनामनुसरणाजन्यासिनामविश्वासं, परन्तु ... स्वयं रघुनाथः कथं ... साधारणजनैः ... इत्याशङ्कायामाह, इक्ष्वाकूणामिति ।—यत् ... समाराधनीयः अनुरञ्जनीयः, परितोषणीयः इति यावत्, ... अतीव दुष्करं कार्यमित्यर्थः इदं प्रजानुरञ्जनम् ... कुलधनं कुलक्रमागतं धनं, व्रतमित्यर्थः यथा धनं ... इक्ष्वाकुभिः प्रजापालनं सर्वदा क्रियते इति भावः, यथा,—कृत्स्नो लोकः समाराधनीयः, इति यत् इक्ष्वाकूणां कुलधनं तत् इदं लोकाराधनरूपं ... व्रतम्, अतिगहनम् इत्येव योजनीयम्, स वत्स ... राजा, किं करोतु ? दुर्जनानां सुजनानाञ्च सर्वासां प्रजानाम् अनुरञ्जनात् ऋते कथं हि एकाकी वत्स सीतापरित्यागमकृत्वा स्वकुलधर्ममनुपालयतु ? इत्यर्थः, सीतादोषसम्भावनया विरक्तानां प्रजानामपि अनुरञ्जनं तत्र राजतया कुलधर्मतया च नियतमेव कर्त्तव्यमिति तस्य नास्ति अन्यायानुष्ठानदोषः इति वक्तुराशयः । [अत्र सीतानिर्वासनकार्यस्य एकस्मिन् कारणे दुर्जननिन्दारूपे सत्यपि लोकानुरञ्जनरूपकारणान्तरस्य खलेकपोतन्यायेन तत्कार्यकारित्वेनोपन्यासात् समुच्चयालङ्कारः]। मन्दाक्रान्ता वृत्तम् ॥ ६ ॥

(क) भूतेषु—सर्वेषु प्राणिषु विषयेषु । अव्याहतान्तःप्रकाशा—अव्याहतः — अप्रतिबद्धः केनचिदपि अनिवारित इत्यर्थः, अन्तःप्रकाशः —आन्तरिकज्ञप्तिविज्ञानं, सर्वेषां जीवानामन्तर्गतभावपरिज्ञानमित्यर्थः, यासां ताः, देवाः हि अन्तर्यामितया सर्वेषामेव जीवानां मनोगतभावं विदन्तीति भावः । विशेषेण—प्राधान्येन ।

राम। अम्ब! अनुवृत्तस्त्वया भगीरथगृहे प्रसादः। (ख)

पृथ्वी। देवि! नित्यं प्रसन्नाऽस्मि वः, किन्त्वापातदुःसहः स्नेहावेगेनैव ब्रवीमि। न पुनर्न जानामि सीतास्नेहं रामभद्रस्य १। (ग)—

दह्यमानेन मनसा दैवात् वत्सां विहाय सः।
लोकोत्तरेण सत्त्वेन प्रजापुण्यैश्च जीवति ॥ ७ ॥

गङ्गा—भागीरथी, भगवती गङ्गा तु सर्वेषामेव जीवानां मनोगतभावं विशेषतया वेत्ति, तस्याः किमप्यपरिज्ञानं नास्ति। अतः किमर्थं रघुमणिना सीता विवासिता इति स्वयं सर्वं तदाशयमन्तर्यामितया विदित्वैव सर्वलोकसमक्षं प्रीत्यर्थं सुस्फुटमुवाचेति भावः। तत्—तस्मात्, त्रिलोकीपूज्यत्वात् इत्यर्थः। ते—तुभ्यम्। अयमञ्जलिः,—प्रणामार्थे करद्वयसंयोगः, मया क्रियत इति शेषः, त्वां प्रणमामि इत्यर्थः। ("तदयं ते प्रणामाञ्जलिः" इति पाठान्तरम्)।

(ख) अम्ब!—मातः!। अनुवृत्तः,—अविच्छेदेन प्रवर्तितः। भगीरथगृहे—भगीरथभवने, सूर्यकुलसन्ताने इत्यर्थः। प्रसादः—अनुग्रहः, भगीरथवंशधरेषु सर्वेषु तवानुग्रहः अद्यावधि वर्तत एव, तेन त्वं स्वयमेव सत्कृता पृथिवीं देवीमनुनयसीति भावः।

(ग) नित्यं—सततमेव। वः,—युष्मान् प्रति। प्रसन्नाऽस्मि—सन्तुष्टा भवामि, सर्वेषु भवत्स्वेव मे अद्यावधि वात्सल्यं विद्यत एवेत्यर्थः। किन्तु—परन्तु। आपाते—तदात्वे, सीतायाः विरहवार्ताश्रवणक्षणे एवेति यावत्, [illegible]। ("तदात्वे पात आपात" इति वैजयन्ती। [illegible]) दुःसहः,—सोढुमशक्यः, अप्रतिरोध्य इत्यर्थः, स्नेहावेग,—[illegible] सीतायाः निरतिशयस्नेहप्राबल्येनेत्यर्थः। [illegible] सीतायाः वात्सल्योद्रेकसमये तत्र, [illegible] ("किन्त्वापातदुःसह [illegible] तेन" इति पाठान्तरम्)। एवम्—[illegible] इति यावत्। [illegible] सीतास्नेहं—सीतायाः वात्सल्यम्। न [illegible] सीतायां रामस्य [illegible] पुनः—[illegible] भावः।

[illegible]

राम । सकरुणा हि गुरवो गर्भरूपेषु । (घ)

सीता । [रुदती कृताञ्जलिः] । णेदु मं अत्तणो अङ्गेसु विलअं अम्बा । * (ङ)

राम । किमन्यद् ब्रवीतु ? (च)

भागी । शान्तम् । अविलीना वत्सरसहस्राणि भूयाः । (छ)

---

* नयतु मामात्मनोऽङ्गेषु विलयमम्बा ।

विहाय निर्वास्य, दह्यमानेन अपराधाद्दतेऽपि सीता परित्यजामि इति ... भाराक्रान्ततया वातिशयं तप्यमानेन, मनसा चेतसा उपलक्षितः ... रामः, लोकोत्तरेण अलौकिकेन, असामान्येनेति यावत्, ... दैर्येणेत्यर्थः, ("द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।" इत्यमरः) ... प्रजानां प्रकृतीनां पुण्यैः धर्मैः, प्रजानां प्राक्तनपुण्यैरेव ... समन्वितस्य नरपतेर्लाभादित्याशयः, जीवति प्राणिति, राम ... प्राणसमां सीतां निर्वास्य तदीयशोकेन एव हि विलयं भजति, ... तादृशजनासामान्यधैर्यप्रकृतिपुण्यानाञ्च सौभाग्यं नाऽऽस्ता, तदा नूनमसौ सीतायाः विरहेण सद्य एव विनाशमाप्स्यतीति भावः । [अत्र राघवजीवनं प्रति एकस्मिन्नसाधा- धैर्यरूपकारणस्य सत्त्वेऽपि पुनः तत्कारणरूपतया प्रजापुण्यस्योपादानात् समुच्चयाल- ङ्कारः, अपि च, रामजीवनं प्रति प्रदर्शितद्वितीयकारणस्य प्रजासु विद्यमानत्वात्, कार्यभूतस्य जीवनस्य च रामे सत्त्वात् कार्यकारणयोः भिन्नदेशगतत्वेन असङ्गति- रलङ्कारः] । पथ्यावक्त्रं वृत्तम् ॥ ७ ॥

(घ) गुरवः,—गुरुजनाः । गर्भरूपेषु—सन्ततिषु । सकरुणाः —सदयाः, भवन्तीति शेषः, पुत्रभूतानां जनानां अपराधेषु सत्स्वपि गुरवः तान् नूनं न गृह्णन्ति, तेन हि सापराधाय मह्यं पृथिवी देवी नाभिक्रुध्यतीति भावः ।

(ङ) आत्मनः,—स्वस्याः । अङ्गेषु—देहेषु । विलयं—विलोपं, मिश्रणेन एकीभावमित्यर्थः । नयतु—प्रापयतु, निजाङ्गे मां विलीनं कारयत्वित्यर्थः, इतः परं नाहं जीवितुमिच्छामीति भावः ।

(च) अन्यत्—अपरं, मरणाद्भिन्नमित्यर्थः । किं ब्रवीतु ?—किं कथयतु ? इदानीं स्वस्याः आशायाः विनाशात् मरणं विना कथितव्यान्तरस्याभावादिति भावः ।

(छ) शान्तं—निवृत्तं, भवतु मोक्षवचनमिति शेषः, एवं मा वद इत्यर्थः ।

पृथ्वी। वत्से! अपि रक्षणीयौ ते पुत्रकौ। (ञ)

सीता। अणाधाम्हि। * (झ)

राम। हृदय! वज्रमयमसि ? (ञ)

भागी। कथं त्वमनाथाऽप्यनाथा ? (ट)

सीता। कीदिस मम अभव्वाए सणाधत्तण ? † (ठ)

---

* अनाथाऽस्मि।

† कीदृशं ममाभव्याया सनाथत्वम् ?

[मासमव्ययमेतदिति कोषः]। वत्सरमङ्गलानि—दशशताब्दान् व्याप्येत्यर्थः। ["कालाध्वनोरत्यन्तसंयोगे (२।३।५ पा०) इति द्वितीया]। अविलीना—अविनष्टा, चिरजीविनी इत्यर्थं। भूया,—स्थेया, कदाऽपि तव विनाशो न भवतु इति भाव।

(ञ) अपि—अवधारणे अवश्यमेव इत्यर्थ। रक्षणीयौ—पालनीयौ। पुत्रकौ—तनयौ, एतौ बालकौ रक्षणीय त्वया अवश्य जीविष्यामीति मन्ये, मातृस्तन्यपानादृते बालस्य जीवनरक्षाया असाध्यत्वादिति भाव। ("अपि रक्षणीयौ' इत्यत्र "अवेक्षणीयौ' इति पाठान्तरम्)।

(झ) अनाथा—अशरणा। अस्मि—भवामि, मम तु कोऽपि रक्षको नास्ति, तेन असहायतया निरुपाया स्त्री कथं इह बालकौ परिपालने समर्था भविष्यतीति भाव। ('[illegible]' इत्यधिक पाठ क्वापि दृश्यते)।

(ञ) हृदय—चेत। वज्रमय—कुलिशघटितम्। असि—भवसि ?, एवंविध विलापवाक्य [illegible] न सहसा विदीर्णमसि, अतो नूनं वज्रमयमसि [illegible] [illegible] मे निरुपायाया [illegible] [illegible] [illegible] तव [illegible] भाव।

(ट) [illegible]—[illegible]। [illegible] अपि—[illegible] अपि [illegible]। [illegible] [illegible] [illegible] [illegible] जीवति कथमपि [illegible] [illegible], [illegible] पति, [illegible] कथमपि [illegible] [illegible]।

(ठ) [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] इति

देव्यौ ।—जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ? ।
आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते ॥ ८ ॥

लक्ष्मण । आर्ये ! श्रुतम् ? (ड)

राम । शृणोतु लोकः । (ढ)

नेपथ्ये । [कलकलः] ।

भाव । (भावुकं भाविकं भव्यं कुशलं क्षेममस्त्रियाम ।" इत्यमरः । "मन्दभाग्यो—" इति पाठभेदः)। कीदृश—किम्प्रकारम् । सनाथत्वम् ?—रक्षकवत्त्वम् ? रघुपतिना परित्यक्ता कथं सनाथा भवामीति भावः ।

अथेदानीमातिनिर्वेदपरायणां सीतां प्रस्तुतवाक्ये समाश्वासयति, जगदित्यादिना । —हे सीते ! इत्यामन्त्रणपदमध्याहार्यम्, त्वं जगन्मङ्गलं त्रिभुवनकल्याणकरम्, अखिलजगतां मङ्गलनिदानभूतमित्यर्थः, आत्मानं स्वं, कथं केन हेतुना, किमर्थमित्यर्थः, अवमन्यसे ? अवजानासि ? , "अनाथाऽस्मि" इत्यादि खेदसूचकवाक्ये इत्थं निन्दसीति भावः यत्सङ्गात् यस्याः तव, सङ्गात् संसर्गात्, आवयोरपि जगति पावनत्वेन प्रसिद्धयोः पृथिवीगङ्गयोरपि, अपरेषां का कथा ? इति भावः, पवित्रत्वं पूतत्वं पावनत्वं वा, प्रकृष्यते उत्कृष्यते, यद्वा—प्रकृष्यते उत्कर्षतां गच्छति, [कर्मकर्तरि प्रयोगोऽयम्]। त्वत्सम्बन्धादेव आवां जगति अतीव पवित्रतमे इति लोकैरुच्यते, इत्यतः वृथा आत्मनि घृणां विमुञ्चेति भावः, त्वन्तु पतिव्रताशिरोमणिभूता एव भवसि इति तु तात्पर्यम् । [अत्र स्वतः एव पूतयोः पृथिवीगङ्गयोः सीतासङ्गेन पवित्रताप्रकर्षासम्बन्धेऽपि तत्सम्बन्धोक्तेः असम्बन्धे सम्बन्धरूपाऽतिशयोक्तिरलङ्कारः]। पथ्यावक्त्रं वृत्तम् ॥ ८ ॥

(ड) श्रुतम् ?—आकर्णितम् ? सीतायाः पातिव्रत्यविषये पृथिवीगङ्गयोः अभिमतमिति शेषः आकर्ण्य त्वं हि कीदृशी पतिव्रताकुलधुरन्धरा तत् अवधार्यतामिति भावः । ("श्रूयते ?" इति पाठान्तरम्)।

(ढ) लोकः,—प्रकृतिवर्गः । [जातावेकवचनम्]। शृणोतु—आकर्णयतु, यद्यपि सीतायाः सतीत्वविषये सम्प्रति नाऽऽसम्, किन्तु प्रकृतिरञ्जनं हि राजधर्मः, इति तदनुरञ्जनायैव प्राणसमानामपि तां निर्वासितवान्, तत्र च तच्छङ्काकुलाः प्रकृतय एव वचनमेतत् शृण्वन्तु श्रुत्वा च तच्चारित्रगतसन्देहं निराकुर्वन्तु इत्याशयः ।

राम। अद्भुततरं किमपि॥ (ग)

सीता। किंत्ति अंतरिक्खं पज्जलदि? * (त)

देव्यौ। ज्ञातम्।—

कृशाश्वः कौशिको राम इति येषां गुरुक्रमः।
आविर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः॥ ९॥

[नेपथ्ये]।—देवि सीते! नमस्तेऽस्तु गतिर्नः पुत्रकौ हि ते।
आलेख्यदर्शने देवो यदाह रघुनन्दनः॥ १०॥

---

* किमिति अन्तरीक्षं प्रज्वलति?

(ग) अद्भुततरम्—अतिविस्मयकरम्। किमपि—अनिर्वचनीयं वस्तु, समुदितं भवतीति शेषः, नो चेदेवं तर्हि कथमेतादृशः कलकलोऽनुश्रूयते इति भावः।

(त) किमिति—कथं हि। अन्तरीक्षम्—गगनम्। प्रज्वलति?—देदीप्यमानं भवति? अपूर्वज्योतिर्भिः नवा दिशः समुद्भासयतीति भावः। ("पज्जाउलम्" इति पाठः—पद्माकुलं कनकपद्मम्)।

अथान्तरीक्षज्वलनकारणं स्मृत्याभिदधाति, कृशाश्व इति।—कृशाश्वः विश्वामित्रपूर्वपुरुषः तन्नामकः कश्चित् मुनिविशेषः, कौशिकः कुशिकनन्दनः विश्वामित्रः, रामः स्वयं रघुमणिश्च, इति इत्थं, येषाम् अस्त्राणां, गुरुक्रमः आचार्यपरम्परा, एते तु येषामस्त्राणां प्रयोगसंहारोपदेष्टारः इति यावत्, तथा हि आदौ कृशाश्वः तस्मात् विश्वामित्रः तस्माच्च रामः यानि अस्त्राणि समधिगत्य तत्सम्प्रदायप्रवर्तका अभवन्निति भावः, तान्येव शस्त्राणि अस्त्रविशेषाः, जृम्भकैः सह समस्तप्रयोगसंहारैः तदधिष्ठातृभिः सह, आविर्भवन्ति प्रकटीभवन्ति, गगनतले प्रकाशन्ते इव, प्राक् आलेख्यदर्शनावसरे वत्सायै रामचन्द्रेणानुज्ञापितत्वात् एनयोः कुशलवयोः समुपचारं दृष्ट्वा इदानीं तान्येतानि अस्त्राणि समुदितानि भवन्ति, अत एव कोलाहलः श्रूयते, अन्तरीक्षं प्रज्वलितं दृश्यते इति भावः। पथ्यावक्त्रं वृत्तम्॥ ९॥

सीता। दिट्ठिआ अज्जउत्तदेवदाओ परिप्फुरन्ति। (घ)

लक्ष्मण। उक्तमासीदार्य्येण,—"सर्वथेदानीं त्वत्प्रसूतिमुप-स्थास्यन्ति" इति। (ङ)

देव्यौ।—नमो वः परमास्त्रेभ्यो राघवस्य परिग्रहात्।
अनुध्यातैरुपेतव्यं वत्सयोर्भद्रमस्तु च ॥ ११ ॥

७ दिष्ट्या अस्त्रदेवता परिस्फुरन्ति।

नाद्यान इत्यथ ... [illegible] कुशलवयो[illegible] [illegible] इति भाव । कदनेवमभिधत्त ? तदेवी यते, [illegible] रचनापि [illegible] विचस्य दर्शने विलोकनावसर [illegible] इदानीं त्वत्प्रसूतिमुपस्थास्यन्ति" इत्याशीर्वचनमित्यर्थ, [illegible] तदादेशमनपालयितु [illegible] त्वामुतावुपसेवानं इति भाव । [illegible] हितम् ॥ १० ॥

(घ) दिष्ट्या—भाग्येन पुत्रयोर्मे सौभाग्यवशादित्यर्थ । [illegible] —जृम्भकास्त्राणामधिष्ठात्री देवता । परिस्फुरन्ति—प्रकाशन्ते, अस्त्रदेवतानि पुत्रौ [illegible] अनुगृहीतौ भवत इति भाव ।

(ङ) आर्य्येण—रामेण। उक्तमासीत्—प्रथमाङ्के चित्रपटदर्शनप्रस्तावे कथित-मभूत्। सर्वथा—साकल्येन। इदानीम्—अधुना, तव पुत्रोत्पादानन्तरमित्यर्थ । त्वत्प्रसूति—तव सन्ततिम्। उपस्थास्यन्ति—उपसेविष्यन्ते। इति—एवम्, उक्तमासी-दित्यन्वय इत्थं हि आशीर्वचनं प्राक् रघुपति प्रदत्तवानित्यर्थ ।

अथ पृथ्वीभागीरथ्यौ परमास्त्रवन्दनपुरःसरं सीतासुतयो तदनुग्रहमभियाचेते, नम इति।—परमास्त्रेभ्य उत्कृष्टजृम्भकास्त्राधिदेवताभ्य, व युष्मभ्य नम प्रणति, अस्तु इति शेष, राघवस्य रामस्य, परिग्रहात् स्वीकारात्, राघवकर्त्तृकलाभादित्यर्थ, युष्माकं राघवस्य आज्ञाऽनुवर्त्तित्वादिति भाव, अनुध्यातैः स्मृतैः सद्भिः, युष्माभिरिति शेष, वत्सयो पुत्रभूतयो कुशलवयो समीपे, उपेतव्यम् उपस्थातव्यम्, कुशलवयो स्मरणानन्तरमेव राघवाज्ञानुपालनार्थं भवद्भिः तत्समीपे आगन्तव्यमित्याशय, व युष्माकं भद्रं कुशलम्, चश्च भवतु। (श्लोकस्यैष पुस्तकान्तरेषु रामोक्तिरूपतया प्रदर्शित, "राघवस्य परिग्रहात्" इत्यत्र "धन्या स्मो व परिग्रहात्" इति च पाठान्तरं [illegible], तदर्थस्तु—व युष्माकं, परिग्रहात् स्वीकारात्, लाभा

राम।—क्षुभिता कामपि दशां कुर्वन्ति मम साम्प्रतम्।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः ॥ १२ ॥

देव्यौ। मन्यस्व वत्से! रामभद्रतुल्यौ इदानीन्ते पुत्तकौ संवृत्तौ (ध)

सीता। भअवदीओ! को एदाण खत्तिओचिदं कम्मं करिस्सदि? *(न)

---

* भगवत्यौ! क एतयोः क्षत्रियोचितं कर्म करिष्यति?

दित्यर्थ, धन्या जगति प्रतिष्ठामुपेता, कृतार्था इत्यर्थ, स्म वयं जाता इत्यर्थ)। पथ्यावक्त्रं वृत्तम् ॥ ११ ॥

अथ रामः [illegible] आत्मनः विवशभावमाह, क्षुभिता इति।— साम्प्रतम् अधुना, विस्मयानन्दसन्दर्भजर्जराः विस्मयस्य अद्भुतदर्शनजनितस्य चेतसः विस्तारस्य [illegible], पुत्रयोः [illegible] सीतासमागमस्य [illegible] विभावजनितस्य [illegible], तथा आनन्दस्य पुत्रदर्शनजनितस्य हर्षस्य च, सन्दर्भेण ग्रथनेन, मिश्रणेनेत्यर्थ, जर्जराः विशीर्णाः, अत्यर्थमाकुलीभूता इत्यर्थः परस्पर-सम्मिलनाभिः [illegible] इति यावत्, करुणोर्मयः करुणस्य सीतानिर्वासनजनित-दुःखप्रवाहस्य, ऊर्मयः तरङ्गाः, शोकप्रवाहा इत्यर्थ [illegible] करुणाया [illegible] क्षुभिता उद्वेलिता, विकृताः सन्त इत्यर्थ, मम कामपि अनिर्वचनीयस्वरूपां, दशाम् अवस्थां, कुर्वन्ति विदधति, मदिदानीं विस्मयहर्षशोकैः युगपदाक्रान्ततया कामप्यनिर्वचनीयां दशां प्राप्तः किमपि नावधारयितुं शक्नोमीति भावः। (अत्र अद्भुतो रसः इदानीमपि करुण [illegible] स्थित, अतो रसवदलङ्कारः)। पथ्यावक्त्रं वृत्तम् ॥ १२ ॥

(ध) वत्से!—[illegible]। मन्यस्व—जानीहि। ('नन्दस्व वत्से!' इत्यत्र 'नन्दस्व' इति पाठान्तरम्। नन्दस्व—हृष्टा भव इत्यर्थ)। इदानीम्—अधुना। ते—तव। पुत्रकौ—तनयौ कुमारकौ। रामभद्रतुल्यौ—राघव[illegible] [illegible]—[illegible], [illegible]। पराक्रमेण रामचन्द्रतुल्यावेव [illegible] [illegible]।

(न) भगवत्यौ—[illegible]। एतयोः,—कुमारयोः [illegible] क्षत्रि[illegible]

राम ।—एषां वशिष्ठगुप्तानां रघूणां वंशवर्द्धिनी ।

सीताऽपि सुतयोः कष्टं संस्कर्त्तारं न विन्दति ? ॥१३॥

देव्यौ । पुत्रि ! किं तवानया चिन्तया ? एतौ हि वत्सौ स्तन्यत्यागात्परेण भगवतो वाल्मीकेरर्पयिष्यावः, स एवैतयोः क्षत्रकृत्यं करिष्यति । (प)—

यौचित कर्म—क्षत्रियजात्यनुरूपं जातकर्मादिशास्त्रोक्तसंस्कारसमूहमिति यावत् । करिष्यति ?—सम्पादयिष्यति ? ("करिष्यतीति" इति पाठे,—इति—एतत्, अहं चिन्तयामीति शेषः) ।

अथ रामः जीवति स्वस्मिन् वशिष्ठादौ च स्वपुत्रसंस्कर्तृत्वाभावमुपश्रुत्य नितरामनुशोचति । एषामिति ।—वशिष्ठेन ब्रह्मपुत्रेण तपोनिधिना, गुप्तानां रक्षितानां, कृतसंस्काराणां, शान्तिक्रियादिभिः विविधोपद्रवेभ्यः रक्षितानां चेति यावत्, एषाम् अस्मदीयानाम्, ("एषां" इति पाठान्तरे—एषा मत्प्राणसमा पत्नीत्यर्थः, सीता इत्यनेनान्वयः) रघूणां रघुवंशीयानां, वंशवर्द्धिनी पुत्रप्रसवेन कुलवृद्धिकारिणी, सीताऽपि जानकी अपि, सुतयोः पुत्रयोः कुशलवयोः, संस्कर्त्तारं जातकर्मादिशास्त्रीयक्रियासम्पादयितारं, न विन्दति न लभते, कष्टम् अहो ! अतीव क्लेशकरमेतदित्यर्थः, ("सीताऽपि सुतयोः कष्टम्" इत्यत्र "कष्टं सीताऽपि सुतयोः" इति पाठव्यतिक्रमः), रघुवंशीयानां सकलसंस्कारक्रियासम्पादयितरि वशिष्ठादौ विद्यमानेऽपि रघुकुलाङ्कुरयोः संस्कर्त्तुरभावः समजनि, अहो धिक् ! कष्टोऽयमवस्थाविपर्यय इति भावः । पथ्यावक्त्रं वृत्तम् ॥ १३ ॥

(प) पुत्रि !—तनयभूते सीते ! । तव अनया—एतया । चिन्तया—भावनया । किम् ?—अलम्, आवयोः विद्यमानयोः सत्योः कः तव सुतयोः संस्कारं करिष्यतीति चिन्ता त्वया नैव करणीयेति भावः । हि—यस्मात् । एतौ वत्सौ—बालौ कुशलवौ । स्तन्यत्यागात्—स्तनदुग्धपानत्यागात् । परेण—अनन्तरमेव, यदा एतौ स्तनदुग्धत्यागं करिष्यतः तदा इति भावः । [अत्र दिक्शब्दवाचिपरशब्दयोगात् पञ्चमी, "अन्यारादितर—" (२।३।२९ पा०) इति दिक्शब्दयोगात् पञ्चमीविधानात्, तथा हि दीक्षितः,—"दिशि दृष्टः शब्दो दिक्शब्दः, तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति" इति] । भगवतः वाल्मीकेः,—महामुनेः प्राचेतसस्येत्यर्थः, [अत्र मुख्यदानाभावात् न चतुर्थी, "रजकस्य वस्त्रं ददाति" इतिवत् शेषे षष्ठी ज्ञेया] ।

यथा वशिष्ठाङ्गिरसावृषी प्राचेतसस्तथा।
रघूणां जनकानाञ्च वंशयोरुभयोर्गुरुः॥ १४॥

राम। सुविचिन्तितं भगवतीभ्याम्। (फ)

लक्ष्मण। आर्य्य। सत्यं विज्ञापयामि, तैस्तैरुपायैर्वत्सौ कुशलवौ उत्प्रेक्षे। (ब)—

एतौ हि जन्मसिद्धास्त्रौ जातौ प्राचेतसाश्रमे।
वीरौ सम्प्राप्तसंस्कारौ वयसा द्वादशाब्दिकौ॥ १५॥

अर्पयिष्यति,—दास्यति। (अत्र "देव्यौ" इत्यत्र "भागीरथी" तथा "अर्पयिष्यति" इत्यत्र "अर्पयिष्यामि" इति च पाठान्तरे)। स एव—असौ मुनिरेव। एतयोः,—तत् सुतयोः कुशलवयोः। क्षत्रकृत्य—क्षत्रियजात्युचितं संस्कारम्। करिष्यति—विधास्यति।

ननु वशिष्ठं विना जातकर्मादिक्रियायाः सम्पादितायाः कुलगुरुत्यागजनित महाननिष्टापातो भविष्यति इत्याशङ्कामपनयति, यथेति।—वशिष्ठः तदाख्यः ब्रह्मर्षिः, आङ्गिरसः शतानन्दश्च, एतौ ऋषी, यथा यथाक्रमं, रघूणां रघुवंशीयानां जनकानाञ्च जनकवंश्यानाञ्च, गुरू इति शेषः, तथा प्राचेतसः वाल्मीकिरपि, उभयोः वंशयोः एतयोः द्वयोरेव कुलयोः, गुरुः आचार्यः, भवतीति शेषः, यथा वशिष्ठः रघुवंशस्य शतानन्दश्च जनकवंशस्य गुरुर्भवति, तथा भगवान् वाल्मीकिरपि, ततः तेन सम्पादितः संस्कारविधिः न कथमपि परिहीनः भविष्यति, अतस्त्वया वृथा चिन्ता परिहरणीयेति भावः। पथ्यावक्त्रं वृत्तम्॥ १४॥

(फ) भगवतीभ्याम्—परमैश्वर्यशालिनीभ्यां पृथ्वीभागीरथीभ्याम्। ("भगवत्या" इति पाठान्तरम्)। सुविचिन्तितम्—सम्यक् अवधारितम्, कुशलवयोः संस्कारः वाल्मीकिना भविष्यति इति यत् विचिन्तितं, तत् समीचीनमेव जातमिति भावः।

राम । वत्स ! इति परिप्लवमानहृदय मन् मुग्धोऽस्मि । (भ)

पृथ्वी । एहि वत्से ! पवित्रीकुरु रसातलम् । (म)

राम । हा प्रिये ! लोकान्तरमसि गता ॥ (य)

सीता । णेदु म अत्तणो अंगेसु विलअं अम्बा, ण सक्कुम्हि ईदिसं जीअलोअ-परिवत्तं अणुभविदुं । ५ (र)

५ नयतु मामात्मनोऽङ्गेषु विलयमम्बा, न शक्नोऽस्मि ईदृशं जीवलोकपरिवर्त्तमनुभवितुम् ।

अधिगतानीत्यर्थ, अस्त्राणि जृम्भकाख्यानि आयुधानि ययो तौ, अमन्‌ मन्‌ न एतयो बालकयो जृम्भकास्त्राणि स्वत सिद्धतया आविर्भूतानि इत्यर्थ, तथा प्राचेतसात वाल्मीके मुने तपोधनात सम्मानसत्कारौ सम्प्राप्तौ ययो, ... जातकर्मादय याभ्या तौ, एव वीरौ भवत्सदृशपराक्रमौ, त्वत्पुत्रयोरायुष्मन्तौ इति यावत, अपि च वयसा द्वादशाब्दिकौ द्वादशवार्षिकौ, जातौ सम्भूतौ ... एतयो बालयोरिदानीं द्वादशवर्षाणि वय सम्भूतानीत्यर्थ , ("जातौ" इत्यत्र "उभौ" इति पाठान्तरम्)। यतो हि बालकावेतौ आजन्मत एव जृम्भकास्त्राणि समधिगतवन्तौ, भगवान् वाल्मीकिश्च स्वयमेव एतयो सस्कारकर्माणि सम्पादितवान्, द्वादशवर्षीयौ चैवैतौ भवत, तेन नून सीतापुत्राविमौ इत्यनुमिनुम इति भाव । पथ्यावक्त्र वृत्तम् ॥ १५ ॥

(भ) इति—अस्मादेव हेतो, सीतासुतत्वेनाशङ्क्यमानत्वादेवेत्यर्थ । परिप्लवमानहृदय,—परिप्लवमानम्—आकुल, संशयदोलाचलम् इति यावत, हृदयम्—चित्त यस्य स, इमौ मत्सुतौ किम् ? न वेति कमपि पक्ष निश्चेतुमशक्नुवन् इत्यर्थ । अत एव मुग्ध,—मूढ, विवेकरहित इत्यर्थ । अस्मि—भवामि । ("इत्येवाहं परिप्लवमानहृदय प्रमुग्धोऽस्मि" इति पाठान्तरम्)।

(म) पवित्रीकुरु—स्वस्या अधिष्ठानेन पुनीहि । रसातलम्—अधोभुवनम् ।

(य) लोकान्तरम्—अन्य लोक [इति नित्यसमास] मर्त्यलोकभिन्न लोक, पातालमित्यर्थ । गताऽसि—प्रस्थिता भवसि , तत्र इहावस्थाने कदाचित् दर्शन सम्भावित स्यात्, तत्तु इदानीं मे विलुप्तमिति भाव ।

(र) आत्मन,—स्वस्या । अङ्गेषु—देहेषु । मा—दुहितरमित्यर्थ । विलयम्—एकीभावम्, अदर्शनम् इत्यर्थ । नयतु—प्रापयतु । अम्बा—जननी, वसुन्धरेत्यर्थ ।

राम। किमुत्तरं स्यात्? (ल)

पृथ्वी। त्यागं स्तन्यस्य यावन्मन्त्रियोगतः पुत्रकयोरवेक्षस्व, परेण ते यथा रोचिष्यते। (व)

भागी। एवं नाम। (श)

[ततो निष्क्रान्ता गङ्गापृथ्वीसीता]।

राम। कथं विलय एव वैदेह्याः सम्पन्नः॥ हा देवि! दण्डकारण्यवासप्रियसखि! हा चारित्रदेवते! लोकान्तरं पर्य्यवसिताऽसि? (ष) [इति मूर्च्छति]।

ईदृशम्—एवंविधं दुःसहमित्यर्थः। जीवेति।—जीवलोकस्य—भुवनस्य, परिवर्त्तम्—अन्यथाभावम्। अनुभवितुं—सोढुम्। न शक्ताऽस्मि—न हि समर्था भवामि, यथा स्वल्पमपि स्थितया पतिदेवतया मया ईदृशमेवानिशं दुःखमनुभवितव्यमतः इदानीं मे मृत्युरेव श्रेयान् इति, अथवा शोचिता अहं कथं रसातले स्थातुं शक्नोमि? पतिवारो दुर्विपाकस्यात्र दशाविपर्य्ययः इति वा भावः।

(ल) किं—कीदृशम्। उत्तरं—सीतावाक्यस्य प्रतिवचनम्। स्यात्?—भवेत्? सीतायाः प्रार्थनां श्रुत्वा पृथिवी किं वदेदिति भीतो नितरां पर्य्याकुलोऽस्मीति भावः।

(व) पुत्रकयोः,—सुतयोः कुशलवयोः। स्तन्यस्य—स्तनदुग्धस्य। त्यागं यावत्—परित्यागकालपर्य्यन्तमित्यर्थः। मन्त्रियोगतः,—स्तनादिदानेन पालयितुमिति यावत्। अवेक्षस्व—प्रतिपालय। परेण—स्तन्यत्यागात् परतः एवेत्यर्थः। ते—तुभ्यम्। यथा—यादृक्। रोचिष्यते—रुचिविषयीभूतं भविष्यति, यत् त्वमभिलषिष्यसीत्यर्थः, ["रुच्यर्थानां प्रीयमाणः" (१।४।३३ पा०) इति चतुर्थी]। तथा त्वं करिष्यसीति शेषः। ("वत्से! स्तन्यत्यागं यावत् मन्त्रियोगतः पुत्रकयोरपेक्षस्व, परेण ते यथा रोचते, तथा करिष्यामि" इति पाठान्तरम्)।

(श) एवं नाम—[illegible] भवतु, पृथिव्या [illegible] इति भावः।

(ष) कथं—किम्। वैदेह्याः,—सीतायाः। विलयः,—तिरोधानं, लोकान्तर[illegible] [illegible]

लक्ष्मण । भगवन् वाल्मीके ! परित्रायस्व, एष किं ते काव्यार्थः ? (स)

[नेपथ्ये] । अपनीयतामातोद्यकम् । भो भोः सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः ! पश्यत, महर्षिणा भगवता वाल्मीकिना अनुज्ञातं पवित्रमाश्चर्यम् । (ह)

सहचरि ।। चारित्रदेवत—चरित्रमेव चारित्रं, तदेव देवता इव विशुद्धेत्यर्थः, यस्याः तस्याः सम्बोधने, यद्वा—चारित्रेण—पातिव्रत्यरूपसच्चरित्रतया, देवता—देवीभूता तत्सम्बोधने सच्चारित्रगुणयोगात् त्वमपि देवीवत् परिपूजनीया भवसीति भावः । लोकान्तरम्—अन्यं लोकं, पातालमिति यावत् । पर्य्यवसितासि—प्रस्थिता भवसि, स्वर्गलोकं यावत् रसातलावस्थानस्य वसुन्धराभ्यनुज्ञातत्वात् द्वादशानां वत्सराणां व्यतीतत्वाच्च लोकान्तरपर्य्यवसानं निश्चितमिति समधायत्यम् । [पर्य्यव पूर्वकात् दैवादिकात् स्यतेः गत्यर्थत्वात् कर्त्तरि क्तप्रत्ययः । "द्यतिस्यति—" (७।४।४० पा०) इति इकारोऽन्तादेशः]।

(स) परित्रायस्व—रक्ष, रामस्य विमूर्च्छितस्य जीवनमुत्पादनेन अस्मान् परिपालयेत्यर्थः । एषः,—ईदृशः, मोहोत्पादनेन रामस्य जीवननाशकारक इति यावत् । किं—किम् । ते—तव । काव्यार्थः,—उपनिबद्धस्य दृश्यकाव्यस्य प्रयोजनम्, किं भवता रामस्य जीवनापनयनार्थमेव ईदृग्दृश्यकाव्याभिनयः प्रदर्श्यते ? नैतदुचितं ते इति लक्ष्मणस्य वक्रोक्तिरियमिति ज्ञेयम् ।

(ह) अपनीयताम्—अपसार्य्यताम् । आतोद्यकं—ततानद्धसुषिरघनेत्याख्यं चतुर्विधं वाद्यम्, यतोऽधुना अभिनयः पुनः प्रारभ्यते, अतो वीणादिवाद्यवादका निवर्त्यन्तु इति भावः । भो भोः ।—जङ्गमैः,—गमनशीलैः पशुपक्ष्यादिभिः स्थावरैः—स्थितिशीलैः तरुशैलादिभिश्च सह वर्त्तमानाः । प्राणभृतः,—प्राणिनः । मर्त्यामर्त्याः,—मर्त्याः,—भूतलवासिनः मनुष्यादयः, अमर्त्याः,—तद्भिन्नाश्च देवासुरादयः सर्वे इत्यर्थः । पश्यत—अवलोकयत, यूयमिति शेषः । महर्षिणा—ऋषिप्रवरेण । भगवता वाल्मीकिना—प्राचेतसेन । अनुज्ञातम्—उपदिष्टं, दृश्यकाव्याकारेणोपनिबद्धमित्यर्थः । पवित्रं—निरतिशयपूतमिति यावत् । आश्चर्य्यं—विस्मयकरं, भागीरथीपृथ्वीभ्यां रक्षितायाः सीतायाः सलिलाभ्यन्तरात् समुद्गमरूपमित्यर्थः । एतद्धि सूत्रधारेण यवनिकान्तःस्थेनाभिहितत्वात् चूलिकाख्यं नाट्यार्थोपक्षेपकं विदुः,—"अन्तर्यवनिकासंस्थैः सूचनाऽर्थस्य चूलिका" इति साहित्यदर्पणात् ।

लक्ष्मण। [विलोक्य]।—

मन्थादिव क्षुभ्यति गाङ्गमम्भो
व्याप्तञ्च देवर्षिभिरन्तरीक्षम्।
आश्चर्यमार्य्या सह देवताभ्यां
गङ्गामहीभ्यां सलिलादुदेति ॥ १६ ॥

[नेपथ्ये]।—अरुन्धति। जगद्वन्द्ये। गङ्गापृथ्व्यौ भजस्व नौ।
अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः ॥ १७ ॥

प्रोक्तं विस्मयकरं वस्तु लक्ष्मणो विलोक्य स्फुटीकृत्य व्यनक्ति, मन्थादिवेति।—गाङ्गं गङ्गाया इदं, गङ्गासम्बन्धि इत्यर्थः, अम्भः जलं, मन्थादिव आलोडनादिव, अन्तर्निर्गतपर्वतादिरूपमन्दरदण्डजनितादिति यावत्, क्षुभ्यति उच्छलति, चञ्चलीभवतीत्यर्थः, देवर्षिभिः देवा अमराः, ऋषयः मुनयश्च तैः, अन्तरीक्षं गगनं, व्याप्तञ्च आकीर्णञ्च, आश्चर्यदर्शनकौतुकात् देवा ऋषयश्च सर्वे आकाशदेशे समवेता अभवन्नित्यर्थः, आश्चर्यं विस्मयकरमेतदित्यर्थः, आर्या सीता, गङ्गामहीभ्यां भागीरथीपृथ्वीभ्यां, देवताभ्यां, सह साकं, सलिलात् गङ्गाया जलात्, उदेति उद्गच्छति। [अत्र मन्थनस्यासत्त्वेन सम्भावनया तदुक्तौ गम्यात् उत्प्रेक्षालङ्कारः। अतिशयेन क्षुभ्यतीति क्षुभ्यक्रियामारभ्य उदेतीति तथाभूतक्रियया समापनात् अन्तरा च व्याप्तमिति विभिन्नक्रियायाः प्रयोगात् उपात्तक्रमभङ्गजनितं भग्नप्रक्रमताऽप्यत्र दोषः, न च "[illegible]" इत्यनेन समाधेयः]। इन्द्रवज्रा वृत्तम् ॥ १६ ॥

अथ अरुन्धतीमपि पृथ्वीभागीरथीकृतमतिविस्मयकरं सीतायाः समर्पणमाह, अरुन्धतीति।—जगद्वन्द्ये जगतां त्रिलोकीनां, वन्द्ये! पूजनीये!, पतिव्रतात्वगुणभूषणवत्त्वात् इति भावः, अरुन्धति! वसिष्ठपत्नि!, नौ आवां, गङ्गापृथ्व्यौ भागीरथीपृथिव्यौ, भजस्व सेवस्व, [illegible] कृत्वा नौ सन्तोषयेत्यर्थः, ("नुदस्व" इति पाठान्तरम्) तव [illegible], अभ्यासे समीपे, पुण्यव्रता पुण्यं [illegible], [illegible] सीता [illegible], [illegible] इति भावः। [illegible]

[illegible]

लक्ष्मण । दिष्ट्या आश्चर्य्यमाश्चर्य्यम् ॥ आर्य्य । पश्य पश्य । कष्टम्, अद्यापि नोच्छ्वसिति आर्य्यः ॥ । (क)

[ततः प्रविशति अरुन्धती सीता च]।

अरु।—त्वरस्व वत्से वैदेहि । मुञ्च शालीनशीलताम् ।
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना ॥ १८ ॥

सीता। [ससम्भ्रमं रामं स्पृशन्ती] । समस्ससिदु अज्जउत्तो । * (ख)

---

* समाश्वसितु आर्य्यपुत्रः ।

(क) दिष्ट्या—सौभाग्यसूचकम् । ("दिष्ट्या" इत्यत्र "षष्ठी ।" इति पाठान्तरम्)। आश्चर्य्यं—विस्मयकरमेतदित्यर्थः । [विस्मये द्विभावः]। आर्य्य ।—राम । । पश्य पश्य—अवलोकय । [सम्भ्रमे द्विरुक्तिः] कष्टं—दुःखकरम् । अद्यापि—इदानीमपि । नोच्छ्वसिति—न प्राणिति, न समाश्वस्तो भवति इत्यर्थः । आर्य्य,—राम, भो रघुकुलतिलक । देवी सीता अरुन्धत्या भवत्समाश्वासनायैव पुनः परिगृह्यते इति विस्मयकरं वस्तु अवलोकय । किन्त्वद्यापि राघवः न संज्ञां प्रतिलभते ॥ इति भोः । कष्टमेतदिति भावः ।

अथ देवी अरुन्धती मोहमुपागतस्य राघवस्य समाश्वासनार्थं सीतामुपदिशति, त्वरस्वेति ।—वत्से । हे शुभे । वैदेहि । सीते ।, त्वरस्व सत्वरा भव, शालीनशीलतां शालीनम् अधृष्टं, लज्जायुक्तमित्यर्थः, शीलं स्वभावः यस्याः तस्याः भावः तत्ता ताम्, लज्जाशीलतामित्यर्थः, ("स्यादधृष्टे तु शालीनः" इत्यमरः) मुञ्च त्यज, विपन्नस्य भर्त्तुः समाश्वासनार्थं स्वाभाविकं मुग्धभावं विजहीहीति भावः, गुरुजनाः विद्यन्ते कथं भर्त्तुः सकाशं यामि इति सङ्कोचस्य नायमवसरः इति तात्पर्य्यम्, एहि आगच्छ, प्रियस्पर्शेन प्रियं सुखकरं, स्पर्शः अङ्गपरामर्शनादिक्रिया यस्य तेन, पाणिना करेण, मे मम, वत्सं रामं, जीवय सम्प्राप्तजीवनं कुरु, त्वं कोमलकरसंवाहनेन रघुनाथं सत्वरा विगतखेदं विधेहीति भावः । पथ्यावक्त्रं वृत्तम् ॥ १८ ॥

(ख) ससम्भ्रमं—व्यग्रतान्वितम् । रामं स्पृशन्ती—तद्देहं परामृशन्ती सती, इदाचेति शेषः । भर्त्तुः मोहं सपदि अपसारयितुमेवास्य त्वरा चेष्टा । समाश्वसितु—समाश्वस्तः भवतु । आर्य्यपुत्रः,—स्वामी, रामः इति यावत्, मोहं परित्यजेदिति भावः ।

राम । [समाश्वस्य सानन्दम्] । भो ! किमेतत् ? [दृष्ट्वा सहर्षाद्भुतम्] । कथं देवी । [सलज्जस्मितम्] । अये ! अम्बा अरुन्धती, सर्वे च प्रहृष्यन्त ऋष्यशृङ्गशान्तासमेता गुरवः । (ग)

अरु । वत्स ! एषा भगवतो भगीरथगृहदेवता सुप्रसन्ना गङ्गा । (घ)

[नेपथ्ये] । जगत्पते रामभद्र ! स्मर्य्यतामालेख्यदर्शने मां प्रति आत्मनो वचनम्, यथा,—"सा त्वमम्ब ! स्नुषायाम् अरुन्धतीव सीतायां शिवानुध्यानपरा भव" इति । तत्रानृणाऽस्मि जाता । (ङ)

(ग) समाश्वस्य—सीतायाः पाणिस्पर्शेन सञ्ज्ञालाभानन्तरं किञ्चित् समाश्वस्तो भूत्वेत्यर्थः । सानन्दं—सहर्षम्, आहेति शेषः । भो ! किमेतत् ?—अहो ! कथं किमिदानीमेतत् सम्भूतमिति भावः । दृष्ट्वा—लोकान्तरप्रस्थितां सीतां स्वगृहशुश्रूषापरायणामवलोक्य । सहर्षाद्भुतं—हर्षः,—सीतायाः पुनर्लाभात् आनन्दः, अद्भुतम्—नाशं गतस्य वस्तुनः कथं हि समधिगम इति विस्मयः, ताभ्यां सह वर्त्तमानं यथा तथा आहेति शेषः । कथं—किम् । कथंशब्दोऽत्र सहर्षविस्मयसूचको बोध्यः । देवी ?—सीता ? समुपस्थितेति भावः । सलज्जस्मितं—लज्जा—गुरुजनानाम् अरुन्धतीप्रभृतीनां दर्शनात् त्रपा, स्मितं—सीतायाः पुनः प्राप्तिजनितहर्षात् ईषद्धास्यं, ताभ्यां सह वर्त्तमानं यथा तथा, आहेति शेषः । अम्बा—जननी । अरुन्धती—अस्मत्कुलगुरोः वसिष्ठस्य धर्मपत्नी । ऋष्यशृङ्गेति ।—ऋष्यशृङ्गः,—तदाख्यमुनिविशेषः भगिनीपतिः, शान्ता—भगिनी, ताभ्यां समेताः,—युक्ताः । सर्वे गुरवः,—गुरुजनाः । प्रहृष्यन्तः,—आनन्दन्तः सन्तः, समुपस्थिता इति शेषः ।

(घ) भगीरथेति ।—भगीरथस्य—[illegible] गङ्गानेतुः, गृहं—कुलं, तस्य देवता—आराध्या देवी । गङ्गा—जाह्नवी । सुप्रसन्ना—वरदा, [illegible] इत्यन्वयः ।

(ङ) जगत्पते ।—जगताम्—भुवनानाम्, पतिः,—पालकः, तत्सम्बोधने, [illegible] वचनमिति [illegible] । आलेख्यदर्शने— [illegible] । मां प्रति आत्मनो वचः । [illegible] [illegible] तदिदानीं [illegible] [illegible], [illegible]

अरु। इयन्ते श्वश्रूर्भगवती वसुन्धरा। (च)

[नेपथ्ये]। उक्तञ्च पूर्वमायुष्मता वत्सात्यागे, यथा—"भगवति वसुन्धरे। श्लाघ्यां दुहितरमवेक्षस्व जानकीम्' इति। तदधुना कृतवचनाऽस्मि प्रभोर्वत्सस्येति। (छ)

राम। कथं कृतमहापराधो भगवतीभ्यामनुकम्पित ।। प्रणमामि व। (ज)

—तादृशी भवती, सततमेवास्मत्कुलमङ्गलाभिलाषिणी भवतीति यावत। सुताया सीतायाः—वध्वा जानक्याम्। अरुन्धतीव—अस्माकं गुरुपत्नी यथा तथैवेत्यर्थ। शिवानुध्यानपरा—शिवस्य—शुभस्य यदनुध्यानं—परिचिन्तनं, तत्परा—तदासक्ता। भव—एधि, सततमेव मङ्गलाभिलाषिणी सती तिष्ठेति भाव। तत्र—मदुपदेशपरिपालन विषये इत्यर्थः। अनृणा—नास्ति ऋणं यस्याः तथाभूता, उऋणेत्यर्थः, परिपालित-वचनेति यावत्। अस्मि—भवामि, घोरविपत्तिसमये देहपातव्यवसायपरायणा सीता त्वया जगत्पते भवतः आज्ञा सर्व्वथा सम्पादितवत्यस्मीति भाव।

(च) श्वश्रू,—श्वशुरस्य पत्नी, सीतायाः गर्भे धारणात् अस्याः तथात्व ज्ञेयम्। वसुन्धरा—रत्नगर्भा पृथिवी, यथा हि अनया रत्नानि स्वगर्भे धृतानि, तथैव सतीकुल-शेखरीभूतायाः सीतायाः गर्भे धारणात् इयमधुना स्वाभिधानस्य सार्थकतां सम्पादित वतीति भाव।

(छ) वत्सात्यागे—वत्सायाः,—सीतायाः, त्यागे—निर्व्वासनावसरे। पूर्व्वे—प्राक्। आयुष्मता—दीर्घायुषा त्वया राघवेण। उक्तञ्च—कथितञ्च। किमिति ? तदेवाह, यथेति।—भगवति वसुन्धरे।—हे रत्नगर्भे पृथिवि।। श्लाघ्यां—प्रशंसनीयाम्। दुहितरं—कन्याम्। जानकीं—सीताम्। अवेक्षस्व—पश्य, सततमेवास्याः पर्य्यवेक्षणं कुर्य्या इत्यर्थ। इति—इत्थम्, उक्तञ्चेत्यनेनान्वय। तत्—तस्मात्। अधुना—इदानीम्। प्रभो,—पालकस्य, भूपतित्वादिति भाव। वत्सस्य—जामातृत्वात् आयुष्मतः तव राघवस्य। कृतवचना—कृतं—सम्पादितं, वचनं—वाक्यं यया तथाभूता, अनुष्ठिताऽऽदेशा इत्यर्थ। अस्मि—भवामि, त्वदाज्ञां सम्यक् सम्पाद्य अनृणा सञ्जाताऽस्मीति भाव।

(ज) कृतमहाऽपराध,—कृत,—विहित, महान्—विपुल, घोर इत्यर्थ, अपराध,—सीतानिर्व्वासनरूप दोष येन तथोक्त, पापाशय, अतिनृशंस इत्यर्थ।

अरु। भो भोः पौरजानपदाः ! भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेव प्रशस्यमाना ममापत्यत्वा समर्पिता, पूर्वञ्च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा, सब्रह्मकैश्च देवैः संस्तुता, सावित्रकुलवधूर्देवयजनसम्भवा सीतादेवी परित्यज्यतामिति कथं भवन्तो मन्यन्ते ? (भ)

भगवतीभ्यां—पूज्याभ्यां पृथ्वीभागीरथीभ्याम्। कथं—किम्। विस्मयसूचकमिदम्। अनुकम्पितः ?—अनुगृहीतः, अहो। कृतमहापातकेऽपि मयि भवतां सौजन्यम् अनुकम्पा चेति भावः। वः,—युष्मान्। [गौरवाद्बहुवचनम्]। प्रणमामि—नमस्करोमि।

(भ) पौरजानपदाः !—नगरवासिनः देशवासिनश्च सर्वाः प्रकृतयः ! इत्यर्थः। भगवतीभ्याम्—परमैश्वर्यशालिनीभ्याम्, अतिपवित्राभ्यामिति यावत्। जाह्नवीवसुन्धराभ्याम्—गङ्गापृथ्वीभ्याम्। एवं—प्रोक्तरूपे, "आवयोरपि यत्सङ्गात्" इत्यादिवचोभिः इति यावत्। प्रशस्यमाना—स्तूयमाना। मम अपत्यत्वा,—सतीकुलप्रधानाया वसिष्ठपत्न्याः मे सकाशे इति यावत्, ["मम अपत्यत्वा" इत्यनेन आत्मनः सतीत्व-गौरवजनितं किञ्चित् गर्वाधिक्यं व्यज्यते]। समर्पिता—न्यस्ता, सीता चेत् असती स्यात्, तदा गङ्गापृथ्वीभ्याम् तच्छालिनीभ्यां कथमपि न प्रशस्येत, न वा सतीशिरोमणितया विख्यातायाः ममापत्यत्वा सत्यपि समर्प्येत इत्याशयः। पूर्वञ्च —प्रागपि, रावणवधानन्तरं लङ्कापुर्यां पुनः सीतायाः स्वीकारसमये इति भावः। वैश्वानरेण—अग्निना। निर्णीतपुण्यचारित्रा—निर्णीतं—स्थिरीकृतं, प्रमाणीकृतं निश्चयं, पुण्यं—पवित्रं, चारित्रं—प्रकृतिः यस्याः सा प्रमाणीकृतपातिव्रत्या इत्यर्थः। सब्रह्मकैः,—ब्रह्मणा—प्रजापतिना सह वर्तमानैः। देवैः,—इन्द्रादिभिः त्रिदशैः। संस्तुता—प्रशंसिता, पातिव्रत्यशालित्वेन समादृतेत्यर्थः, यद्वा—संस्तुता—[illegible] [illegible] परिचिता विज्ञाता इत्यर्थः, ("संस्तवः स्यात् परिचयः" इत्यमरः)। सावित्रि।—सवितुरिदं सावित्रं, तत् कुलं—वंशः, सूर्यवंश इत्यर्थः, तस्य वधूः,

लक्ष्मण। एवमार्य्यया अरुन्धत्या निर्भर्त्सिता प्रजा कृत्स्नश्च भूतग्राम आर्य्यां नमस्करोति, लोकपालाश्च सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते। (ज)

भरत। जगत्पते रामभद्र!—

विधौ रामकृतपरिग्रहविषये चर्ति यावत। भवन्त,—पौरजानपदा ... इत्यह। कथ—किम। नन्वन्ते?—विचारयन्ति, युष्माकं कर्मणि ... या हि विशुद्धस्वभावा इति मत्वा पृथ्वीभागीरथीभ्यां ... कृत्ते समर्पिता, यस्यै च परीक्षितपातिव्रत्यप्रभावा, देवैरपि ... सूर्य्यवंशीयकुलवधूनामुज्ज्वलरत्नभूता जनकस्य राजर्षेः ... किमिति अपाववतया भवद्भिः पौरजनैरनुमोद्यते? एव ... सर्वैरेव यथावत् स्वस्वनाननपर्यालोचनीय इति ... विषये पूर्वोक्तहेतुसमूहोपन्यासपुरःसरं प्रकृतिपुञ्जानामासमर्थनप्रार्थना ... कापवादानां तेषां धृष्टताया उत्कटतिरस्कारः सूचितो भवतीति ध्येयम्।

(ज) एवम्—इत्थं, प्रोक्तरूपेणेत्यर्थः, पतिपरित्यक्तायाः सीतादेव्याः रामकर्तृकपरिग्रहविषये सम्मतिप्रार्थनारूपेणाधिक्षेपवचनेनेति भावः। निर्भर्त्सिता—तिरस्कृता। प्रजा,—प्रकृतयः। कृत्स्न,—सर्वः। भूतग्राम—स्थावरजङ्गमात्मकः चराचरः। आर्य्या—सीताम्। नमस्करोति—प्रणमति, दुष्प्रत्ययात्मत्वेन प्राक् सीतायामपवादो ... दुना लज्जिता प्रजा किमपि वक्तुमशक्नुवत्य नमस्कारेण तस्याः पवित्रत्वमङ्गीकरोतीति भावः। ["उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात् अत्र नमःशब्दयोगेऽपि द्वितीया ज्ञेया]। लोकपाला,—इन्द्रादयः देवाः। (तथा चामरः,—"इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्" ॥ इति)। सप्तर्षय,—मरीच्यादयः। (तथा चोक्तं—"मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः। वशिष्ठश्च तथा सप्त ऋषयः परिकीर्त्तिताः ॥" इति)। पुष्पवृष्टिभि,—स्वर्गीयकुसुमानां वर्षणैः। उपतिष्ठन्ते—परिपूजयन्ति, सत्कुर्वन्तीत्यर्थः, भूतग्रामसहिताः सर्वे एव देवाः सीता परमपवित्रा इति सम्पूज्य तां सम्यक् अभिनन्दयन्ति, अतः सीतायाः राज्ञीत्वेन परिग्रहे नास्ति काऽप्यापत्तिः प्रजानामिति निष्कृष्टार्थः। ["उपाद्देवपूजा—" (वा०) इति उपपूर्वात्तिष्ठतेरात्मनेपदम्। एतेन भागीरथीप्रमुखाभिर्देवीभिः इन्द्रादिभिर्देवैः सप्तर्षिभिश्च सम्मानितत्वात् सीतायाः देवत्वमपि व्यज्यत इति ज्ञेयम्]।

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणाम्।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥ १९ ॥

सीता। [स्वगतम्]। जाणादि अज्जउत्तो सीदादुक्खं पमज्जिदुं।* (८)

* जानाति आर्य्यपुत्रः सीतादुःखं प्रमार्जितुम्।

अथाऽस्मतो हिरण्मयीं सीताप्रतिकृतिं विहाय अतिपवित्रां साक्षात् सीतामेव धर्मचारिणीं कृत्वा अश्वमेधाध्वरं सम्पादयितुं राममुपदिशति, नियोजयेति।—हे जगत्पते। पृथिवीपालक।, रामभद्र। रघुमणे।, इति चूर्णकस्थमामन्त्रणपदं समाकृष्यणीयम्, त्वं हिरण्मय्याः सुवर्णनिर्म्मितायाः, [हिरण्यस्य विकार इत्यर्थे मयटि "दाण्डिनायनहा—" (६।४।१७४ पा०) इति सूत्रेण यलोपः निपात्यते, टित्वात् ङीप् च, तेन हिरण्मयीति सिद्धम्]। प्रतिकृतेः प्रतिमूर्त्तेः, स्वर्णनिर्म्मित-तदाद्यादर्शादपीति भावः, पुण्या पवित्रा, प्रकृतिः आदर्शः स्वभावो वा यस्याः ताम्, पतिव्रताशिरोभूतां त्वदुपान्ते वर्त्तमानां मूर्त्तिमतीं साक्षादित्यर्थः, यद्वा—हिरण्मय्याः प्रतिकृतेः प्रतिच्छायायाः, पुण्यप्रकृतिं पुण्यां पवित्रां, सतोगुणप्रधानत्वेन सुवर्णप्रतिमायाः अपि अतिविशुद्धा इति यावत्, प्रकृतिं मूलभूतां, यामवलम्ब्य प्रतिकृतिर्घटिता आसीत् सैवेति भावः, ताम्, प्रियां वल्लभां सीताम्, अध्वरे अश्वमेधयज्ञे, धर्मचारिणीं धर्म्माचरणसहचरीं, यथाधर्म्मं धर्म्मानतिक्रम्य धर्म्मशास्त्रानुसारेणेत्यर्थः नियोजय सम्पादय, एतया साक्षात् सीतया सहितः अश्वमेधं निष्पादयेति भावः। "मुख्याभावे प्रतिनिधिं शास्त्रार्थ" इति न्यायात्, मुख्याभावे प्रतिनिधिविधानस्य शास्त्रीयत्वेन सीतायाः सुवर्णमयमादर्शं सम्पाद्य अश्वमेधावरम्भणादन हि साक्षात् सीतायाः प्राप्तावनावश्यकमेव, अतः सीतां स्वीकृत्य तया सह [illegible] निष्पादयेति तात्पर्य्यम्। अत्र "पुण्यप्रकृतिम्" इत्यनेन 'यस्य भार्य्या विरूपा स्यात् पतिता दूषिताऽथवा। अतिरिक्तप्रतिकृता वा—" इत्यादि निषेधविधेः अवकाशाभावात् सीतया सार्द्धं यज्ञनिष्पादने फलभूयस्त्वं व्यज्यते। पथ्यावक्त्रं वृत्तम् ॥ १९ ॥

(८) आर्य्यपुत्र,—राम। सीताद्—सीतायाः,—मम, दुःखं—क्लेशम्। प्रमार्जितुं—अपनेतुं, निराकर्त्तुमित्यर्थः। जानाति—वेत्ति, [illegible] पुनः स्वीकृत्य अश्वमेधं [illegible] न खेद [illegible] इति, मम सुवर्णप्रतिकृतिं [illegible] सह [illegible] इति [illegible]

राम । यथा भगवती आदिशति । (ठ)

लक्ष्मण । कृतार्थोऽस्मि । (ड)

सीता । जीविदम्हि । * (ढ)

लक्ष्मण । आर्य्ये । एष निर्लज्जो लक्ष्मणः प्रणमति । (ण)

सीता । वच्छ । ईदिसो वि चिरं जीव । † (त)

* जीविताऽस्मि ।

† वत्स । ईदृशोऽपि चिरं जीव ।

परित्यक्ताऽस्मि इति मे परित्यागलज्जामन्यु तेन समुन्मूलितमिति भावः ।

(ठ) यथा—यादृक् । भगवती—भवती वसुन्धरेत्यर्थः । आदिशति—आज्ञापयति, तथा करोमीति शेषः, गुरुजनानुज्ञाया अनुपेक्षणीयत्वात् पुनरप्यङ्गीकरोमीति भावः ।

(ड) कृतार्थोऽस्मि—कृतकृत्यः भवामि, सीतारामयोः पुनः समागमदर्शनेन सर्वेषामस्माकमपूर्वानन्दस्य सञ्जननादिति भावः ।

(ढ) जीविताऽस्मि—प्राप्तप्राणा भवामि, प्राणेभ्योऽपि प्रेयसः रामस्य विरहेण एतावन्तं कालं मृतप्राया इव आसम्, इदानीं तल्लाभेन प्रत्युज्जीविता इव भवामीति भावः ।

(ण) निर्लज्जः—निर्नास्ति लज्जा यस्य तथोक्तः, सीताविवासनरूपनृशंसाचरणात् निस्त्रप इत्यर्थः, यो हि प्राक् ज्येष्ठादेशात् आपन्नसत्त्वामकारिणीं त्वां श्वापदसङ्कुले विजनेऽरण्ये निर्वासितवान्, नृशंसः स कथं तव पुरतः दण्डायमानः निर्विकारचेता इव ते मुखं दर्शयति ? इत्यर्थः । नैर्घृण्यं तस्येति भावः ।

(त) वत्स !—प्रेमास्पदीभूत !, आयुष्मन्नित्यर्थः । ईदृशः अपि—प्रोक्तरूपः सन्नपि, मद्विवासनेन निष्ठुरभावप्रकाशनात् लज्जाहीनः भवन्नपीत्यर्थः । चिरं—सुदीर्घं कालम् । जीव—प्राणिहि, स्वेच्छायामसत्यामपि केवलम् अग्रजस्यादेशानुपालनाय मद्विवासनरूपं यदन्याय्यमाचरितं, तत्र ते अणीयानपि दोषो नास्तीत्यहं जानामि, परं ज्येष्ठादेशानुपालनात् त्वं मे परमप्रीतिभाजनमेव भवसि, किञ्च त्वज्जीवनं हि मे प्राणेभ्योऽपि गरीयः, तेन लज्जां परिहाय सततं सुखमास्स्व पुरुषायुषञ्चाप्नुहीति भावः ।

अरु। भगवन् वाल्मीके! उपनीयेतामिमौ सीतागर्भसम्भूतौ रामभद्रस्य पुत्रकौ कुशलवौ। (थ)

[इति निष्क्रान्ता]।

रामलक्ष्मणौ। दिष्ट्या तथैव तत्। (द)

सीता। [सवाष्पाऽऽकुला]। कहिं ते पुत्तआ मे? * (ध)

[ततः प्रविशति वाल्मीकिः कुशलवौ च]।

वाल्मीकिः। वत्सौ कुशलवौ! एष रघुपतिः पिता युवयोः,

* कुत्र तौ पुत्रकौ मे?

(थ) भगवन् वाल्मीके!—इति नेपथ्यस्थितं वाल्मीकिमुद्दिश्य अरुन्धत्याः सम्बोधनम्। इमौ—त्वत्सकाशे अवस्थितौ इत एव दृश्यमानौ। सीतागर्भसम्भूतौ—जानकीगर्भजातौ। पुत्रकौ—तनयौ। उपनीयेतां—प्राप्येतां, सीतारामसमीपे बालकद्वयमुपस्थाप्यतामित्यर्थः। इति निष्क्रान्ता—रङ्गस्थानात् बहिर्गता, अरुन्धतीति शेषः। अत्रैव गर्भाङ्कस्य परिसमाप्तिर्ज्ञेया। गर्भाङ्कलक्षणमुक्तं दर्पणे यथा—"अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्। अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि॥" इति। बीजलक्षणमपि तत्रैव यथा,—"अल्पमात्रं समुद्दिष्टं बहुधा यत् विसर्पति। फलस्य प्रथमो हेतुर्बीजं तदभिधीयते॥" इति। "साऽहं मन्दभाग्या भागीरथ्याम् [illegible] क्षिपिष्यामि" इत्येतावद् बीजम्, यतश्चैतदेवात्र स्वल्पतया समुद्दिष्टं विषयीभूतं सत् अरुन्धतीसम्पादितसीतारामसमागमरूपफलं प्रति कारणम्। सीतारामसमागमरूपश्चात्र फलम्। "प्रविश्य सूत्रधारः" इत्यारभ्य "विश्वम्भरा भगवती" इत्यादि श्लोकपर्यन्तमत्र रङ्गद्वारामुखादिकं ज्ञेयम्।

(द) तत्—कुशलवसम्बद्धं वस्तुजातमित्यर्थः। तथैव—तादृशमेव, यथाऽस्माभिः प्राक् चिन्तितं तद्रूपमेवेति भावः।

(ध) ("सवाष्पाकुला" इत्यत्र "सवाष्पाकूतम्" इति पाठे—वाष्पेण—आनन्दाश्रुणा, आकूतेन—पुत्रदर्शनाभिप्रायेण च सह वर्तमाना। यथा तथा)। तौ—अन्यत्र त्यागादनन्तरं मया विमुक्तौ इति यावत्। पुत्रकौ—कुशलवौ। कुत्र—कस्मिन् स्थाने इदानीं वर्तेते इत्यर्थः, यौ हि स्तन्यत्यागं यावत् मया पोषितौ, ताविदानीं दूरे वर्तेते, अतश्चक्षुषी मे नितरां निर्मोचयतीति इति भावः।

लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको मातामहः। (न)

सीता। [सहर्षकरुणाद्भुतं विलोक्य]। कहं तादो॥ * (प)

कुशलवौ। हा तात। हा अम्ब। हा मातामह। (फ)

रामलक्ष्मणौ। [सहर्षमालिङ्ग्य]। ननु वत्सौ! पुण्यैः प्राप्तौ स्थः। (ब)

सीता। एहि जाद कुस। एहि जाद लव! चिरस्स परिस्सजध पुणो जम्मन्तरगद जणणि। † (भ)

---

* कथं तातः॥

† एहि जात कुश। एहि जात लव। चिरस्य परिष्वजेथां पुनः जन्मान्तरगतां जननीम्।

(न) अथ भगवान् वाल्मीकिः कुशलवौ तद्गुरुजनादीन् परिचाययति, वत्साविति।—रघुपतिः,—रामचन्द्रः। युवयोः पिता—जनकः। कनिष्ठतातः—पितृव्यः। मातामहः,—मातुः पिता। [“मातृपितृभ्यां पितरि डामहच्” (वा०) इति मातृशब्दात् डामहच्प्रत्ययः]। राजर्षिर्जनकस्तु अभिनयदर्शनार्थं महर्षेर्वाल्मीकेराह्वानवशादेवात्र समागत इति ज्ञेयम्।

(प) सहर्षकरुणाद्भुतम्—आनन्दशोकाश्चर्यैः सह वर्तमानं यथा तथेत्यर्थः, आहेति शेषः। अत्र पितुर्दर्शनात् हर्षः, स्वस्य दुरवस्थां स्मृत्वा करुणः, अकस्मात् पितुरागमनदर्शनाच्च अद्भुतं सम्भूतम् इति ज्ञेयम्।

(फ) अत्र हाशब्दः विषादसङ्कुलहर्षद्योतकः, पित्रादिदर्शनात् हर्षः, तेषां तथाभूतामवस्थां विलोक्य च विषाद इति ज्ञेयम्।

(ब) (“रामलक्ष्मणौ” इत्यत्र “रामः” इतिमात्रपाठः क्वचिद्दृश्यते)। ननु—भोः॥ पुण्यैः,—आत्मसुकृतैः। प्राप्तौ स्थ,—लब्धौ भवथ, युवामिति शेषः, पूर्वजन्मार्जितपुण्यबलेनैव युवामस्माभिर्लब्धाविति भावः।

(भ) चिरस्य—बहुकालं यावदित्यर्थः। [षष्ठ्यन्तप्रतिरूपकमव्ययमेतत्] परिष्वजेथाम्—आलिङ्गतं, युवामिति शेषः, बहुकालात् परमुपागतस्य वस्तुनः सम्भोगः स्पर्शोपभोगेन सम्यक्तया रुचिरो भवतीति भावः। जन्मान्तरगता—

कुमारौ। [तथा कृत्वा]। धन्यौ स्वः। (म)

सीता। भअवं! पणमामि। * (य)

वाल्मीकि। वत्से! ईदृश्येव चिरं भूयाः। (र)

सीता। अम्महे! तादो, कुलगुरु, अज्जाजणो, सभत्तुआ अज्जा सन्तादेई, सलक्खणा सुपसण्णा अज्जउत्तचलणा, सम कुसलवावि दीसन्ति, ता णिब्भरम्हि आणन्देण। † (ल)

* भगवन्! प्रणमामि।

† आर्य्यम्! तात, कुलगुरु, आर्य्याजन, सभर्तृका आर्य्या शान्तादेवी, सलक्ष्मणा सुप्रसन्ना आर्य्यपुत्रचरणा, सम कुशलवावपि दृश्यन्ते, तन्निर्भराऽस्मि आनन्देन।

जन्मान्तरप्राप्ताम्, पातालदेशात् पुनः भूतले समुद्गमादिति भावः, यद्वा—सुदीर्घकालं व्याप्य अनुभूतदारुणक्लेशस्य अधुनाऽपगमात् प्राप्तजन्मान्तरभावामिवेति भावः।

(म) धन्यौ स्वः,—सार्थकजन्मानौ भवावः, लोकान्तरगतायाः मातुः पुनर्लाभादिति भावः।

(य) भगवन्!—परममाहात्म्यशालिन्!, महर्षे वाल्मीके! इत्यर्थः। प्रणमामि—अभिवादये, भवन्तमिति शेषः, यतः भवत्प्रभावेणैवाहं स्वामिविरहजनितचिरदुःखभागिन्यपि पुनः तत्समागमेनेदानीं विगतदुःखा भवामीति भावः।

(र) ईदृश्येव—एवम्भूता एव, पतिपुत्रयोः चिरसंयोगवत्येवेत्यर्थः। भूयाः,—स्थेयाः इति यावत्, न हि कदाऽपि प्राणिनः पतिपुत्रवियोगभागिनी भवेरिति भावः।

(ल) तातः,—पिता, राजर्षिः जनकः इत्यर्थः। कुलगुरुः,—वशिष्ठः। आर्य्याजनः,—कौशल्यादिश्वश्रूजनः। सभर्तृका—सधवा—ऋष्यशृङ्गेण सह वर्त्तमाना, पतिव्रता इत्यर्थः। आर्या—मान्या। शान्तादेवी—पूजनीया शान्ताख्या ननान्दा। सलक्ष्मणा—सौमित्रिसहिता। सुप्रसन्ना,—आनन्दपूर्णा, [illegible] आनन्दोच्छ्वसिता इति यावत्। आर्य्यपुत्रचरणाः,—पतिः रामभद्रः, [illegible] चरणमन्त्राप्यन्ताम्। सम [illegible] तत—तस्मात्, [illegible] आनन्देन—हर्षेण। निर्भरा—व्याप्ता, परिपूर्णेति [illegible]।

नेपथ्ये । [कलकलः] ।

वाल्मीकिः । [उत्थायावलोक्य च] । उपहृतलवणो मधुरेश्वरः प्राप्तः । (ब)

लक्ष्मणः । सानुषङ्गाणि कल्याणानि । (ग)

रामः । सर्वमिदमनुभवन्नपि न प्रत्येमि । यद्वा, प्रकृतिरियमभ्युदयानाम् । (घ)

(ब) उपहृतलवणः—उपहृतः,—उत्खातः, निहतः इत्यर्थः लवणः,—मधुदैत्यसुतः राक्षसविशेषः येन तथोक्तः । ("उत्खातलवणः" इति पाठान्तरम्) । मधुरेश्वरः,—मधुरा नाम लवणवधानन्तरं यमुनाकूलस्थे मधुदैत्याधिकृते मधुवने शत्रुघ्नेन निर्म्मिता काचित् पुरी, अधुना "मथुरा" इति प्रसिद्धा, तस्याः ईश्वरः,—अधिपतिः, शत्रुघ्न इत्यर्थः । प्राप्तः,—समायातः, अतस्तत्सेनायाः एषः कलकलः श्रूयते इति भावः । लवणवधविवरणन्तु प्रागेव महर्षिणा वाल्मीकिना तपःप्रभावात् परिज्ञातमासीदिति ज्ञेयम् । कालिन्दीकूलस्थानां प्रशान्तचेतसां मुनीनामानन्दोत्पादकः कुम्भीनसीगर्भसम्भूतं मधुसुतं लवणराक्षसं निहत्य भगवद्रामभद्रानुजः शत्रुघ्नः तदधिकृते मधुवनप्रदेशे मधुरां नाम रम्यां पुरीं संस्थाप्य शशासेति रामायणी कथा अत्रानुसन्धेया ।

(ग) कल्याणानि—शुभानि । सानुषङ्गाणि—अनुषङ्गः,—अनुबन्धः सम्बन्ध इत्यर्थः, तेन सह वर्त्तमानानि यानि तथाभूतानि, दीर्घवियोगानन्तरं पुत्रकलत्रादिसम्मिलनरूपकल्याणानि प्रियानुजशत्रुघ्नसम्मेलनरूपकल्याणान्तरेण सानुबन्धानीत्यर्थः भवन्तीति शेषः, एकः अभ्युदयः अभ्युदयान्तरैरनुस्रियते, यतः सम्पत् सम्पदमेवानुबध्नाति विपच्च विपदमिति भावः ।

(घ) इदं सर्वं—पुत्रकलत्रगुरुजनादिसमागमजनितसुखमित्यर्थः । अनुभवन्नपि—प्रत्यक्षीकुर्वन्नपि । न प्रत्येमि—न विश्वसिमि, अधन्यस्य मे एतादृशालौकिकसुखसम्भोगस्यातीवासम्भावितत्वादिति भावः । प्रत्यक्षानुभूतस्यापि अस्य विश्वसनीयत्वे संशयमाकलय्य किञ्चित् विमृश्य च प्रत्ययार्हत्वमपि भवितुमर्हति इति पक्षान्तरमाह यद्वेति ।—यद्वा—अथवा । अभ्युदयानां—मङ्गलानाम् । इयं—खलु कर्पोति सान्वायातु योगपद्येन विभाविकर्पानि यावत् । प्रकृतिः,—स्वभावः, तथा च अभ्युदये हि अभ्युदयान्येव प्रसूते इति नैसर्गिकनियमात् एतस्य विश्वसनीयताऽप्यत्र सङ्गच्छते इति भावः ।

वाल्मीकि। रामभद्र! उच्यतां, किन्ते भूयः प्रियमुपकरोमि? (स)

राम। अतः परमपि प्रियमस्ति? तथाऽपीदमस्तु। (ह)—

पाप्मभ्यश्च पुनातु वर्द्धयतु च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च।

(स) भूयः—पुनः, पुत्रकलत्रादिसमर्पणादन्यदित्यर्थः। प्रियं—प्रीतिकरं कार्य्यम्। उपकरोमि?—सम्पादयामि?, किं ते ममाधुना उपकर्त्तव्यमवशिष्टमस्ति, तत् ब्रूहीति भावः।

(ह) अतः परमपि—एतस्मात् जायाऽपत्यादिसम्मेलनजनितप्रियानुष्ठानाद् अधिकमपि। अपि—प्रश्ने। प्रियं—प्रीतिजननम्। अस्ति?—वर्त्तते किम्?, नास्त्येवेत्यर्थः। तथाऽपि—एतदतिरिक्तप्रीतिकरविषयाभावेऽपि। इदं—वक्ष्यमाणप्रकारं, भरतवाक्यमिति यावत्। अस्तु—भवतु।

अथ भरतवाक्यं प्रस्तौति पाप्मेति।—माता इव जननीव, माता यथा पुत्रादीनां मङ्गलविधात्री सुखदायिनी च भवति, तथैवेत्यर्थः, सर्वभूतधात्री निखिललोकपालयित्री मही इव धरित्री वा, तथा गङ्गेव च भागीरथीव च, जगतः लोकस्य, सर्वेषां प्राणिनिचयानामित्यर्थः, मङ्गल्या च कल्याणजननी च, मनोहरा च रमणीया च, कौतुकोद्दीपकविविधाख्यायिकापूर्णत्वात् मनसः सुखदा च इत्यर्थः, सा इयं वाल्मीकिप्रभृतिमहर्षिकानुमोदिता सुप्रसिद्धा उत्तररामचरितरूपा, कथा प्रबन्धः, पाप्मभ्यः जननाद्याभ्यासागारभ्योऽपि पापेभ्यः, पुनातु पवित्रीकरोतु, जगदिति शेषः, श्रेयांसि च मङ्गलानि च, वर्द्धयतु जनयतु सर्वेषां सामाजिकजनानामिति शेषः, प्रजानामपापत्वे श्रेयोभूयस्त्वे च नृपस्यापि तत्फलभागित्वात् भवत्समीपे प्रार्थयमानेनात्र [illegible], "वासुदेवकथा राजन्। पुत्रान्पौत्रान् पुनाति हि। वक्तारं प्रच्छकं [illegible] तथा।" इति श्रीमद्भागवतोक्ते वासुदेवकथा यथा [illegible] पुनाति, इयं रामकथा अपि तथा इति तात्पर्यम्, [illegible] नानाविधवर्णिता [illegible] विविधोपाख्यान [illegible] कौतुकोद्दीपका च भवतु, तथैतस्या मङ्गलत्वं मनोहरत्वञ्च [illegible] "[illegible] पुनाति [illegible] तथा" इति पाठः [illegible]

तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥ २० ॥

[इति निष्क्रान्ताः सर्वे] ।

इति सम्मेलनं नाम सप्तमोऽङ्कः ॥ ७ ॥ (क)

समाप्तमिदं महाकविभवभूतिविरचितमुत्तररामचरितं नाम नाटकम् ।

निखिलशब्दार्थतत्त्वाभिज्ञस्य इत्यर्थः, निखिलवेदार्थतत्त्वाभिज्ञस्येत्यर्थो वा । परिणतप्रज्ञस्य परिणता परिपाकं गता भगवत्पादारविन्दपरिचितेत्यर्थः, प्रज्ञा बुद्धिर्यस्य तथोक्तस्य अलौकिकसमाधानसमुद्भासितस्येत्यर्थः, तदन्यथाऽस्य रसानुकूलशब्दयोजनानैपुण्यं न सम्भवेदिति भावः, कवेः भवभूतेः, इमां प्रसिद्धां रामायणरूपाम्, अभिनयैः अधुना आङ्गिकादिभिः चतुर्भिरवस्थाऽनुकारैः, "भवेदभिनयोऽवस्थाऽनुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥" इति दर्पणात् विन्यस्तरूपां वि विशेषेण, न्यस्तं निहितं, रूपं स्वरूपं यस्याः तथोक्तां ताम्, प्रदर्शितप्रकाराम् इत्यर्थः, सम्यगभिनीतामिति यावत्, एतां सम्प्रति सर्वसभ्यसमभिनीयमानाम्, इमां मद्रचितां, अपरापरैर्भूतपूर्वैर्दृष्टामपि प्रत्यक्षं दृष्टां, वाणीं रूपकाख्यां भारतीमित्यर्थः, रामचरितरूपामिति यावत्, परिभावयन्तु समालोचनया रचयन्तु, भगवद्वाल्मीकिविरचितरामायणानुगतत्वात् एतन्नाटकमपि लोके सुखकरं समादरणीयञ्च भवतु इति भावः । ("तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपाम्" इति पाठान्तरम्) । [अत्र माङ्गल्यत्वमनोहरत्व-रूपसाधर्म्यद्वयसम्भाव्य नावा गङ्गया च साकमेतत्कथायाः अवैधर्म्यमाश्रित्य पूर्णोपमाऽलङ्कारो सजातीयसङ्कीर्णौ । किञ्च लोकेऽस्मिन् पुनातु वर्द्धयतु इति प्रार्थनायां लोट् विधानात् "चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा" इतिवत् केचिदाशंसितस्य भग्नप्रक्रमतादोषस्य नावसरः, भरतवाक्ये हि सर्वत्र लोट् व्यवहारो दृश्यते, न लुट्, "चिरं जीवतु" इत्यस्य तु तथात्वाभावादिति विभाव्यम्]। शार्दूलविक्रीडितं वृत्तम् ।

(क) सम्मेलनं नाम—रामसीताकुशलवशत्रुघ्नादीनां परस्परसमागमात्मकं इति नाम्ना प्रसिद्धः । सप्तमोऽङ्क इति—समाप्त इत्यर्थः इतिशब्दः समाप्तौ ।

इति पण्डितकुलपतिना श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण विरचिता

मुग्धबोधिनी नामोत्तररामचरितटीका समाप्ता ।

अथ सप्तमाङ्कस्य सङ्क्षेपः।

अथ लक्ष्मणः रङ्गस्थलं प्रविश्य, अद्य खलु भगवता वाल्मीकिना स्वप्रभावेणाद्य सदेवासुरा भूतग्रामाः सन्निधापिताः, तेनाहमार्य्येणादिष्टो यत्, भगवान् वाल्मीकिरप्सरोभिः प्रयुज्यमानां स्वकृतिं द्रष्टुमस्मानुपनिमन्त्रितवान्, अतस्त्वं त्वरितं भागीरथीतीरे समाजसन्निवेशं विधेहि, किञ्च चन्द्रकेतुर्य्यथार्हमासने उपविशति, वत्सौ कुशलवावपि तादृशमासनमुपवेशयितव्यौ इति। तन्निर्देशानुसारतो मया सर्व्वेषां समुपवेशनं समुचितस्थानेष्वेव कृतमिति, राज्याश्रमनिवासेऽपि मुनिव्रतमार्य्य राघव वाल्मीकिगौरवादितः एताभिरास्यत इति च व्यजिज्ञपत्। रङ्गप्रेक्षकेषु सभास्थलमुपविष्टेषु रामोऽपि राजासनमलञ्चकार। ततः सूत्रधारः प्रविश्य, आर्षज्ञानमयेन चक्षुषा समुद्वीक्ष्य मया यथार्थमुपनिबद्धं करुणाद्भुतरसमेतत् रामचरितं, काव्यगौरवात् भवद्भिरवधातव्यमिति भगवता वाल्मीकिः निर्द्दिश्य विज्ञापयामास। एतदाकर्ण्य रामः, भगवतः प्रज्ञामयानि वचांसि अव्याहतानि भवन्तीत्युक्त्वा सूत्रधाराय च विशदीकृत्याभिदधे।

अथ वैदेही, हा आर्य्यपुत्र! हा कुमार लक्ष्मण! अशरणा सामरण्ये आपदा आसन्नप्रसवा, तेनाहमिदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिपामि, इति करुणं परिदेवनामाकर्ण्य, अहो! दुर्व्विषहमेतद्वचनमिति निर्भरं करुणञ्च विलपिते लक्ष्मणे देवी वैदेही राजा रामेण विजने वने परित्यक्ता प्रसववेदनां सोढुमशक्नुवती भागीरथ्यामात्मानं निमज्जतीत्युक्त्वा सूत्रधारः निववृते।

तदाकर्ण्य विशीर्णेऽनुते रघुपतौ वचनमपि नास्य देवि। इत्युन्मादिनि सति, आर्य्य! नाटकमिदमित्युक्त्वा लक्ष्मणे तं समाश्वासयितुमुद्यते। तदा रामः [illegible] कथं तदात्मानं विस्मृतवान्।

अथ पृथ्वीभागीरथ्यौ दारकद्वयमुत्सङ्गे निधाय सीतया सह समाश्वसनायागमताम्, [illegible] च [illegible] दारकद्वयं प्रसूय [illegible] सीताम्। [illegible], हा आर्य्यपुत्र! इति [illegible] [illegible]। तदा [illegible] अपीति [illegible]। [illegible] अथ [illegible] [illegible] ततो [illegible] [illegible], [illegible]।

वत्से। सीदस्व, रामभद्रसदृशौ ते पुत्रकौ सञ्जाताविति। तदा सीतामुखात् को हि मे पुत्रकयोः संस्कारकर्म विधास्यति? इत्याकर्ण्य रामः वशिष्ठमस्कृतानां रघुसन्ततीनामिदानीं सन्कर्तुरभावमभिज्ञाय परं विलपितवान्। तदा तु देव्यौ आहतुः, सन्यत्यागात् परमेवावां भगवतो वाल्मीकेः तव पुत्रकावर्पयिष्याव, असौ हि त्वत्पुत्रयोः यथोचितं संस्कारं सविधास्यतीति। ततः सीतामादाय गङ्गापृथ्व्यौ अन्तर्दधाते।

अथ सीतायाः लोकान्तरप्रयाणमवलोक्य रामः मोहमुपागतः। लक्ष्मणस्तु तदा, भगवन् वाल्मीके! आर्य्यस्य जीवनमपहर्तुं किं भवता ईदृशं काव्यमुपनिबद्धम्? इत्युक्त्वा सबाष्पगद्गदं विललाप। ततो नेपथ्ये आतोद्यकमपनीयतामधुना, पश्यन्तु सर्वे स्थावरजङ्गमाः वाल्मीकिनिबद्धं पवित्रमाश्चर्य्यमिति वागुदभूत। तदा लक्ष्मणः विलोक्य आह, अहो! अन्तरीक्षे देवा ऋषयश्च अद्भुतमेतत् द्रष्टुं समवेताः सञ्जाताः, यतः देवी सीता गाङ्गाम्भसामभ्यन्तरात् पृथ्वीगङ्गाभ्यां सह समुदेतीति।

अत्रान्तरे नेपथ्यभाषितेन गङ्गापृथ्व्यौ प्रणताः वधूः सीतामरुन्धतीहस्ते समर्पयामासतुः। ततः सौमित्रिः, आर्य्य! पश्य पश्येदमाश्चर्य्यमित्युक्त्वा रघुमणिं मूर्च्छितं समवलोक्य यदा तस्य मूर्च्छामपनेतुमैहत, तदा अरुन्धती सीतया सह सवेगं रङ्गमागत्य आह वत्से सीते! अज्ञाशीलतां विमुञ्च, मोहमुपागतः स वत्सः रामः त्वं प्रियस्पर्शेन पाणिना सैव सैव समुज्जीवयेति।

तदाकर्ण्य ससम्भ्रमा सीता समम्भ्रममुपसृत्य रामशरीरम्, तेन च रामः कियद्दि समाश्वस्य सानन्दमाह भोः! किमेतत्? कथं देवी। इत्युक्त्वा सलज्जमाह अये! अम्बा सर्वे गुरवश्च समागताः। तदा अरुन्धती आह, वत्स! रामभद्र! एषा भगीरथगृहाधिदेवता भवति च सुप्रसन्ना भगवती गङ्गा इयञ्च ते श्वश्रूर्भगवती वसुन्धरेति। तदा भागीरथी नेपथ्यभाषितेनाऽऽह रामभद्र, जगत्पते! आलेख्य प्रदर्शनावसरे मामभिलक्ष्यार्पितं "सा त्वमम्ब! यथारामरुन्धतीव सीतायाः शिवानुध्यानपरा भव" इति भवतो वचनमनपाल्याऽहमिदानीमनृणा सञ्जाता इत्याह। वसुन्धराऽपि तदा आह, वत्स! प्रभो! अहमपि, "भगवति! वसुन्धरे! श्लाघ्यां दुहितरं सवेक्षस्व जानकीम्" इति भवद्वचनमनुपालितवत्यस्मीति। ततः रामः अहो! कृतं तु देव्यौ वन्दे इति।

अथारुन्धती पौरजानपदान् सम्बोध्याऽऽह, वैयाघ्रगिरा देवतासमस्तताः च न विधृततन्त्रा माता परिगृहीता, किमत्र भवन्तोऽभिमन्यन्ते? इति। तदा लक्ष्मणः संज्ञान निर्मितानां प्रजानां नातोऽनमस्कार देवानाञ्च पुष्पवृष्टिनिरस्यानं श्रुत्वा दृश्यतेऽथवा, रामाद! किमन्यत् तत्रतोऽपि पवित्रा साधात् सीता ४॥

धारिणीं स्वीकृत्याधुना अध्वरं सम्पादयत। रामस्तु, [illegible]
वाल्मीकि सर्वथा गुरुजनानां सविधे कृतमभवो [illegible]
सर्वेषां गुरुजनानामपूर्वं समागममवलोक्य निर्भरानन्दमनुभवन्ती।

अवान्तरे नेपथ्ये कलरवं श्रुत्वा [illegible]
शत्रुघ्न समुपस्थित इति वाल्मीकिराह। युगपत् [illegible]
रघुनाथ सातिशयं विषाद। तदा वाल्मीकिराह, [illegible]
करोमि? इति। तदाकर्ण्य राम आह, नास्ति किमप्यन्यत् [illegible]
यदभियाचे, तथाप्येवमेवदेव भवतोऽभिप्रायं तत्, भगवन्! [illegible]
भागीरथीव श्रोतृणां सततं पापानि नाशयतु, श्रेयांसि च वितरतु, [illegible]
विरचितामिमाञ्च रामचरितकथा सन्त एव बुधा, [illegible]
[illegible]वन्।

इत्यग्रिपशास्त्राटवीसञ्चरणपञ्चानन कुलपतिकल्प "सि, ए" इत्युपाधिक
श्रीमज्जीवानन्दविद्यासागर भट्टाचार्य्यविरचितायां, तदात्मजाभ्यां
श्रीमदाशुबोधविद्याभूषण श्रीनित्यबोधविद्यारत्नाभ्यां
परिवर्त्तित परिवर्द्धितायां सुखबोधिनी
व्याख्यायाम् उत्तररामचरितव्याख्यायां
सप्तमोऽङ्कः ॥ ७ ॥

